
मीमांसादर्शनम्

भाग २



तारा प्रिंटिंग वर्क्स

टीकापञ्चकसनाथीकृतं महर्षिजैमिनिप्रणीतं

मीमांसादर्शनम्

द्वितीयो भागः

डॉ॰ महाप्रभुलाल गोस्वामी

तारा बुक एजेन्सी

वाराणसी

मीमांसादर्शनम्

MĪMĀṂSĀ DARŚANA

Prāchyabhārati Series—22

THE MĪMĀṂSĀ DARŚANA

OF

MAHARṢI JAIMINI

With Śābarabhāṣya of Śabaramuni with the commentaries of Tantravārtika of Kumārila Bhaṭṭa and its commentary Nyāyasudhā of Someśvara Bhaṭṭa, Bhāṣyavivaraṇa of Govindāmṛtamuni and Bhāvaprakāśikā, the Hindi translation by Mahāprabhulāla Gosvāmī.

Foreword by

Prof. SRI BADARI NATH SUKLA
Former Vice-Chancellor
Sampurnanand Sanskrit University, Varanasi.

Edited with an introduction by

Dr. MAHĀPRABHULĀLA GOSVĀMĪ
M. A., Ph. D., D. Litt., Nyay-Vyakarana-Sahitya-Vedantacharya, Mimamsa Shastri (Gold Medalist)
PROF. & HEAD, Department of Philosophy
Sampurnanand Sanskrit University, Varanasi

Volume II

TARA BOOK AGENCY
VARANASI

ISBN 81-85403-07-4 (Vol. II)
ISBN 81-85403-60-0 (Set)

Published by
Tara Book Agency
Kamachha
Varanasi 221 010

First Edition

Price Rs. 125.00

Printed at
Tara Printing Works
Kamachha
Varanasi-221010

प्राच्यभारतीग्रन्थमाला—२२

टीकापञ्चकसनाथीकृतं महर्षिजैमिनिप्रणीतं

मीमांसादर्शनम्

भट्टसोमेश्वरकृतया न्यायसुधाख्यटीकयोद्भासितया
श्रीकुमारिलभट्टनिर्मितया तन्त्रवार्तिकव्याख्ययालङ्कृतेन
श्रीगोविन्दामृतमुनिविरचित-भाष्यविवरणव्याख्यया भूषितेन
श्रीमहाप्रभुलालगोस्वामिकृतभाष्यभावप्रकाशिकाहिन्दीव्याख्यान्वितेन
श्रीशबरमुनिविरचितभाष्येणानुगतम्

आचार्यश्रीबदरीनाथशुक्ल प्ररोचनया समेता

राष्ट्रपतिसम्मानितेन एम० ए०, पीएच० डी०, डी० लिट्० इत्युपाधिविभूषितेन
न्याय-व्याकरणसाहित्यवेदान्ताचार्यमीमांसाशास्त्रिणा विद्यावाचस्पतिना
श्रीमहाप्रभुलालगोस्वामिना विस्तृतभूमिकयालङ्कृत्य
सम्पादितम्

द्वितीयो भागः

तारा बुक एजेंसी
वाराणसी
२०४४ तमो विक्रमाब्दः

प्रकाशक :

तारा बुक एजेन्सी
कमच्छा
वाराणसी-२२१०१०

प्रथमसंस्करणम्

मूल्यम् : १२५.००

मुद्रक :

तारा प्रिंटिंग वर्क्स
कमच्छा, वाराणसी

पण्डितप्रवराचार्यश्रीबदरीनाथशुक्लमहोदयानाम्

अभिमतिः

दर्शनशास्त्रं भारतीयमनीषायाः महनीया उपलब्धिः। दृश्यते अधिगम्यते अनेनेति व्युत्पत्त्या दर्शनशब्दोऽधिगमसाधनमभिधत्ते, अधिगमशब्दश्च सविषयार्थकतया स्वविषयभूतमर्थं स्मारयति, स चार्थः यो निखिलजनस्पृहणीयस्य निःश्रेयसस्य साधकभूतः, वैदिके, समग्रे वाङ्मये च धर्मब्रह्मणोः याथार्थ्येन परिज्ञानमेव निःश्रेसाय कल्पते। अनयोरुभयोः प्रतिपादकः शब्दराशिः ब्रह्मप्रतिपादकतया दर्शनशब्देन धर्मप्रतिपादकतया च शास्त्रशब्देन व्यवह्रियमाणतां प्राप्य दर्शनशास्त्रमिति संज्ञां लभते।

मीमांसाशब्दः पूज्यविचारबोधकतयाऽभियुक्तैरभ्युपेतः, विचारस्य पूज्यता, विचार्यस्य पूज्यतायत्ता, मीमांसाया विषययादृते धर्मब्रह्मणी निर्दिष्टया दिशा निःश्रेयसनिष्पादकतया निःसंशयं पूज्ये, तदालम्बनेन प्रवृत्ततयैव मीमांसायाः पूज्यविचारत्वम्।

विषयभेदेन मीमांसा द्विविधा, पूर्वमीमांसा उत्तरमीमांसा च। तयोराद्या निरुपपदेन मीमांसाशब्देन, द्वितीया च वेदान्तशब्देन व्यपदिश्यते, तत्र मीमांसा परम्परया वा धर्मपराणि वेदवचांसि विशदयति, वेदान्तश्च ब्रह्मप्रतिपादकपराणि उपनिषत्संज्ञकानि वेदवचनानि व्याचष्टे।

मीमांसादर्शनं महर्षिणा जैमिनिना प्रणीतं द्वादशाध्यायेषु प्रसृतम्, यदाश्रित्य भाष्यवार्तिकप्रभृतयोऽनेके व्याख्याग्रन्था विद्वद्भिः व्यरचिषत, वेदान्तदर्शनं बादरायणेन रचितं चतुर्ष्वध्यायेषु विततम्, यदाश्रयेण भाष्यभामतीप्रभृतयो महनीया ग्रन्था विपश्चिद्भिरग्रन्थिषत।

प्रस्तुतं मीमांसादर्शनं धर्मप्रतिपादकतया निःश्रेयसप्रत्ययोपयोगितां दधानं लोकोपयोगितामपि बिभर्ति, यतो हि तत्प्रतिपाद्यो धर्मो 'धर्मो विश्वस्य जगतः प्रतिष्ठा', धारणाद्धर्मः, धर्मो धारयते प्रजाः, इत्यादिवचनैः विश्वधारकतया प्रजाधारकतया च समुदघोषि, धर्मो हि यथाशास्त्रमनुष्ठीयमानो भौमं दिव्यं च

पुरुषार्थं सम्पादयन्, अनुष्ठातारं निःश्रेयसेन योजयति, अतो मीमांसादर्शनस्यान्य-सर्वदर्शनापेक्षया निरतिशयं महत्त्वम्, एतन्महत्त्वादेव तन्मूलकं वाङ्मयमति-विशालं सहस्राधिकश्रेष्ठव्याख्याविवरणादिग्रन्थबहुलम् ।

धर्मस्य तत्त्वं निहितं गुहायाम्, कर्मणो गहना गतिः, इत्याद्युक्तिः धर्मस्य दुर्बोधतायाः प्रसिद्धतया तत्प्रतिपादकस्य मीमांसाशास्त्रस्य दुरधिगमता निर्वि-वादा, दुरधिगमत्वादेव तत्र विद्वद्भिः विविधान् वृहतो लघूंश्च व्याख्योपव्याख्या-ग्रन्थान् रचयितुं प्रयत्नो व्यधायि ।

वर्तमाने समये संस्कृतशिक्षायाः विरलप्रचारतया संस्कृतवाचोऽवबोधे जनानां दुर्बलतया आकलय्य पण्डितप्रवरेण श्रीमता महाप्रभुलालगोस्वामिना भाष्यभावप्रकाशिकाभिधया हिन्दीभाषया तदर्थस्पष्टीकरणमावश्यकमन्वभावि, स्वकीयप्रतिभावैभवबलेन च तत्र प्रशंसनीयं साफल्यध्यवापि, प्रकृतं प्रकाशनं केवलसंस्कृतभाषायामप्रगल्भानां हिन्दीविदामेव हिताय न भवेत्, किन्तु संस्कृते प्रौढ़प्रज्ञानां पण्डितपुरुषाणामपि मनोमोदाय भवितेति धिया अत्र शबरमुनेः भाष्यस्य कुमारिलभट्टस्य तन्त्रवार्तिकस्य भट्टसोमेश्वरस्य न्यायसुधायाः गोविन्दा-मृतमुनेः विवरणस्यापि समायोजनमकारि ।

अहमीदृशस्य महतो ग्रन्थस्य बहुजनवेद्यतासम्पादनप्रयासाय मेधाविनं श्रीगोस्वामिनं सानन्दमभिनन्दामि तारायन्त्रालयस्वामिनं पण्ड्या श्रीरमाशङ्कर-महोदयं चैतस्य प्रकाशने औदार्यालम्बकाय सम्भाजयामि ।

आचार्यबदरीनाथशुक्लः

प्रस्ताविकम्

अपौरुषेयस्य वेदस्य मीमांसापि अपौरुषेयैव । कदाचित् राज्यसञ्चालनार्थं समाजस्य परिनिष्ठितस्वरूपस्याभिवृद्ध्यर्थमनुशासनक्रमेषु दर्शनस्य महान् समादर आसीत् । धर्मप्रधानमेतद्भारतवर्षम् । जन्म एव धर्मसाधनार्थमन्येषाञ्च धर्मे प्रवृत्त्यर्थञ्च, भोगस्य सर्वथाऽकिञ्चित्कारत्वात् । मृत्युपर्यन्तं धर्मानुगृहीतं कर्म लोकानां वर्तत इत्यत्र नास्ति काऽपि विप्रतिपत्तिरिति जानन्ति सारस्वतबान्धवाः । स्वाध्यायाध्ययनविधिना कृतेऽपि वेदाध्ययने वेदवाक्यमननार्थं मीमांसितधर्मतत्त्वावगत्यर्थं गुरुकुले वासपूर्वकं मीमांसादिशास्त्राणामध्ययनमपि तथैवापरिहार्यमिति विचारानन्तरमेव गुरुगृहादागत्य गृहस्थाश्रमे प्रवेशस्य नियम आसीत् ।

'अथातो धर्मजिज्ञासेति सूत्र-व्याख्यानावसरे शबरस्वामी सुस्पष्टमभिदधाति 'गुरुकुलान्मा समावर्तिष्ट कथं नु वेदवाक्यानि विचारयेदित्येवमर्थोऽयमुपदेशः । ·· वेदमधीत्य त्वरितेन न स्नातव्यम्, अनन्तरं धर्मो जिज्ञासितव्यः' (शाबरभाष्यम् १।१।१) एतावता ज्ञायते यत् मीमांसादिदर्शनशास्त्राध्ययनमपि नित्यविधिविहितमेवासीदिति । प्रस्थानभेदस्य रुचिवैचित्र्यमूलकत्वात् 'श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तितः' इति कर्णाकर्णिकयोपलब्धवचनेन वेदमीमांसात्मकानां दर्शनानामपि गुरुगृहे वासपूर्वकमेव विचारो नियत आसीत् ।

'रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां
नृणामेको गम्यस्त्वमसि पयसामर्णव इव ।'

इति पुष्पदन्तवचनेन केनापि पथा गच्छतां परिशेषे यथा सागरे एव जलानां गमनं भवति तथैव स्वात्मरूपावाप्तिरेवावशिष्यते । व्यवहारः धर्मानुरूपाचरणमेवोत्कृष्टं पुष्पं फलमित्यत्र नास्ति विवादावसरः । फलार्थमाम्रपोषणं परं छाया-गन्धादिकञ्चानुषङ्गिकरूपेणोपलभ्येते, विहितकर्माचरणजन्यधर्मेणार्थानामानुषङ्गिकी प्राप्तिरिति कथन्नामार्थाद्यवाप्तिः निवार्यमाणा भवेत्, यदि धर्माचरणं न क्रियते तदाऽग्रजस्य धर्मस्यावमानेन तदनुजानां व्याकोपस्यनिराकरणकथैव वृथेति । विद्याध्ययनं न केवलं स्वात्मज्ञानार्थं परलोकमात्रप्राप्त्यर्थम्वाऽपि तु कृतविद्यो ब्रह्मचारी शास्त्रज्ञानेन धर्मानुष्ठानेन पोष्यवर्गाणां परिरक्षणं समाजानुरञ्जनात्मकञ्च परमं प्रयोजनमनुगृह्णाति । यथेदानीं विनैव मननमनवगतशास्त्रार्थोऽवश्यकर्तव्यत्वमननुसन्धाय आगमस्वाध्यायव्यवहारात्मकत्रिरत्नशून्यः लोकानामुपदेशाय सर्वथा सन्नद्धस्तिष्ठति, अहो विचित्रैव कुटिलपथजुषां शास्त्रभ्रष्टानां वराकाणां गतिः, नूनमेवान्धस्येवान्धलग्नस्य पदे पदे विनिपातः सुनिश्चितः दृश्यते च प्रतिक्षणमनधिकारिणां राजनीत्यादिज्ञानशून्यानां गतिस्तदनुयायिनाञ्च

पथपरिभ्रष्टानामहमहमिकयाहोपुरुषिकामात्रसम्पन्नानां गुरुजनालोचकानां छात्राणां प्रमाणपत्रपरिमण्डितानामपि दुर्गतिरिति। शास्त्रे पोष्यवर्गपरिरक्षणमेव धर्मानुष्ठानस्य फलम्, पोष्यवर्गश्च मनुनैवोक्तः—

पिता माता गुरुर्भ्राता प्रजादीनाः समाश्रिताः।
अभ्यागतोऽतिथिश्चैव पोष्यवर्गा उदाहृताः॥ (मनु० ७।१३४)

'श्रुतवृत्ते विदित्वाऽस्य वृत्तिं धर्म्यां प्रकल्पयेत्'। (७।१३५) 'श्रुतवृत्ते' इत्यस्य व्याख्यानं 'शास्त्रज्ञानानुष्ठाने' इति तत्रैव कुल्लुकभट्टः। 'धर्म्यां वृत्तिं = यथा कुटुम्ब-स्वधर्मस्यावसादनं न भवति', (मेधातिथिः) अतः प्रजाधर्मं न व्यवच्छिन्नेदित्येव मीमांसायाः प्रयोजनमिति राज्ये तादृशी समितिरासीद् दार्शनिकानामूहापोहकुशलानां मनीषिणामित्यवश्यकर्तव्यानुशासने नासीद्विरोधो न वारोपितपरम्परावादिविरोधिनामरोपित-पाण्डित्यानां शास्त्रज्ञानशून्यानां जनानां समाजेषु गुरुकुलेषु राजामात्यवर्गेषु च समादरः। उपदेशानधिकारिणश्च यतस्ते अधीतिबोधाचारणशून्या इति। शास्त्रज्ञानां मनीषिणां रक्षणचिन्ता च आसीत् समाजस्य राज्ञो वा यतस्ते धर्मसाधनायैव व्यापृतचित्ता आसन् 'संरक्षेत्सर्वतश्चैनं पिता पुत्रमिवौरसम्' (मनु० ७।१२५)।

भोजराजकृतेन **'कामधेनु'** नामकेन स्मृतिसंग्रहाख्यग्रन्थेन एतदवगम्यते यत् एष एव स्मृतिशास्त्रस्य प्रथमः ग्रन्थ इति। एतद्ग्रन्थोपक्रमणिकायां ग्रन्थप्रणयनेतिवृत्तमेवादावुट्टङ्कितम्। भोजदेवस्य दौहित्रः प्रथितयशसो विक्रमादित्यस्य पुत्र उज्जयिनीश्वरो मतादित्य अकाल एव कालग्रस्तः समभवत्। श्मशानं प्रति संस्कारार्थं प्रस्थिते शरीरे कश्चिद्बौद्धो योगी अभिप्रेत-साधनस्योत्तमं योगमभिसन्धाय योगप्रभावेण तत्कायप्रवेशं कृतवान्। राजा श्मशाने जीवितः सञ्जात इति महानानन्दोत्सवः समजनि। कदाचिदसौ मतादित्यः यज्ञार्थं सन्नद्धः सन् प्रोवाच, भारतवर्षीयाः पण्डिताः स्वीयं धर्म-शास्त्रीयग्रन्थमादायोज्जयिन्यामागच्छन्तु। धर्मशास्त्रीयग्रन्थानामालोचनपूर्वकं तेषामिहैकमत्योत्कृष्टयज्ञस्यानुष्ठानं भवितेति। अमात्यवर्गाणां प्रयत्नेन राजाज्ञायाः प्रतिपालनं सञ्जातम्। पण्डितानां निर्देशेन शिप्रातटे विपुल-यज्ञस्य व्यवस्था सम्पन्ना, यज्ञदीक्षा-दिनमप्यध्यवसितम्। मध्ये कस्मिंश्चिद्दिवसे कौशलेन राजधान्याः दूरदेशे पण्डितानां प्रस्थानं निश्चितम्। प्रस्थिते तद्दूरदेशे मतादित्यस्याज्ञाक्रमेण यज्ञेषु प्रदीप्ते वह्नौ धर्म-पुस्तकानां विनाशः सञ्जातः। अनन्तरं बौद्धमतप्रचारे सर्वथा सन्नद्धः अत्याचारे प्रावर्तिष्ट। भोजराजः एतद्वृत्तान्तं कर्णाकर्णिकयाकर्ण्य कथमेतादृशी दौहित्रस्य दुर्मतिः समभवदिति भृशं चिन्तयन् गणनया सोमादित्यस्य मृत्युं तत्काये बौद्धप्रवेशश्चावगत्य परकायप्रवेशविघटकं यज्ञानुष्ठानं प्रावर्तयत्। आरब्धे यज्ञे शरीरं प्राणवियुक्तं समजायत। अनन्तरं भारतीय शेषग्रन्थनिवहं संग्राहय्य पण्डितः 'कामधेनुरिति' नामकं ग्रन्थं व्यरचयत्। तत्र कण्ठस्थविषयानपि समवेशयत्। कामधेनुप्रारम्भे एका विस्तृततालिकापि दृश्यते। अन्यापि ग्रन्थानां विनाशकथा नैव रोहिता ऐतिहासिकानाम्। एवमेव महा-

राष्ट्रेऽपि सह्याद्रिखण्डपुस्तकानां विनाशः समभवत् । अलेक्जेन्द्रियविख्यातपुस्तकालयोऽपि भस्मतां गतः ।

मीमांसा हि धर्ममीमांसैवेति अस्य शास्त्रस्य पुनरुज्जीवनं भट्टकुमारिलकृतमेवेत्यत्र नास्ति विचिकित्यावसरः । यदि वेदस्यापौरुषेयत्वं प्रामाण्यञ्च न स्यात्तदा का कथा वैदिकदर्शनानां भवेदिति तु मनसाऽप्यचिन्त्यमेव ।

अस्मिन् भागे अपूर्वस्य विध्यर्थस्य च प्राधान्येन समीक्षा वर्तते तत्रापूर्वस्यादृष्टेत्यादिभिः शब्दैरभिधानं तत्तदाचार्यनिवहैः कृतम् । अदृष्टस्य कार्यमात्रं प्रति कारणत्वञ्चाङ्गीकृतम् । पूजितविचारवचनस्य मीमांसाशब्दस्य प्रेयःश्रेयसोर्धर्मविचारः एवप्रवृत्तिनिमित्तम् । मीमांसाशब्दश्च बहुधा श्रुतिषु प्रयुक्तो वर्तते, तथा हि—'सैषा मीमांसाऽग्निहोत्र एव सम्पन्ना', 'सैषानन्दस्य मीमांसा भवति' । विना विचारञ्च सन्देहनिवृत्तिः प्रयोजनप्राप्तिश्च न सम्भाव्यते । मीमांसयेतिकर्तव्यताभागो नूनमेव ज्ञायतेऽत एवोक्तं भट्टपादेन 'इतिकर्तव्यताभागं मीमांसा पूरयिष्यति। आचार्यः शबरो द्वादशाध्यायीमबीभषत् । भर्तृमित्रभवदासादिप्रणीता वृत्तय आसन् यासां नामेदानीं कर्णपथमपि नावतरति । शाबरभाष्यात्प्राचीनोपवर्षवृत्तिरासीदित्यभिप्रयन्ति, परं सापि नेदानीमुपलभ्यते । अधुना आचार्यकुमारिलपादैः रचिता द्वादशाध्याय्याः वृत्तय उपलभ्यन्ते, प्राभाकरं तु केषाञ्चिदेवोपलभ्यन्ते । प्रभाकरं गुरुरिति कथयन्ति जनाः । उभयोर्वैमत्यन्त्वनुपदेव स्फुटम् । प्रभाकरगुरुव्यपदेश एव कर्णाकर्णिकया श्रूयते, परं कौमारिलमतमेव सर्वत्राद्रियते, कौमारिलमतमवलम्ब्य रचितानां ग्रन्थानामपि वैपुल्यं वर्तते । कुमारिलपादस्य युक्तिश्च गूढतमा ।

अपूर्वः—तन्त्रवार्तिकेऽपूर्वस्वरूपनिरूपणप्रसङ्गे उक्तम् यत्—'प्रधानकर्मनामङ्गकर्मणां वा प्राक्करणात्स्वर्गादिप्राप्त्ययोग्याः पुरुषाः, क्रतवश्च स्वर्गकार्ययोग्याः । तामुभयीमप्ययोग्यतां व्युदस्य प्रधानैरङ्गैश्च योग्यतोपजन्यत इति असंशयं सर्वेणाभ्युपगन्तव्यम् । असत्यां तस्यामकृतसमत्वप्रसङ्गात् । सैव च पुरुषगता क्रतुगता वा योग्यता शास्त्रेऽस्मिन्नपूर्वमित्युपदिश्यते (तं० वा० पृ०) ।

वेदे स्वर्गादिसाधनभूतानि अनेकानि कर्माणि विहितानि श्रुतिप्रामाण्यादेव एतदवगम्यते यत् तत्तत्फलस्य प्राप्तये इमानि कर्माण्यनुष्ठेयानि । तत्प्रामाण्यमवगत्य जनाः तत्तत्फलप्राप्तये विहितकर्मानुष्ठानाय तत्पराः भवन्ति । असिद्धस्वरूपाणि तत्तत्फलानि काम्यत्वेनाभीप्सितानि भवन्ति, तत्र वेदे यथाप्रतिपादितं तथा तत्तत्कर्मानुष्ठानेन तत्तत्फलान्युपभुङ्क्ते जन इति; परं कर्मानुष्ठानं त्वधुना क्रियते फलावाप्तिश्च आगतवति काले मृते वा सम्भव्यते । तथा तत्फलभोगेच्छुः तानि तत्तत्फलसाधनत्वेन निर्दिष्टानि यावन्नानुतिष्ठति तावदनुपलब्धकर्तृत्वः तत्फलभोगयोग्योऽपि न भवति । तामिमां कर्मनिष्ठां पुरुषनिष्ठाञ्चायोग्यतां दूरीकर्तुं तत्तत्कर्मणि स्वस्वाङ्गसहितान्यनुष्ठेयानि

भवन्ति । अनुष्ठितेष्वपि तत्तत्कर्मसु क्षणिकत्वात् तैः कर्मभिः कालान्तभावि फलं प्रति साधनत्वं तेषां न सम्भवति, यतः कारणेन यत्कार्यं जायते तदव्यवहितपूर्ववर्तिना कारणेनावश्यमेव भवितव्यम् । अग्निहोत्रादिकर्मणामतुष्ठानमधुना क्रियते, तज्जन्य-फलावाप्तिश्च मृत्योरनन्तरं बहुकालव्यवधानानन्तरं जायते । सन्ति एवंविधान्यपि वेद-विहितानि कर्माणि येषां फलमस्मिन्नेव जन्मनि जायते, परं तत्रापि कालकलानां व्यवधानं सोढव्यमेव, पुत्रपश्वादिफलजननेन कर्मणा कालकलाव्यवहितैव फलप्राप्तिरिति अनुष्ठानाव्यवधानेन न फलं जन्यत इति कथमपि तत्कार्यं प्रति तस्य कारणत्वं न संघटते । यदि कर्मानुष्ठासमनन्तरक्षण एव पुत्रपश्वादीनामुत्पत्तिर्भवेतदा कार्याव्यवहितपूर्ववर्तित्वं कारणस्य स्यान्नाम । तत्कार्यनिष्ठजन्यतानिरूपितजनकता तु वेदे श्रूयत एव तथा हि "स्वर्गकामो दर्शपूर्णमासाभ्यां यजेत", "चित्रया यजेत पशुकामः" "पुत्रेष्ट्या यजेत पुत्रकामः इत्यादिवेदवचनैः तत्कार्यं प्रति कारणत्वं तु सुस्पष्टमुक्तं वेदे । अतोऽर्थापत्ति-प्रमाणेन यागादिभिरुत्पाद्य। क्वचिदाश्रितः यावत्फलोत्पत्तिस्थितिमान् वस्तुविशेषः स्वीकर्तव्यः। तदुत्पन्नो वस्तुविशेषः योग्यं फलमुत्पाद्य विनाशमेति । स च वस्तुविशेष एव अपूर्वपदेनादृष्टपदेन वाभिधीयते । फलोत्पत्तये स्वीक्रियमाणोऽयमतिशयोऽपूर्वो वा फलमुत्पादयितुं स्थितस्सन् प्रभवति । किञ्च यागादिक्रियाव्यापारा न यज्ञेषु वर्तते, यतः स्वोत्पत्तितृतीयक्षणे एव तस्य विनष्टत्वात्, आश्रयनाशे च तदाश्रितस्यातिशयस्यापि नाशात् विफलं तत्कल्पनं स्यात्, तन्त्रवार्तिके उक्तम्—

> शक्तिः कार्यानुमेयत्वात् यद्गतैवोपयुज्यते ।
> तद्गतैवाभ्युपेतव्या स्वाश्रयान्याश्रयापि वा ।। त० वा० पृ० ३४९ ।

स्वर्गयागयोः कार्यकारणभावस्यान्यथाऽनुपपत्त्या श्रुतार्थापत्तिप्रमाणगम्यत्वमपूर्वस्य । यद्यपि नैयायिकैरपि अदृष्टस्य कारणत्वमङ्गीकृतन्तथापि मीमांसाशास्त्रस्य प्रधानभूतोऽयं विषय इति । यतः "अथातो धर्मजिज्ञासा" इत्युपक्रमवाक्येन धर्मस्यैवादौ जिज्ञासा कृतेति । पुरुषो हि अन्येच्छानधीनेच्छाविषयत्वेन आत्मने सुखमभिलषन्नेव तत्साधन-मन्विष्यति, अनन्तरं निर्दिष्टफलप्राप्तये तत्साधनानुष्ठानाय प्रवर्तते कृतिमान् यथा-वत्साधनमनुतिष्ठति, अनुष्ठिते च सपरिकरे तत्साधने फलमुत्पद्यते । उत्पन्ने च फले यथायोग्यमुपभुङ्क्ते चानुष्ठाता । स्वर्गादिकं चेतिहासादितोऽवगत्य अधिकारिपुरुष-विशेषस्तमभिलषति इच्छँश्च तत्साधनं मृगयते, अनन्तरं श्रुत्याद्यन्वयेन यागादिकं तत्साधनत्वेन जानाति, अवगत्यापि क्षणिकस्य तस्य कारणस्य कालान्तरभाविफल-साधनत्वे विचिकित्सन् तज्जन्यं कालान्तरभावि फलपर्यन्तमवस्थायिनं कञ्चन वस्तु-विशेषं शास्त्रसिद्धं विज्ञायानुष्ठाने प्रवर्तते, नात्र सन्देहो यत्स्वर्गादिफलान्तरालत्वेन यदि कश्चित्पदार्थो न भवेत्तदा स्वर्गादेः यागादिसाधनवकथैव वृथेति, यदि फलं न स्यात्तदा बहुवित्तायाससाध्ये यागादिकर्मणि केषामपि सचेतसां प्रवृत्तिर्न भवेदित्यवितथं वचः । यदि लोको न प्रवर्तेत वेदविहिते कर्मणि तदा वेदस्य प्रवर्तकत्वं विहन्येत, वैयर्थ्यञ्च

सम्पद्येत । "यतोऽभ्युदयनिःश्रेयससिद्धिः" (वै० द० १।१।२) इति सूत्रञ्च व्याकुप्येतातोऽपूर्वं स्वीकरणीयमेव । इदञ्चापूर्वं न केवलं विहितकर्मणः फलसिद्धये एवाङ्गीक्रियतेऽपि तु निषिद्धकर्मणोऽप्याचरणे नरकादि फल जननार्थमङ्गीकरणीयमेव । पापपुण्ययोरुभयोरपि अपूर्वशब्देन व्यवहारो भवति । धर्माधर्मशब्देन चैतयोरेव व्यवहारो जायते ।

प्रशस्तपादवचनमप्यनुसन्धेयमेव—'धर्मपुरुषगुणः कर्तुः प्रियहितमात्रहेतुः, अतीन्द्रियोऽन्त्यसुखसंविज्ञानविरोधी, पुरुषान्तःकरणसंयोगविशुद्धाभिसन्धिजः वर्णाश्रमिणां प्रतिनियतसाधननिमित्तः, तस्य तु साधनानि श्रुतिस्मृतिविहितानि वर्णाश्रमिणां सामान्यविशेषभावेनावस्थितानि द्रव्यगुणकर्माणि' (प्र० भा० पृ० १३८) अधर्मोऽप्यात्मगुणः, तस्य तु साधनानि शास्त्रे प्रतिषिद्धानि धर्मसाधनविपरीतानि हिंसानृतस्तेयादीनि' (प्र० भा० पृ० १४२) ।

एतेन फलोदयपर्यन्तस्थायी फलोत्पत्तिविनाश्यः अतीन्द्रियो धर्मः निषिद्धक्रियाजन्यश्चाधर्मं इति तत्तत्फलोद्देशेन विधीयमानानां कर्मणां षाष्ठसर्वाङ्गोपसंहार-न्यायेन (पू० मी० ६।३।२) पूर्वोक्तराङ्गकलापसहितानामेवानुष्ठानं प्राप्तम् । तत्र श्रुत्यर्थपाठस्थानमुख्यप्रवृत्त्याख्यैः क्रमबोधकप्रमाणैः परिप्रापितक्रममनुसृत्यैवाङ्गान्यनुष्ठीयन्ते । येन क्रमेणानुष्ठानं तेनैव क्रमेणापूर्वोत्पत्तिः । तद्यत्र यदङ्गमनुष्ठीयते तदव्यवहितपूर्वक्षण एव तत्कृतमपूर्वं यजमानात्मनि जायते, तच्च संस्काररूपेण सन्तिष्ठते एतेषाञ्चाङ्गजन्यत्वादङ्गापूर्वाणीति नाम । एवं प्रधानयागानुष्ठानन्तरं प्रधानकर्मणोऽपूर्वमुत्पद्यते, एतस्योत्पत्त्यपूर्वं प्रधानापूर्वं वेति शास्त्रीयो व्यवहारो जायते । अङ्गापूर्वाणि प्रधानापूर्वाण्यपि जाआत्यमानानि मन्येव समवयन्ति । अन्तिमस्याङ्गस्यानुष्ठानानन्तरं सर्वाणीमानि मिलित्वा अपूर्वाणि किञ्चनापूर्वं परमापूर्वाभिधेयं तत्रैव संस्काररूपेण उत्पादयन्ति । परमापूर्वे तूत्पन्ने तेषामङ्गापूर्वाणां प्रधानापूर्वाणां नाशः । परमापूर्वमेव फलोत्पत्तिपर्यन्तमवस्थाय फलमुत्पाद्य विनाशमेति । तत्रापि विजातीयतत्तत्फलोद्देशेनानुष्ठीयमानेभ्यः कर्मभ्यो विजातीयतत्तत्फलजननशक्तिमन्त्येवापूर्वाणि यागकर्तुरात्मनि समवयन्ति ।

एतत्तु अनुसन्धेयम् यत् व्रीहियवतिलमाषबीजानामेकस्मिन् सुक्षेत्रे युगपत्परस्परमेलनेन एकत्वेऽपि सहकारिकारणसमवधाने सति स्वं स्वं कालं प्राप्य स्वस्वसामर्थ्यमनतिक्रम्य व्रीह्याद्यङ्कुराणामेवोपजननम्, न साङ्कर्येण व्रीहिभ्यो यवाङ्कुराणाम्, यवेभ्योऽन्याङ्कुराणाञ्चोत्पत्तिः, एवमेव स्वर्गपुत्रपशुवृष्ट्यादिविविधफलजनकापूर्वाणामेकत्र यजमानात्मनि समवधानेऽपि फलोत्पत्तिकाले तत्तदपूर्वेभ्यः तानि तान्येव फलान्युत्पद्यन्ते विनैव साङ्कर्यम् शक्तीनां तादृशस्वभावात् । उक्तञ्चाभियुक्तैः—

'शक्तयस्सर्वभावानां नानुयोज्याः कथञ्चन ।'

अतः यागाद्यनुष्ठानजन्यं निर्दिष्टफलजननसमर्थं कर्तुरात्मसमवेतं फलैकनाश्यं मीमांसकसिद्धान्तसिद्धमपूर्वमस्ति । अयमाशयः—

शब्द एव धर्मे प्रमाणम्, शब्दश्च वाक्यात्मकः। वाक्यञ्च पदसमष्ट्यन्तम्। तथा च सर्वं पदं स्वतन्त्ररूपेण धर्मं प्रतिपादयति एकः पदविशेषो वेति संशयः। पूर्वपक्षिभिरुच्यते यद् एकं पदमेवापूर्वं प्रतिपादयति, अपूर्वस्य फलत्वे तु फलेन सह यदा सर्वेषां पदानां सम्बन्धो वर्तते तदा पदसमष्टिरेव अपूर्वप्रतिपादिका।

अस्मिन् संशये सिद्धान्तिनः कथयन्ति यत् अपूर्वं प्रत्यक्षसिद्धः पदार्थो नास्ति, अपि तु अर्थापत्तिप्रमाणकल्पनीयं कल्पनीयवस्तु स्थले च फलाधिक्याभावे लाघवकल्पनैव तत्रावलम्बनीया, विधिवाक्यस्थप्रत्येकं पदं यदि अपूर्वस्य प्रतिपादकं स्यात्तदा अनेकेन पदेनानेकस्यादृष्टस्य कल्पना करणीया, अनेकापूर्वकल्पनायाञ्च कस्याप्यधिकस्य प्रयोजनस्य सिद्धिः न सम्भाव्यते, अतोऽनेकस्य पदस्यादृष्टप्रतिपादकत्वे कल्पनागौरवन्दोषः स्यात्, अतः एकस्यैव पदस्यापूर्वप्रतिपादकत्वमर्थात् अपूर्वफलेन साक्षात्सम्बन्धः, अन्यानि च पदानि तदपूर्वेण सह साक्षाद्भावेनान्वयी, एकस्यैव पदस्य सर्वाणि अङ्गभूतानि। एकस्य पदस्यापूर्वप्रतिपादकत्वे तु **विनिगमनाविरह**दोषः प्रसज्यते इत्यपि न सुसङ्गतम्। यतः, कल्पनालाघवमेव विनिगमकम्, तथा विधिवाक्यमेकं पदमेवापूर्वप्रतिपादकम्। यागादिकमपूर्वद्वारैव फलजनकं भवतीति यागादिधर्मस्य फलसाधनतासिद्ध्यर्थमपूर्वं विचारपदवीमधिरोहति। यागादेः धर्मस्यापूर्वद्वारा फलसाधनतासिद्धौ धर्मस्य स्वरूपभेदविचारस्य साफल्यम्। अत एव नु श्रीमन्माधवाचार्यः न्यायमालायां प्रतिपादयति 'अपूर्वस्यैव धर्मत्वात्।' धर्मस्य विचारे अपूर्वस्यापि धर्मत्वस्वीकारात् अपूर्वविचार आवश्यकः। विधिवाक्यस्थैकस्यैव पदस्यापूर्वप्रतिपादकत्वे विधिवाक्यस्थेन द्रव्यवाचकेन, गुणवाचकेन, कर्मवाचकेन शब्देनैवापूर्वं प्रतीयतेऽथ वा भावनाप्रतिपादकशब्देन अपूर्वस्य बोधो जायते। यथा 'सोमेन यजेत', 'हिरण्यमात्रेयाम् ददाति, इत्यादिस्थले हिरण्यम्, सोमश्च द्रव्यवाचके 'तस्मात् सुवर्णं हिरण्यं धार्यम्' अत्र सुवर्णशब्दः गुणवाचकः 'श्येनेनाभिचरन् यजेत', 'चित्रया यजेत', 'चित्रया यजेत' इत्यादिषु श्येनचित्रादिशब्दः कर्मवाचकः। पूर्वपक्षिदृष्ट्या द्रव्यादिवाचकशब्दैनैवापूर्वप्रतीतिरुचिता, यतः, अपूर्वं फलं साध्यं वा, सिद्धपदार्थेनैव साध्यं साधितं भवतीति सिद्धपदार्थस्यैव करणता सम्भवतीति द्रव्यादिवाचकशब्द एवापूर्वप्रतिपादकः। पक्षान्तरे च 'यजति', 'ददाति' इत्यादयः शब्दाः क्रियावाचकाः, क्रियायाः साध्यत्वात् स्वयं सिद्धत्वं नास्ति तस्याः, क्रियायाः सिद्धत्वाभावादेव अपरस्य साधनत्वं तत्र न सम्भाव्यते, यतः, स्वरूपसिद्धिरेव पराधीना यस्याः, सा कदापि अपरस्य साधनं न भवितुमर्हति, अतः द्रव्यादिरेवापूर्वस्य साधनं भवतिमर्हति इति द्रव्यादिवाचकशब्देनैवापूर्वं प्रतीयते। अस्मिन् प्रसङ्गे जैमिनिः कथयति 'भावार्थाः कर्मशब्देभ्यः क्रिया प्रतीयते' २।१।१। कर्मप्रतिपादकशब्दः भावार्थं भावनामेव प्रतिपादयति, तेनैवापूर्वं प्रतीयते। श्येनादयः शब्दाः कर्मप्रतिपादकाः ते च न भावार्थाः, सन्तोऽपि न ते कर्मशब्दाः। अत एवास्मिन् सूत्रे कर्मवाचकशब्दस्य निर्देशः क्रियते, यजत्यादयः शब्दा एव भावार्थकर्मशब्दाः, यतः इमे

शब्दा भावनां कर्म चाभिदधाति । 'यजेत' इति कथने तु यागेन फलोत्पादना भवेत् इति प्रतीयते । 'यजेत' इत्यत्रांशद्वयम् लिङ्त्वम्, आख्यातत्वञ्च । इत प्रत्ययः लिङ्लकारस्य विभक्तिरिति मध्ये लिङ् वर्तते । सर्वेषां लकाराणां क्रियावाचकत्वात् लिंङ्लकारस्यापि क्रिया येन मत्प्रवृत्तिरुत्पद्येत । किन्तु वैदिकविधिस्थले एवं वक्तुं न शक्यते, वेदस्यापौरुषेयत्वात् वेदविधिस्थले शब्दे एव कश्चिद्व्यापारः स्वीकरणीयः, लौकिक-नियोगस्थले 'किम्' इति कथनेन कार्ये प्रवृत्तिर्भवति, तथा चात्र शब्दमाहात्म्येनैव पुरुषस्य प्रवृत्तिर्भवतीति शाब्दी भावना उच्यते । इयमपि भावना यागादि-क्रियायां पुरुषस्य प्रवृत्तिमुत्पादयति, तथा चार्थभावनास्थले यथा कर्तुः व्यापारः भावना एवमेव शब्दव्यापारः शब्द भावनेति । अर्थभावनास्थले स्वर्गरूपं फलमुत्पद्यमानम् कर्ता च तस्य प्रयोजकः, शब्दभावनास्थले च शब्दस्य व्यापारः पुरुषप्रवृत्तेरुत्पत्तिसाधनमिति शब्दः तत्प्रयोजक इति शब्दभावनापि प्रयोजकव्यापारः ।

शब्दभावनायाः अर्थभावनायाश्च 'भाव्यम्' 'करणम्' 'इतिकर्तव्यता' चेति अंशत्रयम् । यथा 'पचेत्' इत्युक्ते कस्य पाकं कुर्यात्, केन पाकं कुर्यात्, कथं पाकं कुर्यात्, अर्थात् किम्, केन, कथम, इति त्रिविधा आकाङ्क्षा जागर्ति, यथाक्रमे तस्य समाधानमपि—'अन्नं पचेत्' 'अग्निना पचेत्', 'अग्निं प्रज्वालयेत्' 'अग्नौ पाकपात्रं स्थापयेत्', 'जलं संजोजयेत्', 'दर्व्या संघट्टयेत्' एतद् इतिकर्तव्यतया पचेत्, तथैवेहापि भावयेत् = उत्पादयेत् इति कथनानन्तरं किमुत्पादयेत्, केन उत्पादयेत्, कथमुत्पादयेत् इति त्रिविधा जिज्ञासा भवति, एतस्यैव भाव्यम्, करणम्, इतिकर्त्तव्यता चोच्यते, तत्र समग्रार्थभावना शब्दभावनाभाव्या अर्थात् उत्पाद्या जायते, यतः शब्दभावनया अर्थ-भावना = यागादौ प्रवृत्तिरुत्पादिता भवति, लिङादिज्ञानं तस्य कारणम्, यतः लिङादिज्ञानेनैव पुरुषस्य प्रवृत्तिर्भवति, अर्थवादज्ञाप्या प्रशस्तैव तस्य इतिकर्त्तव्यता । एवमेव आर्थीभावनास्थले स्वर्गादिकं फलम् भाव्यम्, साध्यम् वा, यागादिक्रिया तस्य करणम्, प्रयाजानुयाजादिकं तस्य इतिकर्तव्यतारूपम् तथा चार्थवाचकाख्यातेनापूर्वस्य प्रतीतिर्भवति धात्वर्थश्च तत्करणम् । 'यजेत्' इत्यत्र 'यज्' धातुः, 'इत्' प्रत्ययः उभयोर्मेलनेन एकं पदं भवति । इत्प्रत्ययस्याख्यातांशेन या भावना अभिधीयते तस्याः यज् धात्वर्थे याग एवान्वयः तत्प्रत्यासन्नत्वात्, अतः तं प्रत्येव तदाकांक्षते । प्रत्यासन्नोऽप्यसौ यदि प्रयोजनसाधनाक्षमो भवेत्तदा तं परित्यज्य अन्यं प्रति आकांक्षा स्यान्नाम । किन्तु धात्वर्थयागः स्वर्गादिफलसाधानयोग्य इति आख्यातवाच्यभावनया एकपदोपात्तया एव अर्थात् यज् धातुः इत् प्रत्ययश्चोभयं मिलित्वा एकं पदं भवति यज् धातोः इत्प्रत्ययस्य चैकपदोपात्तत्वम् । क्रियात्मकत्वेन यागस्य साध्यत्वात् करणायोग्यत्वमिति कारणे द्रव्यस्यैव कारणत्वप्रतिपादनमुचितम्, तथापि द्रव्यादिक्रियाश्रयणं विना करणं न भवितु मर्हतीति क्रियाऽपेक्षितैव, द्रव्यादिना यागक्रियैवोपकृता भवति अर्थात् यागक्रियैव निष्पद्यते इति प्रत्यक्षदृष्टम् । तथा च द्रव्यादिनापूर्वोत्पत्तिर्न सम्भाव्यते, यागस्य

साध्यस्वरूपत्वेऽपि द्रव्यादिना निष्पादितत्वात् फलसाधनता तस्य सम्भवति न समान-पदोपात्तो धात्वर्थो यागो यदि भावनायाः कारणं भवेच्चेत् तदा पदान्तरबोधित-द्रव्यादिकं प्रति भावनायाः कारणपेक्षा न भवितुमर्हति. यतः यागस्यान्तरङ्गत्वमिति तस्यैव प्रथममपेक्षितत्वम्, इति कारणे धात्वर्थ एवार्थभावनायाः करणम्, अत एव माधवाचार्यः कथयतिः—

'धात्वर्थः करणं तस्यां समानपदवर्णितः'

'चित्रया यजेत', 'दर्शपूर्णमासाभ्यां यजेत' इत्यादिषु तृतीया-श्रुत्या प्रकृत्यर्थ-धात्वर्थो यागादेरेव कारणत्वं प्रतीयते। तथा च आख्यातप्रत्यययुक्त-भावनावाचक-कर्मशब्देनैवापूर्वस्य प्रतीतिः स्यात्, स एव च विधेर्विषयोऽर्थात् फलसाधनरूपेण वेदविधिना विहितो भवेत्। अत एव सूत्रकारेऽभिधत्ते 'एष ह्यर्थो विधीयते'। अपि च 'यजेत' इति भावार्थ-कर्मवाचक-पदं साकाङ्क्षम्, अतः, 'यजेत' इति कथनेन किम्, केन, कथम् इति त्रिविधा आकांक्षा भवति तत्र च भाव्यस्य (साध्यस्य) करणस्य, इति कर्तव्यतायाश्च पूर्त्यर्थं प्रकरणपठितस्य सकलशब्दसन्दर्भस्य भावनया फलेनापूर्वेण सह अन्वयो जायते, किन्तु द्रव्यादिशब्देनापूर्वप्रतीतिस्वीकारे प्रकरणपठित-सकल-शब्द-सन्दर्भस्यापूर्वेण सहान्वयो न संघटते, यतः, द्रव्यगुणादेः सिद्धशब्दत्वेन तच्छ्रवणे किम्, केन, कथमित्येतादृशी आकाङ्क्षा नोदेति। अतः, भावार्थकर्मशब्देनैवापूर्वस्य प्रतीति-र्भवति। सोऽपि अपूर्वस्य वाचको नास्ति, अपि तु बोधको ज्ञापको वा, अतः अपूर्वस्यार्था-पत्तिप्रमाणसिद्धत्वमेव न तु शब्दवाच्यत्वमपि। पूर्वपक्षिमताङ्गीकारे यज्ञीयद्रव्यादेर-पचारे = नाशे न प्रतिनिधित्वं भवितुमर्हति, किन्तु सिद्धान्तिनो मतानुसरणे प्रतिनिधि-द्वारकमपि कार्यं निर्वहति।

भावार्थककर्मशब्देनैवापूर्वस्य प्रतीतिर्भवतीति सिद्धान्तस्वीकारे भावनान्वित-धात्वर्थेन यथाऽपूर्वस्य प्रतीतिर्भवति तथैव 'स्वर्गकामः दर्शपूर्णमासाभ्यां यजेत' इत्यादि-वाक्ये 'स्वर्गकामः' 'दर्शपूर्णमासः' इत्यादिपदैरपि अपूर्वस्य प्रतीतिः स्यात्, यतः, धात्वर्थस्येव पदानामपि भावनया सहान्वयो भवति, भावनया सह अन्वये धात्वर्थस्येव अन्यपदैरपि अपूर्वस्य प्रतिपादनं भवेत्। सर्वस्य भावनया सहान्वयेनापूर्वप्रतिपादकत्वे विनिगमनाविरहो भवेदिति भावनासम्बन्धयुक्तो धातुरेवापूर्वस्य प्रतिपादकः, न तु द्रव्यादिशब्दोऽपूर्वस्य प्रतिपादक इति कथनमसङ्गतम्।

नामपदस्य सिद्धरूपत्वात् तेषामुत्पत्तौ क्रियाया अपेक्षा न वर्तते, तथा च क्रिया-पदेन नामपदस्य कोऽप्युपकारः न सिद्ध्यतीति नामपदस्य क्रियापदेन सहान्वयपूर्वकम-दृष्टप्रतिपादकता भवेदेव, तथा च यावन्ति नामपदानि तावतामदृष्टानां कल्पना स्यात्. सर्वेषां तुल्यबलत्वात् एकेनादृष्टस्योत्पत्तिर्नापरेणेति कथनं युक्तिविरुद्धमेव। अनेकविवा-दृष्टकल्पनेऽपि फलाधिक्यं न जायते, तथा नामपदस्यापि अपूर्वप्रतिपादकत्वम् इति

कल्पनायामापाततोऽनेकादृष्टकल्पना स्वीकरणीया। तथा चानेकादृष्टकल्पनास्वीकार-पक्षस्यासमीनत्वमेवेत्युक्तं तन्त्रवार्तिके—

'बहवदृष्टप्रसंगाद्धि धर्मो नेष्टः पदे पदे' । त० वा० पृ० ३२९ ।

क्रियापदस्यापूर्वप्रतिपादकत्वे कल्पनालाघवं भवति। यतः, क्रिया साध्यरूपा, द्रव्येण च क्रियैव साध्यते इति न कल्पनामात्रमपि तु प्रत्यक्षसिद्धम्, उक्तं माधवाचार्यैः—

'द्रव्याद्युपकृतिर्दृष्टा धात्वर्थोत्पादनात्मिका'

धात्वर्थयागादिक्रियोत्पादनेनैव द्रव्यादेरुपकारो भवति इति प्रत्यक्षसिद्धमेव। अतो नामपदेनापूर्वप्रतीतिः न स्वीक्रियते। अवशिष्टस्याख्यातस्यैवापूर्वप्रतिपादकत्वम्। तथा च नास्ति विनिगमनाविरहप्रसङ्गोऽपि। यतः, विवादास्पदीभूतैकाधिकपक्षप्रसङ्गे यद्ये-कतरपक्षपातिनी युक्तिर्न भवेत्तदैव विनिगमनाविरहो जायते। यदैकाधिकस्य पक्षस्य प्रसक्तिर्नास्ति तदा का कथा विनिगमनाविरहस्य। विवादास्पदीभूतस्यैकाधिकपक्षस्य सत्त्वेपि धात्वर्थस्य भावनाकरणत्वप्रतिपादने बलवत्तरैकश्रुतिप्राधान्यं संरक्षितमेक, पक्षान्तरे द्रव्यादेर्भावनाकरणत्वप्रतिपादने वाक्यार्थस्य विधायकत्वमेव स्वीकृतं भवति। किन्तु वाक्यापेक्षया श्रुतेः प्राबल्यमिति एकपदश्रुतिलभ्यस्य धात्वर्थस्य भावनाकरणत्व-मस्त्येवेति माधवाचार्यः कथयति—'धात्वर्थः करणं तस्यां समानपदवर्णितः' अतः कल्पनालाघवरूपयुक्तिबलात् एकपदश्रुतिरेव विनिगमिकेति।

अत्रेयमाशङ्का यत् प्रमाणसिद्धः अपूर्वनामकः पदार्थो यदि भवेत्तदा कल्पनागौरव-भियाऽपूर्वस्य भावार्थकर्मशब्देनैव प्रतीतिरिति वक्तुं शक्यते। एतस्य समाधानार्थ-मेवाचार्यः कथयतिः—'दर्शपूर्णमासाभ्यामिति तृतीयया दर्शपूर्णमासयागस्य स्वर्ग-साधनत्वं प्रतीयते, इयं करणे तृतीया, साधकतममेव करणमर्थात् क्रियानिष्पत्तौ प्रधानं साधनम्। यागश्च क्रियाविशेषः, क्रिया च क्षणिका, उत्पत्तिपरक्षणे एव विनश्यति, यागक्रियाफलं स्वर्गश्च, क्रियया इहैव नोत्पद्यते। स्वर्गो हि देहान्ते प्राप्यते, तथा च यागेन कथं स्वर्गप्राप्तिः सम्भाव्यते, फलोत्पादकस्य साधनस्य फलाव्यवहितपूर्वस्थितिः आवश्यकी, श्रुतिप्रतिपादितस्य यागादेः स्वर्गादिफलसाधनत्वस्य च अस्वीकारो न भवितुमर्हति, यतः, तथा सति श्रुतेरप्रामाण्यं स्यात्, तस्मात्क्षणिकयागादिकर्मणः फलोत्पत्त्युपपत्त्यर्थं कापि कल्पनाऽङ्गीकरणीयैव, तद्वशादेवापूर्वस्य सिद्धिर्भवति। श्रुतार्था-पत्तिरेवापूर्वास्तित्वे प्रमाणम्, तथा चार्थापत्तिप्रमाणायत्तैवापूर्वपदार्थसिद्धिः। अपूर्वः न कश्चिदपूर्वः पदार्थोऽपि तु प्रधानकर्मणोऽङ्गकर्मणश्चानुष्ठानात् पूर्वं अनुष्ठाता पुरुषः स्वर्गप्राप्तेरयोग्यस्तिष्ठति, क्रत्वादिकमपि स्वर्गरूपकार्यस्योत्पादनायोग्य एव, अनुष्ठिते च प्रधानकर्मणि अङ्गकर्मणि अनुष्ठातृपुरुषगता अनुष्ठेयकर्मगता चायोग्यता दूरीकृता भवति योग्यता चापादिता भवति—इतिस्वीकर्तव्यमेव यतः, तथाऽस्वीकारे वेदविधिरेव व्यर्थः स्यात्। योग्यतोपादनं विना अयोग्यः पुरुषोऽयोग्यं च कर्मोभयमपि व्यर्थमेव,

अत एव नु जैमिनिः प्रतिपादमति—'चोदना पुनरारम्भः' (२।१।५) पूर्वोक्तोभयगता योग्यतैवापूर्वशब्देनोच्यते । कुमारिलेनोक्तमेव—

कर्मभ्यः प्रागयोग्यस्य कर्मणः पुरुषस्य वा ।
योग्यता शास्त्रगम्या या परा साऽपूर्वमिष्यते ॥ त० वा० पृ० ३४५ ।

अर्थात् अनुष्ठानात्पूर्वं फललाभायोग्यः अनुष्ठेयं च कर्मफलदानायोग्यम्, अनन्तरं योग्यताधानमेवापूर्वम् योग्यता च शास्त्रगम्या, यदि अपूर्वस्य साक्षात्फलसाधनत्वं स्वीक्रियते तदा यागस्य फलसाधनत्वं नायाति, तथा चापूर्वं यागादेः व्यापारविशेष एव, तस्य व्यापारः तादृशस्य व्यापारिणः व्यवधायकं करणं न भवितुमर्हति, यतः, करणं सर्वत्र व्यापारविशिष्टमेव भवति, करणस्य क्रियाविशेष एव व्यापारः करणस्य नाशे च निराश्रितो व्यापारो न स्थातुमर्हति, तथा चापूर्वस्य स्वर्गादिफलसाधनभूतस्य यागादेर्व्यापारत्वं नास्ति अपि तु शक्तिविशेषरूपत्वमेव । शक्तिरियमर्थापत्तिप्रमाण-कल्प्येति अपूर्वमर्थापत्तिप्रमाणसिद्धम्, यथा अग्नेर्निर्वापनानन्तरमपि अग्निनोत्तापिते जले दाहिका शक्तिस्तिष्ठति बहुक्षणव्यापिनी, तथैव यागादिक्रियाया विनाशानन्तरमपि अपूर्वं यागादिजन्यं शक्तिरूपं यागकर्तुरात्मनि फलाव्यवहितपूर्वक्षणं यावत् अवतिष्ठते । अतो नाप्रामाणिकोऽपूर्वपदार्थः ।

इदञ्चापूर्वम् अङ्गापूर्वम्, उत्पत्त्यपूर्वम्, समुदायापूर्वम्, परमापूर्वं फलापूर्वम्वेत्यादि-भेदेन बहुविधम् । दर्शपूर्णमासममावस्यायां पूर्णिमायाम्वाऽनुष्ठीयतेऽमायामनुष्ठितस्य भागत्रयम् पूर्णिमायाममुष्ठितस्यापि भागत्रयम्, एतेषां भागानामपि बहुभिः अङ्गकर्मभि-र्निष्पत्तिर्भवति, सर्वा अपि क्रियाः परक्षणे एव विनश्यन्ति, अतः सर्वाभिरङ्गक्रिया-भिरेकमेकमपूर्वमुत्पद्यते, अङ्गक्रियाजन्यञ्चापूर्वमङ्गापूर्वम् तथा च षडपूर्वाणि उत्पद्यन्ते, एतत्सर्वमुत्पत्त्यपूर्वम्, दर्शस्य त्रिभिर्यागैः यत्त्रीणि अपूर्वाणि उत्पद्यन्ते ततोऽपि एकम-पूर्वमुत्पद्यते एवमेव पूर्णमासयागादपि एकमपरमपूर्वमुत्पद्यते । तदपूर्वमैव समुदायापूर्वम् । एतदतिरिक्तमेकमपूर्वं परमापूर्वं फलापूर्वं वा कल्प्यते, एतदेवापूर्वं फलोत्पत्तिपूर्वक्षण-पर्यन्तं तिष्ठति फलोत्पत्तौ विनश्यति, फलापूर्वं परमापूर्वं विना वा यागस्य फल-जनकत्वं न सिद्ध्यति, अतः परमापूर्वं कल्पनीयम्, अवान्तरापूर्वं विना परमापूर्वं नोपपद्यते इति तदपि कल्पनीयमेव । तथा च परमापूर्वस्य, समुदायापूर्वस्य उत्पत्त्य-पूर्वस्याङ्गापूर्वस्य च पूर्वपूर्वापूर्वोपपादनार्थं परपरापूर्वमवश्यमङ्गीकरणीयम् । उक्तं भट्टमहाशयेनः—

प्रमाणवन्त्यदृष्टानि कल्प्यानि सुबहून्यपि ।
अदृष्टशतभागोऽपि न कल्प्यो निष्प्रमाणकः ॥ त० वा० पृ० ३५१ ।

आचार्योदयनेनापि अपूर्वस्यावश्यकत्वमङ्गीकृत्यैवमुक्तमिदानीं न्यायमतेनोच्यते :—

पूर्वोक्तयुक्त्या यज्ञादिकर्मणः फलं स्वर्गादिरिति स्वीकारेऽपि यज्ञादिकर्मजन्या-लौकिकस्यादृष्टस्य धर्माधर्मयोर्वा स्वीकारस्य प्रयोजनं नास्ति ।

चिरध्वस्तं फलायालं न कर्मातिशयं विना ।
सम्भोगो निर्विशेषाणां न भूतैः संस्कृतैरपि ॥ (न्या० कु० ९)

चिरध्वस्तं कर्म, अतिशयं शक्तिविशेषं विना वा फलोत्पादने समर्थो न भवति, (अर्थात् बहुपूर्वं ध्वस्तं कर्म कामपि शक्तिं कमपि व्यापारम्वाऽनुत्पाद्य कालान्तरभाविफलोत्पादने समर्थो न भवति । संस्कृतभूतेन भोग्यवस्तुना वा निर्विशेषात्मसकलस्य संभोगो निष्पन्नं भवितुं, नार्हति, चिरविध्वस्तकर्मजन्यव्यापार, यदि भोग्यान्नपानादौ स्यात् तदा एतद्व्यापारयुक्तभोग्यसकलवस्तुना अदृष्टशून्यात्मना एकस्मिन्नेव वस्तुनि नानाविधभोगस्य उपपत्तिर्न भवेत् ।

"स्वर्गकामोऽश्वमेधेन यजेत" इत्यादिवेदविधिना यज्ञादिकर्मसमूहः इष्टस्य स्वर्गस्य हेतुरेवं कर्तव्यकार्यमित्यवगतो भवति । यतः यजेत इत्यत्र लिङ् विधिबोधकः अनेन यागेन इष्टहेतुना कर्तव्यत्वम् एवं गुरुतरदुःखाजनकत्वमिति सिध्यति, इति एतत्कर्मणः फलमशुभं भवितुं नार्हति । अतः—यद्धि अशुभफलजनकन्तत्र एतादृशी यथार्थबुद्धिर्न भवेत् । वेदः—आप्तवाक्यम्, तेन यथार्थबुद्धिरेव भवति । कर्ममात्रमत्यल्पकालस्थायि इति चिरकालं न तिष्ठति । आशुविनाशियज्ञादिकर्मणा परकालवर्तिस्वर्गादिफलोत्पत्तिकालपर्यन्तस्थाप्यदृष्टकारणं कर्म कर्तुः धर्मविशेषः स्वीकरणीय एवान्यथा एतत्कालानुष्ठितं कर्म स्वर्गादिफलाव्यवहितपूर्वं नास्तीति परकाले स्वर्गादिफलस्य जनकः न भवेत् । अदृष्टकारणस्वीकारे एतत्कालेऽनुष्ठितकर्मसमूहोऽप्येतददृष्टेन परोक्षभावेन मध्यवर्तिव्यापारमदृष्टम्वा उत्पाद्य तेन परम्परया परकालीनस्वर्गादिफलस्य कारणं भवति । अत्रायं संशयो भवितुमर्हति एतददृष्टादिकं कुत्र जायते ? यज्ञादिकर्मजनितादृष्टं कर्मकर्तुः जीवस्य, न भोग्यवस्तुनः इतः पूर्वमेतस्योत्तरमेकदा प्रदत्तं पुनरपि इदानीमुच्यते । अदृष्टं कर्मकर्तुः जीवस्य, न भोग्यवस्तुनः । वसन्तपूर्णिमायाः पूर्णचन्द्रदर्शने भावुकभक्तस्य भगवद्विभूतिं मनसि कृत्य भगवत्प्रेम्णि तन्मयता भवति, दुर्जयकामनाया अतृप्तिवशतः विरहिणः मर्मव्यथा भवति, चक्रवाकयुगलं विरहदुःखं विस्मृत्य चन्द्रिकापाने तत्परं भवति[1] । एतत्कारणानुसन्धाने तु यस्य यादृशप्राक्तनकर्मजनितादृष्टम्, तस्य एकेनैव वस्तुना तदनुसारि-फलभोगो भवति । तस्मात् कर्मजनितादृष्टं जीवस्यैव न तु भोग्यवस्तुन इति ।

यथा वह्नौ दाहजनिका शक्तिः स्वीक्रियते तथैव कर्मजनितादृष्टं भोग्यवस्तुनि इति स्वीकारेऽपि क्षतिर्नास्ति । आकाशसंयोगे इन्धनसंयोगे च उभयत्र संयोगत्वधर्मस्य समानत्वेऽपि यथा वह्नौ इन्धनसंयोगे सत्येव अग्निरुत्पद्यते, आकाशसंयोगे च नोत्पद्यते, तथैव भोग्यवस्तुनः समानत्वेऽपि नानाविधजीवस्य कर्मजनितनानाविधादृष्टयुक्तभोग्यवस्तुनः जीवानामनुष्ठितकर्मजनितनानादृष्टप्रभावेण जीवस्य नानाविधभोगशक्तिः सम्पाद्यते ।

---

१. रात्रौ चक्रवाकः चकवाकी च पृथगेव तिष्ठत इति प्रसिद्धिः ।

भोग्ये वस्तुनि यस्य कर्मजनिता यादृशी शक्तिः अदृष्टम्वा जायते, भोग्यवस्तु स्वोयैतादृश-शक्तिवशेन शक्त्यनुसारं तज्जीवस्य भोगं सम्पादयति । अतः शक्तिरदृष्टम्वा भोग्यवस्तुनि स्वीकारेऽपि एकेनैव वस्तुना नानाजीवस्य अनेकविधभोगस्यानुपपत्तिर्नास्ति । भोग्य-वस्तुनि शक्तिस्वोकारपक्षेऽन्या अपि युक्तयः सन्ति । तथा हि—तृणादिदाह्यवस्तुनि अग्निसंयोगे भस्म भवति, अतः दाहानुकूला शक्तिः बह्नावेव स्वीक्रियते । अन्यथा शक्तिहीनवह्निना दाहस्वीकारे प्रतिबन्धकर्मणः सद्भावेऽपि दाहं प्रसज्येत । यद्युच्यते मणिसद्भावस्थले मणिसद्भाववशात् दाहो न जायते, मणिरेव दाहस्य प्रतिबन्धकः, इति मणौ दाहानुकूलशक्तिस्वीकारो नावश्यकः, तथा च मणेरभावः दाहं प्रति कारणमित्येव फलितं भवति, यतः प्रतिबन्धकाभावः भवति कारणम्, यः पदार्थः यस्य प्रतिबन्धकः यस्य वस्तुनः सद्भावे कार्यं न जायते तस्य अभावः तत्कार्यं प्रति कारणम्, किन्तु अभावः कारणम्भवितुं नार्हति, यतः, किमपि वस्तु कस्यापि कार्यस्य कारणं भवति तदा तस्य कारणरूपेणाभिमतस्य वस्तुनः क्रियासम्बन्धो नितान्तमपेक्षितो भवति । कुम्भकारः दण्डेन चक्रभ्रमणं न कुर्यात् तदा सत्यपि दण्डादिकारणसमवधाने तद्वस्तुसकलं घटस्य कारणमुत्पादकम्वा न भवति, अतः साक्षात् परम्परया वा क्रियया सह सम्बन्धप्रयुक्तमेव दण्डादिकं घटस्य कारणम्भवति । अभावश्च निषेधमात्रम्, तत्र विधिरूपता नास्तीति अकिञ्चित्करोऽसौ पदार्थः । अभावे साक्षात्परम्परया वा क्रियासम्बन्धो भवितुं नार्हति, अतः अभावः कस्यापि कारणमपि भवितुं न शक्नोति इति मणिः वस्तुतः दाहस्य प्रतिबन्धको नास्ति । तथा सति मणिः वह्नौ या दाहानुकूला शक्तिस्तां नाशयति अत एव च मणौ दाहप्रतिबन्धकत्वम्, मणौ प्रतिबन्धकशब्दः गौणतयैव प्रयुज्यते, मणिः प्रतिबन्धकशब्दस्य मुख्यार्थो भवितुं नार्हति । फलतः—वह्नौ दाहानुकूला शक्तिरवश्यमेव स्वीकरणीया । वस्तुनि शक्तिर्नास्तीति कथनं साहसमात्रमेव ।

"यजेत स्वर्गकाम" इत्यादौ यागस्वर्गयोः समभिव्यहारात्साध्यसाधनभावः प्रतीयते, परन्तु कालान्तरभाविस्वर्गोत्पादसमये आशुतरविनाशिनो यागस्य साक्षात्त-त्साधनत्वासंभवेन तत्र साधनत्वोपपत्तये अपूर्वं द्वारभूतं कल्पते । चिरध्वस्तं यागादि अतिशयपूर्वं विना स्वर्गादिफलसाधनं नेत्यर्थः । तथा च यागजन्यव्यापारस्य फलपर्यन्त-स्थायित्वस्वीकारेण तद्द्वारा यागादेः तत्साधनत्वोपपत्तिः । न चापूर्वेणैव फलोपपत्तौ यागादेरन्यथासिद्धत्वमिति वाच्यम्, व्यापारेण व्यापारिणोऽन्यथासिद्धत्वाभावात् । अदृष्टसिद्धावपि तस्य भूतधर्मत्वमेव स्वीक्रियते, नात्मधर्मत्वमिति । समीचीनो नियतो भोगः तत्तददृष्टशून्यस्यात्मनो न संभवति, भूतानां सर्वसाधारण्यात् सर्वस्य समानभोगा-पत्तेः । स्वकारणप्रभावोत्पन्नासाधारणस्वरूपविशेषवच्छरीरेन्द्रियादिनियतभोगसाधन-मस्ति । शरीरादीनां नियतफलभोगानुकूलस्वरूपं यदिष्यते तर्कि तेषामतीन्द्रियं स्वरूपं सहकारिविशेषो वेति निराकरणसौकर्याय विकल्पयति—आद्ये ऐन्द्रियकस्वरूपस्याती-न्द्रियत्वाभिधाने व्याघातः स्यात्, न हि ऐन्द्रियकस्वरूपोऽतीन्द्रियस्वरूपोऽभिधातुं शक्यते । द्वितीये अतीन्द्रियसहकारि अपूर्वमिति—

संस्कारः पुंस एवेष्टः प्रोक्षणाभ्युक्षणादिभिः ।
स्वगुणाः परमाणूनां विशेषाः पाकजादयः ॥ (न्या० कु०-११)

प्रोक्षणाभ्युक्षणादिना संस्कारः (शक्तिविशेषः) पुरुषस्येष्टः, परमाणुसकलस्य स्वकीयपाकजविशेषगुणसकलमेव (परमाणोः पाकजरूपरसादयः) विशेषाधायकं भवति । अयमाशयः—पाकजविशिष्टविशिष्टरूपरसविशिष्टविशिष्टभावापन्नपरमाणुसकलात् विशेषकार्यं जायते ।

पूर्वपक्षतया विचारकवचनस्य रमणीयत्वेऽपि व्रीह्यादौ शक्तिस्वीकारे कल्पनागौरवम्भवति । यतः—प्रोक्षणादिजनितशक्तिः यदि व्रीह्यादौ स्वीक्रियते तदा तत्र संख्यानुयायिशक्तिः अर्थात् व्रीहिसंख्यकाः शक्तयः स्वीकर्तव्या भवेयुः । यदेयं शक्तिः कर्त्तरि स्वीक्रियते यदा व्रीहिसंख्यानुयायिनी न भवेदपि तु कर्तृसंख्यानुयायिनी भवेदिति अल्पसंख्यकशक्तिस्वीकारेणापि कार्यं प्रचलेत् । अतः इयं शक्तिः कर्मफलभोक्तरि पुरुषे एव स्वीकरणीया, तथा सति प्रोक्षणमेतच्छक्तिद्वारा परम्परया बहुकालपरवर्तिनोऽवघातस्य निमित्तम्भवेदित्यत्र किमपि बाधकं नास्ति । किञ्च—क्षेत्रस्थधान्यादीनां विनाशस्वीकारेऽपि सकलभोक्तृजीवस्य अदृष्टबलेनैव धान्यपरमाणुना धान्याङ्कुरोत्पत्तिः स्वीक्रियते एवं प्रलयानन्तरं पुनः सृष्ट्यादौ भगवान् भोगार्थं भोगान्ते च मोक्षार्थं जीवस्यादृष्टानुसारमेव सृष्टिं करोति । महाप्रलयेऽपि जीवस्यादृष्टं सर्वथा विनष्टं न भवति, तथा सति पुनः सृष्टेः प्रयोजनमेव नास्ति । भगवान् जीवस्य कर्मानुसारिणः भोगस्य मोक्षस्य च कृते एव विश्वप्रपञ्चं सृजति । श्रवणमननादिरूपभगवदाराधनाबलेन भोगावसाने जीवस्य कर्मजनितसंस्कारस्य समूलक्षये जीवः कृतकृत्यो भवति, जन्मजरामरणादिसंघातेभ्यः परित्राणं प्राप्नोति । एवं माघकर्षितायां भूमौ विशेषशक्तिस्वीकारस्यापि प्रयोजनं नास्ति, यतः, दृष्टहेतुनैव कार्योत्पत्तिसम्भवे अदृष्टहेतुकल्पनाया अनुचितत्वात्, माघमासकर्षितभूमौ माघस्य सूर्यतापः एवं शिशिरसंयोगो भवतीति भूमौ दृष्टविशेषरूपरसादिसञ्चारो भवति, दृष्टरूपरसादिसंचारेणैव क्षेत्रे उत्तमशस्यस्योत्पत्तिर्जायते, इति भूमौ शक्तिविशेषस्वीकारोऽनावश्यकः ।

उक्तरीत्या प्रतिबन्धकाभावस्य कारणत्वस्वीकारेणैव प्रतिबन्धकस्थले कार्यापत्तिवारणसंभवात्तदर्थं कारणे स्वाभाविककार्यानुकूला शक्तिर्मास्तु, आधेयशक्तिस्वीकारस्त्वावश्यक एवेतिमन्तव्यम् । व्रीहीन्प्रोक्षतीत्यादिवाक्यविहितप्रोक्षणादेः संस्कारानाधायकत्वे, व्रीहीनवहन्तीत्यादिवाक्यविहितवेलायां स्वरूपेणावर्तमानस्य प्रोक्षणस्याप्रोक्षितव्रीह्यादिव्यावर्तकत्वानुपपत्त्याऽप्रोक्षितानामपि तेषामवघातापत्तिः स्यात्प्रोक्षणविधेश्च वैयर्थ्यं स्यात् । संस्काराधायकत्वस्वीकारे तु संस्कारस्य तत्समवेतस्य कालान्तरेऽपि सत्त्वेन व्यावर्त्तकत्वमुपपद्यते, तत एव संस्कारविधेरपि सार्थक्यम् । यदि व्रीहीन्प्रोक्षतीति वाक्ये संस्काराश्रयणान्न तस्य विधिविषयतेति, चेन्न: व्रीहीन्प्रोक्षतीत्यत्र द्वितीयाश्रुत्या व्रीहीणां कर्मत्वं प्रतीयते । कर्मत्वं च क्रियाजन्यफलभागित्वं फलं च संस्कारः, तस्य

स्थायितया कालान्तरेऽपि सत्त्वेन व्यावर्तकत्वोपपत्तिरिति प्रोक्षितानामेव तेषामवघातादिद्वारा पुरोडाशकार्ये उपयोगः। यदि व्रीहीनवहन्तीत्यत्र व्रीहिमात्रश्रवणात्तस्यैवाघातेऽन्वयो न तु प्रोक्षितस्यैव विशेषाश्रवणादिति उच्यते। सामान्यस्यावघातासंभवेन तद्विशेषापेक्षायां प्रकरणप्राप्तस्य प्रोक्षितव्रीहेरेव तथान्वयस्यौचित्यात्, उपस्थितं परित्यज्यानुपस्थितकल्पने मानाभावात्, दृष्टार्थत्वेन प्रोक्षणस्योपपत्तावदृष्टार्थत्वकल्पनानौचित्याच्च। किञ्च तथापि "व्रीहीन्प्रोक्षति" "व्रीहीनवहन्ती"ति वाक्याभ्यां व्रीहेरेव प्रोक्षणमवहननं च विधीयताम्, किं प्रोक्षणविशिष्टे अवघातविधानेन। तथा च नावघातविषयव्यावर्त्तनाय प्रोक्षणजन्यातिशयकल्पनेति भावः। प्रोक्षितव्रीहयोऽवघाताय कल्पन्ते इति वाक्यशेषानुसारेण प्रोक्षितानामेवावघातविधानौचित्येन तदर्थं संस्कारकल्पनाया आवश्यकत्वात्। प्रोक्षणध्वंसविशिष्टेऽवघातविधानन्तु वक्तुमशक्यम् ध्वंसस्यकारणत्वापत्तेः। मन्त्रादिसहकृताः प्रोक्षणादय एवावघातनियमापूर्वप्रयोजका इत्यपि न, आशुविनाशिनां तेषां ध्वंसेनापि तत्कार्योत्पत्तिस्वीकारात, तर्हि ध्वंसद्वारैव ते तदुत्पादका भविष्यन्तीति। ध्वंसव्यापारद्वारा यागादय एव स्वर्गादिफलजनका इत्यपि वक्तुं शक्यतया तत्राप्यपूर्वाभावापत्तेः। न च ध्वंसस्यानादिकालस्थायितया तत्फलस्य स्वर्गादेरनन्तकालस्थायित्वापत्तेः, ततोऽवरोहाभावे ये रमणीयाचरणास्ते रमणीयां योनिमुत्पद्यन्ते, ये कपूयाचरणास्ते कपूयां योनिमापद्यन्ते इत्यादिसूचितपूर्वकर्मफलभोगानुपपत्तेः मोक्षानुपपत्तेश्चेति यागादिजन्यापूर्वमवश्यमेव स्वीकार्यम्। अपूर्वस्वीकारेऽपि नेयं शङ्का समाधातुमर्हा, न हि फलमुत्पाद्यापूर्वः नश्यतीति तत्स्वभावः कल्पयितुं शक्यते, तन्नाशे तद्भोगानुपपत्तेः। नाप्यपूर्वमात्रं समानकालफलप्रदम्, साधनतारतम्येन न्यूनाधिककालस्थायिभोगजनकत्वस्वाभाव्यात्तेषां विधिवाक्यत्वात्तेषां तत्तत्स्वभावकल्पने तत एव ध्वंसस्यापि तादृशस्वभावः कल्प्यामिति समः समाधिः। फलमादायापूर्वं नश्यति, ध्वंसस्तु अग्रे प्रवहन्नपि न फलं यच्छति।

अस्तु तर्हि प्रोक्षणादिजन्योऽतिशयः परन्त्वसौ आत्मधर्म एव न भूतधर्म इति।

अनेकसंस्कारकल्पनापेक्षया एकातिशयकल्पने लाघवमिति तर्कसहकृतधर्मिग्राहकमानादतिशयः सिध्यन्नेकपुरुषनिष्ठश्च सिध्यति। यदि व्रीहिनिष्ठः संस्कारस्स्वीक्रियते तदा सकलव्रीहिषु व्यासज्यवृत्त्या एक एव संस्कारः किम्वा यावन्तो व्रीहयस्तावन्तः संस्कारा इति अन्त्ये महागौरवप्रसङ्गात्। आद्ये एकव्रीहिनाशे तन्नाशापत्तेः यथा दशत्वादिसंख्या व्यासज्यवृत्त्यानैकत्र वर्तते तत्र एकस्याप्यपायेऽपैति एवं संस्कारोऽपि नश्येत्। न च यावदाश्रयनाशेन तन्नाशः कल्पयितुं शक्यः लाघवादाश्रयनाशत्वेनातिशयनाशं प्रति हेतुता न तु यावदाश्रयनाशत्वेन हेतुता गौरवादित्यास्ताम्।

यदि स्वीक्रियते परमाणूना स्वगुणाः पाकजादयो विशेषाः, व्रीहियवादिनिष्ठः स्वगुणः पाकजरूपरसादिरेव विशेषोऽतिशयस्वरूपः स च बीजावयवेषु परमाणुर्विद्यते इति तदभावादेव यवबीजाद्यवाङ्कुर इत्यादिनियम इति न तत्र संस्कारा-

भावेऽपि व्यभिचारगन्धः परमाणावतिशयाभावाच्च दृष्टान्तः साध्यविकल इत्यर्थः । यद्यपि परमाणुषु पाकजविशेष एवातिशय इति न दृष्टान्तः साध्यविकल इति तथापि शक्तिरूपातिशयो नास्तीति तत्तात्पर्येण तथाभिधानात् । न च शक्तिपाकजरूपयोरतीन्द्रियत्वाविशेषात् शक्तिकल्पनं वा पाकजरूपादिकल्पनं वेत्यत्र विनिगमकत्वाभावात् पाकजादिरेव विशेषो न शक्तिरेव कथं निर्णय इति उच्यते ? तदा अवयविगतरूपादिसजातीयरूपादेरवयवेषु स्वीकारानुरोधेनैव तन्नियतकार्योपपत्तौ तदर्थं शक्त्याधानकल्पनायां गौरवात् । यो यदुद्देशेन विधीयते स तत्रातिशयजनक इति व्याप्तेः व्यभिचारः स्यात् । शुष्यच्छस्योपजीवनौपाधिकवृष्टिकामनया यत्र कारीरीयागः क्रियते तत्र देवतोद्देश्यकवैधाग्न्यधिकरणकहविस्त्यागेन यागेन पुरुष एव संस्क्रियते । न वा देवता न वाऽग्निस्तादृशादृष्टवदात्मसंयोगान्नभसि प्रादुर्भूतेभ्यो मेघेभ्यो वृष्टिरुत्पद्यते, तथा व्रीह्युद्देशेन प्रयुक्ताः प्रोक्षणादयः पुरुषमेव संस्कुर्वन्ति तादृशसंस्कारात्मसंबद्धा व्रीह्यादयोऽवघातादिकार्योपयोगिनो भवन्ति एतेन व्रीहौ परम्परासम्बन्धेन तादृशातिशयसम्बन्धकल्पनायां गौरवात् साक्षात् सम्बन्धकल्पनैव युक्ता प्रामाणिकगौरवस्यादूषणत्वात् । न च पुरुषनिष्ठातिशयकल्पनायां यदा पुरुषो नाधिकृतस्तदा तत्प्रयुक्तप्रोक्षणादेः संस्कारानाधायकतया वैयर्थ्यम् व्रीह्यादिगतसंस्कारकल्पनायामपि एतद्दोषतादवस्थ्यात् अनधिकृतपुरुषकृतप्रोक्षणादेः संस्कारानाधायकत्वात् न कर्तृकर्मसाधनवैगुण्यादितिन्यायसूत्रे प्रतिपादितम् । साधनादिवैगुण्यवत्, कर्तृवैगुण्यस्यापि फलानुत्पादकत्वमिष्टमेव, आगमप्रमाणस्योभयत्र तुल्यत्वात् । वर्हिषि इवेति वर्हिस्तृणानि वर्हिष हविरासादयेदित्यादिवाक्येन विहिते तरणासादनादौ कृतार्थानां वर्हिषां यथा कार्यान्तरेषु विनियोगो न भवति । तथा प्रोक्षणे कृतार्थानां व्रीहीणामवघातादिषु पुनर्विनियोगो न स्यात् । व्रीहिनिष्ठसंस्कारपक्षे तु संस्कृतस्य क्वचिद्विनियोगो आवश्यकोऽन्यथासंस्कारस्य वैयर्थ्यापत्तेरिति विनियोगोऽवघाते आवश्यकः । यदि तु वर्हिरादौ विनियोगवचनान्तराभावादविनियोगः, इह तु व्रीहिभिर्यजेत इत्यादिविनियोगवचनदर्शनात् पुनः कार्यान्तरे तत्सम्बन्धोऽभ्युपेयत इति तज्जातीयस्याप्रोक्षितव्रीह्यादेरुपादानं स्यात् व्रीहीत्वस्योभयत्राविशेषात् । विशेषस्य संस्कारस्य चेष्टस्य तत्रानङ्गीकारादिति चेदत्राहुः—संस्कारा हि विचित्रमहिमानः यथाऽभिचारादयः । यादृशशत्रुशरीरमुद्दिश्य अभिचारः क्रियते स अभिचारकर्तृपुरुषसमवेतोऽपि तादृशशरीरसहकारितया तदेकशरीरं नाशयति न शरीरान्तरम्, न वा तस्यैव शत्रोर्जन्मान्तरीयं शरीरम्, तस्यानुद्देश्यत्वेनासहकारित्वात् । एवमभिमन्त्रणादिसंस्काराः पुरुषसमवेतोऽपि तादृशोद्देश्यव्रीह्यादिः सहकारीभूत्वा तस्यैवावघातं नियच्छति । व्रीहीनवहन्तीतिविधेः प्रोक्षितान् व्रीहीनवहन्यादित्यत्रैव तात्पर्यमित्यर्थः । प्रोक्षिता व्रीहयोऽवघाताय कल्पन्ते इति वाक्यशेषसहितव्रीहीनवहन्यादिति विधेस्तत्रैव तात्पर्यात् । अत एव संस्कारा अवघाताय नोपयुज्यन्त इति न किन्तूक्तन्यायेनावघातायोपयुज्यन्ते । पुरुषसमवेतो वा व्रीहि-

समवेतो वा संस्कारः सर्वथा कार्योपयोगी न एवेति भावः। कथं तर्हि व्रीहीणां संस्कार्य्यकर्म्मत्वं यतः क्रियाजन्यफलभागिन एव कर्मत्वम्। व्रीहीगतातिशयकल्पने तु तादृशक्रियाजन्यसंस्काराश्रयत्वेन तेषां कर्मत्वमुपपद्यते। तस्य पुरुषसमवेतत्वमिति पक्षे तु तादृशफलाश्रयत्वाभावात् कर्मत्वन्न स्यादिति उच्यते, तदा प्रोक्षणक्रियाजन्यजलसंयोगाश्रयत्वेन तेषां कर्मत्वोपपत्तेः। न च व्रीहीन् प्रोक्षतीति बहुवचनश्रुत्या सर्वेषामवघातायोपनीतानां व्रीहीणां कर्मत्वमेष्टव्यं प्रोक्षितजलसंयोगस्य सकलव्रीहीस्वभावादिति तत्त्वम्। कपिञ्जलानालमेत व्रीहित्रयगतजलसंयोगेनैव तदुपपत्तौ सकलव्रीहिगतत्वापेक्षाविरहात्। यो यदुद्देशेन क्रियते इति परोक्तानुमाने व्यभिचारं स्फुटमित्यत्र न संशयः। पुत्रेष्टि जातेष्टि "वैश्वानरं द्वादशकपालं चरुं निर्वपेत्" पुत्रे जाते। पुत्रोत्पत्त्यनन्तरमिमं यागं पिता करोति तज्जन्यं फलञ्च पुत्रे तदुद्देशेनैतद्विधानात्। अत एव यस्मिन् जाते शतामिष्टिं निर्वपति सपू त एव तेजस्वी अन्नादः पशुमान् भवतीति श्रुतिः पुत्रे एव तत्फलं बोधयति। एवममावास्यायामपराह्णे पिण्डपितृयज्ञेन यजेत इत्यादिनिकृष्यादिसाध्य भोगजनकादृष्टस्य वैयर्थ्यं स्यात्।

अपूर्वमीमांसकः

विहितक्रियाजन्यं यावत्फलोत्पत्त्यस्थायि अपूर्वं नाम किञ्चिद्वस्तु स्वीकुर्वन्ति मीमांसका गौतमीयाः काणादाश्च। तत्र—

फलाय विहितं कर्म क्षणिकं चिरभाविने।
तत्सिद्धिर्नान्यथेत्येवमपूर्वं प्रतिगम्यते॥

तस्मादस्त्यपूर्वमिति।

प्रमाणाभावान्नापूर्वसिद्धिः तथा हि—न तावदत्र प्रत्यक्षादिकं प्रवर्तते, रूपाद्यनात्मकत्वेन चक्षुरादिभिरसम्बन्धात्। नाप्यनुमानम्, केनचिल्लिङ्गेन सहादृष्टसङ्गतित्वात्। अपि च स्वतन्त्रस्य वापूर्वस्यानुमेयत्वम्? अस्त्यपूर्वमिति, अन्यविशेषणस्य वा? न तावत् स्वतन्त्रस्य वस्तुनः साध्यमानायां भावधर्मस्य हेतुत्वं स्यात्? अभावधर्मस्य वा? उभयधर्मस्य वा? तत्र भावधर्मस्यासिद्धत्वम् अभावधर्मस्य विरुद्धत्वम्, उभयधर्मस्यानैकान्तिकत्वम्। एतदभिप्रेत्यैव प्रत्यक्षसूत्रे वार्त्तिककारा आहुः—

सत्ता च नानुमानेन कस्यचित् प्रतिपद्यते।
धर्मेणान्यद्विशेष्यं चेत् पक्षोऽसिद्धविशेषणः॥
तस्माददृष्टपूर्वत्वात् केनचिद्वस्तुना सह।
धर्मस्य नानुमेयत्वमसाधारणवस्तुवत्॥ इति।

तस्माद् यागस्वर्गसाध्यसाधनभाव इवाऽपूर्वेऽपि न प्रत्यक्षानुमानयोः प्रवृत्तिः। नाऽपि शब्दः, तदनुपलम्भात्। यदाह वार्त्तिककाराः—

पदवाक्ये न चैतस्य वाचके शृणुमः क्वचित्।
शब्दगम्यत्वमप्यस्य तेन नैवोपपद्यते॥

तत्र पदं तावन्न किञ्चित्साक्षादेतस्य वाचकमस्ति यत्त्वपूर्वमिति पदं तत्—

प्रमाणपञ्चकाज्ञानादपूर्वं षष्ठगोचरः।
तस्मादन्वर्थनामेतन्न वस्तुत्वेन गम्यते ॥

इति रीत्या अन्वर्थत्वात् सुतरामस्तित्वं बाधते। वाक्यस्य त्ववाचकत्वादेवाप्रामाण्यम्। येऽपि शब्दान्तरादयः श्रुतिलिङ्गादयश्च शब्दप्रकारास्तेऽपि च स्वभावसिद्धे वस्तुनि भेदे विनियोगे वा कारणं न सद्भावे कस्यचिदित्यपूर्वं प्रत्यक्षप्रमाणम्। विधिप्रतिषेधविषयत्वाच्च समस्तस्य वेदस्य न क्वचिद्वस्तुस्वरूपप्रतिपादनार्थत्वं भवतीति नागमगम्यमपूर्वम्। उपमानगम्यमपि काममनुपलभ्यमानशशविषाणादिसारूप्यादसद्रूपमेवोपमेयं भवेत्। न च श्रुतयागस्वर्गसाध्यसाधनभावान्यथानुपपत्तिरेव तत्साधिका। न हि अन्यथा क्षणिकयागस्य कालान्तरभाविस्वर्गसाधनत्वमुपपद्यते। अतः प्रमाणान्तराभावेऽपि श्रुतार्थापत्तिरेवाऽपूर्वसद्भावे प्रमाणमिति वाच्यम्, साध्यसाधनभावस्यान्यथानुपपत्तावप्यपूर्वस्य तदुपपादकत्वाभावात् कल्पनानुपपत्तेः। नह्यपूर्वे कल्पिते तेनैव स्वर्गजननादपूर्वोत्पत्तिं प्रत्यन्यथासिद्धस्य यागस्य स्वर्गजनकता सम्भवति। न चापूर्वस्य शक्तिरूपत्वादवान्तरव्यापारत्वाद्वा ज्वालादिभिरिव न तेन यागस्यान्यथासिद्धिः, शक्तिव्यापारयोः शक्तिमद्व्यापारवन्निष्ठत्वनियमेन शक्तिमति व्यापारवति च यागे नष्टे शक्तिव्यापारयोरवस्थानानुपपत्तेः। यदि च छलबलकल्प्यस्यापूर्वस्यात्मनिष्ठत्वं कल्प्यते तदा नोक्तानुपपत्तिः। यथोक्तम्—

यदि स्वसमवेतैव शक्तिरिष्येत कर्मणाम्।
तद्विनाशे ततो न स्यात्कर्तृस्था तु न नश्यति ॥
शक्तिः कार्यानुमेयत्वाद्यद्गतैवोपयुज्यते।
तद्गतैवाभ्युपेतव्या स्वाश्रयान्याश्रयाऽपि वा ॥ इति।

तदाऽपि—

अर्थापत्त्यापि नैवैतदस्तीत्येवं प्रतीयते।
अन्यथाप्युपपन्नत्वात् फलयागादिसंगतेः ॥

यदि यागस्य विनाशित्वादन्येन तत्सम्बन्धिना फलं साध्यमानं यागेन साधितं भवति तदा यागध्वंस एव फलजनकत्वं कल्प्यताम्। ध्वंसे यागजन्यत्वं च क्लृप्तमेव केवलं फलजनकत्वं कल्पनीयमिति लाघवम्। अपूर्वकल्पनायां तत्सद्भावस्तस्य स्थायित्वं यागजन्यत्वं स्वर्गजनकत्वमिति बहुतरं कल्पनीयमापतति। किञ्च, विनाशिनि हि कर्मणि चोदिते विनाशस्योपस्थितत्वात्तस्यैव व्यापारत्वं युक्तम्। यथाह—

यद्वा कर्मविनाशोऽयं फलं न साधयिष्यति।
भङ्ग्या यागविधानाद्धि तदयत्नेन कल्प्यते ॥ इति।

एतेन तृप्त एवैनमिन्द्रः प्रजया पशुभिश्च तर्पयतीत्यर्थवादोपात्तदेवताप्रसादस्यैव रात्रिसत्रन्यायेन द्वारत्वोपपत्तेर्नानुपस्थितापूर्वकल्पनं युक्तमिति वेदान्तिमतमपि निराकृतम्। उपस्थितध्वंसद्वारकत्वेनैव नैराकाङ्क्ष्ये रात्रिसत्रन्यायानवतारात्। देवताप्रसादस्यापि इच्छाविशेषरूपस्य क्षणिकत्वेन यागतुल्ययोगक्षेमत्वाच्च। ध्वंसस्य कारणत्वे कारणीभूताभावप्रतियोगित्वेन यागस्य प्रतिबन्धकत्वमपि न सम्भवति, यतः, यस्मिन्नभावे संसर्गाभावत्वेन कारणता तत्प्रतियोगिकत्वस्यैव प्रतिबन्धकत्वात्, अत्र तु कारणत्वं ध्वंसत्वेन न तु संसर्गाभावत्वेनेति नास्ति दोषः। ध्वंसस्याभावरूपत्वादभावस्य केवलस्य कुत्रापि कारणत्वं न दृष्टम्, वार्तिकारस्तु आहः—'न च लोकेऽपि क्वचिदभावः कारणत्वेन दृष्टः, यदि तु क्वचिदुदाह्रियेत, शक्यं तत्र भावान्तरं दर्शयितुं न त्वत्रापूर्वादृते तादृक् किञ्चिदस्तीति'। भट्टसोमेश्वरोऽपि—

'अत एवाचार्यैः':

'स्वकाले यदकुर्वंस्तत्करोत्यन्यदचेतनः।
प्रत्यवायोऽपि तेनैव नाभावेन स जन्यते'॥

इति विहितमकुर्वन्यदन्यत्करोतीति भवद्भिर्विहिताकरणनिमित्तस्यान्यकरणस्य प्रत्यवायनिमित्तत्वाभिधानादवज्ञायामेव वा करणस्य निमित्तत्वोपपत्तेर्विहितावज्ञानमेव प्रत्यवायहेतुत्वेनोक्तम्। 'नाभावेनैव जन्यते' इत्येव शब्दोत्कर्षेण केवलस्य हेतुत्व निरस्तम्। एवं च विहितस्याननुष्ठानान्नरः पतनमृच्छतीति स्मृतिरनुगृहीता भवति। निमिषितादेस्तु हेतुत्वे विहिताकरणस्य किञ्चित् करणत्वभावात् स्मृतिबाधापत्तिः। एवं वाव स देवतामवरुणद्धि योऽलमग्निहोत्राय स नाग्निहोत्रं जुहोतीति वाऽपरोद्यशब्देन अवज्ञाभिधानात् सैव प्रत्यवायहेतुर्वेदादवसीयते। निमिषितादेस्तु हेतुत्वं निष्प्रमाणकमेव। तस्मादवज्ञारूपाशयविशेषरूपस्य भावान्तरस्य तत्र संभवान्न शुद्धस्य क्वचिद् हेतुता दृष्टेति ग्रन्थार्थः' इति। तदतिशयमात्रम्, शुद्धस्याऽभावस्याऽपि कारणत्वाङ्गीकारे बाधकाभावात्। अत एवानुपलब्धेरभावरूपाया एव घटाद्यभावग्राहकत्वमङ्गीकृतम्।

ननु ध्वंसस्यैय व्यापारत्वे तस्याविनाशित्वेन कीर्तनप्रायश्चित्तादिना नाशानुपपत्तेः 'धर्मः क्षरति कीर्तनात्' प्रायश्चित्तेन नश्यन्ति पापानि समुहान्त्यपि इत्यादिशास्त्रविरोधः। नह्यनयोः शुभाशुभकर्मनाशकत्वम्, तयोराशुतरविनाशित्वेन नाशकारणनपेक्षणत्, अतः कीर्तनप्रायश्चित्तादिनाश्यं यागादिजन्यमपूर्वमावश्यकमिति। चेत्? न क्लृप्तध्वंसस्यैव व्यापारत्वेऽवधारिते कीर्तनादीनां फलोत्पत्तिप्रतिबन्धकत्वमात्रकल्पनात्। सर्वथा नास्त्यपूर्वमिति प्राप्तेः ब्रूमः—फलं तावत्प्रधानकालान्तरभावीति। निर्विवादम्। नहि निरतिशयसुखदुःखरूपयोः साङ्गप्रधानजन्यस्य न प्रधानमात्रानुष्ठानादुत्पत्तिः। अतः कालान्तरभाविफलोत्पत्तिर्न क्षणिकात् कर्मणोः व्यापारमन्तरेण संभवतीति मध्ये कश्चन व्यापारः कल्पनीयो यः श्रुताविरोधी भवेत्। 'धर्मः क्षरति कीर्तनात्' प्रायश्चित्तेन

नश्यन्ति पापानि सुबहून्यपि' इति कीर्तनप्रायश्चित्तादिनाश्यमपूर्वमेव व्यापारत्वेन कल्पयितुं युक्तम्। न ध्वंसः, तस्याऽविनाशित्वात्। नाशशब्दस्य फलोत्पत्तिप्रतिबन्ध इत्यर्थकरणे लक्षणैव दोषः। अतो ध्वंसं परित्याज्यापूर्वकल्पनायां गौरवेऽपि तस्य फलमुखत्वाददोषत्वम्। यथा एतया निषादस्थपतिं याजयेदित्यत्र निषादानां स्थपति-रिति षष्ठीतत्पुरुषाङ्गीकारेऽधीतविद्येन त्रैवर्णिकेनैव अनुष्ठानोपपत्तौ न विद्ये विद्या-क्षेपकत्वम्, कर्मधारयाङ्गीकारे तु भवति विद्ये विद्याक्षेपगौरवम् तथाऽपि श्रुतिलक्षण-विषये श्रुतेर्न्याय्यत्वात् कर्मधारयं स्वीकृत्य विद्याक्षेपगौरवस्य फलमुखत्वाददोषत्वं तद्वदत्रापि श्रौतनश्यतिपदानुरोधादपूर्वमेव व्यापारत्वेन कल्पनीयम्। कल्पनागौ वस्य फलमुखत्वाददोषत्वम्। किञ्च, ध्वंसस्य प्रधानव्यापारत्वे तुल्यन्यायत्वादङ्गेष्वपि स एव व्यापारोऽङ्गीकर्तव्यः। ततश्च तस्याविनाशित्वाद् विकृतिप्रयोगवेलायामपि सत्त्वात् पशुपुरोडाशवत् प्रासङ्गिकत्वोपपत्तेर्न पृथगङ्गानि कर्तव्यानि स्युः। तथा च प्रयाजे प्रयाजे कृष्णलानि जुहोतीति प्रयाजकरणदर्शनमनुपपन्नं स्यात्। अस्मन्मते त्वङ्गापूर्वाणां प्रधानपूर्वोत्पत्त्यनन्तरं नाशाद्धि कृत्यपूर्वसिध्यर्थं पुनः प्रयाजकरणोपपत्तिरतः सर्वथा सिद्धमपूर्वम्। तत्राऽयं विवेकः सन्निपातितां श्रुत्याद्यवगतव्रीहाद्यङ्गभावानां प्रोक्षणादीनां तण्डुलादिपरम्परया प्रधानगामिनां प्रधानगतोत्पत्त्यपूर्वजननयोग्यतोत्पादने व्यापारः तावत्पर्यन्तमेव सन्निपातिजन्यापूर्वस्यावस्थानम्। आरादुपकारकाणां तूत्पत्त्यपूर्वगत-परमापूर्वजननयोग्यताजनने व्यापारः। प्रयोगबहिर्भूतानान्तु परमापूर्वोपस्थिताविति।

विधिस्वरूपविमर्शः :—

"स्वर्गकामोऽश्वमेधेन यजेत" इत्यादिवाक्यस्थं यजेत इति पदं लिङ्बोधकप्रत्यय-घटितम्। यज्धातोः लिङ्प्रत्यये सति यजेत इति। अत्र यज+इत यजते इत्यत्र इतइति लिङर्थबोधकः प्रत्ययः। लिङ्प्रत्ययः विधिप्रत्ययः। विधिप्रत्ययस्यार्थश्चात्र आप्ताभि-प्रायः। आप्ताभिप्रायो नाम वेदवक्तृपुरुषाभिप्रायः। आचार्यस्य मते आप्ताभिप्रायः एव विधिप्रत्ययस्यार्थः। प्रथमतः वेदः अल्पज्ञजीवोच्चरितो न भवितुमर्हतीत्यवधारितम्। आप्ताभिप्रायार्थकविधिप्रत्ययेन यस्यायमभिप्रायोऽनुमितो भवति स एव ईश्वरः। अनु-मानाकारः—(पक्षः) वैदिकविधिप्रत्ययः (साध्यम्) आप्ताभिप्रायबोधकः (हेतुः) विधिप्रत्ययत्वात्।

आचार्यः पाणिनिः विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रार्थनेषु लिङ् इति सूत्रेण विध्या-दिष्वर्थेषु लिङः विधानं करोति। प्रवर्तनात्वस्य विध्यादिषु चतुर्षु अनुस्यूतत्वात् तेन रूपेण प्रवर्तना एव लिङर्थः। प्रवृत्त्यनुकूलः व्यापारः प्रवर्त्तना। प्रवृत्तिः शिष्यादिनिष्ठा। तदनुकूलव्यापारस्तु प्रेरणात्मकः प्रवर्तयितृगुर्वादिनिष्ठः।

प्राभाकरमते विधिप्रत्ययस्यार्थः नियोगः। नियोगशब्दः कर्तृवाच्ये घञ्प्रत्यये निष्पन्नो भवति—नियुङ्क्ते इति नियोगः। नियोगः नियोज्यं पुरुषं नियोगस्य सिद्धये नियोग-

विषये नियुक्तं करोति—"स्वसिद्धये नियोज्यं स्वविषये नियुञ्जानः नियोग" इति। कार्यम् अपूर्वम् इत्यादयः शब्दाः नियोगशब्दस्य समानार्थकाः। नियोगः स्वसिद्धये पुरुषं नियुञ्जानः नियोग इत्यभिधीयते[1]। नियोगस्य अपरं नाम कार्य्यम्, कार्य्यं हि कर्तुः कृतिसाध्यमर्थात् कर्तुः कृतेरुद्देश्यम्। कृतिसाध्यत्वादेव कार्य्यमित्युच्यते। कार्य्यमेव स्वसिद्धये नियोज्यपुरुषस्य नियोगं करोतीति नियोगनाम्नाभिधीयते। अत एव "स्वसिद्धये स्वात्मनि नियुञ्जानं नियोग" इति। विधिवाक्यश्रवणानन्तरं यः पुरुषः इदं मत्कार्य्यमित्यवगच्छति स एव नियोज्यः। **स्वर्गकामो यजेत** (आपस्तम्बगौतमसू० १०।२।८) इति वाक्ये साध्यस्वर्गकामनावान् पुरुष एव स्वर्गकामः। स्वर्गकामनावान् पुरुषः तादृशकर्मण्येव नियोज्यो भवति यद्धि कार्यं स्वर्गकामनावतः पुरुषस्य काम्यस्वर्गस्य साधकं भवितुमर्हति।

काम्यस्वर्गफलाव्यवहितप्राक्काले विद्यमानं वस्तु एव स्वर्गफलस्य साधनं भवितुमर्हति। यागक्रिया च क्षणविनाशिनीति कालान्तरभाविनः स्वर्गफलस्य अव्यवहितप्राक्क्षणे न विद्यते इति यागरूपक्रिया कार्यरूपे स्वर्गकामरूपनियोज्येन सह अन्विता न स्यात्। यत् काम्यफलस्य साधनं नास्ति तादृशकार्ये कदापि स्वर्गकामः पुरुषः नियोज्यरूपेणान्वितो न भवितुमर्हति। अत एव "स्वर्गकामो यजेत" इत्यत्र यागक्रियातिरिक्तं प्रमाणान्तरावेद्यं कार्यमेव लिङादिप्रत्ययेन अभिधीयते। तादृशकार्यस्यैवाभिधायकः लिङादिविधिप्रत्ययो भवति यद्धि कार्यमेतद्वाक्यातिरिक्तेन केनापि प्रमाणेन विदितं न भवति। प्रमाणान्तरावेद्यत्वादेव अपूर्वमिदम् इति जेगीयते। विषय एव करणम्। कार्यस्य स्वरूपप्रतीतौ यत् विषयरूपेण भासते तदेव कार्यस्य स्वरूपनिवर्त्तकरूपे करणरूपेण भासते। कार्यप्रतीतौ यद्धि विषयरूपेणापेक्षितं तदेव कार्योत्पत्तौ करणं भवति। कार्यं कृतिघटितशरीरम्। कृतिसाध्यमेवं कृतिं प्रति प्रधानीभूतमेव कार्यम्। ज्ञानं यथा नियतं सविषयकम्, तथैव कृतिरपि नियतसविषयिका। तथा च कार्यस्य प्रतीतौ कृतेर्विषयस्यापेक्षा वर्तते। विषयमन्तरा कृतेः प्रतीतिरेव न स्यात्। उत्पत्तिक्रिया सकरणिकैव। करणं विना क्रिया न भवितुमर्हति। धात्वर्थरूपकरणेन नियोज्यपुरुषरूपः कर्ता कार्यस्योत्पादको भवति। कार्यमुत्पद्यमानमर्थात् निर्वर्त्यम्, कार्यस्य निर्वर्तयिता नियोज्य एवं करणं धात्वर्थः। यस्य पूर्वं कार्यस्य विषयरूपेण प्रतीतिस्तस्यैव कार्यस्य उत्पत्तौ करणरूपेण प्रतीतिः। प्रथमतः नियोज्यपुरुषस्य समीपे विधिवाक्येन प्रतीतिरनन्तरं नियोज्यरूपकर्तृपुरुषेण कार्यं निर्वर्त्यं=निष्पाद्यं स्यात्।

कृतिसाध्यं वस्त्वेव कार्यं तस्मात् कृतेर्ज्ञानं विना कार्यस्य ज्ञानं न सम्भवति। यद्धि कृतिसाध्यं कृतिं प्रति प्रधानीभूतन्तदेव कार्यम्। यद्वस्तु उद्दिश्य कृतिर्जायते तदेव कृतिं प्रति प्रधानीभूतम्, नियोज्यरूपकर्तृपुरुषस्य कृतिः कार्यस्य सिद्ध्युद्देश्येन प्रवर्तते।

---

१. पुरुषं नियुञ्जानः नियोग इति व्यपदिश्यते।—न्याय० क० पृ० ५३

कृतिर्हि चेतनस्य आत्मनः गुणः । चेतन एव नियोज्यो भवति । यत्र कार्ये चेतनः पुरुषः अप्रधानरूपेण प्रतीयते तदेव कार्यम् । कार्यस्य स्वरूपसिद्धयर्थमेव चेतनः प्रयत्नवान् भवति । कार्यं हि कृतेरुद्देश्यमिति कार्यं प्रधानम् अत्र कृतिरप्रधाना एवं कृत्याश्रयः पुरुषोऽपि अप्रधानभूतः । ज्ञानं यथा सविषयकं तथैव कृतरपि नित्यं सविषयिका । विषयमन्तरेण कृतेः स्वरूपनिरूपणं न भवितुमर्हति । कृतेः विषयः पुरुषव्यापारः—चेष्टा, यागः ज्ञानम्, होमादिकम् । क्रियाविषयिणी कृतिः अपूर्वाख्यकार्यमुद्दिश्य प्रवर्तते । तथा च नियोज्यपुरुषस्य कृत्या अपूर्वं सिध्यति । यागादिषयिणी या कृतिस्तया कृतिसाध्यं कृतिं प्रति प्रधानीभूतमपूर्वं कार्यं जायते । कार्यं कृतिं विना न सम्भवति, कृतिश्च क्रियां विना न सम्भवति इति कृतिः क्रियाविषयिणी । तथा अनया कृतिप्रणाल्या **यजेत** इति कथिते यागविषयकं कार्यमित्यर्थोऽवगम्यते । विपूर्वकस्य बन्धनार्थक "षिञ्" धातोः अच्प्रत्यये **विषयः** । विषिण्वन्ति विषयिणं बध्नन्ति स्वेन रूपेण निरूपणीयं कुर्वन्तीति विषयाः । ज्ञानादीनां विषयः विषयिणं ज्ञानं वध्नाति । विषयनिरूपणाधीनमेव ज्ञानं निरूपणीयं भवति । घटादिविषयः स्वविषयकं ज्ञानमितरविषयकज्ञानात् व्यावर्तयति अत एव घटादिः ज्ञानस्य विषयः जायते । एवमेव कार्यमपि इतरकार्याद्व्यावर्तयति इति धात्वर्थरूपक्रिया कार्यस्य बन्धनकारिका । कृतिः क्रियाभिन्ननिरूपिता न भवति, धात्वर्थ एव क्रिया । धात्वर्थरूपक्रियाविषयककृत्या लिङर्थकार्यस्य निष्पत्तिर्भवति । यागविषयकं कार्यमित्यत्र धात्वर्थक्रिया यागलिङर्थकार्यस्य बन्धनं व्यवच्छेदकं विशेषणं वा भवतीति कार्यस्य विषयो जायते । **स्वर्गकामो यजेत** एतादृशवाक्यस्य यथा नियोज्यः स्वर्गकामनावान् पुरुषः तथैव लिङर्थकार्ये एव पुरुषः नियोज्यरूपेणान्वित इति कार्यरूपः लिङर्थः नियोज्यपुरुषकाम्यस्य स्वर्गस्य साधनं भवतीति । कार्यं लिङर्थ एव नियोज्यकाम्यस्य स्वर्गस्य साधनम् । तथा च लिङर्थकार्यविषयः धात्वर्थक्रिया नियोज्यपुरुषकाम्यफलस्य साधनम् ।

अत्रेयमाशङ्का यत् लिङर्थः कार्यं नियोज्यपुरुषस्य यत्काम्यं फलन्तस्य साधनमत एव नियोज्यः पुरुषः लिङर्थकार्यस्य सिद्धयर्थं प्रवृत्तो भवति । लिङर्थः कार्यं यदि नियोज्यपुरुषस्तथा यत्काम्यं फलन्तस्य फलस्य साधनं न स्यात् तदा नियोज्यः पुरुषः कदापि लिङर्थकार्यस्य सिद्धयर्थं प्रवृत्तो न स्यात् । तस्मात् गुरुमते कार्यं नियोज्यपुरुषस्य काम्यफलस्य साधनम् । तथा च कार्यं फलस्य जनकमिति कार्यमप्रधानं फलञ्च प्रधानम् । विधिवाक्ये कार्यस्यैव मुख्यविशेष्यत्वमित्यपि न संघटते, यतः अप्रधानभूतं कार्यं मुख्यं विशेष्यं न भवितुमर्हतीति कार्यस्यैव समस्तवाक्यप्रधानीभूतत्वं न संगच्छते ।

अत्र गुरुमतानुयायिनः कथयन्ति—कार्यं स्वसिद्धयर्थमेव नियोज्यं नियुनक्ति । तथा च कार्य्यं नियोगो वा स्वसिद्धयनुकूलनियोज्यप्राप्त्यर्थमेव फलसाधनतामात्मनि स्वीकरोति न तु फलसिद्धयर्थं फलसाधनतां स्वीकरोति । कार्य्यं स्वसिद्धयर्थमेव नियोज्यं प्रेरयति नियोज्योऽपि काम्यफलस्य असाधने नैव प्रवृत्तो भवतीति नियोगः कार्य्यं वा

नियोज्यपुरुषकाम्यफलसाधनतां स्वीकरोति फलतः कार्य्यं स्वसिद्धयनुकूलनियोज्यपुरुष-लाभार्थं नियोज्यपुरुषस्य यत्काम्यं फलन्तस्य साधनं भवतीति कार्य्यस्य नियोगस्य वा प्राधान्यस्य हानिर्न जायते ।

शब्देन विधेर्ज्ञानमनायासेनैव सर्वेषां यदि जायते तदा साधनत्वेन ज्ञाते कर्मणि प्रवृत्तौ सत्यां निष्पादितक्रिये कार्ये साधनस्य अनुपपत्तिरेव स्यात, शब्दात्प्रसिद्धस्य प्रतिपादनं वृथैव भवति इति शब्देन विज्ञातं वस्तु नैव जिज्ञासितं भवति । विधिश्च सर्वथाऽप्रसिद्धस्तदा अप्रसिद्धत्वादेव वेदार्थतया प्रतिपाद्यः न स्यात् । विधिः शब्देन अवगम्यते इति प्रसिद्ध एव तथापि विधौ वर्तन्ते दार्शनिकानां काश्चन विप्रतिपत्तय इति संशयापन्नः विधिः जिज्ञासितो भवति । तत्र सतीषु बह्वीषु विप्रतिपत्तिषु इयं हि विमतिर्जायते लिङादिः लडादिरूपादन्यशब्दात् भिद्यते इति शब्दभेद एव विधिः । यथा अयस्कान्तमणिस्वरूपे वस्तुनि अस्त्येव स्वस्वभावजन्यः तादृशः कश्चिदतिशयः यद्वशात् अचेतनं लौहं प्रवर्त्तयति तथैव लिङादावपि तादृशोऽतिशयः कश्चिद् वर्तते यद्वशात् चेतनं पुरुषं कर्मणि प्रवर्त्तयति । लिङादेर्व्यापारातिशयो वा चेतनस्य प्रवृत्तिकारणं स्वीक्रियते किम्वा शब्दभेदवदर्थभेद एव विधिरभ्युपेयते । यद्यप्यत्रैवं शङ्कोदेति यत् अर्थभेदस्य विधित्वे शब्दे विधिव्यवहारः कथमिव स्यात्, दृश्यते च शब्देऽपि विधि-व्यवहारः । यथा—"चोदनेति क्रियायाः प्रवर्त्तकं वचनम्" इति, "विधिना त्वेक-वाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः" इति च उभयत्रापि शब्दे एव विधिशब्द-व्यवहारः दृश्यते नार्थे । चोदनेतिशब्दस्यैव क्रियायाः प्रवर्त्तकत्वं प्रतिपादितम् तथैव एकवाक्यता च वाक्यरूपेण शब्देन वाक्यान्तरस्य शब्दस्याभिहितम् । सत्यम्, परमियमाशङ्का नैव दुष्परिहरा यद् विध्यर्थाभिधायके शब्देऽपि विधिशब्दव्यवहारो भवति ।

मण्डनमिश्रस्य मते इष्टसाधनत्वमेव विध्यर्थः कृतिसाध्यत्वं हि लोकादेव अवगम्यत इति न तत्र विध्यपेक्षा । यागो मत्कृतिसाध्यः, मत्कृतिसाध्यविरोधिधर्मानधिकरणत्वात् इत्यनुमानेनैव कृतिसाध्यत्वस्य लाभात्, तथा च कृतिसाध्यत्वज्ञानस्य प्रवर्त्तकत्वेऽपि "अनन्यलभ्यो हि शब्दार्थः" इति न्यायेन प्रदर्शितरीत्या अनुमानेनैव कृतिसाध्यत्व-ज्ञानस्य प्रवर्तकत्वलाभात् न तत्र विधेः शक्तिरस्ति । स्वर्गादीनामिष्टसाधनत्वन्तु प्रमाणान्तरेणावगन्तुं न शक्यतेऽपि तु आम्नायवाक्यादेव तदवगम्यते इत्यनन्यलभ्य-त्वात्तत्र विधेः शक्तिः स्वीक्रियते । केचित्तु "अनन्यलभ्यो हि शब्दार्थः" इति न्यायस्य तत्रैव प्रवृत्तिः यत्र पदान्तरलभ्योऽर्थः भवति—पदान्तरलभ्ये हि अर्थे पदस्य शक्तिः न भवति, अन्यथा कुत्रापि शक्तिर्न सिद्धयेत् सर्वस्यैवार्थस्य शब्दातिरिक्तप्रमाणान्तर-वेद्यत्वात् । अनन्यलभ्यन्यायेन प्रदर्शितरीत्या कृतिसाध्यत्वे विध्यर्थविशेषास्वीकारेऽपि कृतिसाध्यत्वज्ञानं न प्रवर्त्तकम्, कृत्यसाध्यत्वेन निश्चिते प्रवृत्तिस्तु न जायते । कृतसाध्ये इष्टाभावेन वृथा श्रमजनकत्वेन द्वेषादेव प्रवृत्तेरभावात् । यद्यपि प्रदर्शितरीत्या कृति-साध्यत्वज्ञानं प्रवर्तकं न भवेत् तथापि कृतिसाध्यत्वज्ञानं विना कृतिसाध्यत्वप्रकारिके-

च्छात्मिका या चिकीर्षा सा नैव जायते। चिकीर्षाया अभावे च प्रवृत्तिरपि नैव स्यादिति कृतिसाध्यत्वज्ञानस्य प्रवर्तकत्वमावश्यकम्। लोकव्यवहारादेव तस्यानुगमात् चिकीर्षोपपत्तेः चिकीर्षानुरोधेन कृतिसाध्यत्वे शक्तिकल्पनमनावश्यकम्।

अत्रेयमाशङ्का भवति—अनिष्टजनके उदासीने च कर्मणि वृथा श्रमजनकतया द्वेषादेव प्रवृत्तिर्न स्यात् तथा च इष्टसाधनत्वज्ञानस्य विध्यर्थत्वाभावेऽपि इष्टसाधने एव कर्मणि प्रवृत्तिः स्यान्नान्यत्र। इष्टसाधनताज्ञानस्य प्रवृत्तिहेतुत्वाभावे इष्टाजनके कर्मणि यत्र आन्तरालिकश्रमो वर्तते तत्र द्वेषाभावसत्त्वेऽपि प्रवृत्तिर्न भवतीति सकलजनसम्मतोऽयं विषयः, इदानीमिष्टसाधनत्वज्ञानस्य प्रवृत्ति हेतुत्वामभ्युपगमेऽत्र प्रवृत्तिर्दुर्निवारा स्यात् इष्टसाधनत्वज्ञानस्य प्रवृत्तिहेतुत्वाभ्युपगमे तु प्रदर्शितस्थले इष्टसाधनत्वात्मकस्य प्रवृत्ति-हेतुत्वस्याभावादेव प्रवृत्तिर्न भवतीति सर्वं सुसमञ्जसम्। इष्टसाधनत्वज्ञानस्य प्रवृत्ति-हेतुत्वञ्च न मदंशरहितस्यापि तु मदिष्टसाधनमितिज्ञानस्यैव प्रवृत्तिहेतुत्वमभ्युपगन्तव्यम् अन्यथा मदंशस्य विधिवाक्यादलाभेन मदिष्टसाधनेऽपि यागादौ प्रवृत्तेरनुदयात्।

अयमाशयः—लिङादिप्रत्ययेभ्यः प्रवर्तना प्रतीयते। सर्वापि चेष्टा मानसिकी भवतु कायिकी वा प्रयत्नपूर्विकैव भवति। प्रयत्नो हि रागपूर्वक एव, विना रागं न कस्मिंश्चिदपि कार्ये प्रेक्षावतां प्रवृत्तिर्भवति। रागो हि नैव दुःखे नाप्यसुखे अपि तु सुखानुशयी राग इति सुखे सुखसाधने वा रागो भवति 'दुःखे द्वेषादेव रागो न' असुखदुःखे च उपेक्षणाच्च न रागः। सुखस्य चान्येच्छानधीनेच्छाविषयत्वमिति सर्वानुभवसिद्धम्। क्रिया च दुःखात्मिका इत्यत्र नास्ति केषामपि सचेतसां विमतिः लोकानुभवसिद्धत्वात्। क्रियायां लोकाः प्रवर्तन्ते इत्यवश्यमेव क्रियायां सुखसाधनत्वमवगन्तव्यम्, अन्यथा सुखार्थिनस्तत्र नैव प्रवर्तेरन् वैदिकक्रियाश्च नैव साक्षात् सुखसाधिका इति प्रेक्षावतां वैदिकव्यापारोपरमप्रसङ्गः समापतति इति दुःखरूपास्वपि क्रियासु सुखसाधनत्व-मवश्यमेवाभ्युपगन्तव्यम्। सुखसाधनतैवेच्छोपहारमुखेन सुखोपायत्वात् क्रियासु प्रवर्त-यितुमीशते। यदि शब्दः सुखसाधनतां न प्रतिपादयेत् तदा न कोऽपि क्रियायां पुरुषं प्रवर्तयेत्। लिङ् शब्देन इष्टसाधनतामात्रमभ्युपगम्यत इति कथमिवास्मात् प्रवर्तनायाः प्रतीतिः स्यात्। प्रवृत्तिसमर्थस्तावत्कश्चिद्भावातिशयो व्यापार एव प्रवर्तना[1]। एतन्मते केवलं परिस्पन्दनमेव व्यापारशब्देन नोच्यते येन परिस्पन्दनातिरिक्तत्वेन व्यापार-शब्दस्य प्रयोगो न भवेत्। तस्मादिष्टसाधनत्वस्य परिस्पन्दनातिरिक्तत्वेन अप्रवर्त-नात्मत्वं स्यात्, भावधर्म एव कश्चित्समीहितसाधनानुगुणो व्यापारपदार्थः। यथा कश्चित् ज्ञानजनने प्रवृत्तो भवति तदा भावधर्मः तथैव स्पन्देतरः इष्टसाधनत्वाख्यः भावधर्म एव प्रवृत्तिजननेऽनुकूलतया व्यापारविशेषः प्रवर्तना। शब्दः तद्भावना वात्र न भवति प्रवर्तना यतः न अपेक्षितोपायत्वप्रतिपादनं विना कोऽपि क्रियासु प्रवर्तते[2]। अत्रेय-

१ प्रवृत्तिहेतुं धर्मं च प्रवदन्ति प्रवर्तनाम्। वि० वि० पृ०—२४३

२. सा च क्रियाणामपेक्षितोपायतैव। वि० वि० पृ०—२४३

माशङ्का जागर्ति यत् राज्ञः सेवकः यत्र यत्र कर्मणि प्रवर्तते तत्र सर्वत्रापेक्षितोपायत्वनिबन्धनैव प्रवृ भवतीति वक्तुं न शक्यते, राजाज्ञया अनपेक्षितोपायेऽपि प्रेक्षावतां राजसेवकानां प्रवृत्तिर्दृश्यते इति अपेक्षितोपायतां प्रतिपाद्यैव क्रियासु प्रवृत्तिः क्रियायां तथापि केनापि रूपेणापेक्षितोपायनिबन्धनतामाश्रित्यैव सा प्रवृत्तिर्जायते । यद्यपि यत्र आज्ञादिना कस्यांश्चित्क्रियायां प्रवृत्तिर्भवति तत्र नियोक्तुरेव अर्थकर्मणि इति नियोक्तुरेवापेक्षितोपायनिबन्धना आज्ञादयो वर्तन्ते तथापि नियोज्यस्य पुरुषस्य या तद्विषयसम्पादने प्रवृत्तिर्भवति सा नियोज्यापेक्षितनिबन्धनैव भवति । यतः नियोज्यः प्रेक्षावान् आज्ञाद्यनन्तरं मनसि परिकल्पयति एतत्कार्यसम्पादनानन्तरं कार्यसम्पादनेन सम्यक्तोषितः ममाज्ञापयिता अभीष्टं मह्यं प्रयच्छेत् ममाहितं वा न विदध्यात् इति समीहितलाभरूपमहितविनिवृत्तिरूपं वा अपेक्षितमुपाश्रित्यैव भृत्यस्य नियोज्यस्य स्वनियोक्तुराज्ञाविषयसम्पादने प्रवृत्तिर्भवति नान्यथात एव यः पुरुषः यस्य हितप्राप्तौ अहितपरिहारे वा नैव यत्नं विधत्ते तस्य आज्ञामपि नैवासौ नियोज्यः अनुरुणद्धि इति अकामेनापि एतत्स्वीकर्तव्यं यत् नियोक्त्रर्थसमुद्देशेन नियोज्यस्य प्रवृतिरानुषङ्गिकी आज्ञाविषयस्य स्वापेक्षितत्वादेव प्रवृत्तिरिति लिङादिभ्यः प्रवर्त्तनावगतिर्नानुपपन्ना ।

केचन वेदं प्रति अतिशयश्रद्धावन्तः इदं मम कर्तव्यमिति ज्ञानानन्तरमेव प्रवृत्तिरित्यवोचन् । कस्यचित्कर्मणः दर्शनोत्तरं कर्त्तव्यतामेव प्रवृत्तिहेतुत्वेनावगच्छन्ति । स्तनन्धयस्य बालस्य या तावदादौ प्रवृ र्भवति सापि न समीहितोपाय इत्येतावतैवेत्यस्यापि तु कर्तव्यमेतदिति । तस्मात् कर्तव्यतैव प्रवृत्तिहेतुरिति लिङादिश्रवणानन्तरं प्रवृत्तिः कर्तव्यताभिधानमेव लिङादीनां संसाधयति । लौकिकवचनं हि न निरपेक्षं प्रवृत्तिजनकं भवत्यपि तु प्रमाणान्तरापेक्षम् अपेक्षितोपायप्रतीतिपुरस्सरमेव । क्रिया हि दुःखरूपा, तथा च दुःखरूपायां क्रियायां प्रवृत्तिर्न स्वाभाविकी नापि केवलं कर्तव्यत्वज्ञानसापेक्षा परमियं हि प्रमाणान्तरापेक्षैव प्रवृत्तिरिति दुःखरूपक्रियाकर्तव्यतावगतेरपेक्षितोपायतां तत्प्रमाणभूतामन्तर्भाव्य कर्तव्यतावगतिः । वेदो हि अपौरुषेय इति निरपेक्षत्वात् न स्वार्थे प्रमाणान्तरमपेक्षत इति अपेक्षितोपायतावगतेरपेक्षा तत्र न जायते तथा च अपेक्षितोपायतावगमनिरपेक्ष एव कर्तव्यतावगमहेतुः । कर्तव्यता हि वेदे लिङादिप्रयोगेनाभिधीयते । यथा लोके लिङादिश्रवणान्तरा प्रवृत्तिः कर्तव्यताभिधानमेव लिङादीनामापादयति । अवगतसङ्गतितया लिङादयो वेदेऽपि कर्तव्यतामेवाभिदधते । वेदे लिङादिनाऽवगम्यमाना कर्तव्यता अनुष्ठानकर्तारमधिकारिणं नियोज्यं पुरुषमपेक्षते । तत्र कश्चिद्विधिः साध्यः यथा **स्वर्गकामो यजेत** । अत्र यदा नियोज्यः साध्यविशिष्टस्तदा साध्यविवृद्धिर्भवति । यत्र तु नियोज्यः निमित्तवान् यथा **'यावज्जीवमग्निहोत्रं जुहुयात्'** तत्र भावविषयं कार्यं हितसाधनतावगमनिरपेक्षमपि अवगमत्प्रवृत्ति जनयति । यत्र वा **'न कलञ्जं भक्षयेदिति'** तत्र भगवानाम्नाय एव निरस्ताखिलदोषाशङ्कोऽहितसाधनताव-

१. सा च क्रियाणामपेक्षितोपायतैव । वि० वि० पृ०—२४३

गमनिरपेक्ष एव नत्वर्थविषयं कार्यमवगमयन् निवृत्ति विद्यते इति अपेक्षितोपायतायाः प्रवृत्तिं प्रति साधनत्वस्वीकारे न किमपि फलम् ।

एतस्य पूर्वप्रदर्शितस्य शङ्काग्रन्थस्य समाधाने न्यायकणिकायामेतदभिहितं यत् अपेक्षितोपायताम्—इष्टसाधनत्वमन्तरेण कर्तव्यमिति शतशोऽभिधीयमानमपि न कार्यप्रवृत्तये समर्थो भवति । शब्दो हि कर्तव्यतायां विदितसंगतिरवश्यमेवापेक्षितोपायतामवगमयति, अपेक्षितोपायतावशादेवानुष्ठाने प्रवृत्तिर्भवति, अर्थात् इष्टसाधनत्वादेव प्रमाणान्तरानपेक्षादाम्नायादवगता कर्तव्यता अनुष्ठानमाक्षिपति । एवमेव नैमित्तिकविधौ च प्रतीयमाना अपेक्षितोपायसाधनता न शक्या नेति वक्तुम् । कर्तव्यताज्ञानस्य हि अपेक्षितोपायनान्तरीयकत्वात् कर्तव्यताज्ञानस्य प्रवृत्तिजनकत्वेऽपेक्षितोपायत्वज्ञानस्यैव प्रवृत्तिजनकत्वं सेत्स्यति । अन्यथा कर्तव्यमिति प्रतिपद्यमानेऽपि कथं तत्र प्रवर्त्तेत[1] । तस्मादीप्सितस्योपायतैव कर्तृप्रवृत्तिहेतुः ।

अत्र पूर्वपक्षिणा एतदुच्यते यत् कर्तव्यताऽवगमादेव कर्ता कर्मणि प्रवर्त्तते इति कर्त्तव्यतैव प्रवृत्तिहेतुरस्तु । इयं कर्तव्यता का ? न निरालम्बनं ज्ञानं भवति । किमपि विषयमवलम्ब्यैव ज्ञानं भवति निरालम्बनं ज्ञानं च न भवति इति कर्तुरीप्सितोपायतैव प्रवृत्तिहेतुः कर्तव्यताज्ञानस्यालम्बनम् । कृतिव्याप्यतागोचरं कर्तव्यत्वज्ञानन्तद्विपरीतता-गोचरं हि अकर्तव्यत्वज्ञानमिति तत्कथं समीहितसाधनत्वमेवं तद्विपरीतसाधनत्वं गोचर-यितुमर्हति ? कर्तव्यत्वसमीहितसाधनत्वयोस्तादात्म्यं नास्ति यतः एकस्य सिद्धत्वादपरस्य च साध्यत्वात् दहनतुहिनवदुभयोः स्वभावविरुद्धत्वात् । यथा शुक्लः प्रत्यय इत्यत्र शुक्ल एवार्थः प्रत्ययेऽन्वेति इति शुक्ल एव शुक्लप्रत्ययस्य विषयो भवति समीहितोपायतां तद्विपरीततां चानुयातौ कर्तव्यमकर्तव्यमिति प्रत्ययौ प्रवृत्तिनिवृत्तिहेतू लौकिकानाम् । तथा च अपेक्षितोपायतासत्त्वे कर्तव्यत्वप्रत्ययः अपेक्षितोपायतयात्रं नैव प्रवृत्तिकारणं समीहितस्यापि कर्तव्यतया समीहितस्यापि प्रवृत्तिहेतुत्वप्रसङ्गात् । फलं हि कर्तव्यस्य कृतिसाध्यस्य सुखं सुखसाधनं प्रवृत्तिगोचरः स्यादेवेति कर्तव्यतायाः प्रवृत्तिगोचरत्वं स्यादेव । सत्यम्, साधनत्वं प्रवृत्तिहेतुः न तु कर्तव्यतामात्रमपि तु कर्तुरिष्टसाधनं प्रवृत्तिकारणम् । तथा च कर्तव्यतैकार्थसमवायिनी समीहितसाधनता प्रवृत्तिहेतुः सैव च कर्तव्यताज्ञानस्यालम्बनमभिमता । यद्युच्यते कर्तव्यतामात्रोपयोगिनी या समीहित-साधनता वर्तते सा नैव प्रवृत्तिहेतुः । स्वीक्रियतेऽपि तु कर्तव्यतैव प्रवृत्तिहेतुर्भवति । सा च कर्तव्यता क्वचित्साधनतयाऽवगम्यते क्वचिच्च सा कर्तव्यता शब्दतः कृतिसाध्यत्वेन रूपेण प्रवृत्तिहेतुर्भवति । तथा चासत्यामपि समीहितसाधनतायां कृतिसाध्यत्वरूपा कर्तव्यतैव प्रवृत्तिहेतुरिति कर्तव्यतामात्रमेव प्रवृत्तिहेतुरिति । समीहितोपायता हि

१. ननु कर्तव्यमिति प्रतिपत्तेः प्रवृत्तिः । कथं हि तथा प्रतिपद्यमानो न प्रवर्त्तते । वि० वि० पृ० २४५, ४४६ ।

कृतियोनिः। अयमाशयः—समीहितोपायता हि प्रमाणान्तःपातिनी इत्यत्र नास्ति ममापि विमतिः, परमेतादृशमप्यस्ति किञ्चित्प्रमाणं यस्य प्रमाणस्य अभावात् प्रमेयं निवर्त्तते। यदि कोऽपि भावपदार्थः अनित्यो भवति तदाऽवश्यमेवासौ कृतकोऽपि भवति। तथा च कृतकत्वन्तत्र भावानामनित्यत्वे प्रमाणम्। कृतकत्वाभावादनित्यत्वं निवर्त्तते। कदाचिदपि कस्मिंश्चिद् भावे एतन्नैव भवितुमर्हति यदसौ भावोऽकृतकः सन्नपि अनित्यो भवेत्। एवमेवात्रापि कार्यत्वं नाम कृतिव्याप्यत्वं तथा च सति कार्यत्वे कृतिरवश्यमेव स्यात्, कृतिः चेतनप्रयत्नः पुरुषप्रयत्नो वेति। सा च कृतिः इच्छाजन्या अर्थात् इच्छाद्वेषजीवनयोनिस्तथा च इच्छाद्वेषात्मकयोः कृतियोनिभूतयोः निवृत्तौ कृतिरपि नैव भवति। ज्ञानजन्या भवेदिच्छा इच्छाजन्या कृतिर्भवेदित्यंशे न कस्यापि विमतिः। तस्मात्समीहितसाधनतायाः निवृत्तौ प्रवृत्तिर्नैव भवितुमर्हति समीहितस्य कृतियोनित्वात्। तस्मात्कर्तुः समीहितसाधनतैव कर्तव्यता कर्तुरपेक्षितोपायताविपरीता ह्यकर्तव्यता[1]ः। यः पुरुषः यदिच्छति तदेवासौ करोति नान्यत् इति भावनायाः प्रारम्भः इच्छयैव भवति। प्रारब्धया इच्छया च भावनाप्रयत्नः जायते, इच्छापूर्वकत्वात्प्रयत्नस्येति पूर्वमेव प्रतिपादनात्। इच्छापूर्वकत्वात्प्रयत्नस्य इच्छाकर्म एव भावनासाध्यमिति सिद्धोऽपि स्वर्गः इच्छाकर्मतया साध्यात्मनैव भावनायामन्वेति समीहितसाधनतैवैतन्मते लिङर्थ इति संक्षेपः।

नव्यमते विधिविवेकः

वेदो हि आचारमूलः, आचारश्च प्रवृत्तिः। तथा च जनकतासम्बन्धेन प्रवर्त्तकज्ञानवत्त्वं वेदस्य, प्रवृत्तिप्रयोजकत्वादेव प्रवर्त्तकज्ञानं नितान्तमपेक्षितं भवति।

भाट्टमते हि लिङादीनामर्थः अभिधा। विधेः व्यापारीभूतः विधिसमवेतः भावनाख्यः, अतिरिक्तपदार्थविशेषः अभिधा। अस्याश्चाभिधायाः ज्ञानं प्रवर्त्तकम् भावनायाश्च भावनात्वरूपेण विधिशक्तिः। प्रयोजनज्ञानं प्रवृत्तिहेतुर्न भवितुमर्हति एवमेव प्रयोजनज्ञानस्याहेतुत्वे विश्वजिद्यागादौ फलकल्पनमुपपन्नं स्यात्। यागविषयकभावनाजन्यो भवति पुरुषव्यापारः। तत्र यागविषयकव्यापारेऽभिधाजन्यत्वस्य अन्वये व्यापारनिष्ठं यदिष्टसाधनत्वन्तद्धि अन्वयप्रयोजकं जायत इति योग्यताबलादेवात्र लिङर्थे इष्टसाधनत्वज्ञानस्य भानं भवति इति अन्यथालभ्ये इष्टसाधनत्वे लिङादीनां न शक्तिग्रहो भवति। यागविषयकभावनाजन्यः पुरुषव्यापारः आख्यातसामान्यशक्तित्वललभ्ये कृतिरूपव्यापारे जन्यत्वसम्बन्धेन भावनायाः अन्वयसिध्यर्थं व्यापारनिष्ठेष्टसाधनत्वस्यान्वयप्रयोजकत्वम् इति योग्यतयैव तदिष्टसाधनत्वस्य भानं भवति। अथ वा विधिबलादेव स्वर्गादिसाधनत्वस्य ग्रहो जायते। इष्टसाधनत्वञ्च प्रवृत्तिरूपव्यापारे आख्यातार्थेऽन्वेति, प्रवृत्तौ च इष्टसाधनताज्ञानमेव हेतुः। न चात्रेदं चिन्तनीयं यत्—न्यायमतेऽपि

१. तस्मात्कर्तव्यताऽपि नान्या कर्तुः समीहितोपायतायाः। वि० वि० पृ० ३०४

इष्टसाधनत्वमेव विध्यर्थ इति कोऽनयोर्विशेषः ? न्यायमते क्रियागतेष्टसाधनत्वं विध्यर्थः, भाट्टमते तु प्रवृत्तिगतमेव तदिष्टसाधनत्वमिति विशेषः। भाट्टमते चाभिधाया अभ्युपगमः, न्यायमते अभिधाया अनभ्युपगमश्चेति वर्तते विशेषः। अत्रेयमाशङ्का जागर्ति यत् अभिधानामकस्य व्यापारस्याभ्युपगमः किमिति क्रियते ? व्यापारभिन्नस्य इतरनिष्ठ-व्यापारजनकत्वं स्वनिष्ठव्यापारद्वारा भवति। यथा दण्डः चक्रनिष्ठस्पन्दनाख्यव्यापार-जनकः, दण्डश्च स्वनिष्ठस्पन्दनाख्यव्यापारार्जनं विना न भवति चक्रनिष्ठस्पन्दजनकोऽपि तु दण्डस्य स्वनिष्ठस्पन्दार्जनद्वारा चक्रनिष्ठस्पन्दजनकत्वम्। व्यापारो हि परनिष्ठ-व्यापारजनको भवतीति तत्रापि स्वनिष्ठः कश्चिद्व्यापारोऽवश्यमेवाभ्युपगन्तव्य इति व्यापारभिन्नस्येत्युक्तम्। व्यापारिणः स्वनिष्ठव्यापारजनने व्यापारापेक्षायान्तु तस्यापि स्वनिष्ठव्यापारजनने व्यापारापेक्षेति तस्य तस्येति क्रमेण अनवस्थापत्तेर्दुर्वारत्वादिति परनिष्ठेत्युक्तम्। तावतापि ज्ञानद्वारैव लिङादीनां प्रवृत्तिजनकत्वमिति शब्दाश्रिता सा अभिधा न सेत्स्यति इत्यत उक्तं स्वनिष्ठव्यापारद्वारेति। सा च अभिधाख्या भावना यदा शब्दाश्रिता तदा शब्दाश्रितत्वादियं भावना शाब्दी भावनेत्युच्यते। अयमाशयः—भाट्टमते लिङ्लोट्तव्यदादियुक्तवाक्ये द्विविधभावना प्रतीयते—एका शाब्दभावना अपरा च आर्थभावना। आख्यातमात्रमार्थभावनामवगमयति लिङ्लोडादयश्च शाब्दभावनां प्रत्याययति। इदमेव "**अभिधाभावनामाहुः**" इत्यादिवार्त्तिकानुसारिसुचरितमिश्रमतम्।

मण्डनमिश्रादीनां मते तु "श्रेयःसाधनता ह्येषां नित्यं वेदात्प्रतीयते" इति वार्त्तिकानुरोधेन इष्टसाधनत्वमेव विध्यर्थः।

लोके लिङादीनामाप्तेच्छायां शक्तिग्रहो वर्तत इति वेदेऽपि नियोगः प्रवर्त्तनीयत्वेन इच्छा, तादृशार्थवाचकोऽत्र लिङादिर्भवति। नियोगः[1] प्रवर्त्तनम् प्रयोजनं वा, अत्रैव लिङादीनां शक्तिग्रहः। वेदे चास्मदादीनामिच्छा न सम्भवतीति इच्छाश्रयत्वेनात्र ईश्वरस्य सिद्धिर्जायते। इच्छा हि आत्मविशेषगुणः स च समवायसम्बन्धेनात्मनि वर्तते। यदाश्रिता च वेदार्था इच्छा स एव ईश्वरः। नियोगो हि आचार्यमते आप्ताभिप्राय एव।

विधिवादे इच्छा यदि प्रवृत्तिशब्दस्यार्थः स्यात्तदा "स्वर्गकामोऽश्वमेधेन यजेत" इत्यादिविधिवाक्यश्रवणानन्तरमश्वमेधयज्ञादौ इच्छा स्यात्, इच्छामात्रेणैव पुरुषः चरितार्थो भवेत् यतः इच्छैव विध्यर्थः स्वीक्रियते।

अयमभिप्रायः—कस्यापि शब्दस्य शक्तिग्रहे प्रदर्शितेषु बहुविधेषु कारणेषु व्यवहार-स्यैव प्राधान्यं वरीवर्ति। व्यवहारो हि शब्दप्रयोगात्मकस्तेनापि घटादिपदानामर्थमजा-नानस्य जिज्ञासोर्बालस्य शक्तिग्रहो भवति। यथा ज्येष्ठवृद्धेन गुर्वादिना घटमानय इति शिष्याय उक्तम्, ज्येष्ठप्रयोजकवृद्धवाक्यं श्रुत्वा प्रयोज्यशिष्यादिना घट आनीतः। तत्र

---

१. नियोगः प्रवर्त्तनम् प्रयोजनमर्थो येषां ते—आमोद० पृ० ३१७

समीपस्थ: व्युत्पित्सुर्बालः घटाद्यर्थेऽगृहीतशक्तिकोऽपि प्रयोजकवृद्धोच्चारितवाक्यं श्रुत्वा प्रयोज्यवृद्धस्य गमनं दृष्ट्वा घटानयनं च दृष्ट्वा प्रयोज्यवृद्धसमवेतप्रयत्नसाध्यघटानयनक्रिया प्रयोजकवृद्धोच्चरित "घटमानये"ति पदज्ञानजन्यशाब्दबोधजन्येति अनुमिनोति । घटानयनक्रियया प्रवृत्त्यनुमानञ्चेत्थम्भवति घटानयनक्रिया प्रयत्नपूर्विका, विलक्षणक्रियात्वात्, स्वीयक्रियावत् । प्रवृत्त्या च शाब्दबोधानुमानं जायते —घटानयनविषयकप्रवृत्तिः घटानयनविषयकज्ञानजन्या, तद्गोचरप्रवृत्तित्वात्; या यद्गोचरा प्रवृत्तिः सा तद्गोचरज्ञानजन्या, स्वीयस्तन्यपानप्रवृत्तिवदित्यनुमानेन घटानयनविषयकशाब्दबोधमनुमायानन्तरं घटानयनगोचरज्ञानम् घटमानयेतिवाक्यजन्यम्, तदन्वयव्यतिरेकानुविधायित्वात्; यद् यदन्वयव्यतिरेकानुविधायि तत् तज्जन्यं यथा तन्त्वन्वयव्यतिरेकानुविधायी पटः इत्येवमानयनक्रियान्विते घटपदार्थे शक्तिं विनिश्चिनोति । इत्येवं क्रियान्वितघटादौ शक्तिग्रहानन्तरं घटं नय, गां बधान, गां विसृजेत्यादिप्रयोजकवृद्धवाक्यात् कस्यचित्पदस्य संग्रहेण, कस्यचित्पदस्य त्यागेन, क्रियान्वितगवाद्यर्थे शक्तिमनुमिनोति—घटानयनकार्यम् घटमानयेति शब्दप्रयोज्यम्, तादृशशब्दश्रवणशून्यकालीनप्रवृत्त्यविषयत्वे सति प्रवृत्तिविषयत्वात्; एवं क्रमेण क्रियान्वितघटादौ शक्त्यवधारणानन्तरं क्रियान्वितघटत्वाद्यपेक्षया घटत्वादेरेव शक्यतावच्छेदकत्वे लाघवेन अनन्यलभ्यस्यैव शब्दार्थतया अन्वयस्य संसर्गमर्यादया भानेन च क्रियान्वितघटत्वे घटादिपदशक्यतावच्छेदकत्वस्य परित्यागौचित्यात् लाघवज्ञानादिसहकृतमनसा घटादिपदं क्रियान्वितघटादिशक्तमिति न कार्यान्वितघटत्वं शक्यतावच्छेदकम् किन्तु घटत्वमेव ।

लिङः शक्तिविचारेऽपि व्युत्पित्सुर्बालः यद्धि स्वप्रवृत्तिजनकत्वेनावधारयति तत्रैव तस्य शक्तिरिति निश्चिनोति । विना इच्छां न कस्मिन्नपि कर्मणी कोऽपि प्रयतत इति इच्छामेव लिङर्थमवधारयति; तथा च इच्छैव लिङर्थ इति केषाञ्चिन्मतम्[१] ।

पूर्वोक्तेन प्रसङ्गेन एतत्प्रतिपादितं यत् प्रवृत्तिशब्दस्यार्थः प्राथमिकेच्छा प्रयत्नो वेति । किन्तु इच्छा यदि प्रवृत्तिशब्दस्यार्थो भवेत्तदा "स्वर्गकामोऽश्वमेधेन यजेत" इति वैदिकविधिवाक्यश्रवणानन्तरमश्वमेधयज्ञादौ इच्छामात्रेणैव पुरुषः चरितार्थः स्यात् इच्छामात्रेणैव विध्यर्थस्य निर्वाहेण इच्छामात्रादेव फलस्य स्वर्गादेरुत्पत्तौ कर्मणो यागादेरननुष्ठानप्रसङ्ग एव भवेत् । बहुवित्तव्ययायाससाध्ये यागादिकर्मणि न कोऽपि कृतिं कुर्यात् यागादीनामकरणेऽपि विध्यर्थस्य निर्वाहेण पुरुषस्य कृतकृत्यताप्रसङ्गात्;

---

१. "अन्ये तु व्यवहारेण व्युत्पित्सुर्बालः स्वप्रवृत्तिजनकत्वेनावधारिते शक्तिं कल्पयति, तादृशीच्छैवेति सैव लिङर्थ इत्याहुः ।" तत्वचिन्तामणि टीका पृ० ७

आद्या प्रवृत्तिरिच्छैव इति प्रयोगात् यद्यपीच्छा अन्यत्र प्रवृत्तिशब्दार्थः कुसुमा० विवृति । पृ० १२०

तथा च यागाद्यकरणप्रसङ्गः समापतति[1]। क्रियमाणयागस्य न कोऽप्युपयोगः स्यात्केवलं जलताडनादिवद् वृथायासः एतस्मिन् संभवति। दृश्यते च लोके "स्वर्गकामोऽश्वमेधेन यजेत" एतद्वाक्यश्रवणानन्तरं पुरुषः यज्ञादौ प्रवृत्तः सन् यत्नवान् भवति। तस्माद् कृतिर्यत्नो वा विध्यर्थः न तु इच्छामात्रम्। कृतिर्हि फलपर्यवसाना भवति; तथा च फलपर्यवसानायाः कृतेर्विधिकार्यतया क्रियमाणस्य यागस्य उपयोगः सम्भवत्येव। विधिवादे हि न कायपरिस्पन्दनमात्रं कृतिर्यथाऽन्यत्र चेतनपुरुष-स्पन्दनस्य (व्यापारस्य) कृतिशब्दवाच्यत्वेन व्यवहारो भवति। प्रवृत्तिर्हि विधिज्ञानकार्या। तथा च कृतेः विध्यर्थत्वे मोक्षकामस्य पुरुषस्य कृतेः ज्ञानविधौ[2] भूतेषु दयाविधाने च चेष्टारूपायाः कृतेः शरीरपरिस्पन्दस्याभावेऽपि विधेः दर्शनान्न कृतिः विध्यर्थः। आत्मज्ञानं हि न स्पन्दाद्यधीनं यतः ज्ञानस्य आत्ममनःसंयोगजन्यत्वात् न स्पन्दाद्यपेक्षा तत्र वर्तते। कर्तृधर्मस्य स्पन्दनस्य ज्ञानमेतादृशविधिस्थले न भवति। तथा च स्पन्दनं चेष्टा वा न विध्यर्थः।

भवतु नाम स्पन्दाख्यायाः कृतेरात्मज्ञानादौ अभावात् विधित्वासम्भवेऽपि प्रयत्नः विध्यर्थः कस्मान्न भवति। श्रवणमनननिदिध्यासनादिकं हि प्रयत्नसाध्यमेव भवति भूतदयादीनामपि प्रयत्नविषयत्वसमस्त्येव। एतावता प्रयत्नो नैव विध्यर्थः यत्नो यदि विध्यर्थः स्यात्तदा वैधकर्मणि अप्रवृत्तिप्रसङ्ग एव स्यादिति संक्षेपः।

विधिविवेकग्रन्थे विधेः आलोचना वर्तते। प्रकरणस्यारम्भे एव विषयप्रयोजनादेः विशिष्टा निर्णयो विद्यते—

साधने पुरुषार्थस्य सङ्गिरन्ते त्रयीविदः।
बोधं विधौ समायत्तमतः स प्रविविच्यते॥

विधेर्बोध एव पुरुषार्थ-साधनम्। वेदवाक्यस्य तात्पर्यबलेनैव पुरुषार्थस्य सिद्धिर्जायते। ग्रन्थकारः कथयति विधिः शब्दः शब्दव्यापारो वा नास्ति। "तस्मान्न विधिः शब्दस्तद्व्यापारो वा।" अभिधेयभावनापि विधिर्नास्ति "अभिधेयोऽपि विधिर्नास्ति।" टीकाकारमते प्रमाणान्तरागोचरः शब्दः आलम्बननियोग एव विधिः, इत्येव प्रभाकरमतम्। एतस्य मतस्य विशेषरूपेण खण्डनं वर्तते। नियोगः केनापि रूपेण युक्तियुक्तो नास्ति। वाक्यार्थः शब्दप्रमाणको न भवितुमर्हति, यतः अपदार्थोऽपि तत्र वर्तते, अपदार्थः कदापि वाक्यार्थो न भवितुमर्हति, शब्दप्रमाणकः पदार्थोऽपि न भवितु-

१. इच्छामात्रेण विध्यर्थनिर्वाहे बहुवित्तव्ययायाससाध्ये यागाद्यकरणप्रसङ्गात्। न्या० कु० प्रका० ५२५।

२. आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यश्चेत्यत्र आत्मानं विजानीयात्।

मर्हति । यतः, कस्यापि प्रमाणान्तरस्यापि अभावे पदार्थत्वस्य अनुपपत्तिः भवति । शब्द एव नियोगे प्रमाणमित्यपि न समीचीनम्, तथा सति इतरेतराश्रयदोषो भवति "प्रमितिर्हि शब्देन नियोगे सम्बन्धग्रहात्सति च तस्मिन् शब्देन तस्य प्रमा"। प्रमाणान्तरेण नियोगस्य सिद्धिरित्यपि न भवितुमर्हति, यतः मानान्तरस्वीकारे सिद्धेरनपेक्षत्वमेव । नियोक्तृव्यापारेऽपि निगोस्य कर्त्ताऽपेक्षितो भवतीति, किन्तु एतदपि न सम्भवति, यतः शब्दस्य अपौरुषेयत्वाङ्गीकारात् । अतः केनापि प्रकारेण नियोगस्य सिद्धिर्न भवितुमर्हति ।

केषाञ्चिन्मते प्रतिभैव शब्दज्ञानम् । अत एव प्रतिभामात्रं विकल्पमात्रं वा शब्दज्ञानमिति विपश्चितः । प्रतिभानिबन्धनश्च व्यवहारः । प्रतिभानुगृहीतानि च प्रमाणानि व्यवहाराङ्गानीति । एतन्मतमपि खण्डितम् । प्रतिभावादस्वीकारे सकलायाः प्रवृत्तेरभावः । अतदात्मनि तादात्म्यप्रतीतिः भ्रान्तिः । ज्ञानस्य स्वप्रकाशत्वमखण्डत्वञ्च । ज्ञानसम्बन्धे आचार्यः कथयति—

सर्वाद्दृशामन्यवित्तमिन्द्रियाणां न गोचरः ।
अत एव न सर्वज्ञज्ञानकार्य्यं प्रसिध्यति ॥ पृ० १४५

ज्ञानमतीन्द्रियम्, ज्ञानं सर्वप्रकाशकम्, ज्ञानं न कस्यापि कार्यं न च प्रकाश्यम् । नियोगस्य सार्थकता केनापि प्रकारेण न सम्भवति । आचार्यस्य एष एव सिद्धान्तः, यत्—अतो न नियोगोऽनुप्रवेशेन वस्तुतत्त्वं प्रकाशयति । श्रुतिः कार्यार्थितां प्रकाशयति, सिद्धवस्तुनोऽपि प्रकाशं करोति । शब्दः द्विविधः, कार्याभिधायी लिङादिः, भूतवस्तुनोऽभिधायी लङादिः । उपनिषद्वाक्यं भूतवस्तुविषयकम् । उपनिषद्वाक्ये विधेरवसरो नास्ति "उपनिषदात्मतत्त्वं त्वनपेक्षविध्यन्तराद्वाक्यात्प्रतीयते शब्दभावना—शाब्दीभावनैव विधिः", इत्येव भट्टकुमारिलसम्मतम्, शब्दभावनापक्षोऽपि न युक्तियुक्तः, इष्टबोधाभावे शब्दभावनाबलेन लोकः प्रवर्तितो न भवितुमर्हति ।

काम्यकर्मणि नैमित्तिककर्मणि अधिकारभेदः—कार्यनिष्ठत्वबलेन प्रयोगनिष्ठत्वबलेन च काम्यकर्मणि नैमित्तिककर्मणि च अधिकारभेदो न भवितुमर्हति ।

इष्टसाधनता—इष्टसाधनतैव न विधिः । कर्तुः इष्टसाधनतापि कर्तव्या, अकरणे तत्त्वानवबोधः विधेरन्तर्भुक्तः, सर्वविषयकज्ञानमेव विधिः । अतएव गीतायामुक्तम्—"ज्ञानं ज्ञेयं परिज्ञाता त्रिविधं कर्म चोदना ।" वास्तविककर्मकरणे इष्टलाभः भवेत् ? तेन इष्टलाभेन मम कः सम्बन्धः ? अकरणे कस्तावद् दोषः ? कथं कर्तव्यम् करणे कस्य फलस्य प्राप्तिः स्यात् ? एतादृशपर्यालोचनायामेव विधेस्तात्पर्यम् ।

अज्ञानी एव कर्मणि अधिकारी, न तु ज्ञानी । एव खलु पुरुषः स्वभावतो रागाद्याविष्टो दृढफलैरुपायैः विषयोपार्जने प्रवर्तमानस्तदाक्षिप्तमनाः तत्पक्षपाती । न विगलितविषण्णप्रपञ्चमात्मतत्त्वमुपदिष्टं प्रत्येतुं परिभाषयितुं वा अलम् ।" स्वर्गादिफलं क्षणिकम् । तत्र दुःखसम्मिश्रणमप्यस्ति । यज्ञस्य स्वर्गाख्यं फलम् । अतः यज्ञे न ज्ञानी

अधिकृतः, यतः ज्ञानिनः सन्यासमेव कर्तव्यम् । आत्मज्ञानाधिकारे कर्मविधेरवसरो नास्ति—तस्मान्नाऽसाधने धात्वर्थेऽधिकारसिद्धिः । साधनत्वं चास्य विधिरित्युक्तम् ।

ब्रह्मसूत्रस्य तत्तु समन्वयात् (१।१।४) इति सूत्रे "प्रतिपत्तिविधिवादिनः" मतस्य खण्डनं वर्तते । विधिविवेकग्रन्थेऽपि आचार्यमण्डनः प्रतिपत्तिविधिवादिनः मतस्य विस्तृतरूपेण आलोचनां कृत्वा खण्डनमकरोत् । प्रतिपत्तिविधिवादी गुरुरेव इत्यपि एतस्मिन्नेव ग्रन्थे निर्दिष्टवान् । ब्रह्मप्रतिपत्तौ विधिरस्तीति समर्थनार्थमाचार्यः प्रभाकरस्य गुरोः वाक्यमप्युद्धृतवान्। परिशेषे आचार्यः मण्डनः कथयति—"अलं वा गुरुभिर्विवादेन" । ब्रह्मप्रतिपत्तिविधायकवाक्येन यदि ब्रह्मसिद्धिर्भवति, तदा गुरुणा सह विवादस्य प्रयोजनं नास्ति[१] ।

आचार्यप्रभाकरः मीमांसादर्शनस्य (१।१।२) सूत्रस्य शावरभाष्यस्य बृहतीटीकायां सकलस्यापि वेदार्थस्य कार्यरूपत्वमर्थात् साध्यरूपत्वमेव न तु सिद्धरूपत्वं कार्येऽर्थे एव वेदस्य प्रामाण्यात् इत्याह । एतस्य बृहतीवाक्यस्य पञ्जिकाख्यटीकायां शालिकनाथमिश्रः आचार्यमण्डनस्य ब्रह्मसिद्धिग्रन्थात् कियदंशमुद्धृत्य, वेदस्य सिद्धरूपोऽप्यर्थो भवितुमर्हतीति मण्डनमिश्रमतमुद्धृत्य तस्य विस्तृतरूपेणालोचनां कृत्वा तन्मतमखण्डयत्[२] ।

मण्डनाचार्यस्य एतन्मतखण्डनार्थं शालिकनाथोऽत्र यदवोचत् तस्य समाधानार्थमेव वाचस्पतिमिश्रः विधिविवेकस्य टीकायां न्यायकणिकायां शालिकनाथस्य वाक्यमादाय खण्डनमकरोत् ।

आचार्यः मण्डनः विधिविवेके शाबरभाष्यनिबन्धकारस्य प्रभाकरस्य वाक्यमुद्धृतवान्, किन्तु, तद्वाक्यं शाबरभाष्यस्य यस्यांशविशेषस्य व्याख्यामादाय निबद्धवान्, तदंशविशेषस्य बृहतीटीकायां तस्य वाक्यस्योपलब्धिर्नास्ति[३] ।

अद्वैतवेदान्तिनां मते उपनिषद्वाक्यानां साक्षादद्वितीयब्रह्मप्रतिपादकत्वेऽपि प्रतिपत्तिविधिवादिनां मीमांसकानां मते साक्षाद्रूपेण उपनिषद्वाक्यानामद्वितीयब्रह्मप्रति-

---

१. उपनिषदात्मतत्त्वन्त्वनपेक्षविध्यन्तराद् वाक्यात् प्रतीयते । अलं वा गुरुभिर्विवादेन । वि० वि० पृ० २८१ ।

२. अत्रापरोऽपरिपक्वविद्यावलेपोद्रेकतिरस्कृतविवेकः परिचोदयति । तदेतत् बालभाषितं बालादेवादरणीयतां लभते । पञ्जिका पृ० २० ।

३. यदि कार्यरूप एव वेदार्थः कथं तर्हि मन्त्रार्थवादाः सोपनिषत्काः? यस्माद् भूतादिकमर्थं चोदनैव गमयति । कथम्? कार्यमर्थमेवमवगमयन्ती गमयति । वि० वि० पृ० २७९ ।
यदि कार्य एवार्थे वेदस्य प्रामाण्यं कथं तर्हि भूताद्यवगतिर्मन्त्रार्थवादेषु । बृ० पृ० २६ ।

पादकत्वं न भवितुमर्हति । ब्रह्मप्रतिपत्तिविधायकवाक्यात् साक्षाद्रूपेण ब्रह्मप्रतिपत्ते कर्त्तव्यतया प्रतिपन्नत्वे विधेयभूतब्रह्मप्रतिपत्तेः विषयभूतं ब्रह्मापि प्रतिपन्नं भवतीति । अतः, मीमांसकाः नाद्वैतसिद्धान्तविरोधिनः किन्तु अद्वैतवेदान्तिनः येन रूपेण उपनिषद्वाक्यानामद्वैतब्रह्मणि प्रामाण्यं प्रतिपादयन्ति, मीमांसकाः तेन रूपेण न कथयन्ति, अपि तु विधायकवाक्यस्यैव प्रामाण्यं स्वीकुर्वन्ति ।

नात्र सन्देहो यत् मण्डनमिश्रः पूर्वमीमांसायाः श्रेष्ठः आचार्यः । वाचस्पतिमिश्रः यस्य ग्रन्थस्य टीकाकारः तस्य ग्रन्थस्य विषये किमु वक्तव्यम् । अस्मिन् विधिविवेके मण्डनमिश्रः आत्मज्ञाने विधिरस्ति न वेत्यस्मिन् विषये पूर्ववर्तिनां बहूनामाचार्याणां मतं प्रतिपादितवान् । उपसंहारे च आत्मज्ञाने विधिर्न भवितुमर्हतीति प्रतिपादितवान्[1] । 'विधिनिरपेक्षवेदान्तवाक्यादेव आत्मतत्त्वस्य प्रतीतिर्भवतीति' मण्डनमिश्रवाक्यस्य टीकायां वाचस्पतिमिश्रः कथयति "तिस्रः खल्विमाः प्रतिपत्तयः सम्भवन्ति । श्रुतमयी, चिन्तामयी साक्षात्कारवती च ।" इमास्तिस्रोऽपि प्रतिपत्तयो विधानायोग्याः, अतः, वेदान्तवाक्यैः विधिनिरपेक्षात्मतत्त्वस्य प्रतिपादनं जायते । एतदेव प्रतिपादितम् । 'तत्तिसृणामपि प्रतिपत्तीनां विधानानर्हत्वात् आत्मतत्त्वप्रतिपादनपरत्वं हि वेदान्तानामुपपादितम् । सर्वञ्चैतद ब्रह्मसिद्धौ कृतश्रमाणामनायासमधिगमनीयमिति नहास्माभिरुपपादितम्'[2] ।

आचार्यमण्डनस्य विधिविवेकग्रन्थेन चैतत्सुस्पष्टं जायते यत् प्राचीनकर्ममीमांसकानां मध्येऽपि एवम्भूताः सम्प्रदायाः आसन्, ये जीवब्रह्मणैरैक्यं स्वीकुर्वन्ति स्म । "तत्तु समन्वयात्" (ब्र० सू० १।१।४) इति सूत्रभाष्ये आचार्यः शङ्करः पूर्वमीमांसकानां मतद्वयस्य पूर्वपक्षरूपेण निर्देशं कृतवान्[3] । तस्य भामतीटीकायां वाचस्पतिमिश्रेणोक्तम्—भाष्यकारः आचार्यदेशीयानां मतमुत्थापयति—'अत्रापरे प्रत्यवतिष्ठन्ते इति' । एतन्मीमांसकानां मते यद्यपि जीवेन सह ब्रह्मणः ऐक्यं वेदान्तवाक्येन सिद्धं भवति तथापि स्वरूपतः ब्रह्माभिन्नः जीवः इत्यत्र वेदान्तवाक्यानां तात्पर्यं न भवितुमर्हति, कस्यापि वस्तुनः स्वरूपमात्रस्य प्रतिपादकं वाक्यं निरर्थकमेव स्यात् । अतः, वेदान्तवाक्यानां तादृशब्रह्मस्वरूपे तात्पर्यं नास्ति अपि तु स्वरूपस्य ज्ञानविधावेव तात्पर्यम् । अर्थात् वेदान्तवाक्येन तादृशब्रह्मणः ज्ञानमेव विहितम् । वेदान्तवाक्यानां विधावेव तात्पर्यं न तु वस्तुस्वरूपे, यतः वेदानां विधावेव तात्पर्यम् ।

अस्मिन् विषये पूर्वपक्षिणः मीमांसकाः वेदान्तवाक्यानां वस्तुस्वरूपे तात्पर्यं न भवितुमर्हति अपि तु कार्ये विधौ वा वेदान्तवाक्यस्य तात्पर्यमित्येतत्साधनार्थं शबर-

---

१. 'उपनिषदात्मतत्त्वं तु अनपेक्षविध्यन्तराद्वाक्यात्प्रतीयते' । वि० वि० पृ० २८१

२. वि० वि० न्या० क० पृ० २८१

३ अत्रापरे प्रत्यवतिष्ठन्ते यद्यपि शब्दप्रमाणकं ब्रह्म तथापि प्रतिपत्तिविषयतयैव शास्त्रेण ब्रह्म समर्प्यते । ब्र० सू० १।१।४

स्वामिनः भाष्यस्य महर्षेः जैमिनेः मीमांसासूत्रस्यापि प्रमाणतया निर्देशं कृतवन्तः। आचार्यवाचस्पतिमिश्रोऽपि एतस्य पूर्वपक्षभाष्यस्य व्याख्यायां प्रभाकरमतरहस्यं प्रदर्शितवान्। बृहदारण्यकोपनिषदि 'आत्मेत्येवोपासीत' (१।४।७) इत्यत्र शाङ्करभाष्ये प्रभाकरसम्प्रदायस्य मतं प्रदर्श्य आचार्यशङ्करः खण्डितवान्। **प्रभाकरः (गुरुः)** चोदनालक्षणोऽर्थो धर्मः (जै० सू० १।१।२) इत्यस्य सूत्रस्य भाष्यसम्मतार्थं प्रकाशितवान्। तेनैतदेवावगम्यते यत् वेदस्य अर्थः साध्यरूपः, न तु सिद्धरूपः। वेदस्य सिद्धवस्तुरूपः अर्थो न भवितुमर्हति। प्रभाकरः एतादृशसिद्धान्तस्य समर्थनं करोति, तेनावगम्यते यत् अयं सिद्धान्तः सुदूरपूर्वकालादेव प्रचलित। तथा हि—"चोदनालक्षणः कार्यरूप एव वेदार्थः, न सिद्धरूप इति प्रतिज्ञातम्' (पञ्जिका पृ० २०) चोदनेति क्रियायाः प्रवर्तकं वचनमाहुः, इति कार्यरूप एवेति दर्शयति। यदि कार्ये एव अर्थे वेदस्य प्रामाण्यं कथं तर्हि भूताद्यर्थावगतिर्मन्वार्थवादेषु? तेषामपि हि कार्यार्थता द्वितीये पादे वक्ष्यति। तदुक्तं शक्नोत्यवगमयितुम्। (बृहती पृ० २०-२३)

विधिविवेके आचार्यः मण्डनः गुरुप्रभाकरस्य एतन्मतखण्डनपूर्वकं स्वीयमतस्थापनार्थं प्रथमतः पूर्वपक्षरूपे प्रभाकरमतप्रदर्शनप्रसङ्गे उक्तवान् यद्धि वाक्यं न प्रवर्त्तकं न च निवर्तकं तादृशवाक्यस्य व्यर्थत्वात् न तादृशं वाक्यं भवितुमर्हति। श्रोतुरवगत्यर्थमेव वक्ता वाक्यं प्रयुनक्ति। सप्रयोजनमेव वाक्यं श्रोतुं श्रोता इच्छति। अतः सप्रयोजनमेव वाक्यं वक्ता प्रयुङ्क्ते। सिद्धवस्तुनः प्रतिपादकं वाक्यं सप्रयोजनं न भवितुमर्हति यतः सिद्धवस्तुप्रतिपादकेन वाक्येन प्रवृत्तिर्निवृत्तिर्वा किमपि न जायते। वाक्यं प्रवर्त्तकं वा भवति, यद्धि न प्रवर्त्तकं न निवर्त्तकं तत् निष्प्रयोजनम् अर्थात् व्यर्थमेव[1]।

एतस्या आशङ्कायाः उ: प्रसङ्गे आचार्यः मण्डनः कथयति—'कथं तर्हि भूताऽन्वाख्यायिनो वेदान्ता लौकिकवचांसि च'' पृ० १९२) अर्थात् अप्रवर्त्तकस्य अनिवर्त्तकस्य वा वाक्यस्य व्यर्थत्वे सिद्धवस्तुनः प्रतिपादकस्य वेदान्तवाक्यस्य एवं सिद्धवस्तुनः प्रतिपादकस्य लौकिकवाक्यस्य वा वैयर्थ्यं स्यात्। अत्र प्रभाकरः कथयति—'वेदान्तेषु तावदात्मतत्त्वप्रतिपत्तिः कर्त्तव्या' (पृ० २९२) अर्थात् वेदान्तवाक्यस्य वैयर्थ्यं नापतति, यतः आत्मा ज्ञातव्यः इत्यादिवेदान्तवाक्येनात्मविषयकप्रतिपत्तिः उक्तेति। विहितात्मप्रतिपत्तिविषयः आत्मा कीदृशः? एतादृशाकाङ्क्षायाः निवृत्त्यर्थमात्मस्वरूपप्रतिपादकं सर्वमपि उपनिषद्वाक्यमात्मस्वरूपं प्रतिपादयति। प्रमाणवाक्यस्य नैष स्वभावो यत् विधिनिरपेक्षं सत् वस्तुनः स्वरूपं प्रतिपादयेत्, एवमेव 'अयं देशः धनसमृद्धः। इत्यादिसिद्धवस्तुनः प्रतिपादकं लौकिकं वाक्यमपि विधिपर्यवसायि। 'लोके चेदमिह विध्यादि प्रतिपत्तव्यमिति वाक्यपर्यवसानम्' (वि० वि० पृ० १९२) अर्थात् 'त्वम् जानीहि' एतादृशविधिवाक्ये एव पूर्वोक्तवाक्यस्य पर्यवसानं भवति। अत्रैव मण्डनाशयाभिव्यक्तिप्रसङ्गे

---

१ ननु नाप्रवर्त्तकम् निवर्त्तकं वा वचः समस्ति, वैयर्थ्यात् कर्त्तव्यतापर्यवसायिनी हि वाक्यप्रवृत्तिः। वि० वि० पृ० १९२

वाचस्पतिमिश्रः कथयति—गुरुप्रभाकरः यद् ब्रह्मप्रतिपत्तौ विधिं स्वीकरोति, सा प्रतिपत्तिः किमुपनिषद्वाक्यजन्यब्रह्मविषयकशाब्दबोधभूता ? अथ वा शब्दबोधानन्तरं ब्रह्मविषयकध्यानभूता चिन्तनभूता वा ? अथ वा ब्रह्मसाक्षात्कारात्मिका ? परन्तु प्रदर्शितासु तिसृषु प्रतिपत्तिषु कस्यामपि प्रतिपत्तौ विधिर्न भवितुमर्हति। एतासु प्रथमा श्रुतमयी, द्वितीया चिन्तामयी तृतीया च साक्षात्कारवती। श्रुतमय्यां प्रतिपत्तौ विधिर्न भवितुमर्हति, यतः ब्रह्मप्रतिपादकवाक्याद्वाक्यार्थबोधे विधेरपेक्षा नास्ति। यदि वाक्यार्थबोधेऽपि विधेरपेक्षा स्यात्तदा कर्मविधिरेव स्वार्थबोधार्थमन्यविधेरपेक्षां कुर्यात्। एवमेव सोऽप्यपेक्षितविधिः स्वार्थबोधेऽन्यं विधिमपेक्षेत सोऽपि चान्यमित्यनवस्था स्यात्। विधिवाक्येन विधेयवस्तुनोऽवगत्यनन्तरं प्रवृत्तिर्भवति, एतदेव विधेः प्रयोजनम्। ब्रह्मविषयकशाब्दबोधान्तरं कुत्र प्रवृत्तिर्भवेत्? अतः शाब्दबोधे विधिस्वीकारे विधेः प्रयोजनं नास्तीति श्रुतमय्यां प्रतिपत्तौ विधिर्न भवितुमर्हति। न्यायकणिकायामग्रेऽप्युक्तम्—वेदान्तवाक्यस्य ब्रह्मप्रतिपं विधिः प्रतिपत्तिविषयस्य ब्रह्मस्वरूपस्य अपेक्षां करोतीति ब्रह्मस्वरूपे वेदान्तः प्रमाणं स्यादित्यपि न समीचीनम्, यतः प्रतिपत्तिः समारोपिते विषयेऽपि स्यात्, अतः वेदान्तवाक्यस्य ब्रह्मपरत्वं न सिद्धयतीति वेदान्तस्य ब्रह्मविद्यात्वमेव न सम्भवेत्। 'तिस्रः खल्विमाः प्रतिपत्तयः सम्भवन्ति—श्रुतमयी, चिन्तामयी, साक्षात्कारवती च। तत्र श्रुतमयीमधिकृत्याह—शब्दात्प्रतिपत्तेरुत्पत्तेः पुनस्तत्राव्यापारात्, न श्रुतमयी विधेया। शब्दाद्विधेयमवगम्यते उत्तरकाला प्रवृत्तिविधिप्रयोजनं न पुनः शब्दावबोध एव आत्माश्रयदोषप्रसङ्गादिति भावः।......अपि च प्रतिपत्तिविधिपरत्वे वेदान्तानां ब्रह्मस्वरूपसत्तायामप्रामाण्यप्रसङ्गः।......प्रतिपत्तिविषयो हि विधिः प्रतिपत्तिविषयमात्मत्वमपेक्षते। तथा च तथात्मशब्दः प्रमाणमिति चेत्। न। आत्मतत्त्वमन्तरेण समारोपेणापि प्रतिपत्तेरुपपत्तेः। एवञ्च तत्परत्वाभावात् वेदान्तानां ब्रह्मविद्यात्वं बाध्येत।' (न्या० क० पृ० १९३–५)

आचार्यमण्डनेनाप्युक्तं यत् वेदान्तवाक्यं यदि ब्रह्मप्रतिपत्तौ विधिप्रतिपादकं स्यात्, तदा तादृशवाक्यात् ब्रह्मप्रतिपत्त्यर्थमनुष्ठानस्यैव अवगतिः स्यात्, तथा च तादृशवाक्यात् आत्मतत्त्वस्य सिद्धिर्न स्यात्। एतदर्थम् आत्मतत्त्वस्य ब्रह्मतत्त्वस्य वा प्रतिपादके वेदान्तवाक्ये विधिसत्त्वेऽपि अविवक्षित एव विधिः।

"क्रियापरत्वञ्च विधेर्वस्तुरूपसत्ताया अविवक्षितत्वात् तत्प्रतिपत्त्यर्थम् अनुष्ठानं गम्यते नात्मतत्त्वावबोधः स्यात्।...... अतः श्रूयमाणो विधिरेवंजातीयकेषु विधानानर्हेष्वविवक्षितः। (न्या० क० पृ० १९४) यद्युच्येत—ब्रह्मप्रतिपादकवाक्यश्रवणे ब्रह्मविषयकं शाब्दज्ञानमुत्पद्यते। शाब्दज्ञाने विधेरावश्यकताया अभावेऽपि ब्रह्मविषयकशाब्दज्ञानाद्भिन्नं ब्रह्मविषयकं साक्षात्कारात्मकं ज्ञानं ब्रह्मगोचरं प्रत्यक्षज्ञानं वा विहितं स्यात्, ब्रह्म शाब्दज्ञानविषयं न भवितुमर्हति, यतः वाक्यार्थज्ञानमेव शाब्दज्ञानं पदार्थसंसर्गश्च वाक्यार्थः। उक्तसंसर्गज्ञानं संसृष्टानेकपदार्थविषयकं भवति। अतः निरस्त-

समस्त-भेदप्रपञ्चं ब्रह्मतत्त्वमेतद्वाक्यार्थज्ञानस्य विषयः कथमिव स्यात् । अत एव एतावदद्वैततत्त्वावभासज्ञानं वाक्यजन्यज्ञानाद्भिन्नं तस्मिन्नेव च विधिः । 'नन्वन्यदेवेदं शब्दप्रभवादात्मतत्त्वगोचरं ज्ञानं विधीयते । नहि शाब्दज्ञानपरिवेद्यं ब्रह्मस्वरूपम् । वाक्यलक्षणो हि शब्दः प्रमाणम्, पदार्थसंसर्गात्मा च तदर्थः, प्रत्यस्तमिताऽखिलभेदप्रपञ्चं चात्मतत्त्वम्, तत्कथमस्य गोचरः । तस्मात् प्रलीनसकलावच्छेदोल्लेखमद्वैततत्त्वावभासात्मकं ज्ञानमन्यदेव शब्दाद्विधीयते ।' (वि० वि० पृ० १९७)

प्रभाकराभिमतस्यैतस्य सिद्धान्तस्य खण्डनार्थं मण्डनाचार्य्यः कथयति—प्रभाकरस्य एतत्कथनमसङ्गतम्, अद्वैततत्त्वावभासात्मकः साक्षात्कारः विधेयो न भवितुमर्हति । यतः एतस्य अद्वैततत्त्वस्य साक्षात्कार एव फलम्, फलञ्च कदापि विधेयं न भवितुमर्हति । यद्धि अभिलषितं भवति, तत् फलातिरिक्तं किमपि नास्ति । अतः अभिलषितस्य अन्यस्य वस्तुनोऽभावे फले विधिः कथमिव स्यात् । विधेयार्थस्यानुष्ठानेन अभिलषितफललाभो भवतीति विधेर्विधायकत्वम्, अद्वैततत्त्वलाभश्च स्वयमेव फलस्वरूपः, ततोऽन्यत्किमपि अभिलषितं फलं नास्ति । यदि प्रभाकरः कथयति—मोक्षस्य फलत्वमेवञ्च तत्प्राप्त्यर्थमेव विधिर्भविष्यति । तत्र मण्डनः प्रतिपादयति—तदपि न समीचीनम्, यतः मोक्षो हि निष्प्रपञ्चात्मतत्त्वावभासनात् नैव भिन्नः, सप्रपञ्चात्मतत्त्वावभास एव संसारः, निष्प्रपञ्चात्मतत्त्वावभास एव मोक्षः, अर्थात् आत्मस्वरूपविश्रान्तिरेव च मोक्षः मोक्षस्य चान्यस्वरूपत्वे तादृशमोक्षस्य कार्यत्वमापतति । अविद्यात्मककर्मादिप्रपञ्च एव बन्धहेतुः अविद्योच्छेदश्च मोक्षः विद्या वा । 'वार्त्तमेतत्, न खलु फलांशो विधिगोचरः । निष्प्रपञ्चात्मतत्त्वावभासश्च फलमेव, न ततोऽन्यदीप्सते । मोक्ष इति चेत् ? ततोऽव्यतिरेकात् । सप्रपञ्चात्मतत्त्वावभासो हि संसारः । निष्प्रपञ्चात्मतत्त्वावभासो हि मोक्षः स्वात्मनि स्थितिः । अन्यथा कार्त्तत्वादमोक्षात् । बन्धहेतुश्च कर्म्मादिप्रपञ्चोऽविद्या, तदुच्छेदश्च विद्यैव । (वि० वि० पृ० १९७-९८) निष्प्रपञ्चात्मतत्त्वावभास एव मोक्षः न एतस्माद्व्यतिरिक्तः कश्चिदन्यः मोक्षः । एतस्य टीकायां वाचस्पतिमिश्रः—मोक्षः संसारविरुद्धस्वभावः । मोक्षस्य विरुद्धस्वभावताप्रदर्शनार्थमेव संसारप्रदर्शनम् । तस्मात् मोक्षः प्रवृत्तिविषयो न भवितुमर्हति, साध्यमेव प्रवृत्तिविषयभूतम् मोक्षो हि सिद्धस्वरूपः । मोक्षस्य सिद्धस्वरूपतायाः प्रदर्शनार्थमेव मोक्षः स्वात्मनि स्थितिरित्युक्तम् । मोक्षस्य सिद्धस्वरूपत्वप्रतिपादनेन मोक्षस्य साध्यत्वं खण्डितम् । अस्माभिः पूर्वमेव विवेचितं यत् प्रभाकरमते निष्प्रपञ्चं ब्रह्म शब्दज्ञानस्य विषयो न भवितुमर्हति । अत्र मण्डनाचार्यः कथयति—समस्तभेदप्रपञ्चरहितं ब्रह्म यदि शाब्दज्ञानस्य विषयो न भवति, तदा तादृशब्रह्मविषयकज्ञाने एव कथं विधिः स्यात् । यतः विषयेणैव ज्ञानं निरूपितं भवति । निर्विषयकस्य ज्ञानस्य निरूपणं न भवितुमर्हति, अपि तु सिद्धविषय एव ज्ञानस्य निरूपको भवति असिद्धविषयः ज्ञानस्य निरूपको न भवति । अत्र च ज्ञानस्य निरूपकं प्रपञ्चरहितं ब्रह्म, एतस्य च ब्रह्मणः सिद्धिः शब्दप्रमाणभिन्नेनान्येन प्रमाणेन न भवितुमर्हति ।

अतः एतादृशस्य ब्रह्मणः शाब्दज्ञानाविषयत्वे एतस्य ब्रह्मणः सिद्धिरेव न स्यात्, ब्रह्मणोऽसिद्धौ च ब्रह्मविषयकज्ञानस्यापि सिद्धिः न स्यात् । अतः ब्रह्मज्ञाने विधिर्न सम्भवति, तादृशब्रह्मणः शाब्दज्ञानाविषयत्वे ब्रह्मप्रतिपत्तिविषयकविधिर्न सम्भवेत् । यदि न कथञ्चिदपि शाब्दज्ञानविषयो ब्रह्म कथं तज्ज्ञानविधिः शक्यप्रतिपत्तिः । विषयतश्च ज्ञाननिरूपणम् सिद्धश्च तन्निरूपयति, तत्सिद्धिश्च प्रमाणान्तराऽभावात् स्यात् । तस्यापि चेदविषयः, तदसिद्धेर्ज्ञानविशेषाऽप्रतिपत्तेर्विव्यप्रतिपत्तिः ।' (वि० वि० पृ० १९८)

यद्यत्र प्रभाकरः कथयति—ब्रह्मस्वरूपस्य शाब्दज्ञानाविषयत्वेऽपि भेदप्रपञ्चप्रविलयेन तत् शाब्दज्ञानविषयो भविष्यति । अत्र मण्डनः समाधत्ते—तथासति ब्रह्म शाब्दज्ञानस्य अविषयभूतं न स्यात् । आत्मा ज्ञातव्यः, आत्मानमुपासीत इत्याद्युपनिषद्वाक्यं यदि ब्रह्मप्रतिपत्तिकर्तव्यतातात्पर्यकं स्यात्तदा ईदृशं ब्रह्म प्रतिपत्तव्यम् ब्रह्मणः ईदृशत्वम् इति उपनिषद्वाक्यस्यार्थं एव न स्यात् । यतः, यत्र वाक्यस्य तात्पर्यं तदेव तस्यार्थः । वचनस्य प्रतिपत्तिकर्तव्यतायां वाक्यस्य तात्पर्यमस्तीति ब्रह्मणः ईदृशत्वे वाक्यस्य तात्पर्यं नास्ति । अतः, वाक्यतात्पर्याविषयस्य ब्रह्मस्वरूपस्य वाक्येन सिद्धिर्नैव स्यात् । प्रतिपत्तिविधेः कर्तव्यतापरत्वेऽपि प्रत्येतव्यविषयपरत्वं नास्ति । अत्र प्रभाकरो वक्तुं **शक्नोति** ब्रह्मणः **ईदृशत्वस्य** माभूत् वाक्येन सिद्धिस्तथापि अर्थादेव तस्य सिद्धिः स्यात् । यतः, प्रतिपत्तौ विधिसत्त्वेऽपि प्रतिपत्तिः प्रत्येतव्यविषयिणी स्यात्, तथा च प्रतिपत्तिकर्तव्यतैव **प्रतिपत्तिः**, एवञ्च तद्विषयस्य ब्रह्मणः आक्षेपः स्यादिति प्रत्येतव्यब्रह्मतत्त्वस्य सिद्धिः स्यात् । अत्र मण्डनः समाधत्ते—एतन्न भवितुमर्हति, यतः **आरोपेणापि** प्रतिपत्तेः सम्भावना अस्ति, प्रतिपत्तेः कर्तव्यता प्रत्येतव्यस्य आक्षेपं कुर्यादिति तु सत्यम्, किन्तु प्रत्येतव्यस्य तथात्वस्य आक्षेपो नैव भवेत् समारोपेणापि प्रत्येतव्यस्योपपत्तिर्भवेदिति, अतः विधिवाक्येन वस्तुस्वरूपस्य सिद्धिर्नैव भवेत् **किमन्यत्, प्रतिपत्तिविधिः** प्रत्येतव्यविषये प्रमाणमपि नास्ति, तथा च समस्तभेदप्रपञ्चरहितस्य ब्रह्मणः सिद्धवस्तुस्वरूपत्वेऽपि शब्दव्यतिरिक्तान्यप्रमाणवेद्यत्वाभावात् **ब्रह्मणः** तादृशब्रह्मप्रति ादकोपनिषद्वाक्यस्य विधिशून्यत्वेऽपि सिद्धब्रह्मस्वरूपप्रतिपादकत्वे न कश्चिद्दोषः । तस्मात् विधिशून्योपनिषद्वाक्यं तादृशब्रह्मस्वरूपे प्रमाणं स्यादिति । अत एव 'चोदना हि भूतं भवन्तम्' एतस्य शाबरभाष्यस्य प्रभाकरकृता व्याख्या नैव समीचीना । 'नाप्यर्थोऽर्थः, अध्यारोपेणापि प्रतिपत्तेः सम्भवात् । अतो न नियोगाऽनुप्रवेशेन वस्तुतत्त्वं प्रकाश्यते । न हि तत्र शब्दस्य प्रामाण्यम् । एवमनपेक्षतया प्रामाण्यसिद्धेः कार्याऽन्वयरहितभूतादिमप्यवगमयितुमाम्नाय इत्यसमञ्जसमेतत् । यदि कार्यरूप एव वेदार्थः कथं तर्हि मन्त्रार्थवादाः सोपनिषत्काः ? यस्मादभूतादिकमर्थं चोदनैव गमयति । कथम् ? कार्यमर्थमेवमवगमयन्ती भूतादिकमपि गमयति' । (वि० वि० १९८-९९) यदि कार्यरूप एव वेदार्थः तदा मन्त्रार्थवादोपनिषदादेः भूतार्थप्रतिपादकवेदभागस्य प्रामाण्यं कथमिव स्यात् ? एतस्या आशङ्कायाः समाधानार्थं 'चोदना हि भूतं

भवन्तम्' इत्यादिशाबरभाष्यस्य अवतारणां कृत्वा व्याख्याने कथयति—भूतादिरूप-मप्यर्थं चोदनैव प्रतिपादयति। यदि भूताद्यर्थमपि चोदना प्रतिपादयेत्तदा वेदार्थमात्रस्य कार्यरूपता न सिध्यति। किञ्च भूतवस्तुनः प्रतिपादने भूतवस्तु प्रमाणान्तरविषयमिति अनपेक्षत्वलक्षणं प्रामाण्यमपि वेदस्य न स्यात्। अत्र समाधत्ते निबन्धकारः—'चोदना कार्यरूपस्य अर्थस्य अवगतिं कारयित्वा भूतादेरर्थस्याप्यवगतिं कारयति। शब्दो द्विविधः कार्याभिधायी लिङादिः, भूताद्यभिधायी च लङादिः। लिङादिप्रत्ययः कार्याभिधायी इति कार्यपरः लिङादिश्च प्रत्ययः यद्यपि भूतादेरभिधायी तथापि कार्यान्वितभूतादेः प्रतिपादनं करोतीति परम्परारूपेण कार्यपर एव। तथा च भूतादेरभिधायिनः लङादेरपि कार्ये अर्थे तात्पर्यात् कार्यार्थत्वं सिध्यति। अत एव भूतादेरभिधायिनः लङादेरपि अनपेक्षत्वमस्ति। यदि कार्यासम्बद्धस्य शुद्धभूतवस्तुमात्रस्य प्रतिपादनं लङादिः कुर्यात्तदा प्रमाणान्तरसिद्धभूतवस्तुनः प्रतिपादकत्वात्सापेक्षः स्यात्। तथा सति तस्मिन् निरपेक्षत्वरूपं प्रामाण्यं न स्यादिति।

कार्यान्तरशून्योऽपि वेदः भूतादिवस्तुनः प्रतिपादको भवितुमर्हतीति न्यायकणिकायां वाचस्पतिमिश्रः कथयति—"चोदना हि भूतं भवन्तम्" इत्यादिशाबरभाष्यस्य निबन्धनकारप्रदर्शितव्याख्या नैव समीचीना, अत एव आचार्यः मण्डनः "असमञ्ज-समेतदि" त्युक्तवान्। एतदिति सर्वनाम्ना निबन्धनकारव्याख्या निर्दिष्टा। निबन्धन-कारेण शाबरभाष्यटीकायामेवमुक्तम्। यदि कार्यरूप एव वेदार्थस्तदा भूतार्थप्रतिपादक-मन्त्रार्थवादोपनिषद्वाक्यस्य कस्तावदर्थो भवेत्। निबन्धनकारो ह्येतदाशङ्कया भाष्य-वाक्यस्यावतारणां कृतवान्, व्याख्यायाञ्च कथयति —चोदनैव भूताद्यर्थस्य प्रतिपादिका। यदि चोदनैव भूताद्यर्थस्य प्रतिपादिका स्यात्तदा कार्यरूप एव वेदार्थो न भवति तथैव भूतार्थप्रतिपादकस्य वाक्यस्य अनपेक्षत्वमपि न स्यादित्येतदभिप्रायेण जिज्ञासां करोति कथम्? अर्थात् अर्थवादादिवाक्यं भूतार्थप्रतिपादकं कथं भवति? निबन्धनकारः समाधत्ते —चोदना हि कार्यार्थावगमिका सती भूतादिसिद्धवस्तुनोऽपि अवगतिं कारयति केवलं सिद्धवस्तुनः अवगमिका न भवितुमर्हति-एतत्पर्यन्तमेव निबन्धनकारस्य व्याख्या। आचार्यवाचस्पतिमिश्रः निबन्धनकारदृष्ट्या निबन्धनकारस्य व्याख्यां कृतवान्। 'चोदना हीति भाष्यग्रन्थस्य…… ……तदिदमसमञ्जसम्। भूतार्थपरत्वेऽप्यनपेक्षत्वेन प्रामाण्यो-पपत्तेः'। (न्या० क० पृ० १९९)

आचार्यमण्डनः विधिविवेकग्रन्थे ब्रह्मसिद्धौ च निबन्धनकारस्य यद्धि वचनं उद्धृतवान् तद्वचनं प्रभाकरविरचितवृहतीटीकायां नोपलभ्यते, अतः प्रभाकरविरचित-निबन्धनग्रन्थः कश्चिदन्य एव किन्तु वृहतीग्रन्थे विवेचनसाम्यमस्ति। अत्र विधिविवेक-ग्रन्थस्य, ब्रह्मसिद्धिकारस्य मीमांसावृहतीग्रन्थस्य च वाक्यमुद्ध्रियते—यदि कार्यरूप एव वेदार्थः कथं तर्हि मन्त्रार्थवादाः सोपनिषत्काः यस्मात् भूतादिकमर्थं चोदनैव गमयति। कथम्? कार्यमर्थमवगमयन्ती भूतादिकमपि गमयति।' (वि० वि० पृ० १९९)

कथं तर्हि मन्त्रार्थवादाः सोपनिषत्का इत्याशङ्क्य 'चोदना हि भूतं भवन्तमि' त्याद्युक्तम् । एतदुक्तं भवति—कार्यमर्थमवगमयन्ती चोदनैव भूतादिकमप्यर्थमवगमयतीति ये मन्यते तत्प्रतिबोधनाय प्रयत्यते ।' (ब्र० सि० पृ० ७४)

'चौदनेति क्रियायाः प्रवर्तकं वचनमाहुः' इति कौर्येऽर्थे वेदस्य प्रामाण्यं दर्शयति—'चोदना हि भूतमिति । यदि कार्य एवार्थे वेदस्य प्रामाण्यं कथं तर्हि भूताद्यर्थावगतिर्मन्त्रार्थवादेषु ? तेषामपि हि कार्यार्थतां द्वितीये पादे वक्ष्यति । तदुक्तं शक्नोत्यवगमयितुमिति ।' (बृहती १।१।२)

केचन प्राभाकराः कथयन्ति निष्प्रपञ्चात्मतत्त्वसाक्षात्कारस्य फलत्वात् तत्र विधिर्न भवितुमर्हति इति सत्यम्, किन्तुनिष्प्रपञ्चात्मतत्त्वविषयिका या चिन्तामयी प्रतिपत्तिः तत्र विधिस्वीकारे कापि बाधा नास्ति । निष्प्रपञ्चात्मतत्त्वविषयकशाब्दज्ञानधारैव चिन्ता । इयं शाब्दज्ञानधारैव ध्याननाम्ना उच्यते । ध्यानमेवात्र चिन्ता । ध्यानं चिन्तापरपर्यायः स्मृत्यनुकूलो व्यापारः । ध्यानं वा नैव फलम् अपि तु आत्मतत्त्वसाक्षात्काररूपफलस्य साधनम्, फलसाधनत्वाच्च तत्र विधिस्वीकारे न काप्यापत्तिः । 'अन्ये तु शाब्दज्ञानसन्तानविधानमिच्छन्ति । तस्य संहृतनिखिलभेदोल्लेखविशुद्धविशदज्ञानफलत्वात् । अत्रापि नात्मरूपावगतिः । ज्ञानप्रकर्षश्चाभ्यासनिबन्धनः प्रथित इति न चोदनार्थता । (वि० वि० पृ० २००)

प्रभाकरसम्प्रदायस्य समाधानप्रसङ्गे आचार्यमण्डनः कथयति—ज्ञानविधितात्पर्यकवाक्यात् ज्ञेयस्वरूपस्य सिद्धिर्न भवतीति पूर्वमेवोक्तम् । चिन्तारूपप्रतिपत्तौ विधिस्वीकारे चिन्तनीयवस्तुनः प्रकृतस्वरूपस्य एतद्विधिप्रमाणेन सिद्धिर्न स्यात्, यतः चिन्तनीयवस्तुनः आरोपेणापि चिन्ता सिद्ध्यतीति चिन्तनीयविषयः प्रमाणसिद्धो न भविष्यति । प्रभाकरस्य एतन्मते अयं तावत् विशिष्टदोषः—चिन्ता चिन्तनीयवस्तुनः, ध्यानं ध्येयवस्तुनः प्रत्यक्षजनकं भवतीति अन्वयव्यतिरेकसिद्धत्वात् प्राप्तविषयेऽप्राप्तस्य प्रापको विधिर्न भवितुमर्हति । निरस्तभेदप्रपञ्चात्मतत्त्वस्य विधिनिरपेक्षोपनिषद्वाक्येनापि प्रतीतिर्जायते । अनेन प्रकारेण प्रतिपत्तिविधिप्रयुक्तप्रत्येतव्यवस्तुनः सिद्धिर्न भवितुमर्हति, तथा च प्रतिपत्तिविधिप्रयुक्तोपनिषद्वाक्यं प्रत्येतव्यब्रह्मणः प्रतिपादनं न करोति, अपि तु विधिनिरपेक्षोपनिषद्वाक्यमेव निष्प्रपञ्चब्रह्मणः आत्मनो वा प्रतिपादनं करोति । प्रभाकरमतं स्वीकृत्यैवाचार्यमण्डनः कथयति—'अलं वा गुरुभिर्विवादेन' (वि० वि० पृ० २००) प्रतिपत्तिविधिप्रयुक्तप्रत्येतव्यवस्तुविधिनैव सिध्यति चेत्सिध्यतु मम का आपत्तिः ।

ब्रह्मप्रतिपत्तिः यदि विधायकवेदान्तवाक्येन विहिता तदा विधायकवेदान्वाक्यं प्रतिपत्तव्यनिष्प्रपञ्चे ब्रह्मणि प्रमाणं भवितुं नार्हति । निष्प्रपञ्चं ब्रह्म वेदान्तवाक्यरूपप्रमाणभिन्नान्यप्रमाणेन सिद्धं न भवितुमर्हति इति सर्वसम्मतम्, यदि वेदान्तवाक्ये-

नापि निष्प्रपञ्चस्य ब्रह्मणः सिद्धिर्न भवेत्तदा ब्रह्मणः सिद्धिर्न जातेत्येव वक्तव्यम् । अतः निष्प्रपञ्चे ब्रह्मणि वेदान्तवाक्यानि न प्रमाणानि । केचन ब्रह्मप्रतिपत्तिकर्तव्यता-प्रतिपादनव्याजेन ब्रह्मणि वेदान्तवाक्यस्य प्रामाण्यमेव नास्तीति प्रतिपादयन्ति ।

'एवम्भूत आत्मा प्रतिपत्तव्यः' एतादृशप्रतिपत्तिविधिना आत्मा अपि एवम्भूत इत्यस्य सिद्धिर्न भवति, यतः यद्वस्तु यादृशं नास्ति तस्य वस्तुनः तेन रूपेण ज्ञानं भवितु-मर्हति । 'आत्मा विजरो विमृत्युः' अनेन विधिवाक्येन आत्मनः जराराहित्येन रूपेणापि ज्ञानं भवितुमर्हति एवमेव मृत्युयुक्तस्यापि वस्तुनः जरामृत्युरहितरूपत्वेनापि ज्ञाने का आपत्तिः । अतद्रूपवस्तुनि तद्रूपाध्यारोपेणापि ज्ञानस्य चर्चा श्रुतावपि बहुषु स्थानेषु उक्ता । यथा 'मनो ब्रह्मेत्युपासीत' 'योषा वाव गौतमाग्निः' इत्याद्यनेकश्रुतिवाक्येन यद्धि वस्तु यद्रूपं नास्ति तस्य वस्तुनः तेन रूपेण अवगतेश्चर्चा कृता । अतः, जरामृत्यु-रहितत्वेन रूपेण ब्राह्मणः ज्ञानं कर्तव्यमिति श्रुतौ कथनेऽपि आत्मा विजरो विमृत्युरिति सिद्धः स्यादिति वक्तुं नैव शक्यते अन्यवस्तुनि अन्यधर्मारोपेणापि ज्ञानं भवितुमर्हति । जैमिनिसिद्धान्तमवलम्ब्यैव प्रतिपत्तिविधिवादिनः आसीत् कदाचित्प्राबल्यम्, ते ब्रह्माद्वैत-वादस्य समर्थनं प्रबलयुक्त्या कृतवन्तः ।

अद्वैतवेदान्तिनः प्रदर्शितायाः आपत्तेः समाधाने प्रतिपत्तिविधिवादिनः कथयन्ति—ब्रह्मप्रतिपत्तौ विधिस्वीकारे ब्रह्मणः सिद्धिर्नैव स्यात् इति तु महदाश्चर्यम् । अन्यवस्तुनो-ऽन्यरूपेण ज्ञानमिति तु कस्मिन्नपि मते न सम्भवति, अन्यधर्मसमारोपेणान्यवस्तुनः ज्ञानं भवितुमेव नार्हति । अन्यवस्तुनः अन्यरूपेण ग्रहणे सति तज्ज्ञानमेव न भविष्यति । ज्ञानं कदापि विपरीतार्थकं न भवति—सर्वमपि ज्ञानं यथार्थमेव । अत एव प्रतिपत्ति-विधिवादिनः अख्यातिवादिनाम्ना प्रसिद्धाः । अख्यातिवादस्य विस्तृतं विश्लेषणं बृहतीग्रन्थस्य १।१।५ अधिकरणे कृतम् । तथा च 'आत्मा एवंरूपो ज्ञातव्यः' इति कथने सति आत्मनः एवंरूपता अवश्यमेव सिध्येत् अत्र नास्ति सन्देहः । ये अतथावस्तुनि तथाभावसमारोपं स्वीकुर्वन्ति तेषां मते ज्ञानविधिना ज्ञेयवस्तुनः सिद्धिः नापि भवितु-मर्हति, किन्तु ज्ञानं कदापि विषयव्यभिचारि न भवति । तथा च ज्ञानविधिवाक्यस्य ज्ञेयस्वरूपे तात्पर्याभावेऽपि ज्ञानमहिम्नैव ज्ञेयवस्तुनः स्वरूपस्य सिद्धिः स्यात् । यद्वस्तु यद्रूपं नास्ति तत् तद्रूपेण कदापि विषयः न भवति, विषयं विनापि यदि ज्ञानं स्यात्तदा लोकव्यवहार एव उच्छिद्येत । ज्ञाने वस्तुनः भासमानत्वेऽपि ज्ञानस्य अन्यदेवालम्बनम्, यथा ज्ञाने रजतं भासते ज्ञानस्य आलम्बनञ्च शुक्तिका—एतच्च प्रतीतिविरुद्धम् । यद् वस्तुज्ञाने भासते तदेव तस्य ज्ञानस्य विषयः आलम्बनम्, ज्ञाने यत् न भासते तत्तस्य ज्ञानस्य आलम्बनं विषयो वा इति स्वीकारे स्वानुभवविरोध एव भवति ।

किञ्च विषयस्य व्यवहारार्थमेव विषयज्ञानस्यावश्यकता वर्तते । विषयाभावेऽपि यदि ज्ञानं स्यात्तदा ज्ञानं प्रति विश्वासः एव न स्यात् । आचार्यमण्डनः अख्यातिवादं खण्डयित्वा अन्यथाख्यातिं स्वीकृतवान् । अनिर्वचनीयख्यातिमसौ नैव स्वीकृतवान्,

अतः किम् उभयोर्विरोधो नास्ति। यद्यपि मीमांसाकाचार्यैः ब्रह्मात्मैक्यं स्वीकृतम् तथापि अद्वैतवेदान्तिभिः सह ऐकमत्यं नास्ति। आचार्यदेशीयमतेन प्रभाकरमतस्यैव निर्देशं कृतवान् भामतीकारः। अमलानन्दः कल्पतरौ प्रतिपत्तिविधिवादिमते आपातदृष्ट्या ब्रह्मात्मैक्यस्य सिद्धिर्भवतीति 'अत्रापरे प्रत्यवतिष्ठन्ते' एतस्य पूर्वपक्षस्य सारसङ्कलनप्रसङ्गे उक्तवान्—

अयन्तु सन्तु वेदान्ता मानं ब्रह्मात्मवस्तुनि।
किन्तु ज्ञानविधिद्वारेत्येष भेदः प्रतीयताम्। (क० १।०।४) पृ० १०८

पूर्वपक्षो भवतु सिद्धान्तपक्षो वा प्रभाकरदृष्ट्या ब्रह्मात्मैक्यवादोऽद्वैतवाद एव वर्तते इत्यत्र नास्ति सन्देहः। मण्डनमिश्रः उत्तरमीमांसादृष्ट्या अद्वैतवादस्य मण्डनं कृतवान् किन्तु प्रभाकरः पूर्वमीमांसादृष्ट्यैवाद्वैतवादमुक्तवान्। पूर्वमीमांसादृष्ट्या ब्रह्मात्मैक्यप्रतिपादनं न सम्भवतीत्येव प्रदर्शनार्थमद्वैतवेदान्ती प्रभाकरमतस्य खण्डनं कृतवान्।

श्लोकवार्तिकस्य टीकाकारः सुचरितमिश्रः स्वप्रणीतकाशिकाटीकायां प्रभाकरमतं निर्दिष्टवान्—चोदनासूत्रस्य भाष्ये आचार्यः शबरस्वामी 'चोदना हि भूतं भवन्तं भविष्यन्तं सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवञ्जातीयकमर्थं शक्नोत्यवगमयितुम्' (जै० सू० १।१।२ भा०)। भट्टपादः प्रभाकरश्च एतस्य भाष्यस्य व्याख्यानं कृतवान्। भट्टपादसम्मतं व्याख्यानमेव समीचीनमिति प्रतिपादनार्थं सुचरितमिश्रः प्रभाकरसम्मतं व्याख्यानं प्रदर्श्य खण्डितवान्। तथा हि—'चोदना हि भूतमित्येतस्य ये हि एवं कथयन्ति यत् वेदवाक्येन कार्यरूपार्थप्रतिपादनेऽपि भूतादेरर्थस्यापि अवगतिर्जायते वेदवाक्यं भूतार्थस्य प्रतिपादकं नास्ति अपि तु भूताद्यर्थस्यावगमकम्' कार्यरूपेऽर्थे एव वेदस्य तात्पर्यम्, भूतादिवस्तुनि वेदस्य तात्पर्यं नास्ति। यस्य वाक्यस्य यस्मिन् अर्थे तात्पर्यं नास्ति तद्वाक्यं तस्य अर्थस्य प्रतिपादकं न भवति, वाक्यं तात्पर्यविषयीभूतस्यैवार्थस्य प्रतिपादकं भवति, वेदस्य कार्यरूपे एवार्थे तात्पर्यम्, तथा च वेदावाक्यं कार्यरूपस्यैवार्थस्य प्रतिपादकम्, भूतादिवस्तुनि वेदस्य तात्पर्यं नास्ति अतः वेदो भूताद्यर्थस्य प्रतिपादको नास्ति। वेदस्य भूतादिवस्तुनः प्रतिपादकत्वाभावेऽपि भूतादिवस्तुनः अवगमकत्वं भवितुमर्हति, तात्पर्याभावेऽपि अवगमकत्वे बाधा नास्ति। वाक्यस्य यत्र तात्पर्यन्तत्रैव तत्प्रमाणम्. तात्पर्यविषयीभूते एवार्थे वाक्यं प्रमाणम्, तात्पर्याविषये वाक्यं प्रमाणं न भवति। वेदस्य भूतादिवस्तुनोऽवगमकत्वेपि वेदवाक्यं भूतादिवस्तुनि प्रमाणं नास्ति[1] वेदवाक्यं यदि भूतादिवस्तुनः प्रतिपादकं न भवेत् तदा उपनिषद्वाक्यैः अनाद्यनन्तविज्ञानानन्दस्वरूपब्रह्मणः सिद्धिः कथमिव स्यात्। कस्मिन् च कार्यरूपेऽर्थे उपनिषद्वाक्यानां प्रामाण्यं स्यात्[2] ?

१, काशिका पृ० ७०।
२. काशिका पृ० ७०–७१।

अत्र कार्यार्थतावादी प्रभाकरः कथयति—उपनिषद्वाक्यानां तादृशब्रह्मप्रतिपत्तिकर्तव्यतायामेव तात्पर्यमवगन्तव्यम्। उपनिषदि तादृशब्रह्मज्ञानविषयकं 'आत्मा ज्ञातव्यः' इत्यादिविधिवाक्यं वर्तते। एतज्ज्ञानविषयकविधिवाक्यस्यायमर्थः—विज्ञानानन्दस्वरूपं ब्रह्म अवगन्तव्यम्। उपनिषद्वाक्यानां तादृशात्मस्वरूपे तात्पर्याभावे तादृशात्मस्वरूपस्य सिद्धिरुपनिषद्वाक्येन कथमिव स्यात्। अतात्पर्यविषये शब्दः प्रमाणं न भवति, भिन्नतात्पर्यविषयकं वाक्यं भिन्नेऽर्थे प्रमाणं न भवितुमर्हति, अपि तु वैपरीत्यस्यैव सम्भावना वर्तते। लोकव्यवहारेऽपि यद्धि वस्तु यद्रूपं नास्ति तस्य तद्रूपेणावगत्यर्थमुपदेशो भवति। यथा यः पिता नास्ति तस्य पितृरूपेण ज्ञानस्योपदेशो लोके भवति। सुमित्रा लक्ष्मणं कथयति—'रामं दशरथं विद्धि' इति। केवलं लोकव्यवहारे एव न अपि तु वेदेऽपि एतादृशः उपदेशः वर्तते—'ओमित्येतदक्षरमुद्गीथमुपासीत' ओङ्कारः उद्गीथः नास्ति तथापि अनुद्गीथस्योद्गीथरूपेण उपासना उक्ता। अत्र प्राभाकराः वदन्ति यत् उपनिषद्वाक्यानां विधावेव तात्पर्यमिति तादृशात्मस्वरूपस्य उपनिषद्वाक्येन सिद्धिर्माभूत् तथापि प्रमाणान्तरेण तादृशात्मतत्त्वस्य सिद्धिर्भविष्यति। अत्र एष सन्देहः—प्रमाणान्तरेण कस्य प्रमातुः तादृशात्मस्वरूपसिद्धिः स्यात्। प्रमाता बद्धपुरुषः मुक्तपुरुषो वा। बद्धपुरुषस्य कृते प्रमाणान्तरेण तादृशात्मनः सिद्धिर्न भवितुमर्हति। यतः, संसारबद्धजीवः शरीरेन्द्रियादिसंघातव्यतिरिक्तस्य सच्चिदानन्दब्रह्मस्वरूपस्य साक्षात्कारं कर्तुं न शक्नोति बद्धजीवः शरीरमेव आत्मा इति जानाति, अतः तस्य कृते आत्मा दुःखी, अनित्यः, जडः इत्यादिरूपेणैवावगतो भवति[1]। एवमेव यः किल मुक्तः पुरुषः सोऽपि प्रमाणान्तरेण तादृशात्मानं ज्ञातुं न शक्नोति। यतः मुक्तः पुरुषः स्वरूपप्रतिष्ठो भवति। तेषामनाद्यविद्याप्रयुक्तं शरीरेन्द्रियादिनिखिलप्रपञ्चजातं चिरनिवृत्तं जायते। अतः मुक्तः पुरुषः प्रमितिप्रमातृप्रमाणादिविभागरहितः सुनिश्चलः आनन्दरूपफलीभूतब्रह्मभावे स्थितो जायते। अस्यामवस्थायां द्वितीयस्य वस्तुनोऽभावात् मुक्तः पुरुषः प्रमाणान्तरेण तादृशं ब्रह्म ज्ञातुं न शक्नोति। अतः ज्ञाने विधिस्वीकारे तादृशज्ञानेन ज्ञेयस्य तादृशात्मतत्त्वस्य सिद्धिर्न भवितुमर्हति। अत एव युक्त्या शास्त्रस्वरूपालोचनया वेदस्य कार्यार्थत्वं न भवितुमर्हति। तस्मात् भट्टपादसम्मतः एवार्थः स्वीकरणीयः। उपनिषदा ब्रह्मात्मैक्यस्य सिद्धिर्न भवतीति प्रभाकरस्य व्याख्यानमुपादेयम्। शाबरभाष्यस्य भट्टपादसम्मतव्याख्यया उपनिषदा ब्रह्मात्मैक्यस्य सिद्धिर्भवतीति सुचरितमिश्रः एतस्याः एव व्याख्यायाः समर्थनं करोति।

मण्डनमिश्रः विधिविवेकेऽधिकारविधिनिरूपणप्रसङ्गे भर्तृमित्रस्य मतं प्रदर्श्य खण्डयति—भर्तृमित्रः मीमांसकः सन्नपि आसीदद्वैताचार्यः। प्रभाकरापेक्षया भर्तृमित्रसिद्धान्तः आसीदनुकूलतरः अद्वैतस्य। सम्पूर्णस्य कर्मकाण्डस्य अधिकारसिद्धावेव पर्यवसानम्। शङ्करः मण्डनः अन्ये चाद्वैतवेदान्तिनः चित्तशुद्धिसम्पादकतया विहितकर्म

१. काशिका पृ० ७१।

एव आत्मज्ञानेऽधिकारं सम्पादयन्ति । विहितकर्मणः स्वर्गादेः फलस्य लाभो न भवति-इति ते न स्वीकुर्वन्ति अपि तु सर्वस्यापि विहितकर्मणः स्वर्गादिविशेषफलसत्त्वेऽपि विहितकर्मणा शुद्धचित्तः सन् पुरुषः आत्मज्ञाने अधिकारी भवति । आचार्यः शङ्करः नित्यस्य नैमित्तिकस्य वा कर्मणोऽनुष्ठानेन चित्तशुद्धिर्भवतीति कथयति, काम्यं कर्म स्वर्गादिफलस्यैव जनकं भवति, काम्यं च कर्मचित्तशोधकं न भवति । एतादृशमतभेद-सत्त्वेऽपि विहितकर्मणः फलं चित्तशुद्धिरेवेति स्वीकरोति । सिद्धित्रयप्रणेता सुप्रसिद्धः यामुनाचार्य्यः स्वग्रन्थे अद्वैतवेदान्तिनामाचार्याणां नामोल्लेखप्रसङ्गे भर्तृमित्रस्यापि नामोल्लेखं कृतवान् । आचार्यः भर्तृमित्रः स्वीकरोति कस्यापि विहितकर्मणः किमपि फलं नास्ति । सर्वमपि विहितं कर्म केवलं रागादिदोषस्यैव निवर्तकं भवति, कर्मानुष्ठानेऽनुष्ठाता शान्तः दान्तश्च भवति, शान्तदान्तपुरुषस्यैव आनन्दस्वरूपनिष्प्रपञ्चात्मनः साक्षात्कारो भवति, अयं साक्षात्कार एव वेदप्रतिपाद्यः पुरुषार्थः । दुःखलेश-हितानन्दात्मकात्मसाक्षात्कार एव पुरुषार्थः । आत्मा निष्प्रपञ्च इति दुःखलेशरहितः एवम् आत्मा आनन्दस्वरूपः । बाह्यविषयैः सह रागद्वेषावेव आत्मसाक्षात्कारविरोधिनौ, विहितकर्मानुष्ठाने निरतपुरुषस्य बाह्यविषयैः सह रागद्वेषौ क्षीणौ भवतः, तथा च पुरुषः शान्तः दान्तश्च भवति । शान्तः दान्त एव पुरुषः आत्मज्ञाने अधिकारी । अशान्तः अदान्तः पुरुषः आत्मज्ञाने नैवाधिकारी जायते । विहितकर्मणा स्वर्गादिफलस्य प्राप्तिर्भवति इति तु असङ्गतम् । धनपुत्रस्वर्गादिबाह्यविषयेषु जीवस्य रागः स्वभावतः प्रबलः, रागिपुरुषस्य धनादिषु प्रबलरागस्य सद्भावेऽपि कदाचित् काम्यधनादिलाभोपायाज्ञानात् प्रबलरागादि सोढुं बाध्यो भवति । शास्त्रं यदि काम्यवस्तुनः लाभोपायं निर्दिशति तदा शास्त्रं पुरुषस्य कृतेऽनर्थलाभसाधकं भवति । यथा कश्चित्पुरुषः रागवशात् दुष्टं वस्तु भक्षयितुमिच्छति, किन्तु तस्य वस्तुनः कुत्र उपलब्धिर्भवतीति न जानाति इति इच्छन्नपि असावनिष्टद्रव्यं न भुङ्क्ते, किन्तु कश्चित्पुरुषः तद्वस्तुनः प्राप्त्युपायं प्राप्तिस्थानं च निर्दिशति तदासौ रागी पुरुषः तदनिष्टं वस्तु अनायासेनैव प्राप्नोति, भुक्त्वा च तत् अनिष्टफलमपि प्राप्नोति । शास्त्रमपि यद्येवमेतादृशकामिपुरुषस्य काम्यस्य वस्तुनः लाभोपायं वर्णयति तदा कथन्तच्छास्त्रं स्यात् । हितशासकमेव शास्त्रम् यद्यहितशासकमपि शास्त्रं स्यात्तदा अशास्त्रं किं स्यात् ? कामिपुरुषस्य कृते कामोपहारप्रदानं रागिपुरुषस्य कृते रागेन्धनसम्पादनम् शास्त्रस्य कार्यं न मवितुमर्हति । येन पुरुषः अरागः अद्वेषः निष्कामो भवेत्तदेव शास्त्रम् । एवमेव समस्तोऽपि कर्मकाण्डभागः आत्मज्ञानाधिकारसम्पादनार्थं पर्यवसानं लभते—अयं भर्तृमित्रस्याभिप्रायः । विहितकर्मणः पृथक् फलस्यास्वीकारे जीवस्य सुखं विहितकर्मफलमेवमेव निषिद्धकर्मफलं दुःखमित्यस्यापि सिद्धिर्न भवति । अतः भर्तृमित्रमते जीवस्य सुखं दुःखं च स्वाभाविकमेव इति स्वीकर्तव्यम् । एतस्य स्वभाववादस्य समर्थनं करोतीति लोकायतमतमेव भर्तृमित्रमतम् । एतदर्थमेव भट्टपादः मण्डनमिश्रः अन्ये च आचार्याः एतन्मतं लोकाय-

तमिति खण्डयन्ति । अवसाने मण्डनः कथयति —लोकायतमते यत् स्वीक्रियते वेदेऽपि स एवार्थः इत्येव स्वीकर्तव्यम् । 'स्वाभाविकत्वाच्च फलोपभोगस्य स्वभाववाद एवाम्नायार्थश्छद्मना आश्रितः स्यात् । (वि० वि० पृ० ३३५ 'यागादीनामफलसाधनत्वे सेवादेश्च व्यभिचारादहेतुः (व्यभिचारादहेतुत्वे) सुखदुःखादिरेव स्वाभाविकलोकायतिकाभ्युपगताम्नायार्थः इति वचनव्यक्त्यन्तरेणाभ्युपगतं भवतीत्याह स्वभाविकत्वाच्च फलभोगस्य ।' (न्या० क० द्द० ३१५)

भर्तृमित्रस्याप्यव्याख्यानमनेनैव वेदस्य कर्मकाण्डभागो लोकायतीकृतः इति जैमिनिसूत्रस्य षष्ठाध्याये अधिकारविधेः निरूपणं वर्तते । मण्डनमिश्रः षष्ठाध्यायप्रतिपाद्यस्याधिकारविधेः आलोचनाप्रसङ्गे भर्तृमित्रमतं प्रदर्शितवान् । भाट्टाः हि भर्तृमित्रमतमेव पूर्वपक्षरूपेण स्वीकुर्वन्ति । विहितकर्मणः फलाभावे कर्मणि अधिकार एव न सिध्येत् तथा च कर्मणां दृष्टरूपेणैव आत्मज्ञानाधिकारात्मकं प्रयोजनं स्यात् । बाह्यविषये रागद्वेषादेः निवृत्त्या आत्मज्ञाने अधिकारसिद्धिरेव कर्मविधिसमूहस्य प्रयोजनम् । 'तथा च फलाभावादधिकाराभावः । न ह्यफलेषु कर्मसु कश्चिन्नियोज्यः स्वामी वा ।' (वि० वि० पृ० ३०९) दृष्टेनैव कर्मविधय आत्मज्ञानाधिकारप्रयोजनाः । (वि० वि० ३१५)

निष्प्रपञ्चानन्दस्वरूपात्मनः ज्ञानेऽधिकारसम्प्रदानमेव कर्मविधीनां फलम्, स्वर्गपुत्रादिलाभार्थं कर्मविधिर्नास्ति, अपि तु तादृशात्मज्ञानेऽधिकारसम्प्रदानार्थमेव कर्मविधानां कथनं वेदे वर्तते । अनेनैव तात्पर्येण पूर्वपक्षिणा कर्मणोऽधिकारखण्डनार्थं बह्व्यः युक्तयः प्रदर्शिताः । भर्तृमित्रप्रभृतयः युक्त्या कर्मणि अधिकारखण्डनार्थमेव प्रवृत्ताः आसन् । किन्तु एतत्खण्डनं नैव तदुद्भावितमपि तु जैमिनेः षष्ठाध्यायप्रारम्भे 'द्रव्याणां कर्मसंयोगे गुणत्वेनाभिसम्बन्धः' ६।१।१ एतत्सूत्रं पूर्वपक्षिणामेव प्राचीनतमाचार्यसम्मतमासीत् । एतस्य सम्प्रदायस्यैव भर्तृमित्रप्रभृतयः आचार्याः तत्त्वशुद्धयादिग्रन्थं लिखित्वा प्राचीनतमाचार्याणामाशयं प्रदर्शिवन्तः । संभाव्यते एतेन पूर्वपक्षिणामेव कदाचित्प्राबल्यमासीत् । ते हि बहूनां ग्रन्थानां निर्माणं कृत्वा प्रचलितसिद्धान्तमेव पूर्वपक्षरूपेण गृहीतवन्तः । यद्यपि भर्तृमित्रविरचिततत्त्वशुद्धिव्यतिरिक्तानां ग्रन्थानामुपलब्धिरिदानीं नास्ति तथापि आसन् केचन ग्रन्थाः प्राचीनाचार्यरचिताः इत्यनुमीयते ।

मण्डनमिश्रस्य भावनाविवेकग्रन्थादपि एतादृशपूर्वपक्षस्य रहस्यं मिलति । चलति, पचति इत्यादिक्रियाप्रतिपादकशब्दाः संयोगविभागाख्यगुणस्यैव प्रतिपादकाः, संयोगविभागरूपगुणव्यतिरिक्ता काचन क्रिया नास्ति । प्रत्यक्षेणापि संयोगविभागयोरेव प्रतीतिः जायते, संयोगविभागभिन्ना क्रिया न प्रतीयते । धातोरर्थः संयोगविभागाख्यः गुणः धात्वर्थातिरिक्ता अन्या क्रिया अपि नास्ति । अतः, प्रत्ययार्थ भावना प्रत्ययार्थःभावनैव च क्रिया इति न सुसङ्गता ।' तस्मात् गुणविशेष एव धातूपादानः क्रिया, न तु तदतिरिच्यमानात्मा क्रियापदार्थः यः प्रत्ययस्य धातोर्वाऽभिधेयः स्यात् । (भा० वि० पृ० ३५) अत एव प्राचीनतमः मीमांसकः बादरिः द्रव्यगुणसंस्कारा-

णामेवाङ्गत्वं प्रतिपादितवान्। तन्मते यागादिक्रिया नैवाङ्गभूता यतः यागादिक्रिया संयोगविभागव्यतिरिक्ता नास्ति। अत एव गुणतः पृथग्रूपेण क्रियायाः अङ्गत्वेन निर्देशो नास्ति, किन्तु जैमिनिः गुणव्यतिरिक्तां क्रियां स्वीकारोति। अत एव 'द्रव्यगुणसंस्कारेषु वादरिः' एतस्य सूत्रस्य अनन्तरमेव 'कर्मण्यपि जैमिनिः फलार्थत्वात्' (जै० सू० ३।१।४) इत्युक्तवान्। तेन च गुणव्यतिरिक्तस्य कर्मणोऽपि फलाङ्गत्वकथनं सुसंगतं भवति। मीमांसादर्शनस्य षष्ठाध्यायस्य प्रारम्भे 'स्वर्गकामो यजेत' इत्याधिकारविधिवाक्यस्य कीदृशोऽर्थो भवेदिति निरूपणार्थं भाष्यकारेणोक्तम्—उक्तविधिवाक्यात् स्वर्गादिकर्मणोऽप्राधान्येन एवं यागादिकर्मणश्च प्राधान्येन प्रतीतिरस्ति? अथ वा यागादिकर्मणोऽप्राधान्येन स्वर्गस्य च प्राधान्येन प्रतीतिः? पूर्ववाक्ये स्वर्गकामः एवं यजेत इति पदद्वयं वर्तते। पदयोश्च सम्बन्धः वर्तते इत्यवश्यमेव स्वीकरणीयम्। वाक्यान्तर्गतपदयोः परस्परं संसृष्टत्वाभावे एकवाक्यत्वमेव न स्यात्, यथा गौः अश्वः पुरुषः हस्ती--एतेषां नास्तिः। 'स्वर्गकामो यजेत' इति एकं वाक्यं पदार्थद्वयं च परस्परं सम्बद्धं सदेकस्य विशिष्टस्य अर्थस्य बोधकम्। सम्बद्धयोरुभयोः पदयोः कस्तावत्सम्बन्धः? 'यजेत' पदान्तर्गतयज्धातोरर्थः यागः साध्यं साधनम्वा? साध्यरूपेण प्रतीतः अर्थः प्रधानं साधनरूपेण प्रतीतः अर्थं अप्रधानम्। द्वयोः पदार्थयोः सम्बन्धे सति प्रधानभावेन अप्रधानभावेन च सम्बन्धः स्यात्। द्वयोरपि पदार्थयोः प्रधानभावेन अथ वा उभयोरपि अप्रधानभावेन च सम्बन्धो न भवितुमर्हति। विशिष्टार्थे एकोऽर्थः प्रधानं विशेष्यम्वा स्यात् अन्योऽर्थोप्रधानं तस्य विशेषणम्वा स्यात्। वाक्यं क्रियाप्रधानमेकप्रयोजनकञ्च भवतीति वाक्यस्य स्वभावः। अर्थस्य चैवं स्वभावो यत् क्रिया स्वभावतः एव साध्यरूपा एवं द्रव्यञ्च स्वभावतः एव सिद्धरूपम्। साध्यस्वरूपा क्रिया स्वसिद्ध्यर्थं साधनरूपसिद्धस्वभावं द्रव्यमपेक्षते। सिद्धं विना साधनं न सिद्धस्वभावं द्रव्यमेव साधनं भवितुमर्हति। असिद्धं साधनं भवितुं नार्हति। अत्र सिद्धस्वभावं स्वर्गद्रव्यं साध्यस्वभावायाः यागक्रियायाः साधनं स्यात्, किन्तु साध्ययागः सिद्धस्वर्गस्य साधनं न भवितुमर्हति, अतः स्वर्गेण यागः सिद्ध्यति किन्तु यागेन स्वर्गस्य सिद्धिर्न स्यात्, स्वर्गो यदि यागस्य साधनं स्यात्तदा स्वर्गस्य फलत्वमेव न स्यात्, साध्यमेव वस्तु फलं भवति। यागस्य साध्यत्वे याग एव फलं स्यात् फलस्यैव वाक्यार्थे प्रधानरूपेण प्रतीतिः भवति। स्वर्गः यदि यागसाधनं तदा स्वर्गः अप्रधानं स्यात् अप्रधानमेव च गुणशब्देनोच्यते। अतः प्रदर्शितवाक्यस्य यो हि अर्थः तत्र स्वर्गस्य फलत्वेन प्रधानत्वं न स्यात्, यागस्यैव फलत्वात् अर्थात् साध्यत्वात् प्रधानत्वेन प्रतीतिः स्यात्। तथा च स्वर्गफलस्य साधनं यागः इति एतस्य वाक्यस्य अर्थ एव नास्ति। स्वर्गः यागश्च उभयमपि फलमेवेति एकेन वाक्येन प्रत्येतुं न शक्यते। द्वयमपि साध्यं फलमेवेति स्वीकारे प्रदर्शितवाक्यस्य एकत्वं न स्यादपि तु द्वित्वं स्यादर्थाद्वाक्यद्वयत्वापत्तिस्तथा च वाक्यभेददोषः आपतति। स्वर्गं कुर्यात् यागं कुर्यात् एतादृशकथने 'स्वर्गकामो यजेत' एतद्वाक्यस्य अनुभवसिद्धमेकत्वं न स्यात्। साध्यस्य फलस्य वा भेदप्रयुक्तं

वाक्यमपि भिन्नं स्यात्। इह केचित्'' क्रियाप्रधानमेकार्थं वाक्यमिति। क्रियैव हि भाव्यते, स्वभावसिद्धं द्रव्यं गुणमिति वदन्तः फलस्यासमन्वयं वाक्ये मन्यन्ते। (वि० वि० पृ० ३०८–३०९)।

सर्वमेव हि क्रियाप्रधानमेकार्थमेकप्रयोजनं वाक्यं शब्दप्रवृत्त्यनुसारात्। वस्तुनोऽपि क्रियैव हि स्वभावतः साध्यरूपा भाव्यते, स्वभावसिद्धं तु द्रव्यं 'भूतं भव्यायेति' न्यायात् तां प्रति गुणभूतं स्वर्गादीति वदन्तः फलस्यासमन्वयं मन्यन्ते। फलत्वेन तु सम्बन्धे स्वर्गादेस्तत्प्राधान्यात् क्रियाया न प्राधान्यम्। उभयप्राधान्ये च एकार्थत्वं लोकावगतमपहीयेतेति भावः।' (न्या० क० पृ० ३०९) अनेन रूपेण स्वर्गः फलं न भविष्यतीति स्वर्गफलकामिनः यागे अधिकारोऽपि न सिध्येत्। निष्फले कर्मणि कोऽपि अधिकारी स्वामी वा न भवितुमर्हति। तथा च फलाभावादधिकाराभावः। न ह्यफलेषु कर्मसु कश्चिन्नियोज्यः स्वामी वा। (वि० वि० पृ० ३०१) मीमांसासूत्रेऽपि एतादृशी चर्चा वर्तते—'द्रव्याणां कर्मसंयोगे गुणत्वेनाभिसम्बन्धः' (मी० सू० ६।१।१) स्वर्गादिद्रव्यं यागादिकर्मणा सह गुणभावेन अर्थात् अप्रधानभावेन सम्बद्धं स्यात्, किन्तु रूपेण अर्थात् प्रधानरूपेण सम्बद्धं भवितुं नार्हति। भर्तृमित्रप्रभृतयः मीमांसायाः यस्य सूत्रस्योल्लेखं कृतवन्तः तत्सूत्रं यागादिकर्मणः स्वर्गादिफलसाधनता इति अधिकरणस्य पूर्वपक्षसूत्रम्। जैमिनेः पूर्वपक्षः एव भर्तृमित्रादीनां सिद्धान्तपक्षः। 'स्वर्गकामो यजेत' एतद्वाक्यस्वभावस्य एतद्वाक्यसामर्थ्यस्य वा आलोचनायां प्रदर्शित एवार्थोऽवगतो भवति। वस्तुनः सामर्थ्यस्य आलोचनायां स्वर्गादिद्रव्यं यागादिकर्मणः फलं भवितु नार्हति। 'यजेत' इति पदं यज्धातोः 'इत' एतद्विभक्तियोगेन निष्पन्नं भवति। विभक्तेः अर्थः भावना पुरुषस्य प्रयत्नो वा। यज्धातोरर्थः यागः। पुरुषस्य प्रयत्नः यागविषयकः एव स्यात् स्वर्गविषयको न भवितुमर्हति। पुरुषप्रयत्ननिष्पाद्यं यागाख्यमेव कर्म, स्वर्गः पुरुषप्रयत्ननिष्पाद्यो नास्ति। पुरुषः स्वप्रयत्नेन यागादिक्रियामेव सम्पादयति। न तु स्वर्गं निष्पादयति। यतः स्वर्गविषयकः पुरुषप्रयत्नोऽसम्भवः एव, अतः पुरुषप्रयत्नेन सह स्वर्गादिफलस्य सम्बन्धः असम्भव एव। पुरुषप्रयत्नस्य निष्पाद्यत्वेऽपि पुरुषप्रयत्न-निष्पन्नयागेन स्वर्गादेः सिद्धिः स्यात्, प्रयत्नसिद्धः यागः स्वर्गादिफलस्य साधनं करणं वा स्यादेव, तथा च स्वर्गादिफलेन सह यागादिकरणस्य सम्बन्धोऽपि भवितुमर्हतीति कथनमपि असङ्गतम्। यतः व्यापारवत्कारणमेव करणं भवति। यागः यदि स्वर्ग-फलस्य करणं स्यात्तदा यागेऽपि स्वर्गफलजनकव्यापारः स्वीकरणीयः, व्यापारशून्यं वस्तु करणं भवितुं नार्हति, स्वर्गफलजनकव्यापारश्च यागादिक्रियायां न दृश्यते, अतः, व्यापारशून्यो यागः स्वर्गफलस्य करणं न भवितुमर्हति। 'एवं तावद् द्रव्याणां कर्म-सम्बन्धे गुणत्वेनाभिसम्बन्धो न फलत्वेन इति युक्तम्। वस्तुतश्च न सम्बन्धः फलत्वेन, पुरुषप्रयत्नस्य यागादिविषयत्वात् स्वर्गाद्यसम्बन्धाद्यागादेश्च व्यापारान्तरादर्शनात् करणत्वानुपपत्तेः।' (वि० वि० पृ० ३१०)।

'पुरुषप्रयत्नस्य भावनाया यागादिविषयत्वाद्धेतोः स्वर्गाद्यसम्बन्धात्। न जातु पुरुषः स्वर्गे व्याप्रियमाण उपलभ्यते अपि तु यागे। ततश्च याग एव तस्य साध्यो न स्वर्गः। अथ पुरुषप्रयत्नसाध्योऽपि यागः फलं प्रति करणं भविष्यति ततः सम्बन्धः उपपत्स्यते इत्यत आह—यागादेश्च व्यापारान्तरादर्शनात् करणत्वानुपपत्तेः। करणत्वं हि क्रियायोगेन व्याप्तं स चादर्शनात् यागादेर्निवृत्तः करणत्वमपि निवर्तयतीत्यर्थः।' (न्या० क० पृ० ३११ यद्युच्येत 'यजेत स्वर्गकामः' अनेन वाक्येन यागो विहितः, अनेन विहितेन यागेन यदि एतद्वाक्यनिर्दिष्टं फलं न स्यात्तदा यागे यागे विधिरस्तीति विश्वजिन्न्यायेन जन्यफलस्य कल्पना स्यात्। 'विश्वजिता यजेत' अस्मिन् वाक्ये कस्यापि फलस्य निर्देशाभावेऽपि यागे विधिरस्तीति विधिसामर्थ्यवशादेव स्वर्गफलकल्पना जायते, तथैव 'स्वर्गकामो यजेत' 'अस्मिन् वाक्ये नापि यागे विधिरस्तीति अन्यफल-कल्पना स्यात्, किन्तु एतदपि नैव सङ्गतम्, यतः 'यजेत स्वर्गकामः' अस्मिन् वाक्ये यथा श्रुतस्वर्गोऽपि विहितयागसाध्यत्वेन वा अन्वितो न भवति तथैव विश्वजिन्न्यायानुसारं कल्पितस्वर्गोऽपि फलत्वेन साध्यरूपत्वेन वा विहितयागेन सह अन्वितो न भवितुमर्हति। फलेन सह विहितयागस्य साध्यसाधनभाव एव सम्बन्धो भवितुमर्हति अर्थात् स्वर्गादिफलं साध्यं विहितयागश्च साधनम् किन्तु, एतन्न भवितुमर्हति। यतः 'यजेत' इत्यनेन यागः साध्यरूपेण प्रतीयते, साध्ययागस्य फलसाधनत्वं कथमिव स्यात्? साध्यत्वं साधनत्वञ्च विरुद्धधर्मः। असिद्धमेव साध्यमेवं सिद्धवस्तु एव साधनं भवति, यागादिक्रिया साध्यस्वभावा, तस्मिन् साधनत्वं कथं स्यात्, अतः यागादिक्रियायाः साधनत्वमेव दुर्बोधम्, अर्थात् साधनत्वमेव सिद्धं न स्यात्। 'यजेत' इति यज्धातुः एकदैवोच्चारितः। एकदैवोच्चारितः एकदेव श्रुतः यज् धातुः परस्परविरुद्धेन साध्य-त्वेन साधनत्वेन च रूपेण यागस्य अवगतिं नैव कारयितुं शक्नोति। 'यजेत' इति कथनेन यागस्य साध्यत्वमेव प्रतीयते। साध्यरूपेण प्रतीतस्य यागस्य साधनत्वेन रूपेण प्रतीतिः कथमिव स्यात्? 'न विधिसामर्थ्यादन्यदपि फलं तस्याप्यवमसमवायात् वैरूप्यात् साधनभावस्य दुरवबोधत्वात्। (वि० वि० पृ० ३१२)।

'यागश्च विधिसाथ्यर्यात्तु विश्वजिदादिवत् कल्पितेन फलान्तरेण संपत्स्यते इत्यत आह—न विधिसामर्थ्यादन्यदपि फलम्। कुतः? तस्याप्येवं श्रुतफलप्रदासमवायात्। कुतः? वैरूप्याद्धेतोः साधनभावस्य दुरवबोधत्वात्। न जातु सकृदेव श्रुतो यागः साध्यं साधनञ्चेत्युपपद्यते विरोधात्। तस्मात् साधनभावो दुरवबोधः साध्यत्वेन श्रुतस्य यागस्येति।' (न्या० क० पृ० ३१२)।

यद्युच्येत 'यजेत' इति शब्देन यागस्य साध्यरूपेण प्रतीतावपि अर्थापत्त्या फलं प्रति यागः साधनं भवितुमर्हति। शब्दप्रमाणेन यागः साध्यरूपेण अर्थापत्त्या च यागः साधनरूपेग प्रतीयेत। एकेन प्रमाणेन साध्यत्वस्य साधनत्वस्य च यागे प्रतीतिर्न भवितुमर्हति, वैरूप्यापत्तेः, किन्तु भिन्नेन प्रमाणेन यागे फलसाधनत्वप्रतीतौ पूर्वोक्त-

दोषो न संघटते। पूर्वोक्तविश्लेषणेन यागे फलसाधनतायामर्थापत्तिरेव प्रमाणम् किन्तु चोदना अर्थात् विधिः प्रमाणं नास्ति इत्येव मन्तव्यम्, तथा च धर्मे विधिवाक्यमेव प्रमाणमिति तव प्रतिज्ञायाः विरोधः स्यात्। यागादिकर्मणः फलसाधनत्वाभावेऽपि विधिवाक्येन यागादेः साध्यत्वप्रतीतौ न कोऽपि दोषः। तथा च अर्थापत्त्या यागादेः फलसाधनतायाः सिद्धिः न स्यात्, अफलं च कर्म प्रवृत्तेः कारणं न भवतीत्यपि न सुसङ्गतम्, यतः, निष्फलेऽपि कर्मणि लोकानां प्रवृत्तिर्न भवतीति स्वीक्रियते तदा 'न कुर्वीत वृथा चेष्टाम्' इति धर्मशास्त्रिणा कथं निषिद्धम्? निष्फले कर्मणि यदि केषामपि प्रवृत्तिर्न स्यात्तदा पूर्वोक्तः निषेधः व्यर्थ एव स्यात्। विहितनिष्फलकर्मातिरिक्तं रागप्रयुक्तं निष्फलं कर्म न कुर्यात्—इत्येवोक्तनिषेधवाक्यस्याभिप्रायः। नार्थापत्तितः। चोदनालक्षणत्वहानेः तस्याः साध्यपर्यवसानात्। फलस्य कर्मणो लोके साध्यत्वादृष्टेः। साधनत्वस्य च साध्यपुरःसरत्वादर्थात्तदाक्षेपायोगात्। साध्यत्वस्य पुरोभाविनः साधनत्वाक्षेपासामर्थ्यात्।' (वि० वि० पृ० ३१२) चोदनातः साध्यत्वेन प्रतीतस्य यागादेरर्थापत्तितः फलं प्रति साधनत्वं गम्यते माभूद्वैरूप्यम्, इत्यत आह—नार्थापत्तितः। कुतः? चोदनालक्षणत्वहानेः। फलसाधनता चेदर्थापत्तिगम्या चोदनालक्षणत्वं न स्यात्। ततश्च चोदनैवेति प्रतिज्ञाव्याघातः। न चार्थापत्तेश्चोदनामूलतया तद्विषयश्चोदनालक्षण इति साम्प्रतम्। चोदनाया यागादिसाध्यमात्रपर्यवसितायाः फलसाधनतामन्तरेणोपपत्तेरर्थापत्तिमूलत्वाऽभावादित्याह—साध्यत्वपर्यवसानात्। अथाफलस्य साध्यत्वं चोदनाप्रतीतमनुपपन्नमिति चोदनैव साध्यत्वप्रतिपादिकाऽपर्यवस्यान्ती फलकल्पनाबीजमिति तत्राह—अफलस्य कर्मणो लोकसाध्यत्वेनादृष्टेः। यत्किल धर्मशास्त्रकारो निषेधति 'न कुर्वीत वृथा चेष्टामिति'। (न्या० क० पृ० ३१२)।

यदि 'यजेत स्वर्गकामः' इति विधिवाक्येन यागादिधात्वर्थस्य साध्यतामात्रेणैव प्रतीतिर्जायते न तु यागादिधात्वर्थे स्वर्गादिफलस्य साधनता प्रतीयते तदा विधिः कथमिव स्यात्? अभिमतसाधनत्वमेव लिङादिविधिप्रत्ययस्य अर्थः इति यदुच्यते मीमांसकैः तन्न समीचीनम्। यतः प्रवर्तनैव विधिप्रत्ययस्यार्थः। विधिशब्दः पुरुषस्य अर्थमनर्थं वा न स्पृशति। यद्यपि प्रवृत्तिहेतुरेव प्रवर्तना, इष्टसाधनत्वमपि प्रवर्तनायाः बोधकः भवति, प्रार्थना, अनुज्ञा एवम् उपदेशः इत्येतेषु चतुर्षु अर्थेषु एव विधिशब्दः प्रयुक्तः भवति, आज्ञादिचतुर्षु अर्थेषु एव प्रवृत्तेर्हेतुता वर्तते। आज्ञया प्रवृत्तिर्भवति सा सकलानुभवसिद्धा। आज्ञापयिता प्रार्थयिता च स्वेष्टसाधनत्वस्य प्रतिसन्धानं कृत्वा आज्ञां प्रार्थनां वा करोति यं प्रति आज्ञां प्रार्थनां वा करोति तस्य आज्ञात्यस्य प्रार्थनीयस्य वा पुरुषस्य इष्टसाधनत्वस्य प्रतिसन्धानं कृत्वा आज्ञां प्रार्थनां वा न करोति। स्वामी भृत्यमाज्ञापयति—'गामानय'। अत्र स्वामी स्वकल्याणमनुसन्धायैव भृत्यमाज्ञापयति। सम्भवति आज्ञापालेन भृत्यस्यापि इष्टसाधनत्वम् तथापि आज्ञा भृत्यस्य इष्टसाधनतां नैव प्रतिपादयति। प्रमाणान्तरेणैव आज्ञापालकस्य भृत्यस्य इष्टस्य ज्ञानं जायते।

एतादृशप्रार्थनायामपि प्रार्थयितुः इष्टसाधनत्वमेव प्रतीयते । प्रार्थनीयपुरुषस्य कल्याणं प्रति लक्ष्यं कृत्वा प्रार्थना नैव प्रयुज्यते ; यथा—'माणवकमध्यापय' इत्यस्यां प्रार्थनायां प्रार्थनीयस्य गुरोः इष्टस्य प्रतिसन्धानं नास्ति । प्रार्थयिता स्वेष्टस्य सिद्ध्यर्थमेव प्रार्थनां करोति । आज्ञया प्रार्थनया च उपदेशः भिन्नः । उपदेष्टा स्वेष्टमभिसन्धाय नैवोपदिशति । अपि तु उपदेश्यपुरुषस्य इष्टसाधनतयाः एव प्रतिसन्धानं कृत्वा उपदेशं करोति, यथा—'ज्वरितः पथ्यमश्नीयात्' ज्वररोगयुक्तस्य पुरुषस्यैव इष्टसाधनतायाः प्रतिपादनं करोति न तु उपदेष्टा आत्मनः इष्टमभिसन्धाय उपदेशं करोति । अनुज्ञायामनुज्ञाता आत्मनः इष्टसाधनतामनुसन्धाय अनुज्ञां नैव करोति अपि तु अनुज्ञेयपुरुषस्यैव इष्टसाधनत्वमवगत्य अनुज्ञां करोति । उपदेशे अनुज्ञायाञ्चैव एष भेदो वर्तते यत् अप्रवृत्तं पुरुषं प्रवर्तयति उपदेशेन उपदेष्टा, स्वेच्छया प्रवृत्तः पुरुषः अनुज्ञया प्रवर्तितो भवति । स्थलविशेषे च अनुज्ञायामपि अनुज्ञातुः पुरुषस्य इष्टसाधनत्वस्य प्रतिसन्धानं वर्तत एव । विधिविभक्तेः पूर्वोक्तविश्लेषणेन सन्ति चत्वारोऽर्थास्तथा प्रवर्तनारूपं चतुर्ष्वपि अनुस्यूतं वर्तते । आज्ञा प्रार्थना नास्ति तथापि प्रवर्तना अस्त्येव । आज्ञा, प्रार्थना उपदेशश्च अप्रवृत्तप्रवर्तना, किन्तु अनुज्ञा प्रवृत्तप्रवर्तना इयान् एव भेदः, परं प्रवर्तना तु चतुर्ष्वपि वर्तते । आज्ञादिकं प्रवर्तनाया एव विशेषरूपम् । सामान्यरूपेण प्रवर्तना सर्वत्रैव विद्यतेऽतः प्रवर्तनैव विधिशब्दार्थस्तथा चानेकार्थत्वरूपः दोषः शब्दे स्यात् एकार्थत्वे सम्भवति शब्दस्य अनेकार्थत्वं नैव स्वीकर्तव्यम्[1] । एकस्य शब्दस्य अनेकार्थेषु शक्तिस्वीकारे शक्तिकल्पनायां गौरवं स्यात् । 'यजेत स्वर्गकामः' अनेन वाक्येन यागः स्वर्गसाधनमेषोऽर्थः कथमपि भवितुं नार्हति । तथा च यागादिकर्म निष्फलमेव स्यात् । अनेन प्रकारेण कर्मविधायकं किमपि वाक्यं फलसाधनकर्मणः प्रतिपादनं कर्तुं न शक्नोति । किमपि विहितं कर्म फलस्य जनकं भवितुं नार्हति । तथा च निष्प्रयोजनस्य कर्मण उपदेश एव न स्यात्, यतः निष्फलकर्मणः उपदेशे उपदेश एव अनर्थकः भवेत् । अत्रेदं वक्तव्यं यत् निष्फलकर्मणः उपदेशस्य यदि किमपि प्रयोजनं स्यात्तदा उपदेशः निरर्थकः कथं स्यात् ? यदि प्रयोजनं न स्यात् तदा निरर्थक एव स्यादत्र किमु वक्तव्यम् ? कर्मोपदेशस्य प्रयोजनं हि आत्मज्ञाने अधिकारसिद्धिरेव। कथं सर्वस्यापि कर्मविधेः एकमात्रं प्रयोजनम् आत्मज्ञाने पुरुषस्य अधिकारसिद्धिः ? एतस्य समाधानप्रसङ्गे विधिविवेके उक्तं मनुष्यः विविधविषयरागसम्पन्नः सन् एव जन्मग्रहणं करोति । जीवस्य विषयरागः स्वाभाविकः, वीतरागपुरुषस्य जन्म न भवति । स्वभावसिद्धविषयरागप्रयुक्तः पुरुषः स्वीयरागस्य धनपुत्रकलत्रादेः लाभार्थं कृषिवाणिज्यादौ एवमेव स्तेयद्यूतमृगयादौ दृष्टसाधने अनुरक्तः स्यात् । दृष्टे

१. 'कथं तर्हीदानीं विधिः ? किमत्र कथम् ? प्रवर्तनामात्रं विधिर्न्न पुरुषार्थानर्थौ स्पृशति । कुतः ? प्रतीतेरव्यभिचाराच्च । तथा च लिङ्गादिभ्यः प्रेरणावगमः । यद्यपि चेष्टसाधनता प्रवृत्तिहेतुः । शब्दस्त्वनामृष्टतद्रूपः प्रवर्तनामात्रस्य चाऽव्यभिचारात् । अनेकार्थत्वदोषात् । वि० वि पृ० ३१३

विषयेऽतिशयानुरागप्रयुक्त एव विषयप्राप्तिसाधनेषु नितान्तमनुरक्तः जायते। अतः शास्त्रे निष्प्रपञ्चानन्दस्वरूपात्मतत्त्वस्य उपदेशेऽपि तादृशात्मतत्त्वस्य ज्ञानार्थं तत्प्रणिधानार्थं वा प्रवृत्तिर्नैव स्यात्। विषयरागयुक्तस्य पुरुषस्य तादृशात्मतत्त्वस्य साक्षात्कारस्तु सुदूरपराहत एव। कर्मणामुपदेशेन शास्त्रं मनुष्यस्य स्वाभाविकप्रवृत्तेः निवृत्तिं सम्पादयति। शास्त्रोपदिष्टे कर्मणि सततं निरतः सन् पुरुषः अनुशिष्टो भवति। विषयरागश्च क्रमशः शान्तो भवति। स्वभावतः मनुष्यः पुत्रकलत्रपरिजनादिचिन्तायां नियुक्तः सन् अपि शास्त्रोपदिष्टे कर्मणि सततं निरतः परिजनचिन्तायां पूर्ववदभिनिविष्टः न भवति। शास्त्रीयकर्मपद्धतौ व्यवस्थित सन् दान्तो जायते। काम्यचिन्तया चित्तं व्याकुलं न भवति। एतस्यामेवावस्थायां शास्त्रोपदिष्टनिष्प्रपञ्चात्मतत्त्वज्ञानार्थं प्रणिधाने समर्थो भवति। अनेन रूपेण कर्मविधिः फलसाधनकर्मणि पुरुषस्य कृतेऽधिकारसिद्धिमकृत्वा एव रागनिवृत्तिपूर्वकं निष्प्रपञ्चात्मनः ज्ञाने पुरुषस्य अधिकारं साधयति[१]। एतादृशार्थस्वीकारे एव शास्त्रस्य शास्त्रत्वं सिद्ध्यति। येन नियोज्यस्य पुरुषस्य अनुशासनमथ वा येन पुरुषस्य हितानुशासनं जायते तदेव शास्त्रम्, शास्त्रीयप्रवृत्तेरुपदेशेन पुरुषस्य स्वाभाविकीं प्रवृत्तिं निवर्तयति। स्वाभाविकप्रवृत्तिः परिणामदुःखेन, तापदुःखेन च विमिश्रिता वर्तते। एतत्त्रिविधदुःखात्मिकया प्रवृत्त्या निवृत्तं कृत्वा शास्त्रं नियोज्यपुरुषस्य अनुशासनमेव करोति, तेनैव च शास्त्रस्य शास्त्रत्वं रक्षितं भवति। निष्प्रपञ्चनित्यानन्दस्वरूपात्मनः ज्ञानेऽधिकारसिद्धौ सत्यां कर्मविधिः हितस्यापि उपदेशको भवति। हितानुशासकमेव शास्त्रम्, आत्मनः ज्ञानापेक्षया किमन्यद्धितं स्यात्[२]। यन्मते विहितं कर्म पुत्रधनस्वर्गादेः साधनम्, स्वर्गादिफलसाधनतैव कर्मणो वर्तते इत्येव सिद्धान्तः तन्मते कर्मप्रतिपादकस्य वेदस्य शास्त्रत्वमेव नास्ति। प्रकारान्तरेण कर्मशास्त्रस्य अशास्त्रत्वमेव ते स्वीकुर्वन्ति। पुत्रधनस्वर्गादेः विहितकर्मणः फलत्वे एतदवश्यमेव स्वीकर्तव्यम् यत् मनुष्याणामेतेषु सर्वेष्वपि फलेषु स्वाभाविकः रागः कामना वा वर्तते। तथा च स्वभावसिद्धरागविषये प्रवृत्तिरपि स्वाभाविकी। काम्यफलस्य साधनापरिज्ञाने साक्षात्फले प्रवृत्तिर्न भवितुमर्हति। शास्त्रमेतेषां काम्यफलानां साधनं प्रतिपाद्य पुरुषस्य स्वाभाविकप्रवृत्तौ साहाय्यं कुर्यात्। तदा शास्त्रस्य शास्त्रत्वमेव निवर्तेत। स्वेच्छावशात् प्रवृत्तौ साहाय्यस्य सम्पादकं शास्त्रं न भवति, न तदनुशासकं जायते। एतादृशेन च शास्त्रेण नैव पुरुषः अनुशिष्टो भवति। कर्मविधिसमूहस्य आत्मज्ञानेऽधिकारसिद्धिः एव प्रयोजनम्, किन्तु एतत्कथनमसङ्गतमेव। यतः कर्मविधिना यदि विहितं कर्म एव साध्यम्, स्वर्गादिफलं न साध्यं तदा ज्ञानविधिना मोक्षफलस्य सिद्धिः कथं भवेत्? यथा कर्मविधिना कर्मण एव साध्यत्वं प्रथीयते। तेन च मोक्षफलं न सिद्ध्यति, कर्मविधिः यथा कर्मणि प्रवर्तनामवगमयति तथैव ज्ञानविधिरपि ज्ञाने प्रवर्तनामवगमयेत्। कर्मविधेः ज्ञानविधेश्च एकैव नु स्यात्। एतदपि कथनं न

१. वि० वि० पृ० ३१३—१४।
२. वि० वि० पृ० ३१४, न्या० क० पृ० ३१४।

सुसङ्गतम् । यतः ज्ञानं दृष्टार्थम् अर्थात् यद्यपि विधिशब्देन ज्ञानस्य सम्बन्धो नास्ति, ज्ञानविधिः ज्ञानस्यैव साध्यत्वं प्रतिपादयति तथापि ज्ञानं ज्ञेयतन्त्रम् । ज्ञेयवस्तु यादृश स्यात् तज्ज्ञानमपि तथैव भवेत् । ज्ञेयनिरपेक्षः ज्ञानाकारो नैव भवितुमर्हति । 'नन्वेवं ज्ञानविधिरप्यनुशासनमात्रमेव स्यात् ? न । ज्ञानस्य दृष्टार्थत्वात् स्वभावतश्च गुणभूतत्वात् ।' वि० वि० पृ० ३१५) भ्रमज्ञानमस्माभिः न स्वीक्रियते, तथा च विषयस्य अन्यरूपत्वेऽपि तस्य ज्ञानमन्याकारकं स्यादिति तु प्रतीतिविरुद्धम् । तस्मात्, आत्मज्ञाने विधेः सत्त्वेऽपि एतज्ज्ञानं ज्ञेयतन्त्रमिति आत्मनः निष्प्रपञ्चरूपतायाः आनन्दरूपतायाश्च सिद्धिः स्यात् । आत्मस्वरूपः एव मोक्षः । अतः ज्ञाने विधिसत्त्वेऽपि फलस्य असिद्धिर्न स्यात् । ज्ञातं तादृशमात्मस्वरूपमेव फलम् । ज्ञानं स्वभावत एव ज्ञेयतन्त्रम् सर्वत्रैव ज्ञेयं प्रधानम् ज्ञानञ्चाप्रधानम् । आत्मज्ञानस्य विधिसाध्यत्वेऽपि ज्ञानापेक्षया ज्ञेयस्य प्रधानत्वेन तादृशात्मनः सिद्धौ कापि बाधा नास्ति । भ्रमज्ञानं ज्ञेयनिरपेक्षमिति भ्रमज्ञानेन ज्ञेयवस्तुनः सिद्धिर्न स्यात् । अस्माभिस्तु भ्रमज्ञानं न स्वीक्रियते, अख्यातिवादसमर्थकाः वयम् । भर्तृमित्रस्यैतन्मतं प्रभाकरानुरूपतां भजेत । आत्मज्ञाने विधिस्वीकारे वेदस्य कार्यार्थतैव स्यात् तथा च भ्रमज्ञानास्वीकारे च अख्यातिवादस्य समर्थनं भवेत् । शबरप्रदर्शिताभिप्रायेणैव उक्तवान् 'कर्त्तव्यश्च सुखवान् अकर्तव्यो दुखवान्' । (जै० सू० ६।१।१)

अत्रस्थभाष्यस्यायमेवाभिप्रायो यत् स्वर्गादिफलस्य साधनं यदि विहितं यागादिकर्म स्यात् तदा यागादिकर्म कर्तव्यमेव न स्यात्, यतः स्वर्गादिफलस्य क्षणिकत्वान्नादुःखमिश्रितत्वाच्च दुःखरूपत्वमेव । एतस्य दुःखस्य साधनभूतयागादिरपि दुःखरूप एवेत्यस्य कर्तव्यत्वं न स्यात् । 'कर्तव्यः सुखवान्' इति भाष्यवचनेन आत्मज्ञानस्यैव कर्तव्यता सिद्ध्यति । प्रपञ्चस्य दुःखरूपत्वम् आत्मा च सुखस्वरूप इति एतादृशात्मज्ञानस्य सुखफलकत्वात् तस्यैव च कर्तव्यत्वम्[1] । 'यजेत स्वर्गकामः' अनेन वाक्येन येषां मते स्वर्गकामिनः स्वर्गसाधनयागेऽधिकारः न सिद्धयति, अधिकार एव असिद्धः अर्थात् कश्चिन्नपि स्थले विधिवाक्येन अधिकारसिद्धिः न स्यात् इत्येव वदेत्, किन्तु इदानीमवलोक्यते तेषामपि मते विधिना अधिकारः सिद्ध्यतीति । अत्रेदं समाधानम्; शाब्दन्यायेनोच्यते विधिवाक्येनाधिकारो न सिद्ध्यति न्यायानुसारेण च सिद्धः सर्वैरेव स्वीकार्यः अभ्युपगमसिद्धान्तेन नैतदुच्यते[2] । न्यायानुसारेण यदि ज्ञानविधिना अधिकारः सिद्धयति तदा किमु वक्तव्यम् ? वस्तुतः ज्ञानविधिना अधिकारः न सिद्धयति, ज्ञानस्य दृष्टार्थताप्रयुक्त एवासौ सिद्ध्यति । लोकातयमतानुसारिणां मीमांसकानामेतन्मतं विधिविवेके मण्डनेनोक्तम् ।

---

१. इममेवार्थमभिप्रेत्य कर्तव्यश्च सुखवान् अकर्तव्यश्च दुःखवान् इत्याद्युक्तमत्र भवता (न्या० क० पृ० ३१६) वि० वि० पृ० ३१६

२. वि० वि० ३१५ ३. वि० वि० पृ० ३१६

एतस्य मतस्य खण्डनावसरे श्रीमता मण्डनेनोक्तम्—ये हि विहितस्य निषिद्धस्य वा कर्मणः फलं न स्वीकुर्वन्ति, ते जीवस्य सुखभोगः दुःखभोगो वा स्वभावत एव भवतीति स्वीकुर्वन्ति, तथा च स्वभाववाद एव वेदस्य अर्थः इत्येव वदन्ति। आत्मज्ञानस्याधिकारसिद्धिच्छलेन वेदस्य लोकायतशास्त्रत्वमेव साधयन्ति। तथा च ये दृष्टद्वारेणैव आत्मज्ञानविध्यधिकारी एवं कर्मविध्यधिकारीति स्वीकुर्वन्ति, कर्मविधेरन्यः कश्चिदधिकारीति न स्वीकुर्वति। एतेन कर्मविधेरिव ज्ञानविधेरपि अनुज्ञाने एव पर्यवसानं भवति। विधिना तादृशस्यात्मनः प्रतिपत्तिः सिद्धिर्न स्यात्। यद्युच्येत—ज्ञानस्वभावप्रयुक्त एव तादृशात्मनः प्रतिपत्तिः सिद्धयति। अतादृशः आत्मा तादृशप्रतिपत्तेर्विषयो न भवितुमर्हति तथा च ज्ञाने विधेर्वैयर्थ्यं स्यात्। एतादृशात्मनि तादृशरूपसमारोपेणापि आत्मनः ज्ञानं भवितुमर्हतीति आत्मनः निष्प्रपञ्चरूपता न सिद्धयति। 'स्वाभाविकत्वाच्च फलोपभोगस्य स्वभाववाद एवाम्नायार्थश्छद्मना आश्रितः स्यात्।······सम्भवान्न तत्त्वपरिच्छेदः।' (वि० वि० पृ० ३३५-३६) अयमाशयः, विहितस्य निषिद्धस्य च कर्मणः फलमिति न स्वीकुर्वन्ति, स्वर्गादिफलास्वीकारेऽपि चित्तशुद्धिः विहितकर्मणः फलमिति स्वीकुर्वन्ति, किन्तु, विधिवशात् नैव स्वीकुर्वन्ति, स्वाभाविकप्रवृत्तेः निरोधरूपदृष्टेनैव चित्तशुद्धिर्जायते, कर्मी कर्मानुष्ठाने दान्तो भवति। वेदान्तिनः कर्मफलं नैव स्वीकुर्वन्ति यतः अनात्मवस्तु परमार्थरूपतां न प्राप्नोति, अनात्मवस्तुनि तेषां नास्ति आश्वासः। अत एव एकजीववादः दृष्टिसृष्टिवादश्चोत्तमाधिकारिणां कृते इति ते निरूपयन्ति। अपारमार्थिकं कदापि पारमार्थिकं न भवितुमर्हति। कर्म तत्फलं कर्मणि अधिकारः अनात्मपदार्थः निष्प्रपञ्चे आत्मनि आश्वासः अनात्मनि चानाश्वासः। अत एव भर्तृमित्रेण एतादृशी प्रक्रिया प्रदर्शिता।

अनेकव्याख्यानसहितस्यास्य मीमांसादर्शनस्य द्वितीयं भागं मनीषिणां पुरतः समुपस्थापयन् मोदातिशयमनुभवामि।

नूनं सत्यमिदं यत् श्रीमतां पद्मश्रीमीमांसकशिरोमणिपट्टाभिरामशास्त्रिणाम्, पण्डितप्रवराचार्यगुरुवरश्रीबदरीनाथशुक्लमहोदयानाम्, पण्डितप्रवरगुरुवरविद्यावाचस्पतिश्रीब्रह्मदत्तद्विवेदिनामाशीराशीभिरेव एतस्य द्वितीयस्य भागस्य सम्पादने सामर्थ्यमासादितम्। श्रीमतां शुक्लमहोदयानां सम्मतया एतस्मिन् ग्रन्थे मणिकाञ्चनसंयोगः समभवत्, अग्रिमभागसम्पादने उत्साहवर्द्धनं च समजनि।

वस्तुतः एतस्य ग्रन्थस्य प्रकाशनं श्रीमतां ताराप्रिटिङ्गयन्त्रालयाध्यक्षाणां श्रीरमाशङ्करपाण्ड्यामहाशयानां शुभोदयश्रीरविशङ्करपाण्ड्यामहाभागानां सततं संस्कृतग्रन्थोद्धारे सन्नद्धानामपूर्वोत्साहस्य प्रेरणाया एव फलमिति, अन्यथा मादृशानामाल्यस्यैकधनानामेतत्कार्यं मनसाऽप्यचिन्तनीयमेव, अतः इमौ सर्वथा प्रशंसार्हाविति ।

अस्य ग्रन्थस्य अशुद्ध्यादिपरिमार्जने ग्रन्थसम्पादने च पं० श्रीकृपासिन्धुशर्मणा महत्साहाय्यमाचरितंमिति ते धन्यवदार्हाः ।

आशासेऽविलम्बमेव तृतीयो भागोऽपि मनीषिणां पुरतः समुपाहरिष्यामीति—

विदुषामाश्रवः

महाप्रभुलालगोस्वामी

मीमांसादर्शन-विषय-सूची

प्रथमाध्याये चतुर्थपादः

प्रथमाध्यायस्य चतुर्थः पादः समाप्तः ॥

द्वितीयाध्याये प्रथमः पादः

———

मीमांसादर्शनम्

अथ प्रथमाध्याये चतुर्थः पादः

प्रथममुद्भिदधिकरणम्

[१] उक्तं समाम्नायैदमर्थ्यं तस्मात् सर्वं तदर्थं स्यात् ॥१॥ पू०

शा० भा०—उद्भिदा यजेत, बलभिदा यजेत, अभिजिता यजेत, विश्वजिता यजेत इति समामनन्ति[1]। तत्र सन्देहः—किमुद्भिदादयो गुणविधयः आहोस्वित्कर्मनामधेयानीति। कुतः संशयः? उभयथाऽपि प्रतिभातो वाक्यात्। उद्भिदेत्येष शब्दो यजेतेत्यनेन संबध्यते। स किं वैयाधिकरण्येन सम्बन्धमुपैति[2],—उद्भिदा द्रव्येण यागमभिनिर्वर्तयेदिति, उत सामानाधिकरण्येन उद्भिदा यागेन यजेतेति। द्वेधाऽप्येतस्मिन् प्रतिभाति वाक्ये। सम्भवति[3] संशयः। किं तावत् प्राप्तम्? उक्तमस्माभिः समाम्नाय[4]स्यैदमर्थ्यम्। कश्चिदस्य भागो विधिः, योऽविदितमर्थं वेदयति। यथा 'सोमेन यजेत' इति। कश्चिदर्थवादो यः प्ररोचयन् विधिं स्तौति। यथा 'वायुर्वै क्षेपिष्ठा देवता' इति। कश्चिन्मन्त्रो यो विहितमर्थं प्रयोगकाले प्रकाशयति। यथा, 'बर्हिर्देवसदनं दामि' इत्येवमादिः। तस्मादुद्भिदादयोऽमीषां प्रयोजनानामन्यतमाय[5] प्रयोजनाय भवेयुः। तत्र तावन्नार्थवादः। वाक्यशेषो हि स भवति विधातव्यस्य। न च मन्त्रः,—एवंजातीयकस्य प्रकाशयितव्यस्याभावात्। पारिशेष्याद् गुणविधिः। उद्भिद्गुणता यागस्य विधीयते। कुतः? प्रसिद्धेरनुग्रहाद्, गुणविधेरर्थवत्त्वात्, प्रवृत्तिविशेषकरत्वाच्च। न चैषां यागार्थता लोकेऽवगम्यते। न च वेदेन परिभाष्यते। अतो गुणविधयः। यदि गुणविधिः न हि कर्म विधीयते। अविहिते च कर्मणि तत्र गुणविधानमनर्थकम्। नेति ब्रूमः। प्रकृतौ ज्योतिष्टोमे गुणविधानमर्थवद्भविष्यति। यदि[6] नामधेयं स्याद्, यावदेव यजेतेति, तावदेव उद्भिदा यजेतेति न प्रवृत्तौ कश्चिद् गुणविशेषः स्यात्।

---

१. ब. समाम्नातं। २. ब. संबद्धुमर्हति। ३. भवति संशयः।
४. ब. समाम्नायस्येदमर्थत्वं। ५. ब. मन्यतमस्मै। क. मन्यस्मै।
६. ब. यदि च नामधेयं यावदेव।

गुणविधौ च गुणसंयोगादभ्यधिकमर्थं विदधत उद्भिदादयः शब्दा अर्थवन्तो भविष्यन्ति। तस्माद् गुणविधय इत्येवं प्राप्तम् ॥ १ ॥ पूर्वपक्षः ॥

एवं प्राप्ते ब्रूमः—

भा० वि०—एवं तावदर्थवादाधिकरणसिद्धान्तन्यायेन विध्युद्देशान्तर्गतत्वेन सिद्धस्य नामधेयप्रामाण्यस्य गुणविधिनामधेयत्वप्रकारः प्रसङ्गादिह चिन्त्यत इति सङ्गतिः।

यद्वा को धर्मः ? कथं लक्षणः ? इति सप्रकारस्य प्रामाण्यस्य वक्तव्यत्वेन प्रतिज्ञातत्वात् प्रामाण्यप्रकारविचारोऽपि अध्यायार्थ इति स्तुति-स्मृतिप्रकारवत्, द्वितीये स्मृत्याचारोपस्थापितत्वरूपप्रकारविचारवच्च, तृतीये गुणविधिनामधेयत्व-प्रकारविचारोऽप्यध्यायसङ्गत एव।

अथ वा विध्यर्थवादमन्त्राणां 'विधिना त्वेकवाक्यत्वात्' इति सामान्यतः प्रसिद्धोपयोगानामप्युपयोगविशेषासंभवोत्थमप्रामाण्यं तद्विशेषप्रतिपादनेन निराकृतम्। स्मृत्याचारमूलानां च विध्यादीनां सद्भाव-प्रतिपादनमुखेनैवोपयोगविशेषः प्रामाण्यं च निरूपितम्। अथेदानीं नामधेयानां विध्येकवाक्यतया सिद्धप्रामाण्यानामपि विध्येकवाक्यत्वप्रकारानिरूपणादप्रतिष्ठितस्यैव प्रामाण्यस्य प्रतिष्ठापयिषया विध्यनुप्रवेशप्रकारोऽत्र विचार्यत इति सङ्गतिः।

तत्र प्रथमाधिकरणस्य यौगिकनामधेयविषयत्वं दर्शयन् विषयमाह—**उद्भिदित्यादि**। यद्यप्युत्पत्तिवाक्यदशायां साध्यभूतधात्वर्थसाधनत्वेन गुणविधावपि न मत्वर्थलक्षणा, नापि नामधेयता हेतुस्सामानाधिकरण्यम्। तथापि अधिकारवाक्यदशायां उद्भिदा यागेन पशुमित्याद्यन्वयस्यासंभवेनावश्यम् उद्भिद्वता यागेनेत्यादिसम्बन्धे मत्वर्थलक्षणादोष इति, सकलोत्पत्तिवाक्यगतिप्रदर्शनार्थं विद्यमानमपि फलपदं नोपन्यस्तम्। विचारबीजं संशयमाह—**तत्रेति**।

ननु सोमेन यजेतेत्यादाविव गुणविधित्वनिश्चयादयुक्तस्सन्देह इत्याह—**कुत इति**। सोमव्रीह्यादिशब्दानामर्थान्तरे निरूढानां कर्मनामत्वासंभवेन गुणविधित्वेऽपि, उद्भिदादिपदानां यौगिकानां यजतिसामानाधिकरण्यस्याप्युपपत्तेर्भवति सन्देह इत्याह—**उभयथेति**। प्रतिभातः प्रतिभासमानात्। उभयथा प्रतिभासमानतां वाक्यस्य दर्शयितुं फलपदसम्बन्धस्य निरसिष्यमाणत्वाद्यजिपदसंबन्धेन वाक्यनिष्पत्तिं दर्शयति—**उद्भिदेति**। तत्रोभयथा संभवमाह—**स किमित्यादिना**। यागेन यजेतेति। यागेन कुर्यादित्यर्थः। उभयथा प्रतिभानफलमाह—**द्विधेति**। यदोद्भिद्यागपदयोस्सामानाधिकरण्येन वाक्यं निष्पद्यते, तदा नामधेयम्। यदा वैयधिकरण्येन, तदा गुणविधिरित्येवं वाक्यस्वरूपनिर्धा-

रणात् संशय इत्यर्थः। विचारप्रयोजनं तु—अनादृत्य खनित्रादि द्रव्यम् 'अव्यक्तासु तु सोमस्य' इत्यनेन न्यायेन सोमद्रव्येण यागः तत्र सकलविध्यनुप्रवेशप्रकारासंभवेनाप्रामाण्यमाशङ्कमानं प्रीतीतरप्रकाशसंभवेऽपि गुणविधित्वसंभवप्रतिपादनेन प्रामाण्यं सूत्रव्याख्यानेन समर्थयमानः पूर्वपक्षमाह—**किमित्यादिना।** ऐदमर्थ्यम्-इदमर्थत्वम् अज्ञातज्ञप्तिस्तुतिस्मृतिप्रयोजनत्वमिति यावत्। कथमेकस्यैव समाम्नायस्यानेकार्थत्वमित्याशङ्क्य विभागेन योजयति—**कश्चिदित्यादिना। य इति।** यो भागः पुरुषं प्ररोचयितुं विधीयमानं कर्म स्तौतीत्यर्थः। विहितमर्थं प्रकाशयतीति ज्ञातज्ञापकतया विधिवैलक्षण्यं दर्शितम्। विहितप्रकाशनानर्थक्यं प्रयोगाङ्गत्वेन परिहर्तुं प्रयोगकाल इत्युक्तम्।

अस्त्वन्यतमार्थत्वं समाम्नायस्य ततः किं जातमित्याशङ्क्य तस्मादित्यादिसूत्रावयवं व्याचष्टे—**तस्मादिति।** नन्वन्यतमार्थत्वेऽपि उद्भिदादिपदानां कथं गुणविधित्वसिद्धिरित्याशङ्क्य पारिशेष्यादिति तस्मान्नार्थवाद इत्यर्थः। अस्तु तर्हि मन्त्रः तत्राह—**न चेति।** उद्भिच्छब्दवाच्यस्य वाक्यान्तरविहितस्याभावान्न विहितार्थप्रकाशकत्वलक्षणं मन्त्रत्वमपीत्यर्थः। प्रसक्तप्रतिषेधफलमाह—**पारिशेष्यादिति।**

ननु मन्त्रार्थवादत्वनिराकरणेन विध्युद्देशान्तर्गतिसिद्धावपि नामधेयविधित्वसंभवे कथं पारिशेष्याद् गुणविधितेत्यत आह—**उद्भिद्गुणतेति।** प्रश्नपूर्वकं हेतुमाह—**कुत इति।** उत्छब्दस्योर्ध्ववाचित्वात् भिदेश्च विदारणार्थत्वात् क्विप्प्रत्ययस्य च कर्तृवाचित्वात् उद्भिच्छब्दादूर्ध्वविदारणकर्तृप्रतीतेः खनित्रादेश्च तथा भावादुद्भिच्छब्दस्य यागे रूढत्वाभावाच्चावयवप्रसिद्ध्यनुग्रहाय खनित्रादिगुणविधानार्थतैवाश्रयणीयेत्यर्थः। गुणविधित्वे हेत्वन्तरमाह—**'अर्थवत्त्वात् प्रवृत्तिविशेषकरत्वमिति'।**

अर्थवत्त्वमभिधेयवत्त्वम्। गुणविधिपक्षे ह्युद्भिच्छब्दाद्यभिधेयखनित्रादिद्रव्यविशिष्टक्रियाविषयत्वाद्विधायकपुरुषप्रवृत्त्योः तद्विशेषकरत्वात् प्रयोजनवत्त्वमुद्भित्पदस्य स्यात्। नामधेयत्वे तु धात्वर्थातिरिक्ताभिधेयाभावान्न प्रवृत्तिविशेषकरत्वमिति गुणविधितैव युक्तेत्यर्थः।

यद्वा पलोद्भेदनसमर्थधात्वर्थवाचितयोद्भित्पदस्याभिधेयवत्त्वेऽपि धातुनैवोक्तार्थवत्त्वेन नामधेयत्वपक्षे प्रयोजनाभावात्, गुणविधित्वे तु पूर्वोक्तनीत्या प्रयोजनवत्त्वात् गुणविधितैव युक्तेति प्रयोजनवत्त्वाभिधायितया अर्थवत्त्वहेतुं पृथक्कृत्य गुणविधित्वे व्याख्येयम्। प्रसिद्धेरनुग्रहादित्याद्यं हेतुं विवृणोति—**न चेति।** न तावदुद्भित्पदस्य कर्मणि समुदायप्रसिद्धिरस्ति, लोकप्रयोगाभावात्। नाप्यवयवप्रसिद्धिः, विदारणार्थत्व इव प्रकाशनार्थत्वे स्मृत्यभावात्

विदारणार्थस्यापि भिदेरुपचारात् प्रकाशनार्थत्वे ज्योतिष्टोमादेरपि फलप्रकाशत्वेनोद्भित्पदवाच्यतापत्तेरित्याशयः।

ननूद्भिदादिपदानां लोके यागार्थत्वाभावेऽपि यजिसामानाधिकरण्याद् भेद एव तदर्थता कल्प्यताम्, अत आह—**न च वेद इति**। वैयाधिकरण्येनापि यजिसम्बन्धोपपत्तौ सामानाधिकरण्यस्य निश्चेतुमशक्यत्वादलौकिकार्थकल्पना पारिभाषिक्येव। सा च 'संबन्धस्याशास्त्रहेतुत्वादि' मी-द-३-२-५ त्यनेनैव निरस्तेत्यर्थः। अकमर्थित्वफलमाह—**अत इति**। गुणविधावप्यनुपपत्तिमुद्भावयति—**यदीति**। यदि गुणो विधीयते, न तर्हि कर्म, उभयविधाने वाक्यभेदापत्तेरित्यर्थः।

ननु माभूत्कर्मविधानम्, गुण एव तु विधीयतामत आह—**अविहित इति**। निराधारगुणस्यानुष्ठानानुपपत्तेरिति भावः। वाक्यान्तरप्राप्ते कर्मणि गुणविधानान्न वाक्यभेदः नाप्यानर्थक्यमिति परिहरति—**नेतीति**। न च गुणविधिपक्षे ज्योतिष्टोमेनेत्यस्यापि तत्परत्वादविहितमेव तत्रापि कर्मेति वाच्यम्, अगत्या तस्य गुणविशिष्टकर्मविधिपरत्वाभ्युपगमात्। न चैवं ज्योतिष्टोमादिगुणावरुद्धे कर्मणि गुणान्तरविधानासंभवः, यजेतेति कर्मस्वरूपमात्रं निष्कृष्य तत्र गुणविधानोपपत्तेरिति भावः। न चानेककर्मव्यवहितत्वादनुवादासंभव इत्याह—**प्रकृताविति**। प्रक्रियत इति प्रकृतिः। कर्मणि क्विन् प्रत्ययः। प्रकृते ज्योतिष्टोम इत्यर्थः मध्यगतानामपि वाक्यानां ज्योतिष्टोमानुवादगुणविधित्वेन कर्मान्तरव्यवधानाभावादनूद्यमानस्य प्रकृतत्वादित्यर्थः।

इदानीमर्थवत्त्वादित्यादिद्वितीयहेतुं व्यतिरेकमुखेन तावद्विवृणोति—**यदि चेति**। उद्भिच्छब्दस्य नामधेयत्वे यज्यर्थ एव तेनाप्युक्तः स्यात्। अत्र न विधायकादिप्रवृत्तावुद्भिच्छब्देन कश्चिद्विशेषः स्यादित्यर्थः। संप्रत्यन्वयमुखेन विवृणोति—**गुणविधौ त्विति**। अर्थवन्तः—प्रयोजनवन्तः। प्रवृत्तिविशेषकरत्वेनार्थवन्तो भविष्यन्तीति यावत्। तत्राभिधेयत्वं हेतुमाह—धात्वर्थातिरिक्तमर्थं प्रतिपादयन्त इति यावत्। तदेव कुतस्तत्राह—**गुणसंयोगादिति**। गुणेन खनित्रादिना सह वाचकत्वेन संबन्धादित्यर्थः। तदत्र प्रथमहेतुना वाक्यान्तरविहितकर्मस्वरूपमात्रानुवादेनावयवप्रसिद्धिसिद्धखनित्रादिद्रव्यगुणविधानमिति पूर्वः पक्षो दर्शितः। द्वितीयेन तु विशिष्टविहितकर्मस्वरूपमात्रानुवादात् परितोषादत्रैव गुणविशिष्टकर्मविधानमिति इत्येवं विवेक्तव्यम्। यस्मान्नामधेयत्वेन विध्यनुप्रवेशासंभवः तस्माद् गुणविधय इत्युपसंहरति—**तस्मादिति**। एवं च प्रकारान्तरासंभवेऽपि गुणविधित्वेन विध्युद्देशान्तर्गतिसंभवात् न नामधेयाप्रामाण्यशङ्का युक्तेति भावः।

यदि प्रकारान्तराभावः, तदा गुणविधित्वेनैव प्रामाण्यं समर्थ्येत । संभवति तु नामधेयत्वं प्रकारान्तरमिति सिद्धान्तयति—**एवं प्राप्त इति । पक्ष इति** पारिशेष्यात् गुणविधिपक्ष इत्यर्थः ॥ १ ॥

त० वा०—एवं स्मृतिसहितस्य वेदस्य प्रामाण्ये सिद्धे, अधुना वाक्यार्थव्याख्यानावसरसत्यपरिसमाप्त्यैव[1] प्रमाणलक्षणं केन संबन्धेन नामधेयचिन्तायाः प्रस्तावः क्रियते ?

अत्र केषाञ्चित्समाधानं तन्निरासश्च

केचित्तावदाहुः । किमुद्भिदादयो गुणस्य प्रमाणम्, उत क्रियाणामेव नामधेयत्वेनेति; तदयुक्तम् । एवं सति हि समस्तमेव शास्त्रं प्रमाणलक्षणादभिन्नं स्यात् । सर्वत्र ह्येतद्विचार्यते, किमिदं वाक्यमस्यार्थस्य प्रमाणम् । उतान्यस्येति ।

एकाधिकरणवादिमतनिरासेन अधिकरणद्वयमिति वार्तिकमतम्

येऽपि चैते द्वे अपि सूत्रे पूर्वोत्तरपक्षौ परिकल्प्यैकाधिकरणत्वेन व्याचक्षते, तैरप्युक्तं समाम्नायैदमर्थ्यमित्यनेन सूत्रेण कः सिद्धान्तानभिप्रेतः ? पूर्वपक्षानुगुणोऽर्थो विधीयत इति वक्तव्यम् । न ह्युक्तैदमर्थ्यान्तर्भाववचनमुद्भिदादीनामनिष्टम् । तस्माद् द्वयोरप्यधिकरणयोरनुमितपूर्वपक्षयोरुत्तरपक्षसूत्रद्वयमेतदिति व्याख्येयम् ।

प्रथमाधिकरणवर्णनम्

तत्र प्रथमं तावदुद्भिदादीनुदाहृत्य संदेहः क्रियते—किमेते कञ्चिद्धर्मं प्रत्युपयोगं गच्छन्ति उत नेति । किं तावत्प्राप्तम् ? 'आम्नायस्य क्रियार्थत्वात्' इत्यानर्थक्यम् ।

आह च ।

त्र्यंशवेदप्रमाणत्वादुद्भिदादि ततोऽधिकम् ।
धर्मायानुपयुक्तं सदानर्थक्यं प्रपद्यते ॥

नह्येते विध्यादिष्वन्तर्भवन्ति, साध्यसाधनेतिकर्तव्यानभिधायित्वात् तावच्चोदनाबाह्यत्वम् । स्तुतिबुद्ध्यभावादर्थवादातिरेकः । कर्माङ्गभूतैवं संज्ञकप्रकाशयितव्यार्थाभावान्मन्त्रकार्यनिर्वृत्तिः । न चान्यद्वेदप्रयोजनमस्तीत्यप्रमाणमेवंजातीयका इति ।

अत्राभिधीयते—

सर्वस्य त्रिविभागत्वाद्वेदस्योक्तेन हेतुना ।
उद्भिदाद्यप्रमाणत्वमतिरेकान्न सिध्यति ॥

---

१ क. परिसमाप्त्यैव ।

यदा तदर्थत्रयान्यतमार्थमिति स्थितम्, तदा विचारः किमर्थमिति ? न तावदर्थवादत्वम्, वाक्यशेषत्वाभावात् । कथं पुनरयं न वाक्यशेषः यावता 'वायुर्वै क्षेपिष्ठा' इत्यादिवदेकवाक्यताऽवगम्यते । नैतदस्ति । विधातव्यस्य हि यः शेषः, सोऽर्थवादः । अयं तु विध्युद्देशादेव नातिरिच्यत इत्यवाक्यशेषः । तत्संभविनश्च स्तुत्युपयोगित्वं न युज्यत इत्युक्तमौदुम्बराधिकरणे । न चैकपदेन स्तुतिर्दृष्टा । न चेह तां प्रतिपद्यामहे । यदप्युद्भेदनं पशूनामनेन क्रियत इत्येवं प्राशस्त्यं कल्प्येत, तदपि तृतीयान्तसमुदायाश्रयबलवत्तरकरणत्वप्रसिद्ध्या बाध्यते । अन्यथा हि प्रातिपदिकप्राधान्याद्वा 'वायुर्वै क्षेपिष्ठा' इतिवत्प्रथमैव प्रायोक्ष्यत ।

न चास्य मन्त्रत्वम्, ताद्रूप्येणाऽप्रतीतेः, अध्येतृस्मरणाभावाच्च । न चैकपदत्वात्साकाङ्क्षत्वम्, करणप्रतीत्या वा स्मारकत्वम् । न चैतदभिधेयः कश्चित्प्रयोगसमवाय्यर्थो दृश्यते । न चासमवेतप्रकाशने कर्माङ्गत्वम् । मान्त्रवर्णिकद्रव्यकल्पनायामपि गौरवम् । न चास्य सूक्तवाकवद्विनियोजिका श्रुतिरस्ति, येन मान्त्रवर्णिकद्रव्यकल्पना स्यात् । न चास्य रूपं प्रयोगार्हम् । अतश्चाविनियुक्तत्वात् । 'इषे त्वा'दिवदपि नाध्याहारेण निराकाङ्क्षीकृत्य प्रयोगः । स्फुटं च ब्राह्मणेनैकवाक्यत्वमित्यमन्त्रत्वम् । तस्माद्विध्युद्देशान्तर्गतस्यैवोत्तराधिकरणेन विचार्यते गुणविधिर्नामधेयं वेति ।

तत्र तावत्—

प्रसिद्धेर्बलवत्त्वेन प्रयोजनवशेन च ।
अधिकत्वात्प्रवृत्तेश्च गुणरूपं विधीयते ॥

प्रातिपदिकं तावदुद्भेदनसमर्थे द्रव्ये खनित्रादाववयवप्रसिद्ध्या प्रवर्तते । न च समुदायोऽर्थान्तरवाची लोके प्रसिद्धः । न च लोकादनवगतोऽर्थो[1] वेदादवगम्यते संबन्धस्याऽशास्त्रहेतुत्वात् । तृतीयाऽपि च करणवाचिनी, क्रियायाश्च शक्तिमद् द्रव्यम्, तदाधारा वा शक्तिः करणम् । तेनोद्भित्साधनको यागोऽवगम्यते । न च यागस्योद्भित्त्वम्, करणत्वं वा क्वचित्प्रसिद्धम् । अर्थवत्त्वात्प्रवृत्तिविशेषकरत्वम् । विधायकोद्भित्पदपुरुषाणां प्रवृत्तौ विशेषः । अन्यथा ह्यनुच्चरितसमैव प्रवृत्तिरेषां स्यात् ।

अथ वा प्रसिद्धत्वाद् गुणविधिः, अर्थवत्त्वम्-अभिधेयवत्त्वं नामधेयत्वे त्वर्थो न विज्ञायत इति योज्यते । अथ वा भेदेनार्थवत्त्वं हेतुः, उद्भित्पदस्य यजितः फलान्तरत्वात् । ततश्च विधिपुरुषयोः प्रवृत्तिविशेष इति वाच्यम् ।

ननु नामधेयमपि क्रतुं विशिषदर्थवत्प्रवृत्तिविशेषकरं च स्यात् । नैतदस्ति । कुतः ?

---

१. क. (टिप्पण्यां) दनधिगतो ।

आकृतेरविधेयत्वाद्धातुना व्यक्तिराश्रिता ।
सा च नाम्नाऽभिधीयेत जातिश्चेन्नैव नामता ॥

यदा तावद्धातुनैव लक्षणया विधिविषयत्वयोग्यत्वाद्यागविशेषः प्रतिपाद्यते, तदा किमपरं तत्र नाम करिष्यति । अथ सामान्यमात्रमभिधीयते, ततस्तस्यानिष्टमेवैतन्नामेत्यसंबद्धं सिद्धत्वादेव च विशेषस्य[1] न नामधेयं विधायिष्यत इति वक्ष्यति । यदा च केनापि प्रकारेणोद्भिदादीनां विशेषवचनत्वम्, तदा तदत्यन्ताविनाभूतसामान्यवचनत्वेन यजेरनर्थकत्वम् । लाघवं विधेर्गुणविधौ भविष्यति । यागानुवादात् ।

प्रकृति ज्योतिष्टोमेत्यादेर्व्याख्यानचतुष्टयम् ।

यद्येवं गुणाक्षिप्तत्वाद्विधिशक्तेर्न तर्हि कर्म विधीयते, तथा चाविहिते[2] कर्मणि, कस्य गुणो विधीयत इत्यानर्थक्यमत आह —**प्रकृतौ ज्योतिष्टोम इति ।** ननु गुणविधिपक्षे ज्योतिष्टोमेनेत्यस्यापि तत्परत्वादविहितमेव कर्म । गत्यभावादिदमेकं कर्मविधानं भविष्यति । तद्व्यावृत्ते च विधायके च गुणस्य विधातुमशक्यत्वाज् ज्योतिष्टोमपदमेवैकं नामधेयम् ।

अथ वा तदेकं गुणविशिष्टं कर्मविधानम् । इतराणि कर्मानुवादेन गुणविधानानि । नन्वेवं सति सर्वा एकाहाहीनसत्रचोदना ज्योतिष्टोमस्यैव गुणविधिद्वारेण प्रकरणादनतिरिक्ता इति कर्मान्तराभावान्न ज्योतिष्टोमः कस्यचित्प्रकृतिरिति, तच्छब्देन नाभिधातव्यः । सिद्धान्ताभिप्रायेणाऽऽहेति केचित् ।

अथ वा प्रक्रियत इति प्रकृतिः, प्रकृतज्योतिष्टोम[3] इत्यर्थः । अथ वा 'अथैष ज्योतिः' इत्येवमादीनां करणविभक्त्याख्यातसंस्पर्शाभावाद् गुणविधित्वानुपपत्तेरेकान्तेन भेदकतया कर्मनामत्वं तदपेक्षया च ज्योतिष्टोमः प्रकृतिः । नूनत्पत्तिवाक्यशि॰न सोमेन ज्योतिष्टोमेन वाऽवरोधाज्ज्योतिष्टोमे गुणान्तरविधानमयुक्तम् । काम्यत्वादुद्भिदादयो बाधका भविष्यन्ति । नित्ये प्रयोगे च पूर्वगुणस्यार्थवत्ता ।

अथ वा विशिष्टविहितमपि कर्म स्वरूपमात्रं निष्कृष्य गुणान्तरे विहितं नौत्पत्तिकाद्विशिष्यते । अन्यथा गत्यसंभवाद्विकल्प इति मन्यते ॥१॥

न्या० सु०— अत्र भाष्यकृतोद्भिदादिशब्दा गुणविधयो नामधेयानि वेति चिन्ता कृता । सा किमुद्भिदादिशब्दानां धर्मप्रमोपयोगसिद्ध्यर्थं वा वाक्यार्थव्याख्यानाय वा तत्राध्ययनविधिसामर्थ्यात् सकलवेदप्रामाण्यस्य विधिना त्वेकवाक्यत्वादिति तुशब्देन तुल्यं च साम्प्रदायिकमित्यनेन वा सूत्रेण प्रागेवोक्तत्वात् न तावदाद्यः पक्षः । नाप्युत्तरः सन्दिग्धार्थनिर्णये वाक्यशेष-सामर्थ्ययोः प्रामाण्यस्य वक्ष्यमाणत्वात् । द्वितीयाध्यायोप-

१. क. विशेष्यस्य । २. क. च विहिते । ३. क. प्रकृते ।

क्रमे च प्रथमेऽध्याये प्रमाणलक्षणं वृत्तमिति भाष्येण सकलस्यैवाध्यायस्य प्रमाणलक्षणत्वाभिधानात् असमाप्ते प्रमाणलक्षणे मध्ये वाक्यार्थव्याख्यानस्यासम्बद्धत्वापत्तेरित्याक्षिपति — **एवं स्मृतिसहितस्येति**। सकलवेदप्रामाण्यासिद्धौ स्मृतिविचारायोगात्स च न सम्भवति। ततश्च तत्सिद्ध्युपोद्बलनाय स्मृतिसाहित्योक्तिः। 'तेजो वै घृतं स्रुवेणावद्यतीत्यादेः सन्दिग्धार्थनिर्णये व्यापाराभावेऽपि श्रुतिविध्यर्थत्वेन प्रामाण्यसिद्धेस्तद्विचारात्प्रागपि सकलवेदप्रामाण्यसिद्धिरविरुद्धेति सूचनार्थम् — **वाक्यार्थ इत्युक्तम्**। वाक्यार्थव्याख्यानावसरत्वादेव च गुणविधिरयं प्रतीयते, स च न सम्भवति ततश्चाप्रमाणमित्यप्रामाण्याशङ्कयैवात्र गुणविधित्वशङ्केत्यप्ययुक्तम्। सिद्धेऽपि प्रामाण्ये कस्यार्थस्य प्रमाणमिति विषयविशेषविचारात् प्रमाणलक्षणसङ्गतिरित्यन्येषां समाधानमुपन्यासपूर्वकं दूषयति — **केचिदिति**। पूर्वपक्षाभिधानार्थत्वेन चाद्यसूत्रव्याख्या न युक्तेत्याह — **येऽपि चेति**। विधिना त्वेकवाक्यत्वादिति हि तुशब्दोक्तेन तुल्यं च साम्प्रदायिकमित्यनेन वा क्रियार्थत्वेन हेतुना यदुद्भिच्चित्रादिशब्दानां विध्यादित्रयान्तर्भाववचनमनेन सूत्रेण क्रियते। तत् सिद्धान्तिनो नानिष्टमित्यर्थः।

स्वमतेन समाधत्ते — **तस्मादिति**। आद्ये अधिकरणे विचारस्वरूमाह **तत्रेति**।

यद्यप्यध्ययनविधिसामर्थ्यादेवोद्भिच्चित्रादिशब्दानामप्यानर्थक्यं निराकृतं। द्वेधापि च प्रामाण्योपपत्तेर्न द्वाराभावेन प्रत्यवस्थानं युक्तम् मत्वर्थलक्षाणादेश्चानर्थक्याज्ज्यायस्त्वान्न तद्भयेनानर्थक्याङ्गीकरणं युक्तम्। आनर्थक्यासम्भवाच्चाप्रसिद्धस्याप्युद्भिच्चित्रादिशब्दस्य तृतीयागतकरणत्वबलात् करणत्वयोग्यद्रव्यविशेषवाचित्वस्य नामधेयत्वाभावेऽवश्यङ्कल्प्यत्वाच्च। न पौष्णं पेषणं विकृतौ प्रतीयेतास्याचोदनात् प्रकृतौ इत्यादिवदुत्तरविवक्षायाः प्राप्त्यर्थं सामान्यन्यायसिद्धस्यैव क्रियार्थत्वस्यानेकविचारान्तरितस्य स्मरणं क्रियत इति वाच्यम्, तत्र ह्यग्निष्टोमप्रकरणादुत्कृष्टं सन्तर्दनम्, प्रथमप्रयोगाच्चोत्कृष्टः प्रवर्ग्यः सर्वत्रान्यत्र भवतीत्युक्ते तद्वत्पेषणमपि दर्शपूर्णमासप्रकरणादुत्कृष्टं किमविशेषाच्च रौ, पशो, पुरोडाशे च भवत्युत चरावेवेत्युपस्थितस्य विचारस्यान्यत्र सङ्गत्यभावादिहैव वाक्यप्रकरणविरोधाविरोधचिन्ताप्रस्तावेन अवश्यकर्त्तव्यत्वात् तत्प्राप्त्यर्थं पेषणस्योत्कर्षाभिधानं युक्तम्। द्रव्यसंस्कारस्यापि च बर्हिर्लवनादेरङ्गप्रधानेषु समानविध्ये विचारिते, स्वयं कर्तृकताप्यङ्गप्रधानेषु समाना न वेति विचारेण प्राप्तानामृत्विजां विनियोजिकायाः समाख्यायाः लिङ्गप्रकरणाभ्यां विरोधोऽस्ति न वेति विचारिते' अन्यत्रापि समाख्यायाः पूर्वैः सह विरोधाविरोधविचारे समाप्ते, यत्प्रसक्त्या यो विचारस्तत्समाप्तौ स एव बुद्धिस्थो भवतीति वर्हिर्लवनादिविचारप्रसक्तानुप्रसक्तिसमाप्त्या बुद्धिस्थस्य वर्हिर्लवनादिविचारस्य यूपावटस्तरणवर्हिषि लवनमस्त्युत नेति शेषलक्षणसङ्गतोत्तरविवक्षया स्मरणं युक्तम्। गुणविधिनामधेयचिन्तायास्तु लक्षणाऽसङ्गतत्वेनेह कर्त्तव्यत्वाभावात्। भावार्थाधिकरणे चोद्भिच्चित्रादिशब्दानां फलपदान्वयनिरासेन यज्यन्वयेऽभिहिते किं गुणविधित्वेनैषान्तदन्वयो, नामधेयत्वेन वेति प्रसङ्गादुभयथापि

यज्यन्वयासम्भवे बलात्फलप्रदान्वयापत्तेस्तन्निरासार्थं भावार्थाधिकरणशेषत्वेनैव विचारोपपत्तेस्तत्समाप्तौ चैवमप्यपूर्वभावाद्भावशब्देभ्योऽपूर्वं नामपदेभ्यो वेति चिन्ता न युक्तेति प्रकृतचिन्ताक्षेपेणापूर्वविचारस्यापि सङ्गत्युपपत्तेस्तद्द्विवक्षयोद्भिदादिप्रामाण्यस्मरणमयुक्तम्, प्रामाण्यस्मारणेनैव प्रसक्तत्वाल्लक्षणासङ्गतस्यापि विचारस्य कर्त्तव्यत्वोक्तौ स्मारणात्कर्त्तव्यत्वम्, कर्त्तव्यत्वे च सति तत्सङ्गतिसिद्ध्यर्थं स्मारणमितीतरेतराश्रयापत्तिः। अत एव च टुप्टिकायां केचिदानर्थक्येनोत्पूत्रं पूर्वपक्षं कुर्वन्ति, सूत्रेण तत्परिहारमित्येतन्मतमुपन्यस्य, तत्रानर्थक्यस्य पूर्वमेव सर्ववेदविषयस्य निराकृतत्वादिति स्वयमेव दूषितम्। तथापि नामधेयत्वे सति उद्भिच्चित्रादिशब्दानां धर्मप्रमोपयोगोऽस्त्युत नेतीति चिन्ता क्रियमाणा न विरुध्यते। को धर्मः, कथं लक्षण इति हि प्रकारवाचिना थमुप्रत्ययेन प्रामाण्यप्रकारोऽपि लक्षणार्थत्वेनाभिहितः। यथोक्तम्—**बृहट्टीकायाम्।**

'चोदनासूत्रनिर्दिष्टो यः प्रमाणपरिग्रहः।
सप्रकारः स आद्येन लक्षणेन प्रपञ्चितः॥' इति।

किं प्रत्यक्षश्रवणमेव वेदस्य प्रामाण्यप्रकारः, अथ मन्वादिस्मरणेनोपस्थापनमपीति सामग्रीगतप्रकारे तृतीयपादेन चिन्तिते किमप्रवृत्तप्रवर्त्तन-स्तुति-विहितार्थप्रकाशनान्येव प्रामाण्यद्वाराण्युत नामधेयतापीति, अवान्तरव्यापाररूपप्रकारान्तरचिन्तार्थोऽयमारम्भो लक्षणपूर्वपादाभ्यां सङ्गच्छते। प्रामाण्यस्वरूपविषयत्वे त्वस्याश्चिन्तायाः प्रत्यक्षवेदविषयत्वात्स्मृतिविचारात्प्रागेव कार्यतापत्तेर्न स्मृतिपादानन्तरमारम्भो युक्तः तस्मान्नामधेयानां धर्मप्रमोपयोगोऽस्ति न वेति इह विचारार्थः। तत्सिद्ध्यर्थं चैषां विध्यादित्रयान्यतमान्तःपातोऽस्ति, उत नेति चिन्तनीयम्।

त्र्यंशवेदातिरिक्तत्वे नामधेयानामनुष्ठानानौपयिकत्वेन धर्मप्रमायोगानुपपत्तेरिति नामधेयानर्थक्येऽप्याम्नायस्येति सूत्रं योजयन् पूर्वपक्षमाह—**किं तावदिति।**

ननु सर्ववेदविषयस्यानर्थक्यस्याध्ययनविधिबलेन तत्रैव सिद्धान्ते निराकृतत्वान्नामधेयानर्थक्येऽप्युद्भिच्चित्रादिशब्दानां गुणविधित्वेनापि प्रामाण्योपपत्तेर्मन्त्रार्थवादवत् पुनः प्रत्यवस्थानायोगात् नानर्थक्याशङ्का युक्तेत्याशङ्क्य नोद्भिच्चित्रादिशब्दानां स्वरूपेणानार्थक्यं विवक्षितम्, किं तु नामधेयत्वे सतीत्येतमर्थं दर्शयितुं वृद्धवाक्यमुदाहरति—**आह चेति।** यद्युद्भिच्चित्रादिपदं नामधेयत्वेन त्र्यंशाद्वेदादधिकमतिरिक्तमिष्यते ततो धर्मानुपयुक्तार्थाभिधायित्वादानर्थक्यं प्रपद्यत इत्यर्थः। अनुपयुक्तं सदितिपाठे नामधेयत्वेन त्र्यंशाद्वेदादधिकं सदानर्थक्यं प्रपद्यत इत्यर्थः। ननु त्र्यंशवेदातिरेकेऽपि नामधेयत्वेनैव धर्मप्रमोपयोगो भविष्यतीत्याशङ्क्य—**त्र्यंशेत्युक्तम्।** ननु नामधेयत्वेऽप्युद्भित्संज्ञको यागः कार्य इति विध्युद्देशान्तर्गतिसम्भवात् फलोद्भेदनिमित्तोद्भित्संज्ञकत्वात् प्रशस्तोऽयं याग इति चार्थवादान्तर्गत्युपपत्तेः संज्ञात्वेन वानुष्ठेयसंज्ञियागप्रकाशनसामर्थ्यान्मन्त्रकार्योपपत्तेः कथमतिरेकापत्तिरित्याशङ्क्याह—**न हीति।** यागानुष्ठेयतया यजेतेत्येतावता सिद्धेरेतद्विधेयत्वेनैव च यागविधेयत्वेनैव च यागविशेषावधारणसिद्धेः साध्यांशाद्यभिधानेनैव विध्युद्देशान्तर्भावो वाच्यः। न च नामधेयत्वेऽन्यतमांशाभिधानं

सम्भवतीत्याह—**साध्येति**। संज्ञायाः संज्ञिस्वरूपनिर्देशार्थत्वेन प्राशस्त्यपरत्वाभावास्तुतिबुद्ध्यनुत्पादकत्वेनार्थवादातिरेकमुपपादयति—**स्तुतीति**। स्वरूपनिर्देशार्थत्वेनैव च कृतार्थत्वात् प्रयोगार्हरूपाभावेन कर्मकालप्रयोज्यत्वाभावात्, विभुत्वेन च कर्मणः क्वांशे[1] प्रयोग इत्यज्ञानात् कर्मस्वरूपप्रकाशनार्थत्वायोगात् कर्माङ्गभूतस्य चोद्भिदादिसंज्ञकस्य प्रकाशनार्हस्याभावान्न मन्त्रान्तर्गतिरित्याह **कर्मेति**[2]। उद्भिच्चित्रादिपदेषु अध्येतृभिर्मन्त्रशब्दाप्रयोगात् मुख्यमन्त्रत्वशङ्कानुपपत्तेः तत्कार्यकारित्वमात्रेण मन्त्रान्तर्गतिर्वाच्येति सूचयितुं कार्यशब्दः। ननु विध्यादित्रयातिरेकेऽपि[3] नामधेयस्य गुणफलोपबन्धोपयोगित्वेनार्थवत्त्वं भविष्यतीत्याशङ्क्याह - **न चेति**। विधित एव यागविशेषावधारणसिद्धेर्गुणफलोपबन्धोऽपि सेत्स्यतीत्याशयः। उपसंहरति—**इतीति**।

सूत्रोक्तं सिद्धान्तमाह— **अत्रेति**। उक्तेनाध्ययनविधिसामर्थ्यलक्षणेन हेतुना सर्वस्य वेदस्य त्र्यंशत्वावधारणात् यदुद्भिच्चित्रादिशब्दस्य नामधेयत्वे सत्यंशत्रयातिरेकापत्तेरप्रमाण्यं पूर्वपक्षिणोक्तम्, तन्न सिध्यति, नामधेयस्यापि वेदत्वेनांशत्रयान्तःपातावसायात् इत्यर्थः। एतेन श्लोकेनोक्तमस्माभिरित्याद्यन्यतमस्मै प्रयोजनाय भवेयुरित्यन्तं भाष्यमाद्यसूत्रव्याख्यानार्थमिति सूचितम्। नामधेयप्रामाण्यविचारसिद्धान्ताभिधानार्थमप्येतत्सूत्रं गुणविधिनामधेयविचारपूर्वपक्षेऽप्यध्याहारेण शक्यं योजयितुमिति प्रदर्शनायादौ भाष्यकृता द्वितीयविचारोपक्रमः कृतः। वार्तिककृता त्वध्याहाररहितस्य सूत्रस्य पूर्वपक्षाभिधानासामर्थ्यमुक्तम्। उभयाभिधानशक्तस्यापि सूत्रस्य वाक्यभेदापत्तेरुभयत्र तात्पर्यासम्भवमभिप्रेत्य द्वितीयाधिकरणपूर्वपक्षस्यानुमितत्वोक्तिरिति भाष्यवार्त्तिकयोरविरोधः। तन्न तावदित्यादिभाष्यं नामधेयस्य मन्त्रार्थवादान्तर्भावशङ्कानिराकरणार्थं तदन्तर्गतावप्यन्यतमांशान्तर्गतिसिद्धेरतदर्थकमित्याह—**यदेति**। निर्द्धारितरूपांशविशेषान्तर्गतिं विनान्यतमांशान्तर्गत्यनिर्वाहात्। यदा यस्मात्कारणात् तन्नामधेयं विध्याद्यर्थत्रयान्यतमार्थमित्युक्तमपि विशेषानिरूपणात् निर्वाहमगत्वैव स्थितम्, तदा तस्मात्कारणात् **किमर्थमिति** विशेषविचारः कर्त्तव्य इत्यर्थः। न त्येकस्मिन्विचारे पर्यवसिते, विचारान्तरारम्भोक्तिरेषा तथा सत्यधिकरणत्रयापत्तेर्द्वयोरधिकरणयोरित्यनुपपत्तिप्रसङ्गात्। तन्न तावदिति भाष्यं व्याचष्टे—**न तावदिति**। एतदेवाक्षेपपूर्वकमुपपादयति—**कथं पुनरिति**। नावयववाच्ययं शेषशब्दः। किं तूपयुक्तेतरवाची। वायव्यं श्वेतमित्यादेर्हि 'स एवैनं भूतिं गमयतीत्यन्तस्यैकस्य वाक्यस्य मध्ये भूतिकामान्तेभ्यः साध्यादिप्रतिपादनेन विधेयार्थाभिधानोपयुक्तेभ्यः पदेभ्यः परिशिष्टानां 'वायुर्वै क्षेपिष्ठे'त्यादीनामर्थवादतेष्यते। ननु विधिवाक्यावयवत्वरूपैकवाक्यत्वमात्रेण भूतिकामादिपदानामप्यर्थवादत्वापत्तेः, नामधेयानां च विधिविषयविशेषावधारणार्थत्वेन विधेयार्थाभिधानोपयुक्तत्वात् न परिशिष्टताऽस्तीत्यर्थः। ननु विधिविशेषादेव विधेयविशेषावधारणसिद्धेर्नामधेयानां तादर्थ्यासम्भवात् परिशिष्टता

१. अस्येति अधिकं पाठः २ पु० पा०। २. कर्माङ्गभूतेति २ पु० पा०।
३. आधिक्येऽपीति २ पु० पा०।

भविष्यतीत्याशङ्क्याह—**तदिति**। उत्पत्तिवाक्ये विधेयविशेषावधारणस्यान्यतः सिद्धावपि, समे यजेतेत्यादौ दर्शपूर्णमासादिनामधेयं विना विशेषावधारणासिद्धेर्वक्ष्यमाणत्वात्। विध्युद्देशान्तर्गतिस्तावत्सम्भवत्येव। न च तत्सम्भवे स्तुत्यर्थत्वाङ्गीकरणं युक्तमिति, प्रधानं विधिः अङ्गं स्तुतिः, तत्र प्रधानविशेषणसम्भविनस्तद्गामित्वमेव न्याय्यमित्यत्रोक्तमित्यर्थः। गुणगुणिसम्बन्धकीर्त्तनात्मकत्वाच्च स्तुतेर्न गुणमात्रैकवाचिनैकेन पदेनोपपत्तिरित्याह—**न चेति**। ननु संज्ञया गुणिभूतस्य संज्ञिनो धातूपात्तस्योपस्थापनोपपत्तेः स्तुतिः सेत्स्यतीत्याशङ्क्याह—**न चेहेति**। संज्ञायाः संज्ञिव्यवहारार्थत्वेन स्तुतिपरत्वायोगान्नेह नामधेये स्तुतिप्रतिपत्तिः सम्भवतीत्यर्थः। ननु नामधेयस्यापि फलोद्भेदनादिगुणयोगनिमित्तत्वात् सहस्राक्षादिवत्स्तावकत्वोपपत्तिरित्याशङ्क्याह—**यद्यपीति**। संज्ञायाः संज्ञिव्यवहारार्थत्वेन कृतार्थायाः संज्ञायाः स्तुत्यर्थत्वमेव तावत्स्वमनीषिकामात्रेण कल्प्यम्, न तु युक्तियुक्तं कथंचित्कल्पितमप्येतत्फलोद्भेदनस्य कर्त्तेति धातूपपदप्रत्ययार्थसमुदायस्य तृतीययाऽन्यार्थत्वप्रतीतेः प्रादिपदिकार्थप्राधान्यविघाताद् बाध्येतेत्यर्थः। न मन्त्र इति। मन्त्रान्तर्गतिशङ्कानिराकरणार्थं भाष्यं व्याख्यातुं मन्त्रस्वरूपनिराकरणे तावत्प्रायिकस्यास्यन्तत्वादिलक्षणस्य, अभिधानचोदकत्वस्य चाध्येतृप्रयोगस्य च व्यापकस्याभावं सूचयितुं हेतुमाह—**न चास्येति**। ननु स्वरूपतो मन्त्रत्वाभावेऽप्यूहप्रवरनामधेयवत् प्रयोजनाकाङ्क्षायां प्रयोजनान्तरायोगेनानुष्ठेयस्मारकत्वावगमात् मन्त्रकार्यकरत्वेनौपचारिकं मन्त्रत्वं भविष्यतीत्याशङ्क्य स्वयं तावन्निराकरोति—**न चेति**। पदार्थमात्रस्यानुष्ठेयत्वात् प्रयोजनत्वानुपपत्तेर्वाक्यार्थस्यैवानुष्ठेयत्वेन प्रयोजनत्वादेकस्य च पदस्य वाक्यार्थप्रतिपादनासामर्थ्यात् प्रयोजनाकाङ्क्षैव तावन्नास्ति। सत्यामपि वा प्रयोजनाकाङ्क्षायां स्मारकत्वं न युक्तम्, करणत्वप्रतीत्या स्मरणार्हत्वापादकप्रातिपदिकार्थप्राधान्यबाधादित्यर्थः। एतच्च ब्राह्मणेनैकवाक्यीभूतस्य कर्मकाले स्वतन्त्रप्रयोज्यत्वाभावान्मन्त्रकार्यकारित्वानुपपत्तेर्मन्त्रकार्यकरत्ववादिनोद्भिदादिनामधेयानां स्वातन्त्र्यमवश्याभ्युपगन्तव्यम् इत्यापाद्यैकपदत्वमुक्तम्।

वस्तुतस्तु धातुसामानाधिकरण्यं विना नामधेयत्वायोगात् भिन्नवाक्यत्वे प्रकारान्तरेणोपयोगानुपपत्तेरानर्थक्यस्यापरिहार्यत्वादिष्टमेवैकवाक्यत्वम्। अत एव सिद्धवद्वायुक्षेपिष्ठादिवदेकवाक्यतावगम्यत इत्युक्तम्। अनङ्गीकृतनामधेयत्वस्य तूद्भिदादिपदस्वरूपस्यार्थवादत्वनिकराकरणे सत्यसावेकवाक्यत्वशङ्का, तदङ्गीकारेण च विध्युद्देशान्तर्गत्या परिहारो न कथंचिद्युज्यते। यदा च मन्त्रकार्यकरणत्वाङ्गीकरणे ब्राह्मणैकवाक्यत्वानुपपत्तेः स्वतन्त्रैकपदता पद्यते, तदा सामानाधिकरण्याभावेन नामधेयत्वायोगात्, तदभिधेयस्य चार्थस्य वाक्यान्तरेण कर्मण्यविधानात् प्रयोगसमवेतार्थाभावात्स्मारकत्वं न युक्तमित्याह—**न चैतदिति**। अनेन चैवंजातीयकस्येति भाष्यमुद्भिच्चित्रादिशब्दानां नामधेयत्वे तद्वाच्यस्य प्रधानकर्मण एव प्रकाशनीयस्य सद्भावादयुक्तमाशङ्क्यापाद्योक्त्या व्याख्यातम्।

यद्वा कर्मणो विभुत्वेनास्य क्वांशे प्रयोग इत्यज्ञानात् कर्मस्वरूपप्रकाशनार्थत्वानुपपत्तेः। कर्माङ्गप्रकाशनार्थत्वं वाच्यम्। न चैतदभिधेयः कर्माङ्गभूतोऽर्थोऽस्तीत्याशयः। नन्वसमवेतार्थत्वेऽपि स्तोत्रशस्त्रमन्त्रवदङ्गत्वं भविष्यतीत्याशङ्क्याह—**न चेति**। स्तोत्रादिसाधनत्वेन विधानाभावात् प्रकरणपाठेनैषां कर्माङ्गप्रकाशनेनैव वाच्यः। न चासौ सम्भवतीत्याशयः। नतूद्भिदादिशब्दवाच्यस्य खनित्रादेर्मन्त्रवर्णात् कर्मणि समवायः कल्पयिष्यते, अत आह—**मान्त्रवर्णिकेति**। चित्राग्निहोत्रादिशब्दानां द्रव्यवाचित्वानाशङ्कनादुपलक्षणार्थो द्रव्यशब्दो द्रष्टव्यः। श्रुत्यविनियुक्तत्वाच्चास्य स्वार्थसमवायकल्पकत्वं नास्तीत्याह—**न चेति**।

सम्भवत्यपि नामधेयत्वे कर्मस्वरूपप्रकाशनार्थत्वे च ब्राह्मणाद्विच्छिन्नस्यैकपदमात्रस्य मन्त्रत्वानाशङ्कनात् तादृशस्य चाख्यातान्वयं विना नैराकाङ्क्ष्याभावान्न कर्मकालप्रयोज्यत्वं सम्भवतीत्याह—**न चेति**। नन्वध्याहारेण निराकाङ्क्षीकृत्य कर्मकालप्रयोज्यत्वं भविष्यतीत्याशङ्कां निराकुर्वन् कर्मकालाप्रयोज्यत्वमेवोपसंहरति- **अतश्चेति**। अतः साकाङ्क्षत्वेनाप्रयोगार्हत्वान्न कर्मकाले प्रयोगः सम्भवति। न चाध्याहारेण निराकाङ्क्षीकृत्य प्रयोगोऽविनियुक्तत्वेन प्रत्यक्षविनियोगान्यथानुपपत्तिकल्प्याध्याहारा-योगादित्यर्थः। नामधेयत्वेन च प्रत्यक्षब्राह्मणैकवाक्यत्वप्रतीतेर्न श्रुताध्याहारेण निराकाङ्क्षीकरणं युक्तमित्याह—**स्फुटश्चेति**। मन्त्रानन्तर्गतिमुपसंहरति—**इतीति**। पारिशेष्यादिति भाष्यं मन्त्रार्थवादान्तर्गत्यसम्भवेऽपि नामधेयत्वोपपत्तेः पारिशेष्याद् गुणविध्यसिद्धेरयुक्तमाशङ्क्य समाधातुमाह—**तस्मादिति**। नामधेयस्य विध्युद्देशान्तर्गतिमात्रं पारिशेष्येणाभिमतम्। गुणग्रहणं तूत्तराधिकरणपातनिकार्थमित्याशयः। विध्युद्देशान्तर्गतस्यैव नामधेयस्य गुणविधिर्नामधेयं वेत्येवं विचारः क्रियत इति भावे लकारः विधेयाङ्गसमर्पकत्वाभिप्रायो गुणविधिशब्दः। नामधेयस्य च विध्युद्देशान्तर्गतेर्न नामधेयं विधायिष्यत इत्येतद्भाष्यव्याख्याने विस्तरेणोपपादयिष्यमाणत्वात् तदवष्टम्भेनेह सिद्धवदभिधानम्।

उद्भिदादिशब्दानां च नामधेयत्वं याज्ञिकप्रसिद्धयैव सिद्धम्। स एष यज्ञः पञ्चविधोऽग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यानि, पशुः, सोम इत्यादिलिङ्गदर्शनैश्चावधारितमिति, अविचारितसिद्धमङ्गीकृत्य नामधेयत्वस्य धर्मप्रामाण्यप्रकारताऽस्त्युत नेत्याद्येनाधिकरणेन विचारिते, क्वास्ति नामधेयम्, क्व वा नेति कोष्ठशोधनिकार्थमुत्तरः प्रपञ्चः। सोऽपि वाक्यार्थव्याख्यानत्वेन प्रमाणलक्षणासङ्गतिप्रसङ्गान्नोद्भिदादिशब्दो गुणविधिर्नामधेयं वेत्येवं रूपः। किं तु यथा सर्ववाक्यशेषाणाम् आनर्थक्यनिराकरणेनार्थवादत्वेऽर्थवादाधिकरणेनैव सिद्धे तद्दृढीकर्त्तुं विधित्वाशङ्कानिराकरणायोत्तराधिकरणद्वयं तथोद्भिदादिशब्दानां याज्ञिकप्रसिद्ध्यवधारितेन नामधेयत्वेन धर्मप्रमोपयोगे साधिते प्रसिद्ध्यादिहेतुकेन गुणविधित्वेनैव धर्मप्रमोपयोगसिद्धेः किं क्लिष्टेन नामधेयत्वेनेत्याशङ्क्य नामधेयत्वमेव दृढीकर्त्तुं गुणविधित्वाशङ्कानिरासायोत्तराधिकरणचतुष्टयम्। ततो वाजपेयाधिकरणे

तन्त्रसम्बन्धेन विशिष्टविधिसम्भवाद् गुणविधिपक्षोक्तमत्वर्थलक्षणादिदोषपरिहारेण प्रत्यवस्थानमाशङ्क्य वैरूप्यात्तन्त्रसम्बन्धानुपपत्तेर्दोषपरिहारासम्भवेन गुणविधित्वनिराकरणे दृढीकृते विशिष्टविधावाख्यातोपपदार्थयोर्द्वयोर्विधानात्सन्निकृष्टविध्यसम्भवनिबन्धनत्वाच्च विप्रकृष्टविधेर्युगपत्सम्भवासम्भवविरोधान्न क्वापि विशिष्टविधिः सम्भवतीत्याशङ्क्य, आग्नेयाधिकरणे विशिष्टविधौ व्युत्पादिते, बर्हिरादिशब्दाः संस्कारनिमित्ताः जातिनिमित्ता यौगिका वेत्यधिकरणत्रयेण प्रसङ्गाद्विचारिते प्रासङ्गिकसमाप्त्या बुद्धिस्थस्य विशिष्टविधिव्युत्पादकस्य प्रयोजनमुत्पत्तिशिष्टबलीयस्त्वं वैश्वदेवशब्दस्य गुणविधित्वशङ्कानिराकरणार्थं व्युत्पाद्य, अष्टाकपालादिशब्दानामेकवाक्यगतत्वेनोत्पत्त्युत्पन्नशिष्टत्वविभागाभावाद् गुणविधित्वमाशङ्क्याष्टत्वादीनां परस्परविरोधितत्वेनैकवाक्यविधानायोगाद् बलाद्वाक्यभेदप्रसक्तेरुत्पत्तिशिष्टद्वादशत्वावरुद्धे यागेऽष्टत्वादिविध्ययोगादष्टाकपालादिशब्दैर्गुणवृत्त्या द्वादशकपालस्तुतिरिति वैश्वानराधिकरणेऽभिहिते, प्रसङ्गाद् गुणवृत्तित्वलक्षणं तत्सिद्धिसूत्रेणोक्त्वा, यथा विध्युद्देशान्तर्गतस्यापि उद्भिदादिपदस्य नामधेयरूपेण प्रकारान्तरेण धर्मप्रमोपयोगित्वम्, तथा वाक्यशेषस्यापि स्तावकत्वातिरेकेण सन्दिग्धनिर्णायकत्वेनेत्यक्ताधिकरणेनोक्ते स्रुवाधिकरणे वाक्यशेषवत् सामर्थ्यस्यापि सन्दिग्धनिर्णायकत्वेन धर्मप्रमोपयोगव्युत्पादनात् सकलस्य पादस्य प्रमाणलक्षणसङ्गत्यविघातः। भाष्यानुसारेणोद्भिदादिशब्दानां गुणविधित्वेन धर्मप्रमोपयोगित्वं नामधेयत्वेन वेत्युभयथा प्रामाण्यमङ्गीकृत्य प्रकारविशेषव्युत्पादनार्थापि गुणविधिनामधेयचिन्ता, प्रकारस्यापि लक्षणार्थत्वात् न लक्षणसङ्गतिं विहन्ति। प्रामाण्यविषयविशेषनिरूपणार्थेयं गुणविधिनामधेयचिन्ता न प्रकारविशेषनिरूपणार्थेति परव्याख्यादूषणार्थस्तु वार्त्तिककारीयो यत्न इति सर्वमनवद्यम्।

उद्भिद्गुणवतेत्यादिद्वितीयाधिकरणपूर्वपक्षभाष्यं तात्पर्यतो व्याचष्टे—**तत्र तावदिति**। ननूद्भिदादिशब्दानां लोके खनित्रादावप्यप्रसिद्धत्वादवयवव्युत्पत्त्या तु कर्मण्यपि प्रवृत्तिसम्भवात् कथं प्रसिद्धया गुणविधित्वनिश्चय इत्याशङ्क्य—**बलवत्त्वेनेत्युक्तम्**। उच्छब्दस्योर्ध्वत्वे, भिदेश्च विदारणे लोकव्याकरणयोः प्रसिद्धत्वादुद्भिच्छब्दस्य खनित्रेऽवयवप्रसिद्धिर्बलीयसी, प्रकाशनार्थतायास्त्वप्रसिद्धत्वाद्यागस्य चाबोधकत्वेन प्रकाशकत्वाभावात् उत्पादकत्वेनापि प्रकाशकत्वोपचारे सर्वकर्मणां स्वफलोत्पादकत्वेनोद्भिच्छब्दवाच्यतापत्तेर्यागे प्रसिद्धिर्दुर्बलेति भावः। गुणविधौ त्विति भावः। भाष्यमभ्यधिकमर्थं विदधत इत्यवयवत्वेन प्रवृत्तिविशेषकत्वमुक्तम्, अर्थवन्तो भविष्यन्तीत्यनेन च प्रयोजनवत्त्वमित्येवं व्याख्यातुं 'प्रयोजनवशेन चाधिकारात्'— **प्रवृत्तेश्चेत्युक्तम्**। विध्युद्देशान्तर्गतस्योद्भिदादिशब्दस्य गुणरूपमङ्गरूपं वाच्यमित्यनुषङ्गाध्याहाराभ्यां योज्यम्। किमर्थं तदुच्यत इत्यपेक्षायामाख्यातेन विधातुमिति— **विधीयत**। इत्यनेनोक्तं भाष्यमप्युद्भिद्गुणतां यागस्याख्यातेन विधातुमुद्भिदादिशब्दो विधेयगुणसमर्पक इत्येवं योज्यम्। धातूपसर्गरूपावयवशक्त्यनुसारेण तावदुद्भिच्छब्दस्योर्ध्वविदारणसाधनद्रव्य-

वाचित्वमुत्पादयति—**प्रातिपदिकमिति**। द्रव्यविषयायाः प्रसिद्धेर्बलीयस्त्वोपपादनार्थं न चैषामिति भाष्यावयवं व्याचष्टे—**न चेति**। भिदिर्विदारण इतिवत् प्रकाशने स्मृत्यभावाद्यागस्याप्रकाशकत्वादौपचारिकप्रकाशकत्वे सत्यप्यतिप्रसङ्गापत्तेरवयवप्रसिद्ध्योद्भिच्छब्दस्य यागार्थत्वायोगात्समुदायप्रसिद्ध्या तदर्थता वाच्या न चासावस्तीति सूचनार्थः समुदायशब्दः।

ननु लोकप्रसिद्ध्यभावेऽपि यजिसामानाधिकरण्याद्यागार्थतावगम्यत इत्याशङ्कानिराकरणार्थं 'न चेति भाष्यावयवं समानाधिकरण्यावगतस्यार्थस्य पारिभाषिकत्वाभावात् अयुक्तमाशङ्क्य व्याचष्टे—**न चेति**। वैय्यधिकरण्येनापि यजिसम्बन्धोपपत्तेः सामानाधिकरण्येन यागार्थत्वस्यावगन्तुमशक्यत्वादलौकिकार्थकल्पना पारिभाषिकी आपद्येत। सा च सम्बन्धस्याशास्त्रहेतुत्वादित्यैन्द्रय्धिकरणसूत्रावयवेन निरस्तत्वादयुक्तेत्याशयः। तृतीयया चोद्भिच्छब्दार्थस्य करणत्वावगतेर्द्रव्यस्यैव च करणत्वोपपत्तेस्तदनुसारेणापि उद्भिच्छब्दस्य द्रव्यवाचिताऽवसीयत इत्याह—**तृतीयापि चेति**। ननु यागस्यापि फलोद्भेदनहेतुत्वात्फलभावनाकरणत्वाच्च तद्वाचित्वेऽप्यवयवप्रसिद्धिः, तृतीया च न विरोत्स्यत इत्याशङ्क्याह—**न चेति**। यागस्योद्र्ध्वविदारकत्वम्, प्रकाशकत्वं वा तावन्नास्त्येव। करणत्वं तु विधिसामर्थ्यगम्यमपि कर्तृव्यापारव्याप्यत्वरूपकर्मत्वापेक्षत्वेन ततो दौर्बल्यात्तेनाभिभूतं सन्न तृतीयोत्पादनक्षममिति, प्रसिद्धशब्देन प्रकृष्टत्वेन कर्मत्वात् बलीयस्त्वेन न सिद्धं यतस्तेनाभिभवितुं न शक्यत इत्यभिधानात्सूचितम्। कुठारादीनां तु छेदनादौ करणत्वात् उद्यमनादौ च कर्मत्वाद्भिन्नविषयत्वेनाविरोधादनभिभूतं करणत्वं तृतीयोत्पादनक्षममित्याशयः। नन्वर्थवन्तो भविष्यन्ति इतिभाष्यावयवेनार्थवत्त्वस्य तृतीयोपपत्तित्वेनोक्तत्वात्। प्रयोजनवशेन चेति द्वितीयोत्पत्तित्वेन व्याख्या न युक्तेत्याशङ्क्याह—**अर्थवत्त्वादिति**। प्रवृत्तिविशेषकरत्वोपपत्तित्वद्योतनार्थं तृतीयया युक्त्या प्रागस्य व्याख्येत्याशयः। प्रवृत्तिविशेषकरत्वं व्याचष्टे—**विधायकेति**। द्रव्यविशिष्टक्रियाविषयप्रवृत्तिहेत्वभिधानेऽपि विधेयसमर्पणे द्रव्यविशिष्टक्रियानुष्ठाने च यथाक्रमं प्रवृत्तौ विशेष इत्यर्थः।

ननु नामधेयत्वेऽपि संज्ञाविशिष्टे कर्मणि प्रवृत्तेराधिक्यरूपो विशेषोऽस्तीत्याशङ्क्याह—**अन्यथा हीति**। विधिविशेषादेव यागविशेषसिद्धेर्नामधेयस्यानतिरिक्तार्थत्वात्। अनुच्चारिते तस्मिन्यावती विधायकादीनां प्रवृत्तिः तावत्येवोच्चारितेऽपि स्यादित्यर्थः। उद्भित्पदस्यानुच्चरितस्य प्रवृत्त्ययोगेऽप्याधिक्याभावं त्रयाणां तुल्यं वक्तुमेषामिति बहुवचनम्। प्रसिद्धेर्वार्थवत्त्वोपपत्तित्वसूचनार्थं **प्रागर्थवत्त्वव्याख्येत्याह—अथ वेति**।

प्रसिद्धस्यापि लोष्ठादेर्निःप्रयोजनत्वात् प्रसिद्धेः प्रयोजनवत्त्वोपपत्तित्वासम्भवमाशङ्क्याभिधेयवाचित्वेनार्थशब्दव्याख्यानमुद्भित्पदस्य गुणे प्रसिद्धत्वात् विधेयगुणसमर्पकस्य सतोऽर्थवत्त्वमित्यर्थः।

अस्मिंस्तु व्याख्याद्वये गुणविधौ हेतुद्वयापत्तेः प्रसिद्धयादिभिः पूर्वपक्षे इति श्येनाधिकरणभाष्ये बहुवचनानुपपत्तिप्रसङ्गेनापरितोषाद्धेतुभेदेऽपि प्रवृत्तिविशेषकरत्वेऽपि प्रयोजनातिरेकस्यैवोपपत्तित्वं सूचयितुं प्राक् व्याख्येति पारमार्थिकम्। व्युत्क्रमव्याख्याभिप्रायं दर्शयितुमाह—**अथ वेति**। नन्वेवं पृथगस्य हेतुत्वे अर्थवत्त्वेनैवोद्भित्पदस्य प्रवृत्तिविशेषो दर्शितः। किमपरमस्य प्रवृत्तिविशेषोपन्यासेनेति—**आह ततश्चेति**। स्वात्मनि क्रियाविरोधादौपचारिकभेदाश्रयणेनोद्भित्तादमात्मनः प्रवृत्तिविशेषकरम्प्रागुक्तमित्यपरितोषादिह विधिपुरुषयोरित्युक्तम्। नामधेयानर्थक्यप्रतिपादकं यदि चेति भाष्यमाक्षिपति—**नन्विति**। सामधत्ते—**नैतदिति**। श्लोकं व्याचष्टे—**यदेति**। किमपरमित्यनेन धातूक्तैव यागव्यक्तिर्नाम्नाभिधेया, ततश्चानर्थक्यमित्येवं सा चेति व्याख्यातम्। अथेत्यनेन जातिश्चेद्धातुनाश्रिता ततः समानाधिकरण्यात्तन्नामतैव प्रसज्येत। सा चानिष्टेत्युत्तरोऽवयवो व्याख्यातः। विशेषस्यान्यतः सिद्धिं सिद्धान्तिनोऽप्यभिमतां दर्शयति—**सिद्धत्वादेव चेति**। विशेषस्यान्यतोऽसिद्धौ तत्प्रतिपत्त्यर्थं नामधेयस्यावश्यविधेयत्वापत्तेस्तन्निरासो न युज्येत इत्याशयः। ननु विशेषसिद्धेर्नामधेयाधीनत्वेऽप्यवयवशक्त्यनुसारेणैव कर्मण्यपि प्रवृत्तिसिद्धेः, संज्ञासंज्ञिसम्बन्धविधिनिरासार्थं तद्भाष्यमित्याशङ्क्याह—**यदा चेति**। संज्ञासंज्ञिसम्बन्धविधिशून्येन लौकिकेनावयवशक्त्यनुसाररूपेणापि प्रकारेणोद्भिदादिपदानां विशेषवाचित्वाभ्युपगमे, तत एव विशेषसिद्धेर्धात्वानर्थक्यं प्रसज्येत। न च सामान्योक्त्या तस्यार्थवत्त्वम्, विशेषान्तर्भावेनैव सामान्यसिद्धेरित्यर्थः।

ननु यागविधिवाक्ये गुणस्यापि विधौ गौरवं स्यादित्याशङ्क्याह—**लाघवं चेति**। हेतुत्रयसङ्कलनार्थं तत्प्रतिपादकान् भाष्यावयवान् यदि गुणविधिरित्यादिभाष्योपेक्षणेन व्याख्यायोपेक्षितं यदीत्यादिभाष्येण तद्व्याचष्टे—**यद्येवमिति**। नेति ब्रूम इति परिहारभाष्यमाक्षेप्तुमवतारयति—**अत आहेति**। आक्षिपति—**नन्विति**। कर्मविध्यभावे गुणविध्ययोगादवश्यं कस्मिंश्चित् कर्मविधानेऽभ्युपगन्तव्ये ज्योतिष्टोमवाक्यसन्निधावितिकर्त्तव्यताम्नानात् तस्याश्च कर्त्तव्यत्वलिङ्गत्वात् 'भूयस्त्ववेनोभयश्रुति' इत्यनेन न्यायेनास्य कर्मविधित्वं भविष्यतीति समाधत्ते—**गत्यभावादिति**। नन्वेवं सति ज्योतिष्टोमपदस्य का गतिरित्याशङ्क्य द्वेधा गतिमाह—**तद्व्यावृत्ते चेति**।

नन्वेवमपि तद्विकारभूतकर्मान्तराभावात् प्रकृतिशब्दो न युक्त इत्यन्यथाक्षिपति—**नन्वेवमिति**। समाधत्ते—**सिद्धान्तेति**। प्रस्तुताधिकरणसिद्धान्ते प्रकृतित्वानभिधाना- 'दव्यक्तासु तु सोमस्ये'त्यत्र वक्ष्यमाणस्य चोद्भिदादियागप्रकृतित्वस्योद्भिदादिशब्दानां गुणविधित्वाभिधानविरोधित्वेनानुद्भाव्यत्वादपरितोषेणान्यथा समाधत्ते—**अथ वेति**। कथं दूरस्थे ज्योतिष्टोमे गुणविधिरित्याशङ्क्य—**ताण्डके**। ज्योतिष्टोमानन्तरमुद्भिदाद्याम्नानाद् गुणविधित्वेन चासम्बद्धपदाव्यवायाभावात् सर्वत्र ज्योतिष्टोमस्य प्रकृतत्वोपपत्तेस्तत्र गुणविधित्वसम्भवः प्रकृतित्वाभिधानेनोक्त इति भावः।

यदा त्वथैष ज्योतिरित्यादिवर्ज्जमुदाहरणमिति श्येनाधिकरणवक्ष्यमाणन्यायेन ज्योतिरादिशब्दानां गुणविधित्वाशङ्काविषयत्वं नेष्यते, तदा तेष्वपि गुणविध्युपपत्तेर्ज्योतिष्टोममात्रे गुणविधानाभिधानमयुक्तमित्याशङ्क्य 'प्रकृतौ वा द्विरुक्तत्वादिति न्यायं सूचयितुं तदपेक्षया प्रकृतित्वाभिधानमित्याह— **अथ वेति**। अव्यापारस्य व्यापारावच्छेदं विना विधेयत्वायोगात्तस्य च व्यापारवाच्याख्यातान्वयाधीनत्वात् कारकविभक्तिं च विनाख्यातान्वयायोगात् लोकसिद्धस्यैव च गुणस्यैव च कारकविभक्तिविनियोज्यत्वात् न स्वरूपज्ञापनार्थप्रातिपदिकार्थप्रधानप्रथमानिर्दिष्टस्य विधेयत्वं सम्भवतीत्याशयः। नन्वेवमपि ज्योतिष्टोमपदस्य नामधेयत्वं तद्वाक्येन फलसम्बन्धे व्यापृतेनापेक्षितायाः कर्मोत्पत्तेः सोमेन यजेतेत्यनेन करणादुत्पत्तिशिष्टेन सोमेन गुणविधित्वे वा, तस्य प्राप्ते कर्मणि गुणफलसम्बन्धरूपानेकार्थविधाने वाक्यभेदापत्तेर्ज्योतिष्टोमवाक्यस्यैव कर्मोत्पादकत्वात् उत्पत्तिशिष्टेन ज्योतिषां द्युतिमतामग्न्यादिद्रव्याणां स्तोमेन समुदायेन ज्योतिष्टोमशब्दावयवशक्त्यनुसारावगतेनावरोधाज्ज्योतिष्टोमे गुणविधानं न युक्तमित्यन्यथाक्षिपति— **नन्विति**। फलपदानुरोधात् फले गुणविधिप्रतीतेर्ज्योतिष्टोमाश्रितस्य गुणस्य फले विधानं भाष्यकृतोक्तमिति मत्वा तावत्समाधत्ते—**काम्यत्वादिति**। एवं तावदुद्भिदादिद्रव्येण यागमभिनिर्वर्तयेदिति सन्देहहेतुभाष्यस्योद्भिद्गुणता यागस्येति च पूर्वपक्षभाष्यस्याविहिते च कर्माणि तत्र गुणाविधानमनर्थकमित्याशङ्काभाष्यस्य चानुपपत्तिप्रसङ्गात्सर्वकाम्यप्राप्तपश्वादिफलानुवादकत्वेन च फलपदोपपत्तेरपरितोषादन्यथा समाधत्ते—**अथ वेति**। यद्यपि गुणविशिष्टं विहितं कर्मोत्पत्तिकेन गुणेन नैराकाङ्क्ष्यान्न तद्विरुद्धं वाक्यान्तरोपात्तं गुणान्तरं ग्रहीतुं शक्नोति, तथापि यजिना गुणरहितं स्वरूपमात्रं निष्कृष्याकाङ्क्षोत्थापनेन गुणान्तरं विहितं सन्नोत्पत्तिकाद्विशिष्यत इत्यध्याहृत्य यदि तथाशब्दकावपि शब्दावृत्त्या योज्यम् ॥ १ ॥

भा० प्र०—मीमांसा के प्रथम अध्याय के प्रथम पाद के पचीसवें सूत्र के अनुसार अर्थात् "**तद्भूतानां क्रियार्थेन समाम्नायः**" (१।१।२५) से सभी वेद क्रिया का प्रतिपादन करते हुए पुरुषार्थपरक होते हैं—यह कहा गया है। इसके अनुसार मन्त्र और अर्थवाद वाक्य का भी प्रामाण्य प्रतिष्ठापित हुआ है। इसमें अर्थवाद वाक्य विधेय कर्म के प्राशस्त्य का निर्देश करते हुए विधिवाक्य के साथ अन्वित होकर अङ्ग के रूप में सम्बद्ध होकर विधिवाक्यों के फल से ही फलवान् होते हैं। मन्त्र विधि वाक्य के द्वारा सूचित अनुष्ठान योग्य पदार्थों का अनुष्ठान के समय अर्थ का प्रकाश कर नियमविधि के अनुसार अपूर्व[1] का उत्पादन कर प्रयोजनवान् होता है।

---

१. प्रधान कर्म या अङ्ग कर्मों के सम्पादन से स्वर्ग आदि प्राप्ति के योग्य पुरुष या स्वर्ग आदि प्राप्ति के योग्य क्रतु नहीं है। इन दोनों की अर्थात् पुरुष और कर्म को फल के प्रति जो अयोग्यता है उसका निवारण कर योग्यता का सम्पादक पुरुषगत

प्रकृत में यह विचारणीय है कि उद्भिद् से याग करे, उद्भिदा यजेत' (ताण्ड्य ब्राह्मण १९।६।३) बलभिद् से याग कर 'बलभिदा यजेत' (ता० ब्रा० १९।६।१) विश्वजित् से यजन करे 'विश्वजिदा यजेत' (ता० ब्रा० १९।८।४) अभिजित् से याग करे 'अभिजिता यजेत' (ता० ब्रा० १९।८।४) अर्थात् 'अभिजिता वै देवा इमान लोकान्

या क्रतुगत अपूर्व मीमांसा शास्त्र में कहा जाता है। अन्यथा यज्ञ का सम्पादन असम्पादन के समान ही रहेगा।

कर्मभ्यः प्रागयोग्यस्य कर्मणः पुरुषस्य वा।
योग्यता शास्त्रगम्या या परा साऽपूर्वमुच्यते ॥

"प्रधानकर्मणामङ्गकर्मणां वा प्राक्करणात् स्वर्गादिप्राप्त्ययोग्याः पुरुषाः, क्रतवश्च स्वर्गकार्यायोग्याः। तदुभयीमप्ययोग्यतां व्युदस्य प्रधानैरङ्गैश्च योग्यतोपजन्यत इति अवश्यं सर्वेणाभ्युपगन्तव्यम्। असत्यां तस्यामकृतसमत्वप्रसङ्गात्। सैव च पुरुषगता क्रतुगता वा योग्यता शास्त्रेऽस्मिन्नपूर्वमित्युपदिश्यते" इति। (तं० वा० पृ० ३९४)।

वेद में स्वर्ग, पुत्र, पशु आदि फल साधन अनेक कर्म हैं। उन फलों की साधनता श्रुतिवाक्यों के द्वारा ही अवगत होती हैं। उन फलों के भोग के इच्छुक उन कर्मों का जब तक अनुष्ठान नहीं करते हैं, तब तक वह कर्तृत्व की उपलब्धि न करता है और उन फलों के भोग के योग्य ही होता है। इस कर्मनिष्ठ और पुरुषनिष्ठ अयोग्यता को दूर करने के लिए उन कर्मों का अपने अङ्गों के साथ अनुष्ठान करना चाहिए। इन कर्मों के अनुष्ठान करने पर भी क्षणिक होने के कारण बाद में होने वाले फल के प्रति वे साधन नहीं हो सकते हैं। क्योंकि, कार्य से अव्यवहित पूर्ववर्ती ही कारण होता है। स्वर्ण आदि जो कर्म के फल कहे गये हैं, वे अन्य जन्म में भोग्य हैं, अतः इसमें अनेक काल का व्यवधान अवश्यंभावी है। कर्म के अनुष्ठान के बाद ही पुत्र, पशु आदि उनके कार्य = फल की उत्पत्ति नहीं होती है। "चित्रया यजेत पशुकामः" "पुत्रकामः पुत्रेष्ट्या यजेत" आदि वचनसमूह सुने जाते हैं, अतः इनकी साधनता हो सके इसके लिए यत्न करना चाहिए। इसलिए फल की उत्पत्ति तक स्थिर रहने वाले जिस वस्तु विशेष की कल्पना की जाती है—वही अपूर्व है। अदृष्ट, शक्ति, अतिशय आदि इसी के अपर पर्याय हैं। यागादि क्रिया से उत्पन्न यह अपूर्व याग में आश्रित नहीं माना जा सकता है, क्योंकि आश्रयी के नाश के साथ ही इसका भी नाश हो जायेगा, अतः पुरुष में इसको आश्रित माना जाता है। मीमांसा में इसका विश्लेषण करते हुए लिखा गया है, सुख की इच्छा करता हुआ मनुष्य सुख के साधन का अन्वेषण करता है, अन्वेषण कर उसके सम्पादन के लिए प्रयत्नशील होकर उसके सभी व्यापारों का अनुष्ठान

अभ्यजयन्'। विश्वजिता विश्वमजयन्। इत्यादि विधिवाक्यों में उद्भिद्, बलभिद्, विश्वजित्, अभिजित् आदि पद क्रियायों के साथ अन्वित होकर ही फलवान् हो सकते हैं। इसमें यहाँ सन्देह होता है कि ये किस रूप में अर्थात् गुण के रूप में नामधेय

करता है। स्वर्गादि की कामना से अधिकारी पुरुष विशेष उसकी कामना करता है। यागादि की साधनता समझकर भी क्षणिक इस व्यापार से कालान्तर में होने वाले फल में विसंवाद की कल्पना कर उससे उत्पन्न व्यवहित काल में होने वाले फल पर्यन्त ठहरने वाले किसी पदार्थ की कल्पना कर उससे फल की प्राप्ति से विगत संशय हो जाता है। अतः, मीमांसा का मुख्यतम अवलम्बन अपूर्व है। इस अपूर्व को विहित कर्म के फल साधन के समान ही निषिद्ध कर्म के फल के साधन के रूप में नरकादि के जनक के रूप में कल्पना की जाती है। दोनों को ही अपूर्व शब्द से कहा जाता है। तन्त्रवार्त्तिक में कुमारिल ने कहा है—

शक्तिः कार्यानुमेयत्वात् यद् गतैवोपयुज्यते।
तद्गतैवाभ्युपेतव्या स्वाश्रयाऽन्याश्रयापि वा॥ (त० वा० पृ० ३९८)

आशय यह है कि जिस क्रम से अनुष्ठान होता है उसी क्रम से अपूर्व की उत्पत्ति होती है। अङ्गकर्मों के अनुष्ठान के अव्यवहित क्षण में ही उसके द्वारा यजमान की आत्मा में अपूर्व निष्पन्न होता है। इस प्रकार प्रधान याग से पूर्व में जितने अङ्गों का अनुष्ठान किया जाता है या जितने प्रधान कर्म के बाद अनुष्ठान किये जाते हैं, उतने अपूर्व उत्पन्न होते हैं। ये अङ्ग से उत्पन्न है, अतः अङ्गापूर्व कहे जाते हैं। इसी प्रकार प्रधान याग के अनुष्ठान से प्रधान से जो अपूर्व उत्पन्न होता है, उसको प्रधानापूर्व कहा जाता है इसे ही शास्त्र में उत्पत्त्यपूर्व भी कहा जाता है। ये सभी अपूर्व यजमान की आत्मा में समवेत होते है। अन्तिम अङ्ग के अनुष्ठान के बाद ये सभी अपूर्व मिलकर परमापूर्व स्वरूप अपूर्व का उत्पादन करते हैं। परम अपूर्व की उत्पत्ति के बाद अन्य सभी अपूर्व विनष्ट हो जाते हैं और यही परमापूर्व फल की उत्पत्ति तक रहता है और फल का उत्पादन कर विनष्ट हो जाता है। विजातीय फलों के उद्देश्य से अनुष्ठित कर्मों के द्वारा विजातीय फलों के उत्पादन की शक्ति से सम्पन्न अपूर्व उत्पन्न होते हैं, किन्तु इनके फल मे साङ्कर्य नहीं होता है। जैसे एक ही खेत में अनेक प्रकार के बीजों का साङ्कर्य नहीं होता है।

''शक्तयः सर्वभावानां नानुयोज्याः कथञ्चन''

अर्थात् भिन्न-भिन्न कर्मों से जन्य भिन्न-भिन्न फलों के उत्पादन से यजमान की आत्मा में समवेत फल मात्र से नाश्य अपूर्व है—यह मीमांसकों ने स्वीकार किया है।

के रूप में सम्बद्ध हैं, **यजेत** के साथ प्रयोग है। यागकरे यहाँ अर्थ भी व्यक्त है। उद्भिद् द्रव्य से याग करे इस रूप में अन्वय है, या उद्भिद् नाम के याग से यजन क्रिया करे। क्योंकि, सम्प्रदाय-परम्परा से प्रत्यक्ष वेदवाक्य के द्वारा लब्ध होने से ये निरर्थक नहीं हो सकते हैं, निरर्थक मानने पर अप्रामाण्य का प्रसङ्ग आयेगा। सम्पूर्ण वेदवाक्य का प्रामाण्य माना गया है। अतः ये भी प्रामाणिक हैं, अतः किस रूप में अन्वय है—यहाँ सन्देह उचित है। जहाँ विधि विहित कर्म में द्रव्य, देवता आदि का विधान होता है—उसका नाम गुण है। जिस वाक्य में वैसे द्रव्य देवता आदि जो विहित होते हैं—उसको गुणविधि कहा जाता है। अग्निहोत्र हवन करे 'अग्निहोत्रं' जुहोति' इस स्थल में दधि से हवन करे, 'दध्ना जुहोति' यहाँ गुणविधि का निर्देश है। अग्निहोत्र हवन के उद्देश्य से दही का द्रव्य रूप में गुण का विधान है। सामान्य रूप से इसका अनुष्ठान सम्भव न होने से याग-विशेष रूप विधि का विषय होता है।

नाम के विना विशेष निरूपित नहीं हो सकता है, अतः, याग का नाम भी आवश्यक होता है। याग के नाम को नामधेय कहा जाता है। प्रकृत में पूर्वोक्त वेदवाक्य गुणविधि हैं या नामधेय है—यही सन्देह है। पूर्व में ही निर्दिष्ट किया गया है कि उद्भिद् आदि का 'यजेत' क्रिया के साथ दो प्रकार से अन्वय हो सकता है। उद्भिद् नामक,द्रव्य के द्वारा याग निष्पन्न करे, 'उद्भिदा द्रव्येण यागमभिनिर्वर्त्तयेत्' इस रूप में अन्वय हो सकता है और नामविधि मानने पर उद्भिद् नाम के याग से अभिलषित फल की प्राप्ति करे, 'उद्भिदा यागेन इष्टं भावयेत्'—इस प्रकार अन्वय हो सकता है। ऐसी स्थिति में इसे गुणविधि की आशङ्का पूर्वपक्षी ने की है। क्योंकि, किसी विधि वाक्य की प्रशंसा की सूचना इससे न होने के कारण इसे अर्थवाद नहीं कहा जा सकता है। किसी अनुष्ठान योग्य कर्म के स्वरूप का प्रकाशन इससे नहीं हो रहा है, अतः, इसे मन्त्र भी नहीं कहा जा सकता है। मन्त्र और अर्थवाद न होने पर इसको विधि ही मानना पड़ेगा। क्योंकि विधि न मानने पर विफल होने से इसका अप्रामाण्य प्रसक्त होगा। मन्त्र, अर्थवाद और विधि को ही प्रयोजन समन्वित कहा गया है। विधि वाक्य होने पर भी उत्पत्ति विधि न होने से गुण विधि ही इसको मानना पड़ेगा। उत्पत्ति विधि उसे कहा जाता है जो वेद या शास्त्रवाक्य सर्वथा अज्ञान कर्म के विषय को कर्तव्य के रूप में बोधित करता है और जो अन्य वेदवाक्य से विहित कर्म में द्रव्य, देवता आदि के रूप में गुण का विधान करता है, वह उसकी गुण विधि है। प्रकृत में 'उद्भिदा यजेत' इस वाक्य में उद्भिद् आदि शब्द अन्य वेदवचन से विहित याग में उद्भिद् रूप गुण का विधान करता है—यह मानने पर शास्त्र की प्रसिद्धि के अनुसार दही से हवन करे 'दध्ना जुहेति' इसमें जैसे अन्य वचन से प्राप्त होम में दही रूप गुण का विधान होता है, उसी तरह यहाँ भी उद्भिद् रूप गुण का विधान होगा। जिसके द्वारा भूमि का उद्भेदन किया जाय वही उद्भिद् है इस व्युत्पत्ति के अनुसार

उद्भिद् शब्द का यौगिक अर्थ खनित्र होता है। इस स्थल में अन्य वचन से प्राप्त सभी फलों को देने वाले ज्योतिष्टोम नामक यज्ञ में पशु रूप फल के लिए खनित्र रूप गुण का विधान होता है, अतः, 'उद्भिदा यजेत पशुकामः' इत्यादि स्थल में उद्भिद् आदि शब्दों के द्वारा गुण का ही विधान करना उचित है, क्योकि इसी तरह इसका उपयोग हो सकता है, अन्यथा नहीं। इसका प्रयोजन प्रदर्शन न किया जाय तो समग्र वेद को पुरुषार्थ साधक नहीं कहा जा सकता है, क्योंकि, ये निरर्थक है। यह पूर्व पक्ष है।

वार्तिककार ने कहा है कि यह सूत्र स्वतन्त्र एक अधिकरण है, सम्पूर्ण प्रथम अध्याय में प्रामाण्य का ही विचार किया गया है, इसलिए यदि गुणविधि या नामधेय का विचार करने पर इस अधिकरण की अध्याय के साथ सङ्गति नहीं हो सकती है। इसलिए इस सूत्र में उद्भिद् आदि यह धर्म में प्रमाण है या अप्रमाण—इसी का विचार है। इनमें सिद्धान्त रूप में "उद्भिदा यजेत" आदि वाक्यों को विधि के अन्तर्गत मानकर उद्भिदा आदि पद विधि वाक्य में फल साधन करण है। याग के साथ सामानाधिकरण्य अर्थात् नामधेय रूप में ही यह अन्वित होता है, अत एव उद्भिदा, बलभिदा, विश्वाजिता आदि पद धर्म में प्रमाण है। इस पक्ष में सूत्र का अर्थ यह होगा- उक्तं समाम्नायैदमर्थ्यम् = समाम्नाय का वेद का ऐदमर्थ्यं = धर्मप्रतिपादन ही प्रयोजन है, क्योंकि ऐसा न होने पर स्वाध्यायविधि उपपन्न नहीं होगी। तस्मात् = इस कारण से सर्वम् = उद्भिदा आदि सभी पद समूह, तदर्थं स्यात् = धर्मप्रतिपादन रूप प्रयोजन के लिए हैं।

सामानाधिकरण्य से तात्पर्य उद्भिद् का साक्षात् यजन में सम्बन्ध सूत्रार्थः—उक्तम् = कहा गया है। समाम्नायैदमर्थ्यम् = समाम्नाय का = वेद का ऐदमर्थ्यम् = प्रयोजन। इदम् = यह अर्थ = प्रयोजन जिसका है, वह इदमर्थ हुआ, उसका भाव ऐदमर्थ्य = यह प्रयोजन। तस्मात् = इस कारण से, सर्वम् = सभी वैदिक पदों को प्रयोजनवान् कहने के कारण, विधिवाक्य में स्थित सभी पद न सभी प्रयोजनों के द्वारा सार्थक होंगे, अन्यथा वेदवचन की अनर्थकता होने लगेगी ॥ १ ॥

अपि वा नामधेयं स्याद् यदुत्पत्तावपूर्व-

मविधायकत्वात् ॥२॥ सि० ॥

शा० भा०—अपि वेति[1] पक्षो विप[2]रिवर्तते। नामधेयं स्यादिति प्रतिजानीमहे। एवमविहितमर्थं विधास्यति ज्योतिष्टोमाद् यागान्तरम्। श्रुतिश्चैवं यागमभिधास्यति।

इतरथा श्रुतिरुद्भिदादीन्वक्ष्यन्ती उद्भिदादिमतो लक्षयेत्—उद्भिद्वता यागेन कुर्यादिति। यागेन कुर्यादिति यजेतेत्यस्यार्थः[3]। करणं हि यागः, उद्भि-

१. ब. तु। २. ब. व्यावर्तते। ३. ब. यजेतेत्यस्य शब्दस्यार्थः।

दाद्यपि तृतीयानिर्देशात् करणम् । तत्रोद्भिदा यागेनेति कर्मनामधेयत्वेन[1] सामानाधिकरण्यसामञ्जस्यम् । द्रव्यवचनत्वे मत्वर्थलक्षणया सामानाधिकरण्यं[2] स्यात् । श्रुतिलक्षणाविषये च श्रुतिर्ज्यायसी । तस्मात् कर्मनामधेयम् ।

ननु प्रसिद्धं द्रव्यवचनत्वमपह्नूयेत, अप्रसिद्धं कर्मवचनत्वं प्रतिज्ञायेत । उच्यते । तृतीयानिर्देशात्कर्मवचनता । कुतः ? करणवाचिनो हि प्रातिपदिकात् तृतीया भवति । करणं च यागः । तेन यागवचननिममनुमास्यामहे ।

नैतद्युक्तम् । यदि तृतीयानिर्देशे सत्युद्भिदादिभ्यः शब्देभ्यो यागे बुद्धिरुत्पद्येत, स्तादेतदेवम् । न हि नो बुद्धिरुत्पद्यते । तस्मादयुक्तम् । तृतीयावचनमन्यथा नोपपद्यत इति चेत् ? मोपपादि । न जातुचिदनवगम्यमानेऽपि यागवचनो भविष्यति । तस्माद् गुणविधयः । लक्षणेति चेत् ? वरं लक्षणा कल्पिता, न यागाभिधानम् । लौकिकी हि लक्षणा । हठोऽप्रसिद्धकल्पनेति ।

अपि च यदि नामधेयं विधीयते, न यागः । अथ यागो न नामधेयम् । उभयविधाने ह्युद्भिदादयः । कुतः प्राप्तिरिति चेत् ? ततोऽभिधीयते उच्छब्दसामर्थ्याद् भिच्छब्दसामर्थ्याच्चोद्भिच्छब्दः क्रियावचनः । उद्भेदनं=प्रकाशनं पशूनामनेन क्रियत इत्युद्भिद् यागः । एवमाभिमुख्येन जयादभिजित्, विश्वजयाद् विश्वजित् । एवं सर्वत्र । अतः कर्मनानधेयम् ।

यत्त्वप्रवृत्तिविशेषकरोऽनर्थक इति नामधेयमपि गुणफलोपबन्धेनार्थवत् । तस्मात् कर्मनामधेयान्येवंजातीयकानीति सिद्धम् ॥ २ ॥ सिद्धम् ॥

इति प्रथममधिकरणम् ।

भा० वि०—ननु नामधेयत्वपक्षसंभवेऽपि कथं स एवेति नियम इत्याशंक्य—**यदपूर्वमिति** । पदद्वयं व्याचष्टे **एवमिति** । नामधेयत्वे हि सत्युद्भित्पदं ज्योतिष्टोमयागाद्यागान्तरमविहितं विधास्यति, इतरथा विहिते कर्मणि गुणमात्रविधिः स्यात्, स च विशिष्टविहितकर्मस्वरूपमात्रानुवादानुपपत्तेरयुक्त इति भावः । अत्रैवमित्यनेन यच्छब्दो यस्मादर्थे व्याख्यातः अविहितमित्यनेनानापूर्वपदं वाक्यान्तरानधिगते व्याख्यातम् । इदानीमस्तु तर्हि गुणविशिष्टकर्मान्तरविधानार्थमितिशङ्कानिरासार्थमुत्पत्ताविति पदं यच्छब्दावृत्त्या यस्मादुत्पत्तौ विधास्यतीति व्याकुर्वन् नामधेयत्वे हेत्वन्तरमाह—**श्रुतिश्चेति** । उद्भित्पदश्रुतिः नामधेयत्वे यागमभिधास्यति-मुख्यवृत्त्यैव प्रतिपादयिष्यतीत्यर्थः । उत्पत्तिशब्दोऽपि च प्रथमभावविकारवचनः प्राथम्यगुणयोगेन शब्दवृत्तिषु प्रथमभूतश्रुतिवचन इति भावः । गुणविधित्वे तद्व्यतिरेकमाह—**इतरथेति** । विधानाय खनित्रादीन्

---

१. ब. कर्मनामधेयत्वे सामा । २. ब. करण्येन ।

वक्ष्यति—यजिसामानाधिकरण्यार्थं च तद्वतो यागानुद्भिद्वता यागेनेति लक्षयेत्, इत्युद्भित्पदस्य मुख्यलक्षणावृत्तिद्वयप्रसङ्गः, यागस्य च लक्ष्यत्वप्रसङ्ग इत्यर्थः। एवं प्रातिपदिकसामर्थ्यान्नामधेयत्वमभिधाय विभक्तिसामर्थ्यादप्येवमिति वक्तुमाख्यातपदार्थं तावदाह—**यागेनेति**।

ननु पूर्वपक्षे यागमुद्भित्पदेति संबन्धः, न तु यागेन कुर्यात् इति, तत्राह—**करणं हीति**। अपूर्वसाधनत्वेनान्यतः प्राप्तमनूद्य गुणविधाने प्राप्त्यनुसारेण यागेन कुर्यादित्येवानुवादः स्यादित्याशयः। अस्तु करणत्वेन प्राप्तस्यानुवादादिहापि करणत्वं यागस्य। उद्भिदर्थस्य तु किमायातम्। अत आह—**उद्भिदपीति**। ततः किमत आह—**तत्रेति**। भिन्नार्थयोरुद्भिद्यागपदयोरेकार्थवृत्तित्वलक्षणसामानाधिकरण्यानुपपत्तेः यागनामत्वमेवोद्भित्पदस्य सामानाधिकरण्यसामञ्जस्यायाप्युपेतव्यमित्यर्थः।

ननु द्रव्यवाचित्वेऽप्युद्भिद्वता यागेनेति स्यादेव सामानाधिकरण्यमित्याशङ्क्य लक्षणापत्तेः मैवमित्याह—**द्रव्यवचनत्व इति**।

ननु लक्षणापि शब्दवृत्तिरेव, तत्राह—**श्रुतीति**। यस्मात्कर्मनामधेयत्व एव तृतीयावगतकरणत्वोपपत्तिः, तस्मादित्युपसंहरति—**तस्मादिति**।

ननु नामधेयत्वेऽपि नैव प्रमाणमवयवप्रसिद्धमूर्ध्वविदारणसमर्थद्रव्यवचनत्वमपह्नुत्या प्रसिद्धं कर्मार्थत्वमभ्युपगम्येतेति चोदयति—**नन्विति**। सामानाधिकरण्यं तु 'व्रीहिभिर्यजेत' 'सोमेन यजेत' इत्यादाविवाकर्मनामत्वेऽपि सम्भवतीति न प्रमाणमितिभावः। पिकः कोकिल इत्यादौ प्रसिद्धार्थपदसामानाधिकरण्येनाप्रसिद्धार्थनिर्णयदर्शनाद् व्रीह्यादिवच्च बलवद्बाधकविपरीतप्रत्ययाभावात् तृतीयानिर्देशोऽत्र कर्मनामत्वे प्रमाणमेवेति परिहरति—**उच्यत इति**। कथमुद्भित्प्रातिपदिकस्य तृतीयान्तत्वमात्रेण कर्मनामत्वमिति चोदयति-**कुत इति**। उत्तरमाह—**करणवाचिन इति**। करणत्वं नाम क्रियोत्पादनसामर्थ्यम्, तदाश्रयोऽत्र लक्षणया करणमभिप्रेतम्। प्रातिपदिकस्य करणवाचित्वानभ्युपगमात्, ततः किमित्यत आह—**करणं चेति**। यागस्य हि भावार्थाधिकरणन्यायेनास्मिन् वाक्ये करणत्वमवगतम्, तत्र यद्युद्भित्पदमपि तृतीयान्तं यागवाचकं तदा सामानाधिकरण्ये नैकवाक्यतां यास्यति नेतरथेति, तस्यापि यागार्थत्वमनुमास्याम इत्यर्थः, प्रत्यक्षबाधितत्वान्नेदमनुमानं युक्तमिति चोदयति—**नैतद्युक्तमिति**। तृतीयानिर्देशेऽपि द्रव्यवाचित्वानुभवात् कर्मवाचित्वानुभवाच्चायुक्तं तृतीयया कर्माभिधायित्ववचनमित्यर्थः, यागवाचित्वाभावे करणभूतयागपदैकवाक्यत्वविशिष्टतृतीयान्तता नोपपद्यत इति चोदयति—**अन्यथेति**। अन्यथानुपपत्तिमात्रेणानवगम्यमानं यागवचनत्वं न शक्यं कल्पयितुमिति परिहरति—**काममिति**।

उपपत्तिश्च सोमेनेत्यादाविव कल्पनीयेति भावः, यागवचनत्वाभावफलमाह—**तस्मादिति**। गुणविधित्वेऽपि मत्वर्थलक्षणादोषोऽस्त्येवेति सिद्धान्त्याह—**लक्षणेति चेदिति**। पूर्वपक्षी दूषयति—**वरमिति**। कथं लक्षणाया एव वरत्वं नाभिधानकल्पनायास्तत्राह—**लौकिकी हीति**। लोकप्रसिद्धेति यावत्। हठः—स्वच्छन्दव्यवहारः। स्वबुद्धिमात्रप्रभवाभिधानकल्पनेति यावत्।

ननूद्भिच्छब्दस्य यागनामत्वं लोकाप्रसिद्धमप्यनेनैव विधीयतामत आह—**अपि चेति याग न इति**। विधीयेतेत्यनुषङ्गः, अतश्च नामिनोऽप्रसिद्धत्वान्नामधेयत्वविधानासम्भव इति भावः। यागेन पशून् भावयेत् तस्य च यागस्य चोद्भिदिति संज्ञेत्युभयविधानेऽर्थभेदाद्वाक्यभेदः स्यादित्याह–**उभयविधान इति**।

अत्र नैतद्युक्तमित्यादिनाऽप्रसिद्धकल्पनेत्यन्तेन यत्प्रत्यक्षविरुद्धाप्रसिद्धार्थकल्पनं दूषणमुक्तम् तदविधायकत्वादिति सूत्रावयवं व्याकुर्वन् परिहरति—**न नामधेयमिति**। नोद्भिच्छब्दस्याप्रसिद्धमेव यागनामत्वं करणभूतयागैकवाक्यत्वविशिष्टतृतीयान्तत्वेन ज्ञाप्यते, येन प्रत्यक्षविरोधः स्यादित्यर्थः। किं तर्हि क्रियत इत्यत आह—**अनुवादा हीति**। अनूद्यन्त इत्यनुवादाः। अन्यतः प्राप्तमुद्भिदादीनां कर्मनामत्वमनुवाद्यम्, अतस्तदनूद्य द्रव्यकर्मवाचित्वसन्देहनिरासमात्रं सामानाधिकरण्येन क्रियत इत्यर्थः।

ननूद्भिदादिशब्दस्य लोके कर्मण्यप्रयोगात् कुतः प्राप्तिरित्याह—**कुत इति**। समुदायप्रसिद्ध्यभावेऽपि अवयवप्रसिद्धिमुपपादयन् परिहरति—**तत इति**। चकारः क्विप्प्रत्ययसामर्थ्यं समुच्चयार्थः।

ननु यागक्रियायाः खनित्रादिवद्विदारणकर्तृत्वाभावात् कथमुद्भित्पदाभिधेयत्वमत आह—**उद्भेदनमिति**। विदारणस्य क्वचिदवस्थितवस्तुप्रकाशनार्थत्वदर्शनेनोपचारादुद्भिच्छब्दः पशुप्रकाशककर्मणि प्रयुक्त इत्यर्थः। न चैवं ज्योतिष्टोमादीनामपि फलप्रकाशकत्वात् उद्भिच्छब्दता, यत्रायमुद्भिच्छब्दो वेदे प्रयुक्तस्तत्रैवास्य क्विप्प्रत्ययान्तस्य साधुत्वाभ्युपगमात् यथा डो प्रत्ययान्तस्य गमनकर्तृवाचिनो गोशब्दस्य सास्नादिमति प्रयुक्तस्य तत्रैव साधुत्वमितिभावः। अवशिष्टयोरप्यवयवप्रसिद्ध्या नामत्वप्राप्तिमाह—**एवमिति**। बलभिदादिष्वपि प्रसिद्धिप्रकारमतिदिशति—**एवं सर्वत्रेति**। यस्मादवयवप्रसिद्धिः कर्मण्यपि संभवति तस्मात्सामानाधिकरण्येन कर्मनामधेयत्वं निश्चीयत इति उपसंहरति—**तस्मादिति**। एवं तावदप्रसिद्धिकल्पना निराकृता। अथ यदुक्तोऽपि चेत्यादिनोभयविधाने वाक्यं भिद्येतेत्यन्तेन तदुत्तरत्वेनापि न नामधेयमित्यादि भाष्यमावृत्त्या योजयितव्यम्। तत्र हि यदि यागेन पशून् भावयेत्, स च याग उद्भित्संज्ञक इति साध्यसाधनसंबन्धसंज्ञासंज्ञिसंबन्धरूपौ द्वावर्थौ विधीयेयातां, ततो वाक्यभेदः

स्यात्, न त्वेतदस्तिसंज्ञासंज्ञिसंबन्धस्यान्यतः प्राप्तत्वेनानूद्यमानत्वादित्युक्तमुद्भिदादय इत्यन्तेन। अनुवाद्यस्य सामानाधिकरण्यानुगृहीतावयवप्रसिद्ध्या प्राप्तिः कुतः इत्यादिना प्रतिपाद्यते। वाक्यभेदाभावफलं तस्मादित्यादिनेति विवेक्तव्यम्।

एवं कर्मण्यप्रसिद्धिनिरासेन नामधेयत्वं व्युत्पाद्य, नामधेयत्वे परोक्तमप्रवृत्तिविशेषकरत्वेनानर्थक्यमनुवदति—**यत्त्विति**। विधायकादिप्रवृत्तिविशेषकरत्वं दर्शयन् दूषयति—**नामधेयमिति**। 'समे दर्शपूर्णमासाभ्यां यजेते'ति गुणोपबन्धः, दर्शपूर्णमासाभ्यां स्वर्गकाम इति फलोपबन्धः। कर्मणि गुणफलोपबन्धविधानाय कर्मस्वरूपाभिधानार्थमर्थवदित्यर्थः। यद्यप्युद्भित्पदं न गुणफलोपबन्धविधानार्थम्, किन्तु प्रकृतज्योतिष्टोमादस्य यागान्तरत्वं तत्रैव फलविधिशङ्कानिरासाय दर्शयितुं तथाप्येवमविहितमिति भाष्येणास्यार्थस्य दर्शितत्वात् नामधेयान्तरप्रयोजनमत्रोक्तमिति वेदितव्यम्। अधिकरणार्थमुपसंहरति—**तस्मादिति**। एवंजातीयकानि यौगिकत्वे सति धातुसामानाधिकरण्येन निर्दिष्टानीत्यर्थः ॥ २ ॥

इत्युद्भिदधिकरणम्।

त० वा०—यत् उत्पत्तौ=प्रथमज्ञानेऽर्थान्तरपूर्वकत्वेनैकान्ततो न प्रसिद्धमुद्भिदादि तत् वैदिकव्यवहारे प्रथमोपनिपातात्सामानाधिकरण्येन नामधेयं स्यात्।

अथवैवमपूर्वं कर्म विदधदर्थवद्भविष्यति।

अथ वा कस्य नामधेयमिति सन्देहे अभिधीयते। यस्योत्पत्तावपूर्वं निष्पद्यते। यागस्येत्यर्थः। किं कारणम्—

गुणो विधीयमानो हि फले कर्मणि वा भवेत्।
विशिष्टविधिबुद्ध्या वा सर्वथा च न युज्यते ॥

फलं प्रति तावद्विधीयमाने परपदसम्बन्धविधानम्, व्यवहितकल्पना, धातोः पारार्थ्यम्, औत्पत्तिकसोमबाधः, अनदनीयेन खनित्रादिनाऽत्यन्ताप्रसिद्धेन याग इति दोषः।

तथा यागं प्रति गुणविधौ फलपदानर्थक्यम्, सार्वकाम्यप्राप्तज्योतिष्टोमविशेषणत्वे वाक्यभेदः, प्रत्ययव्यापारविप्रकृष्टता, धातुपारार्थ्यानदनीययागसोमबाध-विकल्पाश्चात्यन्तायुक्ताः।

तथा विशिष्टविधौ सर्वपारार्थ्यम्, अनेकविधिशक्तिकल्पना, मत्वर्थलक्षणा, गम्यमानसामानाधिकरण्यत्यागः, अनदनीययागश्चेति दोषाः। तस्मान्न गुणविधिः। तद्दर्शयति—**इतरथा श्रुतिरुद्भिदादीन् वक्ष्यति, तद्वतो लक्षयेत्**।

वक्ष्यन्ती लक्षयेत् इति वा ग्रन्थः। प्रातिपदिकसामर्थ्यमुक्त्वा विभक्तिसम्बन्धादप्येतदेवावगम्यत इति दर्शयति—**यागेन कुर्याद्** इत्यादिना।

किं च—

विधाने चानुवादे च यागः करणमिष्यते।
तत्समीपे तृतीयान्तस्तद्वाचित्वं न मुञ्चति॥

यत्करणाभिधायिन्या तृतीयया इत्येवमादिषु कारकाणां विभक्त्यर्थत्वाभ्युपगमात्कथं **करणवाचिनो हि प्रातिपदिकादित्युच्यते**। नैष दोषः। करणाश्रयवाचिनो हीत्यभिप्रायः।

अथ वा करणशब्दो यादृशमर्थं ब्रवीति, तादृशस्य प्रातिपदिकं वाचकमेव। कृदन्तेन हि कारकविशिष्टं द्रव्यमेवोच्यते, न विभक्तिवन्निष्कृष्टा शक्तिः। तथा च कारकं करणेन करणायेति च कारकान्तरयोगो दृश्यते। अन्यथा हि विभक्त्यभिहितेनैवैकेन कारकेन वशीकारान्न द्रव्यं कारकान्तरयोगं प्रतिपद्येत। शक्तेस्तु शक्त्यन्तरं नास्त्येव। तस्माच्छक्त्युपसर्जनद्रव्यवचनत्वात्कृदन्तानामुपपन्नं करणशब्दार्थवाचित्वं प्रातिपदिकस्य। तेनैतदुक्तं भवति। यदस्मिन् वाक्ये करणम्; तद्वाचिनः प्रातिपदिकात्तृतीययोत्पत्तव्यम्, यागश्चात्र फलभावनायाः करणम्, द्रव्यमिति वक्ष्यति। ततश्च यद्युद्भित्पदं यागवचनमेवं तृतीयान्तं सदेकवाक्यतां यास्यति, अर्थान्तरवचनत्वे[1] त्वसम्बद्धं स्यात्।

ननु च—

प्रत्यक्षं द्रव्यवाचित्वमुपन्यस्तं कथं पुनः।
करणत्वानुमानेन बाध्यते व्रीहिसोमवत्॥

यथैव 'व्रीहिभिर्यजेत, सोमेन यजेत' इत्यादीनां करणभूतयागैकवाक्यत्वे सति तृतीयान्तत्वं वैयधिकरण्येऽप्यविरुद्धमेवमिहापीति। **हठ इति**। चिरन्तनतडागोदकाच्छादितहारितद्रव्यमुच्यते। यथा तदुत्सार्यमाणमपि स्वच्छन्दतः पुनः-पुनरुदकं छादयति, एवं योऽन्योऽपि स्वच्छन्दव्यवहारः स हठ इति प्रसिद्धः।

दृष्टान्त-दार्ष्टान्तिकयोर्वैषम्यमुखेनोद्भिच्छब्दस्य नामत्वम्

तदुच्यते—

पदमज्ञातसंदिग्धं[2] प्रसिद्धैरपृथक्श्रुति।
निर्णीयते निरूढं तु न स्वार्थादपनीयते॥

व्रीह्यादयो ह्यत्यन्तरूढाः ते स्वार्थमपरित्यजन्तः सामानधिकरण्यमप्रतिपद्यमाना गत्यन्तराभावाद् गुणविधयो विज्ञायन्ते। ये पुनरुद्भिदादयो यौगिकाः तेषां

---

१ क. (टिप्पण्यां) विषयत्वे। २ क. संबन्धं।

येनैव प्रकारेण यत्नेन द्रव्यवचनत्वम्, तेनैव कर्मवचनत्वमप्युपपद्यत इति प्रत्यक्षप्रसिद्धावनुदासीनायामनुमानेनाप्यज्ञानसंशयव्युदासकरणं न दुष्यति । सर्वशब्दार्थावधारणे ह्ययमभ्युपायो—यत्प्रसिद्धपदसामानाधिकरण्यं नाम । प्रधानं च करणत्वं यागे लब्धात्मकं शक्नोति प्रातिपदिकमात्मविषयमापादयितुम् ।

किं च—

विभक्त्यर्थानुवादाच्च विधेः स्यान्नाम्नि लाघवम् ।
गुणपक्षे विधेयत्वं संख्याकारकयोरपि ॥

गुणविधौ गौरवं, लाघवं नामत्वे इति कथनम्

त्वत्पक्षे ह्यवश्यं काचिद्विभक्त्यर्थेऽपि प्रत्ययस्य विधिशक्तिः कल्प्या स्यात् । तस्मादवयवद्वारेणाऽस्ति कर्मण्यपि प्रसिद्धिः ज्योतिष्टोमादेरपि स्वफलोद्भेदनकारित्वादेतन्नामप्रसङ्ग इति चेत् ? न । सामानाधिकरण्यावधारितविषयविशेषस्यावयवान्वाख्यानात् । न चास्य ज्योतिष्टोमादिभिः समभिव्याहारोऽस्ति ।

अथ वाऽर्थापत्तिवशेनैतद्विशेषविषयमेवोद्भेदनं निमित्तम् । न चान्यत्र तदस्तीति व्यवस्था । यथा सास्नादिमद्गतगमनविशेषनिमित्तत्वं[1] गोशब्दस्य । **अविधायकत्वादित्यस्य व्याख्या न नामधेयं विधायिष्यत** इति संज्ञासंज्ञिसंबन्धरूपेण 'वृद्धिरादैच्' (पा० सू० १।१।१) इत्यादिवदविधानम्, सामानाधिकरण्यावयवप्रसिद्धिभ्यां तत्सिद्धेः । न तु नामधेयार्थो न विधीयते, तदधीनत्वाद्यागविशेषसिद्धेः । इह हि यद्यपि संज्ञासंज्ञिसामानाधिकरण्यं नास्ति, तथाऽप्यात्मरूपव्यवच्छिन्नमेवार्थं गमयतीति विशेषणविशेष्यभावान्न भिद्यते ।

नन्वेवं शब्दस्वरूपाभिधानं प्रसज्येत । प्रत्यक्षावगतस्वरूपविशिष्टार्थाभिधानादप्रसङ्गः । सर्वत्र ह्यगृहीतविशेषणा विशिष्टबुद्धिर्न दृष्टा, न त्वनभिहितविशेषणा । न चैतावता शब्दस्वरूपारोपप्रसङ्गः । तदनुरोधेन विद्यमानर्थांशिविशेषोद्धरणादित्युक्तं प्राक् । नाम्नैव चैवमादीनां प्रकृतितो भेदः अन्यथा हि तदनवच्छिन्नो यजिर्गुणफलाद्यर्थं पुनः श्रुतिः प्रकृतिगामित्वान्नैव कर्म भिन्द्यात् ।

अथ वा सर्वनामधेयेषु किंचिदर्थगतमपि विशेषणमस्तीत्यरुणैकहायन्यादिवदेव विशेषणविशेष्यता । न च यज्युच्चारणमन्तरेणाऽस्य यागविशेषनामत्वमिति, न सामान्यस्यानर्थकत्वम् । परस्परसंनिधानेन हि नामापि यागविषयम्, यागोऽप्येतदवच्छिन्नः, न सामान्यमात्रं प्रकृतो वेति लभ्यते । तस्मादुभयोरर्थवत्ता, विशिष्टभावनाविधा[2]नाच्चोभयोरपि[3] विधानमिति, नानुवादत्वम् ।

---

१. निमित्तत्वात् । २ क. विधिना (टिप्पण्यां) ।
३. क. (टिप्पण्यां) विशिष्टविधिना चोभयो ।

नाम्नां पूर्वपक्षेऽन्तर्भावं सिद्धान्ते विध्यादिभेदं वदतां केषाञ्चिन्मतनिरासः

एवं च सति न नामत्वं विधित्वमात्रप्रतियोगीति, ये पूर्वपक्षे विध्यन्तर्भावम्, सिद्धान्ते तु विध्यर्थवादमन्त्रातिरेकं नाम्नां वर्णयन्ति, तेषामयुक्तमेव। अशेष[1]-व्यवहाराङ्गभावाच्च[2] नाप्रवृत्तिविशेषकरता। नह्यृत्विग्वरणादिष्वनेनाहम् यक्ष्य इति लघुराख्यानोपायः स्यात्। दर्शपूर्णमासावारप्स्यमानः, समे[3] दर्शपूर्णमासाभ्याम् इति गुणोपबन्धेः, 'दर्शपूर्णमासाभ्यां स्वर्गकाम' इति च फलोपबन्धोऽन्यथा न स्यात्। तस्मान्नामधेयान्येवं जातीयकानीति सिद्धम्॥ २॥

इत्युद्भिदधिकरणम्

न्या० सु०—पूर्वसूत्रे श्रुत्याऽर्थाद्वा गुणविधित्वस्यानुक्तत्वादशाब्दस्य च शाब्दनिराकरणानन्वयात्तन्निरासार्थोऽपि वा शब्दासामञ्जस्यं व्याख्योपेक्षया सूचितम्। भाष्यकृता त्वाकृत्यधिकरणाद्यसूत्रवन्नामधेयाधिकरणसिद्धान्ताभिधानार्थस्यापि सूत्रस्यावृत्त्या ततश्चान्यथाक्रियार्थत्वासम्भवात्पारिशेष्याद् गुणविधिरित्यध्याहारेणैतदधिकरणपूर्वपक्षेऽपि योजना शक्येति मत्वा तन्निरासार्थत्वेनापि वाशब्दो व्याख्यातः। यथा सर्वमुद्भिच्चित्रादिनामधेयमपि क्रियार्थं स्यादित्युक्ते नामधेयस्य विध्युद्देशान्तर्गतत्वेन श्रुतिस्मृत्यर्थत्वायोगात्

---

१ क. विशेषः।

२. नामधेयस्य भाष्यकारोक्तं गुणनफलोपबन्धेनार्थवत्वं प्रयोजनान्तरोपलक्षणार्थमित्याह—

अशेषेति। कानि प्रयोजनान्तराणीति चेत्। "संज्ञायाः कर्मभेत्तृत्वं द्वितीये यद्वदिष्यते।
यच्चेष्टौ यागषट्कस्य फलवत्त्वं वदिष्यते।
सोमयागस्य च ज्योतिष्टोमेऽध्याये चतुर्थके॥
यश्चाग्निहोत्रधर्माणां प्रदेशः कौण्डपायिने।
सप्तमे वक्ष्यते सर्वं तन्नाम्नां फलमिष्यते॥
वाक्यान्तरोत्पादिते च कर्मण्यङ्गं विधीयते।
फलं वा यत्र तत्रास्मान्नर्ते कर्म विशेषधीः॥
द्रव्यदैवतशून्यायां यागोत्पत्तौ च नामतः।
विना निर्धारणाभावाद्विशेषस्याविधेयता॥
धर्मप्रमोपयोगित्वमप्यस्येत्थं च सिध्यति।
यागेनानेन यक्ष्येऽहं तेन याजय मामिति॥
नाम्ना विनैवमादिश्च व्यवहारो न सिध्यति।
मीमांसाविधिवाक्यार्थज्ञानानुष्ठानलक्षणे॥
त्रिविधे व्यवहारेऽस्मिन् सर्वस्मिन्नाम कारणम्" इत्येवं प्रदर्शितान्यनुसंधेयानि।

३ क. समे।

प्रवृत्तिविशेषकरत्वाभावेन च विध्युद्देशेऽनुपयोगादानर्थक्यं स्यदित्याशङ्कामुपस्थितां निराकर्त्तुम् अपि वा नामधेयं स्यादिति सूत्रावयवः । शेषं तु यौगिकानां कर्मसामानाधिकरण्यनिर्दिष्टानां गुणविधिनामधेयत्वविचारे सिद्धान्ताभिधानार्थमिति व्याख्येयम् । एतदेव व्याख्यानमभिप्रेत्य यदा तदर्थत्रयान्यतमार्थमिति स्थितम् । तथा विचार इत्याधिकरणशेषभूतं विचारान्तरं कृतम् । आद्याधिकरणशेषत्वाच्चास्य विचारस्य द्वयोरधिकरणयोरित्यविरुद्धम् । तस्मान्नामधेयमपि क्रियार्थमेव स्यादिति, पूर्वसूत्रगततदर्थशब्दानुषङ्गेणैवशब्दार्थे वाशब्दाङ्गीकारेण चाद्याधिकरणशेषतया व्याख्यानस्य स्पष्टत्वात् एतदधिकरणशेषत्वाभावाच्चाव्याख्यानमिति सर्वं समञ्जसम्, यदुत्पत्तावपूर्वमिति सूत्रावयवमधिकरणविषयाऽभिधानार्थतया तावत्स्वयं व्याचष्टे **यदुत्पत्ताविती**ति । प्रथमेत्यनेनोत्पत्तिशब्दस्य सामानाधिकरण्यप्राग्भाववाचितया व्याख्यानाद्व्यधिकरणनिर्दिष्टेष्वग्निहोत्रादिशब्देषु तत्प्राग्भावविशेषणानर्थक्यात् अग्निहोत्रादिशब्दव्यावर्त्तकत्वं सूचितम् । अर्थान्तरेत्यनेनापूर्वशब्दस्यार्थान्तरनिरूढचित्रादिशब्दव्यावर्त्तकत्वं सूचितम् । समानाधिकरण्यात् प्रागर्थविशेषाऽनिश्चयोक्त्या सामानाधिकण्यस्य नामधेयत्वनिश्चायकत्वं सूचितमिति दर्शयितुम्—**सामानाधिकरण्यादित्युक्तम्** ।

भाष्यकृता तु यस्माच्छब्दार्थे यदित्यव्ययमभिप्रेत्यापूर्वशब्दो नामधेयत्वहेतुप्रतिपादनार्थत्वेनैवमिति भाष्येण व्याख्यातः तदनुसन्धत्ते—**अथ वेति** । नामधेयत्वस्य सामानाधिकरण्येनैव यागविषयत्वनिश्चयात्तदनाश्रयणे वा नामधेयत्वस्यैवायोगाद् द्रव्यनामत्वे च द्रव्यस्य विधेयत्वापत्तेर्गुणविधिप्रतियोगिनो नामधेयशब्दस्य प्रधानकर्मनामधेयविषयत्वावगमात्कस्य नामधेयमिति सन्देहानुपपत्तेरपूर्वनिष्पादकत्वस्य च नामधेयनिमित्तत्वाभावाद्धोमादिसाधारण्याच्चोपलक्षणत्वानुपपत्तेरनभिमतमपि व्याख्यानन्तरं विशदार्थमाह—**अथ वेति** ।

अविधायकत्वादिति सूत्रावयवं स्वव्याख्याने हेत्वभिधानार्थत्वेनावतारणपूर्वकं व्याचष्टे—**किं कारणमिति** । नामधेयत्वे प्रतिज्ञाते गुणविधित्वनिराकरणहेत्वभिधानेनाद्याधिकरणसिद्धं नामधेयत्वानां सर्वेषां गुणविधिमात्रशङ्कानिराकरणार्थान्युत्तराधिकरणानीति सूचितम् ।

कथं न युज्यत इत्यपेक्षायां फले तावद् गुणविधौ पञ्चदोषानाह—**फलमिति** । यजिपरेणाख्यातेनोद्भिदा पशून्भावयेदिति परपदयोः सम्बन्धविधानम् । उद्भिदा यजेत पशुकाम इति च व्यवधानेनाम्नातयोः सम्बन्धकल्पना, धातोर्विध्यनुपयोगित्वेन प्रत्ययानुग्रहमात्रार्थत्वात् पारार्थ्यम्, काम्यत्वाच्च नित्यस्य सोमेन यजेतेत्युत्पत्तिवाक्यविशिष्टस्य सोमस्य बाधः, कुशरादिवच्च यागसाधनत्वेनाप्रसिद्धेनाभक्षेण याग इत्यर्थः । ज्योतिष्टोममात्रे गुणविधौ फलपदानर्थक्यं सोमेन सह विकल्प इति द्वौ दोषौ । फलविशिष्टे तु ज्योतिष्टोमे गुणविधौ वाक्यभेदः, सामान्यशिष्टस्य च सोमस्य विशेषशिष्टेन खनित्रादिना बाध इति द्वौ दोषौ परपदार्थविधानात् प्रत्ययव्यापारस्य विप्रकर्षः ।

धात्वर्थे च गुणविधानात् धातोः पारार्थ्यं अभक्ष्येण च याग इति दोषत्रयम् द्वयोस्तुल्यमिति द्वेधा यागे गुणविधिं विकल्प्य पञ्चदोषनाह—**तथेति**। विशिष्टविधावपि विशिष्टस्यापदार्थत्वेन सर्वेषां नामधात्वाख्यातानां तत्समर्पणार्थत्वात् पारार्थ्यं विशेषणविधिं च विना विशिष्टविध्ययोगादनेकविधिशक्तिकल्पना उद्भिच्छब्दस्य च द्रव्यविशिष्टयागपरत्वान्मत्वर्थलक्षणाविधिसामर्थ्याच्च तृतीयान्तधात्वर्थावगतेस्तुल्यविभक्तित्वेनावगम्यमानस्यैकार्थवृत्तित्वस्य त्यागोऽभक्ष्ययागश्चेति पञ्चदोषानाह **तथेति**। उपसंहरति–**तस्माविति**। एतच्च नामधेयत्वसिद्ध्यर्थं गुणविधित्वनिराकरणम्।

भाष्यकृतापि मत्वर्थलक्षणादोषोपन्यासेन कृतत्वान्नास्माकमसम्बद्धाभिधायितामापादयतीत्याह—**तदिति**। श्रुतिश्चेति भाष्येण सौत्रमुत्पत्त्याख्याद्यभावविचारगतप्राथम्यलक्षणगुणयोगेन श्रुतिवृत्तिपरं व्याख्याय, तद्व्यतिरेकप्रतिपादनार्थत्वेन गुणविधौ मत्वर्थलक्षणोपन्यासान्नामधेयत्वोपपादनार्थेनोत्पत्तिशब्देनैवार्थाद् गुणविधौ मत्वर्थलक्षणोक्तेति सूचितमिति, न भाष्यस्याप्युत्सूत्राभिधानोपालम्भः।

विधानायोद्भिदादिश्रुतिः खनित्रादीन् वक्ष्यति, यजिसामानाधिकरण्यार्थं च तद्वतो यागान् लक्षयेदिति युगपत् श्रुतिलक्षणापत्तिरित्यर्थः। एवं त्वाख्यातद्वयान्वयार्थं चकाराध्याहारापत्तेः शत्रन्तं पाठान्तरमुक्तम्। यागेनेत्यादिभाष्यस्य श्रुतिश्चेत्यादिना सह पौनरुक्त्यमाशङ्क्य विवेकमाह—**प्रातिपदिकेति**। समुच्चयवाचिचशब्दाभावात् युक्त्यन्तरत्वं न युक्तमित्याशङ्क्य किंच शब्दाध्याहारेण यागेन कुर्यादिति व्याचष्टे—**किं चेति**।

ननु यागानुवादेनात्र गुणविधानस्य पूर्वपक्षत्वाद् गुणविधौ च तस्य साध्यत्वेनानुवादान्न करणतेत्याशङ्क्य—**अनुवादे वेत्युक्तम्**। अनुवादोऽप्यपूर्वसाधनांशे गुणं विधातुं यद्यागेन कुर्यादित्येवमेव स्यादित्याशयः। नन्विति भाष्येणोद्भिच्छब्दस्यात्रव्युत्पत्त्योर्ध्वविदारणसमर्थद्रव्यवाचित्वप्रसिद्धेरुत्त्यागेनाप्रसिद्धकर्मवाचित्वकल्पना निष्प्रमाणिका तृतीयानिर्देशस्य व्रीह्यादिषु कर्मवाचित्वाभावेऽपि दर्शनेनासाधकत्वादित्याशङ्क्योच्यत इत्यनेन कोकिलः पिक इत्यादौ लोके प्रसिद्धसामानाधिकरण्येनाप्रसिद्धार्थनिर्णयदर्शनाद् व्रीह्यादिवच्च बाधकबलाद्विपरीतप्रसिद्ध्यभावात् तृतीयानिर्देशोऽप्यत्र प्रामाणमेवेत्यभिप्रायेण परिहारमुक्त्वा, कथं तृतीयानिर्देशात्कर्मवाचिताऽवगम्यत इति पृष्टे करणवाचिनो हीत्युत्तरं दत्तं तदाक्षिपत्ति **यदिति**। इह गुणमरुणिमानममूर्तं सन्तं क्रियायाः करणमिति शब्द आह। यत्करणाभिधायिन्या तृतीयया विभक्त्या संयुज्य निर्दिशत्यरुणयेत्यादिभाष्यान्तरविरुद्धं प्रातिपदिकस्य करणवाचित्वाभिधानमित्यर्थः। करणशक्त्यधिष्ठानलक्षणार्थोऽयं करणशब्द इति परिहरति—**नैषं इति**। करणशब्दार्थविषयो वाऽयं करणशब्द इति परिहारान्तरमाह—**अथ वेति**।

करणशब्दवदुद्भित्प्रातिपदिकस्य करणशक्तिविशिष्टद्रव्यानभिधायित्वाद्यादृशतादृश-शब्दौ द्रव्यरूपत्वमात्राभिप्रायौ व्याख्येयौ। करणशब्दो यादृशरूपमर्थं ब्रवीति, तादृशस्य द्रव्यरूपस्य प्रातिपदिकं वाचकमित्यर्थः। ननु करणशब्देऽपि करोतिना क्रियाभिधानात्, ल्युटा च करणशक्त्यभिधानात् न द्रव्यवाचिताऽस्तीत्याशङ्क्याह—**कुर्वन्तेनेति**। द्रव्योपसर्ज्जनत्वेन करणशक्तिर्ल्युटोच्यते, न तृतीयावन्निष्कृष्येत्यर्थः। एतदेवोपपादयति—**तथा चेति**। कथं कारकान्तरयोगमात्रेणाप्राधान्यं करणशक्तेरित्यपेक्षायामाह—**अन्यथा हीति**। कारकप्राधान्येन तदुपसर्ज्जनत्वात् द्रव्यस्यैकेन कारकेण वशीकाराद्यथा घटमानयेति कर्मकारकेण वशीकृतस्य घटस्य घटेनेत्यादिपदान्तरोपात्तेनापि द्रव्यस्य कारकान्तरेण योगो न भवति, तथा ल्युट्प्रत्ययोपात्तं करणकारकं प्रत्युपसर्ज्जनस्य करणशब्दवाच्यस्यापि द्रव्यस्य कारकान्तरयोगो न स्यादित्यर्थः।

ननु द्रव्योपसर्जनत्वात् कारकान्तरयोगासम्भवेऽपि ल्युट्प्रत्ययोक्तस्य करणकारकस्यैव कारकान्तरयोगो भविष्यतीत्याशङ्क्याह—**शक्तेस्त्विवति**। कारकं हि शक्तिः तस्याश्च प्रतिकार्यं व्यवस्थिताया एव कल्पितत्वात् न व्यवस्थासिद्धये शक्त्यन्तरकल्पना युक्तेत्याशयः। एतमेव परिहारमुपसंहरति—**तस्मादिति**। शक्तिरुपसर्ज्जनमस्येति विग्रहः।

एतदेव भाष्यं व्याचष्टे—**तेनेति**। तृतीयानिर्देशाभावात्कथं यागस्य करणतेत्याशङ्क्य, भावार्थाधिकरणवक्ष्यमाणतोक्ता नैतद्युक्तमित्याशङ्काभाष्यं तात्पर्यतो व्याचष्टे—**ननु चेति**। करणभूतयागैकवाक्यत्वविशिष्टतृतीयान्तत्वस्य हेतोर्यागवाचित्वे साध्ये नैकान्तिकत्वप्रदर्शनार्थत्वेन व्रीहिसोमवदिति दृष्टान्तं व्याचष्टे— **यथैवेति**। कर्तृव्यापारव्याप्याधीनत्वात्करणत्वस्य तदाक्षिप्तकर्तृव्यापारव्याप्यत्वरूपानीप्सितकर्मत्वापेक्षया व्रीह्यादिशब्दानां यजिना सह वैय्यधिकरण्ये भिन्नार्थत्वेऽपि यथा करणभूतयागैकवाक्यत्वविशिष्टं तृतीयान्तत्वमविरुद्धमेवमत्रापीत्यर्थः। हठशब्दं व्याचष्टे—**हठ इति**। ननूद्भिच्छब्दस्य यागवाचित्वं लौकिकाप्रसिद्धमपि अत्र नैव वाक्येन विधास्यत इत्याशङ्कानिरासामर्थ्यमपि चेति' भाष्यं स्पष्टत्वान्न व्याख्यातम्। नोद्भिच्छब्दस्याप्रसिद्धमेव यागनामधेयत्वं करणभूतयागैकवाक्यत्वविशिष्टतृतीयान्तत्वेनाज्ञातं ज्ञाप्यते, किं तु द्रव्ये यागे वाऽवयवव्युत्पत्तितुल्यत्वात्सन्देहे सति सामानाधिकरण्येन लोकनिर्णयोपायेन निर्णीयत इति परिहाराभिधानार्थं न नामधेयं विधायिष्यत इति भाष्यमर्थतो व्याचष्टे—**तदुच्यत इति**।

उद्भिच्छब्दस्यावयवव्युत्पत्त्यपर्यालोचने द्रव्यवाचित्वस्याप्यज्ञानात्, पर्यालोचने वा सन्देहादुभयोपादाने पिकादिपदमर्थविशेषवाचित्वेनाऽज्ञातं सन्दिग्धं च, अक्षादिपदं कोकिलः पिकोऽधिवेदनोऽक्ष इत्यर्थविशेषवाचित्वेन प्रसिद्धेरपृथक्श्रुति सामानाधिकरण्यनिर्दिष्टं सदर्थविशेषवाचित्वेन निर्णीयमानं लोके दृष्टमिति, उद्भिदादिपदमपि तथा निर्णीयते। यत्त्वर्थविशेषवाचित्वेन निरूढं-नियतं तत् प्रसिद्धिपदसामानाधिकरण्येऽपि स्वार्थान्नापनीयत इत्यर्थः। अनेन चानिरूढत्वविशेषणाद्धेतोरपि व्यभिचारः परिहृतः।

श्लोकं व्याचष्टे—**व्रीह्यादयो हीति**। ननूद्भिच्छब्दस्य स्मृत्यनुसारेणोर्ध्वं विदारणसमर्थद्रव्यवाचित्वावधारणात् प्रकाशनार्थत्वे तु स्मृत्यभावादतुल्यत्वेन सन्देहाभावात् कथं सामानाधिकरण्यान्निर्णय इत्याशङ्क्याह—**प्रधानं चेति**। किमुद्भित्प्रातिपदिकस्यावयवार्थानुसारात् द्रव्यवाचितास्तु, तृतीयानुसाराद्वा यागवाचितेति सन्देहे, अवयवार्थस्य गुणत्वात् तद्बाधेन प्रधानभूततृतीयार्थानुसाराद्यागवाचितैव न्याय्येत्याशयः।

अपि चेति भाष्योक्तवाक्यभेदाशङ्कानिरासार्थमध्ये तदेव भाष्यम् उद्भित्सञ्ज्ञकेन **यागेन** पशून्भावयेदित्येवं नामधेयस्यापि यज्यर्थविशेषणत्वेन विधेयत्वात् अयुक्तमाशङ्क्य, धूम एवाग्नेर्दिवा ददृशे, नार्चिररितिवद्यथा गुणविधौ बहुविधानम्, नैवं नामधेयपक्षेऽस्तीत्यौपचारिकार्थत्वेन व्याचष्टे **किं चेति**। शङ्कान्तरनिरासार्थं भाष्यावृत्तिसूचनार्थः किञ्चशब्दः। यश्च नामधेयपक्षे वाक्यभेदः शङ्कितः, सोऽप्ययुक्तः। प्रत्युत तस्मिन्नेव पक्षे विधिलाघवेन गुणविधिपक्षवद् गौरवलक्षणवाक्यभेदाभावान्नामधेयविशिष्टयागभावनारूपैकार्थविधेश्चावृत्तिलक्षणवाक्यभेदस्यानाशङ्क्यत्वादित्यर्थः। ननु यथा नामधेयपक्षे प्रातिपदिकस्य यज्यर्थविशेषकत्वेन विधिसम्बन्धे सत्याख्यातावगतयोः संख्याकारकयोर्विभक्त्याऽनुवादोपपत्तेर्लाघवम्, तथा गुणविधिपक्षेऽपि यागोद्देशेन विहितस्य द्रव्यस्य योग्यतया करणत्वावगमात् प्राथम्येन चैकत्वावगतेरनुवादो भविष्यतीत्याशङ्क्याह—**त्वत्पक्षे हीति**। कारकान्वयं विना प्रातिपदिकार्थस्य क्रियान्वयासम्भवेन विधेयत्वायोग्यत्वात् श्रुतायाश्च संख्यायाः कारकाङ्गत्वाभावात् तत्रैकत्वमयज्ञाङ्गत्वमित्यनेन न्यायेनाऽविवक्षापत्तेः प्रातिपदिकार्थैकत्वविशिष्टं करणत्वमेव गुणपक्षे विधेयं स्यादित्याशयः। ननूद्भिच्छब्दस्य भाष्यकारोक्ते प्रकाशने स्मृत्यभावात् कर्मणश्चाप्रकाशकत्वात् अवयवद्वारेणापि कर्मण्यप्रसिद्धेर्नामधेयत्वायोगात् अगत्या गौरवाश्रवणमदोषमित्याशङ्क्याह—**तस्मादिति**। उक्तेन यजिसामानाधिकरण्यप्रधानानुरोधवृत्तिविधिलाघवलक्षणेन हेतुत्रयेण कर्मनामधेयत्वावधारणे प्रवृत्तिनिमित्तं विना तदनिर्वाहाद्यथासम्भवं कस्मिंश्चिन्निमित्ते नामधेयत्वनिर्वाहायाऽन्विष्यमाणे भूविदारणस्य भूनिखातनिध्यादिप्रकाशनहेतुत्वाद्विदारणवाचिनो भिदेर्लक्षणया तत्कार्ये प्रकाशने प्रवृत्त्युपपत्तेरज्ञाते च वस्तुनि केनचित्प्रकाशितेऽनेनेदमुद्भेदितमिति प्रयोगदर्शनादुत्पादकस्य च कर्मणः प्रकाशनहेतूत्पत्तिकारणत्वेनोपचारात्प्रकाशकत्वव्यपदेशोपपत्तेर्युक्ता पशुप्रकाशनस्योद्भिच्छब्दप्रवृत्तिनिमित्ततेत्याशयः। या भाष्यकृताऽवयवद्वारेण कर्मण्यपि प्रसिद्धरुक्ता। सा तस्मादनन्तरोक्ताद्धेतुत्रयान्नामधेयत्वावधारणे सति तदन्यथाऽनुपपत्तिलभ्यत्वादप्युपपन्नेति योज्यम्।

न च सुराणां वै बलस्तमसा प्रावृतो स्माभिधानमासीत्तस्मिन् गव्यं वस्त्वन्तरासीत्, तं देवा नाशक्नुवन् भेत्तुं, ते ततो बृहस्पतिमब्रुवन्निमान्न उत्सृजेति, स उद्भिदेव बलं व्यच्यावयत्तं बलभिदाभिनदित्यन्वाख्यानावगतगोयुक्तबिलविवरापरपर्यायबलच्यावनद्वारस्य तद्विदारणद्वारस्य वा पशुप्रकाशनस्य निष्प्रमाणकत्वात् मुख्यवृत्त्योद्भिद्बलभिच्छब्दप्रवृत्ति-

निमित्तत्वानुपपत्तेः पशुकामपदावगतपश्वाख्यफलोत्पादनं लक्षणयोद्भिद्बलभिच्छब्द-प्रवृत्तिनिमित्तं वाच्यम्। तस्य च ज्योतिष्टोमादावपि तुल्यत्वेनातिप्रसङ्गापत्तेर्नोद्भिद्बल-भिच्छब्दप्रवृत्तिनिमित्तत्वं सम्भवतीत्याशङ्कते—**ज्योतिष्टोमादेरिति**। समुदायशक्त्यैव यागविशेषवाचित्वात् नातिप्रसङ्ग इति परिहरति—**नेति**।

सामानाधिकरण्येनैवाऽवधारितैतद्वाक्यविहितयागाख्यविषयविशेषस्योद्भिच्छब्दस्य गवादिशब्दवद्व्युत्पत्तिनिमित्तमात्रत्वेनावयवान्वाख्यानादित्यर्थः। 'सम्बन्धस्याशास्त्रहेतुत्वाद्वैदिकसामानाधिकरण्यरूपप्रयोगमात्रेण समुदायशक्तिकल्पनानुपपत्तेर्न व्युत्पत्तिनिमित्त-मात्रता फलोद्भेदनस्य युक्तेत्यपरितोषात्परिहारान्तरमाह—**अथ वेति**। यथा पङ्कज-शब्दस्य विशिष्टविषयप्रयोगान्यथानुपपत्त्या पद्मत्वैकार्थसमवेतपङ्कजननविशेषनिमित्तत्वाव-धारणात् व्यवस्था, तथोद्भिच्छब्दस्याप्येतद्यागगतोद्भेदनविशेषनिमित्तत्वावधारणाद्व्य-वस्थेत्यर्थः। गोशब्दस्य जातिनिमित्तस्यापि व्याकरणेऽवयवान्वाख्यानात् दृष्टान्तत्वेनो-पादानम्। ननु यद्यत्र भाष्ये कर्मण्यप्युद्भिच्छब्दस्य प्रसिद्धिः सामानाधिकरण्याधीन-निर्णयोपपादनार्थं विवक्षिता, ततो 'न नामधेयं विधायिष्यत' इति किमर्थमुक्तमित्या-शङ्क्याह—**अविधायकत्वादिति**। नैतद्युक्तमित्यादिभाष्योक्तामप्रसिद्धकल्पनाशङ्कामनेन सूत्रावयवेन निरस्नां दर्शयितुमेवमुक्तमित्याशयः।

यदि तु तदुच्यत इत्यादिना स्वयमाशङ्कापरिहारमुक्त्वा, इदानीमेवैतद्भाष्यमेतत्सूत्रा-वयवव्याख्यानार्थत्वेन व्याख्यायते, ततः स्वमुद्घाटितशङ्कापरिहारानभिधानात् भाष्यकृतः शून्यहृदयतापद्येत; अत एव टुप्टिकायामेतद्भाष्यव्याख्यानार्थं क्रियायोगेन प्राप्तत्वादिति द्वयोरपि परिहारावित्युक्तम्। वाक्यभेदशङ्कापरिहारे मुख्यवृत्त्यैतद्भाष्यं योजयितुमाह—**सञ्ज्ञेति**। यदि हि यागेन पशून्भावयेत्, तस्य च यागस्योद्भित्सञ्ज्ञेति साध्यसाधन-सम्बन्ध-सञ्ज्ञासञ्ज्ञिसम्बन्धरूपौ द्वावर्थौ विधीयेताम्, ततो वाक्यभेदः स्यात्। सञ्ज्ञा-सञ्ज्ञिसम्बन्धस्य त्वननुष्ठेयत्वेन सामानाधिकरण्यावयवप्रसिद्धिभ्यामेव च सिद्धेरविधेय-त्वान्न वाक्यभेदापत्तिरित्यर्थः। नन्वविधेयत्वे नामधेयस्य विध्युद्देशान्तर्भावो न स्यादित्याशङ्क्याह—**नन्विति**। नामधेयस्वरूपाविधानेऽप्युद्भित्सञ्ज्ञकेन यागेन पशून् भावयेदिति तदर्थविधानाद्विध्युद्देशान्तर्भावोपपत्तिरित्याशयः।

ननु विहितविधानासम्भवेनैतद्विधिविहितस्य यागस्य विध्यन्तरयागेभ्यो भेदावगमा-द्धातुत एवानुष्ठेयत्वयोग्ययागविशेषसिद्धेरनर्थको नामधेयार्थविधिरित्याशङ्क्याह—**तदधीन-त्वादिति**। अप्रवृत्तप्रवर्त्तनात्मकविधिविषयत्वान्यथानुपपत्तिपर्यालोचनया धातोर्याग-विशेषपरत्वावगमेऽपि, कोऽसौ यागविशेष इति निर्द्धारणस्य स्वरूपोक्तिमन्तरेणाशक्य-त्वाद्, द्रव्यदेवतस्य चेहाश्रवणात् नामधेयार्थविधानाधीनैव निर्द्धारितविशेषसिद्धिरित्या-शयः। नन्विह सामानाधिकरण्येन विशेषणविशेष्यभावस्येष्टत्वात् तस्य च भिन्नप्रवृत्ति-निमित्तैकार्थवृत्तित्वलक्षणस्य संज्ञासंज्ञिनोरसम्भवात्तुल्यविभक्तिकनिर्देशमात्रस्य सामाना-धिकरण्यस्य तु गौरश्व इतिवत् विशेषणविशेष्यभावानापादकत्वात्कथं संज्ञया संज्ञिविशेष-

सिद्धिरित्याशङ्क्याह—**इह हीति**। सामानाधिकरण्याभावेऽपीह विशेषणविशेष्यभावान्न भेदो=नान्यथात्वं किं तु विशेषणविशेष्यभाव एवेति भावे लकारः। कथमित्यपेक्षायामात्मरूपेत्युक्तम्। अर्थद्वारे विशेषणविशेष्यभावे भिन्नप्रवृत्तिनिमित्तैकार्थवृत्तित्वलक्षणसामानाधिकरण्यापेक्षा। संज्ञायास्तु स्वरूपेणैव संज्ञान्तरविशेषात्स्वविषयव्यावर्त्तकत्वान्नैवंरूपसामानाधिकरण्यापेक्षेत्याशयः।

ननु संज्ञयात्मविशिष्टयागाभिधाने विशेषणत्वादात्माप्यभिधीयेतेत्याशङ्कते—**नन्विति**। प्रमाणान्तरावगतस्यापि काकनिलयनादिवद्व्यावर्त्तकत्वोपपत्तेर्नात्माभिधानापत्तिरिति परिहरति—**प्रत्यक्षेति**। कथं तर्हि जातिविशिष्टव्यक्त्यभिधाने जात्यभिधानापत्तिरित्याशङ्क्याह—**सर्वत्रेति**। शाब्दे हि व्यवहारे जाते प्रत्यक्षेण अग्रहणात् अभिधानापत्तिरिति भावः। ननु संज्ञाया विशेषणत्वे स्वानुरक्तबुद्धिजनकत्वलक्षणत्वात्, तस्य स्वरूपस्य संज्ञिन्यारोपापत्तिरित्याशङ्क्याह—**न चेति**। यद्यंशविशेषा गोत्वादयोऽर्थे वस्तुनि न विद्यन्ते, ततो गवादिशब्दस्यैव स्वानुरूपबुद्धिजनकत्वेनाऽर्थेऽध्यासः स्यात्, तेषां तु विद्यमानानामेव गवादिशब्दैरुद्धरणमात्रं निष्कर्षमात्रं क्रियते इति, अनन्तधर्मके धर्मिण्येकधर्मावधारणे शब्दोऽभ्युपायमात्रं स्यात् नात्माध्यारोपकारणमिति प्रत्यक्षसूत्रेऽभिहितमित्यर्थः। स्वानुरूपबुद्धिजननं विना कथं शब्देनांशविशेषोद्धरणमित्याशङ्क्य, तदनुवेधेनेत्युक्तम्। एतच्छब्दवाच्योऽयमित्यवधारिते यः तेन शब्देनानुबन्धः—स्ववाच्यस्य शब्दान्तरवाच्येभ्यो व्यवच्छेदः तेनेत्यर्थः। एवं तावद्यत्राप्यनन्यपरविधिपुनःश्रवणान्यथानुपपत्त्या विध्यन्तरविहितेभ्यो यागेभ्यः स्वविषयस्य भेदसिद्धिः तत्रापि निर्द्धारितरूपविशेषप्रतीतिर्नामधेयाधीनेत्युक्तम्। उद्भिदादिवाक्ये तु विधिपुनःश्रवणस्य फलाद्यर्थत्वसम्भवेनाभेदकत्वादनुपादेयसम्बन्धसहकृतासन्निधिलक्षणेन च प्रकरणान्तरेण दूरस्थेभ्यो भेदावगमेऽपि, प्रकृताद्व्यवधायकाभावेन सन्निहिताज्ज्योतिष्टोमान्नामधेयं विना भेदासिद्धेर्नामधेयार्थोऽवश्यं विधेय इत्याह—**नाम्नैवेति**। भेदं विना प्रकृतिविकारभावायोगाद्विशेषणानर्थक्यापत्तेश्च। प्रकृतौ ज्योतिष्टोमे इति भाष्यगतप्रकृतिशब्दवदयमपि प्रक्रियत इति व्युत्पत्त्या प्रकृतवचनः।

यद्वा देवतोद्देशपूर्वकद्रव्यत्यागरूपत्वं निमित्तीकृत्य यजिप्रवृत्तेः पशूद्भेदनहेतुत्वं च निमित्तीकृत्योद्भिच्छब्दप्रवृत्तेर्भिन्नप्रवृत्तिनिमित्तैकार्थवृत्तित्वलक्षणसामानाधिकरण्यनिबन्धनैव विशेषणविशेष्यता सम्भवतीत्याह—**अथ वेति**। यथारुणैकहायन्यादौ सामानाधिकरण्यनिबन्धनाविशेषणविशेष्यता, तद्वदेवात्रापीत्यर्थः। एतच्च यजेत पशुकाम इत्येतावतासिद्धत्वात्पशूद्भेदनहेतुना यागेन पशून् भावयेदिति नामधेयार्थविध्यानर्थक्यापत्तेः प्रौढिमात्रेणोक्तम्। एवमाकृतेरविधेयत्वादिति पूर्वपक्षवार्त्तिकोक्तं नामधेयानर्थक्यं परिहृत्य, यदा च लौकिकेनापि प्रकारेणेत्यनेनोक्तम्। नामधेयार्थविधौ यज्यानर्थक्यं परिहरति—**न चेति**। अवयवव्युत्पत्तिपर्यालोचनयोद्भिच्छब्दस्यान्योत्पादानुकूलस्वभावविध्यन्तरविहितकर्मव्यावृत्तकर्मविशेषनामत्वावगमेऽपि यागरूपता कर्मणो यज्यधीनेति दर्शयितुं

यागशब्दः। नचैवं सतीतरेतराश्रयत्वं शङ्कनीयम्, परस्परसन्निधानलभ्यत्वेनान्योन्यनियमस्यैकैकाधीनत्वानभ्युपगमादित्याह-- **परस्परेति**। ननु विधानायोग्यत्वेनैव सामान्यव्यावृत्तिसिद्धेर्न तदर्थं नामधेयसन्निधानापेक्षा इत्याशङ्क्य, प्रकृतस्यैव फलाद्यर्थं पुनःश्रुत्युपपत्तेर्न तद्व्यावृत्तिर्नाम्ना विना सिध्यतीति दर्शयितुम्, प्रकृतौ वेत्युक्तम्। एतदेवोपसंहरति—**तस्मादिति**। ननूभयविधाने वाक्यभेदापत्तेर्नामधेयस्यानुवादताऽङ्गीकार्येत्याशङ्क्याह—**विशिष्टेति**। वाक्यभेदं विनाप्युभयविध्युपपत्तेर्न तद्भयेनानुवादताऽभ्युपगन्तव्येत्यर्थः। नामधेयार्थस्य विधेयत्वे नामधेयत्वस्य गुणविधिप्रतियोगित्वेऽपि विधित्वमात्रप्रतियोगित्वाभावात्, तद्भयेन परेषां विध्यादित्रयातिरेकवर्णनमयुक्तमेवेत्याह—**एवमिति**। यत्त्वित्यादिभाष्येणोद्भिदादिशब्दो नामधेयत्वे सत्यप्रवृत्तिविशेषकरत्वादनर्थकः स्यादिति पूर्वपक्षोक्तं नामधेयानर्थक्यमनुभाष्य गुणफलोपबन्धेनार्थवत्त्वमुक्तम्। तस्योपलक्षणार्थत्वं दर्शयितुमाह—-**अशेषेति**।

संज्ञायाः कर्मभेतृत्वं द्वितीये यद्वदिष्यते।
यच्चेष्टौ यागषट्कस्य फलवत्त्वं वदिष्यते॥
सोमयागस्य च ज्योतिष्टोमेऽध्याये चतुर्थके।
यश्चाग्निहोत्रधर्माणां प्रवेशः कौण्डपायिने॥
सप्तमे वक्ष्यते सर्वं तन्नाम्ना फलमिष्यते।
वाक्यान्तरोत्पादिते च कर्मण्यङ्गं विधीयते॥
फलं वा यत्र तत्रास्मान्नर्ते कर्मविशेषधीः।
द्रव्यदेवतशून्यायां यागोत्पत्तौ च नामतः॥
विना निर्द्धारणाभावाद्विशेषस्याविधेयता।
धर्मप्रमोपयोगित्वमप्यस्येत्थं च सिध्यति॥
यागेनानेन यक्ष्येऽहं तेन याजय मामिति।
नाम्ना विनैवमादिश्च व्यवहारो न सिध्यति॥
मीमांसाविधिवाक्यार्थज्ञानानुष्ठानलक्षणे।
त्रिविधे व्यवहारेऽस्मिन्सर्वस्मिन्नामकारणम्॥

ननु विधायकवाक्यनिर्देशेनाप्यर्त्विग्वरणादिषु यागविशेषाख्यानसिद्धेः कथं नाम्नामशेषव्यवहाराङ्गतेत्याशङ्क्याह—**न हीति**। विधिवाक्यं पठित्वाऽनेन विहितो यो याग इत्याख्याने गौरवापत्तेर्नामधेयादन्यो लघुराख्यानोपायो नास्तीत्यध्याहारेण योज्यम्। भाष्याभिप्रेतमर्थमुक्त्वा स्वरूपतो व्याचष्टे—**दर्शपूर्णमासाविति**। तस्मादित्युपसंहारभाष्यं व्याचष्टे **तस्मादिति**। एवं जातीयकशब्देन सौत्रोत्पत्तिशब्दसूचितं सामानाधिकरण्यनिर्दिष्टत्वम्, अपूर्वशब्दसूचितं च **यौगिकत्वं विवक्षितम्**॥ २॥

इति प्रथममुद्भिदधिकरणम्।

भा० प्र०—पूर्व में निर्दिष्ट पूर्वपक्ष की निवृत्ति के लिए **'अपि वा'** इस सूत्र के द्वारा सिद्धान्त पक्ष का प्रदर्शन किया जा रहा है। **उद्भिद्** आदि विधियाँ गुणविधि के रूप में निर्दिष्ट की गई हैं। इस सूत्र के द्वारा सिद्धान्त पक्ष की स्थापना हो रही है। पूर्वोक्त विधियाँ गुणविधि नहीं हो सकती हैं। गुणविधि मानने पर उद्भिद् शब्द का अर्थ उद्भिद्वान् यह मानना पड़ेगा। अर्थात् उद्भिद् गुण से विशिष्ट याग से अभिलषित फल निष्पन्न करे 'उद्भिद्वता यागेन इष्टं भावयेत्' फलतः उद्भिदा इस मतुप् प्रत्यय-रहित शुद्ध शब्द की मतुप् प्रत्यय युक्त या उस प्रत्यय के अर्थ से युक्त कर व्याख्या करनी होगी। मत्वर्थ को शुद्ध शब्द में मानने पर लक्षणावृत्ति के द्वारा ही उस अर्थ को मानना होगा। अपौरुषेय वेद-वाक्य में मतुप् प्रत्यय के अर्थ में लक्षणा मानना सङ्गत नहीं है। ऐसे स्थल में जहाँ लक्षणा के विना वेद-वाक्य का अर्थ न होने से अप्रामाण्य की आपत्ति हो वहाँ अगत्या स्वतः प्रमाण वेद के अप्रामाण्य का परिहार करने के लिए मत्वर्थ में लक्षणा का मानना अनिवार्य हो जाता है, किन्तु यदि मत्वर्थ में लक्षणा न मानने पर भी अर्थ की सङ्गति हो सकती है तो वहाँ लक्षणा के द्वारा अर्थ को मानना उचित नहीं है। नामधेय स्वीकार करने पर मत्वर्थ में लक्षणा की आपत्ति नहीं है। अतः श्रौत अर्थ का ही अनुसरण करना उचित है। याग के द्वारा पशु रूप फल का उत्पादन करे 'पशुकामो यजेत' इस विधि के सुनने पर क्या याग से यह सम्भव है यह शङ्का उत्पन्न होती है। क्योंकि याग पद का अर्थ याग सामान्य है और सामान्य अनुष्ठान के योग्य नहीं होता है। अतः उसके विशेष रूप के जानने की इच्छा होती है। ऐसी स्थिति में उद्भिद् नामक याग से पशु रूप फल को उत्पन्न करे इस प्रकार नाम के द्वारा याग का विशेष रूप अवगत करने पर पुरुष की जिज्ञासा स्वयं शान्त हो जाती है और याग कर्म में प्रवृत्ति होती है। अतः उद्भिद् यह यज्ञ का नामधेय है। 'यजेत' यह कहने पर याग के द्वारा अभीष्ट फल का उत्पादन करे 'यागेन इष्टं भावयेत्' यह अर्थ अवगत होता है। इस स्थल में फल साध्य है और विधि के समान पद से वर्णित धात्वर्थं याग इस फल का करण होता है। आशय यह है 'कि स्वर्गकामो यजेत' इत्यादि वाक्य में स्वर्ग पुरुषार्थ है। पुरुष का अभिलषित होने से वह साध्य है। यजेत इस पद का प्रकृतिभूत यज् धातु का अर्थ याग होता है; वह इसका करण कहा जाता है। यज् धातु एवं त प्रत्यय दोनों मिलकर यजेत यह एक पद होता है। यज् धातु का अर्थ याग विधिप्रत्यय के समान पद से वर्णित है। वह प्रकृत्यंश होने से अन्यान्य पद की अपेक्षा रखता है। इसलिए धातु ही विधि प्रत्यय वाच्य फलभावना का करण होता है। प्रकृति में उद्भिदा इत्यादि तृतीया विभक्ति युक्त पद से याग के नामधेय रूप में सामानाधिकरण्य रूप से ही अन्वय होता है। इस प्रकार अर्थ मानने पर विधि की प्रवर्तकत्व शक्ति अव्याहत रहती है। ऐसा न मानने पर यजेत इस विधि से विहित याग सामान्य का अनुष्ठान असम्भव हो जायेगा, फलतः विधि की प्रवर्तकता ही नहीं

रह जायेगी। उद्भिद् इत्यादि पद की मत्वर्थ में लक्षणा न मानने पर भी क्रिया के साथ अन्वय होकर वाक्य सफल होता है। दधि से हवन करें, व्रीहि से याग करे दध्ना जुहोति, व्रीहिभिर्यजेत इत्यादि स्थान में दधि आदि शब्द द्रव्य विशेष में प्रसिद्ध होने से वह याग का नामधेय नहीं हो सकता है। क्योंकि वहाँ नामधेय मानने पर प्रसिद्धि का बाध होगा इसलिए अन्य वचन से विहित कर्म में दधि आदि द्रव्य का गुण रूप में विधान हो सकता है, किन्तु सोम से याग करे 'सोमेन यजेत' इत्यादि स्थल में अप्रसिद्ध अर्थ नामधेय की कल्पना की अपेक्षा प्रसिद्ध अर्थ का ग्रहण करना उचित है और इसके लिए मत्वर्थ में लक्षणा मानना अनुचित नहीं है। किन्तु उद्भिद् शब्द का अर्थ याग के द्रव्य विशेष के रूप में लोक प्रसिद्ध नहीं है। जिसके द्वारा उद्भिन्न हो—वह उद्भिद् है इस प्रकार की व्युत्पत्ति के अनुसार लब्ध खनित्ररूप गुण का विधान भी नहीं हो सकता है, क्योंकि ऐसा मानने पर खनित्ररूप गुण याग का करण होने से याग के साथ सामानाधिकरण्य रूप में इसका अन्वय नहीं हो सकता है। क्योंकि इसको गुण विधि मानने पर उद्भिद् अर्थात् खनित्र से साध्य याग के द्वारा इष्ट फल का उत्पादन करे "उद्भिदा = खनित्रेण साध्यः यः यागः तेन इष्टं भावयेत्"। इस प्रकार व्यधिकरणरूप में ही अन्वय मानना पड़ेगा, किन्तु जिसके द्वारा पशु रूप फल उद्भिन्न अर्थात् लब्ध होता है, उसका नाम उद्भिद् इस व्युत्पत्ति के अनुसार उद्भिद् आदि शब्द को नामधेय मानने पर उद्भिद् नामक याग से अभिलषित पशुरूप फल उत्पादन करे, इस रूप में सामानाधिकरण्य अन्वय हो सकता है; एवं इसमें किसी प्रकार की अप्रसिद्ध कल्पना भी नहीं है। अतः उद्भिदा आदि शब्द नामधेय के रूप में ही अन्वित होता है। इस स्थल में उद्भिद् आदि नामधेय अनुवाद है जिसके द्वारा फल विशेष उद्भिन्न होता है इत्यादि रूप में प्रकृति और प्रत्यय से लभ्य यौगिक अर्थ का ही यह अनुवाद है। इस प्रकार जिसके द्वारा युद्ध में जय की प्राप्ति होती है वह अभिजित् है, जिसके द्वारा विश्व का जय किया जाता है— वह **विश्वजित्** है, इत्यादि व्युत्पत्ति के अनुसार **अभिजित्, विश्वजित्** आदि पद-समूह नामधेय हैं।

नामधेय के विचार का यह प्रयोजन है कि इसके द्वारा याग में ऋत्विक् आदि के वरण के समय यह याग करूँगा, इस याग में आपको वरण करता हूँ, इत्यादि वरण सङ्कल्प में सुविधा होती है। द्वितीय अध्याय में नामधेय के भेद से कर्म का भी भेद होता है—इस प्रकार के सिद्धान्त की स्थापना होने पर वह भी इस नामधेय के विचार की अपेक्षा करता है, इसलिए भी इस स्थल में **उद्भिद्** आदि पद की नामधेयता का प्रतिपादन आवश्यक है। अतः इस स्थल में नामधेय का विचार किया गया है।

अपि वा = पूर्व पक्ष का निरास करने वाला। **नामधेयं स्यात्** = उद्भिद् आदि शब्द नामधेय हैं। **यदुत्पत्तौ** = जिसकी उत्पत्ति के समय, अर्थात् प्रथम श्रवण के समय। **अपूर्वम्** = किसी विशेष अर्थ में अर्थात् प्रसिद्धि का ज्ञान नहीं होता है, वह

नामधेय ही होगा । अविधायकत्वात् = क्योंकि, वह गुणविधि नहीं हो सकती है, उद्भिद् इत्यादि पद नामधेय ही होगा, क्योंकि, जिसके प्रथम श्रवण के समय रूढ़ अर्थ की प्रतीति नहीं होती है, वह नामधेय ही होगा, क्योंकि वह गुणविधि नहीं हो सकती है, ऐसा मानने पर मतुप् के अर्थ में लक्षणा माननी पड़ेगी, अतः यह नामधेय विधि है, गुणविधि नहीं है ॥ २ ॥

अथ द्वितीयं चित्राधिकरणम्

[२] यस्मिन् गुणोपदेशः प्रधानतोऽभिसम्बन्धः ॥ ३ ॥ सि०

शा० भा०—चित्रया यजेत पशुकामः, त्रिवृद् बहिष्पवमानम्, पञ्चदशान्याज्यानि, सप्तदशानि पृष्ठानि इत्युदाहरणम् । किं चित्राशब्दः पवमानशब्दः, आज्याशब्दः पृष्ठशब्दश्च गुणविधयः, उत कर्मनामधेयानीति संशयः । प्रसिद्धेः, अर्थवत्त्वात्, प्रवृत्तिविशेषकरत्वाच्च गुणविधयः । न चैते कर्मणि प्रसिद्धाः । न चामी यौगिकाः । जातिशब्दा ह्येते । चित्रा इति च गुणशब्दः । चित्रया यजेतेति च यागानुवादः, विज्ञातत्वान्न यागविधिः । गुणे फलकल्पनायां यजतेर्न[1] विवक्षा ।

तथाऽऽज्यानि भवन्ति, पृष्ठानि भवन्तीति च । गुणविधिकल्पनायामपि न लक्षणा । तस्माद् गुणविधय इत्येवं प्राप्तम् ।

एवं प्राप्ते—

ब्रूमः—यस्मिन् गुणविधिर्नामधेयमिति सन्दिग्धे गुणोऽपर उपदिश्यते । प्रधानेन कर्मणा तस्य सम्बन्धः । कर्मनामधेयमित्यर्थः । गुणविधौ हि सति वाक्यं भिद्येत । पुंपशौ[2] प्राप्ते स्त्रीपशुः, पशवः फलम्, चित्रो गुण इति न शक्यमेकेन वाक्येन विधातुम् । चित्रो गुणो विधीयमानः स्त्रियां विधीयेत, नासावग्नीषोमीये, पशुकामे च विधीयेत, सोऽपि नाग्नीषोमीये ।

तथा पञ्चदशान्याज्यानि भवन्तीत्याज्येषु पञ्चदशता । न चाविहितानि स्तोत्रेष्वाज्यानि भवन्ति । न चान्यद्विधायकं वाक्यम् । तच्चैतदाज्यानि विदध्याद्, विहितेषु च पञ्चदशताम् । गम्यते च पञ्चदशताया आज्यानां च सम्बन्धः । स्तोत्रसम्बन्धश्चाऽऽज्यानामविज्ञातः, पञ्चदशतासम्बन्धश्च । द्वावेतावर्थावेकवाक्यस्याशक्यौ विधातुम् । अथ नु[3] कर्मनामधेयम्, नैष विरोधो भवति । केवलं संख्यासम्बन्धस्तदानीं विधीयते अपि चाऽऽज्यानि स्तोत्राणीत्यनेन शब्देन लक्षणयैव गुणो विधीयेत । अतः कर्मणां नामधेयानि वाक्यान्तरैः 'आज्यैः स्तुवते, पृष्ठैः स्तुवते' इत्येवमादिभिर्विहितानाम् ।

---

१ ब. यजतेरविवक्षा । २ ब. पुंस्पशौ । ३ ब. तु ।

यत्त्वप्रसिद्धं कर्मणां नामधेयमिति[1]। अवयवप्रसिद्ध्या[2], आजिगमनादाज्यानि। कथमाजिगमनमिति? अर्थवादवचनात्। 'यदाजिमीयुस्तदाज्यानमाज्यत्वम्' इति। स्पर्शवचनात् पृष्ठानि। पवमानार्थमन्त्रकत्वाद्, बहिःसंबन्धाच्च बहिष्पवमानम्।

दधि मधु पयो घृतं धानास्तण्डुलाः, उदकम्, तत्संसृष्टं प्राजापत्यम्' इति नानाविधद्रव्यत्वाच्चित्रा[3]। तस्मादेवंजातीयकानि कर्मनामधेयानीति।

अथ कस्मान्न पञ्चदशसंख्याविशिष्टान्याज्यानि स्तोत्रकर्मसु[4] विधीयन्ते, विशिष्टानां वाचकस्य शब्दस्याभावात्। ननु पदद्वयमिदं वाचकं भविष्यति, पञ्चदशान्याज्यानीति विशिष्टानाम्, तदेतेषु स्तोत्रेषु विधास्यति।

नैतत्पदद्वयमपि विधायकम्। एकमत्र विधायकम्। एकमुद्देशकम्। उभयस्मिन् विधायके परस्परेण सम्बन्धो न स्यात्। अविधायके स्तोत्रसम्बन्धो न विधीयते। न चात्रैकं पदं विशेषणं प्रत्युद्देशकम्, स्तोत्रं प्रति विधायकं भवितुमर्हति, वचनव्यक्तिभेदात्। अतोऽयमसमाधिः॥

इति द्वितीयं चित्राधिकरणम्॥ ३॥

भा० वि०—अत्र भवन्त्येवंजातीयकानि नामधेयानि, यत्र तु निरूढत्वादेव यौगिकत्वे सति सामानाधिकरण्यनिर्दिष्टत्वासंभवः तत्र गुणविधय इति प्रत्यवस्थानात्प्रत्युदाहरणलक्षणा सङ्गतिः। विषयमाह—**चित्रयेति**।

ननु यद्यप्युत्पत्तिवाक्यानि कर्मस्वरूपमुपादाय गुणं नामधेयं वा विदधति, तान्येवात्राज्यैः स्तुवते पृष्ठैः स्तुवते बहिष्पवमानैः स्तुवते इत्येवमादीन्युदाहर्तव्यानि, न तु पञ्चदशान्याज्यानि इत्यादीनि, उत्पत्तिवाक्यावगतार्थनिबन्धनत्वादितरवाक्यव्यवहारस्येति, अत उक्तम्—**इत्युदाहरणमिति**। यद्यप्युत्पत्तिवाक्यस्थमेवाज्यादिपदं विचारयितव्यम्, तथापि तस्य घृतादौ निरूढस्य घृतादेः साक्षात्स्तोत्रसाधनत्वासम्भवेन गुणविधित्वाप्रतीतेः बलवत्याश्च लोकरूढेः बलवत्तरवाक्यभेदादिकमन्तरेणाबाधादवयवशक्त्या नामत्वस्याप्यप्रतीतेः। पक्षद्वयस्यापि गुणवाक्याधीननिर्णयत्वात्तान्येवोदाहरणमित्यर्थः। तेष्वपि येषु पदेषु गुणविधित्वनामधेयत्व-विचारः तानि विविच्य दर्शयन् गुणविधित्वेऽपि वाक्यभेदपरिहारसम्भवाभ्यां संशयमाह—**किं चित्राशब्द इत्यादिना**। प्रयोजनं तु तत्तद्गुणोपादानं पूर्वपक्षे, सिद्धान्ते नामधेयत्वान्नेति द्रष्टव्यम्। तत्र पूर्वपक्षं पूर्वाधिकरणहेतुभिरेव दर्शयति—**प्रसिद्धेरित्यादिना**। अर्थवत्त्वमभिधेयवत्त्वरूपं प्रवृत्तिविशेषकरत्वे हेतुः। प्रयोजनवत्त्वरूपं तु पृथग्गुणविधित्व इत्यवसेयम्।

---

१ ब. नामेति। २ ब. प्रसिद्ध्याप्रसिद्धं। ३ ब. द्रव्यवत्त्वा—४ ब. कर्मणि।

ननु किमिति प्रसिद्धादिभिः गुणविधय एव, नामधेयान्यपि किं न स्युः ? इत्याशङ्क्य किं कर्मणि समुदायप्रसिद्धिराहोस्विदवयवप्रसिद्धिः ? न तावदाद्यः लोकप्रयोगाभावादित्याह—**न चेति**। न द्वितीय इत्याह—**न चामी इति**। कुत इत्यत आह—**जातीति**। यत आज्य-पृष्ठ-पवमानशब्दा घृतप्राण्यङ्ग-पवनकर्तृ-जातिवचनाः अतश्च चित्रशब्दो गुणवचनः तस्मान्नावयवप्रसिद्ध्या कर्मणि वृत्तिः रूढिर्योगमपहरतीति न्यायादित्यर्थः।

ननु माभूवन्नामधेयानि, तथापि न गुणविधयः गुणविशिष्टकर्मविधान-सम्भवादत आह—**चित्रयेति**। चित्रावाक्ये चित्रयेत्याख्यातसम्बद्धपदान्तरश्रवणा-देवाख्तार्थस्य यागस्यानुवाद्यतावगम्यत इत्यर्थः।

ननु पदान्तरश्रवणेऽपि सोमेन यजेतेत्यादाविव विशिष्टविधिः किं न स्यादि-त्याह—**विज्ञातत्वादिति**। तत्रानुवाद्यस्यान्यतोऽनवगतत्वाद्विशिष्टविधित्वमत्र तु प्रस्तुतयागानुवादासम्भवान्नैवमित्यर्थः।

नन्वत्राप्यनन्तरप्रकृतप्राजापत्येष्टौ तत्साधनदध्यादिषु चित्रत्वसम्पादना-सम्भवात् प्राणित्वापरसामान्यरूपस्त्रीत्वासम्भवाच्च चित्रत्वस्त्रीत्वविधानानुपपत्तेः। अग्नीषोमीयस्य दूरस्थत्वात् पशुना यजेतेत्युत्पत्तिशिष्टेन पुंस्त्वेन प्रकरणाम्नातेन च कृष्णसारङ्गादिगुणेनावरुद्धत्वेन तत्रापि तद्विधानासम्भवादगत्या विशिष्टविधिर्भवि-ष्यतीति आशङ्क्याह—**न यागविधिरिति**। स्त्रीत्वेनैव तावत् प्राणियागोपस्था-पनादग्नीषोमीयस्य च सकलप्राणियागप्रकृतित्वेन उपस्थितस्यानुवदितुं शक्यत्वात् कृष्णसारङ्गपुंस्त्वाभ्यां च सह चित्रत्वस्त्रीत्वयोः विकल्पसम्भवादग्नीषोमीय-यागानुवादेन गुणविधिरेवायमित्यर्थः।

ननु माभूद्विशिष्टविधिः, तथापि फले गुणविधानं पशुकामश्चित्रयेति भवि-ष्यति, तत्राह—**गुणफलेति**। गुणफलयोः कल्पना गुणफलकल्पना गुणफलसम्ब-न्धिनी कल्पनेति यावत्। फले गुणविधानकल्पनायां यजेर्धातोः विध्यनुपयोगित्वेन प्रत्ययानुग्रहमात्रार्थतया पारार्थ्यं स्यादित्यर्थः, न चैकपदोपात्तचित्रत्वस्त्रीत्वरूपा-नेकार्थविधानात् पशुकामपदोपात्तफलसम्बन्धविधानाच्च विध्यावृत्तेर्वाक्यभेद इति वाच्यम्; यागानुवादेन चित्रत्वस्त्रीत्वविशिष्टैककारकविधानात् पशुकामस्य च स्वर्गकामाधिकरणपूर्वपक्षन्यायेनानुष्ठानसाधनपशुकामनानुवादार्थत्वेन फलसम्ब-न्धस्याविधेयत्वादित्यपि द्रष्टव्यम्।

आज्याद्युदाहरणेष्वपि गुणविधित्वमुपपादयति—**तथेति**। अत्र[1] चास्ति-र्भवन्तीपरः प्रथमपुरुषे प्रयुज्यमानोऽपि अस्तीत्यनुशासनादस्तिभवत्योः चैकार्थ-

१. प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्तीतिशेषपूरणमिति २-३-१ इत्यत्रत्यं कात्यायन-स्मरणमिति बोध्यम्।

त्वात् भवत्यध्याहारेण आज्यसत्तायाः स्तोत्रसमीपे कल्पनं पूर्वपक्षिणोऽभिमतमितिदर्शयितुं भवन्तीत्युक्तम् । त्रिवृद्बहिष्पवमानं भवतिति वाक्यसमुच्चयार्थश्चकारः ।

ननु पञ्चदशशब्दस्य डप्रत्ययान्तत्वात् तस्य च स्तोमे डविधिः पञ्चदशाद्यर्थे (पा० सू० ५-१-५८) इति स्तोमशब्दाभिधेयस्तोत्रसाधनसङ्ख्यावाचित्वस्मरणादाज्यानां स्तोत्रसाधनत्वसिद्ध्यर्थमाज्यवन्तीति स्तोत्रलक्षणायां मत्वर्थलक्षणादोषः स्यात्, इत्यत उक्तम्—**लक्षणेति** ।

अयमाशयः—न तावत्पञ्चदशान्याज्यानीति, आज्यपदमाज्यैः स्तुवत इत्युत्पत्तिवाक्यगताज्यानुवादार्थम्, तत्राज्यपदस्य घृतवाचिनः स्तोत्रार्थत्वविधौ लक्षणाप्रसङ्गात्, तेन स्तोत्रप्रकरणे पञ्चदशान्याज्यानीत्यादिगुणवाक्याम्नानुमितेन पञ्चदशसङ्ख्याविशिष्टैराज्यैः स्तोत्रस्योपकर्तव्यमिति वाक्येन स्तोत्राज्यसम्बन्धे कृते प्रयोगविधिः प्रवर्तत इति वक्तव्यम्, तेन च वाक्येन मत्वर्थ एव प्रतिपद्यत इति, न तत्र लक्षणा तद्वाक्यावगतस्तोत्राज्यसम्बन्धानुवादेन स्तुतिमात्रपरत्वान्नोत्पत्तिवाक्येऽपि विधौ लक्षणेति द्रव्यसङ्ख्यारूपानेकार्थविधिनिमित्तवाक्यभेदपरिहारोऽप्यनेनैव दर्शितः । तदेवं संसर्गिद्रव्यत्वेनाज्यानां स्वरूपेण सङ्ख्यायोगाभावेऽपि पञ्चदशाज्यपात्राणि समीपे निधाय स्तोतव्यम् । तथा सप्तदशप्राङ्मुखप्राणिस्थापनेन सप्तदशपृष्ठानि समीपे निधाय स्तोतव्यम् । तथा त्रिवृच्छब्दवाच्यमौषधद्रव्यं पवनार्हं द्रवं कृत्वा वस्त्रादौ विधाय सदसो बहिः स्थापयित्वा स्तोतव्यमिति वाक्यार्थाद्यवगमाद्युक्तं गुणविधित्वमिति निगमयति—**तस्मादिति** ।

सिद्धान्तमवतारयति—**एवमिति** । तत्र सूत्राक्षरव्याख्यानेन तावत्प्रतिज्ञामाह—**यस्मिन्निति** । चित्राशब्दादौ इत्यर्थः । गुणोऽपर इति स्त्रीत्वत्रिवृत्पञ्चादशसप्तदशत्वरूपः तस्य चित्रादिपदस्य प्रधानेन गुणप्रतियोगिभूतेन कर्मणा सह सम्बन्धः ।

ननु गुणविधित्वेऽपि कर्मणैव प्रधानेन सम्बन्धस्तत्राह—**कर्मेति** । कुत इत्यपेक्षायां यस्मिन् गुणोपदेश इति सूत्रावयवसूचितं गुणविधित्वे वाक्यभेदप्रसङ्गं हेतुमाह—**गुणविधौ हीति** । प्राप्ते कर्मण्यनेकगुणविधानादिति भावः । एतदेव विवृणोति—**पुंपशाविति** । स्त्रीपशुत्वचित्रत्वपशुफलानामर्थानामनेकत्वादित्यर्थः । न च चित्रत्वस्त्रीत्वविशिष्टैककारकविध्युपगमेन वाक्यभेदपरिहारः, द्रव्यवत्तत्कारकस्याप्युत्पत्तिवाक्येनैव प्राप्तत्वेनाविधेयत्वात् । न चार्जनाङ्गत्वप्राप्तपशुकामनानुवादत्वेन फलसम्बन्धाविधानाद्वाक्यभेदासम्भवः, कामोपबद्धस्य पश्वादेः फलरूपतायाः 'असाधकं तु तादर्थ्यात् (६-१-२) इत्यत्र वक्ष्यमाणत्वादित्याशयः ।

उत्पत्तिशिष्टगुणावरुद्धे कर्मणि तद्विरुद्धगुणान्तरासम्भवः। वैश्वदेवाधिकरण-वक्ष्यमाणमभ्युच्चयार्थत्वेनात्र दर्शयितुं **पुंपशौ प्राप्ते स्त्रीपशुरित्युक्तम्**। न च कर्मस्वरूपमात्रानुवादेन गुणान्तरविधानादौत्पत्तिकादविशेषः। येनौत्पत्तिकेन गुणेन सह विकल्प्येत। विशिष्टविहिते कर्मणि केवलेनापि यजिना विशिष्टस्यैवोप-स्थापनादिति सूचयितुं पुंपशौ प्राप्त इत्युक्तम्।

ननु स्त्रीपशुद्रव्यके मेषीयागे चित्रत्वमात्रत्वविधानान्न वाक्यभेद इत्यत आह—**चित्रतागुण इति**। यद्यपि स्त्रियां यागाङ्गत्वेन प्राप्तायां चित्रत्वमात्रविधौ न वाक्यभेदः, तथापि नासौ स्त्रीपुंपशुद्रव्यकेऽग्नीषोमीयेऽस्तीति स्त्रीत्वस्यापि विधेयत्वाद्वाक्यभेदः। न च मेषीयागे गुणविधानम्, तस्य प्राकृतकृष्णसारङ्गादि-गुणावरुद्धत्वेन निराकाङ्क्षत्वादितिभावः। किं च फलत्वेन पशून् कामयमानः पशुकाम इति पशुकामाधिकृते कर्मणि चित्रत्वादिविधानादग्नीषोमीयस्य च क्रत्वर्थत्वेनाफलत्वान्न तत्र चित्रत्वादिविधानमित्याह—**पशुकामे चेति**। पशु-कामेऽधिकारिणि सतीति यावत्।

एवं चित्रोदाहरणे गुणविधौ वाक्यभेदं व्युत्पाद्याज्याद्युदाहरणेऽपि व्युत्पाद-यति—**तथेति**। पञ्चदशता विधीयेतेत्यनुषङ्गः।

अस्त्वाज्यानुवादेन पञ्चदशताविधानमत आह—**न चेति**। न खलु लोकसिद्धा-ज्यस्वरूपानुवादेन पञ्चदशताविधानम्, वैयर्थ्यात्। स्तोत्रविधानानां च न विधिं विना प्राप्तिरित्यर्थः।

अस्तु तर्हि विधिरेव प्राप्तिः तत्र किं विधायकं च वाक्यान्तरं एतदेव वा? नाद्य इत्याह—**न चेति**। अनुपलम्भादित्यर्थः। न च स्तोत्रप्रकरणाम्नातैतद्वाक्या-नुमितं विनियोजकवाक्यं स्तोत्राज्यसम्बन्धं प्रापयतीति वाच्यम्, नामधेयत्वेऽप्य-स्योपपत्तेः वक्ष्यमाणत्वादितिभावः। नापि द्वितीय इत्याह—**न चैतदिति**। आज्य-स्तोत्रेष्वित्यनुषङ्गः। वाक्यभेदापत्तेरित्यर्थः।

नन्वेतद्वाक्यमाज्यस्यैव विधायकम्, न पञ्चदशतायाः तत्कृतो वाक्यभेदः, तत्राह—**गम्यते चेति**। ननु सावगतिरनुवाद एवेत्याशङ्क्य प्रापकाभावान्नैव-मित्याह—**स्तोत्रेति**। एवं च वाक्यभेदापत्तिरित्याह—**द्वावेताविति**।

नन्वनुशासनप्राप्तभवत्यर्थप्रयोज्यव्यापाराक्षिप्तभावनाख्यप्रयोजकव्यापारविध्य-न्यथानुपपत्त्याज्यैः स्तोत्रोपकारं भावयेदिति विनियोजकवाक्यकल्पनया याज्यस्तोत्र-सम्बन्धे सिद्धे तदनुवादेन पञ्चदशत्वमात्रविधानान्न वाक्यभेद इत्यत आह—**अथ न्विति**। नामधेयत्वपक्षेऽप्युत्पत्तिवाक्यविहिताज्यादिनामकस्तोत्रानुवादेन पञ्चदशत्वसप्तदशत्वमात्रविधानात् स्तोत्राङ्गतयाश्रितनवसङ्ख्याविधानाच्च वाक्यभेदपरिहारोपपत्तौ न विनियोजकवाक्यकल्पनायां प्रमाणमिति भावः।

तर्ह्यस्मत्पक्षेऽपि वाक्यभेदपरिहारायोत्पत्तिवाक्यविहिताज्याख्यघृतानुवादेन पञ्चदशत्वगुणो विधीयतामत आह—**अपि चेति**। एवं सत्याज्यैः स्तोत्रैरिति समानाधिकरण्यसिद्ध्यर्थं मत्वर्थलक्षणया विहितेष्वाज्येषु पञ्चदशत्वगुणविधिः स्यात्। सम्भवति च नामधेयत्वे.न लक्षणा युक्तेत्यर्थः। उत्पत्तिवाक्ये भावनाकरणत्वेन निर्दिष्टानामप्याज्यानां गुणवाक्ये करणत्वानपेक्षां सूचयितुं प्रथमा निर्देशः।

एवं त्रिवृद्बहिष्पवमानमित्यत्र त्रिवृद्द्रव्यस्तोत्रसम्बन्धे बहिष्पवमानरूपगुणसम्बन्धे च विधीयमाने वाक्यभेदः। तथा सप्तदशानि पृष्ठानीत्यत्र पृष्ठद्रव्यस्तोत्रसम्बन्धे सप्तदशता पृष्ठसम्बन्धे च विधीयमाने वाक्यभेद इत्यभिप्रेत्य वाक्यप्रसङ्गेन गुणविधित्वानुपपत्तौ फलितमाह—**अत इति**। कर्मणां नामधेयानि कर्मनामधेयानि, केषां कर्मणामत आह—**वाक्यान्तरैरिति**। एवं गुणवाक्यगतवाक्यभेदप्रसङ्गालोचनेनोत्पत्तिवाक्यगताज्यादिशब्दानां गुणविधित्वनिरासेन कर्मनामत्वं व्युत्पाद्य प्रसिद्ध्यादिभिः गुणविधित्वमुक्तमनुवदति—**यत्त्विति**। रूढ्यभावेऽप्याजिगमनादाज्यानीत्याद्यावयवप्रसिद्ध्या सिद्धं कर्मनामत्वमिति दूषयति—**अवयवेति**।

नन्वाजिगमनमप्यप्रसिद्धमेव लोक इति चोदयति—**कथमिति**। वेदप्रसिद्ध्योत्तरमाह—**अर्थवादेति**। प्रजापतिर्देवेभ्य आत्मानं यज्ञं कृत्वा प्रायच्छदित्युपक्रम्य तानब्रवीदाजिमस्मिन्नितेत्युक्त्वोच्यते—यदाजिमीयुस्तदाज्यानामाज्यत्वमिति (तन्त्रवा०-७-२-१)। तत्रास्मिन्यज्ञे आजिं काष्ठां गच्छतेति प्रजापतिवचनादेतानि स्तोत्राण्याजिं कृत्वा यस्मादागता देवाः, तस्मादाजिं काष्ठामर्हन्तीति आज्यानि स्तोत्राण्यवगम्यन्त इत्यर्थः।

पृष्ठशब्दव्युत्पत्तिमपि दर्शयति—**स्पर्शनेति**। आपो वा ऋत्वियमार्च्छन् तासां वायुः पृष्ठे व्यवर्ततेत्यादिनार्तवयुक्तानामपां पृष्ठे वायुना स्पृष्टे रथन्तरादीनामुत्पत्तिप्रतिपादनात् पृष्ठनामकरथन्तरादिसाधनकस्यापि स्तोत्रस्य युक्तं पृष्ठनामत्वमित्यर्थः।

बहिष्पवमानपदं व्युत्पादयति—**पवमानेति**। चित्राशब्दं व्युत्पादयति—**दधीत्यादिना**। विचित्रनानाद्रव्यकत्वेन प्रकृतप्राजापत्येष्टेश्चित्रत्वादिष्टित्वेन स्त्रीत्वाच्च चित्रापदार्थतेत्यर्थः। कर्मण्यपि प्रसिद्धिसम्भवे फलितमाह-**तस्मादिति**। एवं तावद्यस्मिन् गुणोपदेश इति सूत्रावयवसूचितवाक्यभेददोषेण गुणविधित्वं निराकृत्य नामधेयत्वं प्रतिपादितम्। इदानीं प्रधानतोऽभिसम्बन्ध इति सूत्रावयवमावृत्याशङ्कोत्तरत्वेन व्याख्यातुं शङ्कामुत्थापयति—**अथ कस्मादिति**। ततश्चार्थभेदाभावान्न वाक्यभेद इति भावः। सूत्रावयवं व्याकुर्वन् उत्तरमाह—

विशिष्टानामिति। एकक्रियावशीकारान्यथानुपपत्त्या हि विशेषणविशेष्यभावो भवति। पञ्चदशान्याज्यनीत्यादौ तु प्रधानक्रियावाचकाख्याताश्रयणान्न तद्वशीकारानुपपत्त्या तदवगतिरित्यर्थः। भवतिक्रियावशीकाराद्विशेषणविशेष्यभावो भविष्यतीत्यभिप्रेत्य चोदयति—**नन्विति।** इदं पदद्वयं विशिष्टानां वाचकमिति सम्बन्धः। तस्माद्वाक्यं विशिष्टान्याज्यादि-स्तोत्रेषु विधास्यतीत्याह—**तदिति।** प्रधानक्रियावशीकारेणैव विधीयमानयोर्विशेषणविशेष्यभावोऽरुणैकहायन्येत्यादिषु दृष्टः। न च भवतिवाच्यायास्सत्ताक्रियायाः द्रव्यसङ्ख्ये प्रति प्राधान्यमात्मलाभोपकारजननेन गुणत्वादित्यभिप्रेत्य दूषयति—**नैतदिति।** कथं तर्हीत्यत आह—**एकत्रेति।** कस्मादेवमित्याशङ्क्य पदद्वयस्य विधायकत्वे दूषणमाह—**उभयस्मिन्निति।** सम्बन्धयितुः प्रधानक्रियारूपस्याभावादित्यर्थः। मा भूतर्ह्युभयमपि विधायकं तत्राह—**अविधायक इति।** स्तोत्रसम्बन्धः पञ्चदशसंख्याया आज्यानां वेत्यर्थः। तस्मादुत्पत्तिवाक्यावगताज्यानुवादेन पञ्चदशत्वसङ्ख्याविधिरेवायम्, स च नामधेयत्वेऽवकल्पत इत्याशयः।

ननु संख्याविशिष्टाज्यविध्यसम्भवेऽपि पञ्चदशान्याज्यानि स्तोत्रेषु भवन्तीत्याज्यादिपदस्य स्तोत्रपञ्चदशादिपदाभ्यां तत्र सम्बन्धार्थाद् द्रव्यसङ्ख्ययोर्विशेषणविशेष्यभावो भविष्यतीत्याशङ्क्याह—**न चात्रेति।** एकं पदमाज्यादिपदं स्तोत्रेष्वाज्यानि पञ्चदशानि इति वचनव्यक्तिभेदस्य तत्र सम्बन्धनिरासेन वाजपेयाधिकरणे वक्ष्यमाणत्वादित्याह—**वचनव्यक्तमिति।** अतस्तन्त्रसम्बन्धेनापि न वाक्यभेदपरिहार इत्याह—**अत इति** ॥ ३ ॥

इति चित्राज्याधिकरणम्।

अथ द्वितीयं चित्राधिकरणम्

त० वा०—इदानीमयौगिकेषु व्रीह्यादिवल्लोकरूढेषु जातिगुणशब्देषु चिन्ता। न ह्यानुमानिककरणत्वानुरोधेन प्रत्यक्षप्रसिद्ध्यभावः[1] सम्भवतीति पूर्वाधिकरणेनासिद्धिः।

उत्पत्तिवाक्यस्य नोदाहरणत्वम्, अपि तु गुणवाक्यस्यैवेति प्रतिपादनम्

ननु 'आज्यैः स्तुवते', पृष्ठैः स्तुवते, बहिष्पवमानेन स्तुवते, इत्युत्पत्तिवाक्यत्वादेतान्युदाहर्तव्यानि। तथा हि—

उत्पत्तौ नामधेयं वा गुणो वाऽप्यवधारितः।
व्यवहाराङ्गतां याति सैवोदाहरणक्षमा॥

---

१ क. प्रसिद्धिभावः।

सा तु नोदाहृता सूत्रकारेण, 'यस्मिन् गुणोपदेश' इति गुणवाक्यस्याऽऽश्रितत्वात्। अथ किमर्थं तेनैव तदाश्रितम्। यत्र क्वचन प्रतिपादिते फलाविशेषात्। पूर्वपक्षनिराकरणहेतुर्वा वाक्यभेदस्तत्र संभवतीत्युदाहृतम्।

अथ वोत्पत्तिवाक्यस्थस्याऽऽज्यादिपदस्य पक्षद्वयेऽपि साकाङ्क्षत्वादेकस्यापि निश्चयहेतुर्नास्तीत्यन्यतः सिद्ध्यपेक्षणादनुदाहरणत्वम्। घृतवाचित्वात्तावन्न स्तोत्रनामत्वं विज्ञायते। यान्याज्यानि, तैः स्तुवत इति च श्रूयते। तत्र कान्येव नामानि कथं वा तेनाभिधीयन्त इति सहाऽप्युत्पत्तिवाक्येनान्यतः सिद्धिरवाप्तव्या। उत्पत्तिवाक्यस्थितमेव चाऽऽज्यादिपदं यथा रूढिं परित्यज्य स्तुतिनामतां प्रतिपद्यते, तथा हेतुर्वाच्य इत्यपेक्षा। गुणविधित्वेऽपि घृतस्य स्तुतावकरणत्वात्तत्सम्बद्धमन्त्रलक्षणयाऽवश्यं सम्बन्धकृद्वाक्यमपेक्षणीयम्। इह विधाने मत्वर्थलक्षणाप्रसङ्गात्। अनुवादत्वे तु नायं दोषो भवति। तेन स्तोत्राणामप्याज्यवत्ताऽन्यत एव लब्धव्येति तदुभयपक्षेऽपि सापेक्षता। ततश्च स्तुवत इत्येतावन्मात्रमत्र विवक्षितमित्याज्यादिशब्दोऽन्यतो निर्णीयते।

पवमानशब्दस्योदाहरणविषये मतभेदस्य प्रदर्शनम्

पवमानशब्दस्तु यौगिकत्वात्पूर्वाधिकरणसिद्धेरनुदाहरणमिति केचित्। अपरे तु मन्यते नोद्भिदादिवत्पवनक्रियां प्रति कर्तृत्वं स्तोत्रस्योपपद्यते, सोमो हि तत्र पवते। ततश्च न कर्मण्यवयवप्रसिद्धिरस्तीति, पवमानार्थमन्त्रकत्वाल्लक्षितलक्षणा मत्वर्थलक्षणातो दुर्बलतरेति वाक्यभेदेनैव सिद्धेरुदाहरणम्। तत्र प्रसिद्ध्यादयः पूर्वपक्षे पूर्ववदेव व्याख्येयाः।

चित्राशब्देन गुणविधिरिति पूर्वपक्षोपपादनम्

चित्रेत्युत्तरपक्षे द्योतनादग्नीषोमीये गुणविधिरिष्टः।

अत्र कारणमुच्यते—

चित्रत्वस्त्रीत्वयोगो हि प्राणिजातौ स्वभावतः।
तेनैते प्राणियागाङ्गं प्रकृतिं दैक्षमाश्रिते॥

स्त्रीत्वादिविभागो हि प्राणिव्यतिरिक्तेऽर्थे शब्दानुकरणमात्रेण विज्ञायते; पश्वादिषु त्वर्थरूपेण। प्रकृतं च दध्यादिद्रव्यात्मकत्वान्नैतद्योग्यं कर्मेत्युत्कृष्यमाणे वाक्याद्यागमात्रसम्बन्धिनी प्रसक्ते सामर्थ्यात् प्राणियागमाकाङ्क्षन्ती 'प्रकृतौ वा द्विरुक्तत्वात्' इत्यनेन न्यायेन सर्वप्राणियागपरमप्रकृतिमग्नीषोमीयं गच्छतः। तत्र यद्यप्युत्पत्तिवाक्यशिष्टं कृष्णसारङ्गलोहितसारङ्गादिगुणान्तरम्, पुस्त्वं च बाधकं संभाव्यते, तथाऽपि पूर्ववदेव बाध-विकल्पौ वक्तव्यौ। साप्तदश्यपूर्वपक्षन्यायश्चात्र द्रष्टव्यः। एकपदोपात्तानेकार्थविधानाच्चैककारकनिबन्धनत्वाद-

वाक्यभेदाभिप्रायः। पशुकामशब्दोऽपि च स्वर्गकामाधिकरणपूर्वपक्षन्यायेनार्जनाङ्गत्वादनुवादोऽभिमतः न यागफलम्। न हि पशुयागः पशुमकामयमानेनानुष्ठातुं शक्यते। यागानुवादो विज्ञातत्वादिति।

सर्वत्राऽऽख्यातसम्बद्धे श्रूयमाणे पदान्तरे।
विधिशक्त्युपसंक्रान्तेस्स्याद्धातोरनुवादता ॥

यावद्यावद्विधेयान्तरमुपादीयते, तावत्तावत्पूर्वत्रानेकशक्तिकल्पनाभयादनुवादत्वाकाङ्क्षा भवति। अगत्या तु तत्रापि विध्यङ्गीकरणम्। अस्ति चात्र स्त्रीत्वचित्रत्वभागग्नीषोमीययाग इत्यनूद्यते।

अत्र मतान्तरस्य निर्देशः, तत्रास्वारस्यवर्णनम्

गुणे फलकल्पनायां यजतेरविवक्षेति। किमर्थं गुणविधित्वपक्ष एव सन्निराक्रियते। सिद्धान्तग्रन्थोऽयं प्रमादाल्लिखित इति केचित्। अपरे त्वाहुः—फलसंबन्धे किल प्रधानत्वाद् गुणोक्तिविघातः स्यादिति। तदयुक्तम्। सर्वथा नामधेयप्रतिपक्षो गुणविधिः। स च फलसंबन्धेऽप्यनपगतः। तथा च[1] वक्ष्यति **'स्थित एतस्मिन्नधिकरणे गुणविधिर्नामधेयमिति विचार इति'** (२-१-१)। फलसम्बन्धे ह्येकान्तेन यागसामानाधिकरण्याभावाद् गुणविधिरेव स्यादिति।

अत्र विषये वार्तिकमतम्

तेनैवं वाच्यम्। इह तु त्रयः पक्षाः प्रतिभान्ति—गुणविधिः फले यागे वा, नामधेयं वेति। एकैकस्य च द्वयं द्वयं निराकर्तव्यम्। तत्र पूर्वपक्षस्थ एव दुर्बलतरत्वात्तृतीयं पक्षं निराकरोति, धातुपरार्थ्यप्रसङ्गादिति। अतश्च 'व्रीहिभिर्यजेत' इतिवद्यागे गुणविधानम्, करणभूतस्यापि च यागस्योत्पत्तिवाक्यावगतकरणत्वार्थाक्षिप्तसाध्यांशानुवादेन गुणे विधीयमाने न मत्वर्थलक्षणा। गुणवाद्येव वाऽनभिभवसमर्थं यागे गुणविधानमाश्रयति। फले गुणविधिकल्पनायां पूर्वाधिकरणोक्तदोषप्रसङ्गादिति।

आज्यशब्दे न गुणविधिः

तथा 'पञ्चदशान्याज्यानि' इत्यत्र 'अस्तिर्भवन्तीपरः' इति सत्तोपकल्पनं प्रयोगवचनाच्च विधिः। ननु च पञ्चदशानि सप्तदशानीति चैवंरूपः शब्दो न संख्यामात्रवाची, 'स्तोमे डविधिः पञ्चदशाद्यर्थः' = इति स्मरणात्। न हि स्तोम इति स्तोत्रीयसंख्यातोऽन्य विधीयते। नैष दोषः। स्तोत्रसाधनमात्रपरिच्छेदेन स्तुतिमानात्मकस्तोमसिद्धेः सदृशमृक्परिच्छेदे घृतपरिच्छेदे च स्तुतिमाननिमित्तस्तोमवाचित्वम्। न चात्र मत्वर्थलक्षणा। कुतः?

१. जै० सू० (२-१-१) इत्यत्र भाष्यकार इति शेषः।

श्रूयमाणस्य वाक्यस्य न्यूनाधिकविकल्पने ।
लक्षणावाक्यभेदादिदोषो नानुमिते ह्यसौ ॥

इह तावदाज्यादीनां श्रुतवाक्यसंयोगाभावादवश्यं प्रकरणाम्नानानुमितवाक्यसंबन्धपूर्वकः प्रयोगवचनविधिराश्रयितव्यः । तेन मत्वर्थ एव प्रतिपाद्यत इति न लक्षणा ।

तत्रैतत्स्यात्—द्रव्यत्वादाज्यादीनां कर्तव्यताविशेषात्मकेतिकर्तव्यतार्थिना प्रकरणेन न ग्रहणमिति ? सत्तैवात्र क्रियेत्यनुपालम्भः । प्रधानदेशत्वाच्चाङ्गानामाज्यादिभिरवश्यं स्तोत्रसमीपे भवितव्यम् । अतश्च यथैव 'अग्निमुपनिधाय स्तुवतीतेत्यत्राग्निः सत्तामात्रेणोपकरोति, एवमिहापीति निर्दोषम् । तस्माद् गुणविधानमिति ।

अत्राभिधीयते—'प्रधानतोऽभिसंबन्ध' इति । अनेकार्थविधानं हि प्रधानकर्मविधाने सत्युपपद्यते । अत्र पुनः कर्मानुवादेन गुणो विधीयते । न च गुणानां परस्परं सम्बन्धो विद्यते । तत्रैकगुणविधाने गुणान्तरानाक्षेपादर्थापत्त्यभावे श्रौतानेकविधिव्यापारकल्पनायां पुनः पुनरुच्चारणं प्रत्ययस्य कर्तव्यमिति, वाक्यभेदः स्यात् ।

आह च—

'अर्थादनेकमप्यर्थं विधापयति भावना ।
विशेषणविधिस्त्वन्यन्न गृह्णाति विशेषणम् ॥' इति ।

एकोपदोपात्तेऽपि चानेकविधिशक्तिकल्पनागौरवमस्त्येव । उत्पत्तिवाक्यशिष्टे गुणान्तराविरोधाच्चा[1]शक्तिः ।

तथा हि—

उत्पत्तिवाक्यविज्ञातं कर्म सर्वं ह्यनूद्यते ।
न चाऽऽश्रितगुणे शक्यं तद्विरोधि गुणान्तरम् ॥

यत्रानूद्यमान एवावश्यं गुणोऽप्यनुवादितव्यः, तत्र नैरपेक्ष्यदर्शनादाकाङ्क्षाधीनसंबन्धगुणान्तरविधानानुपपत्तिः । न च निष्कृष्य क्रियामात्रं गुणविधिः शक्यः कर्तुम् । कुतः ?

प्रथमं हि स्ववाक्यस्थैर्गुणैः सम्बध्यते क्रिया ।
वाक्यान्तरगतैः पश्चान्न शुद्धा सा ह्यवाप्यते ॥

यानि परस्परनिरपेक्षाणि व्रीहियवादिवाक्यवत्प्रवर्तन्ते, तेषां तुल्यबलवत्त्वाद्भवति विकल्पः । इह चोत्पत्तिवाक्यमन्यनिरपेक्षं विदध्यात्, नोत्पन्नवाक्यम्,

१ क. गुणान्तरावरोधा ।

अनुत्पन्नेऽनुवादानुपपत्तेः। पशुकामसम्बन्धाच्च पदान्तरगतार्थग्रहणनिमित्तोऽपि वाक्यभेदो भिद्यते। यद्यपि च फलं न विधीयते, तथाऽपि तत्र कर्मविधेरस्त्येव गौरवम्। अपि च कर्मणः फलगुणौ प्रति युगपद्विध्यनुवाददोषोऽपरः स्यात्। न च पशुकामपदमर्जनाङ्गत्वात्प्राप्तमनूद्यते। कथम्?

पुरुषार्थो हि सर्वेण स्वरसादेव काम्यते।
तत्साधनतदङ्गेषु प्रवृत्तिः प्रार्थनादृते॥

न हि साधनभूतं पशुं कश्चित्कामयते, विनैव तु कामेन प्रार्थितान्यथानुपपत्त्या तमुपादत्ते। गौणी वा तस्य काम्यता भवेत्। अतः स्वातन्त्र्येण यन्मुख्यया वृत्त्या काम्यते, तदेव कामशब्दोपसम्बन्धात्फलं प्रतीमः। विस्तरेण चैतद् **'असाधकं तु तादर्थ्यात्'** (६-१-२) इत्यत्र वक्ष्यामः। फलं चाग्नीषोमीयस्य क्रत्वङ्गत्वान्नैतत्, अन्यद्वाऽस्तीत्यनुवादासम्भवः। प्रकरणं च बाध्येत, प्राजापत्यस्य यागस्य। नामधेयत्वे तु कर्मफलसंबन्धमात्रकरणान्न कश्चिद्दोषः।

'पञ्चदशान्याज्यानि' इति द्रव्यसंख्ययोरुभयोः स्तोत्रेष्वप्राप्तत्वान्नान्यतरानुवादे नेतरविधानसंभवः। कर्मान्तरस्थं च न प्रतीयते। तदनुवादेन च विधावकर्माङ्गत्वप्रसङ्गः, प्रकरणबाधश्च। न च विशिष्टद्रव्यविधिरुपपद्यत इति वक्ष्यते 'तत्रैकत्वमयज्ञाङ्गम्' (४-१-११) इति। न चाक्रियाविशेषणं विधीयते, विधायकस्य नामपदैः साक्षादसम्बन्धात्। न चेह क्रियोपात्ता, या विधीयमानाऽर्थादनेमपि गुणमाक्षिपेत्। न चैषां स्तुतिप्रयोगवचनेन ग्रहणम्, अक्रियात्मकत्वात्।

आह च—

'नावान्तरक्रियायोगादृते वाक्योपकल्पितात्।
गुणद्रव्ये कथंभावैर्गृह्णन्ति प्रकृताः क्रियाः॥' इति।

न च भवतिक्रियां प्रत्यङ्गत्वमुपपद्यते। सर्वोऽपि हि लब्धात्मकोऽन्यत्र व्याप्रियते। सत्तायस्तु वस्त्वात्मलाभमात्रापवर्गान्न साध्यत्वम्। तद्व्यतिरिक्तसाध्यान्तरानपेक्षणाच्चोपकारासम्बन्धान्नेतिकर्तव्यतात्वम्। यत्तु रथन्तरं भवतीत्येवंचोदितानामपि प्रकरणेन ग्रहणम्, तदतिदेशप्राप्तावान्तरक्रियासम्बन्धविज्ञानात्। न वाऽऽज्यादीनां लोके सत्ता न सिद्धा, येनेदानीं भाव्येत। स्तुतिप्रयोगसंनिधिस्थापनभावना करिष्यत इति चेत्? न। अचोदितत्वात्। **'अग्निमुपनिधाय'** इति तु स्पष्टं विधानम्। आत्मलाभव्यतिरिक्ता चेयं क्रिया शक्यते कथंभावेन ग्रहीतुं सिद्धान्ते। न च वाक्यस्यार्थवत्त्वन्नान्यथानुपपत्त्या विनियोजकवाक्यकल्पना। यदि तु 'आज्यैः स्तुवते' इत्यनेन' विहितानां पञ्चदशत्वविधिरुच्यते, ततः पूर्वाधिकरणन्यायेन सैव मत्वर्थलक्षणेति मत्वा वदति। अपि चाऽऽज्यानि स्तोत्राणीत्यादिसंसर्गिद्रव्यत्वाच्चाऽऽज्यानां साक्षात्पञ्चदशत्वयोगा-

भावादश्रुतपलादिपरिमाणकल्पनाऽवश्याश्रयितव्या भवेत्। तेनैवं ज्ञायते यद्यप्युत्पत्तौ नामत्वं न ज्ञातम्, गुणवाक्ये च तस्यानधिकारः, तथाऽप्येतद्गुण-विधानमेवं सिध्यति। यद्युत्पत्तावाज्यशब्दो नामधेयं नान्यथेति।

गुणवाक्योपपत्त्यर्थं समभिव्याहृतेन च।
अन्वाख्यानार्थवादाच्च नामधेयत्वमाश्रितम्॥

'यदाजिमीयुस्तदाज्यानामाज्यत्वामि'ति। यस्माद्देवाः प्रजापतिवचनादेतेषु स्तोत्रेष्वाजिमधावन्। ततस्तदर्हत्वादेतान्याज्यानीति।

तथा 'तासां वायुः पृष्ठे व्यवर्तत' इति, यस्मादपां वायुना पृष्ठे स्पृष्टे रथन्तरादीनि जातानि तस्मात्तानि पृष्ठानीत्यर्थवादाद्विज्ञातम्। तत्प्रकृतित्वाच्च वामदेव्यादिषु पृष्ठशब्दप्रसिद्धिः **द्वावेतावर्थविकस्य वाक्यस्याशक्या**वित्यस्यानन्तरमथ **कस्मान्न पञ्चदशसंख्याविशिष्टानी**त्येवमादि द्रष्टव्यम्। **विशिष्टानां वाचकस्याभावादिति**—प्रधानाख्यातानुच्चारणाभिप्रायम्।

ननु पदद्वयमिति—भवतिक्रियासंबन्धाभिप्रायम्। **नैतत्पदद्वयमपि**[1] **विधायक**मिति। प्रधानक्रिया हि विशेषणानि पिण्डीकरोति, सत्तायास्तु प्रत्येकवर्तित्वान्न समुदाये वाक्यपरिसमाप्तिः। अतश्च परस्परसम्बन्धाभावः। पञ्चदशानि यानि कानिचिद्भवन्ति, आज्यान्यपि यावन्ति तावन्ति भवन्तीति कल्पना। तस्मान्नोभयं विधायकम्। न चानुवादकम्, स्तोत्रेषु तादृशस्याभावादनर्थकत्वप्रसङ्गाच्च। तस्मादेकानुवादेनेतरविधिर्नामधेयत्वेऽवकल्पते। विधायकमिति चात्र विधेयार्थोपनयनव्यापारात्पुनः पुनरभिहितम्। न तु नामपदस्य[2] विधिशक्तिरस्ति। पञ्चदशानीति च स्तुतिसाधकतमस्तोत्रार्थक्परिच्छेदान्मुख्यं स्तुतिमाननिमित्तं स्तोमत्वमिति शब्दसामञ्जस्यं भविष्यति॥ ३॥

इति द्वितीयं चित्राज्याधिकरणम्॥ २॥

अथ द्वितीयं चित्राधिकरणम्

न्या० सु०—इत्युदाहरणमितीतिकरणेन भाष्यकृता गुणविधौ प्रसजद्वाक्यभेदानां वाक्यानामुदाहरणत्वं 'यस्मिन् गुणविधौ' प्रसजद्वाक्यभेदानां वाक्यानामुदाहरणत्वं 'यस्मिन् गुणोपदेश' इति सूत्रावयवसूचितं दर्शितम्। तदिहापि कर्मसामानाधिकरण्येनैव गुणविधित्वनिराससिद्धेः, कारणान्तरोपन्यासानर्थक्यादयुक्तमाशङ्क्य, सामानाधिकरण्यहेतुकनिर्णयाविषयत्व दर्शयितुमाह—**इदानीमिति**। अयौगिकशब्दव्याख्यानार्थं लोकरूढेष्वित्युक्तम्। कस्मिन्नर्थे लोके रूढा इत्यपेक्षायां जातीत्युक्तम्। आज्यशब्दो घृतजातौ रूढः, पृष्ठशब्दः शरीरावयवजातौ, चित्राशब्दो गुणे, पवमानशब्दोऽपि पवनक्रियायोग-

---

१ क. न तत्पद। २ क. (टिप्पण्यां) नामधेयस्य।

निमित्तत्वात्सर्वत्र यौगिकैर्द्रव्यमेवाभिधीयत इति न्यायात्पावनक्रियाकर्त्तरि रूढः। अनेन च यदुत्पत्तावपूर्वमिति सूत्रावयवनिर्दिष्टस्य सामानाधिकरण्यनिर्देशानिरूढत्वाविशेषणद्वययुक्तस्य पूर्वाधिकरणविषयस्यात्रानिरूढत्वविशेषणाभावेनाभावात् पूर्वाधिकरणप्रत्युदाहरणरूपेण पूर्वस्मिन्प्रत्यवस्थानादनन्तरसङ्गतिरप्युक्ता भवति। एतच्च 'न चैते कर्मणि प्रसिद्धा, न च यौगिका' इत्यत्र भाष्ये स्पष्टयिष्यते। ननु निरूढार्थत्वेनाज्ञातसन्दिग्धत्वाभावात्सामानाधिकरण्यानिर्णयत्वेऽपि प्रधानभूतकरणत्वानुरोधात्कर्मवाचित्वानुमानं भविष्यतीत्याशङ्क्याह - **न हीति**। प्रसिद्धिद्वयस्यापि कल्प्यत्वे प्रधानाश्रितयेतरा बाध्यते, न तु क्लृप्तायाः प्रधानाश्रितयापि कल्प्यया बाधो युक्त इत्याशयः।

आज्याद्युदाहरणान्याक्षिपति—**नन्विति**। ननु चित्रावाक्यवदनुत्पत्तिवाक्योदाहरणेऽपि न दोष इत्याशङ्क्याह—**तथा हीति**। उत्पत्तिशब्देनेह कर्मनिर्देशो विवक्षितः। तदभावे च निर्विषययोर्गुणनामधेययोरवधारणासम्भवान्न व्यवहाराङ्गत्वं स्यादिति भावः। अतः सैवोदाहरणाय क्षमा=युक्तेत्यर्थः। नातिप्रयत्निनां समाधानमाह—**सा त्विति**। उदाहर्त्तव्याप्युपपत्तिर्यत्रोदाहृता तत्सूत्रकृता गुणवाक्यस्योदाहरणायाश्रितत्वादित्यर्थः। सूत्रकारस्यापि पर्यनुयोगसाम्येनैतत्समाधानं दूषयति—**अथेति**। तेषामेव परिहारमाह—**यत्रेति**। उत्पत्तिवाक्योदाहरणे फलविशेषस्योक्तत्वादेतत्परिहारापरितोषेण परिहारान्तरमाह—**पूर्वपक्षेति**। उत्पत्तिवाक्ये पक्षद्वयोपपादकहेतुसद्भावे तत्रैव पूर्वोत्तरपक्षौ विचार्य पक्षद्वयबलाबलनिर्णयार्थं वाक्यान्तरगतेनापि वाक्यभेदेन पूर्वपक्षनिराकरणोपपत्तेरत्राप्यपरितोषात्स्वमतेनान्यथा परिहरति—**अथ वेति**। नामधेयत्वे तावदन्यतः सिद्ध्यपेक्षामुपपादयति—**घृतेति**। निरूढार्थत्वात्सामानाधिकरण्यमत्रानिर्णायकमित्याशयः। किं च 'न नामधेयं विधायिष्यत' इत्यनेन न्यायेन नामधेयार्थविधानेऽपि सञ्ज्ञासञ्ज्ञिसम्बन्धस्यानुवाद्यत्वात् अन्यतः सिद्धिरपेक्षणीयेत्याह—**यान्याज्यानीति**।

ननूद्भिदादिवदुत्पत्तिवाक्यगतकर्मसामानाधिकरण्येनैव कर्मसंज्ञात्वसिद्धेर्नान्यतः सिद्ध्यपेक्षेत्याशङ्क्य—**सहापीत्युक्तम्**। समानाधिकरणकर्मनिर्देशस्योत्पत्तिशब्देन विवक्षितत्वात्सत्यपि सामानाधिकरण्ये प्रवृत्तिनिमित्तं विना कर्मनामत्वानिर्वाहात् पशुकामादिवच्चेहोत्पत्तिवाक्ये प्रवृत्तिनिमित्तद्योतकशब्दाभावादन्यतः सिद्ध्यपेक्षेत्यर्थः। सहैव दशभिः पुत्रैर्भारं वहति गर्दभीतिवत्सहयोगिन्या तृतीयया सप्तम्यर्थलाभः। ननु सामानाधिकरण्येनावधारिते नामधेयत्वे कथमनेनाभिधीयत इति प्रवृत्तिनिमित्तापेक्षायां तद्बलेन कस्यचित्कल्पयितुं शक्यत्वात्तदर्थं च वाक्यान्तरोदाहरणेऽर्थवादस्योदाहार्यत्वापत्तेरपरितोषात्स्वमतेन रूढिपरित्यागायान्यतः सिद्ध्यपेक्षामाह—**उत्पत्तीति**। उत्पत्तिवाक्ये सामानाधिकरण्यात्स्तुतिनामधेयतया स्थितमवगतमाज्यादिपदं बाधकरूढित्यागेन स्तुतिनामत्वनिर्वाहायान्यतः सिद्ध्यपेक्षमित्यर्थः। यद्योत्पत्तिवाक्यस्थस्य आज्यादिपदस्याविचार्यत्वं पूर्वमुक्तम्। इदानीमुत्पत्तिवाक्यस्थमेवाज्यादिपदं विचारयितुमुपायत्वेन

गुणवाक्यस्यमेवाज्यादिपदं विचारयितुमुपायत्वेन गुणवाक्यस्थाज्यादिपदविचार्यतोच्यत इति विवेकः। गुणविधित्वेऽन्यतः सिद्ध्यपेक्षामुपपादयति—**गुणेति**। आज्यशब्देन तत्प्रकाशकान्मन्त्राल्लक्षयित्वा तेषां स्तोत्रसम्बन्धकारिवाक्यमाज्यप्रकाशकैर्मन्त्रैः स्तोतव्यमित्येवंविधमपेक्षणीयमित्यर्थः।

नन्वाज्यैः स्तुवत इत्यत्रैवाज्यशब्दलक्षितानां मन्त्राणां स्तुतिकरणत्वेन विध्युपपत्तेर्न वाक्यन्तरापेक्षेत्याशङ्क्याह—**इहेति**। ननु वाक्यान्तरप्राप्तस्तोत्रमन्त्रसम्बन्धानुवादेऽपि मत्वर्थलक्षणा तुल्येत्याशङ्क्याह—**अनुवादत्वे त्विति**। प्रमाणान्तरानुपसारित्वादनुवादे प्रसज्यमानापि लक्षणा न दोष इत्यर्थः। नन्ववाचकत्वेऽपि घृतस्य सन्निधानमात्रेण स्मारकतया स्तुत्युपयोगित्वात् 'रथघोषेण माहेन्द्रस्तोत्रमुपाकरोती'तिवत्करणत्वोपपत्तेर्नाज्यशब्देन मन्त्रलक्षणापत्तिरित्याशङ्क्याह—**तेनेति**। येन कारणेन विधौ मत्वर्थलक्षणादोषः, नानुवादे, तेन कारणेन स्तोत्राणामाज्यलक्षितमन्त्रवत्तावदाज्यवत्ताप्यन्यत एव लब्धव्येत्यर्थः। पक्षद्वयेऽप्यन्यसापेक्षत्वमुपसंहरति—**तदिति**। तस्मादित्यर्थे तदित्यव्ययम्। आज्यादिशब्दार्थानिर्णयं तद्युत्पत्तिवाक्यस्य कीदृशोऽर्थ इत्यपेक्षायामाह—**ततश्चेति**। गुणवाक्योदाहरणकारणमुपसंहरति—**इतीति**। उत्पत्तिवाक्यस्थस्यैवाज्यादिशब्दस्यान्यतोऽर्थनिर्णयार्थे गुणवाक्योदाहरणमित्यर्थः।

पवमानशब्दोदाहरणं पूर्वन्यायसिद्धत्वेनाक्षिपति—**पवमानशब्दस्त्विति**। यौगिकत्वेऽपि पवनक्रियाकर्त्तरि निरूढत्वात्, स्तोत्रस्य च पवमानक्रियाकर्तृत्वासम्भवान्न पूर्वन्यायेन सिद्धिरिति परहरति—**अपरे त्विति**। ननु पवमानशब्दवाच्यसोमप्रकाशकमन्त्रसाध्यत्वात् स्तोत्रेऽपि पवमानशब्दप्रसिद्धेः सन्देहे सत्यस्त्वेव पूर्वन्यायविषयतेत्याशङ्क्याह—**सोमो हीति**। तत्रावयवप्रसिद्ध्यभावाल्लक्षितलक्षणा स्यात्। सा च मत्वर्थलक्षणातो दुबलेति सामानाधिकरण्येन नामधेयत्वासिद्धेर्न पूर्वन्यायसिद्धान्त इत्यर्थः। नन्वेवं सति मत्वर्थलक्षणाप्रसङ्गेनात्र गुणविधित्वनिरासासिद्धेः। केन हेतुना निरास इत्याशङ्क्य—**वाक्यभेदेन वेत्युक्तम्**। अनेन गुणविधौ प्रसङ्गाद्वाक्यभेदानामिहोदाहरणत्वं वाक्यभेदपरिहारसम्भवासम्भवाभ्यां च सन्देह इत्यपि सूचितम्।

प्रसिद्धेरिति पूर्वपक्षभाष्यं व्याचष्टे—**तत्रेति**। प्रवृत्तिविशेषकरत्वेऽर्थवत्त्वं हेतुः, वाक्यवत्स्वरूपे वार्थवत्त्वे प्रसिद्धिर्हेतुः। त्रयोऽपि वा गुणविधित्वे साक्षाद्धेतव इति व्याख्यात्रयं पूर्वशब्देनातिदिष्टम्। विज्ञातत्वान्न यागविधिरिति विशिष्टविधिनिरासात् गुणे फलकल्पनायामित्यनेन च फले गुणविधिनिरासात्। कर्मणि चित्राशब्दो गुणविधिरिष्टः। स कस्मिन्कर्मणीत्यपेक्षायामाह—**चित्रेति**। ननु 'दधिमधुपयोघृतन्धाना उदकं तण्डुलाः, तत्संसृष्टं प्राजापत्यमिति प्रकृतप्राजापत्येष्टियागेनाऽग्नीषोमीये गुणविधिर्भाष्यकृतोऽभिप्रेत इति कथं ज्ञायत इत्यपेक्षायां चित्रो गुणो विधीयमानः स्त्रीलिङ्गानिर्देशात्स्त्रीद्रव्यके यागे विधीयेत, न चासौ स्त्रीपुंपशुद्रव्यके यागेऽग्नीषोमीयेऽस्ति, पशुकाम-

पदोपादानात्। पशुकामकर्तृके विधीयेत, सोऽपि पशुकामः कर्त्ता नाग्नीषोमीये, ज्योतिष्टोमाधिकारिकर्तृकेऽस्तीत्युत्तरपक्षे निरासेन द्योतनादित्युक्तम्। प्रकृतकर्मत्यागेन प्रकृते गुणविधिः कस्मादिष्ट इत्याशङ्क्याह—**अत्रेति**। चित्रत्वस्यात्रैकपदोपात्तेन स्त्रीत्वेन योगोऽवगम्यते, स्त्रीत्वयोगश्च प्राणिजातावेव सम्भवति तेन कारणेनैते चित्रत्वस्त्रीत्वे प्राणिद्रव्यकस्य यागस्याङ्गमित्यर्थः। स्त्रीत्वयोगिनिमित्तं चित्रत्वस्य प्राणियागाङ्गत्वं वक्तुं द्विवचनम्। नन्वप्राणिन्यपि खट्वादौ स्त्रीप्रत्ययदर्शनान्न स्त्रीत्वस्य प्राणित्वाव्यभिचारितेत्याशङ्क्य 'स्वभावत' इत्युक्तम्। खट्वादौ त्वविद्यमानमेव स्त्रीत्वं टाबादिप्रत्ययदर्शनेनारोप्यत इति भावः।

ननु प्राणियागाङ्गत्वेऽपि मेष्यां चित्रमात्रविध्युपपत्तेर्नाग्नीषोमीये चित्रत्वस्त्रीत्वयोर्विधिर्युक्त इत्याशङ्क्य—**प्रकृतिमित्युक्तम्**। प्राकृतेन कृष्णसारङ्गादिना गुणान्तरेण निराकाङ्क्षत्वान्न मेष्यामनारभ्यविधिना चित्रत्वं विधातुं शक्यम्। प्रकृतौ त्वाकाङ्क्षावशाच्छक्यमित्याशयः। कथमग्नीषोमीयस्य सर्वप्राणियागप्रकृतितेत्याशङ्क्य 'दैक्षस्य चेतरेषु'त्याष्टमिकन्यायं सूचयितुं 'यो दीक्षितो यदग्नीषोमीयं पशुमालभेते'ति दीक्षायागयुक्तवाक्यविधाननिमित्तोऽग्नीषोमीये दैक्षशब्दः प्रयुक्तः।

श्लोकं व्याचष्टे—**स्त्रीत्वादिति**। सर्वप्राणियागेषु कस्मान्न विधीयत इत्याशङ्क्य, तार्तीयन्यायोपन्यासः। सौत्यस्यैकादशिनीप्रकृतित्वादैकादशिनीनां च पशुगणप्रकृतिनिमित्तत्वात्कथं दैक्षस्य सर्वप्राणियागप्रकृतितेत्याशङ्कानिरासार्थः परमशब्दः।

नन्वग्नीषोमीयक्रमाम्नातेन कृष्णसारङ्गादिना गुणेन उत्पत्तिवाक्यशिष्टेन पुंस्त्वेन च बाधापत्तेर्नाग्नीषोमीये चित्रत्वस्त्रीत्वयोर्विधिर्युक्त इत्याशङ्क्याह—**तत्रेति**। कृष्णसारङ्गादेरुत्पत्तिवाक्यशिष्टत्वाभावादुत्पत्तिवाक्यशिष्टं पुंस्त्वम्, क्रमाम्नातं कृष्णसारङ्गादिगुणान्तरं चेति व्यवहितान्वयः। कृष्णसारङ्गोऽग्नीषोमीय इति सामानाधिकरण्यनिर्देशाभिप्रायो वोत्पत्तिशब्दः। फले विधावुद्भिदेव सोमस्य बाधः यागे तु विधौ विकल्प इति पूर्ववच्छब्दार्थः। नन्वनारभ्याधीतत्वाच्चित्रत्वस्त्रीत्वयोरेव 'प्रकरणविशेषात्तु विकृतौ विरोधः स्यादिति तार्तीयिकन्यायेन बाधः स्यादित्याशङ्क्याह—**साप्तदशेति**। सामिधेनीमात्रसंयोगेन श्रुतस्य साप्तदश्यस्याऽवल्प्तक्रतुसंयोगत्वात् पाञ्चदश्येन प्रकरणक्लृप्तक्रतुसंयोगेन बाधो युक्तः। चित्रत्वस्त्रीत्वयोस्तु क्रतुसंयोगेनैव श्रवणात्तद्विशेषाग्नीषोमीये सम्बन्धो। यथा कृष्णसारङ्गादेः पशुसंयोगश्रुतस्य क्रमात्तथाऽनयोः सामर्थ्यानुगृहीतात् 'प्रकृतौ वे'ति न्यायादिति तुल्यत्वात् साप्तदश्यपूर्वपक्षे यथोभयोः सामिधेनीसंयोगाविशेषाद्विकल्पः, तथात्रापीत्याशयः।

नन्वग्नीषोमीये चित्रत्ववत् स्त्रीत्वस्याप्यप्राप्तेरनेकार्थविधानाद्वाक्यभेदः स्यादित्याशङ्क्याह—**एकेति**। परस्परासम्बद्धानेकार्थविधौ वाक्यभेदस्यापरिहार्यत्वात् विशेषणविशेष्यभावसिद्ध्यर्थम् एकपदोपादानमुक्तम्। ननु चित्रत्वस्त्रीत्वयोर्द्रव्याश्रितत्वेनान्योन्यविशेषणविशेष्यत्वायोगान्नैकपदोपादानेऽपि न तत्प्रतीतिः सम्भवति इत्याशङ्क्यैककारके-

त्युक्तम् । चित्रत्वस्त्रीत्वविशिष्टमेकं तृतीयोपात्तं कारकं विधीयत इति भावः । ननु चित्रत्वस्त्रीत्वयोरेकपदोपात्तत्वाद्वाक्यभेदानापादकत्वेऽपि पशुकामपदोपात्तफलसम्बन्धविधानाच्चित्रापदोपात्तगुणसम्बन्धविधानाच्च वाक्यभेदः स्यादित्याशङ्क्याह—**पशुकामेति** । स्वतन्त्रकर्मविधौ कामिपदस्य फलपरत्वाभावे नैष्फल्याद्विधानानर्थक्यापत्तेः । फलपरत्वेऽपि फलवज्ज्योतिष्टोमाङ्गभूते अग्नीषोमीये गुणविधौ साक्षात्फलाभावेऽपि ज्योतिष्टोमफलेन परम्परया फलवत्त्वोपपत्तेरयं पशुकामशब्दो न पशुयागफलं प्रतिपादयतीति शेषः ।

ननु अफलस्य काम्यत्वायोगात्कामशब्दोपबन्धे आसाधकं तु तादर्थ्यादिति (६-१-४) स्वर्गकामाधिकरणसिद्धान्तन्यायेन फलपरोऽयमित्याशङ्क्याऽनुवाद इत्युक्तम् । पशोरिहाफलत्वेन मुख्यवृत्त्या भविष्यतीति भावः । कथं प्राप्तिरित्याशङ्क्यार्जनाङ्गत्वादित्युक्तम् । अनर्ज्जितानुपात्तेन पशुना यष्टुमशक्यत्वादकाम्यस्य चोपादानायोगादुपादानाङ्गत्वेन प्राप्ता कामनाऽनूद्यत इत्यर्थः । ननु पशुकामशब्दात्पशोः साधनत्वाप्रतीतेः कथं तदुपादानाङ्गत्वेन कामना प्राप्नुयादित्याशङ्क्य स्वर्गेत्युक्तं स्वर्गकामादिबहुव्रीह्यर्थस्य पुरुषस्य भावनाक्षेपलभ्यत्वात् एकादशाद्यभाष्योक्तन्यायेन स्वर्गकामादिशब्दस्य लोहितोष्णीषादिवत् विशेषणपरत्वावगतेस्तदुपात्तस्य स्वर्गादेर्यागं प्रति गुणत्वेनान्वयः प्राधान्येन वेति सन्दिह्य 'द्रव्याणां कर्मसंयोगे गुणत्वेनाभिसम्बन्ध (६-१-१) इति षष्ठाद्यस्वर्गकामाधिकरणपूर्वपक्षसूत्रे 'भूतभव्यसमुच्चारणे भूतं भव्यायोपदिश्यत' इति न्यायात् भूतस्य स्वर्गपश्वादेर्द्रव्यस्य भव्यं कर्म प्रति गुणत्वेनान्वयस्य वक्ष्यमाणत्वात् पशुकामशब्दात्पशोः साधनत्वावगतिसिद्धिरित्यर्थः । नन्वेवमपि पशुकामपदोपात्तसाधनभूतपशुविधानाच्चित्रापदार्थविधानाच्च वाक्यभेदः स्यादित्याशङ्कां निरस्यन्नर्ज्जनाङ्गत्वेन कामनाप्राप्तिं विवृणोति—**न हीति** । पशुसाधनताग्नीषोमीयस्योत्पत्तिवाक्यादेवावगतेति वदता पशुयागशब्ददेनाशङ्का निरस्ता । चित्रया यजेतेति गुणविधौ विशिष्टविधिनिमित्तगौरवशङ्कानिरासार्थं भाष्यं मध्यप्रतीकेनावतार्योपपादयति—**यागेति** । श्लोकं व्याचष्टे—**यावदिति** ।

नन्वेवं सति न क्वचिद्विशिष्टविधिः स्यादित्याशङ्क्याह— **आगत्या त्विति** । एवं तर्ह्यत्रापि प्रकृते प्राजापत्ययागे तत्र साधनेषु दध्यादिषु चित्रत्वापादनाशक्तेः स्त्रीत्वयोगाभावाच्च चित्रत्वस्य विधातुमशक्यत्वादग्नीषोमीयस्य च दूरस्थत्वादगत्यैव विशिष्टविधिर्भविष्यतीत्याशङ्क्याह— **अस्ति चेति** । दूरस्थोऽपि स्त्रीत्वेनोपस्थापितोऽनुवदितुं शक्यत इत्याशयः । फले गुणविधिनिरासार्थं गुणे फलकल्पनायामिति भाष्यमाक्षिपति— **गुणेति** । नातिप्रयत्निनां समाधानमाह—**सिद्धान्तेति** । प्राधान्यप्रतिपक्षं तु गुणशब्दं मत्वा नाना समाधानमाह— **अपरे त्विति** । अत्र ह्यस्य गुणशब्दस्य प्राधान्यप्रतिपक्षत्वाभावादेतद् दूषयति— **तदयुक्तमिति** । गुणविधित्वस्य प्राधान्यप्रतिपक्षत्वाभावे भाष्यकृतः संमतिमाह— **तथा चेति** । कथमनेन भाष्येण गुणविधेः प्राधान्यप्रतिपक्षत्वाभावो द्योत्यत इत्याशङ्क्याह—**फलेति** । चित्रादिपदं वा फलपदेन सम्बन्ध्यताम् आख्यातपदं वेति विचारे दर्शिते ।

ननु चित्रादिपदस्य फलपदसम्बन्धे तदर्थस्य फलसाधनत्वलक्षणात् प्राधान्यात्तस्य च निर्व्यापारस्य फलसाधनत्वायोगाद्यागं कुर्वता चित्रादिना फलं भावयेदिति वैय्यधिकरण्येन यज्यन्वयापत्तेः सामानाधिकरण्यानिमित्तनामधेयत्वासम्भवादेकान्तेन गुणविधित्वापत्तेर्गुणविधिनिरासेनैव फलपदसम्बन्धनिरासेनैव फलपदसम्बन्धस्य निरस्तत्वात्पूर्वपक्षासम्भवेनायं विचारो न युक्त इत्याशङ्कां निराकुर्वता स्थित एतस्मिन्निति भाष्येण गुणविधेः फलसम्बन्धे सत्यैकान्तिकत्वसूचनादत्र प्रधानप्रतिपक्षता द्वयोः सूचितेत्याशयः।

स्वयं समाधत्ते—**तेनेति**। विशिष्टविधावपि याग एव गुणविधेस्तुल्यत्वं मत्वा त्रय इत्युक्तम्। एकैकस्येति कर्त्तरि षष्ठी तुच्छत्वद्योतनार्थं **चास्य** पक्षस्य निरासो वादिद्वयसम्मतोऽपि पूर्वपक्षावसर एव कृत इत्याह—**तत्रेति**। धातुपारार्थ्यप्रसङ्गादित्यनेन यजतेरविवक्षेति भाष्यावयवो धातोर्विध्यनुपयोगित्वेन प्रत्ययानुग्रहमात्रार्थत्वाभिप्रायो व्याख्यातः। एवं चैक एव पूर्वपक्षोऽवतिष्ठत इत्याह—**अतश्चेति**। ननु विधानवदनुवादेऽपि यागस्य करणत्वाच्चित्रयेति करणतया निर्दिष्टस्य गुणस्य चित्रावता यागेनेति मत्वर्थलक्षणां विना तदन्वयायोगादयमपि पूर्वपक्षो दुर्बल इत्याशङ्क्याह—**करणेति**। कुठारादिषु करणत्वस्योद्यमनादिकर्तृव्यापारव्याप्यत्वापेक्षादर्शनात्करणत्वेनार्थाक्षिप्तस्य साध्यांशस्यानुवादेन गुणविधौ न मत्वर्थलक्षणेत्यर्थः। ननूत्पत्तिवाक्यपरिहारेणेतरवाक्यानां परस्परान्वयाभावान्न गुणविधौ प्रयोगवाक्यावगतकरणत्वाक्षिप्तस्य साध्यांशानुवादो युक्त इत्याशङ्क्योत्पत्तिवाक्येऽपि विधिबलात् करणत्वावगमोऽस्तीति सूचयितुम्[1]—**उत्पक्षेत्युक्तम्**। पूर्वोत्तरपूर्वपक्षभाष्यसन्दंशेनास्यापि पूर्वपक्षभाष्यत्वावगतेः साधारणत्वायोगात् पूर्वपक्षभाष्यमेवैतदिति स्वमतमाह—**गुणेति**। भाष्योक्तस्य धातुपारार्थ्यस्य परपदसम्बन्धविधानव्यवहितकल्पनौत्पत्तिकगुणबाधोपलक्षणार्थत्वं सूचयितुम्—**पूर्वाधिकरणेत्युक्तम्**।

आज्याद्युदाहरणेषु पूर्वपक्षाभिधानार्थं तथेति भाष्यमश्रुतं भवत्यध्याहारादयुक्तमाशङ्क्याह—**तथेति**। अस्तिर्भवन्तीति परः प्रथमपुरुषेऽप्रयुज्यमानोऽप्यस्ती'ति स्मृत्यास्तिधातुर्भवन्तीशब्दवाच्यवर्त्तमानार्थलड्विभक्तिपरः प्रथमपुरुषे समानाधिकरणयुष्मदस्मद्व्यतिरिक्तोपपदे सत्यप्रयुज्यमानोऽप्यस्तीत्यनुशासनात् अस्तिभवत्योश्चैकार्थत्वाद्भवत्यध्याहारेण सतायाः स्तोत्रसमीपे कल्पनं=रचनं पूर्वपक्षिणोऽभिमतमिति शेषः। नन्वेवमपि विधायकाश्रवणाद् गुणविधित्वं न युक्तमित्याशङ्क्याह—**प्रयोगेति**। ननु डप्रत्ययान्तस्य पञ्चदशादिशब्दस्य स्तोत्रीयसंख्यावाचित्वात्तत्समानाधिकरणयोराज्यपृष्ठशब्दयोर्धृतशरीराङ्गवाचिता न युक्तेत्याशङ्कते—**ननु चेति**। कस्मान्नायं संख्यामात्रवाचीत्याशङ्क्य स्मृतिं पठति—**स्तोम इति**। कथमनया स्मृत्या संख्यामात्रवाचित्वं वार्यत इत्याशङ्क्याह—**न हीति**। 'स्तुतेर्मानं स्तोमः' इति स्मृतेः स्तोत्रीयसंख्यावाचित्वावधारणादित्याशयः। स्तुतेः साधनद्वारेण संख्यात्मकमानपरिच्छेद्यत्वात् स्तुतिसाधनपरिच्छेदिकायाः स्तुति-

---

१. उत्पत्तीत्युक्तमिति २ पु० पा० अयमेव मुद्रिततन्त्रवार्तिके दृश्यते।

मानत्वेन स्तोमत्वादृचामिव घृतादेरपि रथघोषवदुपस्थापकतया स्तुतिसाधनत्वोपपत्तेः ऽप्रत्ययाविरोध इति परिहरति – **नैष दोष इति**। स्तोत्रसाधनानामृचामेव परिच्छेदिका संख्या स्तोमशब्दवाच्या, न साधनान्तरपरिच्छेदिका इति शङ्कानिवृत्त्यर्थो मात्रशब्दः। नन्वेवं सति स्तोमशब्दवाच्यस्तोत्रसाधनसंख्यापरिच्छेद्यत्वार्थं घृतादीनां स्तोत्रसाधनत्वं वक्तुम् आज्यवन्ति पृष्ठवन्ति बहिष्पवमानवन्ति स्तोत्राणीति वक्तव्यम्। तथा च[1] मत्वर्थलक्षणाप्रसङ्गान्न लक्षणेत्ययुक्तमित्याशङ्क्याह—**न चात्रेति**।

एतदेव प्रश्नपूर्वकमुपपादयति – **कुत इति**। विवक्षितार्थापेक्षया न्यूनत्वाभ्युपगमे लक्षणावाक्यभेदौ, आधिक्याभ्युपगमेऽत्यादिशब्दोक्तमानर्थक्यम्। अथ वा[2] न्यूनस्याधिकार्थविषयत्वकल्पने लक्षणावाक्यभेदौ गौणत्वाध्याहारौ दोषा इत्यर्थः। न्यूनत्वे लक्षणावाक्यभेदौ, आधिक्ये त्वानर्थक्यम् अन्यथात्वकल्पने विपरिणामव्यवहितकल्पना व्यवधारणकल्पनादोष इति वा योज्यम्। अनुमिते तु विवक्षितार्थाभिधानशक्तस्यैवानुमानान्न कश्चिद्दोष इति भावः। द्रव्यसंख्यारूपानेकार्थविधिलक्षणवाक्यभेदपरिहारोऽपि लक्षणापरिहारन्यायेनैवोक्त इति सूचयितुं वाक्यभेदोपादानम्।

ननु इहाप्याज्यैः स्तुवत इत्यादिषु श्रुतिष्वेवोत्पत्तिवाक्येषु मत्वर्थलक्षणा प्रसज्येतेत्याशङ्क्याह—**इह तावदिति**। विधौ मत्वर्थलक्षणापत्तेः श्रुतवाक्यगतेन विधिना सहाज्यादीनां संयोगाभावात् स्तोत्रप्रकरणे यत्पञ्चदशानीत्यादिगुणवाक्याम्नानम्, तदनुमिते च पञ्चदशसंख्याविशिष्टैराज्यैः स्तोत्रस्योपकर्त्तव्यमित्यादिवाक्येन कृतो यः स्तोत्राज्यादिसम्बन्धः तत्पूर्वकप्रयोगवचनेन विधिरित्यर्थः। नन्वाज्यादीनामक्रियात्मकत्वेन प्रकरणग्रहणायोगान्न तद्वशेन वाक्यानुमानं युक्तमित्याशङ्क्ते – **तत्रेति**। भवत्युपात्ताज्यादिसत्ता प्रकरणग्राह्या भविष्यतीति परिहरति— **सत्तैवेति**।

ननु धातुवाच्यत्वमात्रेण सत्तायाः क्रियात्वेऽपि चेतनक्रियात्वाभावेनाननुष्ठेयत्वान्न प्रकरणग्राह्या भविष्यतीत्याशङ्क्याह – **प्रधानेति**। सत्तायाः स्वरूपेणानुष्ठेयत्वेऽपि, अङ्गत्वेन स्तोत्रसामीप्यावगमात्तस्य च सन्निधिस्थापनासाध्यत्वात्तेन रूपेणानुष्ठेयत्वं भविष्यतीत्याशयः। संसर्गिद्रव्यत्वादाज्यानां स्वरूपेण संख्यायोगाभावेऽपि पञ्चदशाज्यपात्राणि समीपे निधाय स्तोतव्यं-पूर्वपक्षे कर्त्तव्यम्। सप्तदश पराङ्मुखप्राणिस्थापनेन सप्तदश पृष्ठानि समीपे निधाय स्तोतव्यम्। त्रिवृच्छब्दवाच्यं च त्रिपुटा त्रिभिद्यापरपर्यायलताद्रव्यम् पवनार्हद्रव्यं कृत्वा वस्त्रादौ पवमानं सदसो बहिः[3] समीपे निधाय स्तोतव्यं इतीतरवाक्यार्थानुष्ठानं सन्निधिस्थापनमात्रेणाप्यग्निवदुपकारकत्वोपपत्तेः साधकतमत्वविवक्षया उत्पत्तिवाक्येषु अनुवादार्थतृतीयया निर्देशोपपत्तिरिति दर्शयितुमाह-**अतश्चेति**।

---

१. वक्तव्यं तथा चेति २ पु० पा०। २. यद्वेति २ पु० पा०।
३. बहिरिति २ पु० पा०।

नन्वेवं सत्युत्पत्तिवाक्येष्वाज्याद्यनुवादोऽनर्थकः स्यादित्याशङ्कय, प्रशस्तमिदं स्तोत्रं यत्क्रियमाणमाज्यादिसन्निधियुक्तं भवतीत्येवं स्तोत्रप्रशंसार्थत्वेनानुवादसाफल्यं सूचयितुमाहेतीति भाष्यकृता 'गुणोपदेश इत्यनेन गुणोपदेशयुक्तविषयनिर्देशेनैव वाक्यभेदप्रसङ्गस्य गुणविधिनिरासहेतोः सूचितत्वात्प्रधानतोऽभिसम्बन्ध इति सूत्रावयवो नामधेयत्वप्रतिज्ञार्थतया व्याख्यातः। तत्र नामधेयत्वप्रतिज्ञायाः पूर्वसूत्रोक्ताया एवानुषङ्गसम्भवात् प्रधानशब्दस्य च कर्मपरत्वे लक्षणादोषापत्तेः कर्मसम्बन्धस्य च गुणविधावप्युपपत्तेर्नामधेयत्वात् सहार्थेन च तसिप्रयोगादर्शनेनासाधुत्वापत्तेरपरितोषात्स्वयं वाक्यभेदोपपादनार्थतया अवतारणपूर्वकं व्याचष्टे—**प्रधानत इति**।

अनेन च प्रधानद्वारानेकेषां गुणानामनेकविशेषणविधिप्रसवसमर्थैनैकेन विधिना सम्बन्धो भवति। न चात्र प्रधानभूतं कर्म त्वत्पक्षे विधीयत इत्येवं व्याख्यातं विषयनिर्देशकगुणोपदेशशब्दसूचितं गुणविधिनिरासहेतुवाक्यभेदप्रसङ्गव्याख्यानार्थं गुणविधौ हीति भाष्यम् आग्नेयोऽष्टाकपाल इत्यादौ गुणविधावपि वाक्यभेदाभावादयुक्तमाशङ्कय कर्मानुवादविषयत्वेन व्याचष्टे—**अत्र पुनरिति**। पुंपशाविति भाष्येणोत्पत्तिशिष्टपुंस्त्वावरुद्धेऽग्नीषोमीये स्त्रीत्वं विधातुमशक्यमिति अभिधानपूर्वकं चित्रत्वस्त्रीत्वगुणपशुफलरूपानेकार्थविधानाद्वाक्यभेदो विवृतः। तत्रोत्पत्तिशिष्टगुणावरुद्धे तद्विरोधि गुणान्तरविध्यसम्भवो वैश्वदेवाधिकरणे व्युत्पादयिष्यमाणोऽत्र हेत्वन्तरसमुच्चयार्थमुक्तः वाक्यभेदप्रसङ्ग एव त्वत्र गुणोपदेशशब्दोक्तः प्रधानहेतुरित्यभ्यर्हितं पूर्वं निपततीति न्यायेन सूचनार्थं प्रथमं वाक्यभेदमुपपादयितुं चित्रत्वस्त्रीत्वविशिष्टैककारकविधानादवाक्यभेदाभिप्रायं पूर्वोपन्यस्तं निरस्यति—**न चेति**। कर्मत्वकारकस्य द्रव्यस्यापि चोत्पत्तिवाक्यादेव प्राप्तत्वाच्चित्रत्वस्त्रीत्वमात्रमत्र विधेयम्। तयोश्च परस्परविशेषणविशेष्यत्वाभावेनैकविशिष्टेतरविध्ययोगादपरिहार्यो वाक्यभेद इत्याशयः।

वृद्धसम्मत्यैतदेव द्रढयति—**आह चेति**। ननु चित्रया कुर्यादिति सकृदुच्चरितस्य प्रत्ययस्यानेकार्थप्रतिपादकेनाप्येकेन चित्रापदेनान्वयोपपत्तेर्न प्रत्ययोच्चारणावृत्त्यापत्तिरित्याशङ्क्याह—**एकेति**।

अथापि शास्त्रतन्त्रत्वम्, तथापि तदनेकतेति तं०-वा०-पृ०-७०५ ग्रहाधिकरणवार्त्तिकोक्तन्यायेन सकृदुच्चरितस्यापि प्रत्ययस्यैकपदोपात्तानेकार्थविधिशक्तत्वेऽप्येकेनैव[1] व्यापारेणानेकविध्यशक्तेर्व्यापारभेदकल्पनावश्यम्भाविनीत्यर्थः, शक्तिशब्देन व्यापारो विवक्षितः। पुंपशाविति भाष्यावयवोक्तोत्पत्तिशिष्टगुणावरुद्धे कर्मणि तद्विरुद्धगुणान्तरविध्यसम्भवं हेत्वन्तरसमुच्चयार्थत्वेनेदानीं व्याचष्टे—**उत्पत्तीति**। विधातुमिति शेषः। ननूत्पत्तिशिष्टैकहायिन्यवरुद्धेऽपि क्रये हिरण्यादीनां विधिदर्शनात् कथमशक्यतेत्याशङ्क्य **तद्विरोधीत्युक्तम्**। विक्रेत्रानतिजननेनैकहायन्याः क्रयसाधनत्वादानत्यतिरेकार्थं द्रव्यान्तरसमु-

1. एवेति २ पु० ना०।

त्वयोपपत्तेश्चविरोध इत्याशयः। ननु विरोधेऽप्युत्पत्तिशिष्टगुणबाधेन, विकल्पेन वा गुणान्तरनिवेशो भविष्यतीत्यत आह—**यत्रेति**। विशिष्टविधौ शुद्धस्याविहितत्वेनाऽप्राप्तेरनुवादायोगाद्विशिष्टमेव कर्मानुवदितव्यम्। तस्य च समुच्चयेऽप्यानतिवदतिरेकाभावादेकेनैव गुणेनाऽऽकाङ्क्षानिवृत्तेर्न गुणान्तरसम्बन्धोपपत्तिरित्यर्थः।

यत्तु विशेषणविशेष्यविधिपूर्वकत्वाद्विशिष्टविधेर्विशेषणवद्विशेष्यस्वरूपस्याप्यर्थापत्तिप्रसूतेन विधिना विहितत्वेन प्राप्तिसम्भवाद्विशिष्टविहितस्यापि कर्मणः स्वरूपमात्रं निष्कृष्य, गुणान्तरविधानमुद्भिदधिकरणपूर्वपक्षेऽभिहितम्। तन्निरस्यति—**न चेति**। एतदेव प्रश्नपूर्वकमुपपादयति—**कुत इति**। शुद्धस्य कर्मणोऽननुष्ठेयत्वेन विधातुमशक्यत्वाच्छ्रुतेष्वपि गुणविधिषु स्वातन्त्र्येण गुणविधानस्याघाराग्निहोत्राधिकरणे वार्त्तिककृता निराकरिष्यमाणत्वेनाऽर्थापत्तिप्रसूतेषु स्वातन्त्र्यस्य दूरनिरस्तत्वात्, तद्दृष्टान्तत्वेन विशेष्यस्वरूपस्य स्वातन्त्र्यस्य विधानाशङ्कानुपपत्तेरार्थैरपि विधिभिर्विशिष्टावयवत्वेनैव विशेषणविशेष्यांशानां विधानाच्छुद्धस्य कर्मणो प्राप्तेर्न निष्कृष्यानुवादो युक्तः। एवं सत्यपि यदि स्ववाक्यस्थगुणसम्बन्धवेलायामेव वाक्यान्तरगतानामपि गुणानां क्रियासम्बन्धः स्यात्, ततो विशेषाग्रहणात् सर्वेषां तुल्यबलत्वं स्यात्, तेषां तु पूर्वपश्चाद्भावात्स्ववाक्यस्थगुणनिराकाङ्क्षायां क्रियायां वाक्यान्तरगतगुणविधानानुपपत्तिरित्याशयः।

नन्वुत्पत्त्युत्पन्नशिष्टयोः क्रियासम्बन्धपूर्वपश्चाद्भावनिमित्ते बलाबलविशेषे सत्युत्पन्नशिष्टानामपि व्रीह्यादीनां भिन्नवाक्यगतत्वेन युगपत् क्रियासम्बन्धायोगात्पौर्वापर्यनिमित्तं बलाबलं स्यादित्याशङ्क्याह—**यानीति**। उत्पत्तिवाक्यापेक्षत्वेनोत्पन्नवाक्यानां ततो दौर्बल्यम्, न पौर्वापर्यमात्रकृतमित्याशयः। चित्रत्वविधौ स्त्रीत्वविध्यसम्भवं वाक्यभेदप्रसङ्गेन, उत्पत्तिशिष्टपुंस्त्वविरोधाच्च पुंपशाविति भाष्यावयवोक्तमुपपाद्यऽपशवः फलमिति भाष्यावयवोक्तं वाक्यभेदापत्तेरेव फलविध्यसम्भवमुपपादयति – **पशुकामेति**। ननु फलस्याविधेयत्वात्कथं वाक्यभेदः अत आह—**यद्यपि चेति**। न केवलमनेकार्थविधिलक्षणो वाक्यभेदः, किं तु वैरूप्यमपीत्याह – **अपि चेति**। ननु स्त्रीपशुद्रव्यके मेषीयागे चित्रत्वमात्रविधानादुपादानाङ्गत्वप्राप्तपशुकामानुवादाच्च गुणविधावपि न वाक्यभेद इत्याशङ्कानिरासार्थं चित्रो गुणो विधीयमानो वाक्यभेदपरिहाराय, स्त्री यत्र यागे द्रव्यम्, तत्र विधीयते। तत्र च स्त्रीद्रव्यकेऽपि मेषीयागे प्राकृतकृष्णसारङ्गादिगुणनिराकाङ्क्षेऽनारभ्याधीतस्य चित्रत्वस्य विधातुमशक्यत्वादग्नीषोमीयसर्वपशुयागपरमप्रकृतिभूते गुणाकाङ्क्षे कृष्णसारङ्गादिगुणान्तरेण सह पूर्वोपपादिततुल्यकल्पत्वाद्विकल्प्यमानो विधीयते। न चासौ स्त्रीपुंपशुद्रव्यकेऽग्नीषोमीयेऽस्तीति स्त्रीत्वाविधानापत्तेरपरिहार्यो वाक्यभेदः। पशुकामश्च यत्र कर्त्ता, तत्र विधीयते, तत्र च षष्ठाद्यसिद्धान्तन्यायेन पशुकामशब्दस्य फलपरत्वेनावधारितस्योपादानाङ्गत्वप्राप्तपशुकामानुवादकत्वायोगात्, फलत्वेन पशून् कामयमानः पशुकामशब्देन वाच्यः। सोऽपि पशुकामो

नाग्नीषोमीयेऽस्तीति तन्निमित्तोऽपि वाक्यभेदोऽपरिहार्य इति भाष्यकृतोक्तम्। तत्र मेषोयागाङ्गत्वाशङ्कानिरासस्य स्पष्टत्वादुपेक्ष्य, अर्ज्जनाङ्गत्वप्राप्तानुवादाशङ्कानिरासं व्याचष्टे—**न चेति**।

एतदेव प्रश्नपूर्वकमुपपादयति—**कथमिति**। नन्विच्छां विना करणेतिकर्त्तव्यत्वयोः कथं प्रवृत्तिरित्याशङ्क्याह—**तत्साधनेति**। प्राधान्येनाऽर्थनमिच्छा कामना, नेच्छामात्रम्। पुरुषार्थसाधने तदङ्गे चेदं मे भवेदिति। एवं प्राधान्येनानर्थं विनापि प्रार्थितसिद्ध्यर्थेच्छया प्रवृतिरित्यर्थः। एतदेव व्याचष्टे—**न हीति**। ननु करणोपकारादावपुरुषार्थेऽपि काम्यत्वव्यपदेशोऽस्तीत्याशङ्क्याह—**गौणी वेति**। यथा काम्यसिद्ध्यर्थं प्रवर्त्तते तथा करणोपकारसिद्धयेऽपीति, साधर्म्यात्काम्यत्वोपचारस्तत्रेत्यर्थः। नन्वेवं सति काम्यमानसिद्ध्यर्थत्वेन गुणवृत्त्या वा साधनस्यापि काम्यत्वोपपत्तेर्न कामशब्दोपबन्धात् फलत्वावगतिः सम्भवतीत्याशङ्क्याह—**अत इति**। अन्यापेक्षस्य, गौणस्य वा काम्यत्वस्य प्रमाणान्तरानुसारेण कल्प्यत्वाद्वेदे च तदभावात् नात्र तत्कल्पना युक्तेत्याशयः। तदेव कामशब्दोपबन्धात् प्रतीमः। तच्च फलमिति योज्यम्। यदि कामशब्दोपबन्धात्स्वर्गपश्वादेः फलत्वं न प्रतीयते, ततो निष्फलस्य कर्मणो न कश्चित्साधकोऽनुष्ठाता स्यात्; फलार्थत्वात्कर्मणि प्रवृत्तेरिति युक्त्यन्तरं वक्तुं शक्यमित्याशयेन स्वर्गकामाधिकरणसिद्धान्तसूत्रम् पठति—**विस्तरेण चैतदिति**। कामशब्दोपबन्धस्य फलत्वाप्रतिपादकत्वे कर्म तत्साधकशून्यं स्यात्, फलार्थत्वात् प्रवृत्तेरिति सूत्रार्थः।

नन्वेकस्मै वाऽन्ये क्रतवः कामायाह्रियन्ते, सर्वेभ्यो ज्योतिष्टोम इति ज्योतिष्टोमद्वारा सार्वकाम्यप्राप्तपशुफलत्वानुवादः तर्हि भविष्यतीत्याशङ्क्याह—**फलं चेति**। औपचारिकानुवादस्यानर्थक्यापत्तेरसम्भवः, विशेषणत्वं तु वाक्यभेदापत्त्यैव सार्वकाम्यप्राप्तज्योतिष्टोमविशेषणत्वे वाक्यभेद इत्युद्भिदधिकरणवार्तिकोक्तन्यायनिरस्तमित्याशयः। प्राजापत्येष्टिप्रकरणबाधापत्तेरप्यग्नीषोमीये गुणविधिर्न युक्त इत्याह—**प्रकरणं चेति**। ननु चित्राशब्दस्य गुणे निरूढत्वेनोद्भिदादिशब्दवत्कर्मण्यवयवद्वारेण प्रसिद्ध्यभावात्संज्ञासंज्ञिसम्बन्धानुवादानुपपत्तेर्नामधेयत्वपक्षेऽपि प्राजापत्येष्टेः फलं पशवः। सा च चित्रासंज्ञकेतिकर्मफलसम्बन्धसंज्ञासंज्ञिसम्बन्धरूपानेकार्थविधानाद्वाक्यभेदः स्यादित्याशङ्क्याह—**नामधेयत्वे त्विति**। दध्यादिचित्रद्रव्यकत्वात्, स्त्रीप्रत्ययान्तेनेष्टिशब्दवाच्यत्वाच्च कर्मणि स्त्रीलिङ्गचित्राशब्दप्रसिद्धेरनुवादोपपत्तिरिति भावः।

आज्याद्युदाहरणेषु द्रव्यसंख्यासम्बन्धस्तोत्रद्रव्यसम्बन्धरूपानेकार्थविधिलक्षणवाक्यभेदाभिधानार्थम्। तथेति भाष्यं तात्पर्यतो व्याचष्टे—**पञ्चदशानीति**। द्रव्यानुवादाभावेऽपि, भाष्योक्तं यदि कश्चित्संख्यानुवादेन द्रव्यविधानमाशङ्केत, तन्निरासार्थं द्रव्यसंख्ययोरित्युक्तम्। ननु स्तोत्रेष्वप्राप्तावपि कर्मान्तरेऽप्युपसदादिषु आज्यानां प्राप्तेः तदनुवादेन संख्याविधिर्भविष्यतीत्याशङ्क्याह—**कर्मान्तरस्थं चेति**। स्तोत्रप्रकरणे कर्मान्तरस्याबुद्धिस्थत्वादित्याशयः। न च द्रव्यस्वरूपानुवादेन संख्याविधिर्युक्तः। तथा सति

द्रव्याङ्गत्वापत्तेरकर्माङ्गत्वप्रसङ्गेनानर्थक्यापातादित्याह- **तदनुवादेन चेति**। दोषान्तरमाह—**प्रकरणेति**।

एवं तर्हि संख्याविशिष्टं द्रव्यमेव प्रकरणेन स्तोत्राङ्गत्वसिद्ध्यर्थं विधीयतामत आह—**न चेति**। अनेन च 'अथ कस्मान्न पञ्चदशसंख्याविशिष्टान्याज्यानी'त्यादिभाष्ये द्वावेत।वर्थौ एकस्य वाक्यस्याशक्याविरयस्यानन्तरं द्रष्टव्यमित्यपकृष्य व्याख्येयत्वस्य वक्ष्यमाणत्वात्कथं व्याख्येयमित्यपेक्षायामिति व्याख्यातं द्रव्यसंख्ययोः प्रधानभूतैकक्रियावशीकारं विशेषणविशेष्यत्वाप्रतीतेः संख्याविशिष्टद्रव्यविध्यसम्भवहेतोः भाष्यव्याख्ययैव विवरिष्यमाणत्वात्, भाष्यसूचितानि हेत्वन्तराणि वक्तुं संख्याविशिष्टद्रव्यविधौ द्रव्यविशेषणत्वेन संख्यायाः कर्माङ्गत्वाभावादनुपादनेऽपि, कर्मवैगुण्याभावेनानादरं 'तत्रैकत्वमयज्ञाङ्गमर्थस्य गुणभूतत्वादिति (४-१-११) चतुर्थाधिकरणपूर्वपक्षसूत्रोक्तं तावदाह (४-१-७)—**इतीति**। तच्छब्देन द्रव्याणि त्वविशेषणानर्थक्यात् प्रतीयेरन्निति पूर्वाधिकरणसूत्रोपात्तद्रव्यपरामर्शादेकत्वग्रहणस्य चोपादेयगतसंख्यामात्रोपलक्षणार्थत्वाद्यज्ञशब्दस्य च क्रियामात्रोपलक्षणार्थत्वात् तत्र द्रव्ये यत्पशुमालभेतेत्येकत्वमनड्वाहौ युनक्तीति वा द्वित्वम्, कपिञ्जलानालभेतेति वा बहुत्वं तदक्रियाङ्गम्, उपश्लेषणया श्रुत्या प्रातिपदिकार्थं प्रति गुणभूतत्वादिति सूत्रार्थः। द्रव्यविशिष्टस्य विधेयत्वसम्भवेऽप्यक्रियाङ्गत्व।पपत्तेर्विशिष्टद्रव्यविध्यसम्भव उक्तः। परमार्थतस्त्वक्रियाविशेषणस्य विधेयत्वमेव न सम्भवतीत्याह—**न चेति**।

कथं तर्हि पश्वेकत्वादेर्विधेयत्वम्, क्रियाङ्गत्वं वेत्याशङ्क्य, तत्र विधेयत्वाक्रियोपादानात् संख्यायाश्चैकप्रत्ययोपादानलक्षणया श्रुत्यैकपदोपादानलक्षणश्रुतिगम्यप्रातिपदिकार्थाङ्गबाधेन कारकाङ्गत्वावगतेस्तद्द्वारेण क्रियाङ्गत्वावसायात् क्रियाङ्गत्वेन विधेयत्वं पश्वेकत्वाधिकरणसिद्धान्ते वक्ष्यमाणं सम्भवति। इह तु क्रियानुपादानाच्चतुर्थाधिकरणसिद्धान्तन्यायासम्भव इति वैलक्षण्यं वक्तुमाह **न चेति**। क्रियानुपादानादेवाक्रियात्मकत्वेन स्तोत्रप्रकरणग्राह्यत्वायोगात् तदङ्गत्वानुपपत्तेरानर्थक्यापातादपि विशिष्टद्रव्यविध्यसम्भव इत्याह—**न चैषामिति**। अक्रियात्मकस्य प्रकरणाग्राह्यत्वे वृद्धसम्मतिमाह—**आह चेति**। नन्वस्तिर्भवन्तीपर इति स्मृतिकल्पितभवतिवाच्यसत्ता द्रव्यक्रियाद्वारा द्रव्यसंख्ययोः प्रकरणेन ग्रहणं भविष्यतीत्याशङ्क्याह—**न चेति**। द्रव्यसंख्ययोर्भवतिक्रियाङ्गत्वे सति तद्द्वारा प्रकरणेन ग्रहणं स्यात्, न तु द्रव्यसंख्ययोः स्वसत्तां प्रत्यङ्गत्वं सम्भवतीत्यर्थः। असम्भवे हेतुमाह—**सर्वो हीति**। क्रियासिद्धौ व्याप्रियमाणं कारकं क्रियाङ्गं भवति, सत्तासिद्धिवेलायां चालब्धात्मकत्वान्न व्यापारः सम्भवति इत्याशयः। ननूत्पत्त्याख्याद्यभावविकारेण लब्धात्मकस्य सत्ताख्यद्वितीयभावविकारसिद्धौ व्यापारः सम्भविष्यतीत्याशङ्क्याह—**सत्तायास्त्विति**। उत्पत्तुमारभमाणस्यापि कुतश्चित्कारणात्सत्तासिद्ध्यभावे सिद्धो घट इत्यात्मलाभव्यवहारासम्भवात् सत्तातः प्रागलब्धात्मकत्वात् तद्व्यापारः न सम्भवतीत्याशयः। वस्त्वात्मलाभमात्रस्य सत्तातोऽपवर्गात् **समाप्तेः**

तस्या न वस्तुना साध्यत्वमिति योज्यम्। आद्यभावविकारेणोपक्रान्तस्यात्मलाभस्य द्वितीयेन पर्यवसानमित्यपवर्गशब्देनोक्तम्। यदि च पञ्चदशसंख्यैराज्यैः स्वसत्तां भावयेदिति वाक्यार्थः स्यात्, ततोऽन्यसाध्यानपेक्षणेन स्तोत्रोपकारस्य साध्यत्वेनासम्बन्धात् न, स्तोत्राङ्गत्वं स्यादित्याह—**तद्व्यतिरिक्तेति**। ननु 'रथन्तरं भवती'त्यादौ भवतिक्रियाद्वारेण प्रधानक्रियाङ्गत्वदर्शनादिहापि तथा स्यादित्याशङ्क्याह—**यत्त्विति**। बृहद्वा रथन्तरं वा पृष्ठं भवतीति वचनेन पृष्ठाख्यस्तोत्रसाधनतया विकल्पेन विहितयोर्बृहद्रथन्तरयोर्विकृतावतिदेशप्राप्तायां वैकल्पिकायां सत्तायां रथन्तरसत्तानियमार्थमिदं वाक्यम्। तत्र चातिदेशप्राप्तस्य पृष्ठाख्यस्तोत्ररूपावान्तरक्रियासम्बन्धस्य प्रज्ञानाद्युक्तं विकृतिप्रकरणग्रहणमित्यर्थः। लोकसिद्धत्वेन चाज्यादिसत्ताया विधेयत्वायोगात् न तद्द्वाराज्यादीनां स्तोत्रप्रकरणग्रहणं युक्तमित्याह—**न चेति**।

नन्वाज्यादिसत्तायाः स्वरूपतः सिद्धावपि, स्तोत्रसामीप्यासिद्धेस्तेन रूपेण विधेयत्वं भविष्यतीत्याशङ्कते—**स्तुतीति**। स्तोत्रसान्निध्यरूपेणासिद्धावपि सत्तायाः पुंव्यापारत्वाभावेनानुष्ठेयत्वाभावाद्विधेयत्वं न सम्भवतीत्याशङ्कानिरासायानुष्ठानार्हस्थापनोपन्यासः। कथमश्रुतोपस्थापनप्रतीतिरित्याशङ्क्य, अप्राप्तत्वेनाज्यादिसत्ताया विधेयत्वप्रतीतेर्विधेयश्च विधेयस्वभावनैकगोचरत्वेन विधेश्च भावनाक्षेपकत्वाद्भावनायाश्चानुष्ठेयधात्वर्थावच्छेदं विनात्मलाभाभावादवच्छेदकधात्वर्थविशेषापेक्षायां योग्यतया स्थापनावगतिं सूचयितुं भावनाग्रहणम्। विधेरश्रुतत्वात् सत्तायाश्चाननुष्ठेयत्वेन विधानानर्हत्वात् अश्रुतविधिकल्पनानुपपत्तेर्न तावद्विध्यन्यथानुपपत्त्या भावनाक्षेपः तदवच्छेदकस्थापनाख्यधार्थविशेषाक्षेपो वा युक्तः। अविधेयत्वेन चाङ्गत्वायोगात् न स्तोत्राङ्गत्वकल्पिततत्सामीप्यसम्पादनायापि सन्निधिस्थापनाक्षेपो युक्तः। सामीप्यसम्पादनरूपेण विधेयत्वादङ्गत्वम्। अङ्गत्वं विना सामीप्यासिद्धेरितरेतराश्रयत्वं स्यादित्यभिप्रेत्य निराकरोति—**नेति**। अग्नेस्तु सन्निधिस्थापनस्य विधानम्, प्रकरणग्रहणं च युक्तमिति पूर्वपक्षोक्तदृष्टान्तवैषम्यमाह—**अग्निमिति**। अथ त्विति भाष्यमपि चेत्यनेनापि पूर्वपक्षस्यैव निरासान्मध्ये सिद्धान्तसमर्थनस्यासङ्गतत्वादयुक्तमाशङ्क्याग्नेयोऽष्टाकपालो भवतीत्यादिवदिहाप्यावश्यकल्प्यं भवति वाच्यभावनाख्यप्रयोज्यव्यापाराक्षिप्तभावनाख्यप्रयोजकव्यापारविध्यन्यथानुपपत्त्या पञ्चदशसंख्यैराज्यैः स्तोत्रोपकारं भावयेदिति विनियोजकवाक्यकल्पनया, आज्यानां स्तोत्रसम्बन्धसिद्धेः श्रुतस्य संख्यासम्बन्धमात्रविधानान्न वाक्यभेद इति वाक्यभेदपरिहाराशङ्कानिरासार्थत्वेन व्याख्यातुमाह—**सिद्धान्तेन चेति**। गुणविधिकल्पनायामपि न लक्षणेति पूर्वपक्षिणोक्तम्। तन्निरासार्थमपि चेति भाष्यमुदाहृतवाक्ये स्तोत्राज्यसामानाधिकरण्यानुपादानादयुक्तमाशङ्क्योत्पत्तिवाक्याभिप्रायेण व्याचष्टे—**यदि त्विति**। अनेन च यदि वाक्यभेदपरिहारायोत्पत्तिवाक्यविहिताज्यानुवादेन पञ्चदशत्वं गुणो विधीयते, ततः सामानाधिकरण्यसिद्ध्यर्थमाज्यशब्देन मत्वर्थलक्षणया विहितेष्वाज्येषु गुणविध्यापत्तेर्लक्षणैव दोष इत्येवं भाष्यं व्याख्यातम्। उत्पत्तिवाक्ये तृतीयानिर्दिष्टानामप्याज्यानां

गुणविधौ करणत्वाविवक्षासूचनार्थो भाष्ये प्रथमानिर्देशः। संसर्गित्वेनाज्यानाम् अनेकेषामप्येकत्र मेलने सत्येकत्वापत्तेः पृथक्त्वनिवेशिपञ्चदशत्वयोगासम्भवात्पञ्चदशाज्यपात्राणीत्याज्यभेदापादकाज्याधारभूतपात्रलक्षणापि गुणवाक्ये स्यादित्याह **संसर्गेति।** पलादिपरिमाणभेदेऽपि पात्राभेदं विनाज्ये भेदबुद्ध्यनुपपत्तेः पलादिपरिमाणावच्छेदकपात्रभेदोपलक्षणार्थं पलादिग्रहणम्। अतः कर्मनामधेयानीति भाष्यं गुणवाक्यगतानामप्याज्यादिशब्दानां गुणविधित्वे वाक्यभेदापत्तेरुत्पत्तिवाक्यगतानां नामधेयत्वस्यासम्बद्धत्वापत्तेरयुक्तमाशङ्क्योपपादयितुमाह—**तेनेति।** गुणवाक्यव्यवहारस्योत्पत्तिवाक्यावगतार्थाधीनत्वेन गुणवाक्ये गुणविधिनामधेयविचारानुपयोगात् उत्पत्तिवाक्यगतानामेवाज्यादिशब्दानां नामधेयत्वसिद्ध्यर्थं गुणवाक्ये गुणविधित्वे वाक्यभेदापादनात् नासम्बद्धतेत्याशयः।

यत्त्विति भाष्येण 'न चैते कर्मणि प्रसिद्धा' इति पूर्वपक्षोक्तं प्रसिद्ध्यभावात्कर्मनामत्वासम्भवमनुभाष्यावयवप्रसिद्ध्येत्यादिनावयवोपयोगेन प्रसिद्धिमुपपाद्य तस्मादित्यनेनोपसंहारः कृतः। सोऽतः कर्मनामधेयानीत्यनेन पुनरुक्त इत्याशङ्क्य सर्वहेतुसङ्कलनार्थत्वादपौनरुक्त्यं सूचयितुमाह **गुणवाक्येति।** अपि चेति भाष्योक्तसामानाधिकरण्यलक्षणहेतुसङ्कलनार्थं समभिव्याहृतेन चेत्युक्तम्। अस्यान्वाचयहेतुत्वसूचनार्थश्चकारः। आज्यार्थवादं पठित्वा व्याचष्टे—**यदाजिमिति।** प्रजापतिर्देवेभ्य आत्मानं यज्ञं कृत्वा प्रायच्छत्, तेऽन्योन्यस्मा अग्रायणातिष्ठन्त, तानब्रवीदाजिमस्मिन्नितेतित आजित्मायन्निति अर्थवादो ऽक्रमव्याख्यान्वाख्यानरूपताप्रदर्शनार्थमस्मिन् यज्ञे काष्ठां गच्छतेति प्रजापतिवचनादेतानि स्तोत्राणि काष्ठां कृत्वा यस्मादाजिगता देवास्तस्मादाज्यार्हत्वादेषामाज्यत्वमित्यर्थवादार्थः। 'स्पर्शनवचनात्पृष्ठानी'ति पृष्ठशब्दव्युत्पत्तिप्रतिपादनार्थं भाष्यं स्पर्शननिमित्तपृष्ठशब्दप्रतिपादनपरार्थवादाश्रवणादयुक्तमाशङ्क्योपपादयितुमाह **तथेति।** 'पृष्ठानि वा असृज्यन्त' इत्युक्ते कथमसृज्यन्तेत्यपेक्षायाम्, आपो वा ऋत्वियमार्छन् तासां वायुः पृष्ठे व्यवर्तत इत्यार्त्तप्रयुक्तानामपां पृष्ठे वायोर्विवर्त्तनमृतुमत्यामिव स्त्रियां पुंसोऽभिधीयमानं मैथुनात्मकं स्पर्शनमेव पृष्ठाख्यास्तोत्रसाधनत्वनिमित्तपृष्ठशब्दवाच्यं रथन्तरादिसृष्टिहेतुत्वेनोक्तं भवतीत्याशयः। विवर्त्तनशब्दस्य मैथुनाख्यस्पर्शवाचित्वं द्योतयितुं पृष्ठ इत्युक्तं स्पर्शनवचनस्य कैमर्थ्यापेक्षायां पूर्वोक्तायाः पृष्ठसृष्टेर्हेत्वाकाङ्क्षापूरणार्थत्वेनापेक्षिताभिधानसिद्ध्यर्थं पृष्ठोत्पत्तिहेत्वभिधानार्थत्वावगमादुत्पादकभावाभिधानस्य च कैमर्थ्यापेक्षायां 'पशवो वै बृहद्रथन्तरे' इत्युपक्रम्याभिधानेन रथन्तरादिषु पृष्ठशब्दव्युत्पत्तिनिमित्तप्रतिपादनार्थत्वावगमाद्रथन्तरादीनीत्युक्तम्। अनेन च स्पृशेर्धातोरौणादिकेऽर्थक्प्रत्यये कृते तिथपृष्ठगूथप्रोथा इति सूत्रेण सकारलोपे निपातिते व्रश्चादिसूत्रेण च शकारस्य षकारादेशे कृते ष्टुत्वे च कृते पृष्ठशब्दव्युत्पत्तिरुक्ता भवति।

नन्वापो वा ऋत्वियमार्च्छन्नित्युपक्रमस्य ततो वसुवामं समभवत्, तन्मित्रावरुणौ पर्यपश्यताम्, तावब्रूतां वामं मर्या इदं देवेष्वजनीति, तस्माद्वामदेव्यमित्यनन्तरं वाम-

देव्यशब्दप्रवृत्तिनिमित्ताभिधानाद्वामदेव्यादिष्वेव पृष्ठशब्दप्रवृत्तिनिमित्ताभिधानार्थता- अस्यावसीयते । न[1] रथन्तरबृहद्वैरूपवैराजशाक्वररैवतेष्वित्याशङ्क्याह—**तत्प्रकृतित्वाच्चेति**। अयमाशयः 'पृष्ठैः स्तुवत इत्युत्पत्तिवाक्ये स्तोत्रसामानाधिकरण्यात् पृष्ठशब्दस्य स्तोत्रमेव वाच्यम्, न रथन्तराद्यपि 'रथन्तरं पृष्ठं भवती'त्यादौ पृष्ठशब्दस्य साधनलक्षणार्थत्वात्, सामानाधिकरण्यं रथन्तरं पृष्ठाख्यस्तोत्रस्य साधनं भवतीत्यर्थः । पृष्ठैरुपतिष्ठत इत्यादौ तु रथन्तरादिषु पृष्ठशब्द प्रसिद्धिसिद्ध्यर्थमनेनार्थवादेन च प्रवृत्तिनिमित्ताभिधानं 'पशवो वै बृहद्रथन्तरम्' इत्युपक्रमवशात् प्रतीयते । वामदेव्यनौधसश्यैतेषु ज्योतिष्टोमे पृष्ठशब्दवाच्यरथन्तरादिप्रकृतित्वेन तेषामौपचारिकपृष्ठत्वप्रदर्शनार्थस्य 'पिता वै वामदेव्यम्, पुत्राः पृष्ठानीति अर्थवादस्य तत्पृष्ठेषु न्यदधुरि'ति अस्य चावसरप्रदर्शनार्थं ततो वामदेव्यमित्याद्युक्तम् इति, पृष्ठैः स्तुवत इत्येतत्तु बहुवचनं प्राणभृत उपदधातीतिवत् लिङ्गसमवायादिति सप्तमे वक्ष्यते ।

तत्र हि 'विश्वजित्सर्वपृष्ठो भवती'ति उदाहृत्य किमयं पृष्ठशब्दोऽतिदेशार्थः, न वेति विचारयितुं ज्यौतिष्टोमिकपृष्ठविषयोऽयं पृष्ठशब्दः, षाडहिकपृष्ठविषयो वेति सन्दिग्धे विश्वजितो ज्योतिष्टोमपूर्वकत्वात् तत्र च 'पृष्ठैः स्तुवत इति सप्तदशानि पृष्ठानि इति बहुवचनवशेन माहेन्द्रादिषु चतुर्षु स्तोत्रेषु पृष्ठशब्दवाच्यत्वावगतेः । पृष्ठबहुत्वसम्भवादातिदेशप्राप्तज्यौतिष्टोमिकपृष्ठानुवादत्वान्नातिदेशार्थोऽयं पृष्ठशब्द इति 'विश्वजिति सर्वपृष्ठे तत्पूर्वकत्वात् ज्योतिष्टोमिकानि पृष्ठान्यस्ति च पृष्ठशब्द (७.३.६) इति सूत्रेण पूर्वपक्षयित्वा, बृहद्वा रथन्तरं वा पृष्ठं भवतीत्येकस्यैव पृष्ठस्य ज्योतिष्टोमे विकल्पेन विधानात् पृष्ठबहुत्वाभावेन सर्वशब्दयोगात् षाडहिकानामेव रथन्तरबृहद्वैरूपवैराजशाक्वररैवतानां षण्णां पृष्ठानामतिदेशार्थः पृष्ठशब्द इति षडहाद्वा तत्र हि चोदने(७.३.७)ति सूत्रेण सिद्धान्तयिष्यते ।

ननु ज्योतिष्टोमे पृष्ठबहुत्वाभावेन बहुवचनानुपपत्तिः स्यादित्याशङ्कानिरासाय उत्पन्नाधिकारो ज्योतिष्टोम (७.३.९), इतिसूत्रेण माहेन्द्रस्तोत्रस्यैव बृहद्वा रथन्तरं वा पृष्ठं भवतीति वाक्येन ज्योतिष्टोमे पृष्ठत्वावधारणात् वामदेव्यनौधसश्यैतानां पृष्ठत्वाभावादुत्पन्नानि चान्यतः पृष्ठत्वेनावगतानि स्तोत्राण्यधिकृत्य पृष्ठशब्दप्रयोगात् प्रमाणान्तरापेक्षत्वेन लिङ्गसमवायात् पुरोडाशानलङ्कुर्वित्यादिबहुवचनोपपत्तिरित्युक्तम् ।

ननु पृष्ठैः स्तुवतइति पृष्ठशब्दस्य स्तोत्रनामत्वे रथन्तरादिविषयपृष्ठशब्दप्रसिद्ध्यर्थोऽयमर्थवादोऽनर्थकः स्यात् । न च 'पृष्ठैरुपतिष्ठत' इत्येतद्वाक्यगतरथन्तरादिविषयपृष्ठशब्दप्रसिद्ध्यर्थोऽयमर्थवादो युक्तः तस्याः 'भित्वे'त्याद्यृग्वाचित्वस्य सप्तमे वक्ष्यमाणत्वात् । तत्र ह्ययं पृष्ठशब्दो हिङ्कारादिपृष्ठधर्मातिदेशार्थो न वेति विचारयितुङ्किमयं स्तोत्रवाची, ऋग्वाची वेति सन्दिह्य, चित्राधिकरणे स्तोत्रक्रियावाचित्वेन स्थितस्य पृष्ठशब्दस्येहानेकार्थ-

---

१. नकाररहितः कथमिति पा० २ पु० दृश्यते ।

दोषप्रसङ्गाद्दृक्द्रव्यवाचित्वकल्पनानुपपत्तेर्मुख्यानां च पृष्ठानाम् अन्यत्र क्रियावाक्ये विनियुक्तानामिह विनियोगात् मासमग्निहोत्रं जुहोतीतिवद्धर्मातिदेशार्थतेति 'कर्मणि पृष्ठशब्दः स्तात्तथाभूतोपदेशादिति(७-३-३५) सूत्रेण पूर्वपक्षिते' अभिधानोपदेशाद्वा विप्रतिषेधाद् द्रव्येषु पृष्ठशब्दः स्यादि७-३-३६ति सूत्रेणा-'भित्वा शूरे'त्याद्यानामृचामयं पृष्ठशब्दो वाचक इति सिद्धान्तयिष्यते । उपान्मन्त्रकरण इति उपपूर्वकात्तिष्ठतेर्मन्त्रकरणेऽर्थेवर्त्तमानादात्मनेपदस्मृतेः समीपस्थाने च मन्त्रस्य करणत्वायोगादभिधानार्थोपस्थानवाचित्वं धातोः कल्पयित्वोपस्थानकार्यमभिधानं कुर्वतो मन्त्रस्योपस्थानेऽपि यागस्य कार्यफलं प्रति ग्रहणायोग्यत्वं कुर्वतां यजमानसंस्काराणां याग इव करणत्वोपपत्तेरभिधानार्थमग्निसमीपे तिष्ठेदित्याख्यातपदार्थावगमात् समभिव्याहृतस्य पृष्ठशब्दस्य स्तोत्रक्रियावाचित्वे सत्यात्मनेपदविप्रतिषेधापत्तेस्तत्परिहारार्थं पृष्ठाख्यस्तोत्रसाधनत्वेनान्यत्र विनियुक्तासु ऋक्षु लक्षणया प्रवृत्त्युपपत्तेः ।

'कुशा दर्व्यादयो मन्त्रा ब्राह्मणाश्च बहुश्रुताः ।
न ते निर्माल्यतां यान्ति विनियोज्याः पुनः पुनः ॥'

इतिस्मृतेश्च मन्त्राणां विनियुक्तविनियोगाविरोधात् ऋग्वाच्ययं पृष्ठशब्द इति सूत्रार्थः । अतोऽर्थवादाद्रथन्तरादीनां पृष्ठत्वम्, तत्प्रकृतित्वाद्वामदेव्यादीनामित्ययुक्तम् ।

समाधानम्

उच्यते रथन्तरादिगीतिविशिष्टानामेव ऋचां पृष्ठसाधनतया पृष्ठशब्देन लक्षयितुं शक्यत्वाद्, अन्यथा चाऽभित्वाद्यृग्विशेषप्रतीतावपि करणाभावाद्विशेषणे च पूर्वसम्प्रत्यया'द्रथन्तरं पृष्ठं भवती'त्यादौ च रथन्तरादिषु पृष्ठशब्दप्रयोगात् साम्नोऽपि चाभिधायकाक्षराभिव्यक्तिद्वाराऽभिधानेऽपि स्तुतौ करणत्वोपपत्तेर्न ऋग्वाचित्वाभिधानाद्रथन्तरादिवाचित्वं पृष्ठशब्दस्य प्रसिद्धम्, किं त्वनुज्ञातमेवेत्यदोषः ।

द्रव्यसंख्यारूपानेकार्थप्रतिपादितवाक्यभेदपरिहाराशङ्कानिराकरणभाष्यमधिकरणसिद्धान्तोपसंहारादनन्तरम् असङ्गतत्वादयुक्तमाशङ्क्य, अपकृष्य व्याख्येयमित्याह—**द्वावेताविति ।**

भाष्यकृता तु प्रधानतोऽभिसम्बन्ध इत्यनेनैव सूत्रावयवेनावृत्त्या प्रधानक्रियोपादाने सत्येव क्रियावशीकारात् तदभिमुखीभूतयोर्द्रव्यसंख्ययोर्विशेषणविशेष्यसम्बन्धः स्यात्, न त्विह प्रधानक्रियोपादानमस्तीत्येवमेषा शङ्का निराक्रियते इति सूचनायैतावता शङ्कापरिहारावन्ते कृतावित्यदोषः ।

आशङ्कानिराकरणार्थं विशिष्टानामिति भाष्यं विशिष्टवाचिशब्दाभावेऽप्यरुणैकहायनीवदग्नये शुचयेऽष्टाकपालं निर्वपेदिति वद्वा सामानाधिकरण्यमात्रेण विशिष्टप्रतीतिसम्भवादयुक्तमाशङ्क्याह—**विशिष्टानामिति ।** अयमाशयः—गौरश्व इतिवत्परस्परसामीप्यैकविभक्तिनिर्देशमात्रेण सामानाधिकरण्यायोगान्नारुणैकहायन्योस्तद्वशाद्विशेषणविशेष्यभावाव-

गतिः, किं तु निर्द्रव्यगुणस्यामूर्त्तत्वेन क्रियासाधनत्वानुपपत्तेर्निर्गुणस्य च द्रव्यस्यानुपादेयत्वेन क्रियासाधनत्वानुपपत्तेर्द्वयोश्चैकक्रियानुगृहीतत्वेन द्रव्यगुणान्तरानापेक्षकत्वात् क्रियासाधनत्वानुपपत्त्या ।

अग्निशुच्योस्तु देवतात्वेनाऽन्वयात् तस्य चोद्देश्यत्वमात्रेण क्रियासाधनत्वात् अमूर्त्तस्य निर्गुणस्यापि चोद्देश्यत्वोपपत्तेः क्रियासाधनत्वान्यथानुपपत्त्या विशेषणविशेष्यभावानवगमेऽपि तदनभ्युपगमे प्रत्येकमन्वयायाख्यातावृत्त्यापत्तेः प्रधानभूताख्यावृत्तेश्चात्यन्तान्याय्यत्वात्, प्रत्येकं च देवतात्वापत्तेर्गुणभेदेनादृष्टकल्पनागौरवापादकर्मभेदप्रसङ्गादेकक्रियावशीकारावसायात्, तदन्यथानुपपत्त्या विशेषणविशेष्यभावावगतिः ।

पञ्चदशान्याज्यानीत्यत्र तु प्रधानभूतसाध्यक्रियावाच्याख्यातश्रवणात् न तस्य सामानाधिकरण्यनिर्देशमात्रेण विशेषणविशेष्यभावावगतिः सम्भवतीति । नन्वित्याशङ्काभाष्यमाख्यातनिरपेक्षस्य समभिव्याहारमात्रस्य विशिष्टावगतिकरणत्वानुपपत्तेरुक्तत्वाद-युक्तमाशङ्क्याह—**नन्विति** । न तत्पदद्वयमपीत्याशङ्कानिराकरणभाष्यम् । तस्य किलायमाशयः—पञ्चदशान्याज्यानीत्यत्र विशेषणविशेष्यभूते द्रव्यसंख्ये विधीयेते अनूद्येते वा एकानुवादेनेतरविशिष्टता वा विधीयते । तत्रोभयोर्विधाने परस्परनैरपेक्ष्याद्विशेषणविशेष्यभावो न स्यात् । लोके क्वचिद्विशेषणविशेष्यभावेन प्राप्तयोर्द्रव्यसंख्ययोरनुवादे श्रुतस्य पदद्वयस्यानुवादव्यापृतत्वेन स्तोत्रसम्बन्धविधायकत्वाभावात्, तत्सम्बन्धानुपपत्तेरानर्थक्यापत्तिः । स्वरूपेण चैकमनूद्येतरविधानानर्थक्यापत्तेः स्तोत्रसम्बन्धित्वेन चैकस्याप्यप्राप्तेर्नैकानुवादेनेतरविशिष्टता विधातुं शक्येति तत्रैकभवतिक्रियावशीकरणोभयोर्विधीयमानयोररुणैकहायन्यादिवद्विशेषणविशेष्यभावोपपत्तेरनुपपत्तिमाशङ्क्याह—**न तदिति** । भवतिवाच्यायाः सत्ताख्यायाः क्रियाया द्रव्यसंख्यैः प्रत्यात्मलाभोपकारजननेन गुणवत्त्वात्प्राधान्याभावेनोभयवशीकारसामर्थ्यं नास्तीत्याशयः ।

ननु निर्द्रव्यायाः संख्यायाः, निःसंख्यस्य च द्रव्यस्यात्मलाभाभावात् कथं सत्तायाः प्रत्येकवर्तितेत्याशङ्क्याह—**पञ्चदशानीति** । अर्थाक्षिप्तयत्किञ्चिद् द्रव्यसंख्याक्षेपेऽप्यप्रधानभूतया क्रियया वशीकर्त्तुमशक्यत्वात् नान्योन्यनियमसिद्धिरित्याशयः । नन्वेकक्रियावशीकाराभावेऽपि द्रव्यसंख्ययोरितरेतरापेक्षायां सन्निधानेनैतरयोरेव परस्परनियमाद्विशेषणविशेष्यभावो भविष्यतीत्याशङ्क्याह—**तस्मादिति** । एकक्रियावशीकारसम्भवे तद्वशेन विशेषणविशेष्यभावापत्तेः संख्याविशिष्टद्रव्यविधिः शङ्कितुं शक्यते । तदसम्भवे तु स्वतन्त्रयोरेव विधानापत्तेस्तस्य च वाक्यभेदप्रसङ्गेनासम्भवात् पाश्चात्येन विशेषणविशेष्यभावेन विधानकालीनस्य वाक्यभेदस्य परिहर्त्तुमशक्यत्वात् नोभयविधिः सम्भवतीत्यर्थः ।

अविधायकमितिभाष्यावयवं व्याख्यातुमाह—**न चेति** । यादृशः क्वचिल्लोके पञ्चदशघटनिक्षिप्तेष्वाज्यपञ्चदशत्वयोर्विशेषणविशेष्यभावः प्राप्तः तादृशस्य स्तोत्रेषु विधायकाभावेनाभावात् स्तोत्रेषु विधायकाभावेनाभावात् स्तोत्रसम्बन्धित्वेन विधानानु-

वादायोगात् स्वतन्त्रानुवादे त्वानर्थक्यप्रसङ्गान्नोभयमनुवादकमित्यर्थः। एकमत्रेति भाष्यावयवं प्राक् पठितमपि उभयविध्यनुवादासम्भवाधीनसिद्धित्वात् पश्चाद्व्याचष्टे—**तस्मादिति**। नन्वेवं सत्याज्यानुवादेन तेषां पञ्चदशत्वसंख्याविशिष्टविधिराशङ्कावाद्युक्तः सिध्येदित्याशङ्क्याह—**नामधेयत्व इति**। स्तोत्रनामत्वे सत्याज्यशब्दस्याज्यैः स्तुवत इत्येतद्वाक्यप्राप्तान्याज्यान्यनूद्य संख्याविशिष्टत्वं विधातुं शक्यम्, घृतानां त्वप्राप्तत्वान्नानुवादः सम्भवतीत्याशयः। अनेन चास्य भाष्यावयवस्याशङ्कानिराकरणमध्यगतस्यापि लिङ्गबलीयस्त्वात्सिद्धान्तसिद्ध्यर्थतोक्ता। लिङ्गादिरहितस्य विध्यशक्तेर्विधायकशब्दानुपपपत्तिमाशङ्क्याह—**विधायकमिति**। ननु संख्याविशिष्टाज्यविध्यसम्भवेऽपि 'पञ्चदशान्याज्यानि स्तोत्रेषु भवन्ती'त्याज्यस्य पदस्य स्तोत्रसंख्यापदाभ्यां तत्र सम्बन्धादर्थाद् द्रव्यसंख्ययोर्विशेषणविशेष्यभावो भविष्यतीत्याशङ्क्य, वैरूपप्यापादनेन तन्त्रसम्बन्धनिरासार्थं न चात्रैकमाज्यपदं विशेषणं संख्यां प्रत्युद्देशकमिति भाष्यं वाजपेयाधिकरणवक्ष्यमाणस्य तन्त्रसम्बन्धनिरासस्यानागतावेक्षणन्यायेनेहाभिधानार्थमिति सूचनायोपेक्षितम्। डप्रत्ययान्तशब्दसामानाधिकरण्यलिङ्गादप्याज्यपृष्ठशब्दयोः स्तोत्रनामताऽवसीयत इत्याह—**पञ्चदशानीति**। क्रियामाणस्य कारकमानाधीननिरूपणत्वात् घृतानां च कथंचिदुपस्थापकत्वेनोपकारकत्वसम्भवेऽप्यवाचकत्वेन गुणवत्त्वाभिधानलक्षणां स्तुतिं प्रति कारणत्वायोगात् तृतीयया साधकतमत्वोपचारेऽपि मुख्यसाधकतमत्वासम्भवात् न तत्संख्यया मुख्यं स्तोमत्वमवसीयत इत्याशयः॥ ३॥

इति तृतीयं चित्राधिकरणम्।

भा० प्र०—चतुर्थ अध्याय के प्रथम और द्वितीय सूत्र से उद्भिद् आदि शब्दों के सम्बन्ध में यह गुणविधि है या नामधेय है—इस रूप में विचार किया गया था। अब जातिशब्द और गुणशब्द के सम्बन्ध में विचार किया जा रहा है। 'चित्रया यजेत पशुकामः' (तै० सं० २०।१।२) 'त्रिवृद् बहिष्पवमानम्' (ता० ब्रा० २०।१।१) पञ्चदशान्याज्यानि (ता० ब्रा० १९।१६।२) सप्तदशानि पृष्ठानि (ता० ब्रा० १९।१९।१) इत्यादि स्थलों में चित्रा, बहिष्पवमान, आज्य, पृष्ठ आदि शब्द गुणविधि हैं या कर्म का नामधेय है—यह संशय होता है। पूर्वपक्षियों का कहना है कि उद्भिद् अधिकरण में यौगिक वृत्ति के अनुसार जिनके अर्थों की प्रतीति हो रही है ऐसे शब्दों की कर्मनामधेयता कही गई है, किन्तु ये शब्द दधि आदि शब्दों के समान रूढ़ एवं प्रसिद्ध अर्थ के कहने वाले होने से गुणविधि है कर्म नामधेय नहीं हैं। न तो ये शब्द कर्म में प्रसिद्ध हैं और न ये यौगिक हैं, चित्रा गुण शब्द है और अन्य जाति शब्द हैं। चित्रया यजेत पशुकामः (पशु की कामना करने वाला चित्रा से याग करें, यजेत इससे पूर्व प्रवृत्त याग का अनुवाद कर चित्रा रूप गुण का विधान करता है। 'अग्निषोमीयं पशुमालभेत' अग्निसोम देवता के उद्देश्य से पशु का आलम्भन करे इसमें जो पशुयाग विहित है, उसमें यागीय पशु कैसा होना चाहिए इसकी सूचना 'चित्रया यजेत' इस वाक्य से दी गई है। चित्रा

शब्द के घटक चित्र शब्द से चित्र=विचित्र एवं टाप् से स्त्रीत्व यह अर्थ रूढ़ि के अनुसार बोधित है। अतः, यह गुणविधि है, इसके द्वारा अग्निषोमीय पशु का चित्रत्व एवं स्त्रीत्व उपदिष्ट होता है, अर्थात् अग्निषोम देवता के उद्देश्य से चित्रवर्ण एवं स्त्री पशु का वध होना चाहिए यह उपदिष्ट होता है।

इस पूर्वपक्ष का समाधान करते हुए 'यस्मिन् गुणोपदेशः प्रधानतोऽभिसम्बन्धः'। इस तृतीय सूत्र का निर्देश किया गया है। चित्रया यजेत, पञ्चदशान्याज्यानि भवन्ति इत्यादि स्थलों में चित्रा आदि का गुण के रूप में विधान नहीं हो सकता है। क्योंकि, ऐसा मानने पर वाक्य-भेद की आपत्ति होने लगेगी, क्योंकि, चित्रा शब्द के द्वारा चित्रत्व एवं स्त्रीत्व इन दो गुणों का विधान करना होगा। और दो वाक्यों की कल्पना करनी पड़ेगी, क्योंकि, दो वाक्यों की कल्पना के विना चित्रत्व और स्त्रीत्व इन दो गुणों का विधान सम्भव नहीं है और 'चित्रया यजेत' इस एक वाक्य को दो वाक्यों के रूप में परिणत करने पर वाक्यभेद दोष अनिवार्य होगा। यदि वाक्यभेद दोष के निवारण के लिए चित्रत्व एवं स्त्रीत्व इन दो गुणों से विशिष्ट पशुद्रव्यरूप करण कारक का दो धर्म चित्रत्व एवं स्त्रीत्व मानना होगा, अतः वाक्यभेद एवं गौरव दोष के परिहार के लिए 'चित्रा' आदि शब्दों को उद्भिद् आदि शब्दों के समान कर्म का नामधेय मानना चाहिए। क्योंकि, ऐसा मानने पर ये सब याग के साथ सामानाधिकरण्य रूप से अन्वित होंगे। चित्रा इसको नामधेय मानने में क्या हेतु है—यह जिज्ञासा करने पर, यही उत्तर है कि इस याग में दधि, मधु, घृत, अप्, धाना, (भूंजा गया द्रव्य) तण्डुल एवं संसृष्ट प्राजापत्य अर्थात् इन सभी दधि आदि द्रव्यों से युक्त प्रजापति देवता के उद्देश्य से कर्तव्य कर्म, इन विचित्र द्रव्यों से साध्य होने से इसे चित्रा नाम से कहा जाता है। यदि 'चित्रया यजेत' इत्यादि वाक्यों को गुणविधि मानकर विहित अग्निषोमीय पशु के चित्रत्व एवं स्त्रीत्व गुण का विधान माना जायेगा तो कृत की हानि और अकृता क अभ्यागम (की कल्पना) नामक दोष होगा। क्योंकि, द्रव्य और देवता ये दो याग के रूप हैं। 'दधि, मधु, पयः, घृतं, धानास्तण्डुल उदकं तत्संसृष्टं प्राजापत्यम्' इस वाक्य में दही, घृत, पयः, मधु, धाना, तण्डुल और उदक रूप द्रव्य एवं प्रजापतिरूप देवता इन दो का ही उपदेश होने से इसके द्वारा जो याग का स्वरूप कहा गया है उसी प्रकरण में 'चित्रया यजेत पशुकामः' इस वाक्य से कर्म का फल सम्बन्ध अवगत होता है। इसलिए दधि, मधु, घृतम् इत्यादि वाक्य में जो कर्म उपदिष्ट है, उसका क्या फल है, इसका बोधक दूसरा कोई भी वाक्य नहीं है, अतः, उसके समीप में कथित 'चित्रया यजेत' इस वाक्य प्रकरण से हटा देने पर 'विश्वजित्' याग के समान ही फल की कल्पना करनी पड़ेगी और चित्रा वाक्य के प्रकरण से त्यक्त होने पर कृतदान और अप्राप्त अग्निषोमीय प्रकरण में प्रविष्ट होने पर अकृताभ्यागम दोष होगा। इन सभी दोषों के परिहार के लिए 'चित्रा' इसको कर्म का

नाम ही मानना उचित है। बहिष्पवमान, आज्य, पृष्ठ आदि शब्दों को भी इसी प्रकार कर्म का नामधेय मानना ही उचित है।

'यस्मिन्' = जिसमें, नामधेय है या गुणविधि इस प्रकार के संशय का विषय जो वाक्य, उसमें, **'गुणोपदेशः'** = रूढ़ि के अनुसार एक से अधिक गुणों के उपदेश अर्थात् वेदवचन अवगत होता है, अथवा जिसके फलस्वरूप वाक्यभेद होता है, उस गुण का उपदेश गृहीत होता है, **'प्रधानतः अभिसम्बन्धः'** = वह गुणविधि नहीं है किन्तु उसका प्रधान अर्थात् धात्वर्थ के साथ अभिसम्बन्ध अर्थात् नामधेय के रूप में सम्बन्ध या अन्वय होता है। **'चित्रया यजेत'** आदि स्थलों में अनेक गुणों का उपदेश देखा जाता है, यह गुणविधि नहीं है, किन्तु नामधेय के रूप में ही धात्वर्थ याग के साथ उसका अभिसम्बन्ध अर्थात् अन्वय होगा अर्थात् ऐसे पद को भी नामधेय कहा जायेगा ॥३॥

इति चित्राज्याधिकरण।

अथ तृतीयं तत्प्रख्याधिकरणम्

[३] तत्प्रख्यं चाऽन्यशास्त्रम् ॥ ४ ॥ सि०

शा० भा०—'अग्निहोत्रं जुहोति स्वर्गकाम' इति 'आघारमाघारयति' इति च समामनन्ति। तत्र संशयः, किमग्निहोत्रशब्द आघारशब्दश्च गुणविधी, उत कर्मनामधेये इति। गुणविधी इति ब्रूमः। कुतः ?

गम्यते हि अग्नये होत्रमस्मिन्निति। तथा क्षरणसमर्थं द्रव्यं घृतादि, आघारमाघारयति इति। प्रसिद्धिरेवमनुग्रहीष्यते। गुणविधिश्च दर्विहोमे, आघारश्चोपांशुयाजे। तत्रैतयोरर्थवत्ता, प्रवृत्तिविशेषकरत्वं च। न च गुणविधिपक्षे लक्षणा भवति। यथा 'उद्भिदा यजेत' इति। अग्निहोत्रे समासेनावगतं गुणविधानम्। आघारेऽपि 'आघारं निर्वर्तयतीति श्रुत्यैव गुणो विधीयते। तस्माद् गुणविधी इत्येवं प्राप्ते।

ब्रूमः। तत्प्रख्यं चाऽन्यशास्त्रम्। यौ गुणावेताभ्यां विधीयेते इत्याशङ्क्यते, तावन्यत एवावगतौ। यदग्नये च प्रजापतये च सायं जुहोति इति देवताविधानम्, चतुर्गृहीतं वा एतदभूत्तस्याऽऽघारमाघार्य इत्याघारे च द्रव्यविधिः। अविदितवेदनं च विधिरित्युच्यते। विदितं चात्रान्यतो गुणविधानम्। तस्मान्न गुणविधि कर्मनामधेये तु सम्भवतः। यस्मिन्नग्नये होत्रं होमो भवति, तदग्निहोत्रम्। दीर्घधारा क्षरणक्रिया प्रसिद्ध एवाऽऽघारः। तस्मात्कर्मनामधेये। प्रसिद्ध्यादयश्चोक्तोत्तराः।

प्रजापतिनिवृत्त्यर्थमग्निविधानं भविष्यतीति चेत् नैतदेवम्। अग्निं ह्येष विधातुं शक्नोति, न प्रजापतिं प्रतिषेद्धुं प्रतिषिध्यमानस्य च प्रजापतेर्विधान-

मनर्थकं स्यात्। प्रजापतिर्देवतेति गम्यते। गम्यमानं च न शक्यं मिथ्येति कल्पयितुम्। अतोऽयमसमाधिः।

शंका

उच्यते। आघारमाघारयति इति द्रव्यपरा चोदना यैस्तु द्रव्यं चिकीर्ष्यंत इति। द्रव्यं ह्यनया क्रियया क्षार्यते। क्षारितं च यागं साधयति। तत्कस्य प्रधानस्य कर्मणो नामधेयमिति।

तन्निरासः

उच्यते। एतदेवाऽऽघारणं प्रधानकर्म। नन्वस्य द्रव्यदेवतं नास्ति। अस्तीति ब्रूमः। तस्याऽऽघारमाघार्यं इत्याज्यं द्रव्यम्, मान्त्रवर्णिकी[1] देवता 'इन्द्रं ऊर्ध्वोऽध्वर' इत्याघारमाघारयति इति मन्त्रो ह्यभिदधत्कर्म, तत्साधनं वा समवैति। एष च मन्त्र इन्द्रमभिधातुं शक्नोति। स यदीन्द्रस्तत्साधनं[2] भवेदेवमनेन मन्त्रेणाऽऽघारः शक्यते कर्तुम्। तस्मादिन्द्रो देवता। द्रव्यदेवतासंयुक्तमाघारणम्[3]। तस्माद्यजतिः, तस्य यजतेर्नामधेयमिति ॥ ४ ॥

इति तृतीयं तत्प्रख्याधिकरणम् ॥ ३ ॥

भा० वि०—एवं यौगिकानां निरूढानां च शब्दानां गुणविधित्वनिरासेन कर्मनामधेयत्वमधिकरणद्वयेन व्युत्पाद्य, इदानीं यौगिकेष्वेव केषुचित्केनचिद्विशेषेण गुणविधित्वमाशङ्क्य निरस्यत इति सङ्गतिः। न चैवमुद्भिदधिकरणानन्तरमेवैतद्युक्तमिति वाच्यम्, यथागुणवाक्यगतवाक्यभेदालोचनेन पूर्वाधिकरणे गुणविधित्वनिरासः तथात्राऽपि यदग्नये चेति गुणवाक्यगततत्प्रख्यान्यशास्त्रालोचनेन तन्निरासादवान्तरसंगतेः विषयमाह—अग्निहोत्रमिति। तत्प्रख्यत्वपरिहारसंभवासंभवाभ्यां संशयमाह—तत्रेति। प्रयोजनं तु अग्निहोत्रवाक्ये दधिहोमेष्वप्यग्निदेवतालाभः पूर्वपक्षे, सिद्धान्ते मान्त्रवर्णिकदेवतालाभः, आघारवाक्ये तु उपांशुयाजस्य क्षरणयोग्यपयः प्रभृत्यशेषद्रव्यता पूर्वपक्षे, सिद्धान्ते त्वाज्यद्रव्यतैवेति मन्तव्यम्।

पूर्वपक्षमाह—गुणविधीति। हूयत इति होत्रं हविः। अग्निहोत्रवाक्ये हि संप्रदानविहितचतुर्थीसमासावगमेनैव देवतावगम्यते। आघारमाघारयतीत्यत्राप्याघार्यंत इति कर्मव्युत्पत्त्या क्षरणसमर्थं घृतादिद्रव्यमवगम्यत इत्यर्थः।

ननु व्युत्पत्तिः कथंचित्कर्मण्यपि संभविष्यति तत्राह—प्रसिद्धिरिति। अस्तु प्रसिद्ध्या गुणवचनत्वम्, तथापि न तद्विधानं संभवति। अग्निहोत्रे कर्मण्यग्नि-

---

१. ब. मन्त्रवर्णिकी च। २. ब. साधनं एवमनेन।

३. ब. एवं च द्रव्यदेवत; सम्बन्धः।

देवताया "यदग्नये च प्रजापतये च सायं जुहोति" इति शास्त्रान्तरप्राप्तत्वादत आह—**गुणविधिश्चेति**। भिन्ने जुहोतीत्यादावदेवताके जुहोति चोदनाचोदिते कर्मणीत्यर्थः। तथाप्याघारपदाभिधेयस्य द्रव्यस्य 'चतुर्गृहीतं वा एतदभूत्' इति शास्त्रान्तरप्राप्तत्वान्नाघारवाक्ये विधानमित्यत आह—**आघार इति**। तद्विधिरित्यर्थः। आघारशब्देन क्षरणयोग्यद्रव्याज्यपयःप्रभृतिद्रव्यमात्राभिधानात् तस्य वान्यतो प्राप्तस्य आघारणक्रियासंस्कृतस्य क्वचिद्विनियोगापेक्षायां प्रकरणवशाद्दर्शपूर्णमासप्रधानसम्बन्धेऽपि सति श्रुतार्थापत्तिकल्पितविनियोगविधिना अश्रुतद्रव्यकोपांशुयागे विनियोगः कल्प्यत इत्यर्थः। एवं प्रसिद्धिवशेनाग्निहोत्राघारपदयोः गुणविधित्वमुक्त्वा तत्रैव हेत्वन्तरमाह—**तत्रेति**। नामधेयत्वे धातुनैवोक्तार्थत्वेन निष्प्रयोजनत्वादित्यर्थः। गुणविधित्वे युक्त्यन्तरमाह—**प्रवृत्तीति**।

नन्वेवमप्यग्निहोत्रपदेनाग्निदेवताकद्रव्याभिधानादाघारपदेन चाघार्यद्रव्याभिधानाद्धातुसामानाधिकरण्यसिद्ध्यर्थमग्निहोत्रवता होमेनाघारवता यागेनेति मत्वर्थलक्षणाप्रसङ्गः। यथोद्भिद्वता यागेनेति तत्राह—**नचेति**। अग्नये होत्रमस्मिन्निति व्यधिकरणबहुव्रीहिणैव मत्वर्थस्यावगमान्नाग्निहोत्रपदे लक्षणा। आघारेऽपि द्वितीयाश्रुत्या संस्कार्यत्वावगमात् संस्कृतस्य च क्वचिद्विनियोगान्यथानुपपत्त्या गुणत्वप्रतीतेः न लक्षणेत्यर्थः।

पूर्वपक्षमुपसंहरति—**तस्मादिति**।

सिद्धान्तमवतारयति—**एवमिति**। सूत्रे तच्छब्देन पूर्वसूत्रनिर्दिष्टगुणपरामर्शं दर्शयन् व्याचष्टे—**यौ गुणौ इति**। तदनेन स गुणः प्रख्याप्यते येन, तत्प्रख्यम्, यस्मिन् गुणविधिः नामधेयमिति सन्दिग्धे तत्प्रख्यं चान्यशास्त्रम्, तदपि नामधेयमिति सूत्रं योजितम्। अर्थ(न्य)त इत्युक्तं शास्त्रान्तरं विषयभेदेन दर्शयति—**यदग्नये चेत्यादिना**। **विधानमित्यन्तेनेति**। अग्निहोत्रवाक्यविहितं होमं सायं प्रातश्च जुहोतीति वाक्यविहितं कालं च, यत्सायं जुहोतीत्यनूद्याग्नये प्रजापतय इति चतुर्थ्यवगतदेवतात्वयोरग्निप्रजापतिरूपयोश्च शब्दाभ्यां मिथस्समुच्चित्य होमसम्बन्धविधानमित्यर्थः।

नन्वन्यतोऽवगतयोरपि देवताद्रव्ययोः अग्निहोत्राघारपदाभ्यां विधानं किं न स्यादित्याशङ्क्य विधिलक्षणाभावादित्याह—**अविदितेति**। गुणविधेरन्यतस्सिद्धत्वफलमाह—**तस्मादिति**।

ननु कर्मनामधेयेऽपि संभवतः। अग्नये होत्रमस्मिन्निति तादर्थ्यचतुर्थीसमासस्याप्रकृतिविकृतिभूतयोरसंभवात्, अग्नेर्होत्रमिति षष्ठीसमासाश्रयणेऽपि सम्बन्धविशेषानवधारणाद् व्यधिकरणबहुव्रीहेश्चासामञ्जस्यं स्यात्। आघारशब्दस्य च कर्मव्युत्पत्त्या द्रव्यवाचित्वादित्यत आह—**नामधे येत्विति**। अग्नये होत्रमिति

न चतुर्थीसमासप्रदर्शनमपि तु षष्ठीसमासाभिहितसम्बन्धसामान्यस्य विशेषपर्यवसानप्रदर्शनम्। होमशब्दोऽपि हूयत इति व्युत्पत्त्या द्रव्यपरः। दीर्घाघारा यस्यां सा क्रिया प्रसिद्ध एवाघारः आधारपदाभिधेयप्रसिद्ध इत्यर्थः। यद्यपि लक्षणाभावान्न चतुर्थी समासः। तथापि षष्ठीसमासस्संभवत्येव; यदग्नये चेति वाक्यान्तरादवगते तादर्थ्यलक्षणसम्बन्धविशेषे षष्ठ्यास्तल्लक्षणार्थत्वात् अग्निहोत्रशब्दस्य च जुहोतिसामानाधिकरण्यान्यथानुपपत्त्या कण्ठे कालवद्व्यधिकरणबहुव्रीह्याश्रयणादाघारशब्दस्य च भावव्युत्पत्त्या क्रियावाचित्वादित्याशयः, नचाघारशब्दस्य क्षरणयोग्यपयःप्रभृति द्रव्यमात्रवाचिन उपांशुयाजापेक्षितद्रव्यसमर्पकता सर्वस्मै वा इति वाक्यविहितध्रौव्याज्यलाभेनोपांशुयाजस्यापि निराकाङ्क्षतयाघारस्य प्रयाजाङ्गद्रव्यसंस्कारककर्मत्वप्रतीतेरित्यवसेयम्। समासादिसंभवफलमाह—**तस्मादिति**। एवमग्निहोत्रादिपदस्य कर्मण्यपि प्रसिद्धिसंभवे सति प्रथमाधिकरणन्यायेनार्थत्वप्रवृत्तिविशेषकरत्वसंभवात्पूर्वपक्षहेतवो निरस्ता भवन्तीत्यत आह—**प्रसिद्ध्यादयश्चेति**। इदानीमग्निप्रजापत्योः द्वयोः शाखान्तरप्राप्तयोः अग्नेः पुनर्वचनं प्रजापतिनिवृत्त्यर्थं भविष्यतीति गुणविधिवादी चोदयति—**प्रजापतीति**। परिसङ्ख्यायां मन्त्राधिकरणोक्तस्वार्थहान्यादिदोषत्रयापत्तेः। मैवमिति परिहरति—**नैतदित्यादिना**। परिसङ्ख्येयस्य विध्यानर्थक्यापत्तेश्च न परिसंख्या युक्तेत्याह—**प्रतिषिध्यमानस्येति**। श्रुतपरिसङ्ख्यायां श्रुतप्रामाण्यं च स्यादित्याह—**प्रजापतिरिति**। अतस्तत्प्रख्यत्वदोषस्य परिसङ्ख्यार्थत्वं न परिहार इत्याह—**अत इति**। अग्निहोत्रस्य प्रधानकर्मत्वात् भवतु तत्पदं नामधेयम्, आघारस्य तु संस्कारकर्मत्वेन संस्कार्यविशेषादेव विशेषसिद्धेः नामापेक्षाभावान्न तत्पदं नामधेयमिति चोदयति—**उच्यत इति**। द्रव्यपरा द्रव्यप्रधाना गुणकर्मविषयेति यावत्। कुत इत्यत आह—**यैस्त्विति**। यैः कर्मभिः द्रव्यं चिकीर्ष्यते=संस्कर्तुमिष्यते। गुणस्तत्र प्रतीयेत इति ३–१–८ न्यायादित्यर्थः। कथमत्र द्रव्यचिकीर्षा? तत्राह—**द्रव्यं हीति**। प्रयाजद्रव्यं हि अनया क्षारणक्रियया एकदेशक्षारणात्मिकातिशययुक्तं क्रियत इत्यर्थः। न च क्षारितैकदेशस्यान्यत्रानुपयोगेन क्षारणसंस्कारानर्थक्यमित्याह—**क्षारितं चेति**। यागम्-प्रयाजयागमित्यर्थः।

अस्तु आघारस्य गुणकर्मत्वम्। ततः किमत आह—**कस्येति**। प्रधानकर्मण इत्यनेन तस्यैव नामधेयापेक्षा, नेतरस्येति दर्शितम्। प्रयाजद्रव्यसंस्कारकर्मणोऽप्याघारस्य प्रधानकर्मतापि संपादयितुं शक्येति परिहरति—**उच्यत इति**। द्रव्यदेवतासम्बन्धरहितस्य कथं प्रधानकर्मतेति चोदयति—**नान्विति**। तत्संपादनमपि प्रतिजानीते—**अस्तीति ब्रूम इति**। चतुर्गृहीतं वा एतदभूत् तस्याघारमिति तच्छब्देन चतुर्गृहीतस्याघार्यस्य परामर्शात् द्रव्यं तावत्संपन्नमित्याह—**तस्येति**। देवतामपि संपादयति—**मान्त्रवर्णिकीति**। ननु मन्त्रस्य स्वयं कथं

कर्माङ्गत्वम्, येन तदर्थस्येन्द्रस्य देवतात्वमत आह—इन्द्र इति। त्रिनियोगादिति शेषः।

ननु विनियोगान्मन्त्रस्य कर्माङ्गत्वेऽपि, कथं तदर्थस्य तथात्वं तत्राह—**मन्त्रो हीति**। समवैति=सम्बध्नातीत्यर्थः। न चायं कर्माभिधातुं शक्नोतीत्याह—**एष इति**। ततश्चेन्द्रस्य साधनत्वं परिशिष्यत इत्याह—**स यदीति**। तथापि कथं देवतात्वमित्याशङ्क्य चतुर्गृहीतद्रव्यलाभेन पारिशेष्यादित्याह—**तस्मादीति**। द्रव्यदेवतासंपत्तिफलमाह—**एवमिति**। यजतिः—यागः प्रधानकर्मेत्यर्थः। एवमाघारस्य प्रधानकर्मत्वे सिद्धं तत्पदस्य नामधेयत्वमित्याह—**तस्येति**[1] ॥ ४ ॥

इति तत्प्रख्याधिकरणम्।

अथ तृतीयं तत्प्रख्याधिकरणम्

त० वा०—ननु सर्वत्र द्विप्रकारमेव नामपदं सांविज्ञायिकम्, यौगिकं च। उभयमपि चाधिकरणद्वयेन प्रतिपादितम्। किमिदानीमवशिष्यते येन पुनर्विचार्यते ? उच्यते। यौगिकानामेव मत्वर्थलक्षणापरिहारेणात्र चिन्ता।

पूर्वपक्षः

उत्तराधिकरणे तु सांविज्ञायिकानाम्, वाक्यभेदासम्भवात्। तत्राग्नये होत्रमस्मिन्निति सिद्धान्तेऽप्यभ्युपगमादन्यसमासार्थानुपलब्धेश्चान्तर्णीतमत्वर्थो बहुव्रीहिरखेदेन गुणं विधत्ते। त एव च प्रसिद्ध्यादयो हेतवः। सत्यामपि च सायं होमेऽग्निप्राप्तौ तद्वर्जं प्रातर्होमे; होममात्रनुवादाद्वा सर्वदर्विहोमेष्वविहितदेवताकेषु विधास्यति, वाक्यसामर्थ्यात्।

तथाऽऽघार्यत इत्याघार इति क्षारणसमर्थं द्रव्यमाज्यपयःप्रभृत्यभिधीयते। तच्च द्वितीयानिर्देशात् क्षारणक्रियासंस्कार्यत्वेनाध्यवसीयमाननुपयुज्यमानसंस्कारानुपपत्तेः प्रयोजनमपेक्षते। धर्ममात्रं चास्य क्षारणम्, शब्दार्थमात्रापवर्गित्वान्नाशेषक्षारणं करोति। तत्क्षारितैकदेशेन किं कर्तव्यमित्यस्त्यपेक्षा ? लोकेऽपि च द्रवद्रव्याणां क्वचित्पानादावुपयोक्ष्यमाणानामीषत्क्षारणसंस्कारं कुर्वन्ति। तेनाभिषवयुक्तपूतीकत्, भक्षप्रयुक्तफलचमसवच्च संस्कार्यं द्रव्यं कर्ममात्राभिलाषि। प्रकरणवशेन दर्शपूर्णमासप्रधानान्युपसर्पति। तत्रापि चाऽऽग्नेयादीनां विहितद्रव्यकत्वात्, उपांशुयाजः केवलः साकाङ्क्ष इति, तादर्थ्यं प्रतिपद्यते।

आह च—

'श्रुतसंस्कारसम्बन्धं मुख्यैर्यद्यप्यसंगतम्।
अन्यथा तदयोग्यत्वात्प्रकृतैर्याति संगतिम् ॥' इति।

---

१. तस्य चेति व्याख्याने पाठः।

अथ वा यत्करोतीति प्रत्ययार्थमात्रं साकाङ्क्षत्वादेवोपांशुयाजभावनामनूद्याऽऽघारद्रव्ये वाक्येन विधीयमाने, तत्साध्यत्वादेव धात्वर्थः प्राप्तोऽनूद्यते। घ्रौवप्राप्त्यैव वा तस्य क्षरणात्मकत्वे विज्ञाते क्षरणसमर्थमात्रपयःप्रभृतिविधि मन्यते। न च धात्वर्थादेव सिद्धेर्नाम्ना प्रयोजनम्। न च संस्कारकर्माणि क्वचिन्नामवन्ति दृश्यन्ते। **श्रुत्यैव गुणो विधीयत** इति। द्वितीयाश्रुत्यैव संस्कार्यत्वादवश्यं क्वचिदस्य गुणत्वमित्यवगमाभिप्रायम्।

सिद्धान्तवर्णनम्

अत्रोच्यते –

विधित्सितगुणप्रापि शास्त्रमन्यद्यतस्त्विह।
तस्मात्तत्प्रापणं व्यर्थमिति नामत्वमिष्यते॥

शंका

अत्र वदामः—

सायं होमे यदि ब्रूयादाघारे च परो विधिम्।
ततः शास्त्रान्तरप्राप्तेर्विधिः स्यान्निष्प्रयोजनः॥
यदा त्वदेवते होमे देवताविधिरुच्यते।
द्रव्यं चोपांशुयाजस्य तदा तत्प्रख्यता कथम्॥

तन्निरासः

उच्यते—

विधिश्चेदग्निहोत्रं स्यात्ततोऽस्य विषयैषिणः।
निवेशः प्रकृते वा स्याद्युक्तेरप्रकृतेऽपि वा॥
अग्नेर्होत्रेण[1] सम्बन्धे कृतेऽन्येन प्रवर्तनात्।
अग्निहोत्रपदे स्पष्टमनुवादत्वलक्षणम्॥
अनूद्य चापि धात्वर्थं गुणः सर्वो विधीयते।
न चानुवादः प्रकृतात्कर्मणोऽन्यत्र लभ्यते॥
प्रकृतं चेदनूद्याऽयं गुणो होमे विधीयते।
तत्र तत्प्रख्यताऽन्यत्र न विधिस्तत्परिग्रहात्॥
न च धात्वनुवादोऽत्र कथंचिदुपपद्यते।
प्रकृताप्रकृताभावात्तस्मात्कर्म विधीयते॥
सायमूर्ध्वादिसंयुक्तैर्गुणो वाक्यैर्विधीयते।
शुद्धं न श्रूयते कर्म प्रकृतं नास्ति तेन तत्॥

---

१. क. (टिप्पण्यां) अग्निहोत्रेणेति पा० पुस्तकान्तरे।

दूरस्थस्यानुवादश्च व्यवधानान्न युज्यते ।
तस्य बुद्धावनारोहात्कौण्डपायिनहोमवत् ॥
विधीयतां विशिष्टं चेत्कर्मेत्येवं विकल्प्यते ।
न चेदन्येन शिष्टाः स्युस्तत्प्रख्यं चेति चोत्तरम् ॥
न चतुर्थीसमासस्य लक्षणं चात्र विद्यते ।
न च तेन विना शक्या देवताविधिकल्पना ॥
यः कश्चिदेव सम्बन्धः षष्ठीतत्पुरुषाद्भवेत् ।
अनुवादेऽन्यतः सिद्धे कथ्येताऽप्यश्वघासवत् ॥
विधातव्यश्च सम्बन्धो भवेत्परपदार्थयोः ।
प्रातर्होमेऽपि तेनैष वह्निर्नैव विधीयते ॥
एकदेशेऽपि च ज्ञानान्नानुवादोऽपगच्छति ।
आघारस्यापि सम्बन्धः क्लेशेनोपांशुकर्मणा ॥
सामानाधिकरण्यं च साध्यांशेनेह कर्मणः ।
विस्पष्टं द्रव्यनामत्वं न चाऽऽघारस्य गम्यते ॥ ४ ॥

(इति तृतीयं तत्प्रख्याधिकरणम्)

॥ अथ तृतीयं तत्प्रख्याधिकरणम् ॥

न्या० सु०—निरूढानिरूढत्वेन द्विविधस्यापि नामधेयस्य विचारितत्वादुत्तराधिकरणद्वयानर्थक्यमाशङ्कते—**नन्विति** । पूर्वोक्तगुणविधिनिरासहेत्वभावादिह हेत्वन्तरेण निरासार्थं चिन्तेति परिहरति—**उच्यत इति** । वाक्यभेदासम्भवाच्चिन्तेत्यनुषङ्गः । तत्रेह तत्प्रख्यान्यशास्त्रसद्भावेन गुणविधिनिराकरणम्, उत्तरत्र तद्व्यपदेशान्यशास्त्रसद्भावेनेति विवेकः । यथा चाज्यादिशब्दानां गुणवाक्यगतवाक्यभेदालोचनेन गुणविधित्वनिरासः, तथाग्निहोत्राघारशब्दयोरपि गुणवाक्यगततत्प्रख्यान्यशास्त्रालोचनेनेत्यनन्तरसङ्गतिः । तद्व्यपदेशस्य त्वर्थवादगतत्वाद्वैलक्षण्यम् । न च यौगिकत्वसाम्यमात्रेण उद्भिदधिकरणान्तरमेतदारब्धुं युक्तं सामनाधिकरण्यनिरपेक्षस्य यौगिकत्वस्य नामधेयासाधकत्वेनाकिंचित्करत्वात् तत् प्रख्यत्वपरिहारसंभवासम्भवाभ्यां च सन्देह इति सर्वमनवद्यम् ।

अग्निहोत्रशब्दस्य देवतालक्षणगुणविधित्वाभिधानार्थं 'गम्यते हीति भाष्यं चतुर्थीसमासलक्षणाभावादयुक्तमाशङ्क्याह—**तत्रेति** । ननु सिद्धान्ते प्रमाणान्तरावगतार्थानुवादत्वात्, तेन चाग्नेर्देवतात्वावगतेस्तदनुसाराच्चतुर्थीबहुव्रीह्यङ्गीकरणं युक्तम्, विधिपक्षे तु प्रमाणान्तराभावान्न लक्षणा । ननु गतिसामासाङ्गीकरणं युक्तमित्याशङ्क्यान्येत्युक्तम् । षष्ठीतत्पुरुषे सम्बन्धविशेषानवधारणेन व्यवहारसिद्धेः सर्वहोमानां चाग्न्याधारत्वस्य यदाहवनीयवाक्यादेव प्राप्तेः सप्तमीबहुव्रीह्यानर्थक्याल्लक्षणाननुगत-

त्वाद्विशेषाच्च समासान्तरानुपपत्तेः पारिशेष्याच्चतुर्थीबहुव्रीहिरेवाऽवसीयत इत्याशयः। 'न चे'ति भाष्ये वक्ष्यमाणं चोद्भिन्न्यायवैषम्यं बहुव्रीह्याङ्गीकरणस्य प्रयोजनमित्याह—**अन्तर्णीतेति**। प्रसिद्ध्यादिहेतुत्रयं विक्षिप्योक्तं सङ्कलय्य पूर्ववद्व्याख्येयमित्याह—**त एव चेति**। पूर्वव्याख्यातिदेशार्थस्तत्त्वोपचारः।

ननु गौरवभयेनेहाप्युद्भिच्चित्रादिवद्विशिष्टविध्यनाश्रयणात् 'यदग्नये च प्रजापतये च सायं जुहोति, यत्सूर्याय च प्रजापतये च प्रातर्जुहोतीति वाक्ययोरनेकगुणोपादानात्कर्मानुवादेन गुणमात्रविधौ वाक्यभेदापत्तेर्गुणविशिष्टकर्मविधानावगमात्, तद्विहितयोः कर्मणोः सन्निधानादग्निहोत्रशब्दो गुणविधिः प्रसज्येत। तत्र च सायं होमेऽग्नेः प्राप्तत्वावगमात्, तत्प्रख्यशास्त्रान्तरसद्भावे चानर्थक्यापत्तेर्नाग्न्याख्यदेवताविधिर्युक्त इत्याशङ्क्याह—**सत्यामिति**। तद्वर्जमित्यनेनोभयोः सन्निधानाविशेषेऽपि प्राप्तत्वात् सायं होमवर्जनमिति दर्शितम्।

उत्पत्तिशिष्टसूर्यप्रजापत्यवरुद्धेऽपि प्रातर्होमे, ताभ्यां सह समुच्चयेन विकल्पेन वाग्निर्निवेक्ष्यते।

यद्वाऽग्निहोत्रं जुहुयात्स्वर्गकाम इत्यत्र वाक्येऽग्निहोत्रशब्देन फले विधीयमानो गुणः प्रकृताश्रयापेक्षायां सायं होमेऽग्न्याख्यस्य गुणस्यान्यतः प्राप्तेरभिधेयतया फलान्वयायोगेनाश्रयान्तरापेक्षत्वात् प्रातर्होममाश्रयत्वेन गृह्णन्नित्येतद्गुणं सूर्यादिकं बाधित्वा निवेक्ष्यते।

यद्वा यज्जुहोति, तत्सूर्याय च प्रजापतये चेति चशब्देनान्योऽन्यसापेक्षस्यैव देवताद्वयस्य क्रियान्वयप्रतीतेः प्रतिकारकं प्रत्ययव्यापाराभावादनेकगुणोपादानेऽपि वाक्यभेदानापत्तेः सूर्यवाक्यस्यापि गुणसञ्चरितविधिशक्तत्वेन कर्मोत्पादकत्वाभावात् सूर्यप्रजापत्योरुत्पत्तिशिष्टत्वाभावेन बलीयस्त्वानुपपत्तेः सायं च प्रातश्च जुहोतीत्यस्यानुपादेयकालसम्बन्धात् प्रकरणान्तरन्यायेनाश्विनवाक्यवत् पूर्वपक्षे कर्मविधित्वावगमात्तस्य चासम्भवद्विकल्पसमुच्चयसायम्प्रातः काललक्षणगुणद्वययोगेन यदाग्नेयोऽष्टाकपाल इतिवत् कर्मद्वयविधायकत्वावगतेः, तद्विहिते प्रातर्होमे वाक्यान्तरविहिताभ्यां सूर्यप्रजापतिभ्यां सह तुल्यबलत्वाद्विकल्पेनाग्निहोत्रवाक्यमग्निं विधास्यतीति वक्ष्यमाणानुषङ्गेण वाक्यं पूरणीयम्।

भाष्यकृता तु सायं च प्रातश्च जुहोतीत्येतद्वाक्यविहितस्य कर्मद्वयस्य यदग्नये च सूर्याय चेति वाक्याभ्यां सायम्प्रातःकालविशिष्टकर्मविशेषानुवादेन देवताविधायकाभ्यां विहितेनाग्निसूर्यादिना नैराकाङ्क्ष्यात्सन्निहितेऽपि तस्मिन् अग्निहोत्रवाक्येन गुणविधानाशक्तेर्द्रव्यस्थेष्वप्यविहितदेवताकेषु जुहोतिचोदितेषु दर्विहोमशब्दवाच्येषु गुणविधिरित्युक्तम्।

तदुपपादयति—**होमेति**। सूर्याग्निवाक्ययोः कालदेवताविशिष्टकर्मविधायित्वे सायम्प्रातर्वाक्यस्य तत्र कालविधायित्वायोगादत्रत्यपूर्वपक्षे चाग्निहोत्रवाक्यस्य कर्म-

विधायित्वाभावात्कालविशिष्टकर्मविधायित्वापत्तेस्तद्विहितेऽपि कर्मणि जुहोतिचोदितत्वाद्विहोमशब्दवाच्ये देवताविधिं वक्तुं सर्वशब्दः ।

नन्वेवं सन्निहित एव सायम्प्रातर्वाक्यविहिते कर्मणि गुणविध्युपपत्तेर्दूरस्थेषु विधिर्न युक्त इत्याशङ्क्य, होममात्रेत्युक्तम् । सूर्याग्निवाक्ययोः कालविशिष्टकर्मानुवादेन देवताविधायकतया विशेषरूपत्वात् तद्विहितदेवतावरुद्धे कर्मणि सन्निहितेऽप्यग्निहोत्रवाक्यं होममात्रानुवादेन देवताविधायकतया सामान्यरूपत्वात् ततो दुर्बलं न शक्नोति देवतान्तरं विधातुमित्याशयः । नन्वसन्निहितस्य कर्मणोऽप्रत्यभिज्ञानात् कथमनुवाद इत्याशङ्क्यैकवाक्योपात्तजुहोतिसामर्थ्यात् प्रत्यभिज्ञानोत्पत्तिरुक्ता । 'नन्वाघारमाघारयती'त्येतद्वाक्यविहिते कर्मणि 'चतुर्गृहीतं वा एतदभूत्तस्याघारमाघार्य, त्रिरितः प्राचीनं प्रयाजान् यजती'ति वाक्यान्तरेणाघारशब्दवाच्यस्य क्षरणार्हद्रवद्रव्यस्य चतुर्गृहीतस्याज्यविशेषरूपेण प्राप्तत्वात् सामान्यविधेयश्चाविशेषोपसहारेण पयःप्रभृतिद्रवद्रव्यान्तरप्रापकत्वायोगात्तत्प्रख्यशास्त्रान्तरसद्भावेनाघारशब्दस्य गुणविधित्वं न युक्तमित्याशङ्क्य, आघारश्चेति भाष्येणाघारशब्दवाच्यं द्रव्यमात्रमुपांशुयाजे विधीयत इत्युक्तम् । तदुपपादयितुमाह— **तथेति ।**

ननु क्षारितस्य नष्टत्वात्कथं प्रयोजनापेक्षेत्याशङ्क्याह—**धर्ममात्रं चेति ।** प्रतिपत्त्यर्थत्वे दृष्टार्थत्वात् सर्वस्य क्षारणं स्यात् । इदं त्वदृष्टसंस्कारार्थत्वात् शब्दमात्रेऽनुष्ठितेऽपवृज्येतेत्यर्थः—**तत्क्षारितेति ।** तस्मादित्यर्थे तदित्यव्ययम् । ननु 'यदि सोमं न विन्देत । पूतीकानभिषुणुयादित्यभिषवस्य, स यदि राजन्यं वा वैश्यं वा याजयेत्, स यदि सोमे विभक्षयिष्येत् न्यग्रोधस्तिभिनीराहृत्य, ताः सम्पिष्य, दधन्युन्मृज्य तमस्मै भक्षं प्रयच्छेन्न सोममिति भक्षस्य च प्रकरणेन यागसाधनसंस्कारतया प्रत्यभिज्ञानादभिषवयुक्तानां पूतिकाख्यानां वृक्षविशेषाणां भक्षयुक्तस्य च न्यग्रोधस्यावरोधांश्च, फलानि चोदुम्बराण्याश्वत्थानि, प्लाक्षाणि अभिषुणुयात् तानि भक्षयेदित्यैतरेयब्राह्मणेऽवरोधशब्दवाच्यानां स्तिभिनीनामौदुम्बरादिफलसाहित्यश्रवणात् तत्समुदायस्य भूम्ना फलचमसशब्दाभिधेयस्य यागसाधनत्वं युक्तम् । क्षारणस्य तु कथमित्याशङ्क्याह—**लोकेऽपि चेति ।** क्षारणस्याप्युपयोक्ष्यमाणसंस्कारत्वेन लोकेऽवधारणात्, तद्युक्तस्य द्रवद्रव्यस्यावश्यं क्वचित्कर्मणि साधनत्वावगतेर्युक्ता प्रयोजनापेक्षेत्याशयः । प्रयोजनापेक्षामुपसंहरति—**तेनेति ।**

ननु यदि सोमं न विन्देति सोमाभावे पूतिकानां प्रतिनिधिनियमार्थेन विधिप्रतीतेस्तत्कार्यकारित्वं युक्तम्, आघाराख्यस्य तु द्रव्यस्य कस्यचिदभावे विध्यभावात् प्रतिनिधित्वाप्रतीतेः कथं कर्मापेक्षेत्याशङ्कानिरासाय प्रतिनिधित्वरहितदृष्टान्तान्तराभिधानम् । पूतिकादिवत् संस्कार्यत्वान्यथानुपपत्त्यास्यापि कर्माङ्गत्वावसायात् विशेषानवगतेः सामान्यतस्तावदभिलापोऽस्तीत्यर्थः ।

नन्वेवमपि उपांशुयाजार्थत्वापत्तिः कथमित्याशङ्क्याह—**प्रकरणेति ।** पार्वणहोमादिनिवृत्त्यर्थः प्रधानशब्दः । नन्वक्रियात्मकत्वेन द्रव्यस्य प्रकरणाग्राह्यत्वात् स्ववाक्योपात्तेनैव

कर्मणाऽन्वयो युक्तः, न प्रकृतेनेत्याशङ्कानिरासार्थं वृद्धसम्मतिमाह—**आह चेति।** श्रुतः संस्कारेण सम्बन्धो यस्य द्रव्यस्य, तन्मुख्यैः प्रथमावगतैः स्ववाक्योपात्तैः कर्मभिरसङ्गतमपि कर्मान्वयं विना संस्कारसम्बन्धायोग्यत्वात्प्रकृतैरन्वयं यातीत्यर्थः।

यद्वा 'यदि सोमं न विन्देत यदि सोमं विभक्षयिषेदिति च मुख्ययागसाधनसोमप्रसङ्गात्[1] पूतीकफलचमसयोस्तत्कर्मकारित्वप्रतीतेः प्रकृतकर्मान्वयो युक्तः अस्य तु कथमित्याशङ्कानिराकरणार्थं मुख्यैराधारणसंस्कार्यैर्द्रव्यान्तरैर्यद्यप्यसङ्गतमित्युक्तम्। एवमाधारवाक्यस्य संस्कारविधायित्वमङ्गीकृत्य संस्कार्यत्वान्यथानुपपत्त्योपांशुयाजे द्रव्यविनियोगपर्यवसायितोक्ता, इदानीं वाक्यस्यैवोपांशुयाजे द्रव्यविनियोजकत्वमाह—**अथ वेति।** नन्वाधारणलक्षणधात्वर्थभेदाच्छब्दान्तरन्यायेन भावनाभेदप्रतीतेः कथमुपांशुयाजभावनानुवादः इत्याशङ्क्य आधारद्रव्यसाध्यत्वादेवेत्युक्तम्। आधारणक्रियायोगप्रवृत्ताधारशब्दवाच्येन यत् साध्यते, तदाधारणमेव भवतीत्येवं प्राप्तो धात्वर्थः प्रत्ययानुग्रहायाऽनूद्यमानो न भावनां भिनत्तीत्याशयः।

नन्वत्र शुद्धभावनावाचिकरोत्यश्रवणात् शुद्धस्य चाख्यातस्याप्रयोज्यत्वात् धातुविशिष्टेन प्रत्ययेन धात्वर्थावच्छिन्नभावनानुवादपूर्वकद्रव्यविधानापत्तेः प्रागेव धात्वर्थप्राप्तिर्वाच्येत्याशङ्कानिरासायाऽन्यथाप्राप्तिमाह—**ध्रौवप्राप्तेति।** 'तावब्रूतामग्नीषोमावाज्यस्यैव नौ उपांशु पौर्णमास्यां यजन्नित्यस्य कालविध्यर्थत्वेनाज्यविध्यर्थत्वासम्भवात् सर्वस्मै वा एतद्यज्ञाय गृह्यते यद् ध्रुवायामाज्यमित्याज्यप्रापकमुक्तम्। एवं तर्हि विलीनाज्यस्य होमाशक्त्यैव व्यावृत्तेराधारशब्दस्याज्यविशेषणत्वायोगात् आनर्थक्यं स्यादित्याशङ्क्य-**क्षरणेत्युक्तम्।** क्षरणात्मकत्वसिद्ध्यर्थं प्रागाज्यप्राप्त्यभ्युपगमेप्यानर्थक्यपरिहारायाऽज्येन सह विकल्पमानं द्रवद्रव्यमात्रं विधीयत इत्याशयः।

ननु नामधेयत्वेनैवानर्थक्यपरिहारो भविष्यतीत्याशङ्क्याह-**न चेति।** क्षरणात्मकत्वविशेषस्य धात्वर्थपर्यालोचनयैव सिद्धेर्नामानर्थक्यमित्यर्थः। आधारणस्य च 'तस्याधारमाधार्ये'तिवत्वाश्रुत्या प्रयाजार्थजौहवचतुर्गृहीताज्यसंस्कारार्थत्वावधारणात् संस्काराणां च संस्कार्यनिष्ठत्वात्, तद्विशेषेणैव विशेषसिद्धेर्नामानर्थक्यमित्याह—**न चेति।** आधारशब्दे गुणविध्यर्थेऽपि मत्वर्थलक्षणा नास्तीत्यभिधानार्थमाधार इति भाष्यं गुणविधित्वेनाभिमतस्याधारशब्दस्य द्वितीयान्तत्वाद् गुणत्वाभिधानाशक्तेरयुक्तमाशङ्क्य व्याचष्टे—**श्रुत्यैवेति।**

विधित्सितगुणप्रख्यमन्यच्छास्त्रं यस्मिन्, तदपि नामधेयमिति पूर्वसूत्रगतयस्मिच्छब्दानुषङ्गेण[2] च सूत्रं योजयन् सिद्धान्तमाह—**अत्रेति।** पूर्वसूत्रनिर्दिष्टगुणपरामर्शार्थत्वेन तच्छब्दं व्याख्यातुं विधित्सिते गुणेत्युक्तम्। अनेन च स विधित्सितो गुणः प्रख्याप्यते,

---

१. संयोगादिति २ पु० पा०।

२. तत्पूर्वसूत्रगतनामधेयपदानुषङ्गेणेति २ पु० पा०।

प्राप्यतेऽनेनेति विग्रहो दर्शितः। अग्निप्रजापत्योर्द्वयोः शास्त्रान्तरप्राप्तयोरग्नेः पुनर्वचनं प्रजापतिपरिसंख्यार्थमित्याशङ्क्य, प्रत्यक्षश्रुतपरिसंख्यायां त्रिदोषत्वापत्तेः, परिसंख्येयस्य च विध्यानर्थक्यापत्तेरयुक्ता परिसंख्येत्यभिधानार्थम्, प्रजापतिनिवृत्त्यर्थमित्यादिभाष्यं व्यर्थत्वोक्त्या व्याख्यातं भवति। इह च सोऽन्यतः प्राप्तो यदग्नये चेति टुप्टीकायामुक्तत्वादिहापि देवताव्यवस्थापरे वाक्ये वाक्यान्तरतः प्राप्तः कालोऽनूद्यत इत्याधाराग्निहोत्राधिकरणे वक्ष्यमाणत्वात् भाष्यकृद्वार्तिककृतोरपि यदग्नये च प्रजापतये च सायं जुहोतीत्येतदेव तत्प्रख्यशास्त्रान्तरमभिमतं लक्ष्यते भिन्नपदोपात्तस्यापि देवताद्वयस्य चशब्दात् परस्परसापेक्षस्याख्यातान्वयप्रतीतेः। प्रत्येकं विधिव्यापाराभावात् वाक्यभेदानापत्तिः चादीनां हि निपातोपसर्गाणां पृथक्पदत्वेऽपि केवलाप्रयोगित्वेन स्वातन्त्र्येणार्थप्रतिपादकत्वाभावात्पदान्तरार्थातिशयद्योतनार्थत्वावधारणात् तत्समभिव्याहृतस्य नामपदस्य, आख्यातपदस्य वा तन्नैरपेक्ष्येण स्वार्थासमाप्तत्वात् पदान्तरान्वयानुपपत्तेश्च शब्दोपहितयोरेवाग्निप्रजापतिशब्दयोराख्यातान्वयान्नेतरेतरनिरपेक्षयोः प्रत्येकं विधिव्यापारो युज्यते।

अत एव 'गौश्चाश्वश्चाश्वतरश्च गर्दभश्चाजाश्चावयश्च व्रीहयश्च यवाश्च तिलाश्च माषाश्च तस्य द्वादशशतं दक्षिणेति चशब्दसमुच्चितानां[1] दक्षिणात्वाद्विकृतौ 'धेनुर्दक्षिणेति श्रुतायाः धेन्वाः प्राकृतकृत्स्नदक्षिणाविकारत्वं दशमे वक्ष्यते। तत्र ह्यथैष भूर्वैश्वदेवस्त्रिवृदे सर्वस्तस्य विश्ववत्यः स्तोत्रीया। धेनुर्दक्षिणेत्युदाहृत्य किं धेनुर्गवां निवर्तिका, उत कृत्स्नाया दक्षिणाया इति सन्दिग्धे यच्छब्दयोगः प्राथम्यमित्याद्युद्देश्यलक्षणमित्यनेन न्यायेन दक्षिणासम्बन्धे प्रथमं गवादीनामुपादानेनोद्देश्यत्वावगमात् उद्देश्यगतस्य चशब्दोक्तस्यापि साहित्यस्याविवक्षितत्वात् प्रत्येकं दक्षिणात्वावगतेर्गोत्वैकार्थसमवेतदोग्ध्रीत्ववाचिना धेनुशब्देन गवामेव दोग्ध्रीणां निवृत्तिप्रतीतेः एकवचनेन च द्वादशशतसंख्यानिवृत्तिप्रतीतेर्यथा सौर्यं चरुं निर्वपेदिति निर्वापलक्षणगुणशब्दे नैष्ठिको विध्यन्तो नियम्यते तथा धेनुशब्देन गोमात्रनिवृत्तेर्नाश्वादिनिवृत्तिरिति, 'तस्य धेनुरिति' गवां प्रकृतौ विभक्तचोदितत्वात् सामान्यात्तद्विकारः स्यात् यथेष्टिर्गुणशब्देनेति (१०.३.५६) सूत्रेण पूर्वपक्षयित्वा सर्वस्य वा क्रमसंयोगादेकत्वाद्दक्षिणार्थस्य गुणानां चार्थैकत्वादर्थे विकृतौ श्रुतिभूतं स्यात्तत्समवायाद्धि कर्मभिरिति (१०.३.५७) सूत्रेण सिद्धान्तितम्। तस्यार्थः सर्वस्य क्रतुदाक्षिण्यस्य धेनुर्विकारो बाधिका, कुतः? तस्य विश्ववत्यः स्तोत्रीया इति। तच्छब्दानुषङ्गेण तस्य भूनाम्नः क्रतोर्धेनुर्दक्षिणेति कृत्स्नक्रतुसंयोगाद्विकृतौ भूनाम्नि क्रतौ प्राकृतेऽर्थे दक्षिणात्मके कार्ये श्रुतितो भूतं प्रत्यक्षश्रुत्या प्राप्तम्। धेनुर्द्रव्यमानुमानिकं सर्वदक्षिणाबाधकं स्यात्। ननु ज्योतिष्टोमे बहुद्रव्यानतानामृत्विजां कर्मसम्बन्धावगतेस्तद्विकृतौ भुव्यप्येकद्रव्यानतानां कर्मसम्बन्धो न युक्त इत्याशङ्क्य–**तत्समवायो हीत्युक्तम्।**

१. चशब्दयोगेन समुच्चितानामि २ पु० पा०।

तया दक्षिणयर्त्विजो कर्मसम्बन्धावधारणात् एकेनापि द्रव्येण दक्षिणात्वेन श्रुतेनानतानां कर्मसमवायो युक्त इत्यर्थः ।

ननु गवादिद्रव्यजन्यानामानतीनां भेदान्न गोजन्यानत्यर्थं विहितया धेन्वाऽश्वादिनिवृत्तिर्युक्तेत्याशङ्क्यैकत्वाद्दक्षिणार्थस्येत्युक्तम् । ऋत्विगानत्युपायापेक्षायामृत्विग्भ्यो दक्षिणां ददातीत्यानतिसाधनवाचिदक्षिणाशब्दस्य ददात्यन्वयाद्दक्षिणायाश्चोपादेयत्वेन विवक्षितैकसंख्यत्वात् तदर्थस्य प्रयोजनस्यानमनस्याप्येकत्वमित्यर्थः । ननु दक्षिणां ददातीत्येकवचनश्रवणेऽपि 'गौश्चाश्वश्चेत्यादिवाक्ये दक्षिणासमुच्चयप्रतीतेस्तत्प्रयोजनानतिभेदोऽवसीयत इत्याशङ्क्य, गुणानां चार्थैकत्वादित्युक्तम् । चशब्देनेतरेतरसहितानामेव गवादीनां दक्षिणात्वप्रतीतेस्तस्य द्वादशशतं दक्षिणेत्येकवचनाच्च समुच्चितानामेव दक्षिणात्वमित्यर्थः । गवादीनामुद्देश्यत्वात् साहित्यविवक्षाशङ्कानिरासायोपादेयत्वज्ञापनार्थङ्गुणशब्देनाभिधानम् । दक्षिणात्वं च गवादीनां प्रत्युद्देश्यमिति ज्ञापयितुमर्थशब्देनोक्तम् । ततश्च यथैव गौर्दक्षिणेति न प्रत्येकं दक्षिणाशब्दः सम्बध्यते, तथात्राप्यग्नये जुहोति प्रजापतये जुहोतीति प्रत्येकमाख्यातसम्बन्धाभावान्न वाक्यभेदापत्तिः । न चैतावताग्नीषोमादिवत्समुच्चितयोर्देवतात्वापत्तिः । पृथक्चतुर्थीनिर्देशेनेतरेतरनिरपेक्षयोरेव देवतात्वप्रतीतेः, पदान्तरसम्बन्धे हि चशब्दात्साहित्यं प्रतीयते । न विभक्तिसम्बन्धे, तत्सम्बन्धात् प्रागपरिपूर्णस्य पदान्तरेण चशब्देनान्वयानुपपत्तेः । तस्माद् देवतयोरेवात्र चशब्दात्साहित्यमवगम्यते, न सहितयोर्देवतात्वम् ।

न चाग्निसूर्यवाक्याभ्यां देवताविधौ तत्प्रकाशनसमर्थयोर्मन्त्रयोर्लिङ्गादेव प्राप्तेः, अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोति, सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति प्रातर्जुहोतीति मन्त्रविध्योस्तदर्थशास्त्रसद्भावेनानर्थक्यं शङ्कनीयम् । अग्निर्ज्योतिर्ज्योतिः स्वाहेति सायं जुहोति सूर्यो ज्योतिर्ज्योतिरग्निः स्वाहेति प्रातर्जुहोतीति च मिश्रलिङ्गमन्त्रविधिपर्युदस्तयोः केवललिङ्गयोः प्रतिप्रसवार्थं विधानार्थवत्त्वोपपत्तेः चतुर्थीतश्च मन्त्रवर्णदौर्बल्यात्, प्रजापतेरपि च यज्ञसाधनत्वधर्मयोगात् अङ्गतेर्वा गत्यर्थादग्निशब्दव्युत्पत्तेर्हिरण्यगर्भत्वसंस्तवसामान्याद्वाऽग्निशब्देनैन्द्रीवद्गौण्यावृत्त्याऽभिधानोपपत्तेर्न चतुर्थीसद्भावे देवताप्रापकत्वं युक्तम् ।

मिश्रलिङ्गमन्त्रपक्षे च द्विदेवत्यहोमापत्तेः केवलस्याग्नेर्देवतात्वाभावान्नित्यवदनुवादो न युक्तः । प्रजापतिमात्रविधेश्चैकेनैव वाक्येन सिद्धेरन्यतरवाक्यानर्थक्यम् । व्यवस्थानपेक्षणाच्च सायम्प्रातःशब्दावनर्थकौ स्याताम् । तस्मादाधाराग्निहोत्राधिकरणे मान्त्रवर्णिकदेवताभिधानं परमतेनेति द्रष्टव्यम्[1]। ततश्च ब्राह्मणेनाग्निसूर्ययोः शुद्धयोर्देवतात्वविधानाच्छुद्धावेवाग्निसूर्यौ द्रव्यत्यागवेलायामुद्देष्टव्यौ, न मन्त्रवर्णानुसारेण ज्योतिष्ट्वगुणविशिष्टाविति । यदग्नये चेति शास्त्रान्तरेण सायं होमेऽग्निविधानात् चतुर्गृहीतं वा

---

१. तत्तद्व वर्णस्य देवताप्रापकत्वमिति परमतेन । ब्राह्मणमेव प्रापकमिति न्यायसुधाकारमतमिति ध्येयम् ।

इत्यनेनाघाराख्ये कर्मणि द्रव्यविधानान्नाग्निहोत्राघारशब्दयोर्विधानार्थत्वं युक्तमित्यभिधानार्थं यदग्नये चेत्यादिभाष्यम् ।

दर्विहोमोपांशुयाजयोर्गुणविधिः पूर्वपक्षोक्तस्य कर्मान्तरगतेन गुणविधिना वैयर्थ्यानापादनादयुक्तमित्याशङ्कते—**अत्रेति** । पूर्वपक्षिणा उक्तमपि सायंहोमे देवताविधिम् आघारे च द्रव्यविधिमापाद्यैतदुक्तमित्येवं भाष्यं समाधातुमग्निहोत्रशब्दस्य तावत् परमार्थतो विधानार्थतैव नास्तीत्याह—**उच्यत इति** । यद्यग्निहोत्रशब्दोऽप्राप्तार्थत्वात् विधेयसमर्पकः स्यात्, ततोऽस्य विधेयगुणविषयभूतकर्मापेक्षिणः प्रकृते प्रातर्होमे, दूरस्थेऽपि वा दर्विहोमे निवेशः स्यात्; विशिष्टविधौ गौरवापत्तेः । कर्मानुवादेन गुणविधानस्य युक्तत्वात् 'यदग्नये चे'ति त्वन्येन शास्त्रेणाग्नेहोत्रेण हूयमानेन हविषा सम्बन्धे कृते प्रवर्त्तमानत्वेन प्राप्तार्थत्वादग्निहोत्रपदेऽनुवादलक्षणं स्पष्टमित्यर्थः । न केवलं प्राप्तार्थविधानात्[1] गुणविध्यसम्भवः, किं त्वनुवाद्यकर्माभावादपीत्याह—**अनूद्येति** । ततश्च प्रकृतकर्मानुवादेन गुणविधावुत्पत्तिशिष्टसूर्यविरोधेन प्रातर्होमे गुणविध्ययोगात्, सायं होमे गुणविध्यापत्तेस्तत्र चाग्नेः शास्त्रान्तरेण प्राप्तेः, सिद्धा तत्प्रख्यतेत्याह— **प्रकृतमिति** ।

ननु तत्प्रख्यतापरिहारायैवाप्रकृतौ विधिर्भविष्यतीत्याशङ्क्याह—**अन्यत्रेति** । प्रत्यभिज्ञायमानविषयत्वं न, अनुवादानां प्रकृतपरिग्रहस्य न्याय्यत्वादित्यर्थः । न केवलं तत्प्रख्यत्वात् प्रत्यभिज्ञायमानदोषाभ्यां प्रकृताऽप्रकृतानुवाद्यकर्मालाभः, किं त्वप्राप्तत्वादपीत्याह—**नेति** । गुणविधित्वाभावे तर्ह्यग्निहोत्रवाक्यस्य का गतिरित्याशङ्क्याह—**तस्मादिति** । ननु 'तदग्नये चेत्यादीनाम्, 'ऋजुमाघारयतीत्येवमादीनां गुणसंक्रान्तिशक्तित्वात् कर्मविधायित्वासम्भवेऽपि, सायं च प्रातश्च जुहोतीत्यास्यानुपादेयकालसम्बन्धादग्निहोत्रं जुहुयात्स्वर्गकाम इत्यस्य चानुपादेयफलसम्बन्धाद्यावज्जीवमग्निहोत्रं जुहुतीत्यस्य चानुपादेयनिमित्तसम्बन्धात्, ऊर्ध्वमाघारयतीत्यस्य चानुपादेयदेशसम्बन्धात् प्रकरणान्तरन्यायेन कर्मविधायित्वात् तद्विहितयोः कर्मणोरग्निहोत्राघारशब्दौ गुणविधी भविष्यत इत्याशङ्क्याह— **सायमिति** । सिद्धान्ते तावदग्निहोत्राघारवाक्यविहितयोः कर्मणोः प्रत्यभिज्ञानात् प्रकरणान्तरन्यायाभावात् । पूर्वपक्षेऽपि विशिष्टविधेः क्वचिदनभ्युपगमात् केवलस्य गुणस्य कर्मणो वा विधेयत्वापतेर्न प्रकरणान्तरन्यायः सम्भवतीत्याशयः ।

ननु भिन्ने जुहोतीत्यादिष्वविहितदेवताकेषु दूरस्थेषु दर्विहोमेषु कर्मप्रत्यभिज्ञाभावेनानुपादेयनिमित्तादिसम्बन्धेन च प्रकरणान्तरन्यायात् कर्मविधिप्रतीतेः तत्र देवताविधिर्भविष्यतीत्याशङ्क्याह—**दूरस्थस्येति** । तेषामसम्बन्धव्यवाये[2]नाबुद्धिस्थत्वान्नानुवादः सम्भवतीत्यर्थः । कुण्डपायिनामिदं कौण्डपायिनं कुण्डपायिनामयनाख्यं सत्रम्, तत्सम्बन्धिनो होमस्य मासमग्निहोत्रं जुह्वतीति विहितस्य असम्बद्धपदव्यवायेनाबुद्धिस्थत्वाद्यदग्नये

१. प्राप्तार्थत्वादिति पु० पा० । २. असम्बद्धपदव्यवायेनेति पु० पा० ।

चेत्यादिदेवताविधौ, दध्ना जुहोतीत्यादिद्रव्यविधौ चानुवादो यथा न युक्त इत्यातिदेशिक-कर्मसम्बन्धाङ्गीकरणेन दृष्टान्तसिद्धिः । 'यदाहवनीये जुहोतीत्यादौ द्रव्यदेवतस्योपदेशतोऽतिदेशतो वा लाभासम्भवेनाऽरूपत्वात्कर्मणो विध्यनुपपत्तेरगत्या दूरस्थानुवादाश्रयणमित्याशयः । एवं कर्मानुवादेन गुणविधित्वेऽग्निहोत्रवाक्यस्य पूर्वपक्ष्युक्ते निरस्ते, यदि कश्चिद् गुणविशिष्टकर्मविधिमङ्गीकृत्य प्रत्यवतिष्ठेत, तं प्रति अन्यतो विशेषणांशस्य, विशेष्यांशस्य वा प्राप्तिसम्भवे विशिष्टविधिगौरवाश्रयणमयुक्तम् । यदग्नये चेति शास्त्रान्तरेण चोभयवादिसिद्धगुणविधित्वेनेह विधित्सितस्य प्राप्तत्वात् व्यर्थं विशिष्टविधानमित्युत्तरद्वयं वाच्यमित्याह—**विधीयतामिति** । विकल्प्यतेऽन्यथा पूर्वपक्षो रच्यत इत्यर्थः ।

देवताधिकरणे देवताप्राधान्यस्य निषेध्यमानरूपतया होत्रशब्दाभिधेयस्य हूयमानस्याग्न्यर्थत्वाभावात् प्रकृतिविकारभावायोगाच्च । चतुर्थीतदर्थार्थबलिहितसुखरक्षितैरिति (पा० सू० २–१–२६) चतुर्थीसमासलक्षणाभावात्, व्यधिकरणबहुव्रीहेश्च नियतविषयत्वान्न चतुर्थीबहुव्रीहिर्युक्त इत्याह—**नेति** । समासान्तरं तर्हि भवत्वित्याशङ्क्याह—**न चेति** । ननु शेषलक्षणाया अपि षष्ठयाः सम्प्रदानसम्प्रदेयलक्षणसम्बन्धविशेषनिष्ठत्वसम्भवाद्देवतायाश्च सम्प्रदानशब्दवाच्यं त्याज्यमानद्रव्योद्देश्यत्वप्रतिग्रहीतृत्वसमुदायैकदेशेन त्याज्यद्रव्योद्देश्यत्वेन प्रतिग्रहीतृत्वांशाभावेऽपि समुदायलक्षणया सम्प्रदानत्वोपपत्तेः षष्ठीतत्पुरुषेण देवताविधिर्भविष्यतीत्याशङ्क्याह—**य इति** । विधौ लक्षणानुपपत्तेरिति भावः ।

षष्ठीसमासाश्रयणेऽपि व्यधिकरणबहुव्रीहेरसामञ्जस्यात्तत्पुरुषोऽभ्युपगन्तव्य इति तत्पुरुषादित्यनेनोक्तं यस्मिन्नग्नये होत्रं होमे तद्धोमात्मकं कर्माग्निहोत्रशब्दवाच्यं भवतीति भाष्येण सिद्धान्तेऽपि चतुर्थीबहुव्रीहिराश्रितः । स कथं समञ्जसः स्यादित्याशङ्क्याह—**अनुवाद इति** । नामधेयत्वेऽनुवादत्वात्, तस्य च प्रामाणान्तरपारतन्त्र्यादन्यतः सिद्धे देवतात्वलक्षणसम्बन्धविशेषे तल्लक्षणार्था सम्बन्धमात्रवाचिन्यपि षष्ठी । हूयत इति च कर्मणि जुहोतेर्धातोर्हुयामाश्रुभसिभ्यस्त्रन्नित्यौणादिके त्रन् प्रत्यये कृते सार्वधातुकार्द्धधातुकयोरिति च गुणे कृते होत्रशब्दव्युत्पत्तेरग्निहोत्रशब्दस्य बहुव्रीहिं विना जुहोतिसामानाधिकरण्यायोगाद्व्यधिकरणे बहुव्रीहिः कण्ठेकालवत्कथ्यते इत्यर्थः । यथाऽश्वार्थो घास इति प्रमाणान्तरसिद्धतादर्थ्यविवक्षायामपि प्रकृतिविकारभावाभावेन तदर्थसमासायोगात् तादर्थ्यलक्षणार्थः षष्ठीतत्पुरुषः कथ्यत इति दृष्टान्तार्थः ।

ननु यद्यपि गौरवापत्तेस्तत्प्रख्यशास्त्रान्तरसद्भावाच्च विधिर्न युक्तः । नापि च सायं होमे गुणविधिः दूरस्थस्यानुवादाभावाच्च न दर्विहोमे गुणविधिः, तथापि प्रकृते प्रातर्होमे देवताविधिर्भविष्यतीत्याशङ्क्याह—**विधातव्यश्चेति** । बहुव्रीह्यर्थस्य होमस्य प्राप्तत्वाल्लोहितोष्णीषादिवत्तद्विशेषणभूतयोर्द्रव्यदेवतयोर्होत्राग्निपदार्थयोः सम्बन्धो जुहोतिपरेण प्रत्ययेन विधातव्यः स्यादित्यर्थः । समासानुपपत्त्यादिदोषसमुच्चयार्थश्चशब्दः । ननु प्रातर्होमेऽग्नेरविधाने निमित्ताभावान्नाग्निहोत्रनामधेयानुवादः सम्भवेदित्या-

शङ्क्याह—एकदेशेऽपि चेति । अग्निहोत्रवाक्योत्पादितस्य कर्मणः सायं च प्रातश्च जुहोतीति वाक्यान्तरवशात्सायम्प्रातरावृत्तावपि ज्योतिष्टोमवत्स्वरूपभेदाभावात् तदेकदेशे सायं होमेऽग्निदेवत्यत्वज्ञानान्नाग्निहोत्रे नामधेयानुवादोऽपगच्छतीत्यर्थः ।

एतच्चाहवनीये होमः, नापरयोरिति गार्हपत्यान्वाहार्यपचनयोर्होमनिषेधाद् बह्वृचब्राह्मणे । सप्त च शतानि विंशतिश्च संवत्सरे सायमाहुतयः सप्तशतानि विंशतिश्च संवत्सरे प्रातराहुतयः तावत्योऽग्नेर्यजुष्मत्य इष्टकाः संवत्सरेणाहास्याग्निना चित्येनेष्टं भवति, य एवं विद्वानग्निहोत्रं जुहोतीत्याहवनीयाहुतिसंख्ययैवाग्निहोत्रस्य स्तुतत्वात् प्रातर्होमे चाहवनीयेऽग्निदेवत्यहोमाभावात्तत्पक्षाश्रयणेनोक्तम् ।

द्वे आहवनीये जुहोति, चतस्रो गार्हपत्ये, चतस्रोऽन्वाहार्यपचन इति तु दशाहुतिपक्षे ।

द्वे आहवनीये, द्वे गार्हपत्ये, द्वे आन्वाहार्यपचन इति षडाहुतिपक्षे वा प्रातर्होमेऽपि गार्हपत्यान्वाहार्यपचनयो'रग्नये गृहपतये स्वाहाऽग्नये संवेशपतये स्वाहेत्यादिमान्त्र-वर्णिकाग्निदेवत्यहोमसद्भावादाग्नि'होत्रशब्दप्रवृत्तिः सुतरां युज्यते । यथा च परपदार्थ-सम्बन्धविधानादिक्लेशापत्तेः नाग्निहोत्रशब्दस्य प्रकृतेऽपि प्रातर्होमे गुणविधित्वं युक्तम्, तथाघारशब्दस्यापि क्षरणसमर्थद्रव्यमात्रवाचित्वं कल्पयित्वा तस्यान्यत्र विनियुक्तस्यापि द्वितीयामात्रेण संस्कार्यत्वं कल्पयित्वा तदन्यथानुपपत्त्योपांशुयाजाङ्गत्वकल्पनायामा-घारयतिपरेण वा प्रत्ययेनोपांशुयाजभावनामनूद्य, आघाराख्यद्रव्यविधिकल्पने ध्रौवाज्य-प्राप्तापादितरक्षणात्मकत्वोपांशुयाजभावनानुवादेन वा द्रव्यविधिकल्पनेति, क्लेशापत्तेर्ना-घारशब्दस्योपांशुयाजाख्येन कर्मणा सह तदङ्गभूतार्थाभिधानेनान्वयो युक्त इत्याह—**आघारस्येति ।** ततश्चोपांशुयाजे द्रव्यविध्यसम्भवात् आघारयतीत्याख्यातविहिते कर्मण्याघारशब्दस्य द्रव्यविधित्वापत्तेः, तत्र च चतुर्गृहीतवाक्येनैव द्रवद्रव्याज्यप्राप्तेः । प्रयाजाज्यसंस्कारार्थे चाघारणे द्रव्यान्तरानपेक्षणात्पयःप्रभृति द्रवद्रव्यमात्रविधानानुपपत्तेः तत्प्रख्यशास्त्रान्तरसद्भावोऽपरिहार्य इत्याशयः ।

नन्वस्य संस्कारकर्मत्वे सति यद्भाव्यक्रतोच्यत इत्यादिना धारणक्रियया प्रयाजद्रव्य-स्यैकदेशक्षरणात्मकातिशयावगतेः क्षारितैकदेशस्य च प्रयाजयागसाधनत्वेन संस्कारा-नर्थक्याभावात् संस्कारकर्मत्वं त्वयाऽप्येष्टव्यम् । संस्कारस्य च संस्कार्यनिष्ठत्वेन तद्विशेषादेव विशेषसिद्धेर्न नाम्ना प्रयोजनमित्याशङ्क्योच्यते एतदेवाघारणं प्रधानकर्मेत्युक्तम् ।

तदयुक्तम् । प्रयाजाङ्गरूपत्वेन प्रधानत्वायोगात् अयागरूपस्यापि स्तोत्रशस्त्रादेः प्रधानकर्मत्वदर्शनात् द्रव्यदेवतान्वयेन यागत्वापादनमनर्थकम् । क्षारणात्मकत्वेन च प्रक्षेपाधिक्यात् प्रस्तरप्रहरणवद्धोमत्वापत्तेर्यजतेर्नामधेयमित्येनदप्ययुक्तमित्याशङ्का-त्रयनिरासं सूचयन् सर्वत्र धात्वर्थस्य करणत्वेनान्वयादाघारमग्निहोत्रमिति द्वितीयान्तरस्य

समानाधिकरण्यानुपपत्तेस्तन्नामत्वमयुक्तमित्याशङ्कां निरस्यति—**समानाधिकरण्यं चेति**। कर्तृव्यापारव्याप्यत्वं विना करणत्वायोगात् तदाक्षिप्तकर्तृव्यापारव्याप्यत्वेनानीप्सित-कर्मत्वरूपसाध्यांशविवक्षया सामानाधिकरण्यं युक्तमित्यर्थः।

नन्वेवं सती तृतीयान्तस्याप्युद्भिदादिपदस्य गुणविधित्वे, अर्थाक्षिप्तसाध्यांशविवक्षया वैय्यधिकरण्येनान्वयोपपत्तेर्न मत्वर्थलक्षणापत्तिरित्याशङ्क्येहेत्युक्तम्। इह-नामधेयत्व-पक्षे। साध्यांशविवक्षा गुणविवक्षा[1]। गुणविधौ त्वपूर्वसाधनांशे गुणं विधातुं करणत्वांशस्यैव विवक्षेत्याशयः। साध्यशब्देन च भाष्यगतः प्रधानशब्दः साध्यांशविवक्षार्थ इति सूचितम्। कस्य प्रधानभूतस्य साध्यभूतस्य द्वितीयान्तमेतन्नामधेयं स्यादित्यर्थः।

संस्कार्यनिष्ठस्य संस्कारस्य साध्यत्वानिरूपणात्साध्यत्वविवक्षायां संस्कार्यान्वय-स्यावश्यापेक्षणीयत्वात् तत एव विशेषसिद्धेर्नामाऽनर्थकमित्याशङ्कानिरासार्थमाघारण-स्वरूपस्य संस्कारत्वेऽपि, द्रव्यदेवतान्वयेन यागत्वसिद्धेः तस्य च प्रधानकर्मत्वात् स्विष्ट-कृदादिवच्च संस्कारकर्मत्वेऽपि प्रधानकर्मत्वाविरोधात्कर्मशब्देन धर्ममात्रे तु कर्म स्यादिति प्रधानकर्मत्वमुक्तम्। प्रक्षेपाधिक्याच्च सत्यपि होमत्वे प्रधानकर्मत्वमात्रेण नामधेयार्हत्व-सिद्धेस्तस्य चेह द्रव्यदेवतान्वयलभ्ययागत्वाधीनसिद्धित्वात् प्रधानकर्मत्वमात्रविवक्षया भाष्ये यजतिशब्दो न होमत्वनिवृत्त्यर्थ इति कर्मण इति सामान्यशब्देन सूचितम्। यज्जुह्वां चतुर्गृह्णाति प्रयाजार्थेनोत्पन्नस्य चतुर्गृहीतस्याप्यन्यत्र विनियोगात् 'तस्याघारमाघार्ये'ति तस्य प्रयाजार्थं चतुर्गृहीतस्यैकदेशं क्षारयित्वा इतः क्षारितैकदेशाच्चतुर्गृही-तात्त्रिःप्रयाजान् यजतीत्याघारणस्य प्रयाजाज्यसंस्कारार्थत्वप्रतीतेः स्वरूपेण च प्रधानकर्मत्वसम्भवे यागरूपत्वापादनार्थक्यापत्तेर्न संस्कारकर्मत्वनिरपेक्षं प्रधानकर्मत्वं भाष्यकृतोक्तमिति भ्रमितव्यम्। ततश्चाघारहोमानन्तरं चतुर्थगृहीतस्य नाशदोषापहारे-ऽवन्यत्प्रयाजार्थं चतुर्गृहीतं गृहीत्वाऽऽघारणेन संस्कृत्य प्रयाजा यष्टव्या इति। ननु यद्य-प्याघारशब्देनोपांशुयाजे स्ववाक्यविहिते चाघारकर्मणि द्रव्यं न विधीयते, तथाऽप्याज्य-पयःप्रभृतिद्रव्यं सान्नाय्योपांशुयाजादिषु विहितमाघारशब्देनाऽनूद्य क्षारणसंस्कारविधिरयं भविष्यतीत्याशङ्कां निराकर्त्तुमाह—**विस्पष्टमिति**। आघारशब्देनाऽन्यत्र द्रव्यस्याविधानेना-ऽन्यत्र विहितद्रव्यप्रत्यभिज्ञाभावान्न कर्मान्तरविहितद्रव्यानुवादोऽत्र सम्भवतीत्याशयः॥४॥

इति तृतीयं तत्प्रख्याधिकरणम्।

भा० प्र०—इन दो अधिकरणों से मतुप् प्रत्यय के अर्थ में लक्षणा अथवा वाक्य-भेद की सम्भावना है, ऐसे स्थलों में विशेष पदगुणविधि या कर्म का नामधेय है—इसका विवरण प्रस्तुत किया है। अब यह विचारणीय है कि जहाँ मतुप् प्रत्यय के अर्थ में लक्षणा या वाक्यभेद की सम्भावना नहीं है—उन स्थलों का विचार किया जा

1. गुणविवक्षेति २ पु० पा०।

रहा है। जैसे—"अग्निहोत्रं जुहोति स्वर्गकामः" (तै० सं० १-५-९) स्वर्ग की कामना से अग्निहोत्र होम करे। "अघारम् आघारयति" (तै० ब्रा० ३।३।७) "समिधा यजति" (तै० सं०२।६।१) यदि वाक्य में अग्निहोत्रम् "आघारम्" इन पदों के द्वारा गुण विशेष का विधान है या कर्म का नामधेय है—यह संशय होता है।

इस प्रसङ्ग में यह वक्तव्य है कि इस से देवतारूप गुण की विधि प्रतीत होती है। क्योंकि अग्निहोत्र शब्द से अग्नि के लिए होत्र जिसमें इस ज्ञान से देवता रूप गुण की विधि अवगत होती है। इसी प्रकार आधार से क्षरण समर्थ द्रव्य घृत आदि का विधान प्रतीत होता है, क्योंकि, अग्नि देवता रूप गुण का दर्वि होम में विधान और घृत गुण का विधान उपांशुयाग में होता है। दर्विहोम में देवता का निर्देश नहीं है और दर्शपूर्णमास के अन्तर्गत उपांशुयाग में द्रव्य का निर्देश नहीं है। इसलिए, इन्हें गुणविधि मानना चाहिए।

पूर्वपक्षी का कहना है कि अग्निहोत्र को कर्म का नामधेय नहीं कहा जा सकता है, क्योंकि, कर्म का नामधेय मानने पर याग का स्वरूप ही सिद्ध नहीं होगा, क्योंकि द्रव्य और देवता यही याग के स्वरूप हैं, फलतः, अग्निहोत्र शब्द के द्वारा अग्निदेवता रूप गुण का विधान हो सकता है और तभी कर्म का स्वरूप सिद्ध होगा। किन्तु, इसे कर्मनामधेय मानने पर द्रव्य और देवता दो में एक के न रहने से कर्म का स्वरूप ही सिद्ध नहीं होगा, अतः गुणविधि मानना चाहिए।

इसके समाधान में सिद्धान्ती का कहना है कि गुण का अन्य वचनों के द्वारा लाभ हो जाने से अज्ञात अर्थ का अर्थात् द्रव्य एवं देवता रूप गुणों का विधान होने से—यह गुण विधि नहीं है। यदग्नये च प्रजापतये च सायं जुहोति—जो अग्नि के लिए और प्रजापति के लिए सायं समय होम अर्थात् याग करे, इत्यादि वाक्य में अग्नि के साथ प्रजापति देवता रूप गुण का विधान होने से यह गुणविधि नहीं है, इसी प्रकार "चतुर्गृहीतं वा एतदभूत् तस्याधारमाधार्यं," चार[1] बार गृहीत कर घृत से उसके द्वारा आधार का आधरण करे इससे घृतद्रव्य का विधान किया गया है। इसलिए इनको गुणविधि नहीं माना जाता है। उसी को सूत्र से कहा जा रहा है तत्प्रख्या अर्थात् विधान के लिए इष्ट गुण का प्रापक अन्य शास्त्र = अन्य वचन रहने से यह कर्म नामधेय है। अतः अग्निदेवता के उद्देश्य से जहाँ होम होता है वह

---

१. आज्यस्थाली के द्वारा ध्रुवा नामके स्रुक् में स्रुवा से एक-एक स्रुव ले-लेकर चार बार आज्य रखा जाता है, प्रत्येक आहुति के लिए इसी ध्रुवा से घी लिया जाता है। ध्रुवा में घृत परिमाण में रहने पर चार चार बार स्रुवा घृत ध्रुवा से अग्नि में एक कोण से अन्य कोण तक ही जाती है, मध्य में विच्छेद नहीं होता है, स्थूल और सोधी घृत धारा के लिए चार **आवृत्ति** घृत **आधार** है।

अग्निहोत्र है—इस यौगिक अर्थ के अनुसार अग्निहोत्र को कर्म-नामधेय मानने पर अप्रसिद्ध कल्पना नहीं करनी पड़ती है। इसी प्रकार आवधारत् आधारयति समिधो, यजति इत्यादि में आधार और समिध आदि द्रव्य है, अतः, कर्म नामधेय है।

"तत्प्रख्यम्" = उसका अर्थात् जिस गुण के विधान करने की इच्छा करे उसका, **"प्रख्यम्"** = प्रख्यापक या ज्ञापक, **"च"** = एवम्, **"अन्यशास्त्रम्"** = अन्य वचन, (जिस स्थल में हैं, वह भी कर्म का नामधेय है) जिस स्थल में विधान करने के लिए अभीष्ट, गुण का प्रख्यापक अन्य शास्त्र अर्थात् वचन है, उसमें वह गुणवाचक शब्द भी नामधेय होता है ॥ ४ ॥

अथ चतुर्थं तद्व्यपदेशाधिकरणम्

[४] तद्व्यपदेशं च ॥ ५ ॥ सि०

शा० भा०—अथैष श्येनेनाभिचरन् यजेत, अथैष संदंशेनाभिचरन् यजेत, अथैष गवाऽभिचरन् यजेत इति समाम्नायन्ते। तत्र गुणविधिः, कर्मनामधेयमिति संदेहः। प्रसिद्ध्यादिभिः पूर्वपक्ष उद्भिदादीनामिव। ते तूद्भिदादयः क्रियानिमित्ताः शक्नुवन्ति यागं वदितुम्। इमे पुनर्जातिनिमित्ता न शक्नुवन्ति। तेन गुणविधय इत्येवं प्राप्तम्। एवं प्राप्ते—

ब्रूमः—तद्व्यपदेशं च। तेन श्येनादिना प्रसिद्धेन यस्य व्यपदेशः, तच्च कर्मनामधेयम्। श्रुतिर्हि नामधेयत्वे, लक्षणा गुणविधौ।

यत्तु जातिशब्दा इमे, न यागमभिवदन्तीति। सादृश्यव्यपदेशादभिवदिष्यन्ति। एवं हि व्यपदेशो भवति। 'यथा वै श्येनो निपत्याऽऽदत्ते, एवमयं द्विषन्तं भ्रातृव्यं निपत्याऽऽदत्ते यमभिचरन्ति[1] श्येनेन' इति। निपत्याऽऽदत्ते इत्यनेन सादृश्येन श्येनशब्दो यागे। यथा सिंहो देवदत्त इति। तस्मात् कर्मनामधेयम्। सन्दंशे, 'सन्दंशेन[2] यथा दुरादानमादत्ते' इति, गवि 'यथा गावो गोपायन्ति' इति। तस्मात् सन्दंशशब्दोऽपि कर्मनामधेयं गोशब्दोऽपि ॥ ५ ॥

इति चतुर्थं तद्व्यपदेशाधिकरणम्।

भा० वि०—एवं यौगिकानामेव केषांचिन्मत्वर्थलक्षणपरिहारेण गुणविधित्वाशङ्कां गुणविधिगततत्प्रख्यालोचनेन निरस्य इदानीं निरूढानामपि केषांचिद्वाक्यभेदपरिहारेण गुणविधित्वाशङ्कार्थवादगततद्व्यपदेशालोचनेन निरस्यत इति सङ्गतिः। विषयमाह—अथैष इति। तद्व्यपदेशपरिहारसंभवासंभवाभ्यां

---

१. ब. मभिचरति। २. ब. यथा सन्दन्शेन।

संशयमाह—**तेष्विति**[1]। प्रयोजनन्तु-श्येनाख्यपक्षिद्रव्यपरित्यागेन सोमेनातिदिष्टेन यागः। पूर्वोक्तैरेव हेतुभिः पूर्वपक्षमाह—**प्रसिद्ध्यादिभिरिति**। यथाग्नीषोमीये प्रसिद्धचित्रत्वस्त्रीत्वविधाने, स्तोत्रेषु वा पञ्चदशताज्यादिविधाने वाक्यभेदः। कामोपबन्धाभावेनाभिचारस्य पश्वादिवत् फलत्वनियमाभावात् साधनप्राप्तपक्षिहिंसानुवादोपपत्तेरिति भावः।

ननूद्भिदादिशब्दवच्छ्येनशब्दस्यापि द्रव्यवत्कर्मण्यपि प्रसिद्धिसंभवात् कथं प्रसिद्ध्यादिभिः पूर्वः पक्षस्तत्राह—**नैषामिति**। कुत इत्यपेक्षायामुद्भेदनक्रियानिमित्तस्यैव शब्दस्य जातिनिमित्तस्य कर्मणि प्रवृत्तिनिमित्ताभावेन गुणविधित्वनिश्चयादित्याह—**उद्भिदादय इति**। न च यजिसामानाधिकरण्यसिद्ध्यर्थं यागलक्षणायां मत्वर्थलक्षणादोषः। नामधेयत्वेऽप्यार्थवादिकसादृश्यव्यपदेशवशेन कर्मणि प्रवृत्तौ वत्यर्थलक्षणापत्तेः। न च गुणविधौ व्यपदेशासंभवः निपत्यादानसादृश्येन यागस्तुतौ विहितायाँ तद्गुणस्यापि स्तुतत्वोपपत्तेरित्यभिप्रायः।

सिद्धान्तमाह—**एवमिति**। विधित्सितिगुणपरामर्शनं तच्छब्दमङ्गीकृत्य सूत्रं व्याचष्टे—**तेनेति**। यस्य श्येनादिपदस्य प्रसिद्धेन श्येनादिना सादृश्यमुपादायार्थवादेष्वपदेशस्सङ्कीर्तनं-व्युत्पादनम्, तच्च नामधेयत्वमित्यर्थः, तेन व्यपदेशो यस्मात्, तच्च नामधेयमिति नामधेयपदानुषङ्गेण सूत्रं योज्यम्। विधेयस्यैव स्तोतव्यतया गुणविधौ तस्यैव श्येनसादृश्येन स्तुतिर्वाच्या। न च श्येनसादृश्यस्यैव श्येनेन सादृश्यम्, भिन्नजातीययोरेव गोगवयादौ सादृश्यदर्शनात्। न च सति संभवे काल्पनिकभेदाभ्युपगमेन सादृश्यकल्पना युक्तेति भावः। इतश्च नामधेयत्वमित्याह—**श्रुतिर्हीति**। हिशब्दश्चार्थे। नामधेयत्वे श्येनशब्दस्य कर्मणि मुख्या वृत्तिः। गुणविधौ यजिसामानाधिकरण्यान्यथानुपपत्त्या यागलक्षणेत्यर्थः। श्येनादिशब्दस्य पक्षिविशेषादौ प्रसिद्धस्य न कर्मणि मुख्यत्वमित्युक्तमनुवदति—**यत्त्विति**। अत्रापि तेन प्रसिद्धेन सादृश्यमुपादाय श्रुत्या व्यपदेशात्-व्युत्पादनादिति सूत्रं योजयन् दूषयति—**तत्सादृश्येति**। सादृश्यव्यपदेशं विशदयति—**एवं हीति**। श्येनः-पक्षिविशेषः। अयमिति यागात्मकः श्येनः। नन्वेवं सादृश्यव्यपदेशेऽपि कथमन्यशब्दस्यान्यत्र प्रवृत्तिरत आह—**निपत्येति**। यागे प्रवर्तत इति शेषः। न चैवं सिंहशब्दवद्देवदत्ते सादृश्यात् प्रवर्तमानस्य श्येनशब्दस्य वत्यर्थलक्षणया प्रवृत्तेः कथं मुख्यत्वमिति वाच्यम्, वत्यर्थलक्षणायाः पक्षद्वयसाधारणत्वेनादोषत्वं मत्वा मुख्यत्वाभिधानात्, परपक्षेऽपि हि श्येनद्रव्यस्य विधीयमानस्य निपत्यादानसामर्थ्यासंभवात् भ्रातृव्यादानसाधनयागद्वारा तदङ्गभूतश्येनगतं निपत्यादातृत्वं सदृश इव सदृश इति वत्यर्थलक्षणया प्रतिपादयित-

---

१. तत्रेति भा० पा०।

व्यम्। अन्यथा विधेयस्तुत्यसंभवप्रसङ्गादिति द्रष्टव्यम्। श्येनशब्दस्य कर्मणि प्रवृत्ति संभवे फलितमाह—**तस्मादिति**। अवशिष्टयोरप्यर्थवादव्यपदेशमुपपादयति—**एवमिति**। सं....दं....शे....ग....पि च सादृश्यप्रतिपादकोऽर्थवादः श्रूयत इत्यर्थः। व्यपदेशफलमाह—**तस्मादिति** ॥ ५ ॥

इति तद्व्यपदेशाधिकरणम्।

अथ चतुर्थं तद्व्यपदेशाधिकरणम्

त० वा०—'अथैष ज्योतिः' इत्यादिवर्जमुदाहरणम्, तेषां तृतीयानिर्देशाभावात् गुणविधित्वानुपपत्तेः। तेऽपि च वाक्यान्तरेषु यदा तृतीयानिर्देशं प्रतिपद्यन्ते तदा विचार्यन्ते।

अथ वा प्रथमानिर्देशेन द्रव्यमपि प्रस्तुत्य पश्चात्तत्साध्योपन्यासः संभवतीत्येतेऽप्युदाहरणमेव। तत्र तैरेव प्रसिद्ध्यादिभिर्गुणविधिः। न चात्र कर्मणि प्रवृत्तिनिमित्तं किंचिदस्ति। वत्यर्थोपादानेन कर्मणि प्रवृत्तौ चात्यन्तविप्रकृष्टा गौणता स्यात्। तत्र वरं मत्वर्थलक्षणा। साधनं हि प्रतीतमत्यन्ताविनाभावात्स्वसाध्यां क्रियामक्लेशेन प्रतिपादयति विनैव मतुब्लोपेन।

लक्षणायाः गौण्या वृत्तेर्बलीयस्त्वादिति पूर्वपक्षे हेत्वन्तराकथनम्

किं च—

मत्वर्थो वाक्यवेलायामेकवाक्यवशाद्भवेत्।
इवार्थः पदवेलायां गृह्यमाणोऽतिदुर्बलः॥

गुणविधिपक्षे हि स्वार्थापरित्यागेनैव श्येनपदं तद्वन्तमुत्तरकालं लक्षयति। आत्मोच्चारणकाले तु स्वार्थमेव विनियुङ्क्ते। भवतस्तु श्येनार्थानुपयोगादादित एव सादृश्यविवक्षया पदं प्रवृत्तमित्युपगमाच्छ्रुतिबाधप्रसङ्गः।

तदुच्यते—

विधेयं स्तूयते वस्तु भिन्नयोपमया सदा।
न हि तेनैव तस्यैव स्तुतिस्तद्वदितीष्यते॥

श्येनादिवाक्येषु हि 'यथा वै श्येनो निपत्याऽऽदत्ते, एवमयमपी'त्युपगमान्न स्तुतिर्दृश्यते। तथा च विधीयमानस्य भवितव्यम्। गुणविधाने च श्येनद्रव्यं विधीयत इति, तदेव स्तोतव्यम्। न च तस्याऽऽत्मनैवोपमानं युक्तम्।

अथोच्येताऽनन्यत्वेन सुतरां स्तुतिर्भवति, अनन्यसंभविचरितत्वात्। तथा

'रामरावणयोर्युद्धं रामरावणयोरिव'। इति।

भवति हि लोके काल्पनिकमवस्थादिगतभेदमाश्रित्यैवमपि स्तुतिः सम्भवति वेदे न युक्ता। नामधेयत्वे तु यागश्येनस्य[1] द्रव्यश्येनोपमोपपत्तेराञ्जस्यम्। इतरथा हि द्वौ मत्वर्थवत्यर्थौ लक्षयितव्यौ। काल्पनिकश्च भेद इति गौरवम्। न च यागस्तुत्या तदाश्रितद्रव्यस्तवनमवकल्पते, यागविधेरनिराकृतत्वात्। अविधेयगता हि स्तुतिरन्यत्र संचार्येत, यागस्तु स्वयमेव विधिभागोऽत्रेति, न द्रव्यं स्तूयते, विधीयते वा। पुनरपि च यागेन द्रव्यलक्षणाद्विप्रकृष्टता। समभिव्याहाराच्च द्रव्यवदेव यागवचनत्वं मुख्यम्। विधौ च तव लक्षणा, ममानुवादे। गुणवचनेभ्यश्च मतुब्लोपः स्मर्यते[2] न द्रव्यवचनेभ्यः। इवार्थस्तु परशब्दस्य परत्र प्रयोगात्स्वयमेवोपजायते। मत्वर्थलक्षणा च स्वयं कल्पनीया, क्लृप्तस्तु वत्यर्थः। 'यथा वै श्येन' इत्यादिना। पूर्वोक्ताश्च धातुपारार्थ्यप्रत्ययविप्रकर्षादयो दोषा वक्तव्याः ॥ ५ ॥

(इति चतुर्थं तद्व्यपदेशाधिकरणम्।)

॥ अथ चतुर्थं तद्व्यदेपशाधिकरणम् ॥

न्या० सु०—अथैष शब्दसमभिव्याहारात्साद्दश्येना'थैष ज्योतिरि'त्यादोन्यपि इहोदाहरणमिति कस्यचिच्छङ्का स्यात्तन्निवृत्त्यर्थमाह—**अथैष इति**। नन्वेवं सति तेषां गुणविधित्वं निरस्तम्, न स्यादित्याशङ्क्य, गुणविधित्वशङ्कैव तेषु नास्तीत्याह—**तेषामिति**। कर्मनामत्वे[3] तस्य कारकाविभक्त्या विनापि विधिमात्रेण विनियोगोपपत्तेरज्ञातस्वरूपज्ञापनार्थं प्रातिपदिकार्थप्रधानप्रथमाविभक्तिनिर्देशो युक्तः। गुणस्य तु लोकसिद्धस्य स्वरूपज्ञापनानपेक्षणात्, कारकविभक्त्या च विना विनियोगायोगात् तदभवे गुणविधित्वाशङ्का न युक्तेत्याशयः। नन्वेतेन सहस्रदक्षिणेन यजेतेति वाक्यान्तरेण तेषामपि तृतीयानिर्देशाद् गुणविधित्वाशङ्कास्तीत्याशङ्क्याह—**तेऽपि चेति**। तद्व्यपदेशरहितानामेतदधिकरणविचार्यत्वायोगेऽप्युद्भिदधिकरणादिषु यथासम्भवं विचारो भविष्यतीत्याशयः।

ननु प्रथमानिर्देशेनावधारितकर्मनामत्वानां न वाक्यान्तरस्थेन तृतीयानिर्देशेन निवृत्तिर्युक्तेत्याशङ्क्य, अपरितोषात्पक्षान्तरमाह—**अथ वेति**। एतेऽपि प्रथमानिर्दिष्टा

---

१. श्रुतिर्हि नामधेयत्वे, लक्षणा गुणविधौ इति भाष्यं यथाश्रुतार्थमनुपपन्नमिति मत्वाऽन्यथा व्याचष्टे नामधेयत्वे त्वित्यादिना—गौरवमित्यन्तेन।

२. 'गुणवचनेभ्यो मतुबो लुगिष्टः। इति पा. सू. (५,२.९५) अत्रत्यं कात्यायनस्मरणम्।

३. अथैष ज्योतिरथैष विश्वज्योतिरित्यत्र तृतीयनिर्देशाभावात् गुणविधित्वशङ्कैव नास्तीत्युच्यते, तर्हि सिद्धान्तेऽपि तृतीयाया अभावादेव यागत्वैकार्थसम्भवेन करणत्वानुपपत्तेज्योतिरादिशब्दस्य यागार्थत्वमपि न स्यादित्याशङ्कां परिहर्त्तुमाह कर्मनामत्व इति।

अपि ज्योतिरादिशब्दा यथासम्भवमुद्भिदाद्यधिकरणेषूदाहरणमित्यर्थः। प्रसिद्ध्याभिरिति पूर्वपक्षभाष्यं व्याचष्टे **तत्रेति**। तृतीयान्तत्वेनोद्भिदादिशब्दवत् श्येनादिशब्दानामपि करणवाचित्वप्रसिद्धेर्द्रव्यस्यैव करणत्वोपपत्तेः श्येनादिशब्दानां द्रव्यवाचितेत्युक्ते ननूद्भिदादिसिद्धान्तन्यायेन तृतीयान्ततयैव सामानाधिकरण्यात् कर्मनामत्वं सेत्स्यतीत्याशङ्कानिरासार्थं नन्विति भाष्यं व्याचष्टे—**न चेति**। निरूढार्थत्वेनैषां न सामानाधिकरण्यं निर्णायकमिति भावः। ननु 'यथा वै श्येन इत्याद्यर्थवादावगतो वत्यर्थः कर्मणि प्रवृत्ति-निमित्तं भविष्यतीत्याशङ्क्याह—**वत्यर्थोपादानेन चेति**। श्रुतिवृत्त्यपेक्षया विप्रकृष्टापि लक्षणा वाच्येन स्वसम्बन्ध्युपस्थापनात् सन्निकृष्टा, गौणता तु वाच्यलक्षितेन वाच्यसम्बन्धिनोऽर्थस्योपस्थापनात् अत्यन्तविप्रकृष्टा वत्यर्थोपादानेन कर्मणि प्रवृत्तौ गौणता स्यात्। सा चात्यन्तविप्रकृष्टेति योज्यम्। ननु श्येनादेर्यागसम्बन्धानवगमात् कथं लक्षणेत्याशङ्क्याह—**साधनं हीति**। उद्भिदादीनामिवेति दृष्टान्तोपादानेन तद्वदेव ज्योतिष्टोमे गुणविधानस्य सूचितत्वात् तदुद्देशेन विधीयमानस्य श्येनादेस्तत्साधनत्वप्रतीतिः। स्वसाध्यलक्षकत्वं युक्तमिति भावः।

नन्वेवं सति वैदिकत्वेन श्येनादिशब्दानामपि निरूढलक्षणापत्तेः गुणवचनत्वान्मतुप्लोपोऽन्वाख्यातव्यः स्यादित्याशङ्क्याह—**विनैवेति**। 'मतुप्लोपः स्मर्यते' इति सिद्धान्ते दर्शनात् स्मर्यमाणेनेति शेषः कल्पनीयः। गुणवचनेषु शब्दस्वभावनिबन्धनत्वात् लक्षणया गुणशब्दस्य गुणिनिवृत्तिप्रतीतेर्वाचकत्वशङ्कायां तन्निरासार्थं मतुप्लोपान्वाख्यनम्। श्येनादिशब्दानां तु पदान्तरसामानाधिकरण्यनिबन्धनत्वात् मतुप्लोपानन्वाख्यानेऽपि वाचकत्वशङ्काभावात् तन्निरासार्थमन्वाख्यानमनर्थकमित्याशयः।

मत्वर्थलक्षणायां च श्रुत्यर्थस्यापि वाक्यार्थान्वयित्वेनात्यागाद्वत्यर्थस्य प्रतीतिमात्रोपाधिकत्वेन वाक्यार्थान्वयाभावात् त्यागापत्तेर्मत्वर्थलक्षणैव ज्यायसीत्याह— **किं चेति**। मत्वर्थस्य वैशिष्ट्यस्य यज्यन्वयमात्रात्सिद्धेः श्येनप्रातिपदिकस्य तात्पर्याभावेन श्रुत्यर्थप्राधान्याविघातात् स्वार्थपरश्येनौपयिकत्वेन वा पाताख्यानान्वयासम्भवेऽपि[1] यजिसामानाधिकरण्योत्तरकालं तदन्यथानुपपत्त्या लक्षणेति, सामानाधिकरण्यरूपैकवाक्यवशादित्युक्तम्। गौणत्वे तु श्रुत्यर्थस्य वाक्यार्थानन्वयात् श्येनप्रातिपदिकस्य तात्पर्यानुपपत्तेर्वत्यर्थे एव सादृश्ये तात्पर्यकल्पनां विनाख्यातान्वयायोगात् वत्यर्थाकल्पनापुरःसराख्यातान्वयसिद्ध्यर्थं पदवेलायामेवासौ श्रुत्यर्थतात्पर्यत्यागेन लक्षणीय इति श्रुत्यर्थबाधापत्तेर्मत्वर्थाद् दुर्बल इत्यर्थः।

श्लोकं व्याचष्टे—**गुणविधिपक्षे हीति**। तेन श्येनादिनेति भाष्येण सौत्रं तच्छब्दं 'यस्मिन् गुणोपदेश' इत्येतत्सूत्रानिर्दिष्टविधित्सितगुणपरामर्शिनमङ्गीकृत्य विशब्दं च भेदवाचिनमङ्गीकृत्य तेन विधित्सितेन च श्येनादिरूपेण गुणेन भिन्नार्थतया व्यपदेशः

---

१. स्वार्थपरस्यैवाख्यातान्वयासंभवेऽपीति २ पु० पा०।

सङ्कीर्त्तनं यस्य श्येनादिपदस्य तदपि नामधेयमिति नामधेयपदानुवृत्त्या सूत्रं योजितम्। तत्र कथं भिन्नार्थत्वावगतिरित्यपेक्षिते श्येनादिशब्दानां कर्मणि प्रवृत्तिनिमित्तप्रदर्शनार्थेन सादृश्यव्यपदेशादित्यादिभाष्येणोक्तमार्थवादिकं श्येनसादृश्यमेव भिन्नार्थत्वावगतावपि कारणमिति प्रदर्शयन् सिद्धान्तमाह—**तदिति**। उपपत्तिरित्यादावुपशब्दस्य सादृश्यार्थत्व-दर्शनात् उपमीयते सादृश्येनावगम्यतेऽनयेति व्युत्पत्त्या सादृश्यावच्छेदकमुपमाशब्दे-नोक्तम्। तथा यद्वस्तु स्तूयते तद्भिन्नया सत्या तस्माच्छ्येनद्रव्येणोपमानेनोपमितस्य श्येनेन यजेतेति श्येनशब्दार्थस्य श्येनद्रव्याद् भेदोऽवसीयत इत्यर्थः।

ननु श्येनशब्दार्थस्य पक्षिविशेषस्योपमानात् पक्षिविशेषादभेदेऽपि तद्वतो यागस्य ततो भेदात्सादृश्येन स्तुतिर्भविष्यतीत्याशङ्क्य, विधेयमित्युक्तम्।

एतदधिकरणपूर्वपक्षे यजिना ज्योतिष्टोममनूद्य तत्र श्येनादिगुणमात्रविधानमभ्युप-गमात्, तदेव स्तोतव्यम्, न याग इत्याशयः। ननु स्तुतिः स्वरूपसत्यत्वानपेक्षणात् यथा कथंचिदुपपत्स्यत इत्याशङ्क्य न हीत्युक्तम्। सादृश्यद्वारा स्तुतिर्भेदाभावे सादृश्यस्योपाय-मात्रत्वेनापि वक्तुमशक्यत्वात् निरालम्बना स्यादित्याशयः।

ननु—

गगनं गगनाकारं सागरः सागरोपमः।

इत्यादावभेदेऽपि सादृश्येन स्तुतिर्दृष्टेत्याशङ्क्य—**सदेत्युक्तम्**। काल्पनिकभेदाश्रया स्तुतिरगत्या कदाचिदङ्गीक्रियते, न सर्वदेत्यर्थः। श्लोकं व्याचष्टे—**श्येनादिवाक्येषु हीति**। सदेति पदं शङ्कानिरासार्थत्वेनाथोच्यत इत्यादिना व्याख्यातम्। श्रुतिर्हीति भाष्यं नामधेयत्वे वत्यर्थलक्षणया श्रुत्यर्थत्यागापत्तेरयुक्तमाशङ्क्यो भासामञ्जस्यपरत्वेन व्याचष्टे—**नामधेयत्वे त्विति**। लक्षणेति भाष्यं मत्वर्थलक्षणायां वत्यर्थलक्षणातो ज्याय-स्त्वस्योक्तत्वादयुक्तमाशङ्क्य वत्यर्थलक्षणायाः पक्षद्वयसाम्येनार्थेनुयोज्यत्वाद्। गुणविधौ च काल्पनिकभेदाश्रयणत्वेनात्यन्तासामञ्जस्यात् मत्वर्थलक्षणादोषाधिक्याभिप्रायत्वेन व्याचष्टे—**इतरथा हीति**। सामानाधिकरण्यसिद्धयर्थं श्येनवता यागेनेति मत्वर्थस्ता-वल्लक्षयितव्यः। कर्माङ्गभूतस्य च श्येनस्य इतरश्येनैकजातीयत्वे भूयोऽवयवसामान्ये योगो जात्यन्तरस्य तदिति भिन्नजातीयाश्रयत्वेनोक्तस्य जातिसादृश्यस्याभावाद् काल्पनिक-भेदाश्रयणेऽपि कर्मणि व्यापृतस्य भ्रातृव्यादातृत्वायोगादभिचार्यस्य च यजमानभ्रातृव्य-स्यादाने योग्यत्वस्याप्यभावात् सादृश्यानुपपत्तेरर्थवादोक्तस्यापि वस्तुतो सम्भवात्तदा-लम्बनसिद्ध्यर्थं भ्रातृव्यादानसाधनद्वारा तदङ्गभूते श्येने वत्यर्थोऽपि लक्षयितव्यः इत्यर्थः।

ननु यागस्य भ्रातृव्यादानसाधनत्वेन श्येनसादृश्योपपत्तेर्विधेयश्येनस्तुत्यर्थायामिव वेतसावकास्तुत्यर्था स्तुतिर्भविष्यतीत्याशङ्क्याह—**न चेति**। यागविधेर्निराकर्त्तुमशक्य-त्वात् स्तुतेर्नान्यत्र सञ्चारो युक्त इत्यर्थः। एतदेव विवृणोति—**अविधेयेति**। ननु याग-विधावपि तद्विशेषणतया द्रव्यस्यापि विधेयत्वोपपत्तेः स्तुतिभाक्त्वं भविष्यतीत्याशङ्क्य,

नामधेयत्वेन गतिसम्भवे विशिष्टविधिगौरवस्यानाश्रयणीयत्वात्। द्रव्यस्याविधेयत्वमुक्तं सामानाधिकरण्यार्थं च द्रव्येण मत्वर्थं यागं लक्षयित्वा यागस्तुतिं द्रव्ये सञ्चारयितुं पुनरपि यागेन द्रव्यलक्षणाद्विप्रकर्षोऽस्मिन् पक्षे स्यादित्याह—**पुनरपि चेति।**

यथा च लौकिकप्रयोगात् श्येनशब्दस्य द्रव्यवचनत्वं मुख्यम्, तथा वैदिकात् सामानाधिकरण्याद्यागवचनत्वमपि मुख्यं वक्तुं शक्यमिति श्रुतिर्हीति भाष्यं प्रौढया **यथाश्रुतं** व्याख्यातुमाह—**समभिव्याहाराच्चेति।** लक्षणेत्यादिभाष्यम् अन्यथा व्याचष्टे—**विधौ चेति।** गुणे श्येनशब्देन विहिते विधौ मत्वर्थलक्षणा स्यात् इत्येवमनेन भाष्येण व्याख्यातम्। एतदेव भाष्यं गुणशब्देषु मतुप्लोपस्य विहितत्वात् मत्वर्थलक्षणा युक्ता नान्यत्रेत्यन्यथा व्याख्यातुमाह—**गुणेति।** नन्विवलोपस्याप्यस्मरणात् तदर्थलक्षणाप्ययुक्ता स्यादित्याशङ्क्याह—**इवार्थस्त्विति।** वल्लृप्तकल्प्याभिप्रायौ वा भाष्यगतौ श्रुतिलक्षणाशब्दावित्यन्यथा व्याख्यातुमाह—**मत्वर्थलक्षणा त्विति।** दोषान्तराण्यपि भाष्यगतेन लक्षणाशब्देनोपलक्षितानीति सूचयितुम्। उद्भिदधिकरणवार्त्तिकोक्तानि यागं प्रति गुणविधावभिचरन्निति फलपदस्यानुवाद्यज्योतिष्टोमयागविशेषणत्वासम्भवादानर्थक्यम्, सार्वकाम्यप्राप्तज्योतिष्टोमविशेषणत्वे वाक्यभेदः, प्रत्ययव्यापारविप्रकर्षः, धातुपारार्थ्यम्, यागमात्रे च गुणविधौ उत्पत्तिविशिष्टेन सह विकल्पः फलविशिष्टे यागे गुणविधौ सामान्यशिष्टस्य सोमस्य विशेषशिष्टेन श्येनादिना बाध इति दोषान् योजयति—**पूर्वोक्ताश्चेति॥ ५॥**

इति चतुर्थं तद्व्यपदेशाधिकरणम्।

भा० प्र०—जो शब्द किसी विशेष अर्थ में रूढ़ है, किसी विशेष अर्थ में प्रसिद्ध है, जहाँ वाक्य के भेद होने की सम्भावना नहीं है एवं जिसके उपमा के सूचक अर्थवाद वाक्य भी सुलभ है, उन शब्दों को दृष्टि में रखकर नामधेय का विचार किया जा रहा है। जैसे—अथैष श्येनेन अभिचरन् यजेत = षड्विंशब्राह्मण (३।८।१) शत्रु के नाश करने की इच्छा से अभिचार कर्म का सम्पादन करता हुआ 'श्येन' नाम के याग से यजन करें। अथैष सन्दंशेन अभिचरन् यजेत = वह अभिचार कर्म का सम्पादन करता हुआ सन्दंश याग से यजन करे (षड्विंशब्राह्मण ३।१०।१)। अथैष गवाभिचरन् यजेत = वह अभिचार करता हुआ गो याग से यजन करे। इनमें श्येन, सन्दंश और जो गो शब्द है, इनके द्वारा गुण का विधान किया जाता है या ये सब विशेष-विशेष कर्मों के नामधेय है[1]। इस संशय में पूर्वपक्षी ने कहा है कि उद्भिद और उद्भेदन आदि क्रिया को निमित्त मानकर प्रवृत्ति होने से याग को नामधेय कहा जा सकता है अर्थात् याग का नाम माना जा सकता है, किन्तु श्येन[2], सन्दंश[3] और

१. शत्रु आदि को मारने के लिए जो कर्म किया जाता है—वह कर्म अभिचार नाम से कहा जाता है। इसे अनर्थ का साधन माना गया है।

२. बाज नामक पक्षी। ३. संडासी।

गो[1] शब्द श्येनत्व जाति को मानने कारण ये याग के नाम नहीं हैं, वरन् ये गुण का ही विधान करते हैं, क्योंकि कर्म का नामधेय इनको मानने पर द्रव्य एवं देवता इन दो में एक का भी निर्देश न होने से याग का स्वरूप ही नहीं सिद्ध होगा।

इसके उत्तर में सिद्धान्ती ने कहा है कि याग विशेष में श्येन पक्षि रूप गुण का विधान मानने पर **'यथा वै श्येनो निपत्यादत्ते एवमयं द्विषन्तं भ्रातृव्यं निपत्यादत्ते यमभिचरति श्येनेन'** जैसे बाज नामक पक्षी मत्स्य एवं पक्षियों को झपट्टा मारकर पकड़ता है, वैसे ही श्येन याग करने वाले यजमान से द्वेष करने वाले शत्रु को झ ट्टा मारकर पकड़ लेता है। अर्थात् श्येन याग से जिसका अभिचार किया जाता है, उसको वह पकड़ लेता है और प्राणों से रहित कर देता है। इसी प्रकार 'सन्दंशेन दुरादान-मादत्ते' सड़सी से कठिनाई से पकड़ में आने वाली वस्तु का निग्रह किया जाता है, वैसे ही द्वेष करने वाले शत्रु को सन्दंश याग से मारते हैं। पयो गावो गोपायन्ति = जैसे गौ अपने वत्स को हिंसक प्राणियों से रक्षा करती है, वैसे गोयाग के द्वारा अभिचार करने वाले से यजमान की रक्षा करता है। इस वाक्य में एक ही श्येन को उपमान एवं उपमेय कहा है— यह सङ्गत नहीं है। अतः गौर्वाहीकः के समान श्येन पक्षी के गुण को अर्थात् झपट्टा मारकर ग्रहण करना यह प्रकृत में उपमेय कर्म में भी विद्यमान होने से इस कर्म का नाम श्येनयाग है। अनन्वय अलङ्कार में एक ही व्यक्ति में जैसे उप-मानोपमेयभाव रहता है, वैसे ही प्रकृत में भी एक ही श्येन के विधीयमान गुण की उप-मानता और उपमेयता रहेगी ऐसी स्थिति में यह कहा जा सकता है कि— यथा वै श्येनः' इस वाक्य में अनन्वय अलङ्कार नहीं हो सकता है वरन् यह पूर्णोपमा अलङ्कार है।

साहित्यिकों के मत में जिस मत में एक ही वाक्य में उपमानता और उपमेयता रहती है, वहीं अनन्वय अलङ्कार होता है। जैसे आकाश आकाश के समान है, समुद्र समुद्र के समान है, राम और रावण का युद्ध राम और रावण के समान है। इन उदाहरणों में अन्य उपमान नहीं है। यही वाक्य अनन्वय अलङ्कार का है। जहाँ उपमान और उपमेय सामान्य धर्म एवं उपमावाचक इव आदि का वाच्य रहता है अर्थात् उसके वाचक शब्द का उल्लेख रहता है—वहाँ पूर्णोपमा अलङ्कार रहता है, अतः इसको गुणविधि नहीं कहा जा सकता है। इसका विस्तृत विचार न्यायसुधा में किया गया है। अतः, श्येन यह कर्म का नामधेय है, सन्दंश, गो आदि शब्द भी इसी रूप में उससे व्यवहृत शास्त्र है, इसलिए कर्म नामधेय है।

"तद् व्यपदेशम्" = जिसका विचार करने की इच्छा की जाती है वैसे गुण का, "व्यपदेश" = सादृश्य जिसमें है वहाँ 'च' और। जिस गुण के विधान करने की इच्छा की जाती है, उसका सादृश्य जिसमें है, वैसे स्तेन आदि शब्द भी कर्म के नामधेय हैं॥५॥

---

१. गो पशु विशेष। अभिचार कर्म के लिए जो याग किये जाते हैं, उस याग के साधन के रूप में इन द्रव्यों का विधान होता है।

[५] नामधेये गुणश्रुतेः स्याद्विधानमिति चेत् ॥ ६ ॥ पू०

शा० भा०—'वाजपेयेन स्वाराज्यकामो यजेत' इति श्रूयते। तत्र किं गुणविधिः कर्मनामधेयमिति सन्देहः। एवं चेत् सन्देहः, दृश्यते गुणविधिः। न सन्देहः, श्रूयते हि गुणः। सोऽवगम्यमानो न शक्यो नास्तीति वदितुम्। तस्माद् गुणविधिः ॥ ६ ॥ पूर्वपक्षः।

भा० वि०—गुणविधौ पूर्वाधिकरणचतुष्टयोक्तमत्वर्थलक्षणादिदोषाक्षेपसमाधानादस्याधिकरणस्य सङ्गतिः। अत्र यद्यप्युद्भिदादिवाच्यान्येवोदाहरणम्, तथापि वाजं पेयमस्मिन् इति बहुव्रीहिणैव मत्वर्थलाभान्मत्वर्थलक्षणानापत्तेः। हानार्हत्व विशिष्ट-वाजपदवाच्यान्न-रूपैकार्थविधानाद्वाक्यभेदाभावात्, तत्प्रख्यतद्व्यपदेशयोश्चाभावात् पूर्वन्यायचतुष्टयेन वाजपेयपदस्य गुणविधित्वनिरासासिद्धेः, वैरूप्यापत्त्या तन्निरासाय वाजपेयवाक्यमुदाहरति—**वाजपेयेनेति**। आख्यातस्य गुणफलपदाभ्यां तन्त्रसम्बन्धसम्भवासम्भवाभ्यां संशयमाह—**तत्रेति**। प्रयोजनं त्वाक्षेपसमाधानरूपत्वादस्य गुणफलोपबन्धादिरूपं प्रथमाधिकरणोक्तमेव। पूर्वपक्षमाह—**तदुच्यत**। इत्यादिना। इति चेदिति सूत्रावयवं व्याचष्टे—**एवं चेदिति**। नामधेये स्याद्विधानमिति सूत्रावयवं व्याचष्टे—**नेति**। तत्परिकल्पिते नामधेये गुणविधानं स्यात्, नामधेयतया परिकल्पितस्यापि गुणविधित्वमेव न्याय्यमित्यर्थः, इति सूत्रावयवोऽनेन व्याख्यातः। कस्माद् गुणविधित्वमेवेत्यपेक्षायां गुणश्रुतेरिति हेतुं व्याचष्टे—**श्रूयते हीति**।

ननु वाजपेयपदस्य कर्मनामधेयत्वात् गुणश्रवणमसिद्धं तत्राह—**सोऽवगम्यमान इति**। प्रसिद्ध्यादिभिस्तावद्वाजपेयपदस्य गुणविधित्वमध्यवसीयते। न च मत्वर्थलक्षणादोषः, आख्यातस्य तन्त्रसम्बन्धे सति तदर्थस्य यागेन स्वाराज्यमिति फलं प्रति करणतया वाजपेयेन यागमिति गुणं प्रति साध्यतया च सम्बन्धसिद्धेः तेन प्रतीयमानस्यापलापो न शक्य इत्यर्थः।

पूर्वपक्षमुपसंहरति—**तस्मादिति** ॥ ६ ॥

अथ पञ्चमं वाजपेयाधिकरणम्

त० वा०—तन्त्रसम्बन्धेनाऽऽख्यातपदस्य धात्वर्थः फलं प्रति करणम्, गुणं च प्रति साध्यो भवन्न विरोत्स्यते। तेनोद्भिदा यागम्, यागेन च पशून् भावयेदिति युगपद्विधिव्यापाराद्विनैव मत्वर्थलक्षणया सम्बन्धसिद्धिः। तथाऽऽज्यादिपदस्य तन्त्रेण स्तोत्रसंख्यादियोगः। तस्मात्सर्वत्र त्वत्परिकल्पिते नामधेये गुणश्रुतेः प्रसिद्ध्यादिभिर्गुणप्रत्ययानपगमात्तद्विधानमेव भवत्वलं नामधेयत्वेनेति, यथा-

संभवं सर्वाधिकरणाक्षेपेणेदमारभ्यते। तत्रेदमपि वाक्यं शुद्धं भविष्यतीति वाजपेयोपन्यासः। सर्वाण्येव त्विहोदाहर्तव्यानि।

आह च—

करणेषूपदिष्टेषु याऽर्थात्साध्यत्वकल्पना।
तस्यां गुणविधानेन नास्ति मत्वर्थलक्षणा ॥ ६ ॥ इति।

॥ अथ पञ्चमं वाजपेयाधिकरणम् ॥

न्या० सु०—ननु किमत्र ज्योतिष्टोमयागानुवादेन वाजपेयलक्षणगुणविधिः पूर्वपक्ष्यते, गुणविशिष्टयागविधिर्वा। तत्राद्ये कल्पे ज्योतिष्टोमक्रियातो वाजपेयक्रियाया भेदाभावलिङ्गदर्शनसूत्रानुपपत्तिः। सार्वकाम्यप्राप्तस्वाराज्यकामानुवादापत्तेश्च। फलसम्बन्धस्याविवक्षितत्वाद्वैरूप्यम्, सूत्रस्याप्यनुपपत्तिः। द्वितीयकल्पे तु मत्वर्थलक्षणा स्यात्। तन्त्रसम्बन्धेन मत्वर्थलक्षणापरिहारशङ्कायामुद्भिदादिष्वपि तन्त्रसम्बन्धाभ्युपगमेन मत्वर्थलक्षणापरिहारोपपत्तेर्गुणविधित्वसम्भवात् नामधेयत्वसिद्धान्तः प्रत्युद्ध्रियेत। वाजं पेयमस्मिन्निति बहुव्रीहिणा मत्वर्थलाभाभ्युपगमे बहुव्रीह्यान्तर्णीतगुणसम्बन्धस्य कर्मण एव श्रुत्या फले विधानात्, अर्थाद् गुणविधानेऽपि वचनव्यक्त्यन्यथात्वाभावाद्वैरूप्यसूत्रानुपपत्तिस्तदवस्थितेत्याशङ्क्याह—**तन्त्रसम्बन्धेनेति**। विशिष्टविधावपि तन्त्रसम्बन्धेन मत्वर्थलक्षणापरिहारशङ्कोद्भिदादिष्वपि प्रसज्यमाना तदाक्षेपेण प्रत्यवस्थानान्न दूष्यतीति तात्पर्यार्थः। यागानुवादेन गुणविधावनूद्यमानस्य यागस्य फलेन विशेष्टुमशक्यत्वात्, उभयसम्बन्धाभावेन तन्त्रत्वानुपपत्तेः फलसाधनतयाऽन्यतः प्राप्तस्य गुणवत्ताभिधानायाऽवश्यं मत्वर्थलक्षणा आपद्येत, विशिष्टविधौ तु विध्युत्तरकालं तत्सामर्थ्यलभ्ये धात्वर्थस्य फलं प्रति करणत्वे, अर्थाक्षिप्ते च गुणं प्रति साध्यत्वे सत्यपि विधीयमानावस्थायां कारकविभक्त्यभावाद्धातुतः स्वरूपमात्रेण प्रतीतस्योभयसम्बन्धो मत्वर्थलक्षणां विनाऽपि न विरुध्यते। फलसम्बन्धोत्तरकालं गुणसम्बन्धाभ्युपगमे फलसम्बन्धेन साधनत्वाक्षेपात् तादृशस्य साधनभूतेन गुणेन समत्वात् सम्बन्धो न युज्यते गुणसम्बन्धोत्तरकालं च फलसम्बन्धाभ्युपगमे गुणसम्बन्धेन साध्यत्वाक्षेपात् साध्यभूतेन फलेन न युज्येतेति युगपदुभयसम्बन्धप्रदर्शनार्थं तन्त्रत्वमुक्तम्। आख्यातपदस्य तन्त्रेणोभयसम्बन्धोत्तरकालं तेनैव हेतुना धात्वर्थस्य साध्यसाधनभावो[1] भवन्न विरोत्स्यत इति हेतौ तृतीयमङ्गीकृत्य योज्यम्।

ननु वैरूप्यापत्तेर्मत्वर्थलक्षणां विनोभयसम्बन्धो न युक्त इत्याशङ्क्य तेनेत्युक्तम्। येन कारणेन धात्वर्थस्य साध्यसाधनत्वनिरपेक्षस्य स्वरूपमात्रेण धातुनोक्तस्योभयसम्बन्धोत्तरकालमर्थादापन्नः साध्यसाधनभावो न विरुध्यते। तेन कारणेन युगपद्विधेय-

---

१. साध्मसाधनत्वनिरपेक्षस्य स्वरूपमात्रेण धातुनोक्तस्योभयसम्बन्ध इ० २ पु० पा०।

व्यापारोत्तरकालं तद्धेतुकसाध्यसाधनरूपेणोभाभ्यां मत्वर्थलक्षणया विनैव धात्वर्थस्य सम्बन्धत्वसिद्धिरित्यर्थः। तन्त्रसम्बन्धे च विशिष्टविधावपि मत्वर्थलक्षणापरिहारसम्भवे चित्रावाक्येऽपि चित्रात्वस्त्रीत्वविशिष्टयागविधानोपपत्तेः। स्त्रीत्वाक्षिप्तप्राणिद्रव्यकत्वेन दैक्षसादृश्यात्तदीयेतिकर्त्तव्यतालाभेन नैराकाङ्क्षयोपपत्तेर्न वाक्यभेदापत्तिः।

आज्यैः स्तुवते इत्यादिष्वप्याज्यादिविशिष्टस्तुतिविधानोपपत्तेः पञ्चदशादिवाक्यै-राज्याद्यनुवादेन संख्यामात्रविधानान्न वाक्यभेदापत्तिः। सूर्याग्निवाक्ययोश्च देवताद्वय-विशिष्टहोमान्तरविधायित्वोपपत्तेरग्निहोत्रवाक्यविहिते होमे शास्त्रान्तरेणाग्नेः प्राप्त्य-भावात्तत्प्रख्यता परिहर्तुं शक्या।

श्येनादिवाक्येष्वपि श्येनादिवाक्यविहितस्य च द्रव्यविशिष्टस्य यागस्य श्येनादि-द्रव्योपमानेन स्तुत्युपपत्तेस्तद्व्यपदेशतापि परिहर्त्तुं शक्येति सूचितम्। यद्यपि घृतादेः स्तुतावकरणत्वात्कारकविभक्तिसम्भवे चोपपदविभक्तित्वाश्रयणस्यायुक्तत्वात्, सहार्थे तृतीयाङ्गीकरणेनाऽज्यादिभिः सह स्तुवत इत्येवमपि विशिष्टविधानं न युज्यते, तथापि पञ्चदशादिवाक्येष्वेवाध्याहृतभवतिपराख्यातोक्ताया यागभावनायाः स्थापनाख्यधात्वर्था-वच्छेदाभ्युपगमात् तस्य च देशानपेक्षस्यानुष्ठानाशक्तेर्विध्ययोगात् प्रकरणस्य गम्यस्तोत्र-देशान्विताज्यादिविध्यवगतेराज्यादिपदस्य प्रकरणप्राप्तेन स्तोत्रेण वाक्योपात्तया च संख्यया सह तन्त्रेण सम्बन्धात् संख्याविशिष्टघृतादिरूपैकार्थविधानोपपत्तेर्न वाक्यभेदा-पत्तिरिति दर्शयितुं तथेत्युक्तम्।

आदिशब्दस्त्रिवृच्छब्दस्य बहिष्पवमानत्वयोगोवत्यर्थः सर्वाक्षेपे सूत्रसामञ्जस्यप्रदर्श-नार्थम्—**तस्मादित्यनेन**। सूत्रं योजितम्। मत्वर्थलक्षणापरिहारमात्रेणाक्षेपे सत्युद्भि-दधिकरणानन्तरमेवैतदधिकरणारम्भोपपत्तेरिहासङ्गतिमाशङ्क्य, सर्वेत्युक्तम्।

कथं वाक्यभेदादिपरिहरणीयमित्यपेक्षितेऽस्मदुक्तप्रकारसूचनार्थं यथासम्भवमित्युक्त-मिति। ननु पूर्वाधिकरणचतुष्टयाक्षेपेणैतदधिकरणारम्भे सत्यपूर्ववाक्योदाहरणमनर्थक-मित्याशङ्क्याह—**तत्रेदमिति**। वाजं पेयमस्मिन्निति बहुव्रीहिणैव मत्वर्थलाभान्मत्वर्थक-लक्षणानापत्तेः पेयत्वस्य च वाजशब्दवाच्यान्नविशेषणत्वोपपत्तेः पानार्हत्वविशिष्टवाज-रूपैकार्थविधानसम्भवाद्वाक्यभेदानापत्तेस्तत्प्रख्यान्यशास्त्रतद्व्यपदेशयोश्चाभावात् पूर्वन्याय-चतुष्टयेन वाजपेयशब्दस्य गुणविधित्वनिरासासिद्धेर्वैरूप्यापत्त्या तन्निरासायेदं वाक्यम् उदाहृतमित्यर्थः। यद्यप्युपदिष्टेषु धात्वर्थेषूपदेशसामर्थ्यात्करणत्वं प्रतीयते, तेन चार्थात् कर्तृव्यापारव्याप्यत्वरूपं साध्यत्वं कल्प्यते, तथाप्युपदिश्यमानावस्थायां कारकविभक्त्य-भावात् साध्यसाधनत्वशून्यरूपस्वरूपमात्रेण धातुनोक्तस्य धात्वर्थस्य तन्त्रसम्बन्धेन मत्वर्थलक्षणां विनैव गुणविधानोपपत्तेर्नास्ति मत्वर्थलक्षणेति यदुक्तम्। तत्रैव वृद्धसम्मति-माह—**आह चेति**।

यद्वा करणभूतस्यापि च यागस्योत्पत्तिवाक्यावगतकरणत्वाक्षिप्तसाध्यांशानुवादेन गुणेऽपि विधीयमानेन मत्वर्थलक्षणेति चित्राधिकरणपूर्वपक्षवार्त्तिकोक्तन्यायेन यागानुवादे-

नापि गुणविधौ मत्वर्थलक्षणानापत्तेः, किमिति विशिष्टविधिमभ्युपेत्य तन्त्रसम्बन्धेन मत्वर्थलक्षणापरिहारक्लेशः क्रियत इत्याशङ्कानिरासार्थोऽयं श्लोकः। करणेषूपदिष्टेषु सत्सु याथार्थ्यसाध्यत्वकल्पना, तस्यां च गुणविधाने मत्वर्थलक्षणा न नास्ति, किं त्वस्त्येवेति द्वौ नञौ प्रकृत्यर्थं गमयतः इति न्यायेन योज्यः। विधिसामर्थ्याद्धातोः साधनत्वरूपस्यार्थप्रतिपादकत्वावगतेस्तत्सिद्धयेऽर्थाक्षिप्तस्यापि साध्यत्वस्याशाब्दत्वाच्छब्देन गुणेनाऽन्वयानुपपत्तेः अन्यथा च क्वचिदपि मत्वर्थलक्षणानापत्तेरित्याशयः॥ ६॥

भा० प्र० — स्वाराज्य स्वरूप फल की कामना करने वाला वाजपेय के द्वारा याग करे। 'वाजपेयेन स्वाराज्यकामो यजेत" श्रुतियों में उपदिष्ट इस स्थल में वाजपेय से इसके द्वारा क्या गुणविशेष का विधान किया गया है, या यह कर्मविशेष का नामधेय है—यह सन्देह है। इसमें पूर्वपक्ष का कहना है "वाजपेयेन" इस तृतीयान्त पद से गुण का ही विधान किया गया है, अर्थात् यह गुणविधि है, क्योंकि वाज का अर्थ अन्न होता है और पेय का अर्थ पानी या द्रव्य होता है। अतः वाजपेय का यवागु आदि अन्न होता है। इस प्रकार द्रव्यविशेष की अवगति कराने के लिए "वाजपेयेन स्वाराज्यकामो यजेत" इस वाक्य में वाजपेय रूप गुण का ही विधान है—यही मानना होगा। यदि यह कहा जाय कि वाजपेयेन आदि वाक्य को गुणविधि मानने पर "वाजपेयगुणवता यागेन स्वाराज्यं भावयेत्" वाजपेयरूप गुणविशिष्ट याग से स्वाराज्य रूप फल का उत्पादन करे— यह अर्थ होता है। ऐसी स्थिति में 'यजेत' इस पद के आख्यात 'तिङ्' (लिङ् = इत) प्रत्यय की वाच्य क्रिया वाजपेय रूप गुण स्वाराज्यरूप फल, इन दोनों से सम्बन्ध करेगी। इस स्थल में केवल सम्बन्ध ही कहा गया है तन्त्रता के अनुसार यह कर्म और कारण नदानों के ही साथ साधारण रूप में सम्बन्ध रखना होगा। ऐसी स्थिति में वाजपेय द्रव्य रूप गुण के द्वारा याग का उत्पादन करे—यह अर्थ लब्ध होता है, इसलिए मतुप् के अर्थ में लक्षणा नहीं होगी, फलतः वाक्यभेद भी दोषावह नहीं है। क्योंकि, इस स्थल में कर्म एवं करण दोनों के साथ सम्बन्ध का प्रकाश 'यजेत' इस पद से वाच्य आख्यात की क्रिया का सामर्थ्य है।

स्वयं राजते इति स्वराट्, स्व उपपद दीप्ति अर्थ के वाचक राजृ (राज्) धातु से क्विप् प्रत्यय कर स्वराट् सिद्ध होता है, स्वराज का भाव में ष्यञ् (य) प्रत्यय कर स्वाराज्य सिद्ध होता है, जो अपने लिए स्वाराज्य = स्वयं दीप्ति की कामना करने वाला है—वह स्वाराज्यकाम कहा जाता है। इस प्रकार की कामना करने वाला पुरुष वाजपेय से याग करें।

अतः, 'वाजपेयेन' इससे गुण का ही विधान किया गया है 'नामधेय' = नामधेय के रूप में जिसका अन्वय हो सकता है, वैसे 'वाजपेय' आदि शब्द। 'गुणश्रुतेः' =

द्रव्यदेवतारूप गुण श्रुत अर्थात् उपदिष्ट होने से 'स्यात् विधानम्' = उस श्रूयमाण गुण की विधि होगी, 'इतिचेत्' = यदि यह कहा जाय। कतिपय आचार्य यह आपत्ति कर सकते हैं कि इसके द्वारा गुण का उपदेश किया गया है, अतः, गुणा का ही विधान होगा ॥ ६ ॥

तुल्यत्वात् क्रिययोर्न ॥ ७ ॥ सि०

शा० भा०—नैतदेवम्, तुल्ये हीमे क्रिये स्याताम्। या च वाजपेयक्रिया, या च दर्शपूर्णमासक्रिया, उभयत्र दार्शपौर्णमासिको विध्यन्तः स्यात्। तदा[1] च दीक्षाणामुपसदां च दर्शनं नावकल्प्येत, सप्तदशदीक्षो वाजपेय इति, सप्तदशोपसत्को वाजपेय इति।

अथ वा तुल्यत्वात् क्रिययोर्नेति। यदि न गुणविधिः, ततस्तुल्यैषा वाजपेयक्रिया ज्योतिष्टोमक्रियया। तत्र दीक्षाणामुपसदां च दर्शनमुपपन्नम्। तस्मात्कर्मनामधेयमिति। लिङ्गं त्वेतत् प्राप्तिः पुनरुत्तरसूत्रेण[2] ॥ ७ ॥ सिद्धान्तः।

भा० वि०—**नेति**। सूत्रावयवं पूर्वपक्षनिरासार्थतया व्याचष्टे—**नैतदिति**। हेतुतया तत्र तुल्यत्वात् क्रिययोरिति व्याचष्टे—**तुल्ये हीति**। गुणविधित्वे हि या वाजपेयक्रिया या च दर्शपूर्णमासक्रिया इमे ह्यौषधद्रव्यत्वेन तुल्ये स्याताम्, न ज्योतिष्टोमबाजपेयक्रिये इत्यर्थः। अस्तु को दोषस्तत्राह—**उभयत्रेति**। वाजपेयशब्दस्य पानार्हत्वविशिष्टान्नवाचितया यवागूवाचकत्वेन वाजपेययागस्य औषधद्रव्यकत्वे द्रव्यसारूप्याद्दर्शपूर्णमासप्रकृतिको वाजपेय इति तदीय एव विध्यन्तः स्यादित्यर्थः। तथापि किमित्यत आह—**तत्रेति**[3]। ऐष्टिकविध्यन्ताभ्युपगमे वाजपेयप्रकरणे सौमिकविध्यन्तश्रवणं नावकल्पेतेत्यर्थः।

एवं पूर्वपक्षनिरासलिङ्गाभिधानार्थत्वेन सूत्रं व्याख्याय, सिद्धान्तलिङ्गाभिधानार्थत्वेनापि व्याचष्टे—**अथ वेति**। गुणविधित्वाभावे सत्यौषधद्रव्यत्वाभावादव्यक्त-चोदनाचोदितत्वेन ज्योतिष्टोमक्रियातुल्यत्वाद्वाजपेयस्य सौमिकविध्यन्तानां दर्शनमवकल्पेतेत्यर्थः। लिङ्गदर्शनफलमाह—**तस्मादिति**।

नन्वेवं स्वपरपक्षसाधनदूषणयोरनेनैव कृतत्वात् किमुत्तरसूत्रेणेत्यत्राह—**लिङ्गं[4] चेति**। लिङ्गदर्शनस्य प्रापकसापेक्षत्वात् तत्प्रदर्शनार्थमुत्तरसूत्रमित्यर्थः ॥ ७ ॥

---

१. ब. तथा। २. ब. उत्तरेण।

३. तदा चेति भा० पा०। ४. लिंगन्त्वेतदिति भा० पा०।

त० वा०—वाजपेये तावदयं विशेषोऽभिधीयते—

वाजपेयं यवागू स्यादौषधद्रव्यता ततः।
द्रव्यसारूप्यसामान्यादैष्टिकत्वं प्रसज्यते ॥
तन्त्रत्वमैकरूप्येण भवेत्तुल्योपकारतः।
उपकारान्यथात्वे तु भवत्यावृत्तिलक्षणम् ॥ ७ ॥

न्या० सु०—नन्वेतल्लिङ्गोपन्यासात् वाजपेयवाक्यमेवात्रोदाहरणं प्रतीयत इत्याशङ्क्याह—**वाजपेये तावदिति**। वक्ष्यमाणसूत्रोक्तवैरूप्यलक्षणन्यायमूलत्वाल्लिङ्गस्य, न्यायस्य च सर्वसाधारण्यान्न लिङ्गमात्रेण सङ्कोचो युक्त इत्याशयः। भाष्यकृता सौत्रं नञं पूर्वपक्षनिरासार्थत्वेन व्याख्याय, गुणविशिष्टकर्मविधिपक्षे वाजपेयक्रियाया दर्शपूर्णमासक्रियया तुल्यत्वात् दार्शपौर्णमासिकविध्यन्तापत्तेर्दीक्षोपसद्दर्शनं न युक्तमिति पूर्वपक्षनिरासलिङ्गाभिधानार्थत्वेन च सूत्रं व्याख्याय, नामधेयत्वे सत्यव्यक्तचोदितत्वेन-ज्योतिष्टोमक्रियया तुल्यत्वाद्दीक्षोपसद्दर्शनं युक्तमिति सिद्धान्तलिङ्गाभिधानार्थत्वेन व्याख्यातम्।

तत्र नामधेयपक्षवद् गुणविधिपक्षेऽपि स्वार्थविहितदेवताशून्यत्वलक्षणाऽव्यक्तचोदितत्वसद्भावात् सौमिकविध्यन्तप्राप्त्युपपत्तेरौषधद्रव्यकत्वेनेष्टिसादृश्येऽपि सत्यैष्टिको विध्यन्तः, सौमिको वेति सन्देहे दीक्षोपसद्दर्शनात् 'सन्दिग्धेषु वाक्यशेषादिति न्यायेन सौमिकविध्यन्तनिश्चयात् नानेन लिङ्गेन गुणविधित्वनिरासः, नामधेयत्वं वा सिध्यतीत्याशङ्क्याह—**वाजमिति**। विप्रतिपत्तौ हविषा नियम्येत कर्मणस्तदुपाख्यत्वादि(८-२)त्यष्टमाधिकरणन्यायेन द्रव्यसादृश्यस्य बलीयस्त्वाद्दीक्षोपसद्दर्शनस्य, अपि वा न्यायपूर्वत्वाद्यत्र नित्यानुवादवचनानि स्युरिति विध्यन्ताधिकरणोक्तन्यायेन यथासम्भवं परिहारोपपत्तेरौषधिद्रव्यकत्वे सति द्रव्यसारूप्येण वाजपेयस्य दर्शपूर्णमासाभ्यां समानत्वादिष्टिप्रकृतिकत्वं प्रसज्येतेत्यर्थः ॥ ७ ॥

भा० प्र०—पूर्व सूत्र के द्वारा किये गये वाजपेय के गुणविधि के उत्तर में कहा जा सकता है कि 'वाजपेयेन' इससे गुण का विधान नहीं है, क्योंकि, वाजपेय को गुण मानने पर वह शस्य जाति की वस्तु होगी यवागू या और शस्यपक्व अर्थात् औषधि द्रव्यनिष्पन्न गुण जिसमें रहता है वह दर्शपूर्णमास के ही अनुरूप होगा, क्योंकि, यज्ञ सकल इष्टि, पशु और सोम इन तीन भागों में विभक्त है। इनमें प्रत्येक की द्रव्यादि और इति कर्तव्यता भी परस्पर भिन्न है। किन्तु शास्त्रवचन से अवगत होता है कि वाजपेय सोमजाति का यज्ञ है, क्योंकि, सोमयाग को विधि के अनुसार इसकी इतिकर्तव्यता का उपदेश किया गया है, किन्तु इसमें औषधि संज्ञक यवागूरूप गुण का विधान करने पर यह दर्शपूर्णमास के समान अर्थात् इष्टि-जातीय यज्ञ होगा, ऐसी स्थिति में अन्य वचनों के साथ इस गुणविधि का विरोध होगा, अतः "वजपेयेन" इसके द्वारा गुणविधान नहीं हो सकता है।

'तुल्यत्वात्' = समानता होने से, "क्रिययोः" = दर्शपूर्णमास एवं वाजपेय इन दो क्रियाओं का 'न' = यह गुणविधि नहीं हो सकती है। "वाजपेये" इत्यादि वाक्य को गुणविधि मानने पर दर्शपूर्णमास एवं वाजपेय ये दोनों ही क्रियाएँ तुल्य हो जाने से—इस स्थल में गुणविधि नहीं हो सकती है ॥ ७ ॥

ऐकशब्द्ये परार्थवत् ॥ ८ ॥

शा० भा०—यदि गुणविधिः स्यात्, स्वार्थवत्, परार्थवच्चाभिधानं विप्रतिषिध्यते यजेतेत्यस्य शब्दस्य। यदि स्वाराज्यकामो यजेतेति स्वाराज्यकामस्य यागं विधातुं स्वार्थमुच्यते, न तर्हि वाजपेयेन गुणेन सम्बद्धुं परमार्थमनूद्येत यागेन वाजपेयगुणकेनेति। भिद्येत हि तथा वाक्यम्।

ननु द्वे एवैते वाक्ये प्रत्यक्षमुपलभामहे स्वाराज्यकामो यजेतेत्येतदेकं प्रत्यक्षं पदद्वयम्। यजेत वाजपेयेनेत्येतदपि प्रत्यक्षमेव। नैतदेवम्। एवं सति चत्वारि पदान्युपलभेमहि, त्रीणि चैतान्युपलभ्यन्ते।

उच्यते यजेतेत्येतदुभाभ्यां सम्भन्त्स्यते। कथं सकृदुच्चारितं सम्बन्धमुभाभ्यामेष्यतीति[1]? रूपाभेदात्। ईदृशमेवास्य रूपं स्वाराज्यकामेन सम्बध्यमानस्य ईदृशमेव वाजपेयेन। अतस्तन्त्रेणोभाभ्यां सम्भन्त्स्यत इति। नैतदस्तीदृशेनैव रूपेणेति। यद्यज्ञातः ततो विधिः। यदि ज्ञातः ततोऽनुवादः। न च ज्ञातोऽज्ञातश्च युगपत्सम्भवतीति[2]।

आह—यदिदमुक्तं गुणविधिपक्षेऽनुवादो यजेतेति। यद्ययमनुवादः केनेदानीं गुणो विधीयते। वाजपेयशब्देनेति मा वोचः। न ह्याख्यातमन्तरेण, कृत्यं वा, नामशब्दार्थव्यापारो[3] विधीयते। यश्चात्राऽऽख्यातशब्दो यजेतेति, सोऽनुवाद इत्युक्तम्। केनेदानीं तस्य व्यापारो विधीयते? अतः स्वाराज्यकामम्, गुणं च प्रति यजेतेति विधिः। तस्मादुभाभ्यां सम्बध्यत इति। यद्युभयत्र विधिः, वाजपेयो न स्वाराज्यकामस्य यागेन सम्बध्येत। द्वे ह्येते तदा वाक्ये। न स्वाराज्यकामस्य यागेन सह गुणविधेरेकवाक्यता। प्रकरणात् सम्बन्धः स्वाराज्यकामस्य यागेनेति चेत्? वाक्येन यागमात्रे विधानात्। अस्तु यागमात्रेण सम्बन्ध इति चेत् न स्वाराज्यकामस्य[4] यागेन सहैकवाक्यताया गम्यमानत्वात्। तदेवं प्रकरणस्य[5] चाबाधो युज्यते, यदि कर्मनामधेयम्। गुणविधिपक्षे

---

१. ब. सम्बन्धमेष्यतीति। २. ब. सम्भवतीति।
३. क. शब्दार्थस्य। ४. ब. स्वाराज्य—कामेन सहैकवाक्यताया।
५. क. प्रकरणस्यवाक्यस्य च बाधो।

हि सर्वे इमे वाक्यभेदादयो दोषाः प्रादुर्भवेयुः । तस्मात्कर्मनामधेयं वाजपेयशब्द इति सिद्धम् ॥ ८ ॥ सिद्धान्ते युक्तिः ।

इति पञ्चमं वाजपेयाधिकरणम् ।

भा० वि०—पूर्वसूत्रस्थनञ्पदानुषङ्गेण व्याचष्टे - **यदिति** । यदिगुणविशिष्ट-कर्मविधिः स्यात्, ततो यागस्य स्वार्थवद्विधानार्थवद्विधेयत्वेनोपादेयत्वेन गुणत्वेन वाभिहितस्य, परार्थवद्गुणविधानार्थवदनुवाद्यत्वेनोद्देश्यत्वेन प्राधान्येन वाभि-धानं प्रसज्येत । तच्च यजेतेत्यस्य शब्दस्यैकत्वाद्विप्रतिषिध्येत इत्यर्थः । अत्र विप्रतिषिध्येतत्यनेनानुषक्तं नञ् पदं व्याख्यातम् । यजेतेत्यस्येत्यनेनैकशब्द्य इति च स्वार्थपदेन सौत्रपरार्थशब्दस्योपलक्षणत्वं च दर्शितमिति विवेकः । विप्रतिषेधं विवृणोति—**यदीति** । स्वार्थमित्येतद्व्याख्यातुं स्वाराज्यकामस्येत्यादिविधिस्वरूपं दर्शितम् । स्वाराज्येति परार्थमित्येतद्विवृतम् । वाजपेयेनेति अनुवादस्वरूपं दर्शितम् । यागेनेतिफलं प्रतिविधेयतयोक्तस्य यागस्य गुणविधानायानुवाद्यत्वम-युक्तमित्यर्थः ।

ननु विधेयादिरूपस्य यागस्यानुवाद्यादिरूपमपि किं न स्यात् ? अत आह—**भिद्येत हीति** । सकृदुच्चरितस्य विरुद्धानेकरूपाभिधानायोगाद्यदा गुणसम्बन्धः तदोद्दिश्यमानादिरूपमभिधेयम्, यदा फलसम्बन्धः, तदोपादीयमानादिरूपमित्या-ख्यातावृत्त्या द्वे वाक्ये कल्पनीये स्यातामित्यर्थः । तन्त्रेणाख्यातपदस्योभाभ्यां सम्बन्धे वाक्यार्थभेदाद्वाक्यभेदोऽपि स्यादिति चोदयति—**ननु चेति**[1] । आख्या-तार्थस्य करणत्वे फलेनैव सम्बन्धः । कर्मत्वे गुणेनैवेति आख्याततन्त्रत्वाभावात् वाक्यार्थभेदेन वाक्यभेद इति परिहरति—**नैतदिति** । यजेतेति विभक्त्यश्रवणात् कर्मकरणत्वनिरपेक्षस्वरूपमात्रेण धात्वर्थस्य धातुनाभिहितस्य तन्त्रेण गुणफलाभ्यां सम्बन्धो भविष्यतीत्यभिप्रेत्य चोदयति—**उच्यत इति** । इममेवाभिप्रायं विवरी-प्रश्नः—**कथमिति** । सकृदुच्चरितस्य कर्मकरणत्वयोरन्यतरार्थत्वादित्यभिसन्धिः चोदकः स्वाभिप्रायं विवृणोति—**रूपाभेदादिति** । तमेवाह—**ईदृशमिति** । कर्मत्व-करणत्वरहितस्य धात्वर्थस्य कारकरूपं विना क्रियारूपभावनान्वयायोगात् कारकरूपेणैव धात्वर्थोऽभिधातव्यः । ततश्च न धात्वर्थः स्वरूपमात्रेणोभाभ्यां सम्बध्यत इति परिहरति—**नैतदस्तीति** । इतश्चैकेनैव रूपेणेत्युक्तमित्याह—**यद्यज्ञात इति** । विधेयस्य फलेनैव सम्बन्धः । अनुवाद्यस्य गुणेनैवेति वैरूप्यापत्ति-रिति भावः । न च धात्वर्थस्य ज्ञाताज्ञातसाधारणं रूपं सम्भवति, यदुभाभ्यां सम्बध्येतेत्यत आह—**न हीति**[2] । वैरूप्यपरिहाराय गुणविधावप्याख्यातार्थस्य

१. चकारापाठो भाष्ये नास्ति । २. न चेति भा० पा० ।

विधेयत्वं चोदयति—**आहेति**। यदिदमुक्तं त्वया तत्र यद्याख्यातमनुवादः, तेन गुणो विधीयत इत्यर्थः।

ननु वाजपेयपदेनैवेति तत्राह—**वाजपेयेति**। आख्यातशब्दं कृत्यं वान्तरेणेति सम्बन्धः। ननु वाजपेयशब्दस्याख्यातादिवत् प्रवर्तनाभिधायित्वाभावेऽपि विधेयसमर्पकतया विधायकत्वं भविष्यतीत्याशङ्क्य नामशब्दार्थस्येत्युक्तम्। व्यापारो हि विधेयः; न च नामशब्दो व्यापार इत्यर्थः।

नन्वाख्यातपदवाच्यव्यापारद्वारा नामशब्दार्थस्य विधेयत्वेन वैरूप्याभावाद् युक्ता तन्त्रतेत्याह—**तस्मादिति**। परिहरति—**यदीति**। यदि फलसम्बन्धे गुणसम्बन्धे च यजेतेति विधिः, तदा स्वाराज्यकामस्य यागो वाजपेयेन गुणेन न सम्बद्ध्येत, कुत इत्यत आह—**द्वे ह्येते इति**। आख्यातार्थस्य गुणफले प्रति प्राधान्याभावेन गुणत्वापत्तेः। प्रत्येकं परिसमाप्त्या वाक्यभेदेन स्वाराज्यकामवाक्येन गुणविधेरेकवाक्यताभावादित्यर्थः। ननु यथा व्रीहिविधेर्दर्शपूर्णमासविध्येकवाक्यत्वाभावेऽपि प्रकरणाद् व्रीहीणां दर्शपूर्णमासाभ्यामेव सम्बन्धः। तथा वाजपेयस्य स्वाराज्यकामयागेन सम्बन्धो भविष्यतीति चोदयति—**प्रकरणादिति**। वैषम्यप्रदर्शनेन परिहरति—**नेति**। तन्त्रसम्बन्धे हि केवलस्यैव यागस्य गुणफलाभ्यां सम्बन्धो वक्तव्यः। तत्र च वाक्येन गुणो विधीयमानो यागमात्रे विधीयेतेति, स्वाराज्यकामयागप्रकरणाभवान्न तेन तत्सम्बन्ध इत्यर्थः। तर्हि वाक्येन यागमात्रसम्बन्धात् स्वाराज्यकामयागेन न सम्बध्येत तदिष्टापादनमिति चोदयति—**क....ति/प्रतीति**। विरोधेन परिहरति—**नेति**। यदि तन्त्रसम्बन्धेन गुणविधानोपगमे प्रतीयमानस्यैकवाक्यत्वस्य प्रकरणस्य च बाधः, कथं तर्हि तत्परिहारः? तत्राह—**तदेवमिति**।

वाक्यभेदादय इति। यागस्य फलं प्रति विधेयत्वे गुणं प्रत्युद्देश्यत्वे च वैरूप्यापत्त्या वाक्यभेदः, स्वरूपेणोभयसम्बन्धे यागमात्रे गुणविधानाद्वाक्यभेदः, प्रकरणभेदश्च। गुणविधावैष्टिकविध्यन्तप्राप्त्या सौमिकदीक्षादिदर्शनानुपपत्तिश्चेत्यादय इत्यर्थः। अधिकरणार्थमुपसंहरति—**तस्मादिति** ॥ ८ ॥

इति वाजपेयाधिकरणम्।

त० वा०—द्विधा हि तन्त्रं भवति प्रत्येकं वा समुदाये वा वाक्यपरिसमाप्त्यावाख्यातगुणत्वप्राधान्यापेक्षया। तदिह द्रव्यं यागे[1] विधीयते, न फलम्, अफलत्वप्रसङ्गात्। उद्दिश्यमानं हि सर्वत्र फलं भवति। तच्चेतिकर्यां प्रत्युपादीयेत, अङ्गमेव स्यात्। यागोऽपि फलं प्रत्युपादातुं शक्यते, न द्रव्यं प्रति, तत्संस्कारत्वप्रसङ्गात्

१ क. त्यागे।

तृतीयानिर्देशबाधाच्च। न च यागसंस्कृतस्य द्रव्यस्यान्यत्रोपयोगो विद्यते, येनैवमाश्रीयेत।

एतेन यागफलयोर्द्रव्यं प्रत्युपादानं प्रत्युक्तम्। न च फले यागद्रव्ययोरुपादानम्। एकेन निराकाङ्क्षे फले, अन्यस्याविधानात्। यथा वक्ष्यति 'यदेकस्माद् पूर्वम्, तदेतरत्तदर्थम्' इति। न च द्रव्योपसर्जनो यागः फले विधीयते, मत्वर्थलक्षणादिप्रसङ्गात्। तत्रैतदेवाऽऽपतति यागेन फलम्, यागं च द्रव्येणेति। ततश्च फलेनोपादेयविधेयगुणभूतयागग्रहणाद् गुणेन चोद्देश्यानूद्यप्रधानभूतापेक्षणात्तन्त्रत्वाभावः, एकमार्गाश्रयणेऽन्यतरस्यासम्बन्धात्। तत्र युगपदाश्रयणे वाक्यभेदात्। अवश्यं हि यत्रोद्दिश्यमानादिरूपम्, यत्र चोपादीयमानाद्यात्मकता। तत्र यागस्यैते द्वे वाक्ये कल्पनीये।

ननु द्वे एवैते इति तन्त्रपदमभितो दर्शयन् ब्रवीति—**चत्वारि पदान्युपलभेमहीति।** अतुल्यार्थत्वादतन्त्रत्वाभिप्रायेण। परस्य तु शब्दरूपाभेदात्साधारण्याभिमानः। **नैतदस्तीति**—कार्यप्राधान्याच्छब्दरूपस्य तद्गतवैरूप्याद् भेदापत्तिः।

आह यदिदमुक्तमिति—वैरूप्यं परिहरति। गुणविध्यंशेऽपि ह्यवश्यमाख्यातं विधिरूपमेवाभ्युपगन्तव्यम्। वाजपेयपदस्यानाख्यातत्वेनाविधायकत्वात्। **यद्युभयत्र विधिरिति**–द्रव्यसंस्कार्यत्वप्रसङ्गमनादृत्याऽऽख्यातगुणभावकृतप्रत्येकवाक्यपरिसमाप्तिनिमित्तपरम्परासम्बन्धोपन्यासः। प्रकरणानुरोधात् 'व्रीहिभिर्यजेत' इत्यादिवद्व्यवस्थेति चेत्? न। **वाक्येन यागमात्रे विधानादिति**[1]—तन्त्रसम्बन्धे हि परस्परनिरपेक्षयोर्यागेन सम्बन्धः एकविशेषितेतरसम्बन्धे वाक्यभेदप्रसङ्गात्। तत्रानिष्पन्ने स्वाराज्ययागप्रकरणे गुणो विधीयमानः शुद्धयजतिसम्बन्धात्सार्वत्रिकः पूर्वयागसम्बन्धो वा विज्ञायते। दर्शपूर्णमासादिवाक्यैस्तु निष्पादिते प्रकरणे विधीयमाना व्रीह्यादयोऽवतिष्ठन्त इति वैषम्यम्। तेन स्वाराज्यकामैर्यागैकवाक्यता गम्यमाना नोत्सृष्टा भविष्यतीति, नामधेयता॥ ८॥

इति पञ्चमं वाजपेयाधिकरणम्॥ ६॥

न्या० सु०—भाष्यकृता यदि गुणविशिष्टकर्मविधिः स्यात्' ततः स्वार्थवत्परार्थवच्चाभिधानं प्रसज्येत। तच्च यजेतेत्यस्य शब्दस्यैकत्वाद्विप्रतिषिद्धमेतेति वदता गुणविशिष्टकर्मविधौ स्वार्थवत् स्वविधानार्थत्वदपूर्वविधित्वेनोपादेयत्वेन, गुणत्वेन, चाभिहितस्य यागस्य परार्थवत्, गुणविधानार्थवत् प्राप्तानुवादत्वेनोद्देश्यत्वेन प्राधान्येन च अभिधान

1 क. ऽभिधानेति पा० पुस्तकान्तरे (टिप्पण्यां)।

मेकशब्दे सकृदुच्चरिते धातोर्न युक्तमिति पूर्वसूत्रगतस्य नञः काकाक्षिवदिहाप्यन्वयमङ्गीकृत्य विप्रतिषेधशब्देन नञर्थव्याख्यानात् सूत्रं योजितम् ।

तत्र गुणप्रधानत्वाद्यनपेक्षस्वरूपमात्रेण धातुनोक्तस्य यागस्य पश्चाद्गुणप्रधानत्वादिरूपापत्तावपि विधीयमानावस्थायामैकरूप्येण तन्त्रसम्बन्धोपपत्तेरुक्तत्वाद्विप्रतिषेधासम्भवमाशङ्क्याह—**तन्त्रत्वमिति** । अयमाशयः धात्वर्थस्याक्रियारूपत्वात् कर्मकारकेण तत्फलेन, करणकारकेण च गुणेन सह साक्षात् सम्बन्धायोगात् भावनाद्वारा ताभ्यां सम्बन्धो वाच्यः । न चाकारकरूपस्य क्रियारूपया भावनयान्वयः सम्भवतीति-भावनान्वयायावश्यं कारकरूपता धात्वर्थस्याभ्युपगन्तव्या । अशाब्देन च कारकत्वेन शाब्दे व्यवहारे अन्वयायोगात् कारकत्वरूपेणैव धात्वर्थो भावनान्वयार्थं धातुनाभिधातव्यः तत्र कर्मत्वेनाभिधाने फलसम्बन्धायोगात्, करणत्वेन चाभिधाने गुणसम्बन्धायोगात्, तन्त्रसम्बन्धायोगात्तन्त्रसम्बन्धानुपपत्तिरिति योज्यम् । चैवं यदि यः फलस्य साधनाकाङ्क्षापूरणलक्षणो धात्वर्थसम्बन्धेनोपकारः क्रियते, स एव गुणस्यापि, यो वा गुणस्य साध्याकाङ्क्षापूरणलक्षणः, स एव फलस्यापि, ततो वैरूप्याभावात् तन्त्रत्वं युक्तम् । तदभावे त्विहावृत्तेरुभयसम्बन्धो लक्षणद्योतको भवतीति ।

नन्वृत्विजो वृणीते ग्रहं सम्मार्ष्टीत्यादौ उपकारतुल्यत्वेऽपि प्रत्येकं वाक्यपरिसमाप्तेरावृत्तिप्रसङ्गात् तन्त्रत्वं नास्तीत्याशङ्क्याह—**द्वेधा हीति** । सकृदुक्तस्यापि वरणसम्मार्गादेः सभामध्यस्थप्रदीपवत् प्रत्येकमुपकारकत्वेनान्वयोपपत्तेर्नाख्यातावृत्तिस्तत्र कल्प्येत्याशयः । एवं 'तर्ह्यरुणया पिङ्गाक्ष्यैकहायन्येति' क्रयवदृत्विगादिसमुदायेऽपि वाक्यपरिसमाप्तिः कस्मान्नेष्टेत्याशङ्क्याह—**आख्यातगुणत्वेति** । आख्यातेन च स्वार्थस्य गुणत्वप्राधान्यरूपेणानभिधाने प्रधानभूतेनर्त्विगादिना गुणभूतेन चारुणादिनाऽन्वयायोगात् गुणत्वप्राधान्यरूपेण स्वार्थाभिधानद्योतनाय, आख्यातस्य गुणप्रधानतार्थगतोपचारेणोक्ता गुणभूतेन चरणादिना प्रधानभूतानामृत्विगादीनां समुदायीकर्त्तुमशक्यत्वात् आख्याततन्त्रत्वेऽपि प्रत्येकं वाक्यसमाप्तिरङ्गीकार्येत्याशयः । पूर्वसूत्रगतानुषक्तनञभिहितविप्रतिषेधविवरणार्थेन यदीति भाष्येण फलं प्रति विधेयतयोक्तस्य यागस्य गुणविधानायानुवाद्यतयाऽभिधानं न युक्तम्, तत्रोत्पत्तिविधिव्यापारपूर्वकत्वेनेतरविधिव्यापाराणां द्रव्यवत्फलस्याप्यनुत्पन्नया क्रिययान्वयायोगात्, उत्पन्नायाश्च विधानायोगात् पूर्वं फलसम्बन्धेऽपि तद्विधानार्थं यागस्यानुवाद्यत्वाद्विप्रतिषेधानुपपत्तिमाशङ्क्याह—**नविहेति** । ततश्च न फलसम्बन्धे यागस्यानुवाद्यतेत्याशयः । कथं विधेयत्वस्य फलत्वाभावापादकतेत्याशङ्क्याह—**उद्दिश्यमानं हीति** । 'यमर्थमधिकृत्य प्रवर्त्तन्ते तत्प्रयोजनमि'ति नैयायिकोक्तलक्षणानुसारात् कृत्युद्देश्यप्रयोजनस्य फलत्वप्रसिद्धेर्विधेयत्वं च यागमनुतिष्ठता स्वाराज्यं कामयितव्यमित्युपादेयत्वापत्तेः । कृत्युद्देश्यत्वाभावात्फलत्वं न स्यात्, प्रत्युत विधेयत्वादङ्गतैव स्यादित्यर्थः । एवं तर्हि फलसम्बन्धवत्, द्रव्यसम्बन्धे अपि यागस्यैव सन्निकृष्टतया विधेयत्वेनैकरूप्यात् तन्त्रत्वं युक्तमित्याशङ्क्याह—**यागोऽपीति** ।

यद्यपि विधित्वं प्रत्ययोपात्तं न नामपदमृच्छतीत्याघाराग्निहोत्राधिकरणवार्तिकोक्त-न्यायेन सर्वत्र धात्वर्थावच्छिन्ना भावनैन विधेया, तथापि फलं सिद्धवत्कृत्य यथाप्राप्तत्वेन यागो विधीयते, नैवं द्रव्यं सिद्धवत्कृत्याप्राप्तत्वेनासौ विधीयते, निमित्तफल-देश-काल-संस्कार्याणां पञ्चानामेव सिद्धवत्कारोपपत्तेः द्रव्यस्य च देशादिचतुष्टयान्तर्गत्यसम्भवात्पा-रिशेष्यात्संस्कार्यत्वापत्तेः तथा च देशादिचतुष्टयान्तर्गत्यसम्भवात्पारिशेष्यात्संस्कार्यत्वापत्तेः, तथा च सति तृतीयाबाधापत्तिरित्यर्थः। भूतभाव्युपयोगाभावाच्च द्रव्यस्य च संस्कार्यता न युक्तेत्याह—**न चेति**।

एवं यजेः तन्त्रेण फलद्रव्यपदसम्बन्धे पूर्वपक्ष्युक्ते निरस्ते, यदि कश्चिद् द्रव्यपदस्ये-तराभ्यां तन्त्रसम्बन्धं ब्रूयात्, तन्निरासायाह—**एतेनेति**। यागस्य द्रव्यं प्रत्युपादानस्य निरस्तत्वेन, फलस्य च यागं प्रत्युपादानस्य निरासात्, सुतरां द्रव्यं प्रत्यसम्भावनेत्यर्थः। द्रव्यस्यैवंभूतप्रत्युपादेयत्वेनैकरूप्यम्, फलं प्रत्युपादानस्य निराकरिष्यमाणत्वात् न सम्भव-तीत्याशयः। नन्वेवं सति फलस्य सर्वप्राधान्येनैकरूप्यादितराभ्यां तन्त्रसम्बन्धो भविष्य-तीत्याशङ्क्याह—**न चेति**। फलस्य त्वितरे प्रत्युपादानमनाशङ्क्यमेवेत्याशयः।

ननु यथा 'सोमेन यजेतेत्यादौ' यागद्रव्ययोरेकस्यां भावनायामुपादानमिष्यते, तथा फलेऽपि किं न स्यादित्याशङ्क्याह—**एकेनेति**। भावनायाः साध्यसाधनेतिकर्त्तव्यता-रूपांशत्रयाकाङ्क्षत्वात् साधनाकाङ्क्षायां धात्वर्थान्वयनिवृत्तायामपि, इतिकर्त्तव्यता-काङ्क्षायां द्रव्येणाप्यन्वयो युक्तः। फलस्य तु साधनप्रतियोगिकसाध्यत्वसिद्ध्यर्थं साधन-मात्रकाङ्क्षत्वात् एकेन साधनेन नैराकाङ्क्ष्ये कृते, अन्यस्य तदुद्देशेनाऽविधानात् न तादर्थ्येनापाद्यता युक्तेत्याशयः। ननु द्रव्यमप्यप्राप्तत्वादवश्यविधेयम्, तस्य फलार्थत्वाभावे कैमर्थ्येन विधिः स्यादित्याशङ्क्याह—**यथेति**। प्रतिपदाधिकरणभाष्योक्तन्यायेन यागार्थं द्रव्यं भविष्यतीत्यर्थः। नन्वेवमपि द्रव्येण विशेष्यमाणस्यैव यागस्य फले विधानात् तन्त्रसम्बन्धाविरोध इत्याशङ्क्याह—**न चेति**। फलसाधनतया विधीयमानस्य यागस्य तृतीयानिर्दिष्टेन द्रव्येण मत्वर्थलक्षणानां विना विशेष्टुमशक्यत्वादिति भावः। मत्वर्थ-लक्षणापरिहारार्थं तु फले यागविधाने, यागे च द्रव्यविधाने चाभ्युपगम्यमाने वैरूप्यम-परिहार्यमित्याह—**तत्रेति**। नन्वर्थाद्यागस्य फलसम्बन्धे साधनत्वापत्तौ, द्रव्यसम्बन्धे च साध्यत्वापत्तावपि धातुना स्वरूपेणाऽभिधानान्न वैरूप्यापत्तिरित्याशङ्कां निराकर्तुं तन्त्रसम्बन्धासम्भवमुपसंहरति—**ततश्चेति**। भावनान्वयनिरपेक्षस्य यागस्य विधातुम-शक्यत्वात्, अविधीयमानस्य च भावनान्वयद्वारा फलाद्यन्वयायोगाद्विधीयमाना-वस्थायामेव साधनरूपताऽभ्युपगन्तव्या। न चाशाब्देन साध्यसाधनत्वरूपेण शाब्दे व्यवहारेऽन्वयः सम्भवतीति, शब्देनैव साध्यसाधनरूपताऽभिधातव्येत्यपरिहार्यं वैरूप्य-मित्याशयः। साध्यसाधनरूपाभिधानस्य त्रिविधवैरूप्यापादकत्वप्रदर्शनायोपादेयेत्युक्तम्। साध्यस्य तावत्प्रयोजनत्वात् प्राधान्यम्। साधनस्य च साध्यसिद्ध्यर्थत्वेन पारार्थ्यात् शेषत्वापरपर्यायं गुणत्वं प्रसिद्धमेव। प्राधान्यस्य च कृत्युद्देश्यं विनानुपपत्तेरुद्देश्यत्वा-

पादकत्वम्। अप्राप्तस्य चोद्देष्टुमशक्यत्वात् प्राप्तानुकीर्तनरूपानुवादापादकत्वम्। एवं शेषत्वस्य शेषिपारतन्त्र्यरूपत्वात् पारतन्त्र्यापाद्यत्वलक्षणोपादेयत्वापादकत्वम्। उपादेयत्वस्य विध्यधीनत्वात् विधेयत्वापादकत्वमिति विरुद्धत्रिकद्वयापत्तिः। देशकालयोर्विधेयगुणभावेऽप्युपादेयत्वाभावात् प्राधान्यानुवाद्यत्वाभावेऽपि चोद्देश्यत्वाभ्युपगमात् कथं गुणत्वस्योपादेयत्वापादकत्वमुद्देश्यत्वस्य चानुवाद्यत्वापादकत्वमित्याशङ्कानिवृत्त्यर्थं यागशब्दः। देशकालयोः स्वभावसिद्धत्वेनानापाद्यत्वात् सिद्धवत् करणरूपमुद्देश्यत्वं प्रधानत्वं स्वाभाविकत्वात्। गुणत्वेऽपि नापनीयते, कर्मणस्तु स्वभावसिद्ध्यभावात् उभयरूपाभिधानसम्भवे[1] प्रतियोग्यन्वयानुरूपविवक्षोपपत्तेर्गुणत्वस्योपादेयत्वापादकत्वम्, सिद्धवत्करणस्य च स्वयम्प्राप्त्यनापादकत्वेऽप्यप्राप्तस्य सिद्धवत्कर्तुमशक्यत्वात् प्राप्त्यपेक्षत्वम् युक्तमेवेत्याशयः।

अत एवोद्देश्यानूद्यप्रधानभूतापेक्षणादित्यपेक्षामात्रमुक्तम्। इह च वदः सुपि क्यप्चेत्यत्र (पा० अ० ३, पा० १ सू० ६) 'गदमदचरयमश्चानुपसर्गे' (३.१.१००) इत्येतत्सूत्रगतानुपसर्गपदानुवृत्त्याऽनुपसर्गे सुबन्ते उपपदे वदतेःक्यप्प्रत्ययान्वाख्यानात् उपसर्गयोगे क्यप्प्रत्ययाभावेन किन्निमित्तसम्प्रसारणाभावात् ऋहलोर्ण्यदिति सामान्यविहितण्यत्प्रत्ययप्राप्तेः प्रवाद्यापवाद्येतिवदनुवाद्येति रूपापत्तेर्नु क्षिप्रं वाद्यं नूद्यमिति क्षिप्रवाचिनि नुशब्दे निपातरूपे सुप्युपपदे वदः क्यपं कृत्वाऽनुवाद्यस्य प्राप्त्यपेक्षत्वेन क्षिप्रोद्यत्वायोगात् नूद्यं न भवतीत्यनूद्यमिति नञ्समासाश्रयणेन रूपसिद्धिः कार्या। ननु यद्यपि फलेनोपादेयत्वादिरूपेण यागो गृह्यते, गुणेन चोद्देश्यत्वादिरूपेण, तथापि एकेन रूपेणाभिधानात्, इतरेण चार्थात्प्रतीतस्योभयसम्बन्धो न निरोत्स्यते इत्याशङ्क्याह— **एकेति**। आभिधानिकं रूपं विना शाब्दे व्यवहारेऽन्वयायोगाद्यागस्यैकरूपाभिधानेऽप्यविशेषादुपादेयत्वादिरूपेणाऽभिधानाश्रयणे गुणस्य यागेनासम्बन्धादुद्देश्यत्वादिसाधारणादिरूपेण फलस्याऽसम्बन्धः तन्त्रत्वाभाव इत्यतीतानुषङ्गेण समापनीयम्। तर्ह्युपादेयोद्देश्यत्वादिसाधारणरूपेणाभिधानादुभयसम्बन्धो भविष्यतीत्याशङ्क्याह—**तत्रेति**। अनेन च भिद्येत हीति भाष्यं व्याख्यातम्। ननु सकृदुच्चरितस्यैवोभयसम्बन्धात् कथं वाक्यभेदापत्तिरित्याशङ्क्याह—**अवश्यं हीति**।

सकृदुच्चरिते चास्मिन् विवक्षैव दृश्यत इति।

अनेन न्यायेन सकृदुच्चरितस्य विरुद्धानेकरूपाभिधानपरत्वायोगात्; यत्र गुणसम्बन्धे यागस्योद्दिश्यमानादिरूपमभिधेयम्, यत्र च फलसम्बन्धे यागस्योपादीयमानाद्यात्मकता अभिधेया, तत्राख्यातपदावृत्त्या 'स्वाराज्यकामो यजेत' वाजपेयेन यजेतेति द्वे वाक्ये कल्पनीये स्यातामित्यर्थः। भावनायाः सर्वत्रैकरूप्यात्, तन्त्रेणानेकसम्बन्धसम्भवेऽपि भावनासम्बन्धोत्तरकाले धात्वर्थस्य कारकसम्बन्धालोचनकाले वैरूप्यापत्तिरिति सूच-

१. सिद्धसाध्यरूपेत्यर्थः।

यितुम्—**यागस्येत्युक्तम्** । नन्वित्याशङ्काभाष्यमाख्यातैक्येनैकवाक्यतायाः स्पष्टत्वादयुक्त-माशङ्क्य व्याचष्टे—**ननु चेति** । तन्त्रेणाख्यातस्योभयसम्बन्धाद्वाक्यार्थद्वित्वेन वाक्य-द्वित्वाभिधानमित्यर्थः नैतदेवमिति परिहारभाष्यमाख्यातद्वयाभावेऽपि तन्त्रसम्बन्धोपपत्तेः । पदचतुष्टयाप्रसङ्गादयुक्तमाशङ्क्याह—**चत्वारीति** । उच्यत इत्याशङ्काभिप्रायविवरणार्थं भाष्यं व्याचष्टे—**परस्य त्विति** । विभक्त्यभावात्कर्मकरणत्वनिरपेक्षस्वरूपमात्रेण धात्वर्थस्य धातुनाऽभिधानादित्याशयः । कारकरूपाभिधानं विना क्रियारूपया भावनया सह अन्वयायोगात्कारकरूपेणैव धात्वर्थोऽभिधातव्यः । ततश्च धात्वर्थाभिधानलक्षणकार्य-प्राधान्यात्कार्यगतकर्मकरणत्वाभिधानवैरूप्याद्यागं यागेनेति शब्दरूपस्य भेदापत्तिरिति परिहाराभिप्रायविवरणार्थं नैतदस्तीति भाष्यं व्याचष्टे— **नैतदस्तीति** । यद्यपि विभक्त्य-भावाद्धातोः स्वतो रूपभेदो नास्ति, तथापि यद्यप्राप्तौ धात्वर्थः ततो धातुविधिः, प्राप्ते त्वनुवाद इति विध्यनुवादरूपत्वात् अर्थतो रूपभेदः प्रसज्येतेति भाष्यार्थः । विधिशब्देनो-पादानगुणत्वे, अनुवादशब्देन चोद्देश्यत्वप्राधान्येऽप्युपलक्षिते, वाजपेयेन गुणेन सम्बन्धं परार्थमनूद्येतेत्यनेन यद्गुणसम्बन्धे धात्वर्थस्यानुवाद्यत्वं वैरूप्यापादनायोक्तम्, तदाक्षेपार्थ-माहेति भाष्यं व्याचष्टे—**आहेति** ।

ननु वाजपेयशब्दस्याख्यातकृत्यवत्प्रवर्त्तनानभिधायित्वेऽपि विधेयसमर्पकत्वाद्विधाय-कत्वं भविष्यतीत्याशङ्क्य, भाष्यकृता नामशब्दार्थेत्युक्तम् । व्यापार एव साक्षाद्विधेयः । न च नामशब्दस्यार्थो व्यापार इत्यर्थः । नन्वाख्यातशब्दार्थव्यापारद्वारा नामशब्दार्थस्य विधेयत्वं भविष्यतीत्याशङ्क्य, यश्चात्रेत्युक्तं पूर्वापरीभूतानिष्पन्नरूपत्वात् धात्वर्थ एव व्यापारः, धातोश्चानुवाद्यत्वसमर्पकत्वस्य त्वयोक्तत्वात् तस्यार्थो व्यापारो न विधातुं शक्यत इत्याशयः । अतः फलसम्बन्धवद् गुणसम्बन्धोऽप्याख्यातस्य विधिरूपत्वात् न वैरूप्यापत्तिरिति तात्पर्यार्थः ।

यदीति समाधानभाष्यस्यायमाशयः धात्वर्थानुवादेऽपि प्रत्ययार्थस्य भावनायाः सर्वकारकानुरञ्जनसहत्वात् फलविशिष्टत्ववद् गुणविशिष्टतयाऽप्यैकरूप्येण विधानात्तद्द्वारा नामशब्दार्थस्यापि विधानोपपत्तेर्न विध्यभावदोषापत्तिः । यदि तु भावनातिरस्कारेण साक्षाद् धात्वर्थस्यैव फलवद् गुणविधिरिष्यते, ततस्तस्य व्यापारात्मकत्वेऽप्यन्योत्पादा-नुकूलस्वभावत्वाभावेनाऽक्रियारूपस्यैकरूप्येणातुल्यरूपानेककारकानुरञ्जनासहत्वात् फलं प्रति गुणभूतस्य, गुणं प्रति प्राधान्यायोगेनोभयं प्रति गुणत्वापत्तेः प्रत्येकं वाक्यपरिसमाप्ति-प्रसङ्गात् फलगुणयोः परस्परानन्वयः स्यादिति । तत्र वाजपेयाख्यद्रव्यं प्रति यागस्य गुणत्वे, द्रव्यस्य यागसंस्कार्यत्वापत्तेस्तृतीयानुपपत्तिदोषः कस्मान्नोक्त इत्याशङ्क्याह—**यदीति** । स्पष्टताऽनादरकारणमित्याशयः ।

ननु यथा व्रीहिविधेर्दर्शपूर्णमासविध्येकत्वाभावेऽपि प्रकरणेन दर्शपूर्णमासयोरेव व्रीहीणामवरोधात् व्यवस्था, तथा वाजपेयस्यापि स्वाराज्यकामयाग एव प्रकरणेनाऽ-वरोधात् व्यवस्था भविष्यतीत्याशङ्कार्थं प्रकरणादिति भाष्यं व्याचष्टे— **प्रकरणेति** ।

नेति परिहारभाष्यमपूर्वसाधनांशलक्षणार्थं वाक्यस्य प्रकरणापेक्षित्वादविरोधोपपत्तेरयुक्त-माशङ्क्य व्याचष्टे **नेति**। यद्वाजपेयेन यजेत, तत् स्वाराज्यकामः, यत् स्वाराज्यकामो यजेत, तद्वाजपेयेनेति चैर्कविशेषितेन यागेनेतरस्य सम्बन्धे ज्ञातवद्विशेषणत्वेनोपादानात्, अज्ञातवच्च विधानाद्वैरूप्यलक्षणवाक्यभेदापत्तेस्तन्त्रसम्बन्धे परस्परानपेक्षेति भाष्यतात्पर्य-व्याख्या। तत्रैवं परस्परनैरपेक्ष्ये सति गुणो विधीयमानः सार्वत्रिकः, अपूर्वयागसम्बन्धो वेति मात्रशब्दस्य द्वेधा व्याख्या। प्रकरणानिष्पत्तेः शुद्धयजिसम्बन्धादित्याशङ्का परिहारः। अस्त्वित्याशङ्काभाष्यं स्पष्टत्वादव्याख्याय नेत्यादिपरिहारान्तरभाष्यं व्याचष्टे—**तेनेति** ॥ ८ ॥

इति पञ्चमं वाजपेयाधिकरणम्।

भा० प्र०—पूर्वोक्त प्रसङ्ग में पूर्वपक्ष में अर्थात् गुणविधि मानने पर यह भी दोष है कि प्रकृत में गुण का विधान किया गया है—यह मानने पर विध्यनुवाद रूप दोष प्राप्त होगा। जो एक ही समय में विधीयमान एवं अनूद्यमान होता है, ऐसी स्थिति में परस्पर विरुद्ध विधि और अनुवाद की एक साथ प्रवृत्ति होने पर **विध्यनुवाद** दोष होता है, विध्यनुवाद को दोष मानने का यह हेतु है कि विधि एवं अनुवाद के धर्म परस्पर विरुद्ध हैं, जो विधीयमान होता है, उसमें उपादेयत्व, विधेयत्व एवं गुणत्व—ये तीन धर्म रहते हैं, जिसका अनुवाद किया जाता है उसमें उद्देश्यत्व, अनुवाद्यत्व एवं प्रधानत्व ये तीन धर्म रहते हैं। विधेय में रहने वाले उपादेयत्व, विधेयत्व और गुणत्व ये तीन धर्म एवं उद्देश्य में रहने वाले उद्देश्यत्व, अनुवाद्यत्व और मुख्यत्व (प्रधानत्व), ये तीन परस्पर विरुद्ध धर्म होने से एक ही धर्मी में इनका एक साथ समावेश नहीं हो सकता है, इसलिए जो जिस समय विधेय होगा वह उसी समय अनुवाद अर्थात् उद्देश्य नहीं हो सकता है, इस कारण से होने वाले दोष विध्यनुवाद दोष है।

प्रकृत स्थल में "वाजपेयेन यजेत" इस वाक्य में यजेत इस पद के द्वारा यदि वाजपेय रूप गुण का विधान होगा तो विधि प्रत्यय पदार्थ का विधान करेगा, क्योंकि 'यजेत' यह पद यज् धातु एवं 'इत' प्रत्यय से निष्पन्न होने से 'इत' प्रत्यय के द्वारा जो विधि की अवगति होती है, यज् धातु का स्वार्थ है, क्योंकि, 'यज्' धातु एवं 'इत' प्रत्यय दोनों मिलकर एक पद होता है। 'वाजपेयेन' यह शब्द 'इत' प्रत्यय का स्वार्थ नहीं है, किन्तु परार्थ है, अर्थात् स्व से अतिरिक्त पद का अर्थ है, स्वार्थ के साथ पहले सम्बन्ध होने से इत प्रत्यय रूप आख्यात के द्वारा प्रथम स्वार्थ यज् धातु का अर्थ याग है, उसी का विधान होगा, धातु का अर्थ अन्य की विधि से पूर्व में प्राप्त अर्थात् विहित होता है, विहित का पुनः विधान नहीं हो सकता है, अतः विधि प्रत्यय अपना स्वार्थ छोड़कर अन्य पदार्थ का विधान नहीं करता है। 'वाजपेयेन यजेत' इस स्थल में स्वार्थ अर्थात् यज् धातु का अर्थ जो याग वह अन्य वचन के द्वारा प्राप्त अर्थात्

विहित नहीं होने से उसको छोड़कर परार्थ अर्थात् अन्य पद का अर्थ जो वाजपेय रूप गुण है, उसका विधान नहीं हो सकता है। अतः, विधि प्रत्यय के द्वारा परार्थ विधान के समान स्वार्थ का भी विधान किया जाता है – यह मानना पड़ेगा। ऐसी स्थिति में धात्वर्थ याग एक ही समय में विधेय एवं अनुवाद्य हो सकता है। क्योंकि, परार्थ का विधान करने पर धात्वर्थ का अनुवाद करना होगा। ऐसी स्थिति में विध्यनुवाद दोष होगा। इसी विषय को दूसरे शब्दों में विरुद्धत्रिकद्वय समावेश कहा जाता है। कारण, जिस समय याग का विधान किया जाता है, तब फल उद्देश्य होता है। अतः, स्वाराज्य रूप फल के उद्देश्य में याग उपादेय अर्थात् ग्राह्य होता है, फल का अनुवाद कर याग विधीयमान अर्थात् विधेय होता है, फल मुख्य या प्रधान और याग गुण अर्थात् गौण या उपसर्जन अर्थात् अप्रधान होता है। गुण का विधान करने पर याग के उद्देश्य में वाजपेय रूप गुण उपादेय अर्थात् ग्रहणीय होने से याग उद्देश्य, याग का अनुवाद कर फल विधीयमान अर्थात् विधेय होने से याग अनुवाद्य एवं याग मुख्य या प्रधान और वाजपेय गुण अर्थात् गौण या अप्रधान होता है। अत एव तन्त्र के अधीन यज् धातु को कर्म और करण दोनों के साथ सम्बन्ध युक्त मानने पर परस्पर विरुद्ध त्रिकद्वय का एक स्थान में समावेश होने से यह पक्ष समीचीन है। साथ ही तन्त्र को त्याग कर गुणविधि स्वीकार करने पर वाक्यभेद दोष होगा, कारण, "वाजपेयद्रव्येण यागं भावयेत्" वाजपेय रूप द्रव्य से याग करे, एवं "यागेन स्वाराज्यं भावयेत्" याग के द्वारा स्वाराज्य रूप फल का उत्पादन करे इस प्रकार दो वाक्य को स्वीकार किया गया है, ऐसा मानने पर वाक्यभेद दोष होगा, क्योंकि, "वाजपेय द्रव्येण यागं भावयेत्" वाजपेय रूप द्रव्य के द्वारा याग करे एवं 'यागेन स्वाराज्यं भावयेत्' याग के द्वारा स्वाराज्य रूप फल उत्पादन करे, इस प्रकार दो वाक्य स्वीकार कर दो विधियाँ मानी गई हैं। किन्तु श्रुति में दो वाक्य नहीं हैं, 'वाजपेयेन स्वाराज्यकामो यजेत' यही एक वाक्य है। अत एव 'वाजपेयेन' के द्वारा गुण का विधान नहीं किया है, किन्तु, यह भी 'तत्प्रख्य' न्याय से अग्निहोत्र शब्द के समान कर्म का नामधेय है। वाज अर्थात् अन्न रूप पेय द्रव्य जिस यज्ञ में है, वह वाजपेय है, इस प्रकार यौगिक अर्थ के अनुसार 'वाजपेय' शब्द को कर्म का नामधेय माना है।

वाजपेय शब्द का विवरण करते हुए सायण दो निर्वचन प्रस्तुत करते हैं। वाज अर्थात् देव का अन्न रूप सोम पान योग्य है जिस याग में वह वाजपेय याग है और दूसरा निर्वचन है, देवगण वाज = फल रूप अन्न प्राप्त करने की इच्छा करते हैं, अतः अन्न रूप वाज प्राप्य है जिससे = वह वाजपेय है[1]। इन दो प्रवृत्तिनिमित्त के

---

१. वाजः देवान्नरूपः सोमः पेयो यस्मिन् यागे स वाजपेयः, यस्मादेतेन देवाः वाजः फलरूपमन्नं प्राप्तुमैच्छन् तस्मादन्नरूपो वाजः प्राप्यो येन स वाजपेय इति। (सा० मा० १।७।७)।

होने पर भी वाजपेय बहुव्रीहि समास माना गया है, अर्थात् वाजः पेयो यस्मिन् = वाज है पेय जिसमें--वह वाजपेय है। प्रथम पक्ष में पा धातु 'अचो यत्' इस सूत्र से यत् प्रत्यय कर 'ईद्यति' इस सूत्र से ईत्व और गुण कर पेय शब्द निष्पन्न होगा। इसमें "यतोऽनावः" इस सूत्र से आदि उदात्त होता है, बहुव्रीहि करने पर वाजशब्द से आदि उदात्त से 'बहुव्रीहौ प्रकृत्या पूर्वपदम्' इस सूत्र से पूर्वपद-प्रकृति-स्वर होने से आदि उदात्त होगा। इस पक्ष में सोम ही पेय रूप द्रव्य है। "प्रतिष्ठन्ति सोम-ग्रहैः" इस से प्रकार का विधान "वाजसृद्भ्यस्सुराग्रहान् हरन्ति" इससे वैश्यों से दान का विधान एवं सोम का उन ग्रहण विधायक वाक्यों से विधान से प्राप्त होने से वाजपेय इसे निमित्त बनाकर नामधेय है।

सिद्धान्तकौमुदी के व्याख्यान तत्त्वबोधिनी में 'ऋतुयज्ञेभ्यश्च' इस सूत्र के व्याख्यान में वाज यवागू का प्रकार है, उसका पेय वाजपेय है, यह षष्ठी तत्पुरुष मानकर कृत् के उत्तर पद प्रकृति स्वर से मध्य उदात्त सिद्ध किया है, मध्योदात्त मानने पर षष्ठी तत्पुरुष होने से द्रव्यवाचकत्व में पर्यवसान होगा, फलतः कर्मत्व नाम की अनुपपत्ति होने से कर्मनामधेयत्व पक्ष का उच्छेद होगा, अतः, यह पक्ष ठीक नहीं है।

भाट्टचिन्तामणि भाट्टदीपिका व्याख्यान में वाज और पेय (वाजं च तत्पेयं च) इस व्युत्पत्ति के अनुसार वाजपेय शब्द को अन्तोदात्त सिद्ध किया है—यह भी ठीक नहीं है, क्योंकि, वहाँ अन्तोदात्त नहीं होता है।

शास्त्रदीपिका में वाजपेय याग में सुरा द्रव्य की प्राप्ति को निमित्त कर नामधेय का साधन किया है। वह सुरा द्रव्य का याग में देवतादि के सम्बन्ध के अभाव से याग के सम्बन्ध मात्र से तत्प्रख्य न्याय के सम्भवाभिप्राय से जानना चाहिए, यही श्रुति का स्वारस्य है एवं अनुष्ठेय पदार्थ के अनुगुण भी है। इसलिए याग में सुरा का साक्षात् सम्बन्ध मानकर नामधेयत्व का साधन जो किया जाता है, वह पदार्थ के अननुगुण एवं श्रुतिविरुद्ध होने से उपेक्षणीय है।

तद्व्यपदेशन्यायः—

श्येन आदि शब्द तद्व्यपदेश न्याय से कर्म के नामधेय हैं। क्योंकि, प्रकृत सोम के उद्देश से श्येन आदि रूप गुणों का विधान सम्भव नहीं है। उत्पत्ति विशिष्ट सोम से अवरुद्ध में श्येन आदि का निवेश सम्भव नहीं है। वाक्यभेद आदि भी सम्भव नहीं है, क्योंकि, अनेकगुणों का उपादान नहीं है। अर्थवाद में श्येन सादृश्य का व्यपदेश होने से, और सादृश्य भिन्न निष्ठ होता है, इसलिए श्येन शब्द कर्म का नामधेय है, अभिचार की कामना वाला श्येन नामक याग से याग करे। इस प्रकार मत्वर्थ लक्षणा, वाक्य-भेद तत्प्रख्यशास्त्र, तद्व्यपदेश इन चार स्थितियों में ही कर्मनाम होता है, अन्यथा नहीं।

'ऐकशब्द्ये' = एक शब्दता रहने पर अर्थात् एक बार उच्चारित धात्वर्थ एक साथ कर्म और करण रूप में अन्वित होने पर 'परार्थवत्' = परार्थ अर्थात् गुण के अर्थ के विधान के समान अनुवाद होगा। तन्त्रता सम्बन्ध में याग का अन्वय मानने पर विध्यनुवाद दोष होगा ॥ ८ ॥

इति वाजपेयाधिकरण।

अथ षष्ठमाग्नेयाधिकरणम्

[६] तद्गुणास्तु विधीयेरन्नविभागाद्विधानार्थे न चेदन्येन शिष्टाः ॥ ९ ॥ सि०

शा० भा०—'यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवति इत्येवमादयः श्रूयन्ते। तत्र सन्देहः—किमाग्नेयोऽग्नीषोमीय इत्येवमादयो गुणविधयः, कर्मनामधेयानीति। किं तावत्प्राप्तम्? गुणविधौ सत्यनेको गुणो विधीयेत। अग्निपुरोडाशाष्टाकपाला इति। तस्मान्न गुणविधयः इति। एवं प्राप्ते।

ब्रूमः—तच्च कर्म, गुणाश्चास्य विधीयेरन्। अविभक्ता हि ते कर्मणो विधानार्थे तद्धितान्ते शब्दे। तत्र ह्यष्टाकपालस्याऽऽग्नेयता विधीयते। स एष एवमाग्नेयो भवति, यद्यग्नये संकल्प्य दीयते। तेनायमनेन प्रकारेण यागो विहितो भवति। स एवं विधीयमानो न शक्योऽग्निमष्टाकपालं चाविधाय विधातुम्। सम्बन्धो हि विधीयमानो न शक्यते सम्बन्धिनावविधाय विहित इति वक्तुम्। तस्माद् गुणविधयः। अष्टसु कपालेषु संस्क्रियमाणो व्रीहिमयो यवमयो वा पुरोडाश एव भवति। सोऽनुवादः। सिद्धश्चात्राष्टाकपाल उच्यते 'कपालेषु श्रपयतीति वचनाद् नान्येन श्रपितं गृह्णन्ति। तेनाऽस्मिन् पक्षे न वाक्यभेदो भवति। न चेदन्येन शिष्टाः। यत्र पुनरन्येन वचनेन शिष्टा गुणा भवन्ति, भवति तत्र नामधेयम्। यथा, अग्निहोत्रं जुहोति इति ॥ ९ ॥

इति षष्ठं आग्नेयाधिकरणम् ॥

भा० वि०—एवं नामधेयेषु व्युत्पादितेषु क्वचित्तदपवादेन गुणविधित्वं विशिष्टविधिसंभवप्रतिपादनायानेनाधिकरणेन प्रतिपाद्यत इति संगतिः। विचारविषयमाह—यदाग्नेय इति। तत्प्रख्यन्यायासंभवसंभवाभ्यां संशयमाह—तत्रेति। प्रयोजनं तु आग्नेयं चतुर्धाकरोतीति पुरोडाशस्यैव चतुर्धाकरणसिद्धिः, पारिशेष्यान्नामधेयत्वं दर्शयितुं गुणविधित्वासंभवं तावदाह—किमित्यादिना। गुणविधित्वे हि प्राप्ते कर्मणि अग्न्याद्यनेकगुणधिर्वा स्यात्, गुणविशिष्टकर्म-

विधिर्वा, न तावदाद्यः वाक्यभेदप्रसङ्गात्, नापि द्वितीयः सर्वत्र सन्निकृष्टविशेष्यविध्यसंभवनिबन्धनत्वाद्विप्रकृष्टविशेषणविधेः विशिष्टविधौ च सति सन्निकृष्टविप्रकृष्टयोः विशेषणविशेष्ययोः युगपद्विधेयत्वात्। सन्निकृष्टविधानार्थं तस्य विधेयत्वसंभवो विप्रकृष्टविधानार्थं चासंभवोऽभ्युपगन्तव्यः स्यात् इति युगपद्विरुद्धसंभवासंभवाभ्युपगमप्रसङ्गेन क्वचिदपि विशिष्टविधेः अन्यायत्वादिति भावः। यस्माद् गुणविधौ वाक्यभेदादिदोषस्तस्मान्न गुणविधय इत्याह—**तस्मादिति**। एवं चाध्ययनविधिपरिगृहीतस्याग्नेयादिपदस्यानर्थक्यासंभवात् कर्मनामत्वमेवास्तु। तच्च कर्मणः कस्यचित् अश्रवणात् कथं तन्नामत्वमिति वाच्यम्, अष्टाकपालपदावगतस्य द्रव्यस्य क्रमविनियुक्तेनाग्निर्मूर्धेत्यादियाज्यानुवाक्यायुगलेन सम्बन्धे सति मान्त्रवर्णिकदेवतालाभेन द्रव्यदेवतासम्बन्धकल्पितस्य यागस्याशास्त्रतयाग्नेयादिपदस्य तन्नामत्वोपपत्तेरिति भावः।

अप्राप्ते कर्मण्यनेकगुणविधानं गुणविशिष्टकर्मविधानं तु संभवतीति सिद्धान्तयति—**एवमिति**। अस्य-कर्मणः। तदनेन तद्गुणा इति सूत्रे तच्च गुणाश्चेति विग्रहो दर्शितः अविभागाद्विधानार्थ इति हेतुभागं व्याचष्टे—**अविभक्ता हीति**। यस्मात्तेऽग्न्यादयोऽपि गुणाः आग्नेया इति कर्मविधिप्रयोजने तद्धितान्ते शब्देऽविभक्ताः अन्तर्गताः, तस्मात्तेऽपि विधीयेरन्नित्यर्थः। गुणानां कर्मविधायितद्धिताविभागमुपपादयति—**तत्र हीति**। देवता तावत् प्रातिपदिकेनोक्ता। तद्विशिष्टं च द्रव्यं तद्धितेन सम्बन्धश्चार्थादुक्त इति दर्शितम्। आग्नेयता विधीयत इति। अग्निर्देवतास्येत्यस्य शब्दार्थस्यैव विशेषकत्वादष्टाकपालपदस्याष्टत्वकपालत्वतदधिकरणसंस्कारतत्संस्कृतपुरोडाशत्वादीनाप्याग्नेयपदाविभागं दर्शयितुमष्टाकपालस्येत्युक्तम्। एव गुणानामाग्नेयपदाविभागमुक्त्वा कर्मणोऽपि तमाह—**स एष इति**। अव्यक्तस्य पुरोडाशस्याग्न्यादिसम्बन्धानुपपत्तेस्त्यागोऽपि आग्नेयपदादेव गम्यत इत्यर्थः। तथापि कथं भावनावगतिः तत्राह—**तेनेति**। अयं यागः यागावच्छिन्ना भावनेति यावत्। अभाव्यमानस्य यागस्य द्रव्यदेवतासम्बन्धापादकत्वानुपपत्तेरितिभावः। एवमाग्नेयपदादेव गुणादीनां प्रतीतिमुपपाद्य विशिष्टविधिसम्भवमप्युपपादयति—**स एवमिति**। कुत इत्यत आह—**सम्बन्धो हीति**। कारकादिभिस्सम्बध्यत इति व्युत्पत्त्या भावनैवात्र सम्बन्धशब्देनाभिप्रेता। अव्यापाररूपस्य सम्बन्धस्य विधेयत्वानुपपत्तेः। सम्बन्धिनाविति च धात्वर्थः कारकग्रामश्चाभिप्रेतौ शुद्धस्य कर्मणोऽनुष्ठातुमशक्यत्वेन विध्ययोग्यत्वात् सन्निकृष्टरूपेण विध्यसंभवेऽपि विप्रकृष्टरूपेण तत्संभवाद्रूपभेदेन युगपत्संभवासंभवविरोधपरिहारोपपत्तेः। न विशिष्टविधौ क्वचिद्दोष इति भावः। विशिष्टविधिसंभवफलमाह—**तस्मादिति**। विशिष्टविधावप्यन्यतो लभ्यमानस्याविधानान्नातिगौरवापत्तिरित्यभिधानार्थं 'न चेदन्येन शिष्टा' इति सूत्रावयवं

व्याचष्टे—**अष्टस्विति।** अनेककपालाधिकरणसंस्कारस्य पुरोडाशादन्यत्र याज्ञिकानामप्रसिद्धेः 'ते पुरोडाशं कूर्मं भूतं सर्पं तमपश्यन्' इत्यर्थवादाच्च पुरोडाशस्तावदन्यतः सिद्धोऽनूद्यत इत्यर्थः। अष्टाकपालादयश्चान्यतस्सिद्धा अनूद्यत इत्याह—**प्रसिद्धश्चेति**[1]। कपालानां तद्बहुत्वस्य तदधिकरणस्य च संस्कारस्य 'कपालेषु श्रपयति' इति वचनात् सिद्धेः अन्याधिकरणत्वाद्यप्रसक्तेश्च बहुत्वविशेषाष्टत्वमात्रविशिष्टद्रव्यविशेषाग्न्याख्यदेवताविशिष्टयागभावनाविधाना — न्नातिगौरवापत्तिरित्यर्थः। तेनेति वाक्यभेदो गौरवलक्षणः। एवमाग्नेयादिपदस्य विधित्वमुक्त्वा, नामधेयत्वासंभवेऽपि सूत्रावयवं व्याचष्टे—**न चेदिति।** गुणग्रहणं कर्मणोऽप्युपलक्षणम्। विधित्सितस्यान्यतः प्राप्तौ हि तद्वाचिनः शब्दस्य नामधेयता। न चेहान्यतः प्राप्तिः अष्टाकपालाख्यस्य द्रव्यस्याननुष्ठेयस्य स्मारकमन्त्राकाङ्क्षा-भावेन मान्त्रवर्णिकदेवतालाभाभावात्तेन कर्माप्राप्तेर्नामत्वासंभवाद् गुणविधि-रेवाश्रयणीय इत्यर्थः॥ ९॥

इति आग्नेयाधिकरणम्।

अथ षष्ठमगाग्नेयाधिकरणम्

त० वा०—एवं सिद्धेषु नामधेयेषु, नामधेयकार्येषु चेदानीमपवादः प्रस्तूयते। कस्मात्पुनरिहैव दर्विहोमपदं न विचार्यते, विचारितमेतदपि तत्प्रख्यमित्यनेन। विध्युद्देशगतानां चेह विचारः; तत्र त्वर्थवादगतानां 'यदेकया जुहुयाद्दर्विहोमं कुर्यात्' इति। सिद्धे वा कर्मनामधेयत्वे तद्विशेषविचारस्तत्र। इह पुनः सामान्य-चिन्तेति नोपन्यस्तम्। या तु तत्र गुणविध्याशङ्का, साऽधिकरणमध्ये परिचोदना-मात्रं सर्वमेवैतत्प्रासङ्गिकम्। अष्टमे च पूर्ववदपूर्वचिन्ताधिकारात्।

केन पुनर्विहितानां कर्मणामाग्नेयादीनां नामधेयत्वमाशङ्क्यते? तदुच्यते। अष्टाकपालो भवतीत्यादिभिर्द्रव्यमात्रयुक्ताः क्रमवत्यो भावनाः प्रतिपाद्यन्ते। तासां च स्थानक्रमेणाग्न्यादिदैवत्यानि याज्यानुवाक्यायुगलान्याम्नायन्ते। तानि क्रमविनियुक्तानि सन्तिमान्त्रवर्णिकीः कर्माङ्गभूता देवताः कल्पयन्ति। न ह्यन्यथा ते मन्त्राः कर्मोपयोगं गच्छेयुः। क्रियास्वरूपप्रकाशनेन, तत्संबन्धि-प्रकाशनेन वा मन्त्राः कर्मोपयोगितां गच्छन्ति। न चैतैः क्रिया, द्रव्यं वाभि-धीयते। यद्यग्न्याद्यभिधीयते, तस्य सम्बन्धित्वं न ज्ञातम्, तत्रासम्बध्यग्न्यादि-प्रकाशनेऽनङ्गत्वप्रसङ्गः। तेनावधारिताङ्गत्वमन्त्रानुरोधेनैवं विज्ञायते यानेते वदन्ति, ते नूनमग्न्यादयः क्रियाङ्गमिति। ते च मन्त्रेषु प्राधान्याभिधानाद् देवता-त्वेन प्रज्ञाता इति तदवैलक्षण्यात्कर्मस्वपि देवता भवन्ति। पुरोडाशादिभिरपि च हविरात्मकत्वाद्योग्यतया यागसाधनत्वेनोपप्लवमानैर्देवतैवाऽऽकाङ्क्षितेति

१. सिद्धश्चेति भा० पा०।

द्रव्यदेवतासम्बन्धनिष्पत्तेरनुमितानां यागानां 'तत्प्रख्यं चान्यशास्त्रम्' इत्याग्नेयादीनां नामधेयत्वम्।

अथ वाऽष्टाकपालादीनां हविष्ट्वात् 'द्विर्हविषोऽवद्यति' इति ह्यवदाने गृहीते चोदनान्तरेण च तत्संस्कारार्थोपस्तरणाभिघारणग्रहणाच्चतुरवत्ते निष्पन्ने 'चतुरवत्तं जुहोति' इति वचनाद्यावद् द्रव्यं निष्पन्नानां होमानां तथैवाग्न्यादिषु प्राप्तेषु नामधेयत्वम्। एवं चानेकार्थविधिदोषो न भविष्यति। तथा प्राप्ते—

न चेदन्येन शिष्टाः स्युर्यागाः शब्देन केनचित्।
ते गुणाश्चोपदिश्येरन्विधिना ह्यविभागतः॥

न तावद् द्रव्यदेवतासंस्कारसंयोगेन यागविधिरुपपद्यते। कथम्?

न द्रव्यस्य स्वरूपेण मन्त्राकाङ्क्षाऽवकल्पते।
न चान्यवाचिना तस्य संबन्धः संप्रतीयते॥

नाष्टाकपालो भवतीत्येतावता कश्चित्पुरुषव्यापारो विधीयते, योऽनुष्ठानाय स्मृतिकरणं मन्त्रमपेक्षेत। न च पुरोडाशभवनं पुरुषस्यानुष्ठेयम्, प्रतिनियतकर्तृत्वात्क्रियाणाम्। नापि द्रव्यम्, स्वरूपेण सिद्धात्मकत्वात् कर्तव्यम्, येन स्मर्येत। न च 'अग्निर्मूर्धा' इत्यादिभिर्द्रव्यम्, तद्व्यापारो वाऽभिधीयते, येनाऽऽकाङ्क्षयापि सम्बध्येरन्। अग्न्याद्यभिधायिनां न कश्चित्तैः संबन्धो विद्यते।

न च यागो हविष्ट्वं वा पुरोडाशेऽवधारितम्।
येन स्याद्देवताकाङ्क्षा तन्मन्त्राणां च संगतिः॥

यदि हि प्रथमं यागत्वमवधार्येत, ततो देवताकाङ्क्षायां सत्यां देवतावाचिनो मन्त्राः सम्बध्येरन्, न तु तद्भवतिशब्देनोक्तम्। न च यागसम्बन्धात्प्राक् पुरोडाशादीनां हविष्ट्वमवधार्यते। सम्बन्धिशब्दो ह्ययम्, न द्रव्यस्वरूपप्रयुक्तः। तदेव हि द्रव्यमयागसंबद्धं पयःप्रभृति न लोके हविःशब्दवाच्यं भवति।

एतेन चतुरवत्तचोदनाकल्पितकर्मनामत्वं प्रत्युक्तम्। आघारादिषु तु क्रियात्मकत्वान्मन्त्राकाङ्क्षायां वचनविनियोगवशाच्च भवति मान्त्रवर्णिकदेवताकल्पना। सर्वजघन्यश्चायं देवताविधिः। सर्वज्येष्ठे तद्धितदेवाविधौ सम्भवति किमित्याश्रीयते। अन्यथानुपपत्तिमूलश्चासौ। न च तद्धिते सम्भवत्यन्यथानुपपत्तिः। तस्मादनेनैव कृते द्रव्यदेवतासम्बन्धेऽर्थवादपुरःसरेण भवतिशब्देन विहते विशेषार्थं क्रमेण मन्त्राम्नानम्। अगत्या चानेकार्थविधिरङ्गीक्रियते। **विधानार्थे तद्धितान्ते शब्द इति**–विधिप्रयोजनत्वाभिप्रायेण। सर्वं चैतत्तस्मादविभक्तं गम्यते। देवता तावत्प्रातिपदिकेनोक्ता, तद्विशिष्टं द्रव्यं तद्धितेन, सम्बन्धोऽपि तत्रैवार्थगृहीतः तत्सामानाधिकरण्याच्चाशेषात्मीयोपसर्जनयुक्तमष्टाकपालपदं विशेषणत्वेन तत्रैवान्तर्गतम्। द्रव्यस्य चाऽऽग्नेयत्वेन भवनमभाव्यमानस्य न सिध्यतीति, तदाक्षिप्ता भावनाऽपि तत्रैव। न च यागेन

विनाऽऽग्नेयत्वं भावयितुं शक्यमिति पुरुषव्यापारविशेषोऽपि यागस्तदन्तर्गतः। ततश्च तद्धितान्तपदोपात्तविधिना सर्वमन्यदर्थादाक्षिप्यमाणं न वाक्यं भिनत्ति। भावनाविधिपूर्वकश्च सर्वत्र धात्वर्थकारकविधिर्भवतीति, अश्रूयमाणाऽपि सैव तावद्विशिष्टा विधीयते। ततो विशेषणान्यथानुपपत्त्या सर्वसंसर्गात्मकत्वाच्च तामेव सम्बन्धशब्देनाभिधत्ते, न त्वव्यापारात्मकत्वाद् द्रव्यदेवतासम्बन्धः शक्यते विधातुम्। 'अविभागात्' इति—अर्थाक्षेपहेतुः। 'न चेदन्येन' इति—अन्यथानुपपत्तिशरणाभिधानम् ॥ ९ ॥

इति षष्ठम् आग्नेयाधिकरणम् ॥ ९ ॥

॥ अथ षष्ठमाग्नेयाधिकरणम् ॥

न्या० सु०—अत्र भाष्यकृताग्नेयादयः शब्दा गुणविधयः, कर्मनामधेयानि वेति चिन्ता दर्शिता। साऽष्टाकपालादिसामानाधिकरण्यात् कर्मणश्चाश्रवणान्मन्त्रतस्तु विरोधे स्यात्। इत्यत्र चाग्नेयाग्नीषोमीययोर्ब्राह्मणक्रमविपर्ययेण मन्त्रक्रमाम्नानस्य वक्ष्यमाणत्वेन क्रमविनियुक्तमन्त्राभावात् श्रुत्यविनियुक्तानां च मन्त्राणां स्वार्थसमवायकल्पकत्वाभावात् मान्त्रवर्णिकदेवताकल्पनानुपपत्तेर्द्रव्यदेवतासंयोगेनापि यागस्य कल्पयितुमशक्यत्वात् 'आग्नेयं चतुर्द्धा करोतीत्या'दिव्यवहारस्य द्रव्यविषयत्वेन कर्मनामानपेक्षत्वात् निष्प्रयोजनत्वेनाप्याग्नेयादिशब्दस्य कर्मनामत्वशङ्कानुपपत्तेरयुक्तेत्याशङ्क्याह- **एवमिति।** अयमाशयः पूर्वाधिकरणे तन्त्रसम्बन्धानुपपत्त्या विशिष्टविधौ निरस्ते क्वचिदप्यनावृत्तेन प्रत्ययेन विशिष्टविधानं सम्भवतीत्याशङ्क्य, विशिष्टविधिव्युत्पादनार्थं तदधिकरणम्। तद्व्युत्पादनस्य चोत्पत्तिशिष्टबलीयस्त्वसिद्धिः प्रयोजनम्। सोमेन यजेतेति सोमविशिष्टे यागे श्रुतेन प्रत्ययेन विहिते शुद्धस्याप्राप्तत्वेनानुवादायोगात् विशिष्टस्य च द्रव्यान्तरानाकाङ्क्षत्वान्नोत्पत्तिशिष्टसोमावरुद्धे ज्योतिष्टोमे खनित्रादिद्रव्यान्तरं विधातुं शक्यमित्युद्भिदादिशब्दानां नामधेयत्वं सिध्यति। श्रुतेन तु प्रत्ययेन शुद्धं यागं विधायोपादानर्थक्यपरिजिहीर्षया तदर्थविधानायाऽश्रुतप्रत्ययान्तरकल्पने, श्रुतस्यैव वा वृत्तिकल्पने शुद्धयागानुवादेनोत्पत्त्युत्पन्नशिष्टयोर्वाक्यीयत्वाविशेषात्तुल्यबलत्वेन विकल्पोपपत्तेर्नामधेयत्वं न सिध्यतीत्युद्भिदादिशब्दानामुत्पत्तिशिष्टगुणावरुद्धे यागे गुणान्तरविधायकत्वासम्भवान्नामधेयत्वं द्रढयितुं विशिष्टविधिरिह व्युत्पाद्यते। सर्वे चात्र विशिष्टविधयः उदाहरणम्। तत्र सन्निकृष्टविधयसम्भवनिबन्धनत्वाद्विप्रकृष्टविधेर्विशिष्टविधौ च सन्निकृष्टविप्रकृष्टयोर्विशेष्यविशेषणयोर्युगपद्विधेयत्वात् सन्निकृष्टविधानार्थं तस्य विधेयत्वसम्भवो विप्रकृष्टविधानार्थं चासम्भवोऽभ्युपगन्तव्यः स्यादिति, युगपद्विरुद्धसम्भवाऽसम्भवायोगात् न क्वचित्सकृच्छ्रुतेन प्रत्ययेन विशिष्टविधिः सम्भवतीति प्राप्ते, तत्-यागादिकर्म, तद्विशेषणभूताश्च सोमादयो गुणा युगपद्विधीयेरन्निति प्रतिज्ञाय, शुद्धस्य कर्मणोऽनुष्ठानाशक्तेर्विधानासम्भवाद्विधानार्थे लिङ्प्रत्यये विशेषणविशेष्यविधिविभागाभावादिति हेतुरुक्तः।

एवं तर्ह्यंशत्रयोपेतायां भावनायाः सर्वत्रानुष्ठानयोग्यत्वेन विधेयत्वात्, वाक्यान्तरगतानामप्यङ्गानां प्रधानविधिनैव विधेयत्वापत्तेरुत्पत्त्युत्पन्नशिष्टविवेको न स्यादित्याशङ्क्य, 'न चेदन्येन शिष्टा इत्युक्तम् । किंचित्केनचित्कथंचित् कुर्यादिति सर्वत्र सामान्यतः साध्यसाधनेतिकर्त्तव्यतान्वितभावनाविधानेऽपि विशेषाकाङ्क्षायां वाक्यान्तरविहितविशेषलाभेनोपपन्नस्य प्रधानविधायिनः प्रत्ययस्य तद्विधानक्लेशाङ्गीकरणायोगात्, स्ववाक्यगतविशेषविधानमात्रपर्यवसानोपपत्तेरुत्पत्त्युत्पन्नविशिष्टविवेकाविरोध इत्याशयः ।

अतः परमार्थतो विशिष्टविधिव्युत्पादनर्थैवैतदधिकरणम् । तथापि पूर्वापवादत्वेन सङ्गतिं वक्तुं भाष्यकृता 'गुणविधयः कर्मनामधेयानि वेति विचारो दर्शित इत्यपवादशब्देन सूचितम् । नामधेयत्वाशङ्कायाश्चेह निर्बीजत्वात्, तदपवादोऽनर्थक इति, तद्द्वारा नामधेयकार्यस्य गुणफलोपबन्धादेरपवादोऽयमिति नामधेयकार्यशब्देन सूचितम् । नामधेयाभावेऽप्याग्नेयं चतुर्द्धा करोतीत्यादिव्यवहारोपपत्तेश्च शब्देनाग्नेयादिशब्दे गुणविधिनामधेयचिन्तायाः निष्प्रयोजनत्वं सूचितम् ।

उद्भिदादिशब्देषु हि गुणविधित्वे खनित्रादिना यष्टव्यम्, नामधेयत्वे सोमेनैवेति चिन्ताप्रयोजनम्, चित्राशब्देऽप्येवं स्पष्टमेव प्रयोजनम् । तत्प्रख्यविचारेऽप्यग्निहोत्रशब्दस्य गुणविधित्वे दर्विहोमेष्वविहितदेवताकेष्वग्निर्देवता, नामत्वे मान्त्रवर्णिकी । आघारशब्दस्य तु गुणविधित्वे द्रवद्रव्यमात्रेणोपांशुयाजः कार्यः, नामत्वे त्वाज्येनैवेति प्रयोजनम्, आग्नेयादिशब्दस्य तु गुणविधिनामधेयत्वयोर्न प्रयोजनविशेषोऽस्तीत्यपवादत्वे सङ्गतिप्रदर्शनमात्रार्थः । सन्देहवेलायां नामधेयपक्षोपन्यासोऽत एवानेकगुणोपादानात् गुणविध्यसम्भव एव पूर्वपक्षितः । सिद्धान्तेऽपि गुणविधित्वसमर्थनमात्रं कृतम् । न नामत्वं निराकृतम् । गुणविध्यसम्भवस्य चाधिकरणपञ्चकोक्तस्यापवादायैतदधिकरणम् । गुणविध्यसम्भवे त्वाग्नेयादिशब्दस्यानर्थक्यपरिहारायागत्या यथा कथंचिन्नामत्वं 'शिरो वा एतद्यज्ञस्य यदाग्नेयः' हृदयमुपांशुयाजः, पादावग्नीषोमीय इत्यादिव्यवहारसिद्ध्यर्थमेष्टव्यमिति दर्शयितुं नामधेयत्वोपन्यास इति द्रष्टव्यम् ।

ननु समाप्तायां नामधेयत्वचिन्तायाम् अपवादप्रस्तावस्योचितत्वात् दर्विहोमपदमविचार्याऽपवादो न युक्त इत्याशङ्कते—**कस्मादिति** । वैश्वदेवपदस्य तु नामत्वमङ्गीकृत्य गुणार्थताप्यस्ति नास्तीति वैश्वदेवाधिकरणे चिन्तेत्यभिप्रेत्य तच्चिन्तेहाऽनाशङ्किता । समिदादिपदानामपि तत्प्रख्यन्यायान्नामत्वे सत्येव पार्वणशब्दस्य कर्मनामधेयस्यापि कालाभीज्या समुदायाभीज्या वेति विचारेण देवताविधित्वावसायात्, तन्न्यायेन देवताविधित्वमङ्गीकृत्य प्रकृतसमिदादिशब्दवाच्यदेवतासंस्कारार्थाः प्रयाजा इत्याशङ्क्य, द्वितीयान्तत्वेन देवताविधित्वायोगात् मान्त्रवर्णिकसमिदादिदेवतायोगेन यागेषु लक्षणया समिदादिशब्दप्रवृत्तेर्मन्त्रवर्णेभ्यश्चापूर्वाणां देवतानामेव यागार्थत्वप्रतीतेर्न देवतासंस्कारार्थतेति नवमे वक्ष्यमाणत्वात्, नेह तच्चिन्ताशङ्किता ।

दर्विहोमपदं किं गुणविधिः, कर्मनामधेयं वेत्यष्टमे विचारयिष्यमाणमिहैव कस्मान्न विचारितमित्याशङ्कितम्। लौकिकहोमेष्वाचारतस्त्वग्बिलया मूलदण्डया दर्व्या जुहोतीति स्मृत्या च विधित्सितस्य दर्विलक्षणस्य गुणस्य प्राप्तेः पुरोऽनुवाक्याम् अनूच्य याज्यया जुहोतीति जुहोति सदेवत्वायेति (तै० सं० ३-४-१०-४) विधेयकवाक्यतया चार्थवादत्वेनोपयुक्तस्य समासानिःकृष्य दर्विपदस्य तद्विधायित्वमङ्गीकृत्य, स्मृति-मूलत्वकल्पनायोगात्तत्प्रख्यन्यायेनैव नामधेयत्वं सिद्धम्। वैदिकेष्वपि स्रुवेण जुहोति, चमसेन जुहोतीति साक्षाद्विहितेन स्रुवादिना सह समासान्निष्कृष्य विधेयत्वेन कल्प्यमानाया दर्वेर्विकल्पायोगाच्छास्त्रान्तरेण वैपरीत्यप्राप्तेस्तत्प्रापणस्यासम्भवेन वैयर्थ्यापत्तेस्तेनैव च सिद्धमित्यभिप्रेत्य परिहरति—**विचारितमिति**। एवं त्वाष्टमिकस्य गुणविधिनामधेयविचारस्य पौनरुक्त्यापत्तेरपरितोषादन्यथा परिहरति—**विध्युद्देशगता-नामिति**। ततश्च विध्युद्देशगतानां नामधेयविचारस्य समाप्तत्वत्वाद्युक्तोऽयवाद इत्याशयः। अर्थवादगतानामपि तुल्यन्यायतया सिद्धस्य नामधेयत्वस्य किं लौकिकाना-मेवैतन्नामधेयमुत अलौकिकानाम्, वैदिकानां तत्रापि किं यजतिचोदनानामप्युत जुहोतिचोदनानामेवेति विशेषविचारार्थं स्मारणमितीहाप्यपरितोषादन्यथा परिहरति—**सिद्धे वेति**। ननु विशेषविचारे गुणविध्याशङ्का न युक्तेत्याशङ्क्याह—**या त्विति**। परिचोदनामात्रत्वोपपादनायाऽत्राधिकरणमध्यशब्दः। तत्र हि 'दर्विहोमो यज्ञाभिधानं होमसंयोगादि(८-४-१)ति सूत्रेण होमपदेनाऽस्य समासपदस्य संयोगात् तत्र च होमस्य प्राधान्यात् तद्वाची दर्विहोमशब्द इति यज्ञशब्दलक्षितकर्मनामधेयत्वं प्रस्तुत्य, तद्विशेषेऽपेक्षिते 'स लौकिकानां स्यात् कर्त्तुस्तदाख्यत्वादि(८-४-२)त्यनेन स्मार्त्तेष्टकादि-कर्त्तरि दर्विहोमिकसमाख्यानात् स्मार्त्तानामेवैतन्नामेति पूर्वपक्षं कृत्वा सर्वेषां वा दर्शनाद्वास्तु होमे(८-४-३) इत्यनेन वैदिकेऽपि वास्तुहोमे 'यदेकया जुहुयाद् दर्विहोमं कुर्यादिति दर्विहोमशब्दप्रयोगात् वैदिकानां चैतन्नामकत्वाभावे सत्येकया ऋचा दर्विहोमशब्दप्रयोगानुपपत्तिप्रसङ्गात्, होमशब्दस्य च समान्याभिधायित्वात्सर्वेषां नामेति सिद्धान्तिते, तत्रापि विशेषापेक्षायां यजतिचोदनानामपि दर्शपूर्णमासादीनां चतुरवत्तादिवाक्यैर्होमत्वापत्तेः तेषामप्येतन्नामेति प्राप्ते, 'जुहोतिचोदनानां च तत्संयोगादि(८-४-४)त्यनेन होमशब्दसंयोगात् होमनामत्वप्रतीतेर्यजतिचोदनानां च देवतो-द्देशद्रव्यत्यागमात्रेण पर्यवसानाच्चतुरवत्तादिवाक्यैर्यागीयद्रव्यप्रतिपत्त्यर्थं प्रक्षेपविधानेऽपि होमत्वानापत्तेर्जुहोतिचोदनानामेव दर्विहोमशब्दो नामेति सिद्धान्तयित्वा 'द्रव्योपदेशाद्वा गुणाभिधानं स्यादि(८-४-५)त्यनेन दर्विहोमशब्दात्पात्ररूपद्रव्योपदेशप्रतीतेर्गुणविधिरित्या-शङ्क्य न लौकिकानामाचारग्रहणात् शब्दवतां चान्यार्थविधानात् (८-४-६) इत्यनेन लौकिकेष्वाचारेषु दर्व्या गृहीतत्वाद्वैदिकेषु चान्येषां स्रुवादीनां पात्राणां होमेनार्थिता-नामाकाङ्क्षितानां विधानाद्दर्विसमासान्निष्कृष्य विधानं न युक्तमित्याशङ्कां निराकृत्य, नामधेयत्वमुपसंहृते ननु विशेषविचारोऽपीहैव नामधेयचिन्ताधिकारात्कर्त्तुं युक्तः,

नाष्टमे विशेषातिदेशलक्षणत्वात् तस्येत्याशङ्क्याह—**सर्वमेवेति**। लक्षणान्तरगोचरोऽपि विचारः प्रसङ्गाल्लक्षणान्तरे क्रियमाणो न दोषमावहतीत्याशयः।

कथं तत्र प्रसङ्ग इत्यपेक्षायामाह—**पूर्ववदिति**। अविहितेतिकर्त्तव्यताकेष्वतिदेशेनेतिकर्त्तव्यता प्राप्तावुक्तायाम्, दर्विहोमेष्वविहितेतिकर्त्तव्यताकेष्वपि नातिदेशेनेतिकर्त्तव्यताप्राप्तिरस्तीत्यपवादार्थं किं दर्विहोमाः कुतश्चिद्धर्मग्राहित्वात् पूर्ववन्तः अथापूर्वा इति चिन्तामधिकृत्य सर्वेषां जुहोतिचोदितानामपूर्वत्वसिद्ध्यर्थं विशेषचिन्तेत्यर्थः। आग्नेयादिवाक्येषु कर्माश्रवणात् नाग्नेयादिशब्दानां तन्नामत्वशङ्का युक्तेत्याशङ्कते—**केनेति**। तत्र 'शिरो वा एतद्यज्ञस्य यदाग्नेय' इति यज्ञावयवस्तुत्या प्रसिद्धयागनामोपांशुयाजशब्दसाहचर्याच्च यागनामत्वप्रतीतेर्व्युत्क्रमाम्नातानामष्टाकपालादीनां लिङ्गदर्शनत्वात् कस्यांचिच्छाखायां क्रमाम्नानं भविष्यतीत्यारोप्य, मान्त्रवर्णिकदेवतान्वयेन यागकल्पनोपपादनार्थं प्रकाशनार्हानुष्ठेयक्रियां विना प्रकाशकमन्त्रान्वयायोगादष्टाकपालादीनामप्राप्तत्वेन विधेयत्वावसायात् विधेश्च भावनैकगोचरत्वात् तदाक्षेपकत्वेनाष्टाकपालादिवाक्येषु भावनाप्रतीतिं तावदाह **तदिति**। भावनानां चावच्छेदकधात्वर्थविशेषापेक्षायां यागाख्यधात्वर्थान्वयसिद्धयेऽग्न्यादिदेवत्यमन्त्रान्वयं दर्शयितुमाह—**तासां चेति**। आनन्तर्यमचोदनेत्यानन्तर्यलक्षणस्य (३-१-२४) क्रमस्याविनियोजकत्वाभ्युपगमात् पाठसादृश्यलक्षणक्रमप्रतिपत्त्यर्थः स्थानशब्दः। यागाङ्गमन्त्रवाचियाज्यानुवाक्यासमाख्ययापि यागाक्षेपसूचनार्थं याज्यानुवाक्यायुगलानीत्युक्तम्।

ननु श्रुत्यविनियुक्तानां मन्त्राणां करणत्वानवगमाददृष्टार्थत्वेनाप्यङ्गत्वोपपत्तेः स्वार्थसमवायकत्वाभावान्न तत्प्रतिपाद्यस्याग्न्यादेः क्रियाङ्गत्वसिद्धिरित्याशङ्क्योपांशुयाजे याज्यानुवाक्यायुगलानां क्रमविनियुक्तानामपि देवताकल्पकत्वदर्शनात्, तत्सामान्यमात्रेणापि देवताकल्पकत्वसम्भवं दर्शयितुमाह—**तानीति**। ननूपांशुयाजे यजिना विहितस्य यागस्य देवताकाङ्क्षत्वाद्यथाकथंचिदुपस्थापितदेवताग्रहणं युक्तम्। इह तु यज्यश्रवणेनानाकाङ्क्षिताया देवतायास्तत्सम्बन्धप्रमाणतद्धिताद्यभावेन युक्ता कल्पनेत्याशङ्क्याघारादिवद्यज्यश्रवणेऽपि क्रियातत्समवेतार्थप्रकाशनेन मन्त्राणां क्रियाङ्गतेति सामान्यतो दृष्टेनाऽग्न्यादेः क्रियाङ्गत्वमुपपादयति—**न हीत्यादिना**। क्रियाङ्गमित्यन्तेन नन्वग्न्यादेः क्रियान्वये देवतात्वावगतिः कथमित्याशङ्क्याह—**न चेति**। 'अग्निमूर्द्धे'त्यादिमन्त्रेष्वग्न्यादीनां प्राधान्येनाभिधानाद्यमर्थं प्राधान्येन मन्त्रोऽभिदधाति सापि देवतेति लक्षणेन देवतात्वावसायात् कर्मस्वपि देवतात्वावगतिरित्यर्थः, न केवलं मन्त्रेष्वग्न्यादीनां देवतात्वात् कर्मस्वपि देवतात्वम्, किं त्वष्टाकपालादिशब्दानामनेकत्र पुरोडाशशब्दसामानाधिकरण्यदर्शनादिहापि। ते पुरोडाशं कूर्मभूतं सर्पन्तमपश्यन्नित्यष्टाकपालवाक्यशेषात् पुरोडाशपरत्वावगतेः पुरोडाशादीनां च वृद्धव्यवहारात् धानाः करम्भः परिवापः पुरोडाशः पयस्येत्येष वै यज्ञो हविः पङ्क्तिरित्यादिलिङ्गाच्च हविष्ट्वप्रसिद्धेर्हविःशब्दस्य च अर्चिशुचिहुसृपिछदिभ्य इसिति जुहोतेरौणादिके कर्मणि इसिप्रत्यये कृते हूयत इत्येतस्मिन्नर्थे

हविःशब्दव्युत्पत्तेर्देवतां च विना होमायोगात् द्रव्याकाङ्क्षावशादग्न्यादेर्देवतात्वाव-गतिरित्याह—**पुरोडाशादिभिरिति**। जुहोत्युत्पन्नस्यापि हविःशब्दस्याहूयमानेऽपि द्रव्ये हवींष्यासादयतीति प्रयोगदर्शनात् तादर्थ्यनिमित्तत्वाप्रतीतेरजुहोतिचोदिते कर्मणि होमस्यैव यागीयद्रव्यसंस्कारार्थत्वेन द्रव्यस्य होमार्थत्वायोगात् यागार्थद्रव्यवाची हविः-शब्द इति मत्वा, देवतान्वयं विनापि द्रव्यान्वयमात्राद्यागानुमानसूचनार्थं यागेत्युक्तम्। नन्वेवं सत्यपि देवतान्वये कथं यागकल्पनम्। कथं च सत्स्वपि यागेष्वाग्नेयादिशब्दानां नामतेत्याशङ्क्याह—**इतीति**। यजतिस्तु द्रव्यफलभोक्तृत्वसंयोगादि (२–३–१४) त्यत्र द्रव्यदेवतान्वयेन यागकल्पनस्य वक्ष्यमाणत्वाद्विधित्सितस्य च गुणस्यान्यतः प्राप्तौ नामत्व-स्योक्तत्वात् उभयसिद्धिरिति भावः।

नन्वष्टाकपालादिवाक्यान्याग्नेयादिशब्दैर्विना पर्यवस्यन्ति, न वा, तत्रापर्यवसाने स्वार्थासमाप्तस्य वाक्यस्य वाक्यान्तरान्वयायोगात् मन्त्रान्वयाभावे तत्प्रतिपाद्यदेवता-न्वयकल्प्ययागासिद्धिः। पर्यवसाने त्वाग्नेयादिशब्दस्यानन्वयान्नामत्वानुपपत्तिरित्या-शङ्क्याश्रुतयागनामत्वाशङ्कासम्भवेऽपि 'चतुरवत्तं जुहोतीति श्रुतहोमनामत्वेन पूर्वपक्षो भविष्यतीत्याह —**अथ वेति**। चतुरवत्तवाक्याद्धोमनिष्पत्तावपि आग्नेयादिशब्दानां कथं तन्नामतेत्याशङ्क्य,क्रमविनियुक्तमन्त्रवशात् देवताप्राप्तेस्तत्प्रख्यन्यायेनैवेति दर्शयितुं तथैवेत्युक्तम्। सकृच्छ्रवणेन होमैक्यान्मन्त्राणां च बहुत्वाद्विसंख्यत्वेन क्रमानुपपत्ति-माशङ्क्य 'यावद्द्रव्यमित्युक्तम्'। कानि द्रव्याणीत्यपेक्षितेऽष्टाकपालादीनां सम्बन्धिनां होमानामित्युक्तम्। कथं चतुरवत्तवाक्यस्याष्टाकपालादिविषयतेत्याशङ्क्याष्टाकपालादीनां चतुरवत्ततोक्ता। तदुपपादनार्थं द्विरिति वाक्याद्व्यवदानसिद्धिरुक्ता। तस्याष्टाकपालादि-विषयत्वोपपादनार्थं हविष्ट्वादित्युक्तम्। एवमपि चतुरवत्तनिष्पत्तिः कथमित्यपेक्षिते चोदनान्तरेणेत्युक्तम्।

नन्पस्तृणात्यभिघारयतीति चोदनान्तरेणोपस्तरणाभिधारणयोर्ग्रहणेऽपि तयोरुप-स्तरणाभिधारणयोरुपस्तृणन्नभिघार्याज्यस्य यजेतेति ध्रौवाज्यसाधनत्वेन, अष्टाकपालादीनां कथं चतुरवत्ततेत्याशङ्क्य तत्संस्कारार्थेत्युक्तं दशमे कृष्णलचरावुपस्तरणाभिघारणयोरर्थ-लोपेन बाधं वक्तुं अकर्म वा संसर्गार्थनिवृत्तित्वात् तस्मादाप्तिसमर्थत्वमिति (१०–२–१२) सिद्धान्तसूत्रे हविषः स्रुक्संसर्गस्योपस्तरणाभिघारणयोर्निवर्त्यत्वेन प्रयोजनस्य कृष्णले च विशदत्वेन स्वत एव निवृत्तेश्चत्वारि चत्वारि कृष्णलान्यवद्यति, चतुरवत्तस्याप्त्यै, इति चोपस्तरणाभिघारणसाध्यस्य चतुरवत्तत्वसम्पादनस्यान्येनाप्तेस्तदकरणसमर्थनादकरणं तयोरिति वक्ष्यमाणत्वाद्धविषः स्रुच्यसंसर्गलक्षणसंस्कारार्थत्वमनयोरवसीयत इत्याशयः।

नन्वग्नीषोमीयब्राह्मणस्य प्राक्पाठादाग्नेयब्राह्मणस्य च पश्चात्पाठाद्याज्यानुवाक्या-युगलयोश्च ब्राह्मणक्रमविपर्ययेण पाठादविद्यमानक्रमास्नानाध्यारोपेणाऽत्यन्तक्लिष्ट-नामत्वाशङ्का न युक्तेत्याशङ्क्य—**आह एवं चेति**। प्राप्ते कर्मण्याग्नेयादिवाक्यैर्द्रव्य-देवताद्यनेकगुणविधाने 'चोदिते हि तदर्थत्वात् तस्य तस्योपदिश्यतः' इत्यनेन वाक्यभेद-

दोषापत्तिः। विशिष्टविधाने तु सन्निकृष्टविप्रकृष्टविशेषणविशेष्यरूपानेकार्थविधानापत्तेस्तत्र च सन्निकृष्टविधानासम्भवनिमित्तत्वाद्विप्रकृष्टविधानस्य युगपत्सन्निकृष्टविधानसम्भवसम्भवाभ्युपगमदोषसम्भवाद् गुणविध्यसम्भवमात्रमत्र पूर्वपक्षिणोऽभिमतम्। तथा च सत्याग्नेयादिशब्दानर्थक्यापत्तेस्तत्परिहारार्थं यथाकथञ्चिन्नामधेयत्वाभिधानमित्याशयः। एवं नामधेयत्वे सत्याग्नेयादिशब्दस्य गुणविधित्वाभावान्न सन्निकृष्टविप्रकृष्टविशेष्यविशेषणरूपानेकार्थविधिनिमित्तो युगपत् सन्निकृष्टविप्रकृष्टविधिसम्भवासम्भवाभ्युपगमदोषो भविष्यत्येतदर्थं नामधेयत्वं यथाकथञ्चिदुक्तं न तु पूर्वपक्षिणोऽभिमतमित्यर्थः। पूर्वपक्षभाष्यं चानेन व्याख्यातम्।

तत्र च विशिष्टविधेः सिद्धान्तिनोऽभिमतत्वात् विशेष्यस्य यागस्याश्रुतत्वेन द्रव्यदेवतासम्बन्धलक्षणगुणविधिकल्प्यत्वात् श्रुत्या गुणमात्रविधिं मत्वा, गुणे विधिशब्दः तस्मिन्सत्यनेको विशेषणविशेष्यरूपोऽर्थोऽभिधीयते, तत्र च सन्निकृष्टविध्यसम्भवनिमित्तत्वाद्विप्रकृष्टविधेर्युगपत्सन्निकृष्टविशेष्यविधिसम्भवासम्भवाभ्युपगमदोषापत्तिरित्युक्तम्।

ननु विशेष्यस्य यागस्याश्रुतत्वात् कथं गुणविधौ सति विशेषणविशेष्यरूपानेकार्थविधिः स्यादित्याशङ्क्याग्निर्देवता पुरोडाशो द्रव्यमिति द्रव्यदेवतासम्बन्धलक्षणगुणविधिद्वारेत्युक्तमिति भाष्यं योज्यम्। एतच्च वार्त्तिककृताघाराग्निहोत्राधिकरणे परदौर्बल्यवतोऽष्टौ श्रुतिप्रकारान् परोक्तान्निराकुर्वता विशिष्टविधेरत्यन्तक्लिष्टत्वं तृतीयस्थानानिवेशासम्भवोपपादनार्थं वक्ष्यमाणत्वान्नेह प्रपञ्चितमित्यनवद्यम्। सूत्रं योजयन् सिद्धान्तमाह—**तथेति**। यत्र पुनरन्येन वचनेन शिष्टा गुणा भवन्तीति भाष्याद्विशेषणस्यैवान्यतः प्राप्तावविधेयत्वम्, विशेष्यस्य त्वन्यतः प्राप्तावपि तन्निरपेक्षविशेषणविध्ययोगात् विधेयतेत्याभाति। तच्च सर्वतो पदार्थसंक्रान्तविधिशक्तौ धात्वर्थानुवादाभ्युपगमात् अयुक्तमित्याशङ्क्य, गुणग्रहणस्योपलक्षणार्थत्वं दर्शयितुं **याग** इत्युक्तम्। **न** चेदिति सूत्रावयवे प्राप्तेर्विधेयत्वहेतुत्वाभिधानार्थं इति प्राग्व्याख्यया सूचितम्। तच्च **कर्मेति** भाष्यात् तच्च **गुणाश्चेत्येकवचनाध्याहारेण** विग्रहः प्रतिभाति तच्चोदाहरणबहुत्वेन 'तुल्यत्वात्क्रिययोर्न' ति सूत्रोक्तक्रियापरामर्शितच्छब्दोपात्तयागबहुत्वोपपत्तेः श्रुतस्यैव बहुवचनस्य तन्त्रेणोभयान्वये सम्भवत्यश्रुतैकवचनाध्याहारायोगात् अयुक्तमित्याशङ्क्य, त इति बहुवचनान्तविग्रहो दर्शितः।

सोमेन यजेतेत्यादौ गुणकर्मणोर्भिन्नपदोपादानेऽपि तावच्छुद्धस्य कर्मणोऽशक्यानुष्ठानत्वेन विध्ययोगात्सन्निकृष्टस्य शुद्धरूपेण विध्यसम्भवात् विशिष्टरूपेण च सम्भवात् रूपभेदेन युगपत्सम्भवासम्भवविरोधपरिहारोपपत्तेर्विशिष्टविधेरदुष्टत्वाभिधानार्थमविभागाद्विधानार्थ इति सूत्रावयवविधानार्थे लिङ्प्रत्यये गुणकर्मविध्योरविभागादित्येव व्याख्यातुमविभक्तरूपेण सकृदुच्चरितेन विधिनेत्युक्तम्। आग्नेयादिवाक्ये त्वेकस्मिन्नेव विधेयसमर्पके तद्धितान्ते शब्दे गुणकर्मविभागादित्येवं व्याख्यातुं विधेयसमर्पकेण तद्धितान्तेन

शब्देन सह गुणकर्मशब्दानामविभागात्सन्निकर्षविप्रकर्षविरोधाभावाभिधानायैकशब्दोपादानप्रदर्शनार्थम् । तद्धितान्तेन विधिनेति योज्यम् । हि शब्दः पादपूरणार्थः ।

ननु मान्त्रवर्णिकदेवतासंयोगान्यथानुपपत्त्या यागप्राप्तेरसिद्धऽन्याशिष्ठतेत्याशङ्क्य निराकरोति—**नेति** । संस्कारशब्देन स्मृतिहेतुसंस्कारोद्बोधार्थो मन्त्रो विवक्षितः । अष्टाकपालादिद्रव्यं देवतासंस्कारश्चाग्निमूर्द्धेत्यादिमन्त्रः तत्संयोगेन योऽत्र यागविधिः पूर्वपक्षिणोक्तः, स नोपपद्यत इत्यर्थः । यद्यपि पुरोडाशादीनां हविष्ट्वाद्यागसाधनत्वप्रतीतेर्यागानुमानमुक्तम् । तदपि निराकरिष्यत इति तावच्छब्देन सूचितम् ।

यद्वा यागविधिस्तावन्नोपपद्यते, ततश्च तन्नामत्वमनाशङ्क्य चतुरवत्तचोदनाविहितहोमतापि निराकरिष्यत इत्येवं तावच्छब्दो योज्यः । एतदेव प्रश्नपूर्वकमुपपादयति—**कथमिति** । ननु भावनाकाङ्क्षायां मन्त्रसम्बन्धस्योक्तत्वात् स्वरूपेण द्रव्यस्य मन्त्राकाङ्क्षानिरासो न युक्त इत्याशङ्क्याह—**नेति** । भावनाया अश्रुतत्वात् विध्यश्रवणाच्च तद्वशेनापि कल्पयितुमशक्यत्वात् अप्राप्तस्यापि च द्रव्यस्य भावनानिवेशं विना विधेयत्वायोगात् विधिवशेन भावनाकल्पने विधेरपि भावनाकल्प्यत्वेनेतरेतराश्रयं वक्तुं विध्यभावाभिधानम् । कथंचिद्भावनाकल्पनेऽपि धात्वर्थानवच्छिन्नायास्तस्या अनुष्ठातुमशक्यत्वान्मन्त्राकाङ्क्षानुपपत्तेर्मन्त्रान्वयादेव तद्वाच्यदेवतासंयोगेन यागाख्यधात्वर्थकल्पने चानुष्ठेयत्वसिद्धये धात्वर्थविशेषावच्छेदाधीनत्वात् मन्त्रान्वयस्येतरेतराश्रयापत्तेर्द्रव्यस्य स्वरूपेणैवाकाङ्क्षापद्यत इति सूचनार्थः कश्चिच्छब्दः । सामान्यतोऽपि पुरुषव्यापारो न विधीयते, किमुत धात्वर्थावच्छिन्न इत्यर्थः । नन्वष्टाकपालभवनस्यासिद्धत्वेनानुष्ठेयत्वामन्त्राकाङ्क्षा भविष्यतीत्याशङ्क्य **'न चे'**त्युक्तम् । भवनक्रियायामसिद्धस्यैव कर्तृनियमात् सिद्धात्मकपुरुषानुष्ठेयत्वायोगान्न स्मारकापेक्षेत्याशयः ।

ननु द्रव्यस्यैव तर्ह्यनुष्ठात्प्राक् असिद्धत्वेनानुष्ठानापाद्यत्वात् स्मारकापेक्षा भविष्यतीत्याशङ्क्य - **नापीत्युक्तम्** । तस्याव्यापारात्मकत्वेनानुनिष्पादिततृप्त्यादिवत् साध्यत्वेऽपि अननुष्ठेयत्वात् न स्मारकापेक्षेत्याशयः । कथंचित्सत्यामपि द्रव्यस्य मन्त्राकाङ्क्षायां अग्न्यादिवाचिना मन्त्रेण सह सम्बन्धो न प्रतीयत इत्येवमुत्तरार्द्धं व्याचष्टे—**न चेति** । ननु पुरोडाशादिभिर्हविरात्मकत्वाद्यागसाधनत्वेनावगम्यमानैर्देवतापेक्षणात्तद्वाचिमन्त्राणामन्वयो भविष्यतीत्याशङ्क्याह—**न चेति** । पुरोडाशे यागः साध्यत्वेन नावधारित इत्युक्ते यागसम्बन्धाश्रयणेऽपि हविःशब्दाभिधेयत्वात् यागानुमानं भविष्यतीत्याशङ्क्य, हविष्ट्वमपि नावधारितमित्युक्तम् । श्लोकं व्याचष्टे—**यदि होति** । भावनोपादाने सति तस्या धात्वर्थविशेषापेक्षायां कथञ्चिद्यागत्वावधारणे शक्येत, न तु तदस्तीति दर्शयितुं भवतिशब्देन भावनानुपादानाद्यागत्वं नोक्तमित्युक्तम् । हविःशब्दस्तु यागान्वयं विना न क्वचिदस्तीत्यर्थः ।

हविष्ट्वाभावादेव चतुरवत्तचोदनाविहितहोमनामतापि निरस्तेत्याह—**एतेनेति** । नन्वाघारादिवद्यागत्वावधारणात् प्रागपि मान्त्रवर्णिकदेवताकल्पनं भविष्यतीत्या-

शङ्क्याह—**आघारादिषु त्विति**। उपांशुयाजे तु वाचनिकविनियोगाभावेऽपि यागात्मकत्वात् सामान्यतो देवतान्वये सिद्धे मन्त्रवर्णाद्धि शेषमात्रावधारणं युक्तम्, न तु श्रुत्यविनियुक्तस्य मन्त्रस्यापूर्वदेवताकल्पकत्वं क्वचिदस्तीत्याशयः। तद्धितेन देवतान्वयसम्भवे तद्धितचतुर्थीमन्त्रवर्णानां देवतान्वयप्रमाणानां मध्ये जघन्येन मन्त्रवर्णेन देवताकल्पनं न युक्तमित्याह—**सर्वजघन्यश्चेति**। न च तद्धितसम्भवे मन्त्रवर्णस्य प्रामाण्यमप्यस्तीत्याह—**अन्यथेति**। मन्त्राङ्गत्वान्यथानुपपत्तिस्तद्धितेन देवतान्वयेऽवधारिते नास्तीत्यर्थः। ननु तद्धितेन देवतान्वयावगमे लिङ्गादेव मन्त्रप्राप्तेर्मन्त्राम्नानमनर्थकं स्यादित्याशङ्कां निराकुर्वन् सिद्धान्तमुपसंहरति—**तस्मादिति**। सामान्यतोऽग्निदेवत्यमन्त्रप्राप्तावप्यग्निमूर्द्धेत्यादिमन्त्रविशेषार्थं क्रमाम्नानमित्यर्थः। अविद्यमानमपि क्रमं पूर्वपक्ष्यारोपितमभ्युपगम्य; परिहारसामर्थ्यप्रदर्शनार्थः क्रमशब्दः।

ननु तद्धितेन देवतान्वये कृतेऽपि तस्याविधायकत्वाद्विधीयेरन्नित्युक्तमित्याशङ्क्य, भवति इति पञ्चमलकाररूपेणाख्यातशब्देनेत्युक्तम्। नन्वस्य वर्त्तमानापदेशसन्दिग्धत्वात् पञ्चमलकारत्वनिश्चयः कथमित्याशङ्क्य अर्थवादेत्युक्तम्। 'अङ्गिरसो वा इत उत्तमाः स्वर्गं लोकमायन्नित्याद्यर्थवादान्वयान्यथानुपपत्त्या विधित्वनिश्चयः। अन्यथाऽस्यार्थवादत्वासम्भवेनानर्थक्यापत्तेरित्याशयः। नन्वेवं सति विधिगौरवक्लेशः स्यादित्याशङ्क्याह—**अगत्या चेति**। विधानार्थं इति भाष्यं तद्धितस्याख्यातकृत्यत्वाभावेनाविधायकत्वादयुक्तमाशङ्क्य व्याचष्टे—**विधानार्थेति**। अविभागादिति सूत्रावयवव्याख्यानार्थमविभक्ता हीति भाष्यावयवं तद्धितान्तर्गत्यभिधानार्थत्वेन तत्सापेक्षत्वात् पश्चाद्व्याचष्टे—**सर्वं चेति**। एतदेवोपपादयति—**देवतेति**। नन्वाग्नेयतेति भावप्रत्ययात् सम्बन्धस्यापि अविभक्ततोक्ता प्रतिभाति। सा च सम्बन्धवाच्यत्वस्य अरुणाधिकरणे निषेत्स्यमानत्वादयुक्तेत्याशङ्क्याह—**सम्बन्धोऽपीति**। नन्वेवमप्यष्टाकपालशब्दवाच्यस्याष्टत्वकपाल-तदधिकरणसंस्कारोपसर्जनस्य पुरोडाशस्याग्नेयादिशब्दानन्तर्गतत्वादष्टाकपालस्येति विशेषणाभिधानमयुक्तमित्याशङ्क्याह—**तदिति**। नैव हि द्रव्यमात्रस्य तद्धितैर्देवतोच्यते, अस्य शब्दाभिधेयस्य विशेषस्यैव देवतेत्यनेन न्यायेनाष्टाकपालपदार्थोऽपि तद्धितान्त एव। शब्दान्तर्गत इत्यर्थः। 'स एष' इति भाष्येण यागस्य तद्धितान्तर्गतिरुक्ता। सा यागं विनापि यथाकथञ्चित्सिद्धाग्नेयत्वसङ्कीर्त्तनोपपत्तेरयुक्तेत्याशङ्क्याग्नेयस्य भाव्यमानत्वं यागं विना न सिध्यतीति दर्शयितुं भावनान्तर्गतिपूर्वकं यागान्तर्गतिमाह—**द्रव्यस्येति**। अन्तर्गतेति शेषः। पुरुषव्यापारस्य भावनाया यागावच्छेदकत्वाद्विशेषः न व्यक्तित्वेन। सर्वान्तर्गत्यभिधानस्य पूर्वपक्षोक्तवाक्यभेदपरिहारं प्रयोजनमाह—**ततश्चेति**। तद्धितान्तपदेनोपात्तस्यार्थस्य विधिनेति विग्रहः। भिन्नपदोपादानाभावान्न वाक्यभेदापत्तिरित्याशयः।

नन्वेकपदोपादानेऽप्यनेकार्थस्य विधानाच्चित्रत्वस्त्रीत्वविधाविव वाक्यभेदः स्यादेवेत्याशङ्क्याह—**भावनेति**। यागो हि विहितो भवतीति भाष्ये यागशब्दो यागावच्छिन्न-

भावनाभिप्रायेणेत्याशयः । स एवमिति भाष्यं व्याचष्टे - **तत इति** । ननु सम्बन्धो होति भाष्येण सम्बन्धविधानान्यथानुपपत्त्या सम्बन्धिनोर्द्रव्यदेवतयोर्विधानाक्षेपस्योक्तत्वात् भाष्यविरुद्धं भावनाविधानाभिधानमित्याशङ्क्याह—**सर्वेति** । सर्वैर्द्धात्वर्थकारकैः सम्बध्यत इति कर्मव्युपत्त्या भावना सम्बन्धशब्देनोक्तेत्यर्थः । किमित्येवं व्याख्यायत इत्यपेक्षायामाह—**न होति** । विशिष्टविधावप्यन्यतो लभ्यमानस्याविधानान्न गौरवलक्षणवाक्यभेदापत्तिरित्यभिधानार्थो 'न चेदन्येन शिष्टा' इति सूत्रावयवः । अष्टासिन्नित्यादिभाष्येणानेककपालाधिकरणसंस्कारस्य पुरोडाशादन्यत्राप्रसिद्धेः ते पुरोडाशं कूर्मं भूत्वा सर्पन्तमपश्यन्नित्यर्थवादावगतस्य पुरोडाशस्याष्टसंख्यकपालाधिकरणसंस्कारविधिनैव प्राप्तेः कपालानां तद्बहुत्वस्य; तदधिकरणस्य संस्कारस्य च कपालेषु श्रपयतीति वाक्यान्तरादेव प्राप्तेर्बहुत्वविशिष्टत्वमात्रविशिष्टद्रव्यविशेषाग्न्याख्यदेवताविशिष्टयागभावनाविधानान्नातिगौरवापत्तिरित्येवं व्याख्यातः ।

तत्राविभागादित्यावृत्तिलक्षणवाक्यभेदपरिहारार्थो हेतुः । न चेदिति तु गौरवलक्षणवाक्यभेदपरिहारार्थ इति हेतुद्वयस्य विविक्तविषयत्वं दर्शयितुमाह—**अविभागादिति** । तद्धितान्तोक्तेन देवताविशिष्टेन द्रव्येण सम्बन्धस्य विभागात् विना वैशिष्ट्यासिद्धेरर्थात् सम्बन्धाक्षेपः ।

न क्रियाकर्तृसम्बन्धादृते सम्बन्धनं क्वचिदिति ।

अनेन च न्यायेन क्रियागर्भत्वात्सर्वसम्बन्धानां देवतोद्देशपूर्वकद्रव्यत्यागाच्च विना द्रव्यस्य देवतान्वयायोगाद्यागाख्यस्य क्रियाविशेषस्य द्रव्यदेवतासम्बन्धाविभागात्तेनार्थादाक्षेपः । यागस्य चाभावितस्यानिष्पत्तेर्भावनाया यागाविभागात्तेनार्थादाक्षेप इत्यर्थः । अन्यथानुपपत्त्यधीनत्वाच्चार्थाक्षेपस्यान्यतः प्राप्तस्य कपालादेरनाक्षेपान्नातिगौरवापत्तिरित्यदुष्टो विशिष्टविधिरित्याशयः ।

यत्तु विधित्सितस्यान्यतः प्राप्तौ तद्वाचिनः शब्दस्य नामधेयतेति एतदर्थपरत्वेन न चेदित्यवयवस्य पाठपूर्वकं व्याख्यानान्तरं भाष्यकृता कृतम् । तन्नामधेयत्वस्य पूर्वपक्षिणोऽप्यनभिमतत्वात्तत्प्रख्यं चान्यशास्त्रमित्यनेन च पौनरुक्त्यापत्तेरयुक्तमित्युपेक्षितं वार्तिककृतेति, विशिष्टविधिव्युत्पादनार्थतैवाऽस्याधिरणस्यावसीयते ॥ ९ ॥

इति षष्ठमाग्नेयाधिकरणम्

भा० प्र०—पूर्व अधिकरण में तत्प्रख्यन्याय के अनुसार, 'आधारमाधारयति' 'समिधो यजते', 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत', 'ज्योतिष्टोमेन स्वर्गकामो यजेत', 'वाजपेयेन स्वाराज्यकामो यजेत' इत्यादि में आधार समिध, दर्शपूर्णमास, ज्योतिष्टोम, वाजपेय आदि को कर्मनामधेय माना है। इसी प्रकार 'यदाग्नेयोऽष्टाकपालोऽमावास्यायां

---

१. असंख्येति २ पु० पा ।

पौर्णमास्याञ्चाच्युतो भवति' (तै० सं० २-६-३) जो आठ कपालो से संस्कृत पुरोडाश अमावस्या और पौर्णमासी में च्युत नहीं होता है। इस वाक्य में 'आग्नेयः' यह कर्मनामधेय है या गुणविधि है। यदि इसे गुणविधि माना जाय तो अनेक गुणों अग्नि पुरोडाश एवं कपाल का विधान मानना पड़ेगा, अतः, ये गुणविधि नहीं हैं, कर्म का नामधेय है—यही विचार का आधार है। भाष्य में आग्नेय आदि वचनों के साथ अग्निषोमीय पद का भी निर्देश होने से वहाँ भी यह आशङ्का है। इन पदों में यौगिक अर्थ के आधार पर शङ्का स्वभाविक है। पूर्वपक्षियों ने कहा है जिस कर्म में अग्नि को उद्देश्य कर जो होत्र अर्थात् होम किया जाता है—इस तरह अग्निहोत्र में प्रदर्शित यौगिक अर्थ के अनुसार अग्निहोत्र यह कर्म का नामधेय होना चाहिए। आग्नेय शब्द का यौगिक अर्थ जिसमें अग्नि का सम्बन्ध है, अर्थात् 'अग्नेः इदम्' इस यौगिक अर्थ के अनुसार 'तस्येदम्' इस पाणिनिसूत्र से ष्यन् प्रत्यय कर सिद्ध होता है—अतः, इसे कर्म का ही नामधेय होना चाहिए।

युधिष्ठिरमीमांसक ने 'अग्निर्देवताऽस्य पुरोडाशस्य आग्नेयः' इस यौगिक अर्थ के अनुसार कर्म का नामधेय माना है। इसी प्रकार अष्टसु कपालेषु संस्कृतः पुरोडाशः इस विग्रह के अनुसार प्रदर्शित किया है।

इसके समाधन में सिद्धान्तियों ने कहा है कि 'यदाग्नेयः' इत्यादि वाक्य में 'आग्नेयः' यह शब्द यदि कर्म का नामधेय माना जाय तो कर्म देवता से विहीन हो जायगा, फलतः याग ही नहीं हो सकता है। क्योंकि देवता के उद्देश्य से द्रव्यादि का त्याग ही याग शब्द से कहा जाता है। किन्तु 'अग्निहोत्रं जुहोति' इस स्थल में अन्य वचनों से देवता की प्राप्ति होने से, उसमें शब्द को नामधेय न मानने पर उसका अन्वय नहीं हो सकता है। प्रकृत स्थल में 'यदाग्नेय' इत्यादि वाक्य को छोड़कर ऐसा एक भी वाक्य उपलब्ध नहीं है, जिससे देवता की प्राप्ति हो सकती है। इसलिए 'आग्नेयः' यह शब्द अग्निः देवता अस्य, अग्नि जिसका देवता है। इस अर्थ में अग्नि शब्द से तद्धित प्रत्यय होता है, इसके द्वारा देवता का कर्म में विधान होता है। इसी प्रकार 'अष्टकपालः' यह शब्द भी देवता का विधान करता है। अष्टसु कपालेषु संस्कृतः, आठ कपालों में (मिट्टी के पात्र में) संस्कृत द्रव्य पुरोडाश आदि अष्टाकपाल है। इस प्रकार प्रत्यय से समुद्भूत यौगिक अर्थ से द्रव्य की प्राप्ति होती है। इस स्थल में विधीयमान कर्म अन्य वचनों से अप्राप्त होने से अग्नि देवता और अष्टाकपाल द्रव्य इन दो गुणों से विशिष्ट रूप में एक वाक्य के द्वारा विहित होने से ऐसे स्थलों में वाक्य भेद नहीं हो सकता है। इसीलिए, सूत्रकार ने कहा है 'न चेत् अन्येन शिष्टाः'। प्राप्त अर्थात् अन्य वचनों से विहित कर्म में एक से अधिक गुण का विधान नहीं हो सकता है, क्योंकि, ऐसा होने पर वाक्यभेद की आपत्ति है, किन्तु, अप्राप्त अर्थात् अन्य वचनों से अविहित कर्म में एक से अधिक गुणों का विधान होने पर भी कोई दोष नहीं होता

है। क्योंकि, इन स्थलों में विशिष्ट का विधान होता है, विशेषण के विहित न होने पर विशिष्ट का विधान उपपन्न नहीं हो सकता है, अतः विशेषण अर्थापत्ति के आधार पर विहित होता है और जो अर्थापत्ति के द्वारा विहित होता है, उसमें अन्य वाक्य की आवृत्ति नहीं होती है, इसलिए वाक्यभेद भी नहीं होता है। अन्य पक्ष में प्राप्त कर्म में विशिष्ट विधि नहीं है, इसलिए एक से अधिक गुणों का विधान नहीं होता है, क्योंकि, उसमें प्रत्येक का अन्य भिन्न प्रयत्न आवश्यक होने से वाक्यभेद होता है, इसीलिए कहा है :—

प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः।
अप्राप्ते तु विधीयन्ते बहवोऽप्येकं यत्नतः॥

प्रकृत में कपालेषु श्रयति (कपालों पर पकाता है) इसके द्वारा अन्य से पक्व का द्रव्य का ग्रहण नहीं होता है, इसलिए, गुणविशिष्ट विधान पक्ष में वाक्यभेद नहीं होता है, क्योंकि, यहाँ गुण का अन्य से विधान नहीं हुआ है। जहाँ अन्य से गुण का विधान होता है, वहाँ कर्म न होता है। जैसे, अग्निहोत्रं जुहोति में यदग्नेय च प्रजापतये सायं जुहोति में अग्निदेवता और दध्ना जुहोति, पयसा जुहोति से द्रव्य का विधान होने से अग्निहोत्र कर्म का नाम है।

'तद्गुणाः' = वह कर्म एवं गुणः = द्रव्यदेवतारूप गुण, 'तु' = किन्तु 'विधीयेरन्' = विधीयमान (विहित) होते हैं। 'विधानार्थे' = विधि का अर्थ विधिवाच्य लिङ्प्रत्यय में, 'अविभागात्' = विभाग अर्थात् विशेष न होने से अर्थात् केवल याग का ही अथ वा द्रव्य का ही अथ वा देवता का ही विधान किया जायेगा। इसप्रकार कोई भी विशेष नियम नहीं है, अतः, न चेत् अन्येन शिष्टाः' = वे कर्म द्रव्य, एवं देवता 'चेत्' = अर्थात् यदि, 'अन्येन' = अर्थ अन्यविधि के द्वारा 'न शिष्टाः' = अर्थ उपदिष्ट अर्थात् विहित नहीं हो। यदि भाग रूप कर्म द्रव्य, देवतारूप गुण ये सब अन्य किसी विधि के द्वारा विहित नहीं होता है, तो यागादिरूप कर्म एवं द्रव्य और देवतारूप गुणों का विधान होता है—यही सिद्धान्त है॥ ९॥

इति आग्याधिकरण

अथ सप्तमं बर्हिराज्याधिकरणम्

[७] बर्हिराज्ययोरसंस्कारे शब्दलाभादतच्छब्दः॥१०॥ सि०।

शा० भा०—बर्हिराज्ययोः, पुरोडाशे च संदेहः—किमेते संस्कारशब्दा उत जातिशब्दा[1] इति। संस्कारशब्दा इति ब्रूमः—संस्कृतेषु तृणेषु बर्हिःशब्दमुपचरन्ति सर्वत्र, नासंस्कृतेषु। संस्कृते च घृते आज्यशब्दम्। तथा संस्कृते

---

१ ब. जातिनिमित्ता।

पिष्टे पुरोडाशशब्दम्। नन्वसंस्कृतेऽपि कस्मिंश्चिद्देश उपचर्यते। यथा बर्हिरादाय गावो गता इति भवन्ति वक्तारः। तथा, आज्यं क्रय्यमिति, पुरोडाशेन मे माता प्रहेलकं ददातीति। सादृश्यात्तेषु प्रयोगः। यथोपशये यूपशब्दः। कुत एतत्? यत एकदेशे हि[1] शब्दप्रयोगः। तस्मात् संस्कारशब्दा इत्येवं प्राप्तम् एवं प्राप्ते।

ब्रूमः—बर्हिरादिष्वसंस्कृतेष्वपि। शब्दालाभान्न संस्कारशब्दाः। ननूक्तं सादृश्यादेकदेशे भविष्यन्ति[2]। तन्न। प्रसिद्धे हि संस्कारशब्दत्वे, सादृश्यादिति शक्यते वक्तुम्। तच्चाप्रसिद्धम्। कथम्? बर्हिरादिशब्दैरुद्दिश्य संस्कारा दिधीयन्ते। तेन सत्सु शब्देषु संस्कारैर्भवितव्यम्, सति च संस्कारे शब्दलाभ इतीतरेतराश्रयं भवति। न चाविहिताः संस्कारा भवन्ति, यानालोच्य लोकः प्रयुञ्जीत। तस्मान्न लोकाः संस्कृतेषु बर्हिरादीन् प्रयुञ्जते। तत एकदेशेऽपि जातिनिमित्ता दृष्टाः सर्वत्र जातिनिमित्ता भवितुमर्हन्ति। न चालौकिकानां सतां वेदादेव पूर्वोत्तरपदसम्बन्धमनपेक्ष्य शक्यतेऽर्थोऽध्यवसातुम्। पूर्वोत्तरपदे अनर्थके मा भूतामित्येवम्, स परिकल्प्यते। अशक्यस्त्वनवगम्यमानः परिकल्पयितुम्। अर्थवती च ते पदे पूर्वोत्तरे लौकिकेनासंस्कृतप्रयोगेण भविष्यतः। तस्माज्जातिशब्दा एवं जातीयकाः।

प्रयोजनं 'बर्हिषा यूपावटमवस्तृणाति' इति संस्कृतैरेव स्मरितव्यं[3] यदि[4] पूर्वः पक्षः, विपरीतं सिद्धान्ते॥ १०॥

इति सप्तमं बर्हिरादिशब्दानां जातिवाचित्वाऽधिकरणम्

भा० वि०—यद्यप्यस्याश्चिन्तायाः प्रकृतगुणविधिनामधेयचिन्तारूपत्वभावात् पूर्वाधिकरणकृतविशिष्टविधिव्युत्पादनवच्च तच्छेषत्वाभावान्न प्रकरणसङ्गतिः तथापि कर्मनामधेयप्रसङ्गेन द्रव्यनामस्वपि बर्हिरादिशब्देषु संस्कारनिमित्तत्वजातिनिमित्तत्वचिन्तायाः प्रासङ्गिकीं सङ्गतिमभिप्रेत्य विषयसंशयौ दर्शयति—बर्हिरित्यादिना। यूपादिवद्वचनव्यक्तिविपर्यासाश्रयणसंभवासंभवसन्देहस्य सन्देहहेतोः संस्कृतप्रयोगबलीयस्त्वस्य च पूर्वपक्षहेतोस्संस्कारनिमित्तत्वे परस्पराश्रयपरिहारासंभवस्य च सिद्धान्तहेतोस्तुल्यत्वात् बर्हिराज्यग्रहणमुपलक्षणार्थमितिदर्शयितुं पुरोडाशग्रहणम्—एते इति। बर्हिरादिशब्द इत्यर्थः। संस्कारशब्दो लवणादिसंस्कारनिमित्तशब्द इत्यर्थः। पूर्वपक्षमाह—संस्कारेति। उत्पवनादिसंस्कारसंस्कृत आज्यशब्दमुपचरन्ति प्रयुञ्जते। कपालाधिकरणसंस्कारसंस्कृते

१ ब. स शब्द। २. भविष्यन्ति इति।
३. ब. स्वरितव्यम्। ४. ब. यथा।

च पिष्टपिण्डे पुरोडाशशब्दमित्यर्थः। सर्वत्रेत्येतदयुक्तमिति चोदयति—**नन्विति**। असंस्कृततृणादिविषयप्रयोगस्यादिशब्देन (शिष्टत्वेन) दौर्बल्याद्याज्ञिकप्रसिद्धि-बाधकत्वासंभवमभिप्रेत्यान्यथासिद्धिं वदन् परिहरति—**नैतदेवमिति**[1]। उपशयो नाम लक्षणादिसंस्कारशून्यो दारुविशेषो यूपैकादशिन्यां प्रसिद्धः। तत्र यथा अयूपेऽपि संस्कृतयूपसादृश्यात् यूपशब्दः तथात्रापि संस्कृतर्बाहरादिसादृश्यात्त-च्छब्दप्रयोग इत्यर्थः।

ननु संस्कृतप्रयोगस्यैव सादृश्यनिमित्तत्वं किं न स्यात्, इति चोदयति—**कुत इति**। असंस्कृतप्रयोगस्य क्वाचित्कतया दौर्बल्यात्तस्यैवान्यथासिद्धत्वमिति परिहरति—**यत इति**।

ननु र्बाहर्लुनातीत्यादौ र्बाहराद्यनुवादेन विधीयमानस्य संस्कारस्य प्राक्सिद्ध-र्बाहराद्यपेक्षत्वान्न र्बाहरादिशब्दप्रवृत्तिनिमित्तता इतरेतराश्रयप्रसङ्गादित्याशङ्कां निरस्यन्नुपसंहरति—**तस्मादिति**। यथा यूपं छिनत्तीत्यादौ प्रसिद्धयूपासंभवेन यो यूपः तं छिनत्ति इति वचनव्यक्त्यसंभवात् छेदनसंस्कृतो यूपशब्दार्थं इति वचनव्यक्त्याश्रयणं तथेहापि वचनव्यक्तिविपर्यासाश्रयणेन र्बाहरादिशब्दस्य लवणादिसंस्कृततृणादिनामत्वावधारणात् नेतरेतराश्रयप्रसङ्गोऽपीतिभावः।

सूत्रं व्याकुर्वन् सिद्धान्तमाह—**एवमिति**। संस्काराहितेष्वपि र्बाहरादिषु जातिमात्रनिमित्ततया प्रयुक्तस्य र्बाहरादिशब्दस्य संस्कृतेष्वपि जात्यनवगमेन शब्दलाभान्नायं संस्कारशब्द इत्यर्थः। असंस्कृतेष्वपि तृणादिषु न जातिनिमित्तः प्रयोगः। किन्तु सादृश्यनिमित्त इत्युक्तं स्मारयति—**नन्विति**। एकदेशे कस्मि-श्चिद्देश इत्यर्थः। यदि शास्त्रस्थानां याज्ञिकानां प्रयोगः संस्कारनिमित्तः सिध्येत्, तर्ह्यशास्त्रस्थानां क्वाचित्कः प्रयोगः सादृश्यादित्युच्येत, शास्त्रस्थप्रयोगस्यैव तु संस्कारनिमित्तत्वानवसायान्नेतरस्य सादृश्यनिमित्तता कल्प्येति परिहरति—**तन्नेत्यादिना**। तच्चेति चोऽवधारणे। संस्कारशब्दत्वमेवेत्यर्थः; प्रश्नपूर्वकं प्रसिद्धिमुपपादयति—**कथमित्यादिना**। र्बाहर्लुनातीत्यादौ र्बाहरादिशब्दैरुद्दिश्य लवणादिसंस्कारा विधीयन्तां ततः किमत आह—**तेन सत्स्विति**। प्रवृत्तेष्वि-त्यर्थः। विधिपूर्वकत्वाल्लवणाद्यनुष्ठानस्येति भावः। शब्दाः संस्कारशब्दाः र्बाहरादिशब्दाः प्रवर्तन्त इत्यर्थः।

ननु संस्कारविधितः प्रागेव केनचिद्यदृच्छया लवणादिभिस्संस्कृतं कुशादि-र्बाहरादिशब्दैरुद्दिश्य संस्कारविधिसंभवान्नेतरेतराश्रयमित्याशङ्क्याह—**न चेति**। स्वाश्रयस्यापूर्वसाधनत्वयोग्यताधानार्थायाः क्रियायास्संस्कारशब्दवाच्यत्वाद्विध्य-भावे च तादर्थ्यानवधारणाद्यदृच्छया लवणादौ कृतेऽपि संस्कारत्वाभावेन

१. नैतदेवमिति भाष्ये नास्ति।

बर्हिरादिशब्दप्रवृत्तौ निमित्तत्वायोगात् अपरिहार्यमितरेतराश्रयमित्यर्थः । यस्माद्विधिनिबन्धनस्संस्कारत्वावगमः, तस्मान्न लौकिका उद्देश्यभूता बर्हिरादिशब्दास्संस्कारनिमित्ता इत्याह—**तस्मादिति** । एवं लौकिकनामसंस्कारनिमित्तानां जातिनिमित्तत्वे य एव लौकिकास्त एव वैदिका इति न्यायेन वैदिकानामपि जातिनिमित्तत्वं न्याय्यमित्याह—**तत इति** ।

यत्तु यूपं छिनत्तीत्यादाविव वचनव्यक्तिविपर्यासाश्रयणमुक्तं तद्दूषयति—**न चालौकिकानामिति** । लोकप्रसिद्धार्थरहितानां बर्हिरादिशब्दानां पूर्वोत्तरपदयोग्यतामालोच्येत्यर्थः । कस्मादत आह—**पूर्वोत्तरे इति** । अनवगम्यमानः अन्यथानुपपद्यमानार्थरहित इति यावत् ।···(ग्रन्थपातः)···वत्वरूपा कथमन्यथार्थवत्त्वम् ? तत्राह—**अर्थवती चेति** । असंस्कृते लौकिकानां प्रयोगविषयेऽर्थेऽर्थवती भविष्यत इत्यर्थः । यूपं छिनत्तीत्यादौ लोकसिद्धस्यार्थस्याभावाद्युक्तं वचनव्यक्तिविपर्यासाश्रयणम् । अत्र तु बर्हिरादेः लोकतोऽपि लभ्यमानत्वेन श्रुतार्थलाभान्न विपर्यासाश्रयणं युक्तमित्यर्थः । यस्माल्लोकतोऽर्थाध्यवसायः तस्मादित्युपसंहरति—विचारप्रयोजनं पूर्वपक्षसिद्धान्ते विभागेनाह—**प्रयोजनमिति** ॥ १० ॥

इति बर्हिराज्याधिकरणम् ।

त० वा०—नामधेयप्रस्तावेन द्रव्यनामसु निमित्तं प्रत्यधिकरणत्रयमारभ्यते । तुल्यहेतुत्वापुरोडाशोऽप्युदाहृतः । तत्र 'शास्त्रस्था वा तन्निमित्तत्वात्' इति याज्ञिकानां संस्कृतेषु प्रयोगात्सार्वत्रिकत्वादविगीतत्वाच्च संस्कारनिमित्तता ।

तथा हि—

पुरोडाशादिभिर्लोके व्यवहारो न दृश्यते ।
तस्माद्यूपादिवद्वेदात्तेषां संस्कारहेतुता ॥

सिद्धान्तः

तन्नास्ति । कुतः ?

एकदेशेऽपि यो दृष्टः शब्दो जातिनिबन्धनः ।
तदत्यागान्न तस्यास्ति निमित्तान्तरकल्पना ॥

य एव लौकिकाः शब्दास्त पर वैदिकाः त एवामीषामर्था इति स्थितत्वाल्लोकप्रसिद्धिप्रतीक्षे वेदे यत्रैकदेशेऽपि जातिनिमित्तता लभ्यते, न तत्र पुनर्निमित्तान्तरशक्तिकल्पना सम्भवति । संस्कृतेष्वपि जातेरनपगमात्, तन्निमित्ततातिक्रमो न शक्यो वक्तुम् । अतश्च शास्त्रस्थैरप्यविरोधान्न बाधः ।

किं च—

वेदेनापि च संस्कारात्प्रागेव च्छेदनादिकात् ।
तद्विधौ जातिशब्दत्वमाश्रितं लोकसंमतम् ॥

तेन जातिमेते न व्यभिचरन्ति । व्यभिचरन्ति तु संस्कारान्, अविहितत्वात् लोकव्यवहारवेलायां संस्काराणामभावात् ।

न च यूपादितुल्यत्वमन्यथाऽप्युपपत्तितः ।
लोकादलभ्यमानार्थास्ते ह्यगत्या तथाऽऽश्रिताः ॥

यदि हि छेदनविधिवेलायाम्, बन्धनविधौ वा कश्चिल्लौकिकोऽर्थो लभ्येत, ततः किमेवं व्यवस्थितवचनव्यक्तिविपर्ययेण कल्प्येत यच्छिद्यते, स नूनं यूप इति । अस्ति च बर्हिरादेर्गतिः तस्मादतुल्यता ॥ १० ॥

इति सप्तमं बर्हिराज्याधिकरणम् ।

अथ सप्तमं बर्हिराज्याधिकरणम् ॥

न्या० सु०—बर्हिरादिशब्दो लवनादिसंस्कारनिमित्तः कुशात्वादिजातिनिमित्तो वेति चिन्तायाः प्रकृतगुणविधिनामधेयचिन्तारूपत्वाभावात् पूर्वाधिकरणकृतविशिष्टविध्युत्पादनवच्च तच्छेषत्वाभावान्न प्रकरणसङ्गतिरित्याशङ्क्य, प्रासङ्गिकीं प्रकरणसङ्गतिमाह—**नामधेयेति** । अनन्तरसङ्गतिस्त्वाग्नेयादिशब्दानां देवतोद्देशपूर्वकद्रव्यत्यागात्मकयागाख्यक्रियागर्भसम्बन्धनिमित्तदेवताविशिष्टद्रव्यवाचित्वात्तद्द्वारेण क्रियानिमित्तत्वेऽभिहिते बर्हिरादिशब्दानामपि संस्कारात्मकक्रियानिमित्तताऽस्त्युत, नेति विचारात् स्पष्टैवेति नोक्ता ।

पुरोडाशोदाहरणमुत्सूत्रत्वादयुक्तमाशङ्क्याह—**तुल्यहेतुत्वादिति** । यूपादित्वद्वचनव्यक्तिविपर्ययाश्रयणसम्भवासम्भवमस्य सन्देहहेतोः संस्कृतप्रयोगबलीयस्त्वस्य च पूर्वपक्षहेतोः संस्कारनिमित्तत्वे च परस्पराश्रयपरिहारासम्भवस्य च सिद्धान्तहेतोस्तुल्यत्वात् सूत्रे बर्हिराज्यग्रहणमुपलक्षणार्थमित्याशयः । सर्वत्रेति भाष्यावयवेन संस्कृतप्रयोगस्य सार्वत्रिकत्वं पूर्वपक्षोपपत्तित्वेनोक्तम् । नासंस्कृतेष्वित्यनेन चासंस्कृतप्रयोगाभावः । तदुभयमप्ययाज्ञिकदेशे संस्कृतेषु प्रयोगाभावादसंस्कृतेष्वपि च कस्मिंश्चिद्देशे प्रयोगादयुक्तमाशङ्क्य व्याचक्षाणः पूर्वपक्षमाह—**तत्रेति** । याज्ञिकप्रयोगोऽत्र विवक्षितः । सर्वे च याज्ञिकाः संस्कृतेष्वेव प्रयुञ्जते, नासंस्कृतेष्वित्याशयः । तस्य बलीयस्त्वाय शास्त्रस्था वेत्युक्तम् । पश्चासंस्कृतेषु क्वचित्प्रयोगः, स प्रादेशिकत्वेनाऽशिष्टस्थत्वेन च दौर्बल्यात्सादृश्योपपत्तेर्न याज्ञिकप्रयोगस्य विगीतत्वापादाने शक्त इत्येवमर्थत्वेन न त्वसंस्कृतेष्वपीत्याशङ्कानिरासार्थं 'सादृश्यादि'ति भाष्यं व्याख्यातुमविगीतत्वादित्युक्तम् ।

ननु बर्हिराद्यनुवादेन विधीयमानस्य संस्कारस्य प्राक्सिद्धबर्हिराद्यपेक्षत्वेनेतरेतराश्रयापत्तेर्न बर्हिरादिशब्दप्रवृत्तिनिमित्तता युक्तेत्याशङ्क्याह—**तथा हीति** । क्वचिद्देशे पुरोडाशादिशब्दैर्व्यवहारे सत्यप्यभियुक्तजने लोक्यते दृश्यते शब्दार्थसम्बन्धोऽनेनेति

व्युत्पत्त्या लोकशब्देन विवक्षिते । व्यवहाराभावाच्छिष्टप्रयोगविरोधे चाशिष्टप्रयोगस्याप्रामाण्यात् यद् बर्हिः, तल्लुनातीत्यादिवचनव्यक्त्यनुपपत्तेर्यल्लूयते तद् बर्हिरित्यादिविपरीतवचनव्यक्त्याश्रयणात् । पुरोडाशादिशब्दानां संस्कारहेतुतेत्यर्थः ।

यथा च पलाशे बध्नातीति प्रकृत्य यूपं छिनत्तीति श्रवणाच्छेदनस्य पलाशविषयत्वावधारणाच्छेदनसंस्कृतपलाशनामत्वं यूपशब्दस्यावसीयते, तथात्रापि 'दर्भैस्तृणीत हरितैः सुपर्णैरिति बर्हिस्तरणार्थे मन्त्रे कुशवाचिदर्भशब्दश्रवणात् वर्हिःशब्दस्य लवनादिसंस्कृतकुशनामत्वावधारणात् । पिष्टानि संयौति पिण्डं करोतित्यादिश्रवणाच्च पुरोडाशशब्दस्य प्रथनादिसंस्कृतपिष्टापिण्डनामत्वावधारणादुत्पवनादीनां च घृतविषयत्वं कथंचिदुत्प्रेक्ष्याज्यशब्दस्योत्पवनादिसंस्कृतघृतनामत्वावधारणाद्यूपादिवद्वचनव्यक्तिविपर्ययाश्रवणमदुष्टमिति दृष्टान्तेन सूचितम् । संस्काररहिते कुशादिजातिमात्रे वर्हिरादिशब्दस्य क्वचित्प्रयुक्तस्य संस्कृतेष्वपि जात्यनपगमेन लाभान्नायं संस्कारशब्द इत्येवं सूत्रव्याख्यानार्थमेवं प्राप्त इति भाष्यं व्याचष्टे—**तविति** । शास्त्रस्य शब्दार्थसम्बन्धहेतुत्वाभावेन लोकप्रसिद्ध्यपेक्षत्वात् प्रादेशिकस्यापि प्रयोगस्य शास्त्रस्थप्रसिद्ध्या बाधो न युक्त इति वक्तुमेकदेशेऽपीत्युक्तम् ।

श्लोकं व्याचष्टे—**य एवेति** । ननूक्तमिति भाष्येणासंस्कृतेषु सादृश्यात् प्रयोगोपपत्तिं पूर्वपक्षोक्तामनुभाष्य 'तन्नेत्य'नेन संस्कारशब्दत्वप्रसिद्धेः सादृश्यनिमित्तप्रयोगकल्पना न युक्तेत्युक्तम् । तदतिस्पष्टत्वादव्याख्याय कथमिति प्रश्नपूर्वकमप्रसिद्ध्युपपादनार्थं वर्हिरित्यादिभाष्यम् । असंस्कृतेष्वपि शब्दलाभादित्यनेनैकस्या युक्तेरुक्तत्वाद्युक्त्यन्तरसमुच्चयार्थत्वेन व्याचष्टे—**किं चेति** । जातिशब्दत्वाभावे 'पलाशे बध्नाती'तिवत्कुशादीनामप्रकृतत्वेन संस्कारान्वयाज्ञानात् मन्त्रस्य च श्रुत्यविनियुक्तत्वेन स्वार्थसमवायकल्पकत्वानुपपत्तेस्तद्वशेनापि लवनादेः कुशविषयत्वाज्ञानात्, उत्पवनादीनां च घृतविषयत्वोत्प्रेक्षायाः प्रापकानुपलम्भेनायोगात्, प्रथनादीनां च कथंचित्पिष्टपिण्डविषयत्वज्ञानसम्भवेऽपि यूपकार्यपशुबन्धनार्थत्वेनेव पलाशस्य पुरोडाशकार्ययागार्थत्वेन पिष्टपिण्डस्याश्रवणात् पुरोडाशशब्दस्य प्रथनादिसंस्कृतपिष्टपिण्डनामत्वावधारणाशक्तेः पिष्टपिण्डप्रथनादिना पुरोडाशीकुर्यादिति वचनव्यक्त्याश्रयणायोगात् यद्बर्हिरादिशब्दवाच्यम्, तत्संस्कार्यम् । यच्च संस्क्रियते, तद्वर्हिरादिशब्दवाच्यमितीतरेतराश्रयस्यापरिहार्यत्वात् यल्लोकसम्मतं वर्हिरादिशब्दानां जातिशब्दत्वम्, तद्भेदेनापि लवनादिसंस्कारे विधेये तस्मात्प्रागाश्रितमित्यर्थः ।

ननु संस्कारविधितः प्रागेव केनचिद्यदृच्छया लवनादिभिः संस्कृतं कुशादि बर्हिरादिशब्दैरुद्दिश्य संस्कारविधिसम्भवान्नेतरेतराश्रयापत्तिरित्याशङ्कायाः, स्वाश्रयस्यापूर्वसाधनत्वयोग्यताधानार्थायाः क्रियायाः संस्कारशब्दवाच्याद्विध्यभावे च तादर्थ्यानवधारणात् यदृच्छया लवनादौ कृतेऽपि संस्कारस्याभावेन बर्हिरादिशब्दप्रवृत्तौ निमित्तत्वायोगात् अपरिहार्यमितरेतराश्रयमित्येवं निरासार्थं 'न चेत्या'दिभाष्यम् । आशङ्काया-

स्तुच्छत्वेऽप्यन्वयव्यतिरेकाभ्यां जातिवाचित्वावधारणार्थमिति व्याख्यातुमाह—**तेनेति**। येन संस्कारात् प्रागेव जातिशब्दत्वमाश्रितम्, तेनेत्यर्थः। सत्यां च गतौ वचनव्यक्ति-विपर्ययाङ्गीकरणमयुक्तमित्यभिधानार्थम्। न चालौकिकानां सतामित्यादिभाष्यं व्याचष्टे—**न चेति**। श्लोकं व्याचष्टे—**यदि हीति**।

प्रयोजनभाष्यं तु निर्देशात्तु विकृतावपूर्वस्यानधिकार(३-८-३१) इत्यत्र तृतीये यूपावटस्तरणार्थे वर्हिषि यूपाञ्जनार्थे चाज्ये लवनोत्पवनादयः संस्कारः कार्या न वेति विचारेण स्पष्टीकरिष्यमाणत्वान्न व्याख्यातम् ॥ १० ॥

इति सप्तमं वर्हिराज्याधिकरणम्।

भा० प्र०—कर्म के नामधेय के विचार के प्रसङ्ग में प्रयुक्त शब्दों के द्रव्यरूप अर्थ का भी विचार किया गया है, वर्हि, आज्य एवं पुरोडाश में सन्देह होता है कि ये शब्द मन्त्रों के द्वारा संस्कृत या पवित्र किये गये कुश, घृत और पीसे गये द्रव्य विशेष में प्रयोग किया जाता है असंस्कृत या अपवित्र में इसका व्यवहार नहीं किया जाता है किन्तु, इन शब्दों का लोक व्यवहार में असंस्कृत द्रव्य में भी व्यवहार देखा जाता है। जैसे 'वर्हिरादाय गावो गताः' वर्हि को खाकर गौएँ चली गई। 'आज्यं कुर्यामिति'= आज्य खरीदना है 'पुरोडाशेन मे माता प्रहेलकं ददाति' 'माता पुरोडाश देकर पहेली बुझने को कहती है।

अर्थात् याज्ञिकों के व्यवहार से मन्त्रों से संस्कृत अर्थ में ही इन शब्दों का प्रयोग होता है, किन्तु साधारण लोक में किसी कुश, किसी घृत, किसी प्रेषणद्रव्य के लिए इन शब्दों का व्यवहार करते हैं अतः, यह सन्देह होता है कि ये संस्कार के वाचक हैं या जातिवाचक संस्कृत असंस्कृत सभी द्रव्यों के वाचक हैं। पूर्वपक्षियों का कहना है कि म्लेच्छों के अनुसार प्रसिद्ध अर्थ की अपेक्षा आर्यों के प्रयोग के अनुसार जो अर्थ होते हैं वे अर्थात् आर्यों की प्रसिद्धि बलवती होती है, क्योंकि, यह निर्णय प्रथम अध्याय के तृतीयपाद के पञ्चम अधिकरण पृ० ४०३ से ४५२ (मी० द० प्र० आ०) में किया गया है। अतः, वर्हिः आज्य एवं पुरोडाश शब्द आर्यों अर्थात् याज्ञिकों के प्रयोग के अनुसार संस्कार युक्त कुश, घृत आदि अर्थ के ही वाचक हैं।

इसके समाधान में सिद्धान्तियों का कहना है कि जाति की ही शब्द वाच्यता प्रथम अध्याय के तृतीयपाद के दशम अधिकरण में सूत्रादि में प्रतिपादित है, ऐसी स्थिति में वर्हिष्ट्व, आज्यत्व, पुरोडाशत्व जाति ही शब्द का प्रवृत्तिनिमित्त अर्थात् व्यवहार का साधन है। जाति को शब्द का प्रवृत्तिनिमित्त मानने पर जाति का आश्रय सभी व्यक्ति चाहे वह संस्कृत हो या असंस्कृत सभी तरह के कुश, वर्हिः एवं पुरोडाश में इन शब्दों का व्यवहार माना गया है। क्योंकि सभी में जातियाँ वर्तमान है।

प्रयोजन यह है कि इस विचार के अनुसार यज्ञ में वर्हिषा यूपावटमवस्तृणाति वर्हि से यूप के गड्ढे को जिसमें यूप को खड़ा करना है आच्छादित करता है आदि कतिपय स्थलों में वर्हिः शब्द का प्रयोग रहने पर भी असंस्कृत वर्हिः आदि से कर्म सम्पादन होगा।

आशय यह है कि, वर्हिः, आज्य एवं पुरोडाश आदि शब्द उन द्रव्यों में रहने वाली जाति के वाचक होने से इससे सभी का ग्रहण होता है। वर्हिष्ट्व कुश में रहने वाली जाति है, आज्यत्वं घृत में रहने वाली जाति है, यव व्रीहि आदि को पीस कर बनाए गये कूर्म की आकृति के कपाल श्रपित पिण्डविशेष पुरोडाश है, उसमें रहने वाली जाति पुरोडाशत्व है। जाति सभी व्यक्तियों में अव्यभिचरित है। अतः संस्कृत असंस्कृत सभी का ग्रहण होता है।

इस अधिकरण में आज्य शब्द को लौकिक घृतवाचक सिद्ध किया है। परन्तु ऐ० ब्रा० १।३ में लिखा है—**आज्यं वै देवानां सुरभि, घृतं मनुष्याणाम्, आयुतं पितॄणाम्**। अर्थात् देवों की सुगन्धि (= प्रिय) आज्य है, घृत मनुष्यों की सुरभि है, आयुत पित‧ों की। इनका लक्षण इस प्रकार किया है—'पिघला हुआ आज्य होता है, घनीभूत घृत कहलाता है, आधा पिघला आयुत होता है।[1] तै० सं० ६।१।१ में घृत देवों का, मस्तु = (थोड़ा पिघला) पितरों का, निष्पक्व=(अच्छे प्रकार से पका) मनुष्यों का प्रिय होता है[2]। वैद्यक शास्त्र में द्विगुण जल के साथ विलोडित दही को मस्तु कहा गया है। हमारे विचार में स्वयं पिघला अथवा अल्प उष्णता पर पिघला नवनीत, जिसमें छाछ का कुछ भाग पृथक् हो जाता है, और कुछ भाग रह जाता है, ऐसा घृत 'आज्य' कहलाता है। इस प्रकार का आज्य प्राचीन देवभूमि = हिमालय में रहने वाले देवों को प्रिय था (आज भी पार्वत्य प्रदेश में ऐसा ही घृत बनाया जाता है)। शीत के कारण यह पर्याप्त दिनों तक खराब नहीं होता। देवभूमि हिमालय से नीचे मैदान में रहने वाले निष्पक्व = अच्छे प्रकार पका हुआ, जिसमें छाछ का अंश न रहे, प्रिय होता है। क्योंकि निष्पक्व घृत उष्ण जलवायु में भी चिरस्थायी होता है। आयुत अथवा मस्तु = द्विगुण जल सहित विलोडित दधि पितरों वृद्धों वा मन्दाग्नि के रोगियों के लिए हितकर होता है। आधे पिघले अथवा थोड़े पिघले नवनीत में भी छाछ की मात्रा होने से निष्पक्व घृत की अपेक्षा वह सुपाच्य होता है। यज्ञ का उद्भव पहले देव जाति में हुआ था, उसी दृष्टि से **'आज्यं वै देवानां सुरभि'** यह ऐतरेय का वचन है। जब मैदानी भाग के मानवों मे यज्ञ आरम्भ हुए तो यज्ञीय कर्म में निष्पक्व घृत का ही

---

१. सर्पिर्विलीनमाज्यं स्याद् घनीभूतं घृतं विदुः।
विलीनार्धमायुतं तु नवनीतं यतो घृतम्॥
ऐ० ब्रा० व्याख्या १।३ षड्गुरु शिष्य।

२. घृतं वै देवानां मस्तु पितॄणां निष्पक्वं मनुष्याणाम्॥ तै० सं० ६।१।१

प्रयोग होने लगा। इसो का संकेत तैत्तिरीय श्रुति **घृतं वै देवानां** में है। अतः आज्य और घृत में मूलतः भेद होते हुए भी मानव यज्ञों में आज्य और घृत को पर्याय मानकर प्रयोग होने लगा। (मी० द० पृ० ३१५)

'र्वाहि राज्ययोः' = र्वाहिः एवं आज्य इन दो शब्दों का 'असंस्कारे' = संस्कारशून्य स्थल में भी, 'शब्दलाभात्' = शब्द के प्रयोग से दृष्ट होने से, 'अतच्छब्दः' = वह तत् शब्द अर्थात् संस्कारवाचक शब्द नहीं है। 'र्वाहिः' एवं 'आज्य' ये दो शब्द संस्कार-वाचक नहीं है, वरन् जातिवाचक है, क्योंकि संस्कारशून्य र्वाहिः आज्य एवं पुरोडाश शब्द का प्रयोग भी दृष्ट होता है ॥ १० ॥

इति सप्तम र्वाहिराज्याधिकरण ॥

अथाऽष्टमं प्रोक्षण्यधिकरणम्

[८] प्रोक्षणीष्वर्थसंयोगात् ॥ ११ ॥ सि०

शा० भा०—'प्रोक्षणीरासादय' इति श्रूयते। तत्र प्रोक्षणीशब्दं प्रति सन्देहः—किं संस्कारनिमित्तः, उत जातिनिमित्त, उत यौगिक इति। तत्र संस्कारेषु सत्सु दर्शनात्संस्कारशब्दतायामवगम्यमानायाम्, असंस्कृते शब्द-लाभाज्जातिशब्दः। असंस्कृतास्वेवाप्सु प्रोक्षणीभिरुद्वेजिताः स्म इति कस्मि-श्चिद्देशे भवन्ति वक्तारः। तेन जातिशब्द इति प्राप्ते।

यौगिक इत्युच्यते। कुतः? अर्थसंयोगात्। प्रोक्षण्य इत्युपसर्गधातुप्रत्यय-समुदायस्य जातिनिमित्तता प्रयोगादनुमीयते। सेचनसंयोगात्तूपसर्गधातु-करण-प्रत्ययसहितोऽप्सु प्रवर्तत[1] इति प्रसिद्धिरनुगृहीता भविष्यति। यदाऽन्यदपि सेचनं प्रोक्षणशब्देनोच्यते, तदा तत्संयोगादेवाप्सु[2] भविष्यतीति न समुदायार्थः कल्पयितुं शक्यते[3]। तस्माद् यौगिकः।

प्रयोजनम्, घृतं प्रोक्षणं भवति इति, यदि संस्कारशब्दः प्रोक्षणीरासादयेति प्रैषः। यदि जातिशब्दः, घृतमासादयेति। यदि यौगिकः प्रोक्षणमिति ॥ ११ ॥

इत्यष्टमं प्रोक्षण्याधकरणम्

भा० वि०—पूर्वाधिकरणसिद्धान्तन्यायेन संस्कारनिमित्तत्वनिरासेन जाति-निमित्तत्वमुपादाय प्रत्यवस्थानादनन्तरसङ्गतिमभिप्रेत्य विषयसंशयौ दर्शयति—**प्रोक्षणोरित्यादिना**। तत्र समुदायप्रसिद्ध्यात्मलाभसदसद्भावाभ्यां संशयः।

---

१. ब. वर्तत इति। २. ब. तद्योगादेवाप्सु।
३. ब. तत्र शक्यते।

पूर्वपक्षमाह—**संस्कारेष्विति।** उत्पवनादिसंस्कृतास्वप्सु क्वचित्प्रोक्षणी-शब्दप्रयोगेऽप्यसंस्कृतास्वपि दर्शनेन संस्कारनिमित्तत्वाभावाज्जातिशब्द इत्यर्थः। असंस्कृतासु प्रयोगमुपपादयति—**असंस्कृतास्वेवेति।**

नन्ववयवार्थनिमित्तत्वसंभवे कथं जातिनिमित्तत्वावधारणम्? अत आह—**तेनेति।** अवयवार्थद्वारेण विशिष्टार्थप्रतीतेः वाक्यादिव वाक्यार्थप्रतीतेः लाक्षणिकत्वात् समुदायप्रसिद्धेश्च वर्णमात्रलभ्यायाः श्रुतिस्थानीयतया बलवत्त्वाद्युक्तं जातिनिमित्तत्वावधारणमित्यर्थः।

सिद्धान्तमाह—**इति प्राप्त इति।** पूर्वसूत्रादनुषज्यमानेनातच्छब्द इत्यनेन संस्कारजातिनिमित्तत्वे निषेधे पारिशेष्यसिद्धं यौगिकत्वं यौगिक इत्यनेनोक्तम्। समुदायप्रसिद्धिबलीयस्त्वे स्थिते कथमवयवप्रसिध्याश्रयणमिति पृच्छति—**कुत इति।** सूत्रावयवेन परिहरति—**अर्थं इति।** तमेव व्याचष्टे—**प्रोक्षण्य इति।** अनुमीयते कल्प्यत इति यावत्। उपसर्गः प्रशब्दः धातुरूक्षतिः करणप्रत्ययस्तु ल्युट् प्रत्ययः। प्रसिद्धिरवयवप्रसिद्धिः। सेचनसम्बन्धादप्सु वर्तत इत्युपगमे तु प्रसिद्धिरनुगृहीता भवतीत्यर्थः। यदि समुदायप्रसिद्धिः क्लृप्ता स्यात्, स्यादबलीयसी। सा तु प्रयोगबलात्कल्प्या। प्रयोगस्य क्लृप्तावयवशक्त्यैवोपपत्तौ न समुदायशक्तिकल्पना युक्तेति न तद्बलीयस्त्वसिद्धिरिति भावः। सेचनसम्बन्धेन घृतादौ प्रोक्षणशब्दप्रयोगाच्चात्र सेचनयोगादेव वृत्तिरित्याह—**यदेति।** न च प्रकर्षेणोक्षणसाधनत्वस्य घृततैलादिसाधारण्येन प्रोक्षणीशब्दस्य जलजातिवाचित्वनियमसिद्धिरिति वाच्यम्, यतो यद्यपि प्रोक्षणमित्युक्ते द्रवद्रव्यमात्रं प्रतीयते तथापि प्रोक्षणीरिति बहुवचनयोगान्नित्यबहुवचनान्तस्त्रीलिङ्गाप्शब्दार्थ एव निश्चीयत इति न समुदायशक्तिकल्पना युक्तेत्याशयः।

सिद्धान्तमुपसंहरति—**तस्मादिति।** विचारप्रयोजनमाह—**प्रयोजनमिति।** यदि संस्कारशब्दः, तदा यत्र विकृतौ घृतं प्रोक्षणं भवतीति श्रूयते, तत्रातिदेशप्राप्तः प्रैषः प्रोक्षणीरासादयेत्यविकृत एव स्यात्। ईकारान्तस्यैव प्रोक्षणीशब्दस्य संस्कारनिमित्तत्वदर्शनात् इति योज्यम्। जातिशब्दत्वे तूहेन घृतमासादयेति प्रयोगः स्यादित्याह—**यदि जातिशब्द इति।** सिद्धान्ते तु यौगिकत्वेन लिङ्गानुसरणासम्भवात् प्रोक्षणमासादयेति प्रयोग इत्याह—**यदि यौगिक इति** ॥ ११ ॥

इति प्रोक्षण्यधिकरणम्।

त० वा०—ननु समुदायप्रसिद्धेः श्रुतिस्थानीयत्वाद्वाक्यस्थानीयावयवप्रसिद्धिर्दुर्बला स्यात्। तथा हि—

अक्षरैरेव बुध्यन्ते समुदायप्रसिद्धिषु।
अर्थभागोपसंहारादितरा विप्रकृष्यते ॥

सत्यमेवमेतत् ।

सिद्धान्तः

अवश्यं त्ववयवानामपि स्वार्थे शक्तिराश्रयणीया, तदनाश्रयणेऽवयवप्रसिद्धत्वाभावात् ।

तत्र च—

असत्स्ववयवार्थेषु योऽन्यत्रार्थे प्रयुज्यते ।
तत्रानन्यगतित्वेन समुदायः प्रसिध्यति ॥

लब्धात्मिका हि समुदायप्रसिद्धिरवयवप्रसिद्धिं बाधते । तस्यास्त्वात्मलाभो यत्र प्रमाणान्तरेण पूर्वानुभूतावयवार्थरहितेऽर्थे शब्दप्रयोगो दृश्यते । यथाऽश्वत्वकर्णत्वरहिते वृक्षेऽश्वकर्णशब्दस्य । न ह्यत्र पूर्वशक्त्यनुसारेण प्रतीतिरुपपद्यते इति, अर्थापत्त्या शक्त्यन्तरं कल्प्यते । ततश्चोभयसम्भवेऽवयवार्थानुसन्धानाद्विक्षिप्ताया अवयवप्रसिद्धेरक्षरश्रवणमात्रलभ्यत्वादियं बलीयसी भवति । अत्र पुनरप्सु प्रकर्षसेचनक्रियाकरणत्वसम्भवादवयवशक्तिभिरेव वाक्यवत्प्रयोगोपपत्तेः, शक्त्यन्तरे प्रमाणाभावात्समुदायप्रसिद्ध्यभावः ।

तथा हि—

भवेतां यदि वृक्षेषु वाजिकर्णौ कथञ्चन ।
अदृष्टां समुदायस्य कः शक्तिं जातु कल्पयेत् ॥

तस्मान्नाप्सु समुदायप्रसिद्धिरिति, द्रवद्रव्यमात्रसाधारणता ।

ननु संस्कारनिमित्तत्वेऽप्यप्सामानाधिकरण्यकृतत्वादीकारस्य घृतान्निवृत्तिः स्यात् । यदि हि प्रागीकारात्संस्कारनिमित्तताऽवगम्येत, ततः स्त्रीप्रत्ययोऽयमाश्रयलिङ्गनिमित्त इत्यवधारणादन्यलिङ्गान्निवर्तेत । अयं पुनरन्यप्रयोगः संस्कारेष्वीकारान्त एवानवगतविभागो वेद्यादिवत्प्रयुक्त इति, अन्यादृशस्य वाचकत्वं नावधार्येत तस्मादीकारान्तः स्यात् । यौगिकत्वे तु प्रागीकाराद्योगो गम्यत इति स्त्रीप्रत्ययोऽयं निमित्ताभावादघृते न प्रयोक्ष्यते, चोदकप्राप्तं तु प्रातिपदिकमात्रं प्रयोक्तव्यम् । न च द्रव्येष्वर्थसमवायाद्विधिशब्दप्रयोगनियमः, यतः प्रोक्षणशब्दबाधेन जातिपक्षवद् घृतमित्येव प्रयोगः स्यात् ॥ ११ ॥

इति नवमं प्रोक्षण्यधिकरणम् ।

॥ अथाऽष्टमं प्रोक्षण्यधिकरणम् ॥

न्या० सु०—अत्र भाष्यकृता प्रोक्षणीशब्दः किमुत्पवनादिसंस्कारनिमित्तः, जातिनिमित्तो वा, प्रकर्षसेचनलक्षणक्रियानिमित्तो वेति सन्दिह्य, पूर्वंन्यायनिरस्तमपि संस्कारशब्दत्वमत्तच्छब्द इति पूर्वसूत्रावयवेनेह सूत्रे प्रतिज्ञाकाङ्क्षयाऽनुषक्तेन निरासप्रतीते-

स्तद्व्याख्यानायोपन्यासपूर्वकं निरस्य, पूर्वन्यायेनैव जातिशब्दत्वं प्राप्तं यौगिकत्वेनाऽपोदितम् । तद्रथकाराधिकरणे समुदायप्रसिद्धेरवयवप्रसिद्धितो बलीयस्त्वस्य वक्ष्यमाणत्वात् विरुद्धमित्याशङ्कते–**नन्विति** । षष्ठे हि वचनाद्रथकारस्याधानस्यासर्वशेषत्वात् (६-१-४४) इत्यत्र वर्षासु रथकार आदधीतेति किमवयवप्रसिद्ध्या त्रैवर्णिकानामन्यतमो रथकारशब्देनोच्यते, समुदायप्रसिद्ध्या वाऽन्यो जातिशब्द इति सन्दिग्धे, अवयवप्रसिद्ध्या रथकारिणि त्रैवर्णिके रथकारशब्दसम्भवात् अपशूद्राऽधिकरणप्रतिषिद्धस्यात्रैवर्णिकस्याधिकारो न युक्त इति प्राप्ते ।

समुदायप्रसिद्ध्यावयवप्रसिद्धिबाधाद्वचनबलेनाऽत्रैवर्णिकस्यैवाऽधिकार इति वक्ष्यते । अन्यत एव तु समुदायप्रसिद्धिबलीयस्त्वसिद्धौ न्यायेन प्रतिषिद्धस्याप्यत्रैवर्णिकस्यैव वचनबलेनाधिकारनिश्चयात्सन्देहाभावेन रथकाराधिकरणारम्भो न युज्येत । न चान्यत्र क्वचित्समुदायप्रसिद्धिबलीयस्त्वव्युत्पादनं दृश्यते । न च तद्व्युत्पादनं विना पारिशेष्यमात्रेणाऽत्रैवर्णिकस्याधिकारसिद्धिः । त्रैवर्णिकस्याप्यवयवार्थयोगेन रथकारशब्दवाच्यत्वसम्भवे, वसन्तादिवाक्यैस्तस्याधानप्राप्तावपि रथकराकारित्वेन निमित्तेन वर्षाकालाधानार्थतया वचनोपपत्तावविदुषोऽत्रैवर्णिकस्याधिकारकल्पनानुपपत्तेः । अत एव 'वचनादि'ति मुख्यं हेतुं व्याख्याय, आधानस्यासर्वशेषत्वादित्यनेनाधानसम्बन्धितया सर्वेभ्यो ब्राह्मणराजन्यवैश्येभ्यः प्राप्तेभ्योऽत्रैवर्णिकस्य परिशिष्टत्वादयमाधानविधिरित्येवमुक्तो हेतुः सर्वशेषश्चात्रैवर्णिक आधान इति भाष्ये । भाष्यकारेण चशब्दप्रयोगादुपचयोपपत्तित्वेन व्याख्यातः । तस्माद्रथकाराधिकरणसिद्धमेतत्समुदायप्रसिद्धिबलीयस्त्वमिहोक्तम् । कथं समुदायप्रसिद्धेः श्रुतिस्थानीयत्वम् । कथं चावयवप्रसिद्धेर्वाक्यस्थानीयतेत्यपेक्षिते रथकाराधिकरणवक्ष्यमाणमेवोभयमुपपादयति— **तथा हीति** । वर्णसमुदायशक्तिनिमित्तज्ञानात्मकत्वेन समुदायप्रसिद्धेरशब्दात्मकत्वात् श्रुतित्वाभावेऽप्यक्षरश्रवणमात्रापेक्षत्वात् श्रुतितुल्यत्वम् । प्रातिपदिकावयवशक्तिनिमित्तज्ञानात्मिकायास्त्ववयवप्रसिद्धेरेकार्थपदसमुदायात्मकवाक्यत्वाभावेऽपि यौगिकप्रातिपदिकप्रतिपाद्यस्य विशिष्टस्यार्थस्य ये प्रकर्षादयो भागाः तेषामेकार्थवृत्त्वनियमलक्षणेनोपसंहारेण प्रवृत्तेर्विप्रकृष्टत्वाद्वाक्यतुल्यतेत्यर्थः । यद्यपि रथकाराधिकरणेऽवयवप्रसिद्धितः समुदायप्रसिद्धेर्बलीयस्त्वं वक्ष्यते, तथापीह समुदायप्रसिद्धेरात्मलाभसदसद्भावौ चिन्त्येते । यदि च सर्वत्र समुदायस्यैव शक्तिः न क्वचिदवयवानाम्, ततः सा चिन्ता विरुध्येत । न त्वेतदस्ति । तथा सत्यवयवप्रसिद्धेः सर्वत्राभावापत्तेरित्यभिप्रायेण परिहरति—**सत्यमिति** ।

ननु समुदायप्रसिद्धेः स्वात्मलाभः क्वास्ति, क्व च नेति कथं ज्ञातव्यमित्यपेक्षायामाह—**तत्र चेति** । ननु समुदायप्रसिद्ध्या सर्वत्रावयवप्रसिद्धेर्बाधेनाऽवयवार्थाभावात् सर्वत्रैव समुदायः प्रसिद्ध्येदित्याशङ्कानिरासपूर्वं श्लोकं व्याचष्टे—**लब्धात्मिका हीति** । नन्वेवं सति रथकारशब्देऽवयवार्थसद्भावे समुदायप्रसिद्ध्यनात्मलाभादभावे चाप्रति-

योग्यभावात्तद्बलचिन्तानुपपत्तेरनर्थकं रथकाराधिकरणं स्यात् इत्याशङ्क्याह— **ततश्चेति**। रथकारशब्दस्य रथकारिण्यवयवप्रसिद्धिसम्भवात् ।

माहिष्येण करिण्यां च रथकारः प्रजायत इति ।

स्मृतेः। चानुलोमविशेषे 'सौधन्वनास्तुहीनत्वामन्त्रवर्णात् प्रतीयेरन्नि'त्यनेन वा न्यायेन 'ऋभूणां त्वा देवतानां व्रतपते व्रतेनादधामि' इति रथकारस्यादध्यादित्याधानमन्त्रवर्णात् 'सौधन्वना ऋभव' इति च सौधन्वनशब्दसमानाधिकरण्यस्य ऋभूशब्दस्य 'तं नेमिमृभवो यथे'ति मन्त्रवर्णाद्रथकारविषयत्वप्रसिद्धेः ।

व्रात्यात्तु जायते वैश्यात् सुधन्वाचार्य एव च ।
मारुषश्च विजन्मा च मैत्रः सात्वत एव च ॥ इति

सात्वताद्यपरपर्याये सौधन्वनाख्ये जातिविशेषे समुदायप्रसिद्धिसम्भवाद्रथकार आदधीतेत्यत्र समुदायप्रसिद्धिबलीयस्त्वाभिधानं युक्तमित्यर्थः ।

नन्वेवं तर्ह्युदासीनास्वप्सु प्रकर्षसेचनकरणत्वाभावेऽपि क्वचिद्देशे प्रयोगदर्शनात् प्रकर्षसेचनकरणत्वे सत्यपि **च** तैलादावप्रयोगाद्योगस्य व्यभिचारित्वेन समुदायप्रसिद्ध्यात्मलाभोपपत्तेस्तद्बलीयस्त्वाद्रथकाराधिकरणसिद्धान्तात् जातिवाचित्वैव युक्तेत्याशङ्कां तुशब्दसमानार्थेन पुनः शब्देन निरस्यन् सिद्धान्तमाह—**अत्रेति**। औदासीन्यावस्थायामपि प्रकर्षसेचनकरणत्वशक्तिसद्भावात् प्रयोगोपपत्तेर्वाच्यसद्भावेन च शब्दप्रयोगावश्यम्भावाभावात् तैलादावप्रयोगोपपत्तेः। क्लृप्तावयवशक्त्यनुसारेणैव शब्दप्रयोगोपपत्त्याऽर्थापत्तेः क्षीणत्वात् समुदायस्य शक्त्यन्तरकल्पनानुपपत्तेः समुदायप्रसिद्ध्यात्मलाभो नास्तीत्याशयः। स्वरूपतोऽवयवार्थाभावे शक्तिसद्भावमात्रेणाग्नाविवादग्धृत्वावस्थायामपि दग्धृशब्दस्य प्रोक्षणीशब्दप्रयोगोपपत्तौ, समुदायस्य शक्त्यन्तरकल्पनं न युक्तमित्येतदेव व्यतिरेकदृष्टान्तमुखेन दर्शयितुमाह—**तथा हीति**। शालाख्ये वृक्षविशेषेऽश्वत्वकर्णत्वयोः शक्तिरूपेणाप्यभावात्समुदायस्य शालजातिवाचित्वं कल्पितमित्यर्थः। सिद्धान्तमुपसंहरति—**तस्मादिति**।

नन्वेवं सति तैलादावपि प्रोक्षणीशब्दः किमिति न प्रयुज्यते इत्याशङ्क्याह—**इतीति**। समुदायप्रसिद्ध्यभावसिद्धयौगिकत्वपरामर्शार्थोऽयमितिकरणः। यस्मात्प्रोक्षणीशब्दस्य समुदायप्रसिद्ध्यभावाद्यौगिकत्वं सिद्धम्, तस्मात्तैलादावपि साधारणताऽस्त्येव प्रयोगाभावस्तु सत्यपि वाच्ये न विरुध्यत इत्याशयः।

यद्वा समुदायप्रसिद्धेर्बलीयस्त्वेऽप्यप्सु प्रोक्षणीशब्दस्य तदभावादवयवप्रसिद्धिरङ्गीक्रियमाणा न रथकाराधिकरणविरुद्धेति सूचनार्थत्वात् पूर्वशेषोऽयमितिकरणः।

प्रयोजनभाष्ये प्रोक्षणीशब्दस्य संस्कारशब्दत्वे घृतेऽप्यविकृतस्य प्रयोगमुक्तमाक्षिपति—**नन्विति**। परिहरति—**यदि हीति**। निपातानामनेकार्थत्वात् शङ्कानिरासार्थो हि शब्दः। एतदेवोपसंहरति—**तस्मादिति**। **यौगिकत्वे** स्त्रीप्रत्ययमात्रनिवृत्तिप्रयोजनत्वेनोक्तामुप-

पादयति—**यौगिकत्वे त्विति**। ननु यौगिकत्वेऽपि 'घृतप्रोक्षणं भवती'ति विधिवाक्ये घृतशब्दश्रवणात् विधिशब्दस्य मन्त्रत्वाभावः स्यात् तेन चोदनेति दशमाधिकरणन्यायेन द्रव्येऽपि देवतावद्विधिगतस्यैव शब्दस्य प्रयोगनियमाज्जातिशब्दत्ववत् घृतशब्दस्यैव प्राप्तेः प्रातिपदिकस्यापि निवृत्तत्वात् स्त्रीप्रत्ययमात्रनिवृत्त्यभिधानं न युक्तमित्याशङ्क्याह—**न चेति**।

दशम एव 'अग्नये पवमानायाष्टाकपालं पुरोडाशं निर्वपेदि'ति विहिते किमग्निः पवमानादिगुणशब्दसहितेनाग्निशब्देनाभिधेयः, केवलेन वेति सन्दिह्य, 'प्राकृतस्य गुणश्रुतौ सगुणेनाभिधानं स्यादि'ति सिद्धान्तेनोपक्रम्य अविकारो वार्थशब्दानपायात् स्याद् द्रव्यवदित्यनेनार्थस्याग्नेश्चोदकप्राप्तस्य चाग्निशब्दस्य केवलाभिधानेऽप्यनपायाद्यथा 'सा वा एषा सर्वदेवत्या यदजा वशा वायव्यामालभेत भूतिकाम' इत्यजाशब्देनापि विहिते द्रव्ये वशाशब्दवाच्यवन्ध्यात्वगुणयुक्ते चातिदेशप्राप्तौ न छागशब्देन निर्गुणेन चाभिधानम्, तथेहाप्यविकारः स्यादिति पूर्वपक्षमुपन्यस्य आरम्भासमवायाद्वा चोदितेनाभिधानं स्यादर्थस्य श्रुतिसमवायित्वादवचने च गुणशास्त्रमनर्थकं स्यादित्यनेनार्थस्य देवतायाः श्रुतिसमवायित्वादारम्भेण स्वरूपेण कर्मण्यसमवायाद् गुणानभिधाने च गुणशास्त्रस्यानर्थक्यापत्तेः, चोदितेन सगुणेनाभिधानं स्यादित्येवं निरस्य द्रव्येष्वेवारम्भगामित्वादर्थे विकारसामर्थ्यमित्यनेनारम्भेण स्वरूपेण द्रव्येषु क्रियागामित्वाद्विकारसहितस्यापि शब्दस्य द्रव्यरूपेऽर्थे सामर्थ्यमस्तीति वैषम्यं वदता द्रव्येष्वर्थरूपेण कर्मणि समवायाभ्युपगमाद्विधिगतशब्दप्रयोगनियमो नास्तीत्यर्थः ॥ ११ ॥

इत्यष्टमं प्रोक्षण्यधिकरणम्

भा० प्र०—दर्शपौर्णमासयाग के प्रकरण में पात्र के स्थापन के अवसर पर 'प्रोक्षणीरासादय' (तै० ब्रा० ३-२-९) में यह प्रयोग मिलता है। हवि आदि यज्ञ की सामग्रियों के लिए प्रोक्षण अर्थात् जल से सिंचन के लिए जो जल होता है, वह प्रोक्षण है, यह जल जिसमें रखा जाता है, वह प्रोक्षणी है। प्रकृष्ट ओक्षण साधनता से यह जलवाची है। इस अधिकरण में इस विषय पर विचार किया जा रहा है कि यह शब्द संस्कार निमित्तक है या जाति निमित्तक है या यह शब्द यौगिक है। पूर्वाधिकरण में बर्हिः आदि शब्दों को जातिवाचक माना गया है, अतः यहाँ पर सन्देह होता है।

इस प्रसङ्ग में पूर्वपक्षी का कथन है कि 'प्रोक्षणी' इस शब्द का वेद में सभी स्थानों में संस्कृत अर्थ में प्रयोग होने से, इसको संस्कारवाचक मानना उचित है। अथवा जिससे प्रोक्षण किया जाय इस यौगिक अर्थ होने पर भी यौगिक अर्थ से रूढ़ि बलवान् होती है, इसलिए इसको जातिवाचक मानना उचित है। इस प्रकार की आपत्ति में सिद्धान्ती का कहना है कि प्रोक्षणी शब्द संस्कारवाचक नहीं हो सकता है, क्योंकि ऐसा मानने पर अन्योऽन्याश्रय दोष होता है। क्योंकि विहित संस्कार करने के बाद ही

प्रोक्षणी शब्द कहा जा सकता है, अन्यथा नहीं इसलिए प्रोक्षणी शब्द का प्रयोग संस्कार सापेक्ष है, प्रोक्षणी शब्द पूर्व से सिद्ध न होने पर प्रोक्षणी के उद्देश्य संस्कार का विधान सम्भव नहीं है, प्रोक्षणी शब्द का प्रयोग संस्कार सापेक्ष है। इस प्रकार दोनों की प्रवृत्ति = उत्पत्ति परस्पर सापेक्ष होने पर अन्योऽन्याश्रय दोष की आपत्ति होगी। प्रोक्षणी शब्द पूर्व से रूढ़ अर्थात् वृद्ध-व्यवहार से आ रहा है—यह कल्पना करना ही सङ्गत है। क्योंकि ऐसे स्थलों में यौगिक अर्थ से ही रूढ़ि की उत्पत्ति होती है, यदि यह यौगिक है तो जातिवाचक नहीं हो सकता है। जातिवाचक न होने पर यौगिक अर्थ के अनुसार, आवश्यकता के अनुसार घृत आदि के विशेषण के रूप में 'प्रोक्षण' इत्यादि के आकार में परिवर्तित कर प्रयोग करना सङ्गत होगा। यदि जातिवाचक माना जायगा तो 'प्रोक्षणी' इसी रूप में प्रयोग होगा। प्रोक्षणी यह शब्द प्र उपसर्ग उक्ष् धातु से ल्युट् (अन्) ङीप् (ई) करके सिद्ध होता है, अतः स्त्रीलिङ्ग 'आपः' के लिए प्रोक्षणी यह प्रयोग होगा और नपुंसक घृत के लिए प्रोक्षण का प्रयोग होने 'प्रोक्षणम्' यह प्रयोग होता है। ब्रह्मवर्चः की कामना के लिए काम्येष्टि-यज्ञ करने पर सोम और रुद्र देवता के लिए घृत का ही जल के स्थान पर प्रयोग किया जाता है। अतः यह शब्द यौगिक है।

'प्रोक्षणीषु' = प्रोक्षणी प्रभृति शब्द, 'अर्थ संयोगात्' अर्थ का संयोग = सम्बन्ध होने से यह जाति निमित्तक नहीं है वरन् योगिक अर्थ का ही बोधक है ॥ ११ ॥

इति प्रोक्षणी अधिकरण।

अथ नवमं निर्मन्थ्याधिकरणम्

[९] तथा निर्मन्थ्ये ॥ १२ ॥ सि०

शा० भा०—'निर्मन्थ्येनेष्टकाः पचन्ति' इति संस्कृते दर्शनात्संस्कारशब्दो निर्मन्थ्य इति। असंस्कारेऽपि[1] दृश्यते। निर्मन्थ्य[2]मानयौदनं पक्ष्याम इति। निर्मन्थनयोगात्पूर्ववद् यौगिक इति संस्थितम्[3]।

प्रयोजनं संस्कारनिमित्ते संस्कृतेनेष्टकाः पक्तव्याः। जातिशब्दे यथोपपन्नेन[4]। यौगिकेऽचिरनिर्मथितेन। यथा 'नावनीतेन भुङ्क्ते' इत्यचिरनिर्दग्धेनेति गम्यते ॥ १२ ॥

॥ इति नवमं निर्मन्थ्याधिकरणम् ॥

---

१. ब. असंस्कृतेऽपि। २. ब, निमथ्यमानय पक्ष्यामहे।
३. ब. स्थितं। ४. ब. यथोत्पन्नेन।

भा० वि०—विषयान्तरेऽपि जातिनिमित्तत्वनिरासेन यौगिकत्वसाधकन्यायातिदेशार्थत्वात् अस्य सङ्गतिः। विषयमाह—**निर्मन्थ्येनेति**। अत्रापि समुदायप्रसिद्ध्यात्मलाभसदसद्भावाभ्यां सन्देहे सति याज्ञिकानां संस्कृते प्रयोगदर्शनात् संस्कारशब्दत्वमिति तन्निरासपूर्वकं पूर्वपक्षमाह—**संस्कृते दर्शनादित्यादिना**। व्यभिचारान्न संस्कारशब्दत्वमित्यर्थः। न च पूर्वन्यायेन यौगिकत्वसंभवान्न जातिनिमित्ततापीति वाच्यम्, तत्र योगस्य घृतादिसाधारण्येऽपि ङीबन्तत्वात् प्रोक्षणीपदस्य स्त्रीलिङ्गनित्यबहुवचनान्ताच्छब्दसामानाधिकरण्ययोग्यतया भवतु तदर्थविषयत्वम्, इह तु तृतीयान्तस्य निर्मन्थ्येनेति च पदस्याग्निनवनीतसाधारणत्वान्नाग्निवाचित्वनिर्णयस्संभवतीति जातिनिमित्ततैव न्याय्येत्याशयः।

सौत्रं तथाशब्दं व्याकुर्वन् सिद्धान्तमाह—**निर्मथनेति**। स्थितिशब्दस्सिद्धान्तत्वसूचनार्थः। निर्मन्थ्यशब्दस्याग्निनवनीतसाधारणत्वेऽपि पचन्तीति पाकसामानाधिकरण्येनाग्निर्विषयत्वावधारणान्न क्लृप्तावयवप्रसिद्धिसंभवे समुदायप्रसिद्धिकल्पना युक्तेति भावः। विचारप्रयोजनमाह—**प्रयोजनमिति**। निमित्ते निर्मन्थ्यशब्द इति शेषः।—**यथोत्पन्नेनेति**[1]। अग्नित्वजातीयमात्रेण।

ननु पचन्तीति पाकानुपपत्त्याग्निमात्रप्राप्तौ मथनजन्यत्वविशेषणस्याग्निव्यावृत्त्यर्थत्वान्नाचिरत्वाक्षेपकत्वं युक्तमित्याशङ्क्याह—**यथेति**। यद्यपि नावनीतवाक्यस्य पौरुषेयतया वक्त्रभिप्रायानुसारात्तत्राचिरनिर्दग्धत्वरूपविशेषप्रतीतिः, न शब्दसामर्थ्यात् तथापि पाकाङ्गत्वेन विधीयमानस्य मथनस्य पाकैकदेशकालकर्तृत्वादचिरनिर्मथितत्वं[2] शब्दसामर्थ्यादेव सिध्यतीतिभावः ॥ १२ ॥

इति निर्मन्थ्याधिकरणम्।

अथ दशमं निर्मन्थ्याधिकरणम्।

त० वा०—निर्मन्थ्येऽपि पूर्वाधिकरणवज्जातिसंस्कारनिमित्तपक्षावुद्भाव्य, अनन्तरेण यौगिकत्वं साधनीयम्।

वैद्युताश्माभिघातोत्थसूर्यकान्तादिजन्मनाम्।
निवृत्तौ चरितार्थः सन् निर्मन्थ्योऽभिनवः कथम्।

'लोके कर्मार्थलक्षणम्' (जै० सू० ११-१-३) इत्यशब्दार्थेनापि व्यवहाराद्भवेदचिर-निर्दग्धघृतप्रतीतिः। सर्वघृतानां च नवनीतविकारत्वात्, पुनः श्रुतेर-

१. यथोत्पन्नेनेतिव्याख्याने पाठः।
२. अंगानाञ्च प्रधानेनैकदेशकालकर्तृत्वं मी० द० ११-२-१-इत्यत्र वक्ष्यते, अत्रादिग्रहणमदूरनिर्मथितृनानन्यकर्तृ निर्मथितेनेत्यस्योपलक्षणम्।

चिरनिर्दग्धनवनीतार्थता स्यात् । इह तु शब्दप्रमाणकेऽन्यक्रियाजनितनिवृत्तिमात्रचरितार्थो निर्मन्थ्यशब्दश्चि[1]रविशेषोपादानासमर्थः कथमचिरनिर्मथितविषयः कल्प्यते । नह्यत्राचिरत्वमपि योगेऽन्तर्गतम्, क्रियायोगमात्रनिमित्तत्वात् तस्मादसदेतत् ।

नैष दोषः

पाकेनाग्नेरुपात्तत्वाद्विशेषणपरा श्रुतिः ।
तच्च पाकाङ्गभूतत्वात्तद्देशादौ करिष्यते ॥

यथैव लोहितोष्णीषादिविधिषु विशेष्याणां प्राप्तत्वाद्विशेषणपरत्वम्, एवमिहापि विशेष्यानुवादेन विशेषणभूता क्रियैव पाकाङ्गत्वेन विधीयते । अङ्गानां च प्रधानेनैकदेशकालकर्तृत्वं वक्ष्यते(११-२-१) तेनाचिरनिर्मथितेनादूरनिर्मथितेनानन्यकर्तृनिर्मथितेनेति वक्तव्ये प्रदर्शनार्थमचिरग्रहणम् ॥ १२ ॥

(इति दशमं निर्मन्थ्याधिकरणम् ॥ ९ ॥)

॥ अथ निर्मन्थ्याधिकरणम् ॥

न्या० सु०—वैद्युताद्यग्निव्यक्तेर्मन्थनजन्यत्वे शक्तेरप्यभावात् पूर्वन्यायात्तुल्यत्वमाशङ्क्य विशेषरूपेण शक्त्यभावेऽप्यग्निजातीयस्य कस्यचिन्मन्थनजन्यत्वदर्शनेन शक्त्यवधारणाद्वैद्युतादावप्यग्निजातीयकत्वाविशेषेण सामान्यतः शक्तिसम्भवेन कथंचित् क्लृप्तावयवशक्त्यनुसारात्प्रयोगोपपत्तौ समुदायस्य शक्त्यन्तरकल्पनानुपपत्तेस्तुल्यत्वातिदेशायेदमधिकरणमित्याह—**निर्मन्थ्येऽपीति** । भाष्यकारेणाचिरनिर्मन्थितत्वं यौगिकत्वप्रयोजनमुक्तमाक्षिपति—**वैद्युतेति** । पाकान्यथानुपपत्त्याऽग्निमात्रप्राप्तौ मन्थनजन्यत्वविशेषणस्यातज्जन्याग्निव्यावृत्त्या कृतार्थत्वात् नाचिरत्वाक्षेपकत्वं युक्तमित्यर्थः ।

ननु नावनीतेन भुङ्क्ते इत्यत्रापि घृतशब्दानुपादानात्तैलादेरपि प्राप्तौ तन्निवृत्त्या नावनीतशब्दस्य कृतार्थत्वात् नाचिरत्वाक्षेपकतेत्याशङ्क्याह—**लोक इति** । प्रमाणान्तरावगतवक्त्रभिप्रायानुसारात्तत्र विशेषप्रतीतिर्न शब्दसामर्थ्यादिति भावः ।

यद्वा यथैवाभ्यासः सामधेनीनां प्राथम्यात् स्थानधर्मः स्यादि (९–१) त्यत्र त्रिः प्रथमामन्वाह त्रिरुत्तमामिति प्रथमोत्तमशब्दयोः प्रथमावगताद्यन्तस्थानपरत्वातिक्रमहेत्वभावान्न तदुपलक्षितप्रवो वाजा, 'आजुहोतेति ऋक्परतेति नवमे वक्ष्यते । तथा नावनीतशब्दस्यापि प्रथमावगतनवनीतविकारत्वलक्षणधर्मातिक्रमेण तदुपलक्षितघृताख्यधर्मिपरत्वाभावात् धर्मस्य च 'प्रवो वाजा' इति प्रथमऋक्प्रतीकम् । आजुहोतेत अन्त्यऋक्प्रतीकम् । तत्परता धर्मिगतस्वर्द्धमानधर्ममात्रव्यावर्त्तकत्वेनास्वर्द्धमानधर्म्यन्तरव्यावर्त्तकत्वायोगात् तैलादिव्यावृत्त्यप्रतीतेर्घृते च नवनीतविकारत्वावरुद्धधर्मान्तराऽभावादबुद्धिस्थ-

---

१. क. श्चिराचिरविशेषो ।

नवनीतव्यक्तिविकारत्वव्यावृत्त्या बुद्धिस्थनवनीतव्यक्तिविकारपरत्वावगतेश्चिरकालावगतायाश्च नवनीतव्यक्तेरबुद्धिस्थत्वादचिरावगतनवनीतव्यक्तिविकारत्वप्रतीतेः । शब्दसामर्थ्यादेवाचिरनिर्दग्धत्वावगतिरित्याह—**सर्वघृतानां चेति** । प्रकरणादिना घृतप्रतीतिमभिप्रेत्य, पुनः श्रुतेरित्युक्तम् । नावनीतेन घृतेन भुङ्क्त इत्येवंविधवाक्याभिप्रायेण वा पञ्चम्यन्तं वा श्रुतिशब्दमङ्गीकृत्य श्रुतितोऽपि पुनरेवमचिरनिर्दग्धत्वावगतिरित्येवं योज्यम् । आनर्थक्यानुपपत्तिलक्षणार्थो वा पुनः शब्दः निर्मन्थ्यशब्दे तु शब्दप्रमाणकत्वेन प्रमाणान्तरानुसारायोगादमन्थनजन्याग्निनिवृत्त्या च कृतार्थत्वेन शब्दसामर्थ्याभावादचिरनिर्मन्थितत्वा प्रतीतेर्नाचिरनिर्मन्थितविषयता कल्प्येति वैषम्यमाह—**इह त्विति** । चिरग्रहणं दृष्टान्तार्थम् ।

ननु पङ्कजादिशब्दवन्निर्मन्थ्यशब्दस्य योगरूढित्वादचिरनिर्मन्थिताग्निगतमन्थनक्रियायोगनिमित्तत्वप्रतीतेर्विशेषावगतिर्भविष्यतीत्याशङ्क्याह—**न हीति** । पद्मव्यतिरिक्ते द्रव्ये पङ्कजन्यत्वे सत्यपि, पङ्कजशब्दप्रयोगाभवात् योगरूढित्वं कल्पितम्, निर्मन्थ्यशब्दस्य त्वग्निमात्रे प्रयोगस्य भाष्यकृतोक्तत्वान्न योगरूढिता कल्प्येत्याशयः । आक्षेपमुपसंहरति—**तस्मादिति** । पाकाङ्गत्वेनेह विधीयमानस्य मन्थनस्य पाकैकदेशकालकर्तृकत्वादचिरनिर्मन्थितत्वसिद्धिरिति परिहरति—**नैष दोष इति** । श्लोकं व्याचष्टे—**यथैवेति** । नन्वेवं सति देशकर्त्रैक्यमपि कस्मान्नोक्तमित्याशङ्क्याह—**तेनेति** ॥ १२ ॥

इति **नवमं** निर्मन्थ्याधिकरणम् ।

अथ दशमं विश्वदेवाधिकरणम्

भा० प्र०—वेद में अग्निचयन प्रकरण में कहा गया है कि 'निर्मथ्येनेष्टकाः पचन्ति' निर्मन्थ्य अग्नि के द्वारा इंटा का पाक करे इस स्थल में 'निर्मन्थ्य' शब्द संस्कारनिमित्तक है या जातिनिमित्तक है या यौगिक अर्थ का वाचक है, इस सन्देह में इसको भी यौगिक अर्थ का ही वाचक माना गया है । निर्मन्थ्य शब्द को संस्कारनिमित्तक मानने पर संस्कृत निर्मन्थ्य = अग्निमन्थन से सञ्जात अग्नि के द्वारा ही इंट का पाक करना चाहिए—यह सिद्ध होता है । इसके जातिनिमित्तक होने पर जिस किसी निर्मन्थ्य अग्नि के द्वारा वह कर्त्तव्य होगा, और यौगिक = योग-रूढ़ि होने पर 'नावनीत' शब्द के समान शीघ्र निर्मथित अग्नि का वाचक होने से लौकिक मन्थन के द्वारा सम्पादित अचिर निर्मथित अग्नि के द्वारा ही इंट का पाक कर्तव्य होगा ।

श्रुति के अनुसार ७२० इंटों को प्रस्तुत कर उस अचिर निर्मथित, अदूरनिर्मथित एवं स्वयं निर्मथित 'निर्मन्थ्य' अग्नि के द्वारा पाक करना चाहिए, उस अचिर निर्दग्ध इंटों से श्येन पक्षी के आकार में चिति = अग्निस्थापनस्थान प्रस्तुत किया जाता है, यही 'निर्मन्थ्येनेष्टकाः पचन्ति' एवं 'श्येनचितं चिन्वीत' इत्यादि श्रुतियों में उपदिष्ट है, यह शतपथ ब्राह्मण में ७-१-१, ८-१-१, तैत्तिरीयसंहिता ५-४-११ आदि श्रुतियों में चयन प्रकरण में विस्तारपूर्वक वर्णित है । कठोपनिषद् के प्रथम अध्याय की प्रथम वल्ली में या इष्टका यावतीर्वा यथा वा (क० उ० १-१-१५) इसमें भी इसका प्रसङ्ग है ।

अतः प्राचीन घी एवं नवीन घी दोनों ही नवनीत = मक्खन से उत्पन्न होने पर भी 'नावनीत' कहने पर जैसे नूतन अर्थात् तुरत बनाया हुआ घी ही कहा जाता है, वैसे ही इस प्रसङ्ग में भी 'निर्मथ्यते' अनेन = जिसके द्वारा निर्मथित होता है, वही 'निर्मन्थ्य' उससे उत्पन्न निर्मन्थ्य इस प्रकार यह निर्मन्थ्य शब्द सद्यः निर्मथित अग्नि का ही वाचक है, अतः यौगिक = योग रूढ़ि अर्थ का बोधक है।

'तथा' = इसी प्रकार अर्थात् प्रोक्षणी शब्द के समान, 'निर्मन्थ्ये' = निर्मन्थ्य इस शब्द में यौगिक अर्थ ही ग्रहण करना चाहिए, प्रोक्षणी शब्द के समान 'निर्मन्थ्य' शब्द भी यौगिक अर्थ का बोधक है ॥ १२ ॥

इति निर्मन्थ्याधिकरण।

अथ दशमं वैश्वदेवाधिकरणम्।

[१०] वैश्वदेवे विकल्प इति चेत् ॥ १३ ॥ पू०

शा० भा०—चातुर्मास्येषु प्रथमे पर्वणि वैश्वदेवे संदेहः[१]—वैश्वदेवेन यजेत (तै. ब्रा. १-४-१०) इति किं वैश्वदेवशब्दो गुणविधिः, उत कर्मनामधेयेति। यदि सन्देहो न सन्देहः। वैश्वदेवे विकल्पः। गुणविधिर्वैश्वदेवशब्दः। गम्यते हि गुणविधानम्। विश्वेदेवा विधीयन्त आग्नेयादिषु यागेषु। तत्राग्न्यादीनां विश्वैर्देवैर्विकल्पः। एवं प्रसिद्धिरर्थवती भविष्यति ॥ १३ ॥ क पूर्वपक्षः ॥

भा० वि०—एवमपवादमुखेन विशिष्टविधिव्युत्पादनार्थेऽप्याग्नेयाधिकरणे देवतोद्देश्यद्रव्यत्यागात्मकयागक्रियागर्भसंबन्धनिमित्तत्वप्रतिपादनादाग्नेयादि - शब्दानां तत्प्रसक्त्याधिकरणत्रये कृते, यत्प्रसक्त्या यो विचारः, तत्समाप्तौ स एव बुद्धिस्थो भवतीति बुद्धिस्थस्य विशिष्टविधिव्युत्पादनस्य फलमुत्पत्तिशिष्टगुणबलीयस्त्वमनेनाधिकरणेन व्युत्पाद्यत इति सङ्गतिः। विषयसन्देहावाह—**चातुर्मास्येष्विति**। प्रथमे पर्वणीति। फाल्गुन्यां पौर्णमास्यां क्रियमाणे वैश्वदेवाख्ये पर्वणीत्यर्थः। यद्यपि विशिष्टविधिव्युत्पादनप्रयोजनमुत्पत्तिशिष्टबलीयस्त्वं समर्थयितुमिदमधिकरणम्, तथाप्युत्पत्तिशिष्टबलीयस्त्वेनैव वैश्वदेवशब्दस्य नामधेयत्वं सिध्यति, नान्यथेति दर्शयितुं फलभूतेन विचारेणारम्भः कृतः विशिष्टविधौ व्युत्पादिते सत्युत्पत्तिशिष्टगुणसंभवात्तद्बलीयस्त्वसन्देहो भवतीति सूचनार्थत्वेनेति चेदिति सूत्रावयवं व्याचष्टे इति—**यदि सन्देह इति**। सूत्रशेषेण पूर्वपक्षमाह—**वैश्वदेव इति**। विकल्पशब्देन फलवचनेन गुणविधेः प्रतिज्ञानं दर्शयन् व्याचष्टे—**गुणविधिरित्यादिना**।

१. ब. श्रूयते।

नन्वष्टदोषदुष्टविकल्पापादकत्वादयुक्तं गुणविधानमत आह-**गम्यते....विश्वेदेवा इति**। वसन्ताद्येककालादियोगेनैव समुदायापादनसिद्धेः समस्तानुवादानर्थक्यप्रसङ्गात् वैश्वदेवशब्दस्य चाग्नेयादिषु प्रत्येकं समुदाये वा प्रवृत्तिनिमित्ताभावेन नामधेयत्वायोगादगत्या विकल्पापादकोऽपि गुणविधिरेव ज्यायानित्याशयः।

नन्वाग्नेयादीनां अग्न्यादिदेवतान्तरावरुद्धत्वात् कथं तेषु देवतारूपगुणविधानमत आह—**तत्रेति**। विश्वेदेवाः देवता अस्येति देवतातद्धितप्रसिद्धिरपि गुणविधित्वेऽर्थवतीति हेत्वन्तरमाह—**एवमिति**। तस्मादुत्पत्त्युत्पन्नशिष्टयोः तुल्यबलत्वेन उत्पत्तिशिष्टाग्न्याद्यवरुद्धेषु एव यागेषु विकल्पेन देवतान्तरनिवेशसम्भवात् गुणविधिरेव वैश्वदेवशब्दः, न नामधेयमिति भावः॥ १३॥

अथैकादशं वैश्वदेवाधिकरणम्

त० वा०—तद्धितोपात्तत्वान्मत्वर्थस्य न लक्षणा। न चानेकार्थविधिः येन वाक्यं भिद्येत। न च समस्तेषु कर्मसु तत्प्रख्यानशास्त्रसद्भावः। न च यथाऽग्निहोत्रे समासोऽनभिव्यक्तः, तथाऽत्र तद्धितः। सर्वत्र ह्येवंरूपा एव देवताविधयो भवन्ति। न च श्येनयागवद्विश्वैर्देवैः कस्यचिद्व्यपदेशः। न च फलपदाश्रवणाद्वाजपेयवद्वैरूप्यं यजेः, शक्यते हि केवलयज्यनुवादेन देवता विधातुमित्यारम्भः। सर्वत्र च नामचिन्तानुसारान्न बर्हिराज्यादिविचारेण व्यवधानम्।

अथ वा नामधेयान्यपि यौगिकानि निर्मन्थ्यादिष्वप्राप्तार्थत्वाद्विधिफलानि दृष्टानि। वैश्वदेवशब्दोऽपि तथाऽस्त्वित्यनन्तरं सम्बन्धः। तत्र 'विकल्प' इति गुणविधेः फलेन प्रतिज्ञानम्। एवं हि शङ्क्यते। यद्ययं गुणविधिः, न तर्हि कर्म विधीयते। न चापि दूरस्थमनुवदितुं शक्यते। तत्र प्रकृताग्नेयादिकर्मानुवादेनाशक्यं देवताविधानम्, उत्पत्तिवाक्यशिष्टदेवतान्तरावरोधादत आह—विकल्पस्ताभिः सह भविष्यति। न चाद्यापि सूत्रकारभाष्यकाराभ्यामौत्पत्तिकबलीयस्त्वं क्वचिद्दर्शितमिति तुल्यबलत्वं मन्यते।

किं च—

न समस्तानुवादस्य किंचिदस्ति प्रयोजनम्।
विश्वेदेवा न च प्राप्ताः प्रत्येकं संहतेषु वा॥

यदि हि गुणं न विदध्यात्, ततः समस्तमेव वाक्यमनर्थकं स्यात्। विश्वेदेवसम्बन्धश्च न प्रकृतानां प्रत्येकमस्ति, न समुदाये येनानूद्येत। न चाऽऽमिक्षायागस्य केवलस्य यजिना ग्रहणम्। न च वैश्वदेवशब्दस्तद्विषयत्वेनेष्यते। तस्मात्सप्तसु यागेषु गुणविधिः।

तत्रैतत्स्यात्—एक एव शब्दः सप्तसु विधिः, आमिक्षायां चानुवाद इति विप्रतिषिध्येत।

तत्र—

प्रकृतत्वाविशेषेऽपि यत्र प्राप्तिर्न विद्यते।
विधेस्तत्रोपसंहारान्न वैरूप्यं भविष्यति॥ १३॥

न्या० सु०—अत्र भाष्यकृता किं वैश्वदेवशब्दो गुणविधिः, कर्मनामधेयं वेति चिन्तोक्ता। सा पूर्वपक्षसूत्रे विकल्पाभिधानात् सिद्धान्तसूत्रे च तन्निराकरणमात्रप्रतीतेरयुक्ता। प्रकरणपर्यालोचनया गुणविधिनामधेयविचारोऽधिकरणस्य तात्पर्यावगमादेवमुपन्यासो युक्तः। आग्नेयाधिकरणेऽपवादान्नामधेयविचारस्य पर्यवसितत्वावगतेर्नामधेयविचारस्यापर्यवसितस्याप्यपवादसम्भवे दर्विहोमपदस्येहैव विचार्यत्वाशङ्काऽष्टमाध्यायासङ्गत्या शङ्कायास्तत्रैव निराकार्यत्वेनेहाऽप्रस्तुतत्वात् न युज्येत।

अथाग्नेयाधिकरणस्यापवादत्वेन सङ्गतिप्रदर्शनार्थं गुणविधिनामधेयविचारेऽपि विशिष्टविधिव्युत्पादने तात्पर्यात्, अपवादे तात्पर्याभावेन पर्यवसानद्योतकत्वं नास्तीत्युच्यते। तथा सत्युत्पत्तिशिष्टगुणबलीयस्त्वसिद्धिप्रयोजनत्वाद्विशिष्टविधिव्युत्पादनस्य तदधिकरणोक्तक्रियानिमित्तत्वप्रसक्त्या कृतेऽधिकरणत्रये, 'यत्प्रसक्त्या यो विचारः, तत्समाप्तौ स एव बुद्धिस्थो भवतीति प्रासङ्गिकाधिकरणत्रयसमाप्त्या तस्यैव बुद्धिस्थस्य प्रयोजनविचारार्यैतदधिकरणमिति गुणमिति गुणविधिनामधेयविचारे तात्पर्याभावात् तदुपन्यासस्तात्पर्यतोऽप्ययुक्तः। उत्पत्तिशिष्टबलीयस्त्वव्युत्पादनार्थे चास्मिन्नाधिकरणे सत्युद्भिदादीनामेवोदाहरणत्वोपपत्तेर्वैश्वदेवोदाहरणं व्यर्थमित्याशङ्क्याह—**तद्धितेति**। अयमाशयः (सत्यपि विशिष्टविधौ[1]) गुणविशिष्टस्यापि कर्मणो विहितस्य विशिष्टविध्यन्यथानुपपत्तिप्रसूतेन विधिना विशेष्यस्यापि विशेषणवद्विधानाच्छुद्धानुवादेनापि वाक्यान्तरस्थस्यापि गुणस्य स्ववाक्यस्थवद्वाक्यीयत्वाविशेषाद्विकल्पेन विधानोपपत्तेरुत्पत्तिशिष्टेनापि सोमेनोत्पन्नशिष्टस्य खनित्रादेर्बाधायोगादुद्भिदादिशब्दानां ज्योतिष्टोमे गुणविधित्वोपपत्तेरुत्पत्तिशिष्टबलीयस्त्वेन गुणविधित्वनिरासायोत्पत्तिशिष्टबलीयस्त्वविद्धयर्थं विशिष्टविधिव्युत्पादनं व्यर्थमित्याशङ्क्य अनुष्ठानायोग्यत्वेन शुद्धस्य विधातुमशक्यत्वात् 'अग्निहोत्रं जुहोती'त्यादावपि सामान्यतो द्रव्यदेवताविशिष्टस्यैव विधेयत्वाभ्युपगमात् विशिष्टविधौ स्ववाक्यश्रुतद्रव्यादिविशेषविशिष्टस्यैव प्राप्तत्वेनानुवादापत्तेः तादृशेन च नैराकाङ्क्ष्ये स्ववाक्यश्रुतगुणविरोधिगुणान्तरविध्यनुपपत्तेर्विशिष्टविधौ सत्युत्पत्तिशिष्टेनोत्पन्नशिष्टस्य बाधसिद्धिरिति विशिष्टविधिव्युत्पादनप्रयोजनमुत्पत्तिशिष्टबलीयस्त्वं समर्थयितुमेतदधिकरणम्।

तथाप्युत्पत्तिशिष्टबलीयस्त्वेनैव वैश्वदेवशब्दस्य नामधेयत्वं सिध्यति, नान्यथेति दर्शयितुम्, भाष्यकृतैवं विचारारम्भः कृतः। वैश्वदेवोदाहरणस्याप्येतदेव प्रयोजनमित्येतदेवोपपादयितुं पूर्वोक्तकारणासम्भवस्तद्धितोपात्तत्वादित्यादिना दर्शितः। न तूद्भिदाद्यधि-

1. अयं पा० २ पु० पा०।

करणैरगतार्थत्वम् दर्शयितुम् इति भ्रमितव्यम्, गतार्थत्वशङ्कानुपपत्तेस्तन्निरासायागतार्थत्वाभिधानानर्थक्यात् । सास्यदेवतेति हि देवतातद्धिताधिकारे 'सूक्तहविषोरि'ति स्मृतेर्देवतातद्धितस्य, सूक्ते हविषि वा मुख्यत्वावगमेऽपि द्रव्यविशेषस्येहानुपादानेनाऽस्यशब्दाभिधेयत्वायोगात्सामानाधिकरण्योपात्तत्वेनास्यशब्दाभिधेयस्य यागस्यैव देवतासम्बन्धावगतेस्तदन्यथानुपपत्त्या द्रव्यस्यैव लक्ष्यमाणत्वात् मत्वर्थस्य यागस्य लक्षणा नाशङ्कितुं शक्या । आग्नेयमष्टाकपालं निर्वपति, सौम्यं चरुम्, सावित्रं द्वादशकपालम्, सारस्वतं चरुम्, पौष्णं चरुम् (तै० सं० १।८) मारुतं सप्तकपालम्, वैश्वदेवीमामिक्षां द्यावापृथिव्यमेककपालमित्यष्टौ कर्माणि प्रकृतानि । वैश्वदेवेन यजेतेति यजिनानूद्य विधित्सितस्य देवतालक्षणस्य गुणस्यामिक्षायागे प्राप्तस्यापि इतरेषु सप्तसु प्राप्त्यभावात् विधिसम्भवे तत्प्रापणवैयर्थ्याभावात् तत्प्रख्यतापि नाशङ्कितुं शक्या । वाक्यभेदाद्याशङ्का त्वत्यन्तनिर्मूलेत्यगतार्थत्वाभिधानर्थक्यापत्तिरुत्पत्तिशिष्टबलीयस्त्वेनैव वैश्वदेवशब्दस्य नामधेयत्वं दर्शयितुमेवमारम्भ इतीदृश्येव ग्रन्थतात्पर्यव्याख्या युक्ता । ननु गुणविधिनामधेयचिन्तात्मकस्याधिकरणस्य बर्हिराज्यादिविचारात् प्रागेवारम्भः स्यादित्याशङ्क्याह—**सर्वत्र चेति** । बर्हिरादिशब्दोऽपि कस्य नामेत्येवं विचारात्मकत्वात् तस्याव्यवधायकतेत्यर्थः ।

यदा तु गुणविधिप्रतियोगित्वेन विधिनिरपेक्षलोकप्रसिद्धदध्यादिनामविलक्षणं विधेयकर्मण्यलौकिकं नाम वेदेन विधीयमानं नामधेयशब्देनोच्यते, तदा संस्कारनिमित्तत्वपक्षे यल्लूयते तस्य बर्हिःशब्दो नामेति विधेयसंस्कारयुक्ते द्रव्ये वेदेनाऽलौकिकस्य नाम्नो विधीयमानत्वात् नामधेयत्वम्, जातिनिमित्तत्वे यौगिकत्वे च विधिनिरपेक्षलोकप्रसिद्धत्वात्तन्नामधेयतेति सामान्यत एव नामधेयचिन्तात्मकत्वात् स्पष्टमेवाव्यवधायकत्वम् ।

यद्वा निर्मन्थ्यशब्दस्य यौगिकस्य नामधेयत्वे सत्यपि गुणविधित्वस्य दर्शनात्, वैश्वदेवशब्दस्यापि यौगिकत्वात् सत्यपि नामधेयत्वे गुणविधित्वमप्यस्त्विति समुच्चयेन पूर्वपक्षः, केवलनामधेयत्वेन सिद्धान्त इत्येव विचाराङ्गीकरणेनानन्तरसङ्गतिरेवं वक्तुं शक्येत्याह—**अथ वेति** ।

एतच्चानन्तरसङ्गत्युपपादनसामर्थ्यप्रदर्शनमात्रार्थमुक्तम्, न पारमार्थिकम् । सिद्धे हि वैश्वदेवशब्दस्य नामधेयत्वे समुच्चयेन पूर्वपक्षः स्यात्, तत्सिद्धिश्च तत्प्रख्यतयैव सर्वेषां नामधेयमिति वार्त्तिकदर्शनात् तत्प्रख्यन्यायेनाऽशङ्क्यते । स चाविदितबोधनं च विधिरित्युच्यते विदितं चात्रान्यतो गुणविधानमिति, तत्प्रख्याधिकरणभाष्यात् । अतस्तत्प्रापणं व्यर्थमिति च वार्त्तिकाद्विधित्सितस्य गुणस्यान्यतः प्राप्तौ विध्यानर्थक्याद् गुणविधित्वानुपपत्तेः पारिशेष्यान्नामधेयतेत्येवं रूपः प्रतीयते । न चामिक्षायागव्यतिरिक्तेषु यागेष्वन्यत्र विधित्सितस्य गुणस्यान्यतः प्राप्तिरस्ति । प्रकृत्याविशेषेणाष्टस्वपि यागेषु गुणविधित्वापत्तावप्यस्यामिक्षातिरिक्तार्थत्वेनानर्थक्यायोगात् गुणविधित्वमाश्रित्य 'वैश्वदेवीमामिक्षामि'त्यस्यैवामिक्षामात्रविशिष्टभावनाविधायित्वाश्रयणेन क्रमविनियुक्तवैश्वदेवयाज्यानु-

वाक्यायुगलकल्पितमान्त्रावर्णिकदेवतान्वयाद्यागेऽनुमिते, वैश्वदेवीशब्दस्यामिक्षायागनामधेयत्वं वरं युक्तम्। मन्त्रवर्णाच्च तद्धितस्य बलीयस्त्वात्। तद्विनियुक्ताया अपि देवताया 'वैश्वदेवेन यजेते'त्यनेन विधिरविरुद्धः उत्पत्तिशिष्टाग्न्याद्यवरुद्धत्वादामिक्षायागव्यतिरिक्तेषु देवताविध्यसम्भवेनामिक्षायागे देवताविधिप्रसक्तिमापाद्य, तत्प्रख्यतया नामधेयत्वसिद्ध्यभ्युपगमे केवलामिक्षायागनामत्वापत्तेः सर्वनामतेष्टा न सिध्येत्।

वार्त्तिककारीयं तु तत्प्रख्यत्वाभिधानमुत्पत्तिशिष्टबलीयस्त्वेनैतदधिकरणव्युत्पादितेन गुणविध्यसम्भवान्नामधेयत्वे साधिते, प्रवृत्तिनिमित्तप्रदर्शनार्थं न तु नामधेयत्वसिद्ध्यर्थम्। सर्वत्र च गुणविधित्वसम्भवेनैव नामधेयत्वाभिधानात्, इह गुणविधिसम्भवे नामधेयत्वानुपपत्तेः समुच्चयेन पूर्वपक्षस्यानाशङ्क्यत्वात्प्रौढिमात्रमेतदिति स्थितम्।

विशिष्टविध्यसम्भवे कस्यचिद्गुणस्योत्पत्तिशिष्टस्याभावात्तद्बलेन प्रसिद्ध्यादिहेतुत्रयावधारितगुणविधित्वनिरासाशक्तेः सन्देहायोगाद्विशिष्टविधौ व्युत्पादिते सति, उत्पत्तिविशिष्टगुणसम्भवात्तद्बलीयस्त्वसन्देहेन गुणविधिनामधेयसन्देहो भवतीति सूचनार्थत्वेनेति चेदिति सूत्रावयवव्याख्यनार्थं 'यदीति भाष्यं स्पष्टत्वान्न व्याख्यातम्। विकल्पशब्दस्य गुणविधिप्रतिज्ञानार्थत्वेन व्याख्यानार्थं 'वैश्वदेव' इति भाष्यमुपपादयति—**तत्रेति**। विफलेन गुणविधिप्रतिज्ञानस्य किं प्रयोजनमित्यपेक्षायामुत्पत्तिशिष्टाग्न्याद्यविरुद्धेषु यागेषु देवतान्तरविध्ययोगाद् गुणविध्यसम्भवाशङ्कानिरासप्रयोजनमाह—**एवं हीति**। ननूत्पत्तिशिष्टबलीयस्त्वस्योत्पत्तिवाक्यविज्ञातमित्यादिना चित्राधिकरणे साधितत्वात् नेहोत्पत्त्युत्पन्नशिष्टयोर्विकल्पः पूर्वपक्षयितुं युक्त इत्याशङ्क्याह—**न चेति**। वाक्यभेदापत्त्या तत्र गुणविधित्वानिरासात् पुंपशौ प्राप्ते स्त्रीपशुरिति भाष्यावयवव्याख्यानार्थानागतावेक्षणेनैतदधिकरणसिद्धोत्पत्तिशिष्टबलीयताऽस्माभिरुक्तेत्यर्थः। भाष्यावयवोऽप्यनागतावेक्षणेनाभ्युच्चयहेत्वभिधानायेति भाष्यकारशब्देन सूचितम्।

ननूत्पत्तिशिष्टामिक्षावरुद्धे यागे वाजिनस्योत्पन्नशिष्टस्य विधानाऽयोगेन भेदकत्वस्य गुणाधिकरणे वक्ष्यमाणत्वात् इह तुल्यबलत्वाशङ्का न युक्तेत्याशङ्क्य—**क्वचिदित्युक्तम्**। वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमिति तद्धितचतुर्थीकृतं बलाबलं तत्र वक्ष्यते। नोत्पत्त्युत्पन्नशिष्टकृतमित्याशयः। नन्वेवमप्यष्टदोषविकल्पापादकत्वाद् गुणविधिर्न युक्त इत्याशङ्क्याह—**किं चेति**। वसन्ताद्येककालादियोगेनैव समुदायापादनसिद्धेः समस्तानुवादानर्थक्यप्रसङ्गाद्वैश्वदेवशब्दस्य चाग्नेयादिषु प्रत्येकं समुदाये वा प्रवृत्तिनिमित्ताभावेन नामधेयत्वायोगादगत्या विकल्पापादको गुणविधिरेव ज्यायानित्याशयः। श्लोकं व्याचष्टे—**यदि हीति**। नन्वाग्नेयादिषु प्रत्येकम्, समुदाये वा विश्वेदेवसम्बन्धस्य प्रवृत्तिनिमित्तस्याभावान्नामधेयत्वासम्भवेऽप्यामिक्षायागनामत्वं प्रवृत्तिनिमित्तसद्भावाद्भविष्यतीत्याशङ्क्याह—**न चेति**। यजिसामानाधिकरण्यनिबन्धनत्वान्नामधेयत्वस्य यजेश्चामिक्षायागमात्राग्राहित्वायोगात् तन्मात्रनामधेयत्वस्य च निष्प्रयोजनत्वेन सिद्धान्तिनोऽप्यनिष्टत्वात् नैषा शङ्का युक्तेत्यर्थः। आमिक्षायागे तत्प्रख्यान्यशास्त्रसद्भावाद् गुणविधिर्व्यर्थः।

स्यादित्याशङ्कां निरस्यन् पूर्वपक्षमुपसंहरति—**तस्मादिति**। यस्मादुत्पत्त्युत्पन्नशिष्टयोस्तुल्यबलत्वेनोत्पत्तिशिष्टाग्न्याद्यवरुद्धेष्वपि यागेषु विकल्पेन देवतान्तरनिवेशः सम्भवति, नामधेयत्वं च समस्तानुवादानर्थक्यापत्तेरामिक्षायागव्यतिरिक्तेषु च प्रवृत्तिनिमित्ताभावात् तन्मात्रनामत्वस्य चानिष्टत्वात् न युज्यते। तस्मादित्यर्थः। शङ्कानिरासार्थं सप्तस्वित्युक्तम्। ननु प्रकृतत्वाविशेषात् सर्वेषु यागेषु यजिना गृहीतेषु एकस्यैव वैश्वदेवशब्दस्यामिक्षायागव्यतिरिक्तेषु विधित्वम्, तस्मिंश्चानुवादत्वं वैरूप्यापत्तेर्न युक्तमित्याशङ्कते—**तत्रेति**। परिहरति—**तत्रेति**। प्रकृतत्वात् सर्वयागानां ग्रहणाविशेषेऽपि येषु-यागेषु गुणस्याप्राप्तिः तेषु विधिप्रत्ययस्य तात्पर्योपसंहारात् तद्विषयसमर्पकस्य वैश्वदेवशब्दस्यापेक्षाऽभेदादवैरूप्यमित्यर्थः॥ १३॥

भा० प्र०—'वैश्वदेवेन यजेत' (तै० ब्रा० १।४।१०) वैश्वदेव से यजन करे, यह चातुर्मास्य नामक यज्ञ में चार पर्वों = भागों में एक याग है। ये चार पर्व वैश्वदेव, वरुणप्रघास, साकमेध और शुनासीरीय हैं। वैश्वदेव पर्व फाल्गुन मास की पूर्णिमा को, वरुणप्रघास पर्व आषाढ़ की पूर्णिमा को, साकमेध पर्व कार्तिक पूर्णिमा को और शुनासीरीय कार्तिक पूर्णिमा के बाद किसी समय भी अनुष्ठित होता है। इसमें वैश्वदेव नामक प्रथम पर्व में आठ यागों का विधान है। (१) आग्नेयमष्टाकपालं निर्वपति। (२) सौम्यं चरुम्, (३) सावित्रं द्वादशकपालम्, (४) सारस्वतं चरुम्, (५) पौष्णं चरुम्, (६) मारुतं सप्तकपालम्, (७) वैश्वदेवीमामिक्षाम्, (८) द्यावापृथिव्याम् एककपालम्'। अर्थात् अग्नि देवता के उद्देश्य से अष्टाकपाल=आठ कपालों में संस्कृत द्रव्य, निर्वपन अर्थात् निवेदन करने के लिए ग्रहण करे, सोमदेवता का चरु, सविता देवता का बारह चरु, सरस्वती देवता का चरु, पूषा देवता का चरु, मरुत् देवता का चरु, सात कपाल, विश्वदेव नामक देवता की आमिक्षा और द्यावापृथिवी देवता को एक कपाल निरुप्त अर्थात् निवेदन करने के लिए ग्रहण करे। इस वचन से आठ याग का विधान होता है, उसी के समीप में 'वैश्वदेवेन यजेत' (तै० ब्रा० १।४।१०) यह श्रुति वाक्य पठित है। 'वैश्वदेवेन' यह पद गुणविधि है या कर्म का नामधेय है—यह सन्देह होता है। इस प्रसङ्ग में पूर्वपक्षी का कहना है कि 'वैश्वदेवेन यजेत' इस वाक्य में 'यजेत' इस पद के पूर्व वचनों से विहित आग्नेय आदि यागों का अनुवाद कर वैश्वदेव शब्द से विश्वदेव नामक देवता रूप गुण विहित होता है—यह कल्पना ही सङ्गत है, कारण, इसको कर्म का नाम मानने पर इसमें कौन द्रव्य अथवा देवता उपदिष्ट है—यह न कहकर, इसके द्वारा केवल याग सामान्य का ही अभिधान होता है। किन्तु याग सामान्य अनुष्ठान के अयोग्य होने से विधि अनर्थक होगी। इसलिए इसको गुणविधि मानना उचित है।

यदि यह कहा जाय कि 'वैश्वदेवीम् आमिक्षाम्' इस वचन से विश्वदेव नामक देवता का विधान होने से पुनः उसका विधान अनर्थक है, ऐसी स्थिति में 'वैश्वदेवे

विकल्पः' यह कहा गया है। इस स्थल में 'वैश्वदेवेन यजेत' इसके द्वारा आग्नेय आदि अन्य सात यागों में विश्वदेव नामक देवता की प्राप्ति का निर्देश किया गया है। ऐसी अवस्था में अग्नि आदि देवता का उल्लेख रहने पर भी विश्वदेव नामक देवता के साथ अग्नि आदि देवता का विकल्प होगा अर्थात् अग्नि आदि देवता को भी उद्देश्यभूत किया जा सकता है एवं विश्वदेव नामक देवता भी उद्देश्य हो सकते हैं।

"वैश्वदेव" = वैश्वदेव इस शब्द में, देवता विहित होने से 'विकल्पः' = उसके पूर्व वचन से सिद्ध अग्नि आदि देवताओं में विकल्प होगा। 'इति चेत्' = यदि यह कहा जाय। वैश्वदेव इस शब्द से विश्वदेव नामक देवता विहित है, अतः, उसके समीपस्थ अन्य वचनों से विहित अग्नि आदि देवताओं का विकल्प होगा—इस प्रकार पूर्वपक्ष हो सकता है ॥ १३ ॥ यह पूर्वपक्ष है।

न[1] वा प्रकरणात्प्रत्यक्षविधानाच्च न हि प्रकरणं द्रव्यस्य ॥ १४ ॥ सि०

शा० भा०—नैतदेवम्। प्रत्यक्षश्रुतिविहिता अग्न्यादयस्तेषां यागानाम्, विश्वेदेवा वाक्येन। प्रकरणात्तेनैव नान्येनेति गम्यते। न चायं विषमशिष्टो विकल्पो भवितुमर्हति। न हि प्रकरणं श्रुतस्य द्रव्यस्य बाधने समर्थम्। तस्मात्कर्मनामधेयम् ॥ १४ ॥ सिद्धान्तः ॥

भा० वि०—न वा प्रकरणादित्यत्र नञर्थमाह—**नैतदेवमिति**। उत्पत्तिशिष्ट-गुणावरुद्धे कर्मणि उत्पन्नाशिष्टो गुणो नावकाशार्हः इत्यत्र प्रकरणात्प्रत्यक्ष-विधानाच्चेति सूत्रावयवोक्तं वैषम्यं हेतुत्वेन योजयति—**प्रत्यक्षेत्यादिना**। अग्न्यादयो ह्युत्पत्तिवाक्ये तद्धितश्रुत्याष्टाकपालादिद्वारेण यागसम्बन्धितया विहिता इत्यर्थः। अग्न्यादीनामेकपदोपादानसूचनेनेतरेषां भिन्नपदोपादानमपि सूचितमित्याह—**विश्वेदेवा इति**। न वाग्नेयमष्टाकपालं निर्वपतीत्युत्पत्तिवाक्येऽपि द्रव्यविशेषसम्बन्धस्याष्टाकपालादिपदान्तरसम्बन्धाधीनत्वाद्वाक्यायता तुल्येति वाच्यम्, वैश्वदेववाक्ये द्रव्यविशेषार्पकपदान्तराश्रवणाद्यागलक्षितेन द्रव्येण देवतासम्बन्धं कल्पयित्वा तद्द्वारेण यागस्य देवतासम्बन्धकल्पनाद्विप्रकर्षसाम्या-द्वाक्येनेत्युक्तत्वादित्यवधेयम्।

ननु तर्हि वाक्येनैव विश्वेषां देवानां यागसम्बन्धलाभे प्रकरणादिति सूत्रा-वयवेन प्रकरणापेक्षत्वाभिधानमयुक्तं स्यादित्याशङ्कानिरासार्थं व्याचष्टे—**प्रकरणादिति**। वाक्याद्यागमात्रसम्बन्धेऽपि सति प्रकरणात्तेनैवाग्नेयादियागेन

---

१. ब. प्रकरणात्।

नान्येनेति विशेषसिद्धेः युक्ता प्रकरणापेक्षेत्यर्थः। एवमग्न्यादीनां विश्वेषां च देवानामुत्पत्त्युत्पन्नशिष्टत्ववैषम्ये सिद्धे फलितमाह—**न चायमिति**।

अथ विषमशिष्टयोरपि विकल्पः कस्मान्न भवतीत्याशङ्क्य नहित्यादिसूत्रावयवं व्याचष्टे—**नहीति**। द्रव्यशब्दो वस्तुवाची। न हि श्रौतस्याग्न्यादिदेवताख्यस्य वस्तुनः प्रकरणापेक्षं विश्वेदेवाख्यं वस्तु पाक्षिकबाधने समर्थमित्यर्थः, विकल्पासम्भवेन गुणविध्यसिद्धौ सिद्धमर्थमाह—**तस्मादिति**। भिन्नेष्वपि वसन्तकालेषु प्राचीनप्रवणेषु देशेषु चानुष्ठाने वसन्तादिविध्यर्थसम्पत्तेर्गुणानुरोधेन च प्रधानसाहित्यकल्पनायोगादेकदेशकालयोगात्समुदायसम्पादनासिद्धेः समुदायानुवादार्थो वैश्वदेवशब्दः। न च प्रवृत्तिनिमित्तासम्भवः छत्रिन्यायेनैकदेशस्थैरपि विश्वैर्देवैः उपलक्षितानां तन्नामत्वसिद्धेरित्यभिसन्धिः ॥ १४ ॥

सिद्धान्तः

त० वा०—अत्रोच्यते—नायं प्रकृतेषु गुणविधिरुपपद्यते। कथम्?

गुणान्तरावरुद्धत्वान्नावकाश्यो[1] गुणोऽपरः।
विकल्पोऽपि न वैषम्यात्तस्मान्नामैव युज्यते ॥

अग्न्यादयो ह्युत्पत्तिवाक्ये तद्धितश्रुत्याऽष्टाकपालादीनां देवताः, विश्वेदेवाः वाक्येन। नन्वत्राप्यष्टाकपालादिसम्बन्धाद्वाक्यमेव। न। तद्धितेन द्रव्यविशेषस्य कृते देवतासम्बन्धे वाक्येन विशेषणविशेष्यभावमात्रकरणात्। वैश्वदेवशब्देऽपि तथेति चेत् न। यागलक्षितद्रव्यसम्बन्धकल्पनाविप्रकर्षात्। न तावद्वैश्वदेवेनेति प्रकृतमप्रकृतं वा द्रव्यं देवतासम्बन्धि श्रूयते। तत्र यजेतेति सामानाधिकरण्यादेवं तावद्विज्ञायते वैश्वदेवेन यागेनेति। ततश्चान्यथा यागसम्बन्धानुपपत्त्या तत्साधनं द्रव्यं लक्षणया देवता स्कन्दति। वाक्येन च यागमात्रसम्बन्धे सति, प्रकरणादिदं कल्पनीयं तेनैवाऽऽग्नेयादिना यागेन वैश्वदेवेन यजेत, नान्येनेति। न त्वग्न्यादिविधौ काचिल्लक्षणापेक्षा, प्रकरणापेक्षा वेति वैषम्यम्, **नहि प्रकरणं द्रव्यस्येति**[2]। यदा द्रव्यस्याग्न्यादिसम्बन्धो विधीयते, न तदा प्रकरणापेक्षेत्यर्थः।

अथ वा यद् द्रव्यस्य प्रकरणं न तद्वैश्वदेववाक्येनाऽऽश्रितम्। भाष्ये तु द्रव्यशब्दो वस्तुवाची। न हि श्रौतस्याग्न्यादिद्रव्यस्य देवताभूतस्य प्रकरणं बाधकम्, वैयधिकरण्यं वा, द्रव्यस्य यत्सम्बन्धित्वेन श्रुतमग्न्यादि, तस्य प्रकरणं न बाधकमिति। प्रकृतयजिबुद्धेश्च न दूरस्थानुवादेन गुणविधिः, विशिष्टापूर्वकर्मविधानं वा। विप्रकीर्णयागैकीकरणाच्च समुदायानुवादोऽर्थवान्। न हि 'वसन्ते वैश्वदेवेन' 'प्राचीनप्रवणे वैश्वदेवेन' इत्यादिविधानं परस्परसहितानामष्टानां हविषां समुदायपदादृतेऽवकल्पते। तस्मादेकदेशस्थैरपि विश्वैर्देवैरुपलक्षितानां छत्रिन्यायेन तत्प्रख्यतयेव सर्वेषां नामधेयत्वम् ॥ १४ ॥

---

१. क. नावकाशो। २. क. (टिप्पण्यां) देवेतेति पा० पुस्तके।

न्या० सु०—वैश्वदेवशब्दे गुणविधानस्य प्रकृतयागापेक्षत्वात् तेषु च प्रत्यक्षेण द्रव्यदेवताविशिष्टयागविधिनैवाग्न्यादिदेवतालक्षणस्य गुणस्य विधानात्तद्विरोधिगुणान्तरनिवेशानुपपत्तेर्न गुणविधिः सम्भवतीत्युत्पत्तिशिष्टबलीयस्त्वेन गुणविधिनिराकरणमविहितदेवताकोपांशुयाजादियागे देवताविधौ, देवताविशिष्टयागान्तरविधौ वा न सम्भवतीति, प्रकृतयागानुवादो न गुणविधिरुत्पत्तिशिष्टबलीयस्त्वेन निरस्यत इति दर्शयन्सौत्रमनुक्तां प्रतिज्ञां व्याचष्टे **अत्रेति**[1]। उत्पत्त्युत्पन्नशिष्टत्वलक्षणवैषम्याभिधानसूचितमुत्पत्तिशिष्टेनोत्पन्नशिष्टस्य बाधं प्रश्नपूर्वकं हेतुत्वेनाह—**कथमिति**। उत्पत्त्युत्पन्नशिष्टयोर्वाक्यीयत्वाविशेषात् विकल्पोपपत्तेः, किमुत्पत्तिशिष्टगुणावरुद्धे कर्मणि उत्पन्नशिष्टो गुणो नावकाशार्ह इत्यपेक्षायां प्रकरणात्प्रत्यक्षविधानाच्चेति सूत्रावयवोक्तं वैषम्यं हेतुत्वेन योजयति—**विकल्पोऽपीति**। पारिशेष्यान्नामत्वसिद्धि तस्मादित्युपसंहारभाष्योक्तां विवरीतुम्—**तस्मादित्युक्तम्**। उत्पत्तिशिष्टबलीयस्त्वं प्रत्यक्षविधानादिति—**सूत्रावयवोक्तम्**। दर्शयितुं प्रत्यक्षेति भाष्यं व्याचष्टे—**अग्न्यादयो हीति**। यद्यपि सोमेन यजेत्यादौ कर्मगुणयोर्भिन्नपदोपादानेऽपि सकृच्छ्रुतेनैव प्रत्ययेनोभयविधानात् शुद्धकर्मप्राप्तेरुत्पत्तिशिष्टबलीयस्त्वं सिद्ध्यति, तथापीह विधेयसमर्पकमप्येकमेव पदमस्तीत्यतिशयाभिधानार्थं तद्धितग्रहणम्। तेषां यागादीनामिति भाष्योक्तस्याग्न्यादीनां यागसम्बन्धस्य द्रव्यसम्बन्धद्वारत्वं दर्शयितुमष्टाकपालादीनामित्युक्तम्। एकपदोपात्ताग्न्यादिवैषम्यसूचितमितरेषां भिन्नपदोपादानं 'विश्वेदेवा' इत्यनेन दर्शितम्। नन्वाग्नेयमष्टाकपालं निर्वपतीत्यादावुत्पत्तिवाक्येऽपि द्रव्यविशेषसम्बन्धाऽष्टाकपालादिपदान्तरसम्बन्धाधीनत्वाद्वाक्यीयत्वेन तुल्यतेत्याशङ्कते—**नन्विति**। नैव हि द्रव्यमात्रस्य तद्धितैर्देवतोच्यते, अस्यशब्दाभिधेयस्य विग्रहवाक्यस्थेनास्येति सर्वनाम्ना सन्निहितस्य द्रव्यविशेषस्यैव देवतासम्बन्धस्तद्धितेन क्रियते। न चैतावता पदान्तरानर्थक्यम्।

आमिक्षां देवतायुक्तां वदत्येवैष तद्धितः।
आमिक्षापदसामीप्यात्तस्यैव विषयार्पणम्॥

इत्यनेनैव न्यायेन सन्निहितविशेषणापेक्षितविशेष्यासमर्पणार्थत्वात् पदान्तरस्येति परिहरति—**नेति**। प्रत्यक्षविधानादिति सूत्रावयवोक्तेनैव तद्धितवाच्यद्रव्यविशेषसम्बन्धेन पशुसोमाधिकरणादौ व्यवहारादपौनरुक्त्यम्। अस्यापि तद्धितत्वाविशेषात् तुल्यतामाशङ्कते—**वैश्वदेवशब्देऽपीति**।

देवताशब्दस्य सम्बन्धिशब्दत्वेन गुर्वादिशब्दवत् प्रतिसम्बन्धिनमपेक्ष्य प्रवृत्तेर्यागस्य च सम्बन्धापादकत्वेनाध्यापनादिवत् प्रतिसम्बन्धित्वायोगात् द्रव्यस्यैव शिष्यादिवत् प्रतिसम्बन्धित्वप्रतीतेः। 'सास्य देवते'ति देवतातद्धिताधिकारसूत्रेऽस्यशब्दस्य प्रतिसम्बन्धिद्रव्यविषयत्वावधारणात् 'सूक्तहविषोरि'ति नियतविषयत्वस्मृतेश्च वैश्वदेवशब्दस्य देवता-

1. यायामति २ पु० पा०।

सम्बन्धिद्रव्यवाचित्वावसायाद्यागलक्षितस्य द्रव्यस्य देवतासम्बन्धं कल्पयित्वा, तद्द्वारेण यागस्य देवतासम्बन्धात्प्रवृत्तेर्विप्रकर्षसाम्याद्वाक्येनेति भाष्यकृतोक्तामिति परिहरति—**नेति**। नन्वष्टाकपालादेः प्रकृतस्य देवतासम्बन्धित्वोपपत्तेः किमिति यागेन द्रव्यं लक्षणीयमित्याशङ्कानिरासपूर्वकमेतदेव व्याचष्टे—**न तावदिति**। द्रव्यसम्बन्धं विना तद्धितशब्दस्यापर्यवसानेन वाक्यान्तरान्वयायोगात् अप्रकृतवत्प्रकृतेनापि द्रव्येण स्ववाक्ये श्रवणं विना सम्बन्धानुपपत्तेरपरिहार्या लक्षणेत्याशयः।

ननु वाक्येनैव विश्वेषां देवानां यागसम्बन्धलाभेन 'प्रकरणादि'ति सूत्रावयवेन, प्रकरणापेक्षत्वाभिधानमयुक्तं स्यादित्याशङ्कानिरासार्थं 'प्रकरणादि'ति भाष्यं व्याचष्टे—**वाक्येन चेति**। कर्मानुवादिनां धातूनां सामान्यविषयत्वे सर्वसङ्करापत्तेः, तत्परिहारायाऽनुवाद्यकर्मविशेषलाभार्थं प्रकरणापेक्षेत्याशयः। तथा च प्रत्यक्षविधानादित्यनेनाग्न्यादीनामेकपदोपादानाभिधानात्, विश्वेषां देवानां भिन्नपदोपादानानां सूचितम्। तथा प्रकरणादित्यनेन विश्वेदेवविधौ प्रकरणापेक्षाभिधानादग्न्यादिविधौ तदनपेक्षा सूचितेति दर्शयितुमाह—**न त्विति**। भाष्यगतेन वाक्यशब्देन वैश्वदेवशब्दे द्रव्यलक्षणाभिधानात्, तत्सदसद्भावकृतमपि वैषम्यं सूचितमिति दर्शयितुं लक्षणाशब्दः। न हीति सूत्रावयवं स्वयं तावत् नन्वाग्नेयादिवाक्येऽपि द्रव्यदेवतासम्बन्धान्यथानुपपत्त्या यागे कल्पयितुमारुभ्यमाणे 'वैश्वदेवेन यजेते'ति प्रत्यक्षश्रुतेन कल्पनाप्रतिबन्धात् तस्यैव ग्रहणायाऽस्त्येव प्रकरणापेक्षेत्याशङ्कानिरासार्थत्वेन निर्वपतेरतिदेशप्राप्तानुवादत्वेन पुंव्यापारनियोगाभावात् आग्नेयादिवाक्यस्य स्वार्थासमाप्तत्वेन वाक्यान्तरान्वयायोगात् नाष्टाकपालादिद्रव्यस्याग्न्यादिसम्बन्धे प्रकरणापेक्षेत्येवं व्याचष्टे—**न हीति**।

यद्वा वैश्वदेववाक्ये यागेन द्रव्यलक्षणाद्विप्रकर्षेऽभिहिते ननु प्रकृतस्याष्टाकपालादेर्देवतान्वयसम्भवान्न यागेन द्रव्यं लक्षणीयमित्याशङ्कानिरासार्थत्वेन द्रव्यसम्बन्धं विना तद्धितस्यापर्यवसानेन वाक्यान्तरान्वयायोगात् यद्द्रव्यस्य प्रकरणे श्रवणम् तन्न वैश्वदेववाक्येनाश्रितम् इत्येवं व्याख्येयमित्याह—**अथ वेति**। भाष्यकृता त्वाग्नेयादिवाक्ये प्राकरणिकयज्यपेक्षायां वैश्वदेववाक्यस्यैव यागविधायित्वापत्तेः पूर्वपक्षहानिप्रसङ्गात्। प्राप्ते च कर्मण्याग्नेयादिवाक्येनानेकगुणविधेर्वाक्यभेदापत्त्या पौर्णमास्यधिकरणे निराकरिष्यमाणत्वात्। आद्यायाः शङ्कायास्तुच्छत्वात् यागेन च द्रव्यलक्षणायाः सूत्रानुक्तत्वेन तद्विषयाशङ्कानिरासार्थतया सूत्रावयवयोजनस्य क्लिष्टत्वात्। प्रत्यक्षविधानप्रकरणशब्दोक्तस्योत्पत्त्युत्पन्नशिष्टत्वलक्षणस्य वैषम्यस्य प्रस्तुतविकल्पनिरासोपयोगित्वप्रतिपादनार्थत्वेनायं सूत्रावयवश्चशब्दार्थे, हिशब्दम् द्रव्यशब्दम्, चाग्न्यादिदेवतापरमङ्गीकृत्य प्रकरणापेक्षं विश्वेदेवाख्यं वस्तु श्रुतस्याग्न्यादेः पाक्षिकबाधनेन च समर्थं येन विकल्पः स्यादिति अध्याहारेण व्याख्यातः। तत्र कथं द्रव्यशब्देन देवतोच्यते इत्यपेक्षायामाह—**भाष्ये त्विति**। देवताव्यतिरेकजनितां वा षष्ठीमङ्गीकृत्य श्रुतस्य द्रव्यस्येति षष्ठ्या वैयधिकरण्यनिर्देशेन द्रव्यस्याष्टाकपालादेः सम्बन्धित्वेन श्रुतस्याग्न्यादे-

देवतारूपस्येत्येवं भाष्यकृद्व्याख्याऽनुसर्तव्येत्याह—**वैयधिकरण्यं वेति**। देवतात्वेनादीयते गृह्यते यदग्न्यादीत्येतदर्थप्रतिपादनार्थोऽयमादिशब्दः। यागसम्बन्धित्वेन श्रुतेभ्यो विश्वेभ्यो देवेभ्योऽग्न्यादीनां वैषम्यप्रदर्शनार्थं द्रव्यसम्बन्धाभिधानम्।

ननु प्रकृतेषु गुणविध्यसम्भवेऽप्यविहितदेवताकोपांशुयाजानुवादेन गुणविधिः, गुणविशिष्टापूर्वकर्मविधिर्वा भविष्यतीत्याशङ्क्याह—**प्रकृतेति**। समस्तानुवादानर्थक्यं पूर्वपक्षोक्तं परिहरति—**विप्रकीर्णेति**। यद्विश्वेदेवा अयजन्त तद्वैश्वदेवस्य वैश्वदेवत्वमित्यर्थवादावगतविश्वेदेवकर्तृकत्वलक्षणैकधर्मयोगनिमित्तमष्टानां यागानां समुदायरूपत्वेनैकीकरणं समुदायानुवादप्रयोजनमित्यर्थः। ननु प्राजापत्यपशुयागादिवत् समुदायानुवादं विनापि प्रकृतत्वयागत्वाभ्यामेकबुद्धिविषयत्वलक्षणसमुदायत्वं सेत्स्यतीत्याशङ्क्य, विप्रकीर्णेत्युक्तम्। सहविधानाभावान्नैषां प्राजापत्यादितुल्यतेत्याशयः। ननु वसन्ताद्येककालादियोगात् समुदायत्वं सेत्स्यतीत्याशङ्क्याह—**न हीति**। वैश्वदेवशब्दस्य समुदायवाचित्वाभावे भिन्नवाक्यविहितानां यागानां साहित्याप्रतीतेः, भिन्नेष्वपि च वसन्तकालेषु, प्राचीनप्रवणदेशेषु वाऽनुष्ठाने वसन्तादिविध्यर्थसम्पत्तेर्गुणानुरोधेन प्रधानसाहित्यकल्पनायोगात् नैकदेशकपालयोगात्समुदायत्वसिद्धिरित्याशयः। विश्वे देवा न च प्राप्ता इत्यनेन प्रवृत्तिनिमित्ताभावान्नामधेयत्वासम्भवमुक्तं परिहरति—**तस्मादिति**। यस्मात्समुदायानुवादेन समुदायत्वं सिद्धम्। तस्माल्लिङ्गसमवायात्सर्वेषां तत्प्रख्यस्य वैश्वदेशब्दव्यपदेश्यत्वस्योपपत्तेः सर्वेषामेव वैश्वदेवशब्दो नामधेयमित्यर्थः।

समुदायत्वसिद्धावपि वैश्वदेवशब्देन समुदाये गुणस्याविधित्सितत्वात्समुदाये गुणप्रापकशास्त्रान्तरस्याभावादेकदेशे प्राप्तस्य गुणस्यैकदेशान्तरे प्रापणवैयर्थ्यायोगात्तत्प्रख्यशब्दस्य च तत्प्रख्यान्यशास्त्रसद्भावप्रतिपादनासामर्थ्यात्, तत्प्रख्याधिकरणन्यायसिद्धत्वं नामधेयस्यानेनोक्तमिति न भ्रमितव्यम्॥ १४॥

भा० प्र०—इस प्रकार पूर्वपक्षी के अनुसार विश्वेदेव नामक देवता के साथ अग्नि आदि देवताओं में विकल्प की प्राप्ति होती है। किन्तु यह सङ्गत नहीं है, क्योंकि, 'प्रकरणात्' इस स्थल में विश्वेदेव नामक देवता अन्य वचनों के द्वारा विहित होता है, अतः यह प्रकरण के द्वारा प्राप्त है। किन्तु अग्नि आदि देवता तद्धित प्रत्यय के द्वारा श्रुति के द्वारा ही विहित होता है। यही इस सूत्र में 'प्रत्यक्षविधानात् च' इस अंश से कहा गया है। प्रकरण और श्रुति में श्रुति ही बलवती होती है। इसलिए श्रुति के द्वारा प्रकरण दुर्बल होने से उसका बाध होता है, न कि प्रकरण के द्वारा श्रुति का ही बाध सम्भव है। यह तृतीय अध्याय के तृतीय पाद के सप्तम अधिकरण में प्रतिपादित किया गया है। दूसरी बात यह है कि अग्नि आदि देवता उत्पत्तिशिष्ट है और विश्वेदेव नामक देवता उत्पन्नशिष्ट है। कर्म विधायक वाक्य के द्वारा जिसका विधान होता है, उसको उत्पन्नशिष्ट कहा जाता है। उत्पत्तिशिष्ट और उत्पन्नशिष्ट में उत्पत्तिशिष्ट ही प्रबल

होता है। क्योंकि, उत्पत्ति वाक्य में = कर्म विधायक वाक्य में जो कर्म विहित होता है, उसके द्रव्य एवं देवता आदि की आकाङ्क्षा यदि उससे निवृत्त नहीं होती है तो उसकी पूर्ति के लिए अन्य वाक्य की अपेक्षा होती है। किन्तु उत्पत्ति वाक्य से ही यदि द्रव्य, देवता की आकांक्षा चरितार्थ हो जाती है तो अन्य वाक्य की क्यों अपेक्षा होगी ? अतः उत्पन्नशिष्ट की अपेक्षा उत्पत्तिशिष्ट बलवान् होता है। इस स्थल में अग्नि आदि देवता उत्पत्तिशिष्ट होने से वह उत्पन्नशिष्ट विश्वदेव नामक देवता की अपेक्षा प्रबल है। दुर्बल से प्रबल का बाध नहीं होता है। अतः, उत्पन्नशिष्ट विश्वदेव नामक देवता के द्वारा उत्पत्तिशिष्ट अग्नि आदि का बाध नहीं हो सकता है, अतः, उसका विकल्प मानना सङ्गत नहीं है। क्योंकि, विकल्प मानने पर विश्वेदेव नामक देवता की प्राप्ति के समय अग्नि आदि देवताओं का बाध ही होता है, इस विषय की सूचना 'न हि प्रकरणं द्रव्यस्य' इस अंश से होती है।

'न वा' = नैव, ऐसा नहीं हो सकता है, 'प्रकरणात्' = क्योंकि, गुणविधि प्रकरण के द्वारा प्राप्त है, 'च' = किन्तु, 'प्रत्यक्षविधानम्' = अग्नि आदि देवता का प्रत्यक्ष विधान अर्थात् तद्धित श्रुति के द्वारा विधान किया जाता है, 'हि' = क्योंकि, 'प्रकरणम्' = प्रकरण 'द्रव्यस्य' = द्रव्य के अर्थात् देवता रूप वस्तु का, 'न' = बाधक नहीं हो सकता है। 'वैश्वदेवेन'—इस स्थल में देवता रूप गुण का विधान नहीं हो सकता है, क्योंकि, 'आग्नेयम् अष्टाकपालम्' इत्यादि वाक्य में प्रत्यक्ष तद्धित रूप प्रत्यय रूप श्रुति के द्वारा देवता विहित होता है, किन्तु, गुणविधि प्रकरण से सिद्ध होती है और प्रकरण श्रुतिविहित देवता रूप वस्तु का बाधक नहीं हो सकता है। यह सिद्धान्त पक्ष है ॥१४॥

मिथश्चानर्थसम्बन्धः ॥ १५ ॥

शा० भा०—अथोच्येत वैश्वदेव इत्यनेन शब्देन प्रत्यक्षमग्न्यादिगुणविशिष्टो यागगणो लक्ष्यते। वैश्वदेवी हि तत्राऽऽमिक्षा समवैति। यदि वैश्वदेवशब्देन यागगणो लक्ष्यते, न तर्हि विश्वेदेवा विधीयन्ते। कथं सकृदु[१]च्चरितो वैश्वदेव-शब्दो यागगणं लक्षयिष्यति, विश्वाँश्च देवान् विधास्यतीति, नायं वैश्वदेव-शब्दस्य विश्वैर्देवैर्मिथः सम्बन्धो घटते। तस्मात्कर्मनामधेयमेव, न गुण-विधिरिति ॥ १५ आ० नि० ॥

भा० वि—सूत्रव्यावर्त्याशङ्कां दर्शयति—**अथोच्येतेति**। कथं वैश्वदेवशब्देन यागगण उच्यते ? इत्याशङ्क्य लिङ्गसमवायादित्याह—**वैश्वदेवी होति**। अतश्च स्ववाक्यगतेन विश्वेदेवशब्देनैवाग्नेयादियागलक्षणोपपत्तेः प्रकरणानपेक्षत्वात्तद-

---

१ ब. सकृदयमुच्चरितो।

पेक्षानिमित्तदौर्बल्याभावेनोत्पत्तिशिष्टाग्न्याद्यवरुद्धेष्वपि यागेषु विधीयमानदेवतान्तराकाङ्क्षोत्थापनाद्देवतान्तरं निवेक्ष्यत इतिभावः। सकृदुच्चरितस्य पदस्य विध्यनुवादकत्वे विरोधान्न युक्ते इति दूषयति—**यदीति**। एतद्विवृणति—**कथमित्यादिना**। कानुपपत्तिरित्याशङ्क्य सौत्रं हेतुमाह—**नायमिति**। यतो यागगुणलक्षकस्य वैश्वदेवशब्दस्य विश्वैः देवैरर्थैः सहमिथःसम्बन्धोऽनुपपन्न इत्यर्थः। गुणविधित्वाशङ्कानिरासफलमाह—**तस्मादिति** ॥ १५ ॥

त० वा०— वैश्वदेवमुपादाय देवता नोपदिश्यते।

सह विध्यनुवादौ हि नैकः शब्दः समश्नुते ॥

अथ वा यदुक्तं निर्मन्थ्यादिवन्नामैव सद् गुणमपि विधास्यतीति। तत्राभिधीयते। मिथश्च नामगुणविध्यर्थयोरसम्बन्धः। निर्मन्थ्यस्तु गुणविधिरिति ॥ १५ ॥

न्या० सु०—ननु यथा 'वाजिभ्यो वाजिनमि'त्यत्र स्ववाक्यगतेन वाजिशब्देनाऽऽमिक्षायागं लक्षयित्वा विधीयमानस्य वाजिनस्य प्रकरणापेक्षाभावात्, तन्निमित्तदौर्बल्याभावेनोत्पत्तिशिष्टामिक्षावरुद्धस्यापि यागस्य विधीयमानद्रव्यान्तराकाङ्क्षोत्थापनात्, तस्मिन्नेव यागे वाजिनस्य निवेशोपपत्तिरिति गुणाधिकरणे पूर्वपक्षयिष्यते, तथेहापि स्ववाक्यगतेन वैश्वदेवशब्देनैवाग्नेयादियागलक्षणोपपत्तेः प्रकरणानपेक्षत्वात् तदपेक्षानिमित्तदौर्बल्याभावेनोत्पत्तिशिष्टाग्न्याद्यवरुद्धेष्वपि यागेषु विधीयमानदेवतान्तराकाङ्क्षावशेनाकाङ्क्षोत्थापनात्, देवतान्तरं निवेक्ष्यते। यथा चैतद्यदनुसवनं पुरोडाशा निरूप्यन्ते। इति पुरोडाशशब्देन 'धानाः, करम्भः, परिवापः, पुरोडाशः, पयस्येत्येष वै यज्ञो हविष्पङ्क्तिरित्येकस्यैव पुरोडाशस्य प्रकृतत्वाद् बहुवचनान्वयाय हविर्गणो लक्ष्यते। तथा वैश्वदेवशब्देनाप्यामिक्षायागो विश्वेषां देवानां प्राप्तत्वेन विधानायोगात् तद्विधानायाऽऽमिक्षायागलक्षणायामानर्थक्यापत्तेः, तत्सहचरिताग्नेयादियागलक्षणा न विरुद्धेत्याशङ्कानिरासार्थत्वेनैतत्सूत्रव्याख्यानार्थम्, अथोच्येतेति भाष्यं संक्षिप्य व्याचष्टे- **वैश्वदेवमिति**। उपोधिके चेति चकारेण लक्षणार्थस्यापि उपशब्दस्य कर्मप्रवचनीयसंज्ञान्वाख्यानात्, कर्मप्रवचनीययुक्ते द्वितीयेति स्मृतेस्तद्योगनिमित्तद्वितीयाभ्युपगमेन विश्वेदेवयागस्य समीपे विहितानाग्नेयादियागान् वैश्वदेवशब्देनाऽऽदाय देवतोपदिश्यत इति यदाशङ्क्ते, तन्न युक्तमित्येवं योज्यम्।

यदा त्वनन्तरसङ्गतिलोभेन द्रव्यशब्दानुपादानेऽपि, देवताशब्दस्य सम्बन्धिशब्दत्वात् प्रतिसम्बन्धिद्रव्यसपेक्ष्य प्रवृत्तेः 'सास्य देवतेति, अधिकारसूत्रगतस्यास्यशब्दस्य द्रव्यविषयत्वावगतेः 'सूक्तहविषोरि'ति च तद्विषयस्मृतेर्विश्वेदेवा अस्य हविषो देवता इति वैश्वदेवशब्दार्थावसायात् यजिसामानाधिकरण्यसिद्ध्यर्थं वैश्वदेवद्रव्यवता यागेनेति मत्वर्थलक्षणाप्रसङ्गात् उद्भिन्न्यायसिद्धं नामधेयत्वमाश्रित्य प्रवृत्तिनिमित्तसिद्ध्यर्थं गुणविधिरप्यस्त्विति समुच्चयेन पूर्वपक्षः क्रियते, तदा नामधेय-गुणविधिरूपयोरर्थयोः

प्रयोजनयोः सकृदुच्चरितेन वैश्वदेवशब्देन सह प्रयोजनप्रयोजननिभावलक्षणः सम्बन्धो न युक्त इत्येवं सूत्रं व्याख्येयमित्याह—**अथ वेति**।

ननु निर्मन्थ्यशब्दे प्रयोजनद्वयदर्शनान्नानयोर्विरोधोऽस्तीत्याशङ्क्याह—**निर्मन्थ्यस्त्विति**। अग्निशब्दाश्रवणेन तत्सामानाधिकरण्याभावाश्रवणेऽपि वा निर्मन्थ्यशब्दस्याग्निपर्यायत्वाभावेनाग्निमात्रनामत्वायोगात् मन्थनजन्यस्य च विशेषस्याक्षेपकाभावेनाप्रतीतेः, तन्नामत्वस्याप्ययोगाद् गुणविधिरेव केवलोऽसावित्यर्थः ॥ १५ ॥

भा० प्र०—पूर्वपक्षी यदि यह कहें कि 'वैश्वदेव' इस शब्द को नामधेय मानने पर इसके द्वारा लक्षणा के अनुसार आग्नेय आदि आठ यागों की समष्टि प्रतिपादित होती है अर्थात् 'वैश्वदेव' यह शब्द 'आग्नेय' आदि शब्द आठ यागों को बताने के लिए है एवं विश्वदेव नामक देवता रूप गुण का भी विधान निर्देश करेगा, ऐसी स्थिति में, यह कहा जा सकता है 'मिथः च अनर्थसम्बन्धः' एक ही समय में नामविधि एवं गुणविधि रूप दो अर्थों के साथ विधि प्रत्यय का सम्बन्ध नहीं हो सकता है, क्योंकि, इससे याग की अवगति करायेगा एवं 'विश्वेदेव' नामक देवतारूप गुण का भी निर्देश किया जायगा, अतः, वाक्यभेद होगा। क्योंकि 'वैश्वदेव' इस शब्द की आवृत्ति के विना इन दो अर्थों की सिद्धि नहीं होगी, कारण, एक वैश्वदेव शब्द विश्वदेव नामक देवता एवं वैश्वदेव नामक याग इन दो अर्थों का बोधक नहीं हो सकता है। ऐसी स्थिति में 'विध्यनुवाद' नामक दोष का प्रसङ्ग होगा। इसलिए 'वैश्वदेवेन' यह गुणविधि नहीं है, अपितु कर्म का ही नामधेय है।

'मिथः' = परस्पर अर्थात् एक ही समय में, 'च' = एवं या और 'अनर्थ सम्बन्ध'= न अर्थ सम्बन्धः, दो अर्थों का अर्थात् नामविधि एवं गुणविधिरूप दो अर्थों का सम्बन्ध नहीं हो सकता है ॥ १५ ॥

परार्थत्वाद् गुणानाम् ॥ १६ ॥

शा० भा०—परार्थाश्च गुणाः। ते न शक्नुवन्ति प्रधानमावर्तयितुम्। तेन सकृद्यागः कर्तव्यो न गुणानुरोधेनाऽऽवर्तितुमर्हति। सम्प्रतिपन्नदेवतात्वाच्च न विरोधः। तत्रैकस्यां प्रधानाहुतौ त्रिंशदाहुतयो हूयन्त इति, त्रिंशत्सख्यासम्पत्तिराहवनीयाहुतीनां नावकल्पते। तस्मात्कर्मनामधेयमिति सिद्धम् ॥ १६ ॥

इति दशमं वैश्वदेवाधिकरणम् ॥

भा० वि०—तत्रैव हेत्वन्तरत्वे परार्थत्वादित्यादिसूत्रं व्याचष्टे—**परार्थश्चेति**। यदि वैश्वदेवशब्दो गुणविधिः स्यात्, तदा देवतैक्याद् गुणानां च हविषां प्रधानार्थत्वे तदावर्तकत्वाशक्तेः सह प्रदानप्रसङ्ग इत्यर्थः।

ननु गुणात्प्रधानावर्तकत्वाशक्तावपि प्रधानानां भेदात्स्वत एवानुष्ठानभेदो भविष्यतीत्यत आह—**तेनेति**। भिन्नानामपि कर्मणां प्रयोगवचनेन सहानुष्ठानं विवक्षितम् (विहितम्) अशक्त्या त्यज्यते। सत्यां तु शक्तौ सहानुष्ठानमेव श्रेय इत्यर्थः। कथं तच्छक्तिरित्याशङ्‌क्याह—**सम्प्रतिपन्नेति**। साधारणदेवतात्वात्सर्वेषां हविषां सकृदेव तामुद्दिश्य सह प्रदानमविरुद्धमित्यर्थः। अस्तु सह प्रदानं को दोषोऽत आह—**तत्रैकस्यामिति**। एकस्यामेव प्रधानाहुतौ सत्यां त्रिंशदाहुतयो हूयन्त इति विहिता त्रिंशत्संपत्तिराहवनीयाहुतीनां न स्यादित्यर्थः। त्रिंशत्पूरणं च नवप्रयाजाः नवानूयाजाः द्वावाज्यभागौ अष्टौ प्रधानाहुतयः स्विष्टकृद्वाजिनेज्या चेति द्रष्टव्यम्। तस्मान्न वैश्वदेवशब्दो गुणविधिः, किन्तु कर्मनामधेयमित्युपसंहरति—**तस्मादिति** ॥ १६ ॥

इति वैश्वदेवाधिकरणम्।

त० वा०—पूर्वेणैकसूत्रमपि सम्भवति। मिथः सह प्रदाने क्रियमाणे त्रिंशत्सम्पत्त्यभावादनर्थसम्बन्धः स्यात्। कुतः।

हविषो गुणभूतत्वान्न कर्मावृत्तिहेतुता।
देवतैक्यात्सह त्यागो लाघवाद्धि प्रसज्यते ॥

तेन सकृत्त्यागः कर्तव्य इति[1], सत्यां सहप्रदानशक्तौ नाऽऽवृत्तिर्युक्ता। सम्प्रतिपन्नदेवतात्वाच्च सहप्रदानमविरुद्धं शक्यं कर्तुम्। ततश्च त्रिंशत्त्वविरोधः। त्रिंशत्पूरणं च केषांचिदेवम्,—नव प्रयाजाः, नवानुयाजाः, द्वावाघारौ, द्वावाज्यभागौ, अष्टौ प्रधानाहुतय इति। अपरेषां तु स्विष्टकृद्वाजिनेज्याग्रहणादाघारौ न गणितौ। सर्वथा तु प्रधानाहुतिभेददर्शनसिद्धिः ॥ १६ ॥

(इति एकादशं वैश्वदेवाधिकरणम् ॥ ११ ॥)

न्या० सु०—भाष्यकृता गुणानां हविषां प्रधानार्थत्वेन तदावर्त्तकत्वाशक्तेः सहप्रदानप्रसङ्गात् त्रिंशत्सम्पत्तिवचनं न युज्येतेत्यध्याहारेणैतत्सूत्रं व्याख्यातम्। तत्र बहुपदाध्याहारदोषेणापरितोषात् पूर्वेण सहैकसूत्रतया व्याचष्टे—**पूर्वेणेति**। 'त्रिंशदाहुतयो हूयन्त' इति वाक्यार्थसम्बन्धो न स्यादित्यर्थः। गुणविधावपि हविर्भेदेन प्राधानावृत्तेः, कथं सहप्रदानापत्तिरित्याशङ्कानिरासार्थत्वेन परार्थत्वादित्यत्र गुणशब्दं हविःपरमङ्गीकृत्य योजयति—**कुत इति**।

ननु स्वत एव कर्मणां भेदात् नाऽश्रुतावृत्त्यापत्तिरित्याशङ्‌क्याह—**देवतैक्यादिति**। भिन्नानामपि कर्म्मणां प्रयोगवचनेन सहानुष्ठानं विहितमशक्त्या त्यज्यते, एकां तु देवतां

---

१. क. (टिप्पण्यां) तेन शक्यः सहत्यागः कर्तुमिति पा० पुस्तके।

सकृदुद्दिश्यानेकद्रव्यत्यागशक्तेः साहित्यत्यागो न युक्त इत्यर्थः। ननु गुणानां प्रधानावर्त्तनाशक्तावपि प्रधानानां भेदात् स्वत एवाऽनुष्ठानभेदो भविष्यतीत्याशङ्कानिरासार्थं 'तत' इति भाष्यं व्याचष्टे—**तेनेति**। कथं भिन्नानां सहानुष्ठानं शक्यमित्याशङ्कानिरासार्थम्। सम्प्रतिपन्नेति भाष्यं व्याचष्टे—**सम्प्रतिपन्नेति**। सकृदनुष्ठानापादनस्य प्रकृतोपयोगाभिधानार्थं तत्रेतिभाष्यं व्याचष्टे—**तत्रश्चेति**। ननु प्रधानानुष्ठानभेदेऽप्यष्टसंख्यासम्पत्तेस्त्रिंशत्सम्पत्तिवचनं न युज्येतैवेत्याशङ्क्याह—**त्रिंशत्पूरणं चेति**। अपरेषां तु स्विष्टकृद्यागवाजिनेज्याग्रहणादाधारौ न गणितौ इति लिङ्गदर्शनसूत्रमुपसंहरति—**सर्वथेति**॥ १६॥

इति दशमं वैश्वदेवाधिकरणम्।

भा० प्र०—'मिथश्चानर्थसम्बन्धः' इस पूर्व सूत्र में कहा गया है कि 'वैश्वदेव' शब्द से लक्षणा के सामर्थ्य से आग्नेय आदि यागों का प्रतिपादन एवं विश्वेदेव नामक देवता का विधान मानने पर वाक्यभेद दोष की आपत्ति होगी, क्योंकि 'वैश्वदेवेन' इत्यादि वाक्य को दो में परिणत किये विना प्रदर्शित दो अर्थों की प्रतीति नहीं हो सकती है, यदि वाक्यभेद स्वीकार कर पूर्वपक्षी के मन का समर्थन किया जाय तो इस प्रसङ्ग में यह वक्तव्य है कि इस स्थल में वाक्यभेद की आवृत्ति करना भी सङ्गत नहीं है, क्योंकि, 'परार्थत्वात् गुणानाम्' प्रधान = याग के भेद के अनुसार ही गुण का भेद होता है, क्योंकि, प्रधान के प्रयोजन के निर्वाह के लिए गुणों की चरितार्थता है। किन्तु, गुणों के अनुरोध से प्रधान की आवृत्ति अर्थात् भेद नहीं हो सकता है, क्योंकि, गुण स्वतः निष्फल होने पर उसके लिए प्रधान अर्थात् याग की आवृत्ति करना भी निरर्थक है। इस स्थल में विश्वेदेव नामक देवता याग का गुण स्वरूप है उसके अनुरोध से विधायक वाक्य की आवृत्ति करना सङ्गत नहीं है। इसलिए वाक्यभेद का स्वीकार करना भी सङ्गत नहीं है। अतः, 'वैश्वदेवेन यजेत' इस वाक्य में 'तत्प्रख्यन्याये' (मी०द० १।४।४) आग्नेयादिवाक्य से विहित आठ यागों का अनुवाद कर उनके उद्देश्य से 'वैश्वदेव' इस संज्ञा की अर्थात् नामधेय का विधान किया गया है, अर्थात् जिससे विश्वदेवगण पूजित होते हैं अथवा 'विश्वदेवगण याग करते हैं' इस प्रकार निर्वचन के अनुसार 'वैश्वदेव' कहने से आग्नेयादि वाक्य से विहित आठ यागों की समष्टि स्वरूप की अवगति होगी, विश्वेदेवगण ने जिस याग को किया था, यह 'विश्वे देवाः समयजन्त तद् वैश्वदेवस्य वैश्वदेवत्वम्' इस ब्राह्मण वाक्य से अवगत होता है। इसका यह प्रयोजन है कि 'वसन्ते वैश्वदेवेन यजन्ते' 'प्राचीन प्रवणे वैश्वदेवेन यजेत' इत्यादि स्थलों में 'वैश्वदेव' शब्द में आग्नेयादि वाक्य से विहित आठ यागों की समष्टि ही कही जाती है।

कुमारिलभट्ट ने पूर्व एवं इस सूत्र की एकवाक्यता कर अर्थ किया है कि हवि रूप गुणों की परार्थ याग के लिए होने से, एक साथ आहुतियों के देने पर तीस संख्या की प्राप्तिरूप अनर्थ सम्बन्ध होगा।

इस प्रसङ्ग में श्रीयुधिष्ठिर मीमांसक ने विश्लेषण करते हुए कहा है–'न गुणानुरोधेन' इसका भाव यह है कि 'विश्वेदेव' देवतारूप गुण का विधान मानने पर वैश्वदेव पर्व में पठित अष्टाकपाल आदि आठ हवियों के अनुरोध से आठ याग नहीं हो सकते अर्थात् आठ बार आहुति नहीं दे सकते क्योंकि जहाँ एक ही देवता के लिए दो या अधिक हविद्रव्यों का विधान होता है वहाँ दोनों हवि द्रव्य या सवहति द्रव्य एक साथ ही उस देवता के लिए दिये जाते हैं। यथा पौर्णमास में आग्नेयपुरोडाश, उपांशुयाग और अग्नीषोमीय पुरोडाश का विधान होने से प्रधानयाग की तीन आहुतियाँ होती हैं। दर्श में ऐन्द्र, दधि, ऐन्द्रपयः और उपांशुयाग रूप में तीन का विधान होने पर भी दधि और पयः हवि द्रव्यों का एक इन्द्र देवता होने से दोनों द्रव्यों की एक साथ आहुतियाँ देने पर प्रधान याग की दो आहुतियाँ होती हैं। इनके साथ ही ५ प्रयाज, ३ अनुयाज, २ आज्यभाग, १ स्विष्टकृत (= ११ आहुतियों) की गणना करने पर पौर्णमास में (प्रयाजादि की ११ + प्रधानयाग की ३ मिलकर) १४ आहुतियाँ होती हैं। दर्श में ऐन्द्र दधि और ऐन्द्र पयः की इकट्ठी आहुति देने पर (प्रायाजादि की ११ + प्रधान याग की २ मिलकर) १३ आहुतियाँ होती हैं। इस विषय में मीमांसा अ० १४ पा० २ सूत्र ३० (=संकर्षकाण्ड २।२।३०) में तथा शाबरभाष्य २।२।८ मे 'चतुर्दशं पौर्णमास्या-माहुतयो हूयन्ते तत्रोदशामावास्यायाम् वचन उद्धृत किया है।

त्रिंशदाहुतयो हूयन्ते—इन तीस आहुतियों की गणना तै० ब्रा० १।६।३ में इस प्रकार की है—नवप्रयाजा इज्यन्ते, नवानुयाज अष्टौ हविंषि, द्वावाधारौ द्वावाज्यभागौ, त्रिंशत्सम्पद्यन्ते (= ९ प्रयाज की, ९ अनुयाज की, ८ मुख्य याग की, २ आधार, २ आज्य भाग की = ३० आहुतियाँ होती हैं)। मैत्रायणी संहिता १।१०।८ में २ आधाराहुतियों के स्थान में १ अग्नि की ओर १ वाजिन की आहुतियों का निर्देश करके ३० की संख्या कही है। ३० संख्या की गणना प्रकार में भेद होते हुए भी प्रधानाहुतियाँ सर्वत्र समान हैं। यदि अष्टाकपाल आदि आठ हवियों के अग्नि आदि आठ देवों के स्थान में गुणविध वक्ष में विश्वेदेव देवता का विधान माना जाय तो आठो हवियों का एक देवता होने से आठो द्रव्यों की एक ही आहुति होगी (जैसे दर्श में ऐन्द्र दधि और ऐन्द्र पयः की) उस अवस्था में आहुतियों की संख्या ३० न होकर २३ रह जायेगी। इस प्रकार गुणविधि मानने में दोष दिखाकर विश्वेदेव की कर्मनामता सिद्ध की है।

'परार्थत्वात्' = परार्थता होने से पर = प्रधान (याग) जो है उसके लिए होने से वह परार्थ अर्थात् यागार्थ है, उसका भाव परार्थत्व है इस कारण से 'गुणानाम्' = गुण=अङ्गों का। गुणों की परार्थता अर्थात् प्रधान के प्रयोजन के निर्वाह करना ही प्रयोजनीयता होने से गुण के अनुरोध से प्रधान की आवृत्ति नहीं हो सकती है॥ १६॥

[११] पूर्ववन्तोऽविधानार्थास्तत्सामर्थ्यं समाम्नाये ॥१७॥ पू०

शा० भा०—वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जात तै० सं० २-२-५ इति श्रूयते। तत्र 'यदष्टाकपालो भवति गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाती'त्येवमादयः कपालविकल्पाः श्रूयन्ते। तेषु सन्देहः किमष्टत्वादयोः, गुणविधयःउतार्थवादा इति। तत्र गुणविधय इत्येव[1] ब्रूमः। कथम् ? ये हि पूर्ववन्तो विदित[2]पूर्वमर्थमभिवदन्ति, तेऽविधानार्थाः। तदेतदस्य वाक्यस्य समाम्नाये सामर्थ्यं यदविहितपूर्वकाभिधानम्। किं तत्, विधानसामर्थ्यम् ? एवमविहितमर्थं विधास्यति। इतरथाऽर्थवादाः सन्तोऽनर्थकाः स्युः। न च द्वादशकपालस्य शेषभावमुपगन्तुमर्हति। प्रत्यक्षा ह्यष्टानां कपालानां स्तुतिः, परोक्षा द्वादशानाम्। प्रत्यक्षाभावे च परोक्षा स्यात्। तस्माद् गुणविधयः॥ १७॥ पूर्व० ॥

भा० वि०—एवं गुणविध्यसम्भवेन नामधेयत्वे प्रतिपादिते, प्रसङ्गाद् गुणविधिनिरासेनार्थवादत्वमिह व्युत्पाद्यत इति सङ्गतिः। विषयं सोपक्रमं दर्शयति—**वैश्वानरमित्यादिना**। यन्नवकपालः। त्रिवृत्तैवास्मिंस्तेजो दधाति, यद्दशकपालः, विराजैवास्मिन्नन्नाद्यं दधाति इत्यादिरादिशब्दार्थः। अष्टत्वादीनामुत्पत्त्युत्पन्नशिष्टत्वानवधारणात्संशयमाह—**तेष्विति**। द्वादशकपालं निर्वपेदित्यनेनैव पुरोडाशप्राप्तेः सङ्ख्यामात्रपरत्वमष्टाकपालादिशब्दानां सूचयितुमष्टत्वादय इत्युक्तम्, प्रयोजनं तु द्वादशत्वस्याष्टत्वादिभिः विकल्पः पूर्वपक्षे। सिद्धान्ते तु नित्यं द्वादशकपालस्यानुष्ठानमिति मन्तव्यम्। अत्र पूर्वपक्षो द्विविधः, वैश्वानरयागे गुणविधिः, फले गुणविधिरिति च, तत्राद्यमुत्थापयति—**गुणविधय इति**।

ननु द्वादशकपालवाक्येनैवाष्टत्वादीनामपि विहितत्वात् कथं विधानमिति पृच्छति—**कथमिति**। अत्राकारप्रश्लेषेण सूत्रं व्याकुर्वन्नुत्तरमाह—**ये हीति**। पूर्ववन्त इत्यस्य व्याख्यानं—**विहितमित्यादि**। यदि विहितमर्थमभिवदेयुः तदा भवन्त्वविधानार्थाः इत्यर्थः। अष्टाकपालादिवाक्यं तु न विहितमर्थमभिवदिष्यति। किन्तु स्वयं विधत्त इति। तस्मात्सामर्थ्यादित्यादिसूत्रभागं व्याकुर्वन्नाह—**तदेतदिति**। सूत्रे तच्छब्देन वैश्वदेवे विकल्प्य इति फलवचनेन विकल्पशब्देन यद्विधानमर्थात्प्रतिज्ञातं तत्परामृश्यते, ततश्च तत्र विधाने सामर्थ्यं समाम्नाये अष्टाकपालादिवाक्य इत्यर्थः।

ननु कोऽस्य वाक्यस्य विशेष इति पृच्छति—**किं तदिति**। उत्तरम्—**एवमिति**। विधानसामर्थ्ये सतीत्यर्थः। ननु माभूवन्विधायकाः, स्तावकास्तु

---

१. इति ब्रूमः। २. ब. विहित।

भविष्यन्तीत्यत आह—**इतरथेति**। अष्टत्वादीनामविधेयत्वेन स्तुत्यनर्हत्वादर्थवादा अनर्थका एव स्युरित्यर्थः।

नन्वष्टत्वादीनां स्वतः स्तुत्यनर्हत्वेऽपि द्वादशत्वस्तुत्यर्था तत्स्तुतिर्भविष्यतीत्याशङ्क्याह—**न चेति**। द्वादशकपालाष्टाकपालशब्दयोः पुरोडाशवाचित्वात् तत्स्तुतिरिह प्रतीयते। न च गायत्र्याद्यक्षरसाम्येनाष्टत्वादिविशेषणस्तुत्या द्वादशत्वे स्तुतेऽपि कपालाधारसंस्कारविशेष्यः पुरोडाशः स्तुतो भवतीत्यर्थः। इतश्च नाष्टाकपालस्तुत्या द्वादशकपालस्तुतिरित्याह—**प्रत्यक्षा हीति**। हिश्चार्थः, अन्यविषयत्वेन प्रत्यक्षाया अन्यविषयत्वकल्पनमयुक्तमित्याशयः, अपि चास्त्येव द्वादशत्वस्यात्मीया स्तुतिर्ज त्यैवास्मिन्निति। अतोऽपि न परोक्षकल्पना युक्तेत्याह—**प्रत्यक्षाभावे चेति**। तस्माद्द्वादशत्वेन सह विकल्पमाना गुणविधय एवैत इत्युपसंहरति—**तस्मादिति**॥ १७॥

अथैकादशं वैश्वानराधिकरणम्

त० वा०—गुणविधिनामधेयविचारे पर्यवसिते, अधुना केवलगुणविधित्वमेवास्ति, न वेति विचार्यते। अथ वाऽष्टाकपालत्वस्य वैश्वानरसामाधिकरण्याद् द्वादशत्वान्तर्गतस्तत्प्रख्यत्वेन नामधेयत्वमाशङ्क्य, गुणविधिः प्रसिद्ध्यादिभिः प्रकृतयजिबुद्धेस्तत्प्रख्यत्वाभावाच्च समर्थनीयः। तमपि निराकृत्य, अर्थवादता पूर्वसिद्धैवोपसंहरिष्यते।

केषाञ्चिन्मतस्य उपन्यासनिरासौ

तत्र पूर्ववतां[1] विधानेनाऽर्थवत्त्वम्, अपूर्वाणां नामधेयत्वावधारणात् 'यदुत्पत्तावपूर्वम्१-४२ इति तस्माद् गुणविधयोऽष्टत्वादय इति केचित्। तदयुक्तम्। न ह्यपूर्वत्वान्नामधेयत्वं सिद्धम्। अपूर्वत्वाद्धि यथैव लौकिकार्थापरिज्ञानान्न गुणविधित्वम्, एवं वैदिककर्माभिधायित्वं सुतरामप्रसिद्धमिति नामधेयत्वमपि न स्यात्। सत्येव च सर्वत्र लौकिकेऽर्थे समभिव्याहारादिभिर्नामधेयतोक्ता। तस्माद्यथाभाष्यमेव सूत्रार्थः।

पूर्वज्ञातार्थवाचित्वे नामधेयार्थवादने।
अप्राप्तत्वादिहैते स्युर्वैश्वदेवविकल्पवत्॥

यदि हि वैश्वानरयागेऽष्टत्वादयः कुतश्चित्प्राप्ता भवेयुः। ततः संवादद्वारेण नामधेयत्वम्, अर्थवादता वा स्यात्। न तु प्राप्तिरस्ति, केवलद्वादशत्वविधानात्।

तथा हि—

यद्यप्यर्थात्मनाऽस्त्येव महासंख्यास्ववान्तरा।
अपरिच्छेदकत्वात्तु नासौ कर्मविशेषणम्॥

---

१ .क. पूर्ववतां।

न हि सत्तामात्रेण संख्या व्याप्रियते, किं तर्हि संख्येयपरिच्छेदेन। द्वादशत्वेन च कपालेषु परिच्छिद्यमानेषु नाष्टत्वादीनां परिच्छेदकत्वमित्यविद्यमानता। यद्यपि च यथाकथंचिदस्तित्वमाश्रीयेत, तथाऽप्येतावन्मात्रं भवेदष्टौ भवन्तीति, न तु यदष्टाकपाल इति। संस्कृततद्धितो ह्येषः, तद्धितार्थनिमित्तश्च समासः। तौ च सति सामर्थ्ये भवतः। सामर्थ्यं चान्यनिरपेक्षत्वे भवति। सापेक्षाश्च द्वादशत्वेनाष्टत्वादय इति, न द्वादशकपालोऽष्टाकपालादिशब्दाभिधानार्थकं लभते। तेन स्वरूपसंकीर्तनस्यासत्त्वात्प्ररोचनमसम्बद्धतरमापद्येत। न च द्वादशत्वविलक्षणोऽष्टत्वादेः कर्मोपयोगः सम्भवति, संख्यात्वात्। यद्यपि चाष्टत्वस्तुत्या द्वादशत्वं स्तूयते, न त्वष्टाकपालस्तुत्या द्वादशकपालस्य स्तुतिः, विशेषणविशेष्ययोरत्यन्तभेदात्।

अपि चास्त्येव द्वादशत्वस्याऽऽत्मीया स्तुतिः 'जगत्यैवास्मिन्' इति। तस्माद् द्वादशत्वेन सह विकल्पमाना गुणविधय एवैतेऽपि। सर्वं चेदं वैकल्पिकानेकसंख्याविशिष्टवैश्वानरविधानादेकमेवोत्पत्तिवाक्यमिति, न बलाबले विशेषः। तस्मात्सामर्थ्यमिति च पूर्वप्रकृतयोग्यापेक्षत्वाद्वैश्वदेवपूर्वपक्षातिदेशः। तदीयं हि सामर्थ्यमस्मिन्समाम्नायेऽस्ति, न च तदुक्तः परिहारः। तस्माद्विधानार्था इति ॥ १७ ॥

॥ अथैकादशं वैश्वानरेष्ट्यधिकरम् ॥

न्या० सु०—ननु नामधेयाधिकरणे नामधेयानां त्र्यंशवेदबाह्यत्वाद्धर्मप्रमोपयोगाभावेनाऽनर्थक्यमाशङ्क्य गुणफलोपबन्धाद्युपयोगित्वेन विध्युद्देशान्तर्गतया धर्मप्रमोपयोगं प्रसाध्य, क्वास्ति नामधेयत्वम्, क्व वा नेति कोष्ठशोधनमुदाद्यधिकरणैः कर्त्तुमारब्धम्। तस्य चात्राविचारेण पर्यवसानात्कोष्ठशोधनेन नामधेयप्रामाण्यविचारशेषत्वानुपपत्तेः, अर्थवादकोष्ठशोधनार्थत्वे वा द्वितीयपाद एवार्थवादप्रकरणे कर्त्तव्यत्वापत्तेः स्वातन्त्र्येण तु गुणविध्यर्थवादविचारे वाक्यार्थव्याख्यानापत्तेः प्रमाणलक्षणसङ्गत्यभावप्रसङ्गादनारभ्यमिदमधिकरणमित्याशङ्क्याह—**गुणविधीति**। सर्वत्र गुणविध्यसम्भवेनैव नामधेयत्वस्योक्तत्वात् तद्विचारे पर्यवसिते, प्रतियोगित्वेन बुद्धिस्थस्य गुणविधित्वस्य विचारः पूर्वाधिकरणव्युत्पादितस्योत्पत्तिशिष्टेनोत्पन्नशिष्टबाधस्याष्टाकपालादिर्विषयो भवति न वेत्येतन्निर्णयार्थत्वेन नामधेयत्वसिद्ध्यर्थोत्पत्तिशिष्टबलीयस्त्वविषयविवेकफलतया नामधेयविचारशेषत्वं प्रतिपद्यमानो नासङ्गत इत्याशयः।

यद्वा गुणविधि नामधेयं निर्णीतं सन्दिग्धानामर्थानां वाक्यशेषात्, अर्थाच्च अध्यवसानमुक्तमिति, द्वितीयाध्यायोपक्रमभाष्यपर्यालोचनयाऽऽक्ताधिकरणं यावन्नामधेयविचारप्रतीतेः साक्षान्नामधेयविचारसङ्गतिसिद्ध्यर्थम् अष्टाकपालादिशब्दानां नामधेयत्वेनापि पूर्वपक्षः कर्त्तुं शक्यत इत्याह - **अथ वेति**।

अष्टाकपालादिशब्दानां विशेष्यापेक्षायां द्वितीयान्तस्यापि वैश्वानरपदस्य प्रथमान्तत्वेन परिज्ञातस्याऽन्वयप्रतीतेः। तस्य च देवतान्वितद्रव्यवाचित्वेऽपि यागानुमानपर्य-

वसायित्वात् उत्पत्तिशिष्टद्वादशकपालावरुद्धे च यागेऽष्टाकपालादीनां निवेशायोगात् द्वादशत्वान्तर्गताष्टत्वादियोगस्य च प्रवृत्तिनिमित्तस्य सम्भवाद्वैश्वदेवशब्दवद्यागनामत्वमाशङ्क्य, द्वादशकपालस्याष्टाकपालादिव्यपदेश्यत्वलक्षणस्य तत्प्रख्यत्वस्याऽभावेन प्रवृत्तिनिमित्ताभावान्निराकृत्य, वैकल्पिकानेकसंख्याविशिष्टवैश्वानरयागाख्यैकार्थविधानेनानेकगुणविधावपि वाक्याभेदाप्रसक्तेः सर्वेषामुत्पत्तिशिष्टत्वाविशेषाद्वैश्वदेवन्यायवैषम्येण गुणविधिमुपपाद्य, सामानाधिकरण्यनिर्दिष्टद्वादशकपालान्वयेन निराकाङ्क्षस्य वैश्वानरस्य विपरिणामेऽष्टाकपालाद्यन्वयकल्पनानुपपत्तेर्गुणविधावेकवाक्यत्वायोगात् वैश्वदेवन्यायसाम्यापादनेन निराकृत्य, अर्थवादत्वं सिद्धान्त्यत इत्यर्थः।

नन्वौदुम्बराधिकरणे एव सर्वेषां विधिवन्निगदानां विधित्वाशङ्कानिरासेनाऽर्थवादाधिकरणव्युत्पादितस्यार्थवादत्वस्यापि स्थापितत्वादनर्थकमेतदधिकरणं स्यादित्याशङ्क्य— **पूर्वसिद्धैर्वेत्युक्तम्**[1]। भाष्यकारान्तरकृताऽकारप्रश्लेषरहितसूत्रव्याख्यानत्यागेनऽकारप्रश्लेषेण भाष्यकृतो व्याख्याने कारणम्, वक्तुमुपन्यासपूर्वकं तद् दूषयति—**तत्रेति**। यस्माद्यदुत्पत्तावपूर्वमित्यनेनाप्रसिद्धानामुद्भिदादिशब्दानां नामधेयत्वावधारणात् लोकप्रसिद्धानां गुणविधानेनार्थवत्त्वमर्थादुक्तं भवति। तस्मादेतेऽष्टाकपालादयः शब्दा लोकप्रसिद्धार्थत्वाद् गुणविधय इत्यर्थः। द्वादशकपालं निर्वपेदित्यनेनैव पुरोडाशप्राप्तेः, संख्यामात्रपरत्वमष्टाकपालादिशब्दानां सूचयितुमष्टत्वादय इत्युक्तम्। उद्भेदनादेरवयवार्थस्य लोकप्रसिद्धस्यैव नामधेयप्रवृत्तिनिमित्तत्वाल्लोकप्रसिद्धार्थस्यापि चित्रादिशब्दस्य नामधेयत्वप्रसिद्धेर्न लोकप्रसिद्धार्थत्वमात्रेण गुणविधित्वासिद्धिरिति दूषणाशयः।

किमर्थं तर्हि 'यदुत्पत्तावपूर्वमित्युक्त' मित्याशङ्क्याह—**सतीति**। नालौकिकार्थत्वमपूर्वशब्देनोक्तम्, किन्त्वनिरूढार्थत्वमिति सूचयितुम्—**सर्वत्रेत्युक्तम्**। तदपि नामधेयत्वावधारणे सामानाधिकरण्यसहकारिकारणम्, न साक्षादिति समभिव्याहारादिभिरित्यनेनोक्तम्। पूर्ववच्छब्दं प्राप्तार्थाभिप्रायमङ्गीकृत्य, अकारप्रश्लेषेण भाष्यकारीयव्याख्यानमनुसन्धत्ते— **तस्मादिति**। पूर्ववन्तो विधानार्था' इति सूत्रावयवो ये हीति भाष्यानुसारात् पूर्वार्द्धेन व्याख्यातः। तदेतदिति भाष्यानुसारादुत्तरार्द्धेनोत्तरः पूर्वार्द्धं व्याचष्टे—**यदि हीति**। उत्तरार्द्धं व्याचष्टे – **न त्विति**। ननु द्वादशत्वेऽष्टत्वादीनामन्तर्गतेः प्राप्तिर्भविष्यतीत्याशङ्क्याह—**तथा हीति**। देवदत्त गामानयेति त्रिपदे वाक्ये गामानयेति पदद्वयसमुदायोऽन्यत्र वाक्यार्थाभिधानलक्षणैकार्थक्रियाकारित्वधर्मयोगाल्लब्धात्मकोऽत्र प्रत्यभिज्ञायमानोऽपि विवक्षितवाक्यार्थाभिधाने व्यापाराभावान्न समुदायत्वेन व्यपदिश्यते, तथा संख्येयपरिच्छेदकत्वेनान्यत्र लब्धात्मिकाप्यष्टत्वादिसंख्या द्वादशसंख्यापरिच्छेद्यानां कपालानामपरिच्छेदकत्वात्, परिच्छेदकत्वं च विना निरूपयितुमशक्यत्वात् न संख्यात्वेन व्यपदिश्यत इत्युक्तम्।

---

१. अत्र भाष्याकारान्तरशब्देन के विवक्षिता इति विचार्यमेतत्।

ननु महासंख्यायामवान्तरसंख्याव्यपदेशाभावे सहस्रदर्शनेन शतानुमानं 'शतं ब्राह्मणा सोमं भक्षयन्तीति' चोक्ते द्वादशैकैकमिति विभागकथनम्, सप्तमान्त्ये च चोदकनामधेययोर्विरोधे नामधेयबलीयस्त्वे सिद्धान्तिते गवामयने तर्हि 'वैश्वानरो ज्योतिष्टोमं प्रायणीयमहर्भवति' इति प्रथमस्याह्नो नामधेयबलीयस्त्वात् ज्योतिष्टोमविकारत्वेन त्र्युपसत्त्वे प्राप्ते, तस्य च मुख्यत्वात् तदनुरोधेनान्येषामपि त्र्युपसत्त्वापत्तेर्द्वादशोपसत्त्वदर्शनं न युक्तमित्याशङ्क्य द्वादशसु तिसृणां भावात् सर्वेषामनुग्रहार्थं द्वादशोपसत्त्वस्य तन्न्याय्यत्वात् युक्तं तद्दर्शनमित्यभिधानं न युज्येतेत्याशङ्क्य—**अर्थात्मनेत्युक्तम्।** वस्तुवचनोऽर्थशब्दः महासंख्यापरिच्छेद्येभ्यः संख्येयेभ्यः कतिषुचिन्निष्कृष्यमाणेष्ववान्तरसंख्या वस्तुरूपेणाऽस्त्येवेत्यर्थः।

एवं तर्हि प्राप्तत्वान्नाष्टत्वादीनां विधेयत्वं सिध्येदित्याशङ्क्य—**नासावित्युक्तम्।** अष्टसु कपालेषु संस्कृतमिति विग्रहवाक्यगतया सप्तम्याष्टत्वस्य संस्काराख्यक्रियाङ्गत्वप्रतीतेः, तस्य च संस्कारसाधनीभूतकपालपरिच्छेदद्वारत्वात्, तेषां च द्वादशत्वपरिच्छिन्नानामष्टत्वेन परिच्छेत्तुमशक्यत्वात् निर्द्धारणस्य गुणस्य क्रियासाधनत्वायोगात् नाष्टत्वादेर्द्वादशकपालपुरोडाशसंस्काराङ्गत्वेन प्राप्तिरस्तीत्याशयः। यथा कथं चित्प्राप्तिमभ्युपेत्यापि तद्धित-समासयोः सामर्थ्यापेक्षत्वात् विशेषणत्वं च विना सामर्थ्यायोगात् द्वादशान्तर्गतस्य चाष्टत्वादेः संख्यान्तराव्यावर्त्तकत्वाद्विशेषणत्वाऽसम्भवेनाष्टाकपालादिशब्दानुपपत्तिसूचनायाऽङ्गमिति वक्तव्ये—**विशेषणमित्युक्तम्।**

श्लोकं व्याचष्टे—**न हीति।** निष्क्रियत्वेन संख्यायाः संस्कारसाधनीभूतकपालपरिच्छेदनिरपेक्षायाः संस्कारे व्यापाराभावान्नाङ्गत्वेन प्राप्तिरस्तीत्यर्थः। अप्राप्त्यर्थमेव संख्यापरिच्छेदकत्वं विना संख्यानिरूपणाशक्तेरसत्तुल्यत्वमविद्यमानताशब्देनोक्तम्। कतिचिन्निष्कृष्याऽष्टावेतानीति परिच्छेदकत्वात् प्राप्तिसम्भवेऽपि संस्कारसाधनीभूतद्वादशसंख्याकपालपरिच्छेदकत्वाभावान्नाष्टाकपालादिव्यपदेशोपपत्तिरिति—**यद्यपि चेत्यनेनोक्तम्।**

ननु द्वादशकपालेऽप्यष्टौ कपालानि सन्ति अस्मिन्निति अष्टाकपालशब्दो न शक्यो वक्तुमित्याशंक्य—**संस्कृतेत्युक्तम्।** तत्रेत्यनुवर्त्तमाने 'संस्कृतं भक्षा' इत्यनेनाष्टसु कपालेषु संस्कृतमित्यस्मिन्नर्थे संख्यापूर्वसमासत्वेन द्विगुसञ्ज्ञा दृष्टा। कपालप्रातिपदिकाद्विहितस्याण्प्रत्ययस्य 'द्विगोर्लुगनपत्य' इति द्विगुपरतद्धितलुक्स्मरणेन लोपादष्टाकपालशब्दसिद्धिरित्याशयः। नन्वेवमपि समासवेलायां संस्कारकत्वस्योपाधेरभावात् संस्कारकाणामष्टत्वेनापरिच्छेद्यत्वेऽपि केषांचिन्निष्कृष्टानां तत्परिच्छेद्यत्वेन समासोपपत्तिः, अधिकानामपि च[1] संस्कारकत्वानपायात्तद्धितोपपत्तेरष्टाकपालशब्दो न विरुध्यत इत्याशङ्क्य—**तद्धितार्थेत्युक्तम्।** 'तद्धितार्थोत्तरपदसमाहारे चेति' तद्धितार्थे विषयभूते दिवसंख्ययोः सामानाधिकरण्यसमासस्मृतेः संस्कारकत्वस्योपाधित्वावसायात् द्वादशत्वपरिच्छिन्नां च संस्कारकाणामष्टत्वेन परिच्छेत्तुमशक्यत्वात् अष्टाकपालशब्दानुपपत्तिरित्याशयः।

---

१. संस्कारकत्वे तावतामित्यधिकम् २ पु० पा०।

ननु द्वादशत्वपरिच्छेद्यसमुदायैकदेशभूतानि तानि कपालानि निष्कृष्याऽष्टत्वादिना-परिच्छेत्तुं शक्यत एवेत्याशङ्क्याह-**तौ चेति**। एकदेशभूतानामेकदेशान्तरसापेक्षत्वात्तद्धित-समासयोर्द्वयोरप्यनुपपत्तिः स्यादित्याशयः। द्वादशकपालेऽष्टत्वाद्यभावाभिधानस्य प्रकृतोप-योगमाह—**तेनेति**। अष्टाकपालादिशब्देन द्वादशकपालसङ्कीर्त्तनस्यासत्त्वादित्यर्थः। नामधेयत्वपूर्वपक्षस्यानभिमतत्वद्योतनार्थं तदुपेक्षा। अनेन 'चेतरथे'ति भाष्यमपि व्याख्यातं भवति। नन्वष्टाकपालादिशब्दैर्द्वादशकपालाऽनभिधानात्तत्प्ररोचनाऽसम्भवेऽप्यष्टत्वादीनां द्वादशत्वान्तर्गतानां प्ररोचनार्था स्तुतिर्भविष्यतीत्याशङ्क्याह—**न चेति**। द्वादशकपालसाध्ये कर्मण्यष्टत्वादेर्द्वादशत्ववत् कपालपरिच्छेदकत्वाभावात्, तद्वैलक्षण्येन च प्रकारान्तरेण संख्यायाः कर्मोपयोगासम्भवात् अनुपयोगिनः स्तुतिर्व्यर्था स्यादित्याशयः। अविभागादिति सूत्रे यदा त्वष्टत्वादिप्ररोचनार्था अनर्थका इत्यवगतमित्यनुभाषणार्थ-कथनपरभाष्यदर्शनादितरथेति भाष्यस्याप्ययमेवाशयो गम्यते। एतच्च 'तत्सामर्थ्यमि'ति सूत्रावयवेन विधान एव सामर्थ्यमित्यवधारणादर्थवादत्वे सत्यसामर्थ्यमित्यर्थादुक्तं भाष्यकृता व्याख्यातम्।

नन्वष्टत्वादेः कर्मानुपयोगित्वात्स्वतः स्तुत्यनर्हत्वे द्वादशत्वस्तुत्यर्थे वेतसावकस्तुत्यर्थे-वेयं स्तुतिर्भविष्यतीत्याशङ्कानिरासार्थं 'न चेति' भाष्यं व्याचष्टे—**यद्यपि चेति**। द्वादश-कपालाष्टाकपालशब्दयोः पुरोडाशवाचित्वादष्टाकपालपुरोडाशस्तुत्या द्वादशकपालपुरो-डाशस्तुतिरिह प्रतीयते। न च गायत्र्याद्यक्षरसंख्यासामन्येनाऽष्टत्वादौ कपालविशेषणे स्तुते, तद्द्वारा द्वादशत्वे स्तुते कपालाधारसंस्कारविशेष्यः पुरोडाशः स्तुतो भवतीत्यर्थः। अनेन च 'प्रत्यक्षा ह्यष्टानां कपालानां स्तुतिः, परोक्षा द्वादशानाम्' पुरोडाशस्य तु न कथं चिदित्येवं भाष्यं व्याख्यातम्। ननु संख्यास्तुत्या पुरोडाशस्तुत्यसम्भवेऽपि, द्वादश-संख्यैवाष्टादिसंख्या स्तोष्यत इत्याशङ्कानिरासार्थत्वेन 'प्रत्यक्षाभावे चेति' भाष्यं द्वादशत्वस्याऽसाक्षात् सम्बन्धिस्तुत्यभावेऽष्टत्वादिद्वाराऽङ्गीकार्या स्यात् तत्सद्भावात्तु परोक्षाङ्गीकरणं न युक्तमित्येवं व्याचष्टे—**अपि चेति**। तस्मादित्युपसंहारभाष्यं व्याचष्टे—**तस्मादिति**।

ननूत्पत्त्युत्पन्नशिष्टयोर्विकल्पः पूर्वाधिकरण एव निरस्त इत्याशङ्क्याह—**सर्वं चेति**। 'वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते, यदष्टाकपालो भवति, गायत्र्यैवैनं ब्रह्म-वर्चसेन पुनाति, यन्नवकपालो भवति, त्रिवृतैवास्मिस्तेजो दधाति, यद्दशकपालो भवति, विराजैवास्मिन्नन्नाद्यं दधाति, यदेकादशकपालो भवति, त्रिष्टुभैवास्मिन्निन्द्रियं दधाति, यद्द्वादशकपालो भवति, जगत्यैवास्मिन् पशून्दधाति, यस्मिन् जाते एतामिष्टिं निर्वपति, पूत एव स तेजस्व्यन्नाद इन्द्रियावी पशुमान् भवतीत्युपक्रमोपसंहारयोरेकजातेष्टिविषयत्वे नैकवाक्यत्वान्नोत्पत्त्युत्पन्नशिष्टरूपो विशेषोऽत्रास्तीत्यर्थः। एकवाक्यविहितानामपि संख्यानां समुच्चयायोगात् विकल्पो न विरुद्ध इत्याशयः। अनेन चैकवाक्यत्वाभिधानार्थत्वेन सौत्रं समाम्नाय-पदं व्याख्यातं भवति। न त्वविधानार्था इत्यकारप्रश्लेषेण व्याख्याने

तत्सामर्थ्यमिति तच्छब्देनाविधानस्यैव परामर्शापत्तेर्विधानसामर्थ्यमिति भाष्यकारीयं व्याख्यानं पूर्वापरविरुद्धमित्याशङ्क्याह—**तत्सामर्थ्यमिति चेति**। तत्रत्यपूर्वपक्षे विकल्पेन फलेन गुणविधिप्रतिज्ञानात् व्यवहितस्यापि योग्यत्वात्तच्छब्देन परामर्शो भाष्यकृता विधानशब्देन दर्शितो। नैतत्सूत्रस्थस्येत्याशयः। योग्यत्वमेव विवृणोति—**तदीयं हीति**। प्रतिज्ञाध्याहारेण सूत्रं पूरयति—**तस्मादिति**।

ये वैश्वदेवादिशब्दाः पूर्ववन्तो वाक्यान्तरेण गुणविशिष्टे कर्मणि पूर्वमुत्पन्ने तद्विरुद्धगुणान्तराभिधायिनः, ते स्ववाक्यस्थेन गुणेन निराकाङ्क्षे कर्मणि तद्विरुद्धगुणान्तराभिधानाशक्तेरविधानार्थाः। अष्टाकपालादिशब्दानां तु सामाम्नायत्वात् सहोच्चारणत्वात् एकवाक्यगतत्वात् उत्पत्त्युत्पन्नशिष्टत्वविशेषानवगमाद्वैश्वदेवशब्दस्य पूर्वपक्षे सामर्थ्यम्, तदेषामस्ति यस्तूत्पत्तिशिष्टेनोत्पन्नशिष्टस्य बाधस्तत्रोक्तः सोऽत्र नास्तीति सूत्रार्थोऽनेनोक्तो भवति॥ १७॥

भा० प्र०—वैश्वाधिकरण प्रकरण में वैश्वदेव की नामधेयता का प्रतिपादन किया गया है। अब यह विचारणीय है कि इस वचन के सदृश अथवा अंशतः भिन्न श्रुतियाँ भी कर्म की नामधेयता का ही प्रतिपादन करती हैं, या उन वचनों का भिन्न रूप है—इस विचार के प्रसङ्ग में पूर्वपक्षियों का कहना है कि 'वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते। यदष्टाकपालो भवति गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाति। यन्नवकपालस्त्रिवृतैस्मिन्स्तेजो दधाति। यद्दशकपालो विराजैवास्मिन्नाद्यं दधाति। यदेकादशकपालस्त्रिष्टुभैस्मिन्निन्द्रियं दधाति। यद्द्वादशकपालो जगत्यैवास्मिन् पशून् दधाति। यस्मिन् जाते एतामिष्टिं निर्वपति पूत एव स तेजस्व्यन्नाद इन्द्रियावी पशुमान् भवति'। (तै० सं० २।२।५) पुत्र की उत्पत्ति होने पर वैश्वानर देवता के उद्देश्य से बारह कपाल में संस्कृत पुरोडाश आदि निर्वपन करे, जिन आठ कपालों का निर्वाप=ग्रहण किया जाय उसमें गायत्री छन्द से उत्पन्न बालक को ब्रह्मवर्चस् के द्वारा पवित्र करें। जिन नौ कपालों का निर्वपन=ग्रहण किया जाता है, उसमें त्रिवृत् नामक स्तोम से उनके मध्य में तेज का आधान करे, जिन बारह कपालों का निर्वपन किया जाता है, उनमें विराट् छन्द के द्वारा आधान से उसके खाद्य अनाद्य = शस्य आदि खाद्य द्रव्य का विधान किया जाता है। जिन ग्यारह कपालों का निर्वपन किया जाता है, उनमें त्रिष्टुप् छन्द के द्वारा उनके मध्य में इन्द्रिय धारण करे, (इन्द्रियों की पटुता का सम्पादन करे)। जिन बारह कपालों का निर्वपन किया जाता है उनमें जगती छन्द के द्वारा इसके लिए गौ आदि पशुओं का विधान किया गया है, जिस पुत्र के जन्म पर पिता इस यज्ञ का निर्वाप अर्थात् देवता के उद्देश्य में चरु आदि के लिए तण्डुल आदि का ग्रहण करते हैं, वे अवश्य ही पवित्र, तेजस्वी, अन्नवान् (अन्नाद) इन्द्रियावी (सहज इन्द्रियों से युक्त) एवं 'पशुमान् = गौ आदि पशुओं से युक्त होता है।'

इस स्थल में प्रथम द्वादश कपाल इष्टि का विषय कहकर अनन्तर जो आठ कपाल, नौ कपाल, दश कपाल, एकादश कपाल एवं बारह कपाल का विषय कहा है, वे सब भी पूर्व अधिकरण में प्रतिपादित 'वैश्वदेव' शब्द के समान कर्म के नामधेय हैं या ये सब अर्थवाद वाक्य है— यह संशय होता है। इस प्रसङ्ग में किसी का कहना है कि अष्टाकपाल आदि शब्द भी अग्निहोत्र, वैश्वदेव आदि शब्दों के समान नामधेय हैं, क्योंकि प्रथम जो द्वादशकपाल नामक यज्ञ की चर्चा है, उसी में अष्टत्व, नवत्व, दशत्व, एकादशत्व एवं द्वादशत्व संख्या अन्तर्भुक्त है, अतः, इनका पुनः विधान नहीं हो सकता है। इसलिए 'अष्टाकपाल' आदि के मध्य में वे संख्यायें हैं, अतः, तत्प्रख्यन्याय के अनुसार ये भी कर्म के नामधेय हैं। इस प्रसङ्ग में यदि कहा जाय कि इस स्थल में अष्टत्व आदि संख्या के वाचक नहीं हैं, अपितु पुरोडाश आदि द्रव्य के वाचक हैं। एक द्रव्य अन्य द्रव्य के अन्तर्भुक्त नहीं हो सकते हैं। अष्टत्व आदि बारह कपालों में अन्तर्भुक्त नहीं है—यह कहने पर कहा गया है 'पूर्ववन्तः अविधानार्थाः' इस स्थल में उत्पत्ति-वाक्य में देवता आदि गुणों का विधान होता है, जैसे 'वैश्वदेवेन यजेत' इत्यादि स्थलों में होता है। अन्य वचनों से गुण विधान का सामर्थ्य न रहने से 'तत्सामर्थ्यं समाम्नाये' अन्य स्थल में अर्थात् 'अष्टाकपालम्' इत्यादि वाक्यों में गुण विधान का सामर्थ्य रहेगा अर्थात् वह गुण विधि ही होगी। इस प्रकार अष्टाकपाल आदि वाक्य में पुरोडाश द्रव्य रूप गुण का ही विधान किया गया है। इस स्थल में ब्रह्मवर्चस् आदि स्वतन्त्र फल का उपदेश होने से अष्टाकपाल, नवकपाल आदि पुरोडाश रूप गुण ब्रह्मवर्चस् आदि फलों के लिए विहित है। इसीलिए 'यत् अष्टाकपालम्' इत्यादि वाक्य में 'फलाय गुण-विधि' = गुण फल विधि है, इसको अर्थवाद नहीं कहा जा सकता है, क्योंकि, इस स्थल में 'गायत्र्या एव एनम्' इत्यादि वाक्य में अष्टाकपाल आदि की ही प्रशंसा सुनी जा रही है। किन्तु प्रथम पठित द्वादशकपाल की प्रशंसा नहीं है। द्वादशकपाल ही यहाँ विधेय है और विधेय की स्तुति नहीं है। अतः, इसको अर्थवाद नहीं कहा जा सकता है। क्योंकि अन्य का विधान और अन्य की प्रशंसा -- इसमें सामञ्जस्य नहीं होता है, अतः, अष्टाकपाल इत्यादि वचन गुणविधि है।

'पूर्ववन्तः' = जो पूर्ववत् अर्थात् पूर्व में अन्य वचनों से विहित होते हैं अथवा उत्पत्ति शिष्ट होते हैं, उन देवतादि गुणों का 'अविधानार्थाः' = विधान के लिए अर्थात् विधानरूप प्रयोजनयुक्त नहीं होते हैं किन्तु 'समाम्नाये' = वेदवचन में अर्थात् अन्य स्थल में, जहाँ पूर्व प्राप्ति नहीं है वहाँ पर 'तत्सामर्थ्यम्' = गुण-विधान का सामर्थ्य रहता है, 'वैश्वदेव' आदि शब्द का विधान के लिए अभीष्ट विश्वदेवनामक देवतारूप गुणों का पूर्व में कथन है अर्थात् उससे अतिरिक्त अन्य विधायक हैं, अतः वैश्वदेव आदि शब्दों में गुण विधान का प्रयोजन नहीं है किन्तु जो वेदवचन पूर्ववत् नहीं है, उनके द्वारा गुण का विधान होना चाहिए ॥ १७ ॥ यह पूर्व पक्ष है।

गुणस्य तु विधानार्थे तद्गुणाः प्रयोगे स्युरनर्थका न हि तं प्रत्यर्थवत्ताऽस्ति ॥ १८ ॥ सि०

शा० भा०—नैतदस्ति गुणविधय इति । गुणस्य विधानार्था एते सन्तः पुरोडाशस्य कपालेषु संख्यां विदध्युः । न शक्नुवन्ति यागप्रयोगस्य विधातुम् । द्वादशकपालता हि यागस्य वाक्येन, अष्टकपालादयः प्रकरणेन । तेन ते यागे न भविष्यन्ति । अपि चाष्टत्वादयः पुरोडाशेनैकवाक्यभूताः प्रकरणं बाधित्वा, न यागस्य भविष्यन्ति । यागासम्बन्धे चानर्थकाः, पुरोडाशसम्बन्धे फलाभावात् अर्थवादत्वेन तु वैश्वानरयागस्य स्तुतिरुपपद्यते । तस्मादर्थवादा इति ॥ १८ ॥

भा० वि०—गुणस्य त्वित्यादिसिद्धान्तसूत्रगतं तुशब्दं व्याचष्टे—**नैतदिति** । कुत इत्याशङ्क्य गुणस्य विधानार्थेऽतद्गुणा इति भागं व्याचष्टे—**गुणस्येति** । अत्रातद्गुणा इति तच्छब्देन परार्थत्वाद् गुणानामिति पूर्वाधिकरणसूत्रगतपरशब्दोक्तयागपरामर्श इति यागस्येति वदता दर्शितम् । कस्मान्न शक्नुवन्तीत्याशङ्क्योत्पत्तिशिष्टद्वादशत्वावरुद्धे यागेऽष्टत्वादिविधानानुपपत्तेरित्याह—**द्वादशकपालता हीति** । एवं यागस्य द्वादशत्वावरुद्धत्वेनाष्टत्वाद्यनपेक्षामुक्तामभ्युपगम्याप्याकाङ्क्षां वाक्येन पुरोडाशाङ्गत्वावसायाच्च यागाङ्गतेत्याह—**अपि चाष्टत्वादय इति** । वैश्वानरयागप्रकरणं बाधित्वा पुरोडाशेनैकवाक्यभूता अष्टत्वादयो न तस्य यागस्याङ्गं भविष्यन्तीत्यर्थः । यागानङ्गत्वे को दोष इत्याशङ्क्य प्रयोगे स्युरनर्थका इति सूत्रावयवं व्याचष्टे—**यागेति** । प्रयोगाख्ययागसम्बन्ध एवार्थवन्तस्सन्तः पुरोडाशसम्बन्धेऽनर्थका **एव** स्युरित्यर्थः ।

ननु पुरोडाशद्वारा यागसम्बन्धादर्थवन्त इत्याशङ्क्य न हीति सूत्रावयवं व्याचष्टे—**पुरोडाशेति** । द्वादशत्वावरुद्धयागसम्बन्धासम्भवात् केवलपुरोडाशसम्बन्धे च फलाभावादित्यर्थः । यदि न गुणविधयः, का तर्हि गतिरर्थवादतैवेत्याह—**अर्थवादत्वे त्विति**[1] ॥ १८ ॥

सिद्धान्तः

त० वा०— प्रकृताप्रकृते यागे तथा द्रव्येऽपि वा गुणः ।
द्रव्यं गुणवदेवं च न कथञ्चिद्विधीयते ॥

प्रकृते तावद् द्वादशत्वावरोधान्नाष्टत्वादयो विधीयन्ते । न च दूरस्थे, तदुपादानशब्दाभावात् । न च कर्मान्तरं केवलाष्टत्वादिगुणकं सम्भवति । द्रव्यदेवता-

---

१. अर्थवादत्वे तु इति क्वचित् पाठः ।

संयोगप्रत्यक्षयागाश्रवणात् । एतेन पुरोडाशे संख्याविधिस्त्रेधाऽपि प्रयुक्तः[१] । तथाऽष्टाकपालादि पुरोडाशविधानम् । न हि द्वादशकपालपुरोडाशावरुद्धो यागः पुरोडाशान्तरं गृह्णाति । नाप्यननूदिते कर्मणि स्वशब्देनाप्रकृते पुरोडाशविधानं फलतत्साधनासम्बद्धं क्वचिदुपयुज्यते । नाप्यव्यापारात्मकत्वाद् द्रव्यं विधातुं शक्यते । अत एव विश्वजिदादिवदपि नाध्याहारेण फलं कल्प्यते ।

वैश्वानरपदं नापि यागायात्रानुषज्यते ।
विभक्त्यन्तरयोगित्वान्न चर्तेऽस्मादनर्थकम् ॥

शंका

स्यादेतत् । वैश्वानरपदानुषङ्गादष्टाकपालादिद्रव्यदेवतासम्बन्धविधेर्यागान्तरसिद्धिरिति । तन्नास्ति । प्रथमान्तेषु द्वितीयान्ताननुषङ्गात् । न च विभक्तिविपरिणामः, अन्यथाऽप्युपपद्यमानत्वात् । यदि ह्यनुषङ्गविपरिणामावन्तरेणाष्टत्वादिश्रवणमनर्थकं स्यात् । ततः किं वा न क्रियेत, तत्तु स्तुत्यर्थत्वेनोपपन्नतरत्वान्नानर्थकम् । तदा चानुवादत्वाद्विपरिणतविभक्तिसम्बन्धेऽप्यदोषः । तस्मान्न पुरोडाशविधानम् ।

न च द्वादशकपालेऽष्टाकपालादयः पुरोडाशाः स्वात्मभिर्विभक्ता विद्यन्ते, अष्टत्वादिमात्रविशेषदर्शनात् । ते चाष्टत्वादयो न यागे, नापि पुरोडाशे विधीयन्त इत्युक्तम् । न चाष्टत्वादीनां द्वादशकपालेनैकवाक्यता तत्रोपपद्यते । नानाविधेयप्रयोजनवशेनार्थैकत्वाभावात् । न च नानाविधानां विभज्यमानानां साकाङ्क्षत्वं विद्यते । यदि चैकं वाक्यं भवेत् । ततः सर्वविशिष्टैकभावनाविधानान्न विकल्पः स्यात् । अष्टत्वादीनां च गुणत्वान्न प्रत्येकं वाक्यपरिसमाप्त्या पृथगनुष्ठानोपपत्तिः । न च संख्यानां समुच्चयः संभवति, संख्यान्तरोपजननेन सर्वाभावप्रसङ्गात् । संख्यान्तरानुपजननसमुच्चयस्तु द्वादशत्वेऽष्टत्वाद्यन्तर्भावात् । तथाभूतानां च द्वादशत्वविधिनैव प्राप्तेरनुवादत्वापत्तिः । तेनैतैर्भिन्नैर्वाक्यैः स्वतन्त्रा विधीयन्त इत्यवश्यं भवताऽभ्युपगन्तव्यम् । ततश्च द्वादशत्वमुत्पत्तिवाक्यशिष्टम् । इतराणि तु वाक्यान्तरैः प्रकरणापेक्षैर्दुर्बलानि सन्ति न संबध्यन्ते । एवं तावद्वैश्वानरयागो बलवत्तरगुणावरोधान्नाष्टत्वादीन्प्रतीच्छति । अपि चाष्टत्वादयोऽपि नैवातिसोढाः तेऽपि हि पुरोडाशेनैकवाक्यभूतत्वान्नैव वैश्वानरयागस्य प्राप्नुवन्ति । तत्प्रकरणं बाधित्वा न तस्य भविष्यन्ति । तथा चातद्गुणाः केवलपुरोडाशसम्बन्धे प्रयोगे स्युरनर्थकाः । **न हि तं**—पुरोडाशं प्रत्यर्थवत्ताऽस्ति । अथ वा कथमेतद्गुणा इत्यत आह—**न हि तं**—यागमन्यावरुद्धं प्रत्यर्थवत्ताऽस्तीति ॥ १८ ॥

१. क. प्रयुक्ताः ।

न्या० सु० —गुणविधानार्थत्वेऽष्टाकपालादिशब्दानां बलाद्वाक्यभेदापत्तेरुत्पत्तिशिष्टद्वादशत्वावरुद्धे यागेऽष्टत्वादीनां निवेशाशक्तेरतद्गुणेनानर्थक्यमुपपादयितुं गुणस्येत्यादिभाष्यम्, अकृते द्वादशत्वानवरुद्धे गुणविधौ गुणविशिष्टयागान्तरविधौ चानर्थक्याभावादयुक्तमाशङ्क्योपलक्षणार्थत्वेन व्याचष्टे—**प्रकृत इति**। तथाशब्देन प्रकृताप्रकृतत्वे परामृष्टे गुणविशिष्टो यागश्चकारेणोक्तः।

यागे तावत् त्रेधापि गुणविध्यसम्भवमुपपादयति—**प्रकृत इति**। द्रव्यदेवतासंयोगाश्रयणेन यागानुमाने निरस्तम्। द्रव्येऽपि प्रकृतयागसम्बन्धिनि, दूरस्थयागसम्बन्धिनि, अपूर्वयागसम्बन्धिनि वा गुणविधिस्त्रिविधोऽपि यागे गुणविधिनिरासान्निरस्त इत्याह—इत्याह—**एतेनेति**। गुणविशिष्टद्रव्यविध्यसम्भवं प्रतिज्ञातमुपपादयितुं स्मारयति—**तथेति**। त्रेधापि प्रत्युक्तमित्यतिदेशार्थस्तथाशब्दः। प्रकृते तावद्यागे गुणविशिष्टद्रव्यविध्यसम्भवमुपपादयति—**न हीति**। यदा हवनीये जुहोतीतिवद्यजेतेति स्वशब्देनानुवादाभावाद् दूरस्थेऽपि द्रव्यविधिर्न सम्भवतीत्याह—**नापीति**। नन्वेवमपि तर्हि स्वतन्त्रमेव गुणविशिष्टं द्रव्यं विधीयतामत आह—**न चेति**। न केवलमानर्थक्यापत्तेरविधानम्, किं त्वशक्यत्वादपीत्याह—**नापीति**। विध्यशक्तेरेव तदधीनफलकल्पनाशक्तेर्नाश्रुतफलकल्पनयाऽनर्थक्यं परिहर्तुं शक्यमित्याह—**अत इति**।

ननु वैश्वानरोऽष्टाकपालो भवतीति वैश्वानरपदानुषङ्गेण द्रव्यदेवतासम्बन्धानुमितयागलाभादष्टाकपालादिपुरोडाशविशिष्टापूर्वयागविधिर्भविष्यतीति तृतीयं प्रकारमाशङ्क्याह—**वैश्वानरपदमिति**। पदोत्तरत्वेन श्लोकं व्याचष्टे—**स्यादेतदिति**। ननु स्तुतिरपि विधेयवैश्वानरयागविषयत्वान्न वैश्वानरपदानुषङ्गं विना युक्तेत्याशङ्क्याह—**तदा चेति**। अनुवादस्य प्रमाणान्तराधीनत्वान्न शब्दव्यापारापेक्षेत्याशयः। अतस्त्रेधापि पुरोडाशविधानं न सम्भवतीत्युपसंहरति—**तस्मादिति**।

एवं प्रकृताप्रकृतापूर्वयागसम्बन्धितया त्रेधाप्यष्टाकपालादिपुरोडाशविधाने निरस्ते, यदि कश्चित् प्रकृते द्वादशकपाले अष्टाकपालादिविधिमाशङ्कते, तं प्रत्याह—**न चेति**। अयमाशयः—यथैवाऽष्टाकपालस्य यागाङ्गत्ववादिना वैश्वानरोऽष्टाकपाल इति विपरिणतवैश्वानरपदानुषङ्गोऽङ्गीक्रियते, तथैव द्वादशकपालोऽष्टाकपाल इति विपरिणतद्वादशकपालपदानुषङ्गोऽङ्गीकार्यः। स च तद्वदेवाप्रमाणकः। तदभ्युपगमेऽपि समानाधिकरण्यनिर्देशेन पुरोडाशभेदानवगमात् द्वादशकपालाङ्गत्वेनाष्टाकपालादिशब्दैर्वैकल्पिकसंख्यान्तरविधानापत्तेः, तस्य च यागाङ्गत्ववन्निषिद्धत्वान्नाशङ्का युक्तेति। नन्वुत्पत्तिशिष्टद्वादशत्वावरोधान्नाष्टत्वादेः प्रकृते यागे, पुरोडाशे वा विधिः सम्भवतीति त्वयोक्तम्, तच्च सर्वस्यैकवाक्यत्वात्पूर्वपक्षिणा परिहृतमित्याशङ्क्याह—**न चेति**। वैश्वानरपदस्य द्वितीयान्तेन द्वादशकपालपदेन प्रथमान्तैश्चाष्टाकपालादिपदैर्वैरूप्यापत्तेस्तत्रान्वयायोगात् श्रुतद्वितीयान्तद्वादशकपालपदान्वयत्यागेनाष्टाकपालादिपदैरन्वयापत्ते-

द्वितीयान्तत्वेन परिणतैस्तत्रान्वयाभ्युपगमस्यात्यन्तायुक्तत्वात् वैश्वानरवाक्ये द्रव्यदेवता-विशिष्टो यागो विधेयत्वेन प्रयोजनम्, इतरेषु संख्येति प्रयोजनरूपार्थभेदाद्विभागे च नैराकाङ्क्षयाद् गुणविधिपक्षे बलाद्वाक्यभेदः प्रसज्येतेत्याशयः।

एकवाक्यत्वे चाऽष्टाकपालं नवकपालं दशकपालमेकादशकपालं द्वादशकपालं वैश्वानरं कुर्यादिति समुदाये वाक्यसमाप्त्या सर्वसंख्याविशिष्टैकभावनाविधिप्रतीतेर्वस्तुतः संख्यानां समावेशायोगेऽपि निरपेक्षसाधनत्वानवसायान्न विकल्पः स्यादित्याह—**यदि चेति**। आख्यातगुणभावेनाष्टाकपालं वैश्वानरं कुर्यान्नवकपालं कुर्यादित्यादिप्रत्येकं वाक्यसमाप्त्ययोगान्न निरपेक्षसाधनत्वं वक्तुं शक्यमित्याह—**अष्टत्वादीनां चेति**। ननु समुच्चयेन तर्हि पूर्वपक्षोऽस्त्वित्याशङ्क्याह—**न चेति**। तथा सति पञ्चाशत्संख्यापत्तेरष्टत्वादीनां मध्ये न काचित्स्यादित्यर्थः। नन्वष्टत्वादीनां द्वादशत्वान्तर्भूतानामेव समुच्चयोपपत्तेर्न संख्यान्तरोपजननापत्तिरित्याशङ्क्याह—**संख्यान्तरेति**। अतो वैश्वदेवन्यायेनेहाप्युत्पत्तिशिष्टेनोत्पन्नशिष्टबाधान्न गुणविधिः, सम्भवतीत्युपसंहरति—**तेनेति**।

अपि चेति भाष्येणाऽष्टत्वादीनां प्रकरणगम्ययागाङ्गत्वबाधे। पुरोडाशैकवाक्यत्वावगमात् न यागाङ्गत्वम्—**सम्भवतीत्युक्तम्**। यत्पूर्वेण पुनरुक्तमाशङ्क्य विविक्तविषयत्वं भाष्यद्वयस्याह—**एवमिति**। पूर्वेणोत्पत्तिशिष्टद्वादशत्वावरोधाद्यागस्याष्टत्वाद्यनाकाङ्क्षोक्ता। अनेनाऽभ्युपगम्य यागाकाङ्क्षां वाक्येन पुरोडाशाङ्गत्वावसायान्न यागाङ्गतेत्युच्यते इति विवेकः।

ननु पुरोडाशस्वरूपचिन्तायामानर्थक्यापत्तेरपूर्वसाधनांशलक्षणार्थं वाक्येन प्रकरणापेक्षणात् न विरोधोऽस्तीत्याशङ्क्य—**अष्टत्वादय इत्युक्तम्**। द्वादशत्वावरुद्धपुरोडाशद्वाराऽष्टत्वादेर्यागाङ्गत्वायोगात् तन्नैरपेक्ष्येण यागाङ्गत्वं वाच्यम्। न च पुरोडाशमतिक्रम्याऽष्टत्वादयो यागान्वयं सहन्त इत्याशयः। सहेः कर्त्तरि क्तप्रत्यये परभूते होढ इति हकारस्य ढकारादेशे कृते 'झषस्तथोर्धो ध' इति तकारस्य धत्वे ष्टुत्वे कृते ढो ढे लोप इति पूर्वढकारे लुप्ते कृते 'सहिवहोरोदवर्णस्ये'त्यकारस्योकारादेशात्सोढा इति रूपसिद्धिः।

यागप्रकरणशब्दौ वैश्वानरयागविषयतयैकवाक्यत्वे च यागानङ्गत्वं हेतुतया व्याचष्टे—**तेऽपीति**। कस्मिन्नर्थे पुरोडाशैकवाक्यत्वं हेतुरित्यपेक्षायां नैवेत्युक्तम्। कस्य प्रकरणमित्यपेक्षायां तच्छब्देन वैश्वानरयागः परामृष्टः। भाष्यस्थं यागशब्दं वैश्वानरविषयं द्योतयितुं तस्येत्युक्तम्। वैश्वानरयागप्रकरणं बाधित्वा पुरोडाशैकवाक्यत्वान्नाष्टत्वादयः पुरोडाशान्वयानपेक्षाः वैश्वानरयागस्य भविष्यन्ति, येनोत्पत्तिशिष्टेन द्वादशत्वेन भिन्नविषयतया विरोधाभावान्न बाधेरन्निति भाष्यार्थः। यागशब्देन च भाष्यकृता परार्थत्वाद् गुणानामिति पूर्वाधिकरणसूत्रगतेन परशब्देन निर्दिष्टो यागोऽतद्गुणा इति तच्छब्देन परामृष्ट इति द्योतितम्। यागानङ्गत्वे को दोष इत्याशङ्क्य 'प्रयोगे स्युर-

नर्थका' इति सूत्रकृतोक्तम्। तद्व्याख्यानार्थं यागसम्बन्धे चेति भाष्यं व्याचष्टे—**तथा चेति**। पुरोडाशस्य यागाङ्गत्वात् तद्द्वाराऽष्टत्वादेः पुरोडाशान्वयेऽपि फलवत्त्वोपपत्तेः फलाभावादित्ययुक्तमाशङ्क्य केवलेत्युक्तम्। यागाङ्गभूतस्य पुरोडाशस्य द्वादशत्वावरोधेनाष्टत्वाद्यन्वयायोगात् पुरोडाशस्वरूपान्वयोऽष्टत्वादेर्वाच्यः तत्र चानर्थक्यं स्यादित्याशयः। 'न हि तं प्रत्यर्थवत्तास्ती'त्येतत्सूत्रावयवव्याख्यानार्थमपि पुरोडाशेति भाष्यमतद्गुणा इति। तच्छब्दपरामृष्टयागान्यवाचिना नञा निर्दिष्टस्य पुरोडाशस्य 'तं प्रतीति तच्छब्देन परामर्शोऽनेन भाष्येणोक्त इति सूचयितुं पूर्वेणैकीकृत्य व्याख्यातम्। न हीति सूत्रावयवः पुरोडाशेति भाष्येण कथं व्याख्यात इत्यपेक्षायामाह—**न हीति**। स्वयमन्यथा व्याचष्टे—**अथ वेति**॥ १८॥

भा० प्र—पूर्वपक्ष के समाधान के प्रसङ्ग में कहा गया गया है कि अष्टाकपालत्व आदि कर्मनामधेय और गुणविधि भी नहीं है। क्योंकि, इस स्थल में 'अष्टाकपालम्' इत्यादि वाक्य में किसी भी देवता का उपदेश नहीं है। अतः, कर्मनामधेय नहीं है। यह गुणविधि भी नहीं है, कारण, कर्म की उत्पत्ति वाक्यों में ही द्वादशकपाल रूप गुण उक्त होने से अष्टाकपालादि पठित उत्पन्नशिष्ट होने से प्रकरण की सहकारिता से उसमें आश्रयलाभ नहीं कर सकता है। इसलिए सूत्रकार ने कहा है 'न हि तं प्रति अर्थवत्ता अस्ति' जब यह कर्म नामधेय भी नहीं है एवं द्वादशकपालवैश्वानरयाग का गुण भी नहीं है, ऐसी स्थिति में इसको गुणविधि मानने पर वे गुण किसी के उपयुक्त न होने से अनर्थक ही होगा। इसीलिए सूत्रकार ने कहा है 'अतद्गुणाः प्रयोगे स्युरनर्थकाः'। किन्तु अष्टाकपालत्वादि अर्थवाद रूप में वैश्वानर याग के साथ अन्वित होकर सार्थक हो सकते हैं।

गुणस्य' = गुण का, 'तु' = पूर्वपक्षनिवारक, 'विधानार्थे' = विधान करने के लिए प्रयोजन युक्त होने पर, 'अतद्गुणाः' = जो द्वादशकपाल का गुण नहीं हैं' वे अष्टाकपालत्व आदि 'प्रयोगे' = प्रयोग में अर्थात् अनुष्ठान में 'अनर्थकाः स्युः' = अनर्थक अर्थात् अनुपयुक्त होते हैं, 'हि' क्योंकि, 'तं प्रति' = उस कर्म में 'अर्थवत्ता' = सार्थकता, = 'न' = इस स्थल में नहीं 'अस्ति' = है।

यदि अष्टाकपालत्व आदि गुणों का विधान किया जाय तो वे प्रधान कर्म जो द्वादशकपाल वैश्वानर याग है वह उसका गुण नहीं हो सकता है। वे स्वतन्त्र रूप में अन्य याग का भी विधान न करने से प्रयोग का अर्थात् अनुष्ठान उपयुक्त न होने पर उस प्रधान कर्म में अष्टाकपालत्व आदि गुणों की भी सार्थकता नहीं रहती है।

श्रीयुधिष्ठिर मीमांसक ने इस सूत्र की व्याख्या इस रूप में प्रस्तुत की है—अष्टाकपालादिवाक्य के अष्टाकपालत्वादि गुण के विधान के लिए होने पर वैश्वानर याग

के गुण नहीं होंगे, वहां द्वादशकपालता के प्रत्यक्षशिष्ट होने से यागान्तर के विधान में असमर्थ होते हुए अनर्थक होवेंगे, यागान्तर के प्रति प्रयोजनता नहीं है, फल का अभाव होने से ॥ १८ ॥ सिद्धान्तपक्ष ।

तच्छेषो नोपपद्यते ॥ १९ ॥ उत्तराभासः ॥

शा० भा०—इति यदुक्तम्, तत्परिहर्त्तव्यमित्याभाषान्तं सूत्रम् ॥ १९ ॥

भा० वि०—तच्छेषो नोपपद्यत इत्येतावन्मात्रं सूत्रपाठं दृष्ट्वा पूरयति—**इति यदुक्तमिति।** आभिमुख्येन भाषा आभाषा अभिमुखीकरणप्रयोजनं भाषणमिति यावत् ॥ १९ ॥

त० वा०—अष्टत्वाद्यविधानत्वाद्व्यर्थेयं तत्प्ररोचना ।

तस्मादवयवद्वारं द्वादशत्वं प्ररोच्यते ॥ १९ ॥

न्या० सु०—'तच्छेषो नोपपद्यत इति चेदि'ति सूत्रपातानिकार्थमर्थवादत्वेन त्विति भाष्यम् । तत्तु स्तुत्यर्थत्वेनोपपन्न[1]त्वान्नानर्थकमित्यनेनार्थतो व्याख्यातत्वान्न व्याख्यातम् । एतत्सूत्रार्थस्य चेतरथार्थवादाः सन्तोऽनर्थकाः स्युरिति भाष्येण तत्सामर्थ्यमिति विशेषणाक्षिप्तस्योक्तत्वादिति यदुक्तमितिभाष्येणाभाषान्तमेतत्सूत्रमित्युक्त्वाऽविभागाद्विधानार्थे स्तुत्यर्थेनोपपद्येरन्निति सूत्रं परिहारार्थत्वेन भाष्यकृता पृथक् पठितमपि 'यदा त्वि'ति भाष्यावयवेनाभाषासूत्रार्थस्य परिहारसूत्रार्थेन सहैकीकृत्य व्याख्यानात् स्वयमपि तथा व्याख्यातुमेकीकृत्य पठति-**तच्छेष इति, इति चेदिति** । पदद्वयं भाष्यकारेणाऽपठितमपि वृत्त्यन्तरे दृष्टत्वाद्वार्त्तिककृता पठितम् । यदा त्विति भाष्यावयवेन पूर्वसूत्रगतगुणशब्दनिर्दिष्टाष्टत्वादिपरामर्शितं तच्छब्दमङ्गीकृत्याष्टत्वादिशेषो 'यदष्टाकपालो भवती'त्याद्यर्थवादो नोपपद्यत इति । एवमाभाषासूत्रं व्याख्यातम् । तदष्टत्वादेर्भवतिपरेणाख्यातेन विहितस्य स्तुत्युपपत्तेरयुक्तमाशङ्क्योपपादयति—**अष्टत्वादीति** । उत्पत्तिशिष्टद्वादशत्वावरुद्धे यागेऽष्टत्वादेर्विधानानर्हत्वात् इयमष्टत्वादेः प्ररोचना सती व्यर्था स्यादित्यर्थः ।

तदेति भाष्यावयवेन विधा'नार्थे स्तुत्यर्थे नोपपद्येरन्नि'ति परिहारसूत्रावयवं विधानविषयभूतद्वादशत्वस्तुत्यर्थेन 'यदष्टाकपालो भवती'त्यादयः शब्दाः उपपद्यन्त इति । एवं च व्याख्यातुं लक्षणयाऽष्टाकपालादिशब्दैर्द्वादशकपालस्तुतिरित्युक्तम् । तत्र लक्षणाया को हेतुः । कथं चाष्टत्वादिना द्वादशत्वं लक्ष्यत इत्यपेक्षायामाह—**तस्मादिति** । अष्टत्वादिप्ररोचनावैयर्थ्यस्य हेतुत्वं तस्माच्छब्देनोक्तम् । अवयवावयविसम्बन्धस्य च लक्षणाबीजत्वमवयवद्वारमित्यनेनोक्तम् । एतदेव व्याचष्टे—**यदिति** ।

---

१. उपपन्नतरत्वादिति २ पु० पा० ।

नन्वष्टाकपालादिशब्दानां द्वादशत्वानुगंताष्टत्वादिपरत्वं कथमवसेयमित्याशङ्कानिरासार्थत्वेनाऽविभागादिति सूत्रावयवव्याख्यानार्थं 'सन्ति ही'ति भाष्यं तात्पर्यतो व्याचष्टे—**तदिति**। सामीप्यवाच्यविभागशब्द इत्याशयः। ननु गायत्र्यादिशब्दैः संख्यासाम्येनाऽष्टत्वादिषु स्तुतिप्रतीतेः कथं द्वादशकपालस्तुतिरित्युक्तमित्याशङ्कयाऽष्टत्वाद्येवात्र द्वादशत्वस्तुत्यर्थं स्तूयत इति. अत इति भाष्येणोक्त्वा कथमवयवस्तुत्याऽवयवी स्तुतो भवतीत्याशङ्कानिरासार्थं 'यथेति भाष्ये दृष्टान्ताभिधानं कृतम्। तत्तात्पर्यतो व्याचष्टे—**एकदेशेति**। ननु चक्रावयवत्वान्नेम्यादेस्तुत्याऽवयविनः स्तुतिर्युक्ता, संख्यानं त्ववयवावयविभावाभावान्नाष्टत्वादिस्तुत्या द्वादशत्वं स्तुतं भवतीत्याशङ्कयावयवावयविभावाभावेऽप्येकदेशैकदेशिभावेन समुदायिहस्त्यादिस्तुत्या समुदायसेनास्तुतिदर्शनात् संख्यानामपि चैकदेशैकदेशिभावप्रसिद्धेरष्टत्वाद्येकदेशस्तुत्यैकदेशिनी द्वादशत्वसङ्ख्या स्तुता भवतीति प्रतिपादनार्थत्वं द्वितीयदृष्टान्ताभिधानस्य सूचयितुमेकदेशैकदेशिशब्दौ। तस्मादित्युपसंहारभाष्यं कीदृशी स्तुतिरित्यज्ञानाद्व्याचष्टे—**तेनेति**। यच्च 'प्रत्यक्षरूपात्मीयस्तुतिसद्भावात् परोक्षाष्टत्वादिद्वारा स्तुत्यङ्गीकरणमयुक्तम्। तत्परिहारार्थत्वेनाप्येतदेव भाष्यं पूर्वोक्तानुभाषणपूर्वकं व्याचष्टे—**यत्त्विति**। प्रत्यक्षपरोक्षस्तुतीनां प्रत्येकं ग्रहणे सति प्रत्यक्षस्यैव नैराकाङ्क्ष्यात् परोक्षाश्रयणमयुक्तं स्यात्। तासां तु 'यस्मिन् जात एतामिष्टिं निर्वपति, स पूत एव तेजस्वी अन्नाद इन्द्रियावी पशुमान् भवती'ति प्राशस्त्यप्रतिपादनोपपादकतया सर्वासां युगपत् ग्रहणान्नैकया नैराकाङ्क्ष्यमिति वक्तुम्—**ऐकरूप्येणेत्युक्तम्**। अल्पयैव स्तुत्या प्ररोचनोपपत्तौ महती स्तुतिरनर्थिकेत्याशङ्कानिरासायाऽपरिमाणत्वादित्युक्तम्। अनियतपरिमाणत्वमेवोपपादयति—**सर्वत्रेति** ॥ १९ ॥

भा० प्र०—पूर्वोक्त सिद्धान्त के विरुद्ध पूर्वपक्षियों का कहना है कि 'अष्टाकपालः' इत्यादि वाक्य 'वैश्वानरं द्वादशकपालम्' इस विधि का शेष अर्थात् अङ्ग या अर्थवाद वाक्य नहीं माना जा सकता है, क्योंकि, इसके द्वारा द्वादशकपाल की प्रशंसा नहीं की जाती है, अपितु अष्टाकपालत्व आदि की प्रशंसा की जाती है।

'तच्छेषो' = उसका शेष अर्थात् प्रधान कर्म वैश्वानर याग के विधायक वाक्य का अङ्ग है, 'न उपपद्यते' = उपपन्न नहीं होता है ॥ १९ ॥

अविभागाद्विधानार्थे स्तुत्यर्थेनोपपद्येरन् ॥ २० ॥

शा० भा०—यदा त्वष्टाकपालादिप्ररोचनार्था अनर्थका इत्यवगतम्, तदा लक्षणया द्वादशकपालस्य स्तुतिर्वैश्वानरयागप्ररोचनार्था भविष्यति। सन्ति हि द्वादशसंख्यायामष्टत्वादयः संख्याविशेषा अविभक्ताः। अतो द्वादशकपालस्य स्तुत्यर्थत्वेनावयवस्तुतिरुपपद्यते। यथा शोभनमस्य चक्रस्य नेमितुम्बारम्। शोभनमस्याः सेनाया हस्त्यश्वरथपादातमिति। तस्मादुपपन्ना स्तुतिरिति ॥ २० ॥ उत्तरम् ॥

भा० वि०—सूत्रद्वयमेकीकृत्य व्याख्यातुं सिद्धान्तसूत्रं पठति—**अविभागादिति**। तत्रानुवादव्याजेन सूर्वसूत्रार्थमाह—**यदा त्विति**। तदनेन पूर्वसूत्रगतगुणशब्दनिर्दिष्टाष्टत्वादिपरामर्शनं तच्छब्दमङ्गीकृत्याष्टत्वादिशेषो यदष्टाकपालो भवतीत्याद्यर्थवादो नोपपद्यत इति सूत्रं व्याख्यातम्। इदानीं विधानार्थे स्तुत्यर्थे नोपपद्येरन् इति परिहारसूत्रावयवं व्याचष्टे—**तदेति**। यद्यप्यष्टत्वादीनामविधेयत्वात्तत्प्ररोचनाऽनार्थिका, तथापि द्वादशत्वस्य विधेयत्वादष्टादिशब्दैरप्यवयवावयविसम्बन्धेन तल्लक्षणया तत्स्तुतिर्भविष्यतीत्यर्थः। अनेन विधानार्थे विधानविषये द्वादशत्वे स्तुत्यर्थेनार्थवादा उपपद्येरन्निति सूत्रार्थो दर्शितः।

ननु द्वादशत्वान्तर्गताष्टत्वादिपरत्वमष्टाकपालादिशब्दानां कथमवसेयमित्याशङ्क्याविभागादिति सूत्रावयवं व्याचष्टे—**सन्ति हीति**। अविभक्ताः एकदेशभूता इति यावत्।

ननु गायत्र्यादिशब्दैस्सङ्ख्यासामान्येनाष्टत्वादिस्तुतिप्रतीतेः कथं द्वादशकपालस्तुतिः? तत्राह—**अत इति**। द्वादशत्वं स्तोतुं तदवयवोऽष्टत्वादि स्तूयत इत्यर्थः। कथमवयवस्तुत्याऽवयवी स्तुतो भवतीत्याशङ्क्य दृष्टान्तमाह—**यथेति**।

ननु चक्रावयवत्वान्नेम्यादेः युक्ता तत्स्तुत्याऽवयवस्तुतिः, सङ्ख्ययास्त्ववयवावयविविभागाभावान्नाष्टत्वादिस्तुत्या द्वादशकपालस्तुतिरित्याशङ्क्य दृष्टान्तान्तरमाह—**शोभनमस्या इति**। अवयवावयविविभागाभावेऽपि एकदेशैकदेशिभावादुपपन्ना स्तुतिः। समुदायिसमुदाययोरिवेत्यर्थः। तस्मात् प्रशस्तोऽयं द्वादशकपालः यदस्मिन् क्रियमाणेऽष्टाकपालादयोऽपि सम्भाविता भवन्ति। ते च ब्रह्मवर्चसादिफला इति स्तुतिरेवेत्युपसंहरति—**तस्मादिति**। यद्यपि द्वादशत्वे प्रत्यक्षा स्तुतिरस्ति तथापि स्तुतेरुपपत्तेरर्थवती स्तुतिः प्रत्यक्षपरोक्षरूपा तां सर्वां विध्युद्देश्यं प्रतीच्छतीति सूचयितुमुपपन्नेत्युक्तम्॥ २०॥

त० वा०—यद्विधेयमवधार्यते, तदेव स्तोतव्यम्। द्वादशत्वं चात्र विधेयम्। तस्माद्यथाकथंचित्तदेव स्तोतव्यम्। तत्सामीप्याच्च शक्नुवन्त्यष्टादिशब्दास्तदेकदेशप्रतीतिं कर्तुम्। एकदेशस्तुतिद्वारेण चैकदेशी स्तुतो भवति। तेनैतदुक्तं भवति, ईदृशोऽयं द्वादशकपालो महाभागो-यस्मिन् क्रियमाणेऽष्टाकपालादयोऽपि संभाविता भवन्ति। ते चाष्टत्वादयो ब्रह्मवर्चसादिसिद्धिप्रशस्ताः तस्मात्प्रशस्तोऽयमिति।

यत्त्वस्त्येव द्वादशत्वस्यान्या स्तुतिरिति। नैष दोषः। कुतः।

स्तुतेरपरिमाणत्वाद्यावती हि प्रतीयते।
तां सर्वामैकरूप्येण विध्युद्देशः प्रतीच्छति॥

---

१ क. (टिप्पण्यां) सर्वामिवैक-पा० पुस्तकान्तरे।

सर्वत्र ह्यल्पैर्बहुभिर्वाऽक्षरैः स्तुतयो दृश्यन्ते, श्रोतृप्रकारानेकत्वाच्च क्वचित्काश्चिदर्थवत्यो भवन्ति। यथैव केषांचिद्विध्युद्देशमात्रेण प्रवृत्तौ सिध्यन्त्यामन्यार्था स्तुतिराश्रीयते। तथैवाल्पस्तुत्युपपन्नेऽपि कार्ये महास्तुत्याश्रयणमिति ॥ २० ॥

न्या० सु० स्वयं तावत्सूत्रं व्याचष्टे— **जनकत्वेनेति**। भाष्यकारीयं व्याख्यानमुपपादयति—**तेषामिति**। फलस्य साधनविषयप्रवृत्तिहेतुत्वात् साधनं प्रति कारयितृतास्तीत्याशयः। किमेवमिति भाष्येण किमर्थं कारणत्वाभिधानमिति पृष्ट्वा, पुरोडाशस्येत्यादिनोक्तदोषपरिहाराय गुणफलसम्बन्धरूपपूर्वपक्षान्तरप्रदर्शनार्थमेतत्सूत्रमित्युक्तम्। तत्प्रपञ्चयितुमाह—**यदुक्तमिति**। काम्यस्याप्युत्पन्नशिष्टस्योत्पत्तिशिष्टबाधकत्वं कथमित्याशङ्क्य 'नैमित्तिके तु प्रकृतौ तद्विकारः सम्प्रयोगविशेषादि३-६-१०ति तृतीयाधिकरणवक्ष्यमाणन्यायमाह—**तथा हीति**। अविशेषेण यच्छास्त्रमन्याय्यत्वाद्विकल्पस्य तत्र सन्दिग्धमाराद्विशेषशिष्टं स्यादि१०-८-१६ति दशमाधिकरणन्यायेन नापि काम्यं नित्यस्य बाधकमित्याह—**विशेषतश्चेति**। जातेष्टिप्रयोगमात्रविषयत्वात् सामान्यरूपे द्वादशत्वे प्राप्ते ब्रह्मवर्च्चसकामादिप्रयोगविशेषविषयत्वेनाष्टत्वादेः प्रवर्त्तनादित्यर्थः। 'पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवदि६-५-५४ति षष्ठाधिकरणन्यायेनाप्येवमित्याह—**पूर्वेति**। उत्पत्तिशिष्टत्वात् पूर्वं प्राप्ते द्वादशत्वे, अष्टत्वादेरुत्पन्नकर्माश्रियत्वेन पश्चात्प्रवर्त्तनादित्यर्थः। तार्त्तीयं न्यायं विवृणोति—**पुरुषार्थेति**। काम्यस्य नित्यबाधकत्वेऽयमेव मुख्यो न्यायः। सम्भवमात्रेण तु न्यायान्तरोपन्यासस्तत्रेति सूचयितुमस्यैव विवरणगुणफलसम्बन्धविधानोपपादनफलमानर्थक्यपरिहारमुपसंहरति—**तस्मादिति**।

ननु भवतीति वर्त्तमानापदेशसन्दिग्धस्य पञ्चमलकारतया विधित्वनिर्णयः स्तुत्यन्वयान्यथानुपपत्त्यधीना गायत्र्यैवैनमित्यादेस्तुल्यभावेनास्य विधित्वनिर्णयाशक्तेर्गुणफलसम्बन्धविधिर्न युज्येतेत्याशङ्कते—**ननु चेति**। विध्यभावेऽपि समभिव्याहारादेव गुणफलसम्बन्धः सेत्स्यतीति केषांचित्परिहारमुपन्यासपूर्वकं दूषयति—**तत्रेति**। स्वमतेन परिहरति—**अतोऽयमिति**। श्लोकं व्याचष्टे **यदिति** ॥ २० ॥

भा० प्र०—विधेय विषय की प्रशंसा करना उचित होता है, किन्तु, विधेय विषय की प्रशंसा हुई है, ऐसी प्रतीति नहीं हो रही है, अतः द्वादशकपालविधि को अर्थवाद कहना उचित नहीं है, इस स्थल में प्रशंसा अर्थवाद से अतिरिक्त अन्य प्रकार से भी प्रामाण्य नहीं है, अतः, 'अष्टाकपालः' इत्यादि वाक्य भी अर्थवाद है, यद्यपि इसके द्वारा अष्टत्व आदि की ही प्रशंसा कही गई है, तथापि अष्टत्व, नवत्व, दशत्व, एकादशत्व, ये सभी द्वादशत्व का भी अंश होने से उससे विभक्त नहीं है, इसीलिए, जैमिनि सूत्र में है 'अविभागात्' यह कहा गया है, फलतः, अष्टाकपालत्वादि की प्रशंसा करने पर अंशीभूत द्वादशकपालत्व के अंश की भी प्रशंसा की गई, अंश की स्तुति अंशी की प्रशंसाजनक होने से, उनके द्वारा विधेय द्वादशकपाल की भी प्रशंसा हो

ही जाती है, इसीलिए, सूत्र में कहा गया है कि 'विधानार्थे स्तुत्यर्थेनोपपद्येरन्'। इस स्थल में प्रशंसा का तात्पर्य यह है—यह द्वादशकपालयाग ऐसा सौभाग्यप्रद है कि इसके अनुष्ठान से अष्टाकपाल आदि का भी अनुष्ठान यथाक्रम में सिद्ध हो जाता है एवं उसके फलस्वरूप ब्रह्मवर्चस् आदि फल की भी प्राप्ति होती है। इसीलिए अंश-वाचक अष्टाकपाल आदि वाक्य लक्षणा के बल से द्वादशकपाल रूप अंशी का ही स्तावक है।

'विधानार्थे' = विधायक वाक्य का कपालगतद्वादश संख्या में 'अविभागात्' = विभक्त अर्थात् पृथक् न होने से 'स्तुत्यर्थेन' = स्तुति अर्थात् प्रशंसा करने के लिए, 'उपपद्येरन्' = उपपन्न = युक्तियुक्त होता है। प्रधान वाक्य में द्वादशकपाल के उपदेश में, उसके कपालगत द्वादश संख्या से अष्टत्व आदि संख्या विभक्त न होने से उसकी प्रशंसा होने पर द्वादश संख्या की ही प्रशंसा होती है। फलतः अष्टत्वादि वाक्य को अर्थवाद वाक्य मानना उपपन्न होता है॥ २०॥

कारणं स्यादिति चेत्॥ २१॥

शा० भा०—इति चेद् भवान् पश्यत्यर्थवादा इति, कारणमष्टत्वादीनां ब्रह्मवर्चसादि कस्मान्न भवति? ब्रह्मवर्चसकामस्याष्टाकपालः। एवमुत्तरेषु यथाकामम्। किमेवं भविष्यति? पुरोडाशस्य गुणविधानेऽप्यानर्थक्यं न भविष्यति। न च लक्षणया द्वादशकपालस्य स्तुतिः कल्पिता भविष्यति। तस्मात् कामेभ्यो विधयो भविष्यन्ति॥ २१॥ आ०॥

भा० वि०—एवं वैश्वानरयागेऽष्टत्वादिगुणविधिरित्याद्यपूर्वपक्षे निरस्ते, फले गुणविधिरिति द्वितीयमुद्भावयितुं कारणं स्यादिति चेदिति सूत्रं व्याचष्टे—**इति चेत्यादिना**। किमित्यर्थवादत्वं अष्टत्वादीनामनुष्ठाने कारणं प्रयोजनतया निमित्तं ब्रह्मवर्चसादि कस्मान्न भवतीत्यादि-ब्रह्मवर्चसादिफलसाधनमष्टत्वादि कस्मान्न भवेदित्यर्थः। एतद्विवृणोति-**ब्रह्मवर्चसेति, यथाकाममिति**। तेज आदि-कामस्य नवकपालादीत्यर्थः। कारणत्वे वा किं प्रयोजनमिति पृच्छति—**किमेवमिति**। पक्षान्तरोक्तदोषपरिहारः प्रयोजनमित्याह—**पुरोडाशस्येति**। द्वादशत्वावरुद्धेऽपि वैश्वानरयागे ब्रह्मवर्चसादिफलेऽष्टत्वादिविधानान्नानर्थक्यं भविष्यतीत्यर्थः, फले गुणविधौ लाभान्तरमाह—**न चेति**। प्रयोजनद्वयफलमाह—**तस्मादिति**॥ २१॥

त० वा०—जनकत्वेन पूतादेरष्टत्वादीनि कारणम्।
तेषां कारयितृत्वाद्वा पूतादेः कारणाभिधा॥

यदुक्तं द्वादशत्वावरोधादनर्थकमष्टत्वादिविधानम्, स्तवनं चेति। तन्नानर्थकम्। नित्यं हि द्वादशकपालता। यस्तु गुणफलानि ब्रह्मवर्चसादीनि प्रार्थयते, तस्याऽष्टत्वादीनि द्वादशत्वोपमर्देन निवेक्ष्यन्ते।

तथा हि—

पुरुषार्थसमासत्तेः काम्यं नित्यस्य बाधकम्।
विशेषतश्च सामान्ये पूर्वप्राप्ते प्रवर्तनात्॥

पुरुषार्थसिद्ध्यर्थो हि सर्वः प्रयास इति तत्प्रत्यासन्नं वस्तु बलीयो भवति। दूरे च द्वादशत्वम्, पुरुषार्थस्य तत्साधनयागद्रव्यसंस्कारार्थकपालपरिच्छेदात्। अष्टत्वादयस्तु तदाश्रिताः सन्तः साक्षाद् ब्रह्मवर्चसादि साधयन्तीति प्रत्यासत्तेर्बलीयांसो भवन्ति। तस्मादर्थवन्त इति।

ननु च—

शंका—केषाञ्चिन्मतेन परिहारः तन्निरासेन स्वमतम्

ब्रह्मवर्चसयोगादि फलत्वेन यदीष्यते।
स्तुत्यभावाद्विधिः केन वर्तमानापदेशिनाम्॥

तत्र केचिदाहुः औदुम्बराधिकरणपूर्वपक्षन्यायेनात्र प्रत्यवस्थानमिति। तन्न युक्तम्, तत्रैव दत्तोत्तरत्वात्। अतोऽयमभिप्रायः। 'पूत एव स तेजस्वी' इत्यादिना फलमुच्यते। 'गायत्र्यैवैनम्' इत्यादिस्तुतेः प्रात्यात्मिको विधिः। 'यदष्टाकपाल' इत्यादिभिः सार्थवादकैः प्रत्येकं विहितानां यथासंख्येन पूत एवेत्यादिभिः फलसम्बन्धः क्रियते॥ २१॥

न्या० सु०—गुणफलसम्बन्धविधौ स्तुत्यर्थत्वायोगादेकोपक्रमोपसंहाररूपत्वेन एकवाक्यत्वं प्रतीयमानं बाध्येतेत्यानर्थक्यादकारणमिति सूत्रावयवव्याख्यानार्थं यदीति भाष्यं व्याचष्टे— **वाक्यानीति**। श्लोकं व्याचष्टे—**पुत्र इति**। तस्येति भाष्यावयवं यद्यष्टत्वादयो न सम्बन्ध्येरन्, ततो वाक्यान्तरत्वं स्यात्। स्तुत्यर्थत्वेन सम्बन्धोपपत्तेर्न वाक्यान्तरता युक्तेति व्यवधारणकल्पनया व्याख्यातुमाह—**तावतीति चेति**।

ननूपक्रमोपसंहारपर्यालोचनयैकवाक्यत्वे सति सर्वसंख्यानामुत्पत्तिशिष्टत्वाविशेषेण बलाबलविशेषाभावादाद्यपूर्वपक्षनिरासो न युक्तः स्यादित्याशङ्क्याह—**तदिति**। तस्मिन्नपि पक्षे न चाष्टत्वादीनां द्वादशकपालेनैकवाक्यता तवोपपद्यत इत्यादिनैकवाक्यस्य निरस्तत्वादिति भावः। अनेन च गुणफलसम्बन्धविधिपक्षे वाक्यभेदापादनेन **गुणफलसम्बन्धविधौ** गम्यमानैकार्थ्याभावप्रसङ्गादित्येवमानर्थक्यादिति सूत्रावयवो योजितो भवतीत्याह—**अर्थान्तरेति**। स्तुत्या विनैकवाक्यता कस्मान्नोपपद्यत इत्यपेक्षितस्य ग्रन्थस्य तदुपपादनार्थत्वेनान्वयप्रतीतेरानर्थक्यादित्यस्यार्थैक्याभावप्रसङ्गादित्यर्थावसायादेवं व्याख्यातं

यथाश्रुतस्यानन्वयापत्तेः । एवं च गुणफलसम्बन्धविधौ वाक्यभेदापादनस्य सूत्रारूढतोक्ता भवति । स्तुत्यर्थत्वानभ्युपगमेऽर्थान्तरस्यासम्भवादानर्थक्यमेवावशिष्यत इत्यभिधानार्थेनैवानेन सूत्रावयवेनार्थान्तरपरत्वे वाक्यभेदप्रसङ्गाख्यं दूषणान्तरमप्युपलक्षितं भाष्यकृता विवृतम् । स्वरूपार्थस्तु यद्यर्थवादा अपीत्यनेन वक्ष्यते । अस्मिन्पक्षेऽर्थान्तरेति ग्रन्थो लिङ्गात् स्वातन्त्र्येणानर्थक्यादिति सूत्रावयवयोजनार्थो यथाश्रुत एव भवति ।

ननु गुणफलसम्बन्धविधानेनाप्यर्थवत्त्वोपपत्तेः कथमानर्थक्यापत्तिरित्याशङ्कानिरासार्थं 'कर्तुर्हि कारणानी'ति सूत्रावयवं व्यवधारणकल्पनया व्याचष्टे— **यदि हीति ।** 'गोदोहनेन पशुकामस्य प्रणयेदि'तिवत् पूतत्वकामस्याष्टाकपालो भवतीति श्रवणे सति कामिनः कर्त्तुः काम्यमानतया सम्बन्धीनि सन्ति पूतत्वादीनि फलत्वात्कर्त्तुः प्रवृत्तिकारणानि स्युः । तेषां तु यस्मिन् जात एतामिष्टिं निर्वपति, पूत एव स इत्यादिसमभिव्याहाराद्वैश्वानरेष्टिमात्रसम्बन्धित्वप्रतीतेः, कमिपदनिरपेक्षसमभिव्याहारमात्रप्रमाणकत्वस्य च साध्यत्वस्य पर्णमय्यधिकरणे निराकरिष्यमाणत्वात् फलाभावेन कर्तृप्रवृत्तिकारणत्वं नास्तीति भाष्यानुसारात्सूत्रावयवोऽनेन योजितः । अष्टत्वादौ कारणशब्देन विवक्षिते यद्यष्टाकपालं कुर्यादिति कर्त्तुः प्रवृत्तिविषयतयाऽष्टत्वादीनि सम्बन्धीनि स्युः । तत समीहितसाधनत्वं विना प्रवृत्तिविषयत्वायोगात् उत्पत्तिशिष्टद्वादशावरुद्धवैश्वानरयागोपकारसाधनत्वस्यासम्भवाद्रात्रिसत्रन्यायेन अर्थवादावगतानि पूतत्वादीनि प्रवृत्ति[1]जनकानि स्युः । विध्यश्रवणेन त्वेषां समाहितसाधनत्वाप्रतीतेः समभिव्याहारमात्रकल्पस्य साधनत्वस्यौदुम्बराधिकरणे निरस्तत्वात् न पूतत्वादीनि प्रति कारणतास्तीति योज्यः ।

ननु पूतत्वादेः फलत्वाभावे किमर्थं कीर्त्तनमित्याशङ्कानिरासार्थं 'गुणार्थो ही'ति सूत्रावयवं व्याचष्टे—**तस्मादिति ।** निपातानामनेकार्थत्वात्तस्माच्छब्दार्थे हि शब्दव्याख्यानार्थं तस्मादित्युक्त्वा, तद्व्याख्यानायान्यस्यार्थान्तरस्यासम्भवादित्युक्तम् । स्तुतिविषयत्वेन गुणशब्दं व्याख्यातुं स्तुत्यर्थ इत्युक्तम् । इतिशब्दः पूर्वोक्तस्तुतिप्रकारपरामर्शार्थः । यस्मादन्योऽर्थो न सम्भवति । तस्मादुक्तप्रकारस्तुतिरूपोऽर्थः पूत एवेत्यादिभिर्गम्यत इत्यर्थः । अनेन च स एष इतिभाष्यगतस्य तच्छब्दस्य 'स्तुत्यर्थेनोपपद्येरन्निति एतत्सूत्रोक्तस्तुतिरूपार्थपरामर्शकत्वात् सौत्रगुणशब्दव्याख्यानार्थत्वमेतच्छब्दस्य च पूर्वोक्तावयवद्वारत्वरूपस्तुतिप्रकारपरामर्शकत्वं सूचितम् । अविधीयते वैश्वानरयाग इति भाष्यावयवेन सौत्रो हिशब्दः प्रसिद्धार्थवाचित्वात् वैश्वानरेष्टेश्च पूर्वविहितत्वेन प्रसिद्धत्वादष्टत्वादेः स्तुतिसम्बन्धे सति विधेयत्वापत्तेस्तन्निरासार्थं पूतत्वादेर्वैश्वानरेष्टिविषयत्वाभिधानार्थतया व्याख्यातः । तदुपपादयितुमाह—**पूत इति ।** यत्तदोरेकविषयत्वा'द्यस्मिन् जात एताम् इष्टिं निर्वपेदि'ति स पूत इति पूतत्वादीनां जातेष्ट्यन्वयप्रतीतिर्नाष्टत्वाद्यन्वयोऽस्तीत्यर्थः ।

---

1. प्रतीति २ पु० पा० ।

नन्विष्टेर्नैमित्तिकत्वेन फलानपेक्षतया पूतत्वाद्यन्वयायोगाद् गुणफलसम्बन्धविधानायाऽष्टत्वाद्यन्वयः कल्पयिष्यते । अत आह— **न चेति ।** स्तुत्यर्थेनेष्टान्वयोपपत्तेर्नाप्रतीयमानाष्टत्वान्वयकल्पना युक्तेति भावः । पूतत्वादीनां च पूत एव स इति तच्छब्दानिर्दिष्टैकपुत्रविषयत्वेन समुच्चयप्रतीतिर्व्यवस्थितत्वादष्टत्वादिफलत्वं न सम्भवतीत्याह— **न चेति ।** नन्वेवं सत्यैकैकस्याष्टत्वादेः फलपञ्चकं भविष्यतीत्याशङ्क्य निरासार्थं ब्रह्मवर्चसादीनामित्युक्तम् । 'गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाती'त्यादिवाक्यवशेनाष्टत्वादीनां व्यवस्थितफलत्वावगमात् समुच्चयो न युक्त इत्याशयः । योऽष्टत्वादीनां गुणानां ब्रह्मवर्चसादीनां च स्तवनानाम् एभिः पूतत्वादिभिर्विभागेन सम्बन्धोऽपेक्षितः । स न प्रतीयत इत्यर्थः ।

नन्वेवं तर्हि गायत्र्यैवैनमित्यादिभिरेव विभागेन फलसम्बन्धः करिष्यत इत्याशङ्क्याह—**यत्र त्विति ।** स्तुत्यभावे विध्यभावोपपत्तेरित्याशयः । ननु चतुर्थे 'फलसंयोगस्त्वचोदितेन स्यादशेषभूतत्वादित्यत्रैतदेव (४-३-३४) वाक्यमुदाहृत्य किमियं वैश्वानरेष्टिरात्मगामिफलप्रयुक्ता, पुत्रगामिफलप्रयुक्ता वेति सन्दिह्य, अधानगतात्मनेपदपर्यालोचनयात्मगामिफलप्रयुक्तत्वे प्राप्ते 'यस्मिन् जाते एतामिष्टिं निवर्पयति पूत एव स' इति फलवचनस्य पुत्रशेषत्वावगते पितृशेषत्वाभावात्फलभागित्वेनाचोदिते पितरि फलसंयोगो न स्यादिति पूतत्वादीनां पुत्रगामिफलत्वस्य वक्ष्यमाणत्वात्फलसम्बन्धापह्नवो न युक्त इत्याह —**अत इति ।**

रात्रिसत्रन्यायेनार्थवादत्वेनोपयुक्तानां पूतादिफलवचनानां परावर्त्य फलपरत्वकल्पनेऽप्यष्टत्वादीन् प्रति फलं नास्तीत्यर्थः । फलपरत्वे सतीह स्तुतित्वाभिधानं विरुध्येतेत्याशङ्क्याह—**प्रथमेति ।** नन्वेवं पूतादिपदैरेव स्तुतिसिद्धेर्यदष्टाकपाल इत्यादीनां गुणफलसम्बन्धाविधित्वानङ्गीकरणे सत्यानर्थक्यं स्यादित्याशङ्कानिरासार्थम्, तेन चेत्यादिभाष्यं व्याचष्टे—**एतैरेवेति ।** नन्वेवं सति स्तुत्यर्थवत्त्वोपपत्तेरानर्थक्याभिधानं न युक्तमित्याशङ्क्यार्थवादत्वानभ्युपगमेन गुणफलसम्बन्धविधिपरत्वाभ्युपगमे तदसम्भवादानर्थक्यमापद्येतेत्येवमानर्थक्यपदव्याख्यानार्थं 'ततः कामायेति' भाष्यम् अर्थान्तरपरतायामित्यनेनैव व्याख्यातत्वात् तस्मादिति चाकारणपदव्याख्यानार्थं पूर्वसूत्रगतकारणपदव्याख्यानार्थभाष्यव्याख्यानेन तेषां कारयितृत्वाद्वेत्यनेनैव व्याख्यातत्वान्नेह व्याख्यातम् । तस्मादित्यर्थवादत्वोपसंहारभाष्यमर्थवादविचारस्येहासङ्गतत्वेन गुणविधित्वसम्भवासम्भवमात्रविचारस्याधिकरणार्थत्वादयुक्तमित्याशङ्क्य गुणविधित्वासम्भवोपसंहारपरतया व्याचष्टे—**तस्मादिति ॥ २१ ॥**

भा० प्र०—पूर्वपक्षी ने इस प्रसङ्ग में आशङ्का की है कि 'कारणं स्यात्' अर्थात् 'अष्टाकपालः' आदि नामधेय अथवा शुद्ध गुणविधि न हो, किन्तु इसको 'वैश्वानरं द्वादशकपालम्' इत्यादि वाक्यों से प्राप्त जो कर्म उसमें 'ब्रह्मवर्चस्' आदि फल के

उद्देश्य से अष्टाकपालत्व आदि द्रव्य रूप गुण का विधान करता है—यह माना जा सकता है। 'गोदोहनेन पशुकामस्य' अर्थात् पशु रूप फल की कामना से गोदोहन के द्वारा 'अप् प्रणयन् करे' इत्यादि स्थलों में जैसे गो दोहन क्रियारूप गुण का विधान है वैसे ही इस स्थल में भी गुण का विधान होगा, इसलिए 'अष्टाकपालः' इत्यादि वाक्य 'फलाय गुणविधिः'=गुण फल विधि और ब्रह्मवर्चस् आदि फल ही उस गुण का कारण अर्थात् प्रयोजक है।

'कारणं स्यात्' = कारण होगा अर्थात् 'अष्टाकपालः' = इत्यादि वाक्य में श्रुत ब्रह्मवर्चस् आदि फल अष्टाकपालत्व आदि गुण कारण अर्थात् प्रयोजन होगा, 'इति चेत्' = इस प्रकार यदि कहा जाय ॥ २१ ॥

आनर्थक्यादकारणं कर्तुर्हि कारणानि गुणार्थो हि विधीयते ॥ २२॥

शा० भा०—यदि कामाय विधयः, तर्हि भिन्नानि वाक्यानि भवेयुः। एकं चेदं वाक्यं, वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जात इत्येवमुपक्रान्तं यद् द्वादशकपालो भवति जगत्यैवास्मिन् पशून् दधाति यस्मिञ् जात एतामिष्टिं निर्वपति पूत एव स तेजस्व्यन्नाद इन्द्रियावी पशुमान् भवतीत्येवमन्तम्। तस्य मध्येऽष्टत्वादयः श्रूयमाणा यदि न सम्बध्येरन्। ततो वाक्यान्तराणि भवेयुः, कर्तुर्हि कारणानि पूतत्वादीनि भवेयुः। स एष गुणार्थोऽत्र विधीयते वैश्वानरयागे पूत एव इत्येवमादिः। तेन चैतेऽष्टत्वादयः साक्षाद्धेतुत्वेन संबध्यन्ते। यस्माद् गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाति, तेन पूत एव सः, यस्मात्त्रिवृतैवास्मिँस्तेजो दधाति, तेन तेजस्वी। यस्माद् विराजैवास्मिन्नन्नाद्यं दधाति, तेनान्नादः। यस्मात्त्रिष्टुभैवास्मिन्निन्द्रियं दधाति, तेनेन्द्रियावी। यस्माज्जगत्यैवास्मिन् पशून् दधाति, तेन पशुमानिति। ततः कामाय विधयोऽसंभवन्तो यद्यर्थवदा अपि न भवेयुः, आनर्थक्यमेवैषां स्यात्। तस्मादकारणं ब्रह्मवर्चसत्वाद[1]योऽष्टत्वादीनाम्। तस्मादष्टत्वादयोऽर्थवादा इति ॥ २२ ॥ आ० नि० ॥ इत्येकादशं वैश्वानरेऽधिकरम्।

भा० वि०—आनर्थक्यादकारणमिति सूत्रावयवं व्याकुर्वन् सिद्धान्तमाह—**यदेत्यादिना**[2]। भवन्तु भिन्नानीत्याशङ्क्यैकोपक्रमोपसंहारत्वेनैकवाक्यत्वप्रतीतेः, नैवमित्याह—**एकमेवचेति**। अस्तु तर्हि गुणविधावप्येकमेवेदं वाक्यमत आह—**तत्सामर्थ्यं इति**। गुणफलसम्बन्धरूपार्थभेदाद्वाक्यभेदः स्यादेवेत्याशयः, अनेन

---

१ ब. ब्रह्मवर्चसाद।

२. यदोति क्वचित्पाठः।

प्रतीयमानैकार्थ्याभावप्रसङ्गादकारणं ब्रह्मवर्चसादीति सूत्रं व्याख्यातम्। इतश्चाकारणमिति वक्तुं कर्तुर्हि कारणानीति सूत्रावयवं व्याचष्टे—**कर्तुर्हीति**। पूतत्वकामस्याष्टाकपालो भवतीत्यादिश्रवणे सति कामिनः कर्तुः काम्यमानतया सम्बन्धीनि सन्ति पूतत्वादीनि फलत्वात्कर्तुः प्रवृत्तिकारणानि स्युः, तेषां तु यस्मिन् जात एतामिष्टिं निर्वपति, पूत एव स इति समभिव्याहाराद्वैश्वानरेष्टिमात्रसम्बन्धित्वप्रतीतेः कामिपदसम्बन्धाभावेन फलत्वाभावान्न कर्तृप्रवृत्तिकारणतेत्यर्थः।

ननु पूतत्वादेः फलत्वाभावे किमर्थं सङ्कीर्तनमित्याशङ्कानिरासार्थं गुणार्थो हि विधीयत इति सूत्रावयवं व्याचष्टे—**स एष इत्यादिना**। गुणरूपोऽर्थो गुणार्थः। गुणशब्दं स्तुतिपरतया व्याख्यातुं स्तुत्यर्थेनेति सूत्रोक्तस्तुतिपरामर्शी तच्छब्दः तस्मादित्यादिभाष्याभिमतस्तुतिप्रकारपरामर्शार्थं एतच्छब्दः प्रसिद्धवैश्वानरयागस्य स्तुतिविषयत्वं द्योतयितुं सौत्रो हि शब्दः इति व्याख्यातुं वैश्वानरयोग[1] इत्युक्तम्, तेन वैश्वानरयागस्तुत्यर्थं पूतत्वादीसङ्कीर्तनमित्युक्तं भवति।

नन्वेवं पूतत्वादिपदैरेव स्तुतिसिद्धेः यदष्टाकपालः इत्यादीनामानर्थक्यं स्यादत आह—**तेन चेति**। पूतत्वादिनेत्यर्थः, हेतुत्वेन सम्बन्धं विवृणोति—**गायत्रियैवैनमित्यादिना**। एवमर्थवादत्वेनार्थवत्त्वमुक्त्वा, तदनभ्युपगमे युगफलसम्बन्धविधानासम्भवात् आनर्थक्यमेव स्यादित्यानर्थक्यादिति सूत्रावयवमावृत्त्या व्याचष्टे—**ततः कामायेति**। यस्मादानर्थक्यम्, तस्मान्न गुणविधित्वमित्याह—**तस्मादिति**। गुणविधित्वनिरासफलमाह—**तस्मादिति** ॥ २२ ॥

इति वैश्वानरेष्ट्यधिकरणम्।

त० वा०—वाक्यानि यावदर्थं स्युर्गुणेभ्यः फलकल्पने।
एकोपक्रमसंहारादेकं चेदं प्रतीयते॥

पुत्रे जाते द्वादशकपालमिति यदेवोपक्रान्तं तदेवाष्टत्वादीनामन्ते 'यद् द्वादशकपालो भवति' इति 'यस्मिन् जात एताम्' इति चोपसंह्रियमाणं पश्यामः। तावति च नाष्टत्वादयः पृथग् भवितुं लभन्ते। तदेकवाक्यता च न स्तुत्या विनोपपद्यते। अर्थान्तरपरतायामानर्थक्यात्। यदि हि कर्तृसम्बन्धीन्येतानि भवेयुः ततस्तस्य कारणानि प्रयोजकानि स्युः। वैश्वानरसम्बन्धीनि त्वेतानि। तस्माद् गुणार्थोऽन्यासंभवादिति स्तुत्यर्थो विधीयते। 'पूत एव स' इत्येवमादीनां च तच्छब्दयुक्तानां, यस्मिन् जात इत्यनेनापेक्षितत्वान्न पूर्वैः सह फलत्वेन सम्बन्धः। न चात्रानुपयोगो, येन बलादाच्छिद्य नीयेरन्। न [2]चाष्टत्वादिब्रह्मवर्च[3]सादीनामे-

१. वैश्वानरप्रयोग इति क्वाचित्कः।
२ क. चाष्टत्वादीनां–पा० पुस्तके। ३ क. ब्रह्मवर्चसादिभिरेभि–पा० पुस्तके।

र्भिर्विभागेन सम्बन्धः । यत्र तु विभागो 'गायत्र्यैवैनम्' इत्यादौ तत्र स्तुतित्वमभ्युपगतमेव । अतो या नाम पूत इत्येवमादीनां फलकल्पना, सा यागमेव प्रति, नाष्टत्वादीन् । प्रथमयोपनिपाते तु यागस्यापि स्तुतिरेव । एवं कामकाररहितत्वेन फलविध्यस्वरूपत्वात् । एतैरेव स्तूयमाने यदष्टाकपाल इत्यादीनामुपपत्त्यर्थता तस्मान्न गुणविधय इति सिद्धम् ॥ २२ ॥

इति द्वादशं वैश्वानरेष्ट्यधिकरणम् ॥ २२ ॥

[१२] तत्सिद्धिजातियसारूप्यप्रशंसाभूमलिङ्गसमवाया इति गुणाश्रयाः ॥ २३ ॥

[१२] तत्सिद्धिः (२२)

शा० भा०—यजमानः प्रस्तरः, यजमान एककपाल इत्यादि समम्नायते । तत्र संदेहः—किं यजमानः प्रस्तर इत्येष गुणविधिः, किमर्थवाद इति । तथा यजमान एककपाल इति । किं तावत्प्राप्तम् ? गुणविधिरिति । किमेवं भविष्यति ? एवमपूर्वमर्थं विधास्यति । इतरथाऽर्थवादोऽनर्थकः स्यात् । अर्थवत्त्वं च न्याय्यम् । तस्माद् विधिः ।

नैतदेवम् । यदि विधिः स्यात्[1] प्रस्तरकार्ये यजमानो नियम्येत, यजमानकार्ये वा प्रस्तरः । 'प्रस्तरे जुहूमासादयति, सर्वा वा स्रुच' इति यजमाने जुहूरासाद्येत, सर्वा वा स्रुच इति । तथा सति न याजमानं शक्यते कर्तुम्, 'दक्षिणतो ब्रह्मयजमानावासाते कर्मणः क्रियमाणस्य' इति । न च प्रस्तरो याजमानं शक्नोति कर्तुम् । यथा यदि यजमान एककपालकार्ये विनियुज्येत, सर्वहुतः क्रियेत । तत्र सर्वतन्त्रपरिलोपः स्यात् । न चैककपालो याजमानं शक्नोति कर्तुम् । तस्मान्न विधिः ।

विध्यन्तरं चास्ति 'प्रस्तमुत्तरं बर्हिषः सादयति, एककपालं सर्वहुतं करोति, इति । तस्मादपि न विधिः । किं तर्हि ? अर्थवादः । यजमानो ज्ञायत एव, प्रस्तर यजमान एकपाल इति च ।

शंका

कथं पुनरनयोः सामानाधिकरण्यं ज्ञायते । न हि प्रस्तर, एककपालो वा यजमानः । न च यजमान एकस्मिन् कपाले संस्कृतः पुरोडाशः, प्रथमो वा कुशमुष्टिर्लुनः । कथं परशब्दः परत्र वर्तते ? किमर्थं वा ज्ञायमानस्य संकीर्तनमिति ।

---

१. ब. ततः प्रस्तरकार्ये ।

तन्निरासः

उच्यते । ज्ञायमानः संकीर्त्यते स्तोतुम् । प्रस्तर उत्तरो बर्हिषः सादयितव्यो, यजमानत्वात् । तथा यजमान एककपालः सर्वहुतः कर्त्तव्यः, स्वर्ग आहवनीयस्तत्र प्रतिष्ठापितो भवति, इति ।

कथं परत्र वर्तते परशब्द इति ? गुणवादस्तु । गुणादेष वादः । कथमगुणवचनो गुणं ब्रूयात् ? स्वार्थाभिधानेनेति ब्रूमः । सर्व एवैते गौणाः शब्दा न स्वार्थं हित्वा गुणेषु वर्तन्ते । प्रसिद्धहानिर्हि तथा स्यात्, अप्रसिद्धकल्पना च । न च सर्वे गुणसमुदायवचनाः, गुणहीनेऽपि दर्शनात् । अप्रसह्यकार्यपि हि कदाचिद्रोगेणोपहतः सिंह्याः पुत्रः सिंह एव । समुदायवाची च नावयवे प्रवर्तितुमर्हति । सर्वसिंहव्यक्तिषु यत्सामान्यं, तद्वचनः शब्द इति स्थितो न्यायः प्रत्युद्ध्रियेत । नचासति सिंहे परिकल्पनया प्रवर्तेत,[1] कल्पनाया अशक्यत्वात् । कथं नु स्वर्थाभिधानेन प्रत्यय[2]व्यवस्थेति चेत् ? अर्थसंबन्धात् । सिंह इति निर्ज्ञायते[3] प्रसह्यकारिता, तत्र प्रायेण प्रसह्यकारीति गम्यते, अर्थप्रत्ययसामर्थ्यात् । यो हि मन्यते प्रसह्यकारिणं प्रत्याययेयमिति, स यदि सिंहशब्दमुच्चारयति, सिध्यत्यस्याभिप्रेतम् । सिंहार्थः प्रतीतः प्रसह्यकारीति संबन्धादितरमर्थं प्रत्याययति । एवं स्वार्थाभिधानेन तद्गुणसबन्धः प्रतीयते ।

इह तु यजमानः प्रस्तरः, यजमान एककपाल इति कीदृशो गुणसंबन्धः प्रतीयते ? तत्सिद्धिकर इति । सर्वो ह्यात्मनः कार्यसिद्धिं करोति । अन्योऽपि यस्तस्य कार्यसिद्धिं करोति, स तस्मिन्नुच्चरिते हृदयमागच्छति । यथा राजा पत्तिगणक इति । पत्तिगणको राज्ञः कार्यं साधयति । स राजशब्द उच्चरिते प्रतीयते । एवमिहापि यजमानकार्यं प्रस्तरैककपालौ साधयतः । तौ यजमाने प्रतीते प्रतीयेते । तस्मात्तौ यजमानशब्देन प्रत्याय्येते कथं स्तुतौ स्यातां बर्हिष उपरिसादने, सर्वहोमे चेति । तस्मादेवंजातीयका अर्थवादाः, न विधय इति । तत्सिद्धय ॥ २३ ॥

भा० वि०—गुणवादनिमित्तस्यार्थवादाधिकरणे वक्तव्यस्याप्यन्यासत्क्रतयोपेक्षितस्येह गुणविध्यर्थवादप्रसङ्गेन निरूपणादत्राधिकरणषट्कसङ्गतिः, विचारप्रयोजनं तु सर्वत्रनिमित्तलाभेन वेदेऽपि गौण्याः वृत्तेर्लाभः, प्रथमाधिकरणविषयमाह—**यजमान इति**। परत्र परशब्दप्रवृत्तिनिमित्तासम्भवसम्भवाभ्यां संशयमाह—**तत्रेति**। विमर्शपूर्वकं पूर्वपक्षमाह—**किं तावदिति**। प्रस्तरशब्देन तत्कार्यं स्रुग्धारणादि लक्षयित्वा, स्वार्थवृत्तिना यजमानशब्देन प्रस्तरकार्ये यजमानगुणो विधीयत इति तात्पर्यम् ।

---

१. ब. ब वर्तते । २. ब. प्रत्यय इति । ३. ब. क. निर्ज्ञाते ।

ननु सामानाधिकरण्येन यजमानशब्दस्य प्रस्तरस्तावकत्वं प्रतीतमपहाय, गुणविधित्वकल्पने किं प्रयोजनमिति पृच्छति—**किमेवमिति**। उत्तरम्—**एवमिति**।

ननु 'प्रस्तरमुत्तरं बर्हिषस्सादयती'ति विध्यन्तरसद्भावात्तच्छेषोऽयमर्थवादः, तत्राह—**इतरथेति**। निमित्तं विना स्तोतुमपि परत्र परशब्दप्रवृत्त्यसम्भवन्निमित्तासम्भवाच्चानर्थकोऽयमर्थवादत्वे स्यादित्यर्थः। इष्टापत्तिमध्ययनविधिविरोधेन निरस्यति—**अर्थवत्त्वं चेति**। तस्मादर्थवत्त्वाय विधिराश्रयणीय इत्याह—**तस्मादिति**। सिद्धान्ती तु पारिशेष्येणार्थवादत्वमुपपादयितुं विधित्वं तावद्दूषयति—**नैतदेवमित्यादिना**। प्रस्तरकार्ये यजमानविधानाभिधानात् सम्भावनामात्रेण द्वितीयः कल्पः। प्रथमं कल्पमनूद्य दूषयति—**प्रस्तरे जुहूमिति**। स्रुचमिति विधिमनुसृत्येति शेषः। किमिति न शक्नोत्यत आह—**दक्षिणत इति**। क्रियमाणस्येति, याजमानस्य देशनियमविधानादिति शेषः। उत्तरं कल्पं दूषयति—**न चेति**। अचेतनत्वादिति भावः। अत्र यजमानो वा प्रस्तरकार्यमिति यदि क्वचित्पाठः तदा दृष्टान्तार्थो व्याख्येयः, एककपालकार्ये यजमानगुणविधावपि दोषमाह—**यदीति**। सर्वहुतमिति 'एककपालं सर्वहुतं जुहोती'ति वचनादिति भावः। सर्वतन्त्रेति कर्माधिकारिणो भावादिति भावः। एककपालस्य तु यजमानकार्यो विनियोगोऽचेतनत्वादेवानाशङ्कनीय इत्याह—**न चेति**। कल्पद्वयनिरासफलमाह—**तस्मादिति**।

ननु विध्येकवाक्यत्वं विनार्थवादत्वासम्भवादानर्थक्यपरिहाराय कथंचिद्विधित्वमेष्टव्यमत आह—**विध्यन्तरं चेति**। प्रस्तरवाक्यस्योपरिसादनविधिशेषता सर्वहोमविधिशेषतेत्यर्थः। विधिशेषत्वफलसम्भवफलमाह—**तस्मादपीति**। पारिशेष्यात् प्रस्तरस्यानुवाद इति प्रश्नपूर्वकमाह—**किमित्यादिना**। प्रसिद्धिमुपपादयति—**यजमान इति**। प्रस्तरैककपालशब्दयोः कार्यलक्षणार्थत्वाभावे कथं सामानाधिकरण्यमिति पृच्छति—**कथं पुनरिति**।

ननूक्तं यजमानो ज्ञायत एव प्रस्तर एककपाल इत्याह—**न हि प्रस्तर इति**। न द्वितीय इत्याह—**न चेति**। ननु गौण्या वृत्त्या सामानाधिकरण्यं भविष्यतीति आशङ्क्य वेदे गौण्यावृत्तेरसम्भवं मनसि कृत्वाह—**कथमिति**। कुतश्चिन्निमित्तात् परशब्दस्य प्रवृत्तिमभ्युपगम्य प्रसिद्धानुवादप्रयोजनं पृच्छति—**किमर्थं चेति**। तत्र प्रयोजनप्रश्नं तावत्परिहरति—**उच्यत इति**। स्तुतिप्रकारमपि दर्शयति—**प्रस्तर इत्यादिना**। यतो यजमान एककपालः, यतश्च स्वर्ग आहवनोयः, ततः एककपालहोमेनाविकलो यजमानः तत्र स्वर्गे प्रतिष्ठापितो भवति इति सर्वहुतः कर्तव्य इत्यर्थः। इदानीमाद्यप्रश्नमुत्थापयति—**कथमिति**। उत्तरं—**गुणवादस्त्विति**। तद्व्याचष्टे—**गुणादिति**। गुणयोगनिमित्ता परशब्दस्य परत्र

प्रवृत्तिरित्यर्थः। यद्यपि गुणादिति पञ्चम्या गुणस्य हेतुत्वमात्रमुक्तम् न वाच्यत्वम्, तथापि लक्ष्यमाणप्रसह्यकारित्वादेरशाब्ददेवदत्तान्वयानुपपत्तेः स्वार्थपरित्यागेन गुणाभिधानं वाच्यम्, तच्चायुक्तम्, वक्त्राभिप्रायानुसारिपौरुषेयवाक्यवद्वेदस्यापि स्वार्थत्यागाभ्युपगमे प्रामाण्यबाधापत्तेरिति मन्वानश्चोदयति—**कथमिति**। गुणस्यावाचकोऽपि स्वार्थमभिधाय तत्सम्बन्धिनं गुणं लक्षयित्वा सम्बन्धिरूपावधीरणेन गुणसामान्यमुपादायार्थान्तरे प्रवर्तिष्यत इति परिहरति—**स्वार्थाभिधानेनेति**। एतद्विवृणोति—**सर्व इति**। कुत इत्यत आह—**प्रसिद्धेति**। एवं स्वार्थहानेन तद्गुणाभिधायित्वं गौणत्वमिति मतं निरस्य समुदायवाचिनस्तदेकदेशवृत्तित्वं गौणत्वम्। न च वेदे तत्सम्भवति समुदायनित्यत्वेन शब्दार्थसम्बन्धानित्यतया वेदाप्रामाण्यापत्तेरिति मतं निरस्यति—**न चेति**। गुणसमुदायः-जातिद्रव्यगुणक्रियाणां समुदायः। कुत इत्यत आह—**गुणहीनेऽपीति**। सर्वक्रियागुणहीने जातिमात्रेऽपि प्रयोगप्रत्ययदर्शनादित्यर्थः, एतद्विवृणोति—**अप्रसह्यकारिण इति**। इतश्च न समुदायवचन इत्याह—**समुदायवाची चेति**। नहि सहस्रशब्दः शते वर्तत इति भावः। समुदायवाचित्वे सामान्यवचनता चाकृत्यधिकरणसिद्धा बोध्येतेत्याह—**सर्वास्विति**[1]। अतो न समुदायवाचिशब्दानामेकदेशवृत्तित्वं गौणत्वमिति भावः।

अन्ये तु सिंहादिसदृशकतिपयगुणक्रियादर्शनेन समस्तपरिकल्पनया ताद्रूप्यमापन्ने देवदत्तादौ स्वार्थ एव सिंहशब्दः प्रवर्तत इति समारोपितार्थवृत्तित्वं गुणवृत्तिलक्षणं तच्च वेदे समारोपकपुरुषाभावान्न सम्भवतीति मन्यन्ते। तन्मतमपाकरोति—**न चेति**। विवेकाग्रहस्याविकल्पनाबीजतया सिंहाद्विवेकेन गृह्यमाणे देवदत्ते सिंहत्वकल्पनाया अशक्यत्वादिति हेतुमाह—**कल्पनाया इति**। तस्मादजहत्स्वार्था गौणी वृत्तिः पूर्वशक्त्यनुसरणसम्भवे शक्त्यन्तरप्रमाणाभावादिति भावः। कथं पूर्वशक्त्यनुसारेणापि परत्र प्रत्यय इति चोदयति—**कथमिति**। अभिधेयसिंहसम्बन्धाल्लक्ष्यमाणप्रसह्यकारित्वादिगुणानां तद्युक्तेऽर्थान्तरे प्रत्यय इति परिहरति—**अर्थसम्बन्धादिति**।

ननु दंष्ट्रित्वादीनामप्यर्थसम्बन्धात्तद्वति प्रत्ययः किमिति न भवेदत आह—**सिंह इति**। सिंहशब्दात् सिंहः इति निश्चये देवदत्तपदसामानाधिकरण्यविरोधे च सति सिंहगुणत्वप्रतीतौ प्रसह्यकारिता तत्र सिंहे प्रायेण दृष्टे सति सिंहार्थप्रत्ययसामर्थ्यात् प्रसह्यकारीति गम्यत इत्यर्थः।

ननु लक्ष्यमाणप्रसह्यकारित्वादेरशाब्दत्वात् कथं देवदत्तेन शाब्देनान्वयस्तत्राह—**यो हीति**। अभिप्रेतं प्रसह्यकारिप्रत्यायनं कथं सिद्ध्यतीत्यत आह—

---

१. सर्वसिद्धेति समस्तः पाठो भाष्ये।

सिद्धार्थं इति। प्रसह्यकारीतीममर्थं सम्बन्धात्प्रत्यायतीति यत इत्यर्थः। **गौण्यां** वृत्तौ लक्ष्यमाणगुणस्य तात्पर्यविषयतया शाब्दत्वेनान्वयोपपत्तिरिति भावः, एवमजहत्स्वार्थत्वं गौण्या वृत्तेरूपपाद्योपसंहरति—**एवमिति।**

ननु तर्हि प्रकृतोदाहरणे कीदृशो गुणसम्बन्धः प्रतीयत इत्याशङ्क्योत्तरत्वेन सूत्रं योजयति—**इह त्विति।** तस्य यजमानस्य सिद्धिः कार्यं तत्करोतीति तत्सिद्धिकरः इतीदृशो गुणसम्बन्ध इत्यर्थः।

ननु यदि यजमानकार्यकरत्वं प्रस्तरादिगुणः, कथं तर्हि यजमानगुणः कथं तरां च तल्लक्षणा, कथंतमां च तद्युक्ते यजमानशब्दस्य वृत्तिरत आह—**सर्वो हीति।** यजमानकार्यं-साङ्गप्रधाननिर्वृत्तिः यो यजमान इति यजमानशब्द उच्चरित इत्यर्थः। किमिति शब्दान्तरेण प्रत्याय्येत इत्याह—**कथमिति।** तत्सिद्धिकरत्वरूपगुणवादनिमित्तप्रतिपादनफलमाह—**तस्मादिति** ॥ २३ ॥

अथ त्रयोदशतात्सिद्ध्यधिकरणम्

त० वा०—**तत्सिद्धिः।** अर्थवादप्रसङ्गात्तदुपकारिगुणवादम् तल्लक्षणं तत्र नोक्तमिदानीमभिधीयते। ननु च तत्रैव 'रूपात्प्रायाद्' 'दूरभूयस्त्वात्' इति निमित्तं कथितम्। सत्यं कथितम्, न तु लक्षणत्वेन। कथं तर्हि, इह सिद्धं तत्रोदाहृतार्थवादलक्ष्यविषयव्यवहारार्थं नीतम्। अत्र तु सर्वगौणवृत्तीनां लक्षणमुच्यते।

शंका केषाञ्चिन्मतेन समाधानम्

ननु च सहचरणस्थानादीन्यन्यान्यप्यक्षपादप्रभृतिभिर्गौणनिमित्तान्युक्तानि। लोके च दृश्यते यष्टीः प्रवेशय, मञ्चाः क्रोशन्ति, अश्वसहस्रेणामुको राजा जित इति। तान्युपसंहर्तव्यानि। लिङ्गसमवायेनैवोपसंहृतानीति केचित्। छत्रिसमवेतेतरप्रत्ययवद्धि यष्टिसहचरितादिप्रत्ययो भवति।

अथ वा गौण्या वृत्तेरिह निमित्तमभिधीयते न, लक्षणायाः। किं चानयोर्भेदोऽप्यस्ति ? बाढमस्ति। कुतः—

अभिधेयाविनाभूते प्रवृत्तिर्लक्षणेष्यते।
लक्ष्यमाणगुणैर्योगाद् वृत्तेरिष्टा तु गौणता ॥

तत्र यथैवाऽऽकृतिवचनः शब्दस्तत्सहचरितां व्यक्तिं लक्षयति, तथैव यष्टिमञ्चाश्वादयस्तत्संबद्धपुरुषलक्षणार्था भवन्ति। अग्निर्माणवक इति तु नाग्नित्वाविनाभावेन माणवकः प्रतीयते।

किं तर्हि—

वह्नित्वलक्षितादर्थाद्यत्पैङ्गल्यादि गम्यते।
तेन माणवके वृद्धिः सादृश्यादुपजायते ॥

सर्वत्र च तत्सिद्धिकरादावियमेव प्रस्तरप्रभृतौ यजमानादिशब्दानां वृत्तिरिति ते उदाहृताः ।

पूर्वपक्षः

अत्रापि च सामानाधिकरण्यादेकतरस्य नामधेयत्वं, निमित्ताभावादनेकशक्तिकल्पनाभयाच्च तदनुपपत्त्या कार्यलक्षणाद्वारं प्रयोजनवत्तरत्वेन गुणविधित्वम्, अशक्तेर्वा तदसंभवादर्थवादत्वमिति त्रय एव पक्षाः। गुणविधिवादी मन्यते। न काचित्प्रस्तरयजमानयोरितरेसमभिव्याहारेण स्तुतिः प्रतीयते। न च स्तोतुमपि परशब्दः परत्र वर्तते। न च प्रवृत्तिनिमित्तमस्ति। न च प्रवृत्तस्य प्रयोजनमन्यत्कार्यलक्षणातः। तस्मात् 'यो होता, सोऽध्वर्युः' इत्यादिवदन्यतर कार्यलक्षणार्थः। तत्रापि 'मुख्यं वा पूर्वचोदनात् १२-२-८' इति यजमानशब्दः स्वार्थवृत्तः प्रस्तरशब्दः स्रुग्धारणादिकार्यलक्षणार्थं इति गुणविधिः।

सिद्धान्तः

अत्रोच्यते—

न तावत्कार्ययोगित्वमेकस्याप्युपपद्यते।
विरोधाद्यजमानस्य प्रस्तरादेरचोदना ॥

एककपालवत् 'सूक्तवाकेन प्रस्तरं प्रहरति' इति यजमाने प्रह्रियमाणे सर्वतन्त्रविलोपप्रसङ्गः। तस्मादेकवाक्यगतोत्तरसादन-सर्वहोमविधिस्तुत्यर्थः संवादः। कथं पुनः परशब्दस्य परत्र सामानाधिकरण्यम्। किमाकारा[1] वा स्तुतिरिति। यजमानो हि सर्वाभ्यर्हितस्तदंशत्वाब्दर्हिष उपरि प्रस्तरः सादयितव्यः। स्वर्गत्वेन संस्तुते चाऽऽहवनीये सकलो यजमान आरोपितो भवत्येककपालेनाखण्डितेनेतिस्तुतिः। गुणाच्च शब्दवृत्तिः। **कथमगुणवचन इति—** वाचकत्वमभ्युपेतं मन्वानस्य प्रश्नः। सिद्धान्तस्तु, अजहत्स्वार्थाः शब्दप्रवृत्तयः पूर्वशक्त्यनुसारसंभवे शक्त्यन्तरकल्पने प्रमाणाभावात्। संभविष्यति चात्र सिंहत्वावगतव्यक्त्युपस्थापितप्रसह्यकारित्वाद्यनेकधर्मप्रत्ययाद्देवदत्तप्रत्यय इति, पूर्वैव शक्तिर्निमित्तमिति, न संशयहेतुत्वेन व्यवहारोच्छेदकारणं प्रसिद्धहानाप्रसिद्धकल्पनामाश्रयणीयम्।

गुणसमुदायवाचीति वदतां मतम्, तन्निरासः

अन्येषां तु दर्शनं सर्व एव हि सिंहादिशब्दा जातिगुणक्रियासमुदायवाचिनः समस्तार्थासंभवे देवदत्तादिषु कतिपयगुणक्रियायोगादुपचर्यन्त इति।

---

१. आकृत्यधिकरण इति शेषः किमर्थं वेति प्रश्नोत्तरभाष्यं विध्यर्थवादचिन्तोपक्रमेण संवादस्य स्तुत्यर्थत्वावसायादयुक्तमिव मत्वा स्तुतिप्रकारप्रश्नविषयतया व्याचष्टे— किमाकारेत्यादिना।

तत्राभिधीयते—

समुदायार्थवाचित्वे नैकदेशे भवेद्गतिः।
शतशब्दान्न पञ्चाशन्मुख्यरूपेण गम्यते॥

भवति तु जातिमात्रे दृष्टे सर्वक्रियागुणप्रत्यस्तमयेऽपि प्रयोगः। प्रत्ययश्च मुख्यात्मनैव न देवदत्तादिष्विव सिंहशब्दादुपचरितः। सामान्यवाचिता चाऽऽकृत्यधिकरणसिद्धा बाध्यते। क्रियागुणानां चाऽऽनन्त्यान्न शक्यः प्रतिव्यक्तिसंबन्धोऽनुभवितुम्।

एकस्यामेव च व्यक्तौ बाल्यादिषु गुणक्रियाः।
अन्याश्चान्याश्च शक्यन्ते नाभिधातुमसंगतेः॥

न चासामान्यात् सामान्यं शक्यते कल्पयितुं, जात्यन्तरेऽपि क्वचित्कासांचित्सद्भावात्।

तत्र सिंहत्वमेवाऽऽसां व्यवच्छेदकरं भवेत्।
तच्चानभिहितं नैवमुक्तं चेन्नान्यवाचिता॥

न ह्यनभिहितं सिंहत्वं गुणक्रियाणां व्यवच्छेदकरं भवति, अप्रतीतेः। अभिहितं चेत्तु प्रत्यादेवाशेषगुणक्रियावगमादभिधानशक्त्यनवसाय इति, समुदायवाचिनामेकदेशेषु न गौणत्वसंभवः।

कस्यचिन्मतस्योपन्यासः

कश्चित्पुनराह—समारोपिततद्भावो गौण इति। तस्यैतन्मतम्। न कथंचन परशब्दस्तया जात्या स्वनिबन्धनभूतया विनाऽत्यन्तानभिधेयक्रियागुणमात्रद्वारेणान्यत्र वर्तितुमर्हति। न च सिंहशब्देनाप्रवर्तमानेन सिंहो देवदत्त इति सामानाधिकरण्यप्रयोगो घटते कथं तर्हि?

अर्थेष्वर्थान्तरात्मानमध्यारोप्योपपादितम्।
वाच्यमासाद्य शब्दानां स्वयमेव प्रवर्तनम्॥

सिंहादिसदृशक्रियागुणदर्शनेन हि देवदत्तादयः सामस्त्यपरिकल्पनया सारूप्यमापद्यन्ते। ततश्च स्वार्थ एव शब्दः प्रयुज्यते। न चैतावता मुख्यप्रसङ्गोऽर्थस्य, अध्यारोपितत्वात्। यत्र तु स एवार्थो न समारोप्यते, तत्र मुख्य इत्यदोषः।

तस्य निरासः

तत्रेदमुच्यते। नैतत्, कल्पनाया अशक्यत्वात्।

तथा हि—

असंकीर्णस्वभावं सद्वस्तुवस्त्वन्तरात्मना।
आरोप्यतेऽभिधानर्थं कथं न भ्रान्तिवर्जितैः॥

यद्वा तावद् भ्रान्त्या मृगतृष्णायां तोयमध्यारोप्य शब्दं प्रयुङ्क्ते, तदोभयोर्मुख्यार्थाध्यवसानरूपेण तोयप्रतीतेर्भ्रान्तिमुख्यत्वम्। अथापि वक्ता विवेकी सन्नितरवचनार्थं प्रयुङ्क्ते, श्रोता च न विविङ्क्ते, तदाऽप्येकस्य विवेकेनाऽध्यारोपाभावादितरस्याध्यवासानान्नैकमपि[1] प्रति गौणत्वोपपत्तिः। यदा तु द्वावप्यभ्रान्तौ, तदोभयोः सादृश्यादिनिमित्तान्तर्णीतवत्यर्थाध्यवसानादारोपाभावः।

तथा हि—

द्वावपि प्रतिपद्येते सिंहपुंसोर्विविक्तताम्।
नाध्यारोपयितुं शक्तिस्तेनैकस्यापि विद्यते॥

यथैव ह्यसदृशानामर्थानां तिक्तिमधुरादीनां न कथंचिदपि प्रतीत्यभावात्परस्पराध्यारोपणम्, एवं सदृशानापि विवेकज्ञानं नोपपद्यते। न ह्यर्थाध्यवसानादन्यादृशं नाम ज्ञानं व्यवहाराङ्गं भवतीति।

किं च—

शब्द एव यदा यदा तावदनिमित्तो न वर्तते।
बुद्धिदुर्ललिता तत्र भवेत्त्रिविषया कथम्॥

न चार्थरहिता बुद्धिरात्माकारमात्रमनुभवन्ति जायत इत्युक्तं शून्यवादे।

अपि च—

पूर्वानुभूत एवार्थः स्मर्यते प्रथमं पदात्।
तेन मुख्ये प्रतीतेऽर्थे क्वाध्यारोपो भविष्यति॥

सर्वथा तावदयं गौणमुख्यविभागः श्रोतॄणामर्थविशेषावधारणे व्याप्रियते। ते च पदवेलायामनध्यारोपितस्वार्थवृत्त्येव सिंहादिपदमध्यवसाय देवदत्तादिपदसमानाधिकरण्यान्यथानुपपत्त्या गौणतां कल्पयन्ति। तत्र चैषां स्वयमनारोप्यैव सिंहत्वं तत्सादृश्यादिप्रतीतिर्भवति। सा च किं शब्दात्, अथार्थादित्यन्विच्छतामन्वयव्यतिरेकाभ्यामाकृत्यधिकरणन्यायेनार्थादिति निश्चयो जायते। कथम्?

सिंहशब्दे ह्यनुक्तेऽपि सिंहार्थात्सदृशे मतिः।
जायते न त्वबुद्धेऽर्थे सिंहशब्दे श्रुतेऽपि नः॥

यदा च श्रोतॄणां स्वयमध्यारोपाभावः तदा वक्तर्यपि नैवैषामेवं कल्पना भवति, यथा नूनमनेन सिंहत्वमध्यारोपितमिति। कथं तर्हि सिंहत्वाविनाभूतानेकक्रियागुणसमुदायोऽनेन विवक्षितः, यत्नगौरवभयान्न स्वैरभिधानैर्ब्रवीति। न चास्य समस्तस्य किंचिदकं वाचकं पदमस्ति, तेनाविनाभावितया कथं नु सिंहत्वात्तत्प्रतीतिर्भवेदिति तत्तावदभिधीयते। यतः स्थितया शब्दशक्त्या पुंसां व्यवहारः, तद्वशेन शक्त्यन्तरोपजन इति।

---

१. अन्त्याध्वसायादिति मु० पु० पा०।

किञ्च—

यद्यध्यासेन वक्तृणां गौणी वृत्तिः प्रकल्पते ।
वेदे सा न कथंचित्स्यादध्यारोपयितुर्विना ॥

तस्माद्[1] गुणप्रवृत्तिप्रयोजनो गौण इत्येव लक्षणं न्याय्यं, नान्यथा ।

नन्वेवं सति खपुष्पादीनां स्वर्थाविनाभूतगुणाभावाद्गौणप्रयोगाभावप्रसङ्गः, सांख्यादिकल्पितप्रधानादिनिषेधे च बौद्धादेर्विनाऽध्यारोपेण प्रयोगासंभवः, अनभ्युपगते हि प्रतिषेधानर्थक्यम्, अभ्युपगते तद्विरोधः स्यादध्यारोपितनिषेधे त्वदोष इति ।

अत्राभिधीयते । तवैवायं दोषः ।

कुतः—

अध्यस्यते खपुष्पत्वमसत्कथमवस्तुनि ।
प्रज्ञातगुणत्ताकमध्यारोप्येत वा न वा ॥

यत्तावत्खपुष्पस्थानीय आत्मा, खपुष्पं भवत्सिद्धान्त इत्यादिप्रयोगः । तत्र कतरखपुष्पमन्यत् ? त्वया सिद्धत्ववदवधारितं, यदध्यारोप्येत । तेन खपुष्पस्वरूपमेव तावदध्यारोपात्मकमभ्युपगन्तव्यं न चैतस्य लोके गौणत्वप्रतीतिः मुख्यार्थान्तराभावात् । प्रथमप्रतीतत्वाद्धि खपुष्पादिस्वरूपं न मुख्यत्वादपैति । कथमसतो मुख्यत्वमिति चेत् ? तुल्यमिदं गौणत्वेऽपि । यत्र त्वध्यारोप्यते स गौणः, न योऽध्यारोप्यते, खपुष्पं वाऽऽरोप्यमाणं विषयान्तराभावात्स्वयमेवाध्यारोप्यते वा । तत्रैतत्स्यात् विद्यमानघटादिरूपं तत्राध्यारोप्यत, न गौणत्वमिति । तदयुक्तम्, खपुष्पादौ सद्रूपप्रत्ययानुत्पादात् । अवश्यं यादृक्संबन्धकालेऽर्थोनुभूतः, तादृगुत्तरकालं ग्रहीतव्यम् । न च शशविषाणाद्यर्थः सद्रूपेणानुभूतपूर्वः, न चार्थान्तरसद्रूग्रहणेन खपुष्पादेः संबन्धो गृह्यते, ययोस्तदवयवयोरर्थसंबन्धोऽनुभूतः, तयोनैव गौणत्वं, मुख्यात्मनाऽवबोधात् ।

कथं तर्हि शशविषाणं नास्तीत्युच्यते ? यदि तत्सद्रूपेण न प्रतीतपूर्वम्, सद्रूपप्रतीतस्य वा कथमत्यन्तप्रतिषेधोपपत्तिः ।

---

१. परपरिकल्पितानां गौणीवृत्तिलक्षणानां वेदाप्रामाण्याप्रतिपादकत्वेऽपि नास्मदभिमतस्येति निष्कृष्टं लक्षणमाह—तस्मादित्यादिना । तस्मात्—गुणयोगनिमित्तायाः शब्दप्रवृत्तेर्गौणत्वेनेष्टत्वात् । गुणानां स्वशक्यसिंहाहिवृत्तिधर्माणां, देवदत्तादिरूपार्थान्तरे, प्रवृत्तिः—योगः, प्रयोजनं–शब्दप्रवृत्तौ निमित्तं यस्य शब्दस्य स गौण इत्यर्थः । तत्त्वं तु स्वसमानजातीयधर्मवत्त्वाध्यारोपितत्वान्यतरसंबन्धेन स्वशक्यवृत्तिधर्मवत्त्वं गौणीलक्षणं विज्ञेयम् ।

पश्य—

अन्यत्र ज्ञातसद्भावः पादर्थोऽन्यत्र वार्यते।
न त्वेकत्रैव सद्रूपमसद्रूपं च गम्यते॥

तेनैवाध्यारोप्यत इति चेत्? नाध्यारोप्यस्याप्येवमेव प्रदेशान्तरसद्भावाधीनत्वात्। न चान्यसद्भावेनान्यस्याध्यारोपः सिध्यति, असंबन्धात्। कथभूषरसद्भावेन तोयरूपाध्यारोप इति चेत्? प्रदेशान्तरे तोयसद्भावप्रतीतेर्वैषम्यम्।

केषाञ्चिन्मतेन समाधानम्

कथं तर्हि शशविषाणं नास्तीति प्रयोगः? पूर्वेणैवाभावेऽवगते नास्तिशब्दोऽनुवादक इति केचित्।

अथ वा सामान्येन प्रागभादिषु नास्तिशब्दः प्रवर्तमानः शशविषाणशब्देन विशेष्यते, न शशविषाणमव्यभिचारात्तेनेत्यदोषः।

अथ वा येनावयवार्थौ गृहीतौ, समासाच्च राजपुरुषादिवत्सामान्यतोदृष्टेन षष्ठ्यर्थस्मृतिः प्रसक्ता, न च कदाचिच्छशः श्रृङ्गरहितत्वेनावधारितपूर्वस्तस्यैतत्संसर्गानुसंधानं वार्यते।

अथ वा विनैव समासेन शशमधिकरणत्वेन निर्दिश्य विषाणं च गवादिगतं विनैवाध्यारोपेणानयोः संबन्धो नास्तीति, कथिते तेनैवानुभूतसंबन्धस्य शशविषाणशब्दस्तमेवाभावं गमयिष्यति।

अथ वा शशमूर्धवर्तिनां पृथिव्यवयवानामुपर्युपरि चीयमानानां दृढदीर्घसंनिवेशरूपेण परिणतानां नीचैर्वृत्ताकारेण यदवस्थानं, सोऽस्य वाक्यस्याध्यासमन्तरेणोक्तविषयः संभवतीत्यविरोधः।

तथाचाह—

यां निषेधाः क्रियामाहुर्न यातीत्येवमादयः।
तिष्ठतीत्यादिभिः सैव वस्तुरूपा प्रतीयते॥

तेन लब्धमुख्यार्थानां शशविषाणादीनामन्यत्रापि प्रसिद्ध्यन्यथास्थायिन्यर्थे[1] सिद्धो गौणप्रयोगः। तव तु मुख्याभावात् दूरीभूतो गौणः। यदि स्वार्थ एव गौणता, ततोऽर्थान्तरेणैव वृत्तेरत्यन्ताभावः स्यात्। न ह्यग्निशब्दो माणवके गौणीभूतस्तदद्वारेण पुनरन्यत्र गौणतां प्रतिपद्यते। तथा च वक्ष्यति 'न प्रतिनिधौ समत्वात्' (६-३-१४) इति। येऽपि प्रधानत्वादीनां प्रतिषेधाः तेऽपि नाध्यारोपनिमित्ताः।

---

१. सद्रूपत्वेन या प्रसिद्धिस्ततोऽन्येन प्रकारेण—असद्रूपत्वेनावस्थानं यस्येत्यर्थः।

किं तर्हि—

परमाणुशरीरादिकारणात्मादिवादिभिः ।
ततोऽन्यादृक् प्रधानात्मरूपं नास्तीति वर्ण्यते ॥

प्रधानादिशब्दा जगत्कारणादिविषयाः तत्रैव बौद्धादिभिः परमाण्वाद्यात्मककारणाभ्युपगमात् । शरीरसंतानाद्यात्मककल्पनाच्च तद्व्यतिरिक्तकारणादिनिषेधः क्रियते, परमाणुशरीरादिष्वेव प्रधानात्मादिशब्दवृत्तिरिति यावत् । तस्मात्स्वार्थाभिधानेनैव गौणत्वमित्यदुष्टम् । अतश्च यजमानः प्रतीतः स्वार्थसिद्धिकरत्वं लक्ष्यति । प्रस्तरैककपालावपि च पारम्पर्येण यजमानार्थसिद्धिं कुरुत इति, कार्यापत्तेस्तच्छब्देन स्तूयेते । एतेन जातिसारूप्यादीनि व्याख्यातानि ॥ २३ ॥

जातिः ॥ २४ ॥

शा० भा०—आग्नेयो[1] वै ब्राह्मणः, ऐन्द्रो राजन्यः वैश्यो, वैश्वदेव इत्येवमादयः श्रूयन्ते । तत्र किं गुणविधयः, अर्थवादा इति संदेहः । गुणविधय इति ब्रूमः । एवमपूर्वमर्थं विधास्यन्ति, इतरथाऽर्थवादाः सन्तोऽनर्थकाः स्युः । न विधिः, विध्यन्तरस्य भावात् । तस्मात् संवादः । तस्य संकीर्तनं विधिस्तुत्यर्थम् । अनाग्नेयादिष्वाग्नेयादिशब्दाः केन प्रकारेण ? गुणवादेन । को गुणवादः ? अग्निसंबन्धः । कथम् ? एकजातीयकत्वात् । किमेकजातीयकत्वम् ? प्राजपतिरकामयत प्रजाः सृजेयमिति[2] । स मुखतस्त्रिवृतं निरमिमीत, तमग्निर्देवताऽन्वसृज्यत, गायत्री च्छन्द, रथंतरं साम, ब्राह्मणो मनुष्याणाम् । अजः पशूनाम् । तस्मात्ते मुख्याः, मुखतो ह्यसृज्यन्त । 'उरसो बाहुभ्यां पञ्चदशं निरमिमीत, तमिन्द्रो देवताऽन्वयसृज्यत, त्रिष्टुप् छन्दः, बृहत् साम, राजन्यो मनुष्याणाम्' आविः पशूनाम्, तस्मात्ते वीर्यावन्तः, वीर्याद्धि असृज्यन्त । ऊरुभ्यां मध्यतः सप्तदशं निरमिमीत, तं विश्वे देवा देवता अन्वसृज्यन्त, जगती च्छन्दः, वैरूपं साम, वैश्यो मनुष्याणाम्, गावः पशूनाम्, एवमुक्ते सत्येकस्मिन्नेवंजातीयके विज्ञाते, अन्योऽपि तज्जातीयको हृदयमागच्छति । तस्मादर्थवादाः[3] ॥ २४ ॥

भा० वि०—विषयसंशयौ दर्शयति—**आग्नेय इत्यादिना** । अर्थवाद इति संशय इति शेषः । संशयकारणं तु पूर्ववदत्रापि लक्षितब्राह्मणकार्येऽन्यादिगुणविधानमिति पूर्वपक्षमाह—**गुणविधय इति** । तद्धितस्तु स्वार्थ इति पूर्वपक्षो मन्यते—**इतरथेति** । विध्यन्तशेषत्वेनार्थवादत्वे निमित्ताभावेन गुणवादानुपपत्तेरानर्थक्यमिति भावः ।

---

१. तै० सं० (२-६-३) । २. ब. विध्यंतरभावात् ।
३ ब. तस्मादर्थवादः । क. तस्मादर्थवादशब्दाः ।

सिद्धान्तमाह—**न विधिरिति**। अचेतनस्याग्न्यादेः ब्राह्मणकार्यकरणासामर्थ्यादिति भावः। आग्नेयमष्टाकपालं निर्वपेत् ब्राह्मणो ब्रह्मवर्चसकाम इत्येतद्विधिशेषत्वाच्च न विधित्वमित्याह—**विध्यन्तरेति**। विधित्वा भावफलमाह—**तस्मादिति**। यत्पुनरर्थवादोऽनर्थक इति, तद्यथाश्रुतमादाय। परिहरति—**सङ्कीर्तनमिति**। यच्छेषोऽयमर्थवादः, तत्स्तुत्यर्थमित्यर्थः। परस्याभिप्रायमाविष्करोति—**अनाग्नेयादिष्विति**। नहि देवतातद्धितस्य ब्राह्मणे मुख्यत्वमिति भावः। सिद्धान्त्याह—**गुणेति**। गुणाद्वादः—गुणवादः—**तेनेति**। गुणस्वरूपं पृच्छति—**क इति**। विद्यत इति वादः। गुणश्चासौ वादश्चेति गुणवादः। को गुण इत्यर्थः। उत्तरम्—**अग्न्यादिसम्बन्ध इति**। योऽयमाग्नेयादिशब्दवाच्यस्य हविषोऽग्यादिसम्बन्ध इति पृच्छति—**कथमिति**। उत्तरत्वेन सूत्रं व्याचष्टे—**एकजातीयत्वादिति**। स्वार्थेअण्प्रत्ययः एकजातिकत्वादित्यर्थः। अनेन च जायतेऽस्मादिति जातिः जन्मप्रकृतिः। पूर्वसूत्रात्तच्छब्दानुषङ्गेण तस्य मुख्यस्याग्न्यादेर्याजातिः प्रकृतिः, सा यस्य ब्राह्मणादेः स तज्जातिरिति बहुव्रीहिणा तज्जातिशब्देन द्वयोरेकजातीयतोक्तेति सूत्रं व्याख्यातम्।

ननु संसारस्यानादित्वात् कथं ब्राह्मणादेः प्रजापतिमुखादिप्रकृतित्वमिति पृच्छति—**कथमिति**। अवास्तवस्यापि तस्यार्थवादान्तरोक्तस्य प्रवृत्तिनिमित्तत्वमात्रं संभवतीतिभन्वानः परिहरति—**प्रजापतिरित्यादिना**। भवत्वेवमेकजातीयत्वं अग्न्यादेर्ब्राह्मणादेश्च सम्बन्धः। ततः किमित्यत आह—**एकस्मिन्निति**। ब्राह्मणादावेकजातीयत्वं ब्राह्मणादावाग्नेयादिशब्दप्रवृत्तिनिमित्तं भविष्यतित्यर्थः। निमित्तसंभवफलमाह—**तस्मादिति**॥ २४॥ (२२)

दुरुक्तत्वमभिधातुं भाष्योक्तोदाहरणदूषणम्

त० वा०—**जातिः**। तत्राऽऽग्नेयादिशब्दानां ब्राह्मणादीषु मुख्यत्वमेव, येन केनचित्संबन्धेन तद्धितोत्पादात्। देवतासंबन्ध एव वाऽस्ति न हि यदेव त्यज्यते, तस्यैव केवलं देवतासंबन्धः। त्यक्तुरपि तेनैव संबन्धेन, सैव देवता भवति। यथा च वक्ष्यति 'भवति पुरुषस्यापि यष्टुः सा देवता' इति। तस्मादनुदाहरणत्वम्।

वार्त्तिकमतेनोदाहरणम्

अतो यत्राग्निर्वै ब्राह्मण इत्यादिप्रयोगाः, तदुदाहर्तव्यम्। आग्निर्हि प्रतीतो मुखप्रभवत्वसामान्येन ब्राह्मणादीनुपस्थापयति। जातिरिति चात्र जन्मोपादानं विवक्षितम्। यद्यपि च तथा वस्तु नास्ति, तथाऽप्यर्थवादान्तरे तथोक्तत्वादिहं तच्छब्दनिमित्तता प्रतिपत्स्यते॥ २४॥ (२२)

सारूप्यम्[1] ॥ २५ ॥

शा० भा०—यजमानो यूपः, आदित्यो यूप इत्यादि श्रूयते। तत्र गुणविधि, अर्थवादः इति संदेहः[2]। अर्थवत्त्वाद् गुणविधिः। अशक्यत्वाद् यूपकार्यसाधने यजमानस्य, यजमानकार्यसाधने वा यूपस्य। विध्यन्तरभावाच्च न विधिः। विधिस्तुत्यर्थं संवादः। गुणवादात् सामानाधिकरण्यम्। को गुणः? किं सारूप्यम्? ऊर्ध्वता, तेजस्विता च। तस्मादेवंजातायका अर्थवादाः ॥ २५ ॥

भा० वि०—तत्सिद्ध्याद्यनुमितसारूप्यस्यानिमित्तत्वेऽप्यस्य चाक्षुषत्वात् स्वयमेव निमित्तत्वं सूचयितुं पञ्चमीप्रयोगः[3]। पूर्ववद्विषयसंशयपूर्वपक्षामाह—**यजमान इत्यादिना**। **विधिरिति**। लक्षितयूपकार्ये यजमानादिगुणविधिरित्यर्थः।

सिद्धान्तमाह—**अशक्यत्वादित्यादिना**। पशुधारणादियूपकार्यसाधने निखननस्याप्यावश्यकत्वाद्दक्षिणतः स्थित्वा स्वकार्यकरणाशक्तेरित्यर्थः। यूपस्य त्वचेतनत्वादेव यजमानकार्यसाधनाशक्तिः यूपस्वरूपविधिशेषत्वाच्च न विधिरित्याह—**विध्यन्तरेति**। किं सारूप्यमित्यन्तमुक्तार्थम्। ऊर्ध्वता तेजस्विता चेति। ऊर्ध्वता यजमानेन तेजस्विता च अञ्जननिमित्ता, आदित्येन यूपस्य सारूप्यमित्यर्थः। सारूप्यफलमाह—**तस्मादिति** ॥ २५ ॥ (२२)

त० वा०—**सारूप्यम्**। ननु सर्वत्रैव सारूप्यनिमित्तं गौणत्वम्? सत्यमेवम्। इह तु चक्षुर्ग्राह्यशब्दविवक्षया पृथगुपादानम्। चाक्षुषं हि यूपस्योर्ध्वत्वम्, अञ्जननिमित्तं च तेजस्वित्वम्। तद्द्वारेण यजमानादित्यशब्दाभ्यां स्तूयते। यजमानस्य हि पशुधारणे विनियुक्तस्य निखातस्य च स्वपदार्थकरणविरोधः। सहस्ररश्मेस्त्वशक्यमेव यूपकार्यमाधातुम्। यदि च कश्चिन्नास्तिक्याद्ग्राहप्रतिकृतिमुपादद्यात्तस्यापि गौणतापत्तिर्विधिविषया स्यात्, तद्वरं स्तुतावेव तदाश्रयणमित्यविधित्वं स्यात् ॥ २५ ॥ (२२)

प्रशंसा ॥ २६ ॥

शा० भा०—अपशवो? वा अन्ये गोऽश्वेभ्यः, पशवो गोअश्वाः। अयज्ञो वा एष योऽसामा, 'असत्रं वा एतद् यदच्छन्दोमम्? इति श्रूयते। तत्र विध्यर्थ वादसंदेहे, अर्थवत्त्वाद्विधय इति प्राप्ते।

अभिधीयते। यदि विधयो भवेयुः, गोअश्वा एव पशवः स्युः, सामवानेव यज्ञः। छन्दोमवदेव सत्रम्। अन्येषां पशूनां, यज्ञानां, सत्राणां चोत्पत्तिरनर्थिका

---

१ ब. क. सारूप्यात्।

२ ब. इति सन्देहे अर्थवत्त्वाद्विधिः।

३. व्याख्याकारस्सारूप्यादिति पञ्चमम्यन्त पाठमंगीकृत्य व्याचष्टे इति बोध्यम्।

स्यात् । विध्यन्तरं च नावकल्पेत । अतः स्तुत्यर्थं संवादः । गोऽश्वान् प्रशंसितुमन्येषां पशूनां निन्दा । सामवतः प्रशंसितुमसाम्नां निन्दा । छन्दोमवन्ति प्रशंसितुमच्छन्दोमकानि निन्द्यन्ते । यथा, यद्घृतम् अभोजनं तत् । यन्मलिनम् अवासस्तदिति ॥ २६ ॥

भा० वि०—विधय इति निषेधविधयः । पशुशब्दलक्षितं कार्यमजादिषु नञा प्रतिषिध्यत इत्यर्थः । यदा प्रतिषेधविधयस्तदा किं पशुत्वमेवाजादिषु प्रतिषिध्यते, वैधं वालम्भनादिकार्यम् नाद्य इत्याह— **यदि विधय इति** । उत्पत्तिः प्राथम्यगुणयोगात् यज्ञादिविषयं प्रत्यक्षं साऽनर्थिका निर्विषया स्यादित्यर्थः । न द्वितीय इत्याह—**विध्यन्तरं चेति** । अजोऽनीषोमीय इत्यादि विध्यन्तरम् ।

ननु कस्य विधेयस्य स्तुतिरत आह—**गो अश्वानिति** । पुरस्तात्प्रतीचीनमश्वस्योपदधाति पश्चात्प्राचीनमृषभस्येति गवाश्वविध्यपेक्षितगवाश्वप्राशस्त्यार्थमितरेषां पशूनां निन्दा प्रशस्तत्वाभावोऽपशुशब्देन प्रतिपाद्यते । यद्यपि प्रशंसितुमिति प्रशंसाप्रयोजनमुक्तम्, तथापही प्रवृत्तिनिमित्तमपि सैवापशव इति नञ्समासे पशुशब्देन प्रथमं गवाश्वगतं प्राशस्त्यमुपादाय पश्चान्नञा पश्वन्तरेषु तदभावप्रतिपादनात् ततश्च गवाश्वगतं प्राशस्त्यं निमित्तीकृत्य पदादिषु पश्वन्तरेषु तदभावसाम्यात् पश्वन्तरेष्वपशुशब्द इति भावः । एवमुदाहरणान्तरयोरपि प्राशस्त्यनिषेधे दृष्टान्तमाह—**यथेति** ॥ २६ ॥ (२२)

त० वा०—**प्रशंसा** । ननु सर्वत्र प्रशंसानिमित्तत्वं गुणवादस्योक्तम् । सत्यम्, फलमन्यत्र गुणवादस्य प्रशंसा । अत्र तु गुणः सारूप्यादिवत्प्रवृत्तिनिमित्तम् । कथमिति चेत् ?

गवाश्वादिगतां पूर्वमुपादाय प्रशस्तताम् ।
तदभावोऽन्यपश्वादौ नञ्समासेन कथ्यते ॥

न तावन्महिषादीनां पशुत्वस्वरूपाभावः शक्यते वक्तुम्, प्रत्यक्षविरोधात् । कार्यप्रतिषेधः कल्प्येत, तदपि तत्र तत्र वचनविहितत्वान्न शक्यमेव ।

न च विकल्पः, वैषम्यात् । कल्प्यो ह्यत्र विधिः, इतरत्र क्लृप्तः । स्तुत्या वाऽर्थवत्त्वान्नागत्या तदाश्रयणम् । तुल्यश्च मुख्यार्थत्यागः । 'पशवो गो अश्वा' इति च पुनरुपादानमनर्थकम् । न च पशुत्वैकार्थसमवायिनः क्रियागुणा शक्याः प्रविवेक्तुम् । अथ गवाश्वसमवायिनो विशेषाः प्रतिषिध्येरन् । एवमपि मन्दं फलम् । अन्यशब्देनैव च तावानर्थः सिद्ध इत्यनर्थकम् । अवश्यं चोत्तरपदेन प्रतिषेध्येऽर्थे प्रथमनुपात्तेन तत्रानुवर्तितव्यम्, विषयरहितप्रतिषेधासंभवात् । न च प्रशस्तत्वादन्यदुपादीयमानमुपयुज्यते । शक्नुवन्ति च गवाश्वादिसम्बन्धात्तद्गतं प्राशस्त्यं

गमयितुम् । यद्यप्यप्रशस्तत्वमपि शक्नुवन्ति, तथाऽपि प्रक्रमापेक्षया तदिहानाकाङ्क्षितमिति प्राशस्त्यमेव निषिध्यते । तत्प्रतिषेधमात्रमपि च नैवोपयिकमिति तद्द्वारेणान्येषां प्राशस्त्यतरत्वं कथ्यते ।

एतदुक्तं भवति—गवाश्वादीनपेक्ष्य नैवान्यस्य प्राशस्त्यं विद्यते इत्येवमन्यगतप्रशंसानिमित्तः प्रतिषेधः । सा चेह प्रथमतरमाश्रितेत्यनन्यप्रयोजनतया पश्चादवगम्यते । अन्यत्र पुनरुत्तरकालमेवैषा भवन्ती निमित्तत्वेनोच्यते ॥२६॥ (२२)

भूमा ॥ २७ ॥

शा० भा०—सृष्टीरुपदधाति (तै० सं० ५-३-८) इति श्रूयते । तत्र गुणविधिरर्थवाद इति संदेहे, अपूर्वत्वाद् विधिरिति प्राप्ते ।

उच्यते । यदि विधिः, सृष्टिमन्त्रका उपदधातीष्टका इत्यर्थः । तत्र नेष्टकानां विशेषः कश्चिदाश्रीयते, एवंरूपाः सृष्टिमन्त्रका, नैवंरूपा इति । तत्र सर्वासां सृष्टिलिङ्गा मन्त्राः प्राप्नुयुः । अन्येषामसंयुक्तानां मन्त्राणामानर्थक्यं स्यात् । तस्मादनुवादो मन्त्रसमाम्नानात्प्राप्तानामुपधाने मन्त्राणाम् । सृष्टीनां सृष्टीषु संकीर्तनं सर्जनार्थवादार्थम् । अपि च विधित्वे लक्षणा, नानुवादपक्षे लक्षणायां दोषः । कथं त्वसृष्टिषु, सृष्टिषु च सृष्टिशब्द इति ? भूम्ना । बहवस्तत्र सृष्टिलिङ्गा मन्त्रा, अल्पशो विलिङ्गा इति ॥ २७ ॥

भा० वि०—विधिरिति उपदधातीति यत् तत्सृष्टिरिति सृष्टिलिङ्गकोमन्त्रा उपधानार्थत्वेन विधीयन्त इत्यर्थः । सिद्धान्ती मन्त्रविधिं परिशेषयितुं विधिस्वरूपं निरूपयति—**यदिति** । तद्वानासामुपधानो मन्त्र इतीष्टकासु लुक् च मतोरितीष्टकास्वभिधेयासु सृष्टिप्रतिपादकान्मतुप् प्रत्ययस्य लुकश्च विधानादित्यर्थः ततः किमत आह—**तत्रेति** । विशेषः क्वचिदिति । जातिरूपो साधारणधर्मरूपो वेत्यर्थः ।

नन्वेवमुपधानानुवादेनेष्टकाविधेस्तद्विशिष्टोपधानविधेर्वाऽसंभवेनाप्युपधानानुवादेन सृष्टिलिङ्गमन्त्रविधिर्भविष्यतीत्याशङ्क्य लिङ्गप्रकरणप्राप्तत्वान्न तद्विधिरित्यभिप्रेत्याह—**तत्रेति** । अस्तु तर्ह्यतल्लिङ्गमन्त्रपरिसङ्ख्यार्थस्सर्वत्र तल्लिङ्गमन्त्रविधिरत आह—**अन्येषामिति** । तच्च लिङ्गप्रकरणविनियोज्यत्वाविशेषादयुक्तमितिभावः । किमर्थन्तर्हि सृष्टिशब्दस्तत्राह—**तस्मादिति** ।

ननु प्रकरणपाठादेव सर्वमन्त्रेषु प्राप्तेष्वेकदेशानुवादः किमर्थ इति तत्राह—**मन्त्रेति** । मन्त्राणामितिनिर्धारणे षष्ठी । सर्जनार्थवादः—यथा सृष्टमेवावरुन्ध इति । इतश्चानुवादः इत्याह—**अपि चेति** । कथं लक्षणा स्यादत आह—**एकयेति** । एकयाऽस्तुवतेत्यनुवाके यास्सृष्टयः प्राप्तास्तन्मात्रपर्यवसानमकृत्वा ताभिः सृष्ट्य-

सृष्टिसमुदायं लक्षयित्वा पश्चादितराभिस्सहितास्ता लक्षयेत्। तात्पर्यतः प्रतिपादयेत्। इतरथात्वसृष्टिलिङ्गकमन्त्राणामानर्थक्यमेवेत्याशयः। सिद्धान्तेऽपि तुल्यैषा लक्षणा अन्यथोक्तदोषापत्तेरिति चोदयति—**नन्विति**। अनुवादस्य पुरोवादाधीनत्वात् तदनुसारिणी लक्षणा न दोषायेति परिहरति—**नेति**।

ननु गुणवृत्तिनिमित्तमिह कथनीयम् अतः सृष्टिशब्दस्यासृष्टिषु प्रवृत्तावपि गुणो वक्तव्य इति चोदयति—**कथं त्विति**। सूत्रेणोत्तरमाह—**भूम्नेति**। तद्व्याचष्टे—**बहव इति**। सृष्टिसमुदाये सृष्टिभूमास्तिसृष्ट्वसृष्टिसमुदायेऽप्यसृष्टीनामल्पत्वात् सृष्टिभूमास्तीति भूमगुणयोगात् सृष्ट्यसृष्टिसमुदाये प्रवृत्तः समुदायादिषु तात्पर्येण वर्तत इति भावः ॥ २७ ॥ (२२)

त० वा०—**भूमा**। यदि 'सृष्टीरुपदधाति' इत्याख्यातप्रत्ययबलाद्विधिराश्रीयते, तत्र न जात्या धर्मविशेषेण वा काश्चिदिष्टकाः सृष्टयो नामान्याभ्यो विलक्षणा विज्ञायन्ते, या एवंविधलिङ्गैर्मन्त्रैरुपधीयन्ते। ता एव सृष्टयः, तत्रोपधानमात्रमुद्दिश्यमन्त्रेषु विधीयमानेषु सकलव्याप्तेः प्रत्यक्षवचनाविनियुक्तलिङ्गप्रकरणविनियोज्यमन्त्रानर्थक्यप्रसङ्गः। तस्मात्प्रकरणपाठादेव सर्वत्र मन्त्रेषु प्राप्तेष्वेकदेशानुवादः सृष्ट्यभिधाननिमित्तार्थवादार्थः।

केषाञ्चिन्मतेन शंका

अत्र चोदयन्ति। चयनचोदनयैवोपधानस्य प्राप्तत्वाल्लिङ्गप्रकरणानुमितया च श्रुत्या मन्त्रप्राप्तेः प्रदेशान्तरस्थार्थवादानुपपत्तिः, एकवाक्यार्थवादप्रवृत्तेः। तथा च प्रथनार्थवादे व्याख्यातम्। न चान्यो गुणः श्रूयते, यदर्थता कल्प्येत। तत्र परिसंख्यार्थतैव प्राप्नोति। ततश्च तदवस्थमनर्थमिति, वाच्यं पुनः श्रुतिप्रयोजनम्।

केषाञ्चिन्मतेन परिहारः

तत्र केचिदाहुः। उपधानमेवात्र विधीयते, तन्माहात्म्यप्रदर्शनार्थं च मन्त्रग्रहणम्। इत्थमिदं शस्तम्, यदेवंरूपैर्मन्त्रैः क्रियत इति। चयनेनार्थगृहीतमुपधानमिति चेत् न। संहतस्थापनेनापि चयनोपपत्तेः। न चैवं संहतानामेवोपधानं स्यात्। न तस्येष्टकाः प्रत्युपादीयमानस्य प्रतिप्रधानावृत्तिन्यायसिद्धेः।

अपि च—

प्राप्नुवन्त्यपि वक्तव्या पुनरेवंविधा क्रिया।
आध्वर्यवसमाख्यानं तथा हि प्रतिपद्यते ॥

ततश्चाध्वर्युकर्तृकत्वं च लभ्यते। अर्थगृहीतायां त्वनियमः स्यात्। न चावश्यमुपधान एव सर्वे मन्त्रा विनियुज्येरन्। अविशिष्टसामर्थ्या हि केचिद् ग्रहणाद्यपि कुर्युः।

अपि च—

प्रत्यक्षब्राह्मणोक्तानां मध्यमा चितिराश्रयः ।
तदर्थमपि सन्बन्धः कार्यो मन्त्रोपधानयोः ॥

ये त्वौपानुवाक्यकाण्डाधीनाः तेषां वाक्यादृते सम्बन्ध एव नास्तीति, अर्थवदेव वचनम् । न चावश्यमनेन सूत्रेणार्थवादत्वं प्रतिपाद्यते, तल्लिङ्गात्तल्लिङ्गेषु भूयस्त्वनिमित्तशब्दप्रवृत्तिमात्रकथनात्, अतो नातीव सृष्टिनामविधानमादर्तव्यम् ।

भाष्योक्तस्यार्थस्य दूषणम्

भाष्यकारेण तु विधौ लक्षणां परिहरताऽनुवादत्वमाश्रितम् । 'एकया स्तुवते' इति ह्यनुवाकाद्यस्यैवासृष्टिलिङ्गत्वादात्मपरित्यागेनेतरलक्षणार्थता स्यात्, तल्लक्षयित्वा च पुनरात्माऽपि प्रतिपादनीय इत्यति गौरवम्, उपधानस्तुत्यर्थत्वेन पुनरनुवादत्वाददुष्टा लक्षणा ॥ २७ ॥ (२२)

लिङ्गसमवायात्[1] ॥ २८ ॥ वि०

शा० भा०—प्राणभृत उपदधाति, अज्यानीरुपदधाति, इति । विधित्वे प्राणभृन्मन्त्रकासूपधीयमानासु विलिङ्गानां मन्त्राणामानर्थक्यम् । तस्मादनुवादः । लिङ्गसमवायादितरशब्दः परत्र वर्तते । यथा छत्रिणो गच्छन्तीत्येकेनच्छत्रिणा सर्वे लक्ष्यन्ते । न चायं प्राणभृच्छब्दः सृष्टिशब्दश्च जहत्स्वार्थं मन्त्रगणं लक्षयेत् । यद्गणे च सृष्टिप्राणभृच्छब्दौ समवेतौ, तावपि परिगृह्येते । यथा छत्रिशब्देन सार्थलक्षणार्थेन सोऽपि च्छत्री गृह्यत इति ॥ २८ ॥

॥ इति तत्सिद्धिपेटिका ॥

भा० वि०—**विधित्व इति ।** उपधानानुवादेन प्राणभृल्लिङ्गमन्त्रविधित्व इत्यर्थः । आनर्थक्यमिति । परिसङ्ख्याभ्युपगमादितिभावः ।

ननु प्राणभृच्छब्देन तल्लिङ्गातल्लिङ्गाभ्यां मन्त्रणामनुवादः, तत्राह—**लिङ्गसमवायादिति ।** यद्यपि प्राणभृन्मन्त्रे नास्ति भूमा, तथापि तल्लिङ्गातल्लिङ्ग समुदायेऽन्तर्लिङ्ग-समवायमात्रात् समुदायं लक्षयित्वा तद्युक्तेषु समुदायिषु प्राणभृच्छब्दो वर्तत इत्यर्थः । एतदेव दृष्टान्तेनाह—**यथेति ।** सर्वे क्षत्रिण इति, अच्छत्रिण इति छेदः ।

ननु लिङ्गिसम्बन्धं विना लिङ्गित्वाभावाल्लिङ्गादित्यनेनैव सम्बन्धसिद्धेः समवायशब्दोऽनर्थक इत्याशङ्क्य शङ्कोत्तरत्वेन व्याचष्टे—**न चायमिति ।**

१. ब. क. लिंगसमवायात् ।

भूम्न्यपि समुदाय पदादपकर्षं सूचयितुं सृष्टिशशब्दश्चेत्युक्तम्। कुत इत्यत आह—**चद्गणे चेति**। चो हेतौ लिङ्गस्यापि स्वलक्षिते गुणेऽन्तर्भावादितर-समुदायिवत्तस्यापि उपादीयमानत्वादित्यर्थः। अजहत्स्वार्थलक्षणायामपि स एव दृष्टान्त इत्याह—**यथेति**। अत्र च लिङ्गसमवायातिरिक्तस्य भूम्नो, लिङ्गसमवा-यस्य च भूमानपेक्षस्य निमित्तत्वं सूचयितुं सूत्रयोस्तृतीयापञ्चम्योर्निर्देशः। एवं च निमित्तसद्भावात् सिद्धा वेदेऽपि गौणी वृत्तिः इति नार्थवादानर्थक्यपरिहाराय विधिराश्रयणीय इति भावः॥ २८॥ (२२)

इति तत्सिद्धिपेटिका

त० वा०—**लिङ्गसमवायः**। सृष्टिवदेव प्राणभृदादिषु चोद्यपरिहारा अल्पैरेव लिङ्गैर्भूयसामनेवंलिङ्गानां लक्षणमित्युदाहरणभेदः। स्वर्थापरित्यागाच्चोभयत्र लक्षणस्यापि ग्रहणमुपादीयमानत्वादिति।

आह च—

यत्र लक्षणमुद्दिश्य लक्ष्ये कार्यं नियुज्यते।
तन्मात्रग्रहणं तस्मिन्नुपादाने द्वयोरपि॥ २८॥ (२२)

इति त्रयोदशं तत्सिद्धिपेटिका॥ १३॥

इत्येकादशं वैश्वानराधिकरणम्।

तत्सिद्धिपेटिका

॥ अथ यजमानशब्दस्य प्रस्तरादिस्तुत्यर्थताधिकरणम्॥

न्या० सु०–अत्र भाष्यकृता 'यजमानः प्रस्तर' इत्याद्युदाहृत्य विध्यर्थवादचिन्ताकृता सा तावत् पूर्ववदेवासङ्गता। गुणविधिसम्भवासम्भवचिन्ताप्येवंविधेषु विधिप्रत्ययशून्येषु सम्भवद्विध्यन्तरैकवाक्यत्वेनौदुम्बराधिकरण एव विधित्वाशङ्काया निरस्तत्वात् अयुक्ता। पूर्वाधिकरणे त्वौदुम्बराधिकरणपूर्वपक्षन्यायेन विधित्वमङ्गीकृत्य, वैश्वदेवाधिकरणोक्त-स्योत्पत्तिशिष्टेनोत्पन्नशिष्टबाधस्याष्टत्वादेर्विषयो भवति न वेति चिन्तितम्। इह त्वङ्गीकृत्य विधित्वम्, चिन्तान्तराभावान्न कृत्वाचिन्तान्यायः सम्भवति। न चार्थवादत्वा-भिधाने विधित्वनिरासे वैतत्सूत्रं समर्थम्।

तत्सिद्ध्यादीनां गुणवादनिमित्तत्वाभिधानमात्रप्रतीतेः तदभिधानमपि यदि निमित्ता-सम्भवेन गुणवादासम्भवशङ्कानिरासार्थम्, ततो 'रूपात्प्रायादि'त्यादिना यथासम्भवगुण-वादनिमित्तानामुक्तत्वादनर्थकम्। लक्षणासम्भवेन तु गुणवादासम्भवशङ्का गौणमुख्या-धिकरणे स्वाभिधेयलक्ष्यमाणगुणयोगनिमित्तलक्षणाया गौण्या वृत्तेः साधयिष्यमाणत्वाद-युक्ता। अथ तत्र प्रकृतगौणमुख्यविषयमन्त्रविनियोगविचारासिद्ध्यर्थं गौणवृत्तिसद्भाव-प्रतिपादनान्न लक्षणविशेषाभिधाने तात्पर्यम्। इह तु प्रसिद्धार्थत्यागेनाप्रसिद्धतद्गुण-

वृत्तित्वलक्षणे गौणत्वे, स्वार्थत्यागेन वेदाप्रामाण्यापत्तेः। समुदायवाचिनो वैकदेशवृत्तित्वलक्षणे समुदायानित्यत्वेन शब्दार्थसम्बन्धस्यानित्यत्वापत्त्या वेदाप्रामाण्यापत्तेः आरोपितार्थवृत्तित्वलक्षणस्य च गौणत्ववस्यारोपकपुरुषाभावाद्वेदेऽनुपपत्तेरेतल्लक्षणत्रयनिरासेन गुणयोगनिमित्तवृत्तित्वलक्षणप्रतिपादनार्थं तत्सिद्ध्यादीनां निमित्तत्वाभिधानमित्युच्यते, ततो गुणवादसूत्रानन्तरमेवैतत्सूत्रं कार्यम्। गौणवृत्तित्वलक्षणाभिधानार्थे चास्मिन्सूत्रे सति कथं भाष्यकारीया विध्यर्थवादचिन्ता सम्बध्येतेत्याशङ्कासहकं निराकर्तुमाह—**अर्थवादेति**। विध्यर्थवादचिन्तायाः प्रकरणासङ्गतत्वम् विधित्वशङ्कानिरासस्य चौदुम्बराधिकरणेन गतत्वम्। सूत्रस्य च तदभिधानात्सामर्थ्यं तादर्थ्यानभ्युपगमेनैव परिहृतम्। गुणवादासम्भवाशङ्कानिरासार्थत्वेनाभ्युपगमोऽपि लक्षणशब्देनोक्तः। नात्र गुणवादः, तस्य वा निमित्तमभिधीयते, येन गौणमुख्याधिकरणेन, 'रूपात् प्रायादित्यादिना वा गतार्थत्वं स्यात्, किं तु गुणवादस्य तत्सिद्ध्यादिनिमित्ताभिधानद्वारेण लक्षणमभिधीयते। गुणशब्देन गौणवृत्त्यभिधानात्, आश्रयशब्देन च निमित्ताभिधानात्, तत्सिद्ध्यादयो गौण्या वृत्तेर्निमित्तत्युक्ते, यस्यां वृत्तौ ते निमित्तम्, सा गौणी वृत्तिरित्यर्थात् प्रतीते च निमित्ते, गुणयोगनिमित्तायां च वृत्तौ तेषां निमित्तत्वाद् गुणयोगनिमित्तवृत्तित्वमेव गौण्या वृत्तेर्लक्षणमित्यवसीयत इत्याशयः। गुणवादसूत्रानन्तराभिधेयत्वशङ्कानिवृत्त्यर्थं तत्र नोक्तमित्युक्तम्।

अर्थवादवत् श्येनचितं चिन्वीत नेन्द्रसश्वसि दाशुषे मासमग्निहोत्रं जुह्वतीत्यादिषु विधि-मन्त्र-नामधेयेष्वपि श्येनेन्द्राग्निहोत्रादिशब्दानां गौणत्वदर्शनात् सर्वसाधारण्यसूचनाय सर्वोपयोगव्युत्पादनानन्तरमेव गौणवृत्तिलक्षणाभिधानं युक्तमित्याशयः। सूत्रस्य गौणवृत्तिलक्षणार्थत्वे विध्यर्थवादविचारासम्बद्धत्वशङ्कानिवृत्त्यर्थम्—**अर्थवादेत्युक्तम्**। सूत्रकृतोऽप्रसक्ताभिधायित्वपरिहाराय लक्षणाभिधानस्य प्रसङ्गसिद्ध्यर्थं विध्यर्थवादचिन्तयोपक्रान्तम्। यथाकृतिसद्भावेऽपि प्रतिपादयिषितेऽयं गौरित्यस्य शब्दस्य कोऽर्थ इति वाच्यत्वमुखेनोपक्रान्तमित्यर्थः। कथमर्थवादत्वोक्त्य गौणवृत्तिलक्षणाभिधानस्य प्रसङ्गो भवतीत्यपेक्षायां तदुपकारीत्युक्तम्। पूर्वाधिकरणस्य गुणविधिसम्भवासम्भवचिन्तार्थत्वेनार्थवादत्वाभिधाने तात्पर्याभावात् पूर्वाधिकरणोक्तार्थवादप्रसङ्गेनानानन्तरसङ्गतिरनाशङ्कनीया।

ननु निमित्ताभिधानद्वारेण चेदनेन सूत्रेण लक्षणमुच्यते, ततो 'रूपात्प्रायादित्यादिभिरपि सूत्रैर्निमित्ताभिधानद्वारेण लक्षणज्ञानसिद्धेरनर्थकमिदं सूत्रं स्यादित्याशङ्कते—**ननु चेति**। रूपप्रायेति वक्तव्ये विभक्तिनिर्देशः प्रदेशविशेषज्ञापनार्थः। इति गुणाश्रया इतिप्रकारवाचिनेतिकरणेन तत्सिद्ध्यादिप्रकाराणि गुणवादनिमित्तानीत्यभिधानात् प्रकारस्य च व्यवच्छेदकत्वेन लक्षणत्वाद्यथा तत्सिद्ध्यादेर्गौणवृत्तिनिमित्तलक्षणत्वेनाभिधानं नैवं रूपादेः, किन्तु 'स्तेनं मन' इत्याद्युदाहृतार्थवादगतगुणवादाख्यलक्ष्यविषयस्य किन्निमित्तोऽयं गुणवाद इत्येवंविधस्य व्यवहारस्य सिद्ध्यर्थमिह सिद्धं सारूप्यशब्देन

रूपस्य निमित्तत्वम्, भूयः शब्देन च प्रायभूयस्त्वयोर्निमित्तत्वम्, प्रशंसाशब्देन च दुरत्ययप्रराधनिमित्तदुर्ज्ञानत्वादेः सुकरस्य प्रशस्तत्वात् दुष्करस्य तदभावात्मकत्वान्निमित्तत्वं तत्र नीतमिति परिहरति— **सत्त्वमिति**। उदाहृतशब्देन रूपादेः सर्वगुणवादाव्यापकत्वादपि लक्षणत्वं नास्तीति सूचितम्।

ननु यदष्टाकपाल इत्यादौ तत्सिद्ध्यादेरभावेनाव्यापकत्वादलक्षणं स्यादिति शङ्कां सर्वशब्देन निरस्यन्नितिकरणेन प्रकारवाचिना तत्सिद्ध्यादीनां निमित्तं लक्षणेनोक्तमिति व्यतिरेकमाह—**अत्र त्विति**। अष्टत्वादेरपि द्वादशत्वपरिच्छेद्यानां कपालानां मध्ये कतिचिन्निष्कृष्याष्टावेतानीत्यादिसंख्येयपरिच्छेदकत्वेन द्वादशत्वकार्यकरत्वोपपत्तेरष्टाकपालादिशब्देन तत्सिद्धिसद्भावात्, अन्यत्रापि च यथासम्भवं तत्सिद्धादिषट्कमध्ये कस्यचिन्निमित्तस्योहितुं शक्यत्वान्नाव्यापकतेत्याशयः।

ननु सहचरणस्थानतादर्थ्यवृत्तमानधारणसामीप्ययोगसाधनाधिपत्येभ्यो ब्राह्मणमञ्चकटराजसक्तुचन्दनगङ्गाशाटकान्नपुरुषेष्वतद्भावेऽपि तदुपचार (न्या० द० अ० आ० सू०) इति सूत्रेण 'यष्टीः प्रवेशयेति सहचरणात् ब्राह्मणेषु यष्टिशब्दस्य, मञ्चाः क्रोशन्तीति स्थानात्पुरुषेषु मञ्चशब्दस्य कटं चिछनत्तीति तादर्थ्यद्वारेण कटशब्दस्य यमोऽयं राजेति वृत्तात् राज्ञि यमशब्दस्य, आढकमश्नातीति मानात् सक्तुष्वाढकशब्दस्य, तुलयानुलिम्पतीति धारणाच्चन्दने तुलाशब्दस्य, गङ्गायां घोष इति सामीप्यात्तीरे गङ्गाशब्दस्य, नीलः शाटक इति योगाच्छाटके नीलशब्दसामानाधिकरण्यस्य, अन्नं बलमिति साधनाद् बलेऽन्नशब्दसामानाधिकरण्यस्य, अयं पुरुषः कुलमित्याधिपत्यात्कुले पुरुषशब्दसामानाधिकरण्यस्य प्रयोग इति वदद्भिर्नैयायिकादिभिरन्येषामपि गौणवृत्तिनिमित्तानामुक्तत्वान्न षट्कस्यापि सर्वगौणवृत्तिव्यापकतेत्याशङ्कते—**ननु चेति**। न चैतत् तार्किकस्थितिमात्रम्, लोकेऽपि दर्शनादित्याह—**लोके चेति**। लक्षणार्थे च निमित्ताभिधाने व्यापकत्वाय सर्वाण्युपसंहार्याणीत्याह—**तानीति**।

परमतेन परिहरति—**लिङ्गेति**। एवं तु सृष्टिशब्देऽपि सृष्टिसञ्ज्ञेष्टकासमवायेनेतरेष्टकाप्रतीत्युपपत्तेर्भूम्नोऽप्यवाचकत्वापत्तेः, भूयोऽल्पत्वप्रतीतिवैलक्षण्याद्वा भेदेनोपन्यासे, अत्रापि साहचर्यादिप्रतीतिवैलक्षण्यात् पृथगुपन्यासापत्तेरपरितोषात् परिहारान्तरमाह—**अथ वेति**। जहत्स्वार्थाभिधायित्वलक्षणे, समुदायवाचिनो वैकदेशवृत्तित्वलक्षणे, अध्यारोपितार्थवृत्तित्वलक्षणे वा गौणत्वे वेदे तदसम्भवेनाप्रामाण्यापत्तेः तन्निरासेन लक्ष्यसाणगुणयोगवृत्तित्वलक्षणज्ञापनायैतन्निमित्ताऽभिधानम्। लक्षणावृत्तौ तु वेदाप्रामाण्यापादकस्य लक्षणस्य कैश्चिदनुक्तत्वेन वेदप्रामाण्याविरोधिलक्षणज्ञापनार्थेन निमित्ताभिधानेनोपयोगाभावात्साहचर्यादीनां च लक्षणावृत्तिनिमित्तत्वान्नेहाभिधानमिति भावः।

ननूभयत्र परशब्दस्य परत्र वृत्तेस्तुल्यत्वान्नानयोः शब्दवृत्त्योर्भेदोऽस्तीत्याशयेन पृच्छति—**किं चेति**। लक्षणाभेदाशयेनोत्तरमाह—**बाढमिति**। प्रश्नपूर्वकं लक्षणभेद-

माह—**कुत इति**। अभिधेयसम्बन्धितत्त्वरूपापरित्यागप्रदर्शनार्थोऽभिधेयाविनाभूतशब्दः। गौण्यां तु वृत्तावभिधेयसिंहादिसम्बन्धित्वरूपानादरेण तल्लक्षितप्रसह्यकारित्वादिगुणयोगमात्रादरसूचनायाभिधेयस्य गुणलक्षणायां व्यापारेऽप्यनुपादानम्। ननु लक्षणायामविनाभावापेक्षणे यष्ट्यदेः पुरुषाविनाभावाभावात् न यष्ट्यादिशब्दे लक्षणा स्यादित्याशङ्क्याह—**तत्रेति**। अयमाशयः नात्र लक्षणाहेतुत्वेनाविनाभावोपादानं तस्याः, सम्बन्धमात्रेण शब्दतात्पर्यवशादुपपत्तेः। न चात्र लक्षकस्याभिधेयस्य लक्ष्येणाविनाभावोऽग्निनेव धूमस्योक्तः, विपरीताभिधानात्। किं त्वभिधेयसम्बन्धित्वरूपादरप्रदर्शनार्थम्, यष्ट्यादिशब्दानामपि चाभिधेययष्ट्यादिसम्बन्धित्वानादरेण पुरुषस्वरूपे प्रवृत्त्यभावेनाभिधेयाविनाभूतप्रवृत्तित्वाविघातात्। **सम्बन्धमात्रस्य च** लक्षणाहेतोर्भावाद् युक्तैव लक्षणया प्रवृत्तिरिति।

ननु सम्बन्धमात्रेण लक्षणोपपत्तावग्न्यादिशब्दानामपि अभिधेयाग्न्यादिसम्बद्धपैङ्गल्यादिसम्बन्धेन लक्षितलक्षणया माणवकादौ प्रवृत्त्युपपत्तेर्गौणत्वाख्यवृत्त्य[1]ङ्गीकरणं न युक्तमित्याशङ्क्याह—**अग्निरिति**। लक्षणाहेतुसम्बन्धसद्भावेऽप्यविनाभावशब्दोक्ताभिधेयसम्बन्धिस्वरूपादराभावान्न लक्षणात्वप्रसिद्धिरभियुक्तानामित्याशयः। अभिधेयसम्बन्धित्वरूपानादरमेव प्रश्नपूर्वकमुपादयन्नाह—**किं तर्हीति**। लक्षणोपायमात्रत्वेनाभिधेयस्यावस्थानं सूचयितुम्—**वह्नित्वलक्षितावित्युक्तम्**। सादृश्यसामान्यापेक्षत्वादग्निसम्बन्धानपेक्षपैङ्गल्यादिस्वरूपमात्रयोगान्माणवकेऽग्निशब्दप्रवृत्तिरिति सादृश्यशब्देनोक्तम्। नन्वत्र लक्षणानिमित्तानभिधाने भूम-लिङ्गसमवाययोरभिधेयसम्बन्धादरेण लक्षणानिमित्तत्वात् उपन्यासो न युक्त इत्याशङ्क्याह—**सर्वत्र चेति**। वस्तुतस्तयोर्लक्षणानिमित्तत्वेऽप्यभिधेयसृष्ट्यादिसमुदायिलक्ष्यमाणसमुदायाख्यगुणयोगात् समुदायान्तरे सृष्ट्यादिशब्दवृत्तेर्गौणत्वसम्भवात् जहत्स्वार्थवृत्त्यादिलक्षणशङ्कायां वेदाप्रामाण्यापत्तेस्तन्निरासायाऽभ्युपगम्य गौणत्वम्। तन्निमित्तत्वेनेहोपन्यास इत्याशयः। प्रस्तरप्रभृतौ तत्सिद्धिकरादौ यजमानादिशब्दानां क्वचिल्लक्षणावृत्तिसद्भावेऽपीयं तावद् गौणी वृत्तिरस्त्येवेति योज्यम्।

सूत्रकृतोऽप्रसक्तगौणत्ववृत्तिलक्षणाभिधायित्वपरिहारार्थं प्रकृतसिद्ध्यर्थवादचिन्तयोपक्रमितुं भाष्यकृता द्वेधोपन्यस्तेऽपि सन्देहे, पूर्ववत् प्रौढ्या नामधेयचिन्तया सह साक्षात् सङ्गतिप्रदर्शनार्थं त्रेधा सन्देहमाह—**अत्रापि चेति**। पूर्वस्मिन्नधिकरणे त्रयः पक्षाः त एवात्रापीति योज्यम्। किं तावदित्यादिपूर्वपक्षभाष्यमर्थवादानर्थक्यास्यार्थवादाधिकरणे निरस्तत्वादयुक्तमाशङ्क्योपपादयति—**तत्रेति**। ननु शब्दसमभिव्याहारमात्रेण स्तुत्यप्रतीतावपि सर्वाभ्यर्हितयजमानत्वोपचारेण प्रस्तरस्तुतिः प्रत्येतव्या[2] इत्याशङ्क्याह—**न चेति**। ननु गौण्या वृत्त्या परशब्दस्य परत्र वृत्तिर्गुणवादसूत्रे वर्णितेत्या-

---

१. इतिभेदाङ्गीकरणमिति २ पु० पा०। २. प्रतीष्यति २ पु० पा०।

शङ्कयाह—**न चेति**। एतत्सूत्रसिद्धां वेदे गौणीं वृत्तिमङ्गीकृत्य तत्र गुणवादेन परशब्दस्य परत्र वृत्तिर्वर्ण्यते, इह तु सैव वेदप्रामाण्याविरोधिनिमित्ताभावाद्वेदे न सम्भवतीति पूर्वपक्षी मन्यत इति भावः। ननु तत्सिद्धिकरत्वादि तस्या निमित्तम्। तच्च वेदेऽपि सम्भवतीत्याशङ्क्याभ्युपगम्य तस्य निमित्तत्वं प्रस्तरे यजमानशब्दप्रवृत्तौ यजमानकार्यकरत्वस्य निमित्तस्य प्रमाणान्तरेणासिद्धेः, तत्कार्ये प्रस्तरविध्यपेक्षत्वात् गुणविधिरेव बलादापद्येतेत्याह—**न चेति**। 'तस्माद्विधिरिति' पूर्वपक्षोपसंहारभाष्यं व्याचष्टे—**तस्मादिति**।

न च प्रस्तरो याजमानं शक्नोति कर्त्तुमित्युत्तरभाष्यदर्शनात् अन्यतर इत्युपक्रममात्रं कुण्डपायिनामयने 'यो होता सोऽध्वर्युः। स पोता य उद्गाता, स नेष्टा सोऽच्छावाको, यो मैत्रावरुणः, स ब्रह्मा, स प्रतिहर्त्ता यः प्रस्तोता, स ब्राह्मणाच्छंसी, स ग्रावस्तुद्यः प्रतिप्रस्थाता, सोऽग्नीत्स उन्नेता गृहपतिर्गृहपतिः 'सुब्रह्मण्यः सुब्रह्मण्य' इत्यृत्विक्समासे समाम्नाते, होत्रादिशब्दानां मुख्यार्थत्वमङ्गीकृत्य तत्सामानाधिकरण्यायाऽध्वर्य्वादिशब्दानां लक्षणार्थत्वं तृतीये 'विप्रतिषेधे करणः समवायविशेषादि'ति समवायविशेषव्याचक्षणेन भाष्यकृतोक्तमिह दृष्टान्तितम्। अव्यवस्थितशास्त्रार्थायोगात्कतरोत्र कार्यलक्षणोऽर्थः पूर्वपक्षिणोऽभिमत इत्यपेक्षायां 'मुख्यं वा पूर्वचोदनाल्लोकवदि'ति द्वादशाधिकरणन्यायेन यजमानशब्दस्य मुख्यार्थत्वमङ्गीकृत्य, प्रस्तरशब्दस्य कार्यलक्षणार्थत्वमाह—**तत्रापीति**। 'आग्नावैष्णवमेकादशकपालं निर्वपेत्सरस्वतीमाज्यस्य यजेतेत्युदाहृत्य किं विकल्पेनान्यतरस्य तन्त्रं प्रसङ्गेनान्यतरस्योपकारकत्वात् कर्त्तव्यम्, उत आग्नावैष्णवं चरुं[1] तन्त्रमेवेति सन्दिह्य विशेषादनियमे प्राप्ते।

भूयसां स्यात् स्वधर्मत्वमिति पूर्वसूत्रगतं स्वधर्मत्वपदं परित्यक्तभावप्रत्ययमनुषज्य, मुख्यमाग्नावैष्णवकर्म पूर्वचोदितत्वेनानुपसञ्जातविरोधित्वात् स्वधर्मकम्, यथा लोके पूर्वगतानां पूर्वासनेषूपवेशनं जघन्यागतानामितरेष्विति वक्ष्यते।

नैतदेवमित्यादिसिद्धान्तभाष्यं यजमानशब्दस्य मुख्यत्वेन कार्यलक्षणार्थत्वायोगात्, तत्कार्ये प्रस्तरविधानस्यानाशङ्कितत्वेनायुक्तमाशङ्क्योपपादयति—**न तावदिति**। प्रस्तरकार्ये यजमानविधौ निरस्ते, यदि कश्चिद्यजमानकार्ये प्रस्तरविधिरिति शङ्केत, तन्निरासाय स्वकार्यविरोधाद्यजमानस्य न प्रस्तरकार्ययोगो अचेतनस्य च प्रस्तरस्य चेतकार्यविरोधाद्यजमानकार्ययोगो न सम्भवतीति, यजमानकार्ये प्रस्तरचोदनोपपत्तिमभ्युपेत्यैतावदुक्तम्। वस्तुतस्तु मुख्यत्वेन यजमानशब्दस्य कार्यलक्षणार्थत्वायोगात्सापि नोपपद्यत इत्यर्थः। आदिशब्देनैककपालोपादानम्। यजमानस्यैककपालकार्यार्थत्वे सर्वतन्त्रलोपापत्त्यभिधानं प्रस्तरकार्यार्थत्वेऽपि तुल्यमित्याह—**एकेति**।

भाष्यकृता तु प्रस्तरस्य मान्त्रवर्णिकदेवतान्वयेनानुषङ्गिकयागसाधानत्वेऽपि, प्रहरणस्य प्रतिपत्तित्वेन प्रस्तरकार्यत्वाभावात्, यजमानस्य च पुरोडाशकपालवदन्यार्थस्यैव

1. चरुमिति २ पु० ना०।

स्तुत्यधारणविनियोगेऽपि तन्मात्रनिष्पत्त्या कृतार्थत्वाभावेन, अप्रतिपाद्यत्वात् प्रहरणानापत्तेस्तदुपेक्ष्ये, इतरत्रैव दूषणमुक्तम्। विध्यन्तरं चेत्यादिभाष्येण विध्येकवाक्यत्वं विनार्थवादत्वायोगेनानर्थक्यपरिहाराय कथंचिद्विधित्वमेष्टव्यमित्याशङ्कानिरासायैकस्योपरिसादनविधिशेषता, इतरस्य च सर्वहोमविधिशेषतेत्यभिधानपूर्वकं विधित्वासम्भवोपसंहारेणानुवादत्वमुक्तम्। तद्व्याचष्टे—**तस्मादिति**।

कथं पुनरिति भाष्येण प्रस्तरैककपालशब्दयोः कार्यलक्षणार्थत्वाभावे कथं यजमानशब्दसामानाधिकरण्यज्ञानमिति पृष्ट्वा गौण्या वृत्त्या सामानाधिकरण्यं भविष्यतीत्याशङ्कानिरासार्थं वेदे गौण्यवृत्त्यसम्भवं मनसि कृत्वा, कथमिति प्रश्नाभिप्रायो विवृतः। तत्सङ्क्षिप्य व्याचष्टे **कथमिति**। किमर्थं चेति प्रश्नान्तरभाष्यं विध्यर्थवादचिन्तोपक्रमेण सम्वादस्य स्तुत्यर्थत्वाज्ञानादयुक्तमाशङ्क्य, स्तुतिप्रकारप्रश्नविषयतया **व्याचष्टे—किमाकारा वेति**। **उच्यत** इति द्वितीयप्रश्नोत्तरभाष्यं व्याचष्टे—**जयमानो हीति**। **उत्तर**शब्दव्याख्यानायोपरिशब्दः कथमित्यादिप्रश्नानुभाषणपूर्वकं गौणवृत्तिलक्षणाभिधानापातनिकार्थं, गुणवादस्त्विति सूत्रेणोत्तराभिधानार्थं भाष्यं व्याचष्टे—**गुणाच्चेति**। **गौण**वृत्त्यसम्भवाभिधानार्थं कथमिति भाष्यं गुणादिति पञ्चम्या परशब्दस्य परत्र प्रवृत्तौ गुणस्य हेतुत्वमात्राभिधानात् लक्ष्यमाणस्यापि च हेतुत्वोपपत्तेर्वाच्यत्वानभिधानादयुक्तमाशङ्क्य व्याचष्टे—**कथमिति**। अयमाशयः न लक्ष्यमाणगुणयोगमात्रेण सिंहादिशब्दस्य देवदत्तादौ वृत्तिर्युक्ता, लक्ष्यमाणगुणस्याशाब्दत्वाच्छब्देन देवदत्तादिना धूमोऽयं ज्वलतीतिवदनन्वयापत्तेः। प्रसह्यकारित्ववच्च दंष्ट्रित्व-चतुष्पात्त्वादेरपि सिंहगुणस्य देवदत्ते प्रत्ययापत्तेः लक्षणायां त्वभिधेयसम्बन्धित्वरूपादरेण तत्र शब्दतात्पर्यावगतेर्यत्परः शब्दः स शब्दार्थ इत्यनेन न्यायेनाभिधेयसम्बन्धित्वरूपस्यापि शब्दार्थत्वाच्छाब्दार्थान्तरेणान्वयो युक्तः। तात्पर्यव्यवस्थानादेव च गङ्गादिशब्दानामभिधेयसम्बन्धाविशेषेऽपि सिकतादिलक्षकत्वानापत्तिः। तस्माल्लक्ष्यमाणगुणयोगनिमित्तवृत्तित्वस्य गौणवृत्तिलक्षणस्यायोगात्[1] प्रसिद्धवाच्यत्यागेन तद्गुणवाचित्वं गौणवृत्तित्वलक्षणमभ्युपगन्तव्यम्। सिंहादिशब्दस्य हि स्वार्थवाचित्वे देवदत्तशब्दसामानाधिकरण्यायोगात् तद्गुणप्रसह्यकारित्ववाचित्वाकल्पनायां देवदत्तेऽपि तत्सद्भावाद् गौरो देवदत्त इतिवत्सामानाधिकरण्यमुपपादयितुं शक्यते। स्वार्थत्यागेन च तद्गुणे वर्त्तमानत्वात्तत्र भव इत्येतस्मिन्नर्थे तद्धितोत्पत्तिः। पौरुषेये च वाक्ये वक्त्रभिप्रायानुसारात् स्वार्थत्यागेन तद्गुणे वृत्तिर्युक्ता, वेदे तु स्वार्थत्यागेन प्रामाण्यबाधापत्तेः तत्त्यागेन गुणवाचित्वकल्पना न युक्तेति।

स्वार्थाभिधानेनेत्युत्तरभाष्याभिप्रायमाह—**सिद्धान्तस्त्विति**। गुणस्यावाचकोऽपि स्वार्थमभिधाय, लक्षणया गुणं ब्रवीतीति वदता लक्ष्यमाणगुणयोगनिमित्तत्वं सिद्धान्त्यभिमतं गौण्या वृत्तेर्लक्षणं सूचितं भवतीत्याशयः। 'सर्व' इति भाष्यं पराभिमतलक्षण-

---

1. प्रथम लक्षणनिरासः।

निरासार्थतया व्याचष्टे—**अजहत्स्वार्था इति**। न जहाति शब्दः स्वमर्थं यासु वृत्तिषु इति विग्रहः। यथा श्रुतिवृत्तौ, लक्षणावृत्तौ वा शब्दः स्वार्थं न जहाति, तथा गौण्यामपीत्यर्थः। ततश्च स्वार्थत्यागाभावान्न वेदाप्रामाण्यापत्तिरित्याशयः।

भाष्यकृता प्रसिद्धार्थहानाप्रसिद्धार्थकल्पनापत्तिः पराभिमतलक्षणानिरासे हेतुत्वेनोक्ता। सा गवादिशब्दानामपि सास्नादिमदर्थत्यागेन पृथिव्यादिवाचित्वनिरासापादकत्वादहेतुरित्याशङ्क्य स्वयं हेतुमाह—**पूर्वेति**। कथं पूर्वक्लृप्तशक्त्यनुसारेण परशब्दस्य परत्र वृत्तिरित्याशङ्क्याऽर्थसम्बन्धादित्यादिभाष्ये वक्ष्यमाणं प्रकारमाह—**सम्भविष्यति चेति**। भविष्यन्निर्देशेनाऽन्यस्य प्रकारस्य वक्ष्यमाणत्वं सूचितम्। भाष्योक्तं हेतुमनुसन्धत्ते—**इतीति**। स्वोक्तहेतूपजीवित्वसूचनायेतिकरणः। प्रसिद्धहानाप्रसिद्धकल्पनस्य दोषत्वोपपादनार्थं व्यवहारोच्छेदकत्वाभिधानम्[1]।

न चेति भाष्यं मतान्तरनिरासार्थत्वव्याख्यातुं तत्तावदुपन्यस्यति—**अन्येषां त्विति**। सिंहादिशब्दोच्चारणे जातिवद्[2] द्रव्यादीनामपि प्रतीतेः वाच्यत्वे वा शब्दत्वेन द्रव्यादिवाचिशब्दान्तरासामानाधिकरण्यायोगात् समुदायवाची सिंहादिशब्दो देवदत्तादौ समुदायाभावेनैकदेशे गुणादौ लक्षणया वर्त्तमानो गुणशब्दस्याङ्गे प्रयोगादङ्गशब्दस्य चावयवापरपर्यायैकदेशे प्रयोगादेकदेशाख्ये गुणे वर्त्तमानत्वात् पूर्ववद् गौण इत्युच्यते। तस्मात् समुदायवाचिनस्तदेकदेशवृत्तित्वं गौणवृत्तिलक्षणम्। तच्च समुदायानित्यत्वेन शब्दार्थसम्बन्धानित्यत्वापत्तेरप्रामाण्यापादकत्वाद्वेदे न सम्भवतीत्याशयः। एतन्मतनिरासार्थतया 'न चे'ति भाष्यं व्यचष्टे—**तत्रेति**। 'समुदायवाची वेति भाष्यावयवस्य समुदायवाचित्वाङ्गीकरणेन एकदेशवृत्तिनिराशार्थत्वशङ्कानिवृत्तये पूर्वकवाक्यत्वेन समुदायवाचित्वनिरासार्थत्वसूचनायाऽदो व्याख्या।

नन्वेवं सति वेदमधीत्य स्नायादितिक्त्वाप्रत्ययस्य पूर्वकालतानन्तर्यसमुदायवाचिनोऽध्ययनविध्यविरोधार्थं तदेकदेशे पूर्वकालत्वमात्रे वृत्त्यभ्युपगमो विरुध्येतेत्याशङ्क्य, नावयवे श्रुत्या वर्त्तितुमर्हतीति, अध्याहारेण व्याख्यातुं मुख्यरूपेणेत्युक्तं 'गुणहीनेऽपि' इत्यादिपूर्वावयवव्याख्यानार्थं भवतीत्याद्युक्तम्। समुदायवाचित्वनिरासायैव 'सर्वेति' दूषणान्तरभाष्यं सिद्धान्तविरोधाभिधानार्थतया तावद्व्याचष्टे—**सामान्येति**।

एतदेव भाष्यं सामान्यवचनः शब्द इति प्रतिज्ञासिद्ध्यर्थो। यदि व्यक्तिः शब्दार्थो भवेदित्यादिभाष्योक्तो व्यक्तिवाचित्वनिरासो न्याय इत्येवं व्याख्यातुमाह—**क्रियेति** प्रबलारिमर्दनादिक्रियाणां शौर्यादिगुणानामित्यर्थः। किं च व्यक्तिवाचित्वपक्षे व्यक्त्यन्तरे प्रयोगासम्भवेऽप्येकस्यां तावद्व्यक्तौ कालान्तरेऽपि प्रयोगः सम्भवति। गुणादिसमुदायवाचित्वे त्वेकस्यामपि व्यक्ताववस्थाभेदेन तेषां भेदात् सम्बन्धाग्रहणेनाऽभिधानाशक्तिरित्याह—**एकस्यामेवेति**। ननु गुणक्रियाणामन्यत्वेऽप्येकं किंचिद् गुण-

---

1. द्वितीयलक्षणनिरासः। 2. वदिति २ पु० ना।

क्रियावान्तरसामान्यसम्बन्धग्रहणायोपलक्षणं भविष्यतीत्याशङ्क्याह—**न चेति**। आसां गुणक्रियाणां समुदायशो व्यापकमुपलक्षणभूतं सिंहत्वादन्यत्सामान्यं नास्ति। **न च** गुणत्वादिसामान्यस्यैव सिंहशब्दवाच्यत्वोपलक्षणत्वं युक्तम्। तस्य समुदायशो व्यापकत्वाभावेन प्रत्येकमुपलक्षणापत्तेः तथोपलक्षितानां च गुणक्रियाणां व्याघ्रादिजात्यन्तरेऽपि व्यस्तानां भावात् सिंहशब्दवाच्यत्वं नास्तीत्याशयः।

ननु सिंहत्वमेव तर्ह्युपलक्षणं भवत्वित्याशङ्क्याह—**तत्रेति**। उत्तरार्द्धं व्याचष्टे—**न हीति**। समुदावाचित्वनिरासस्य परोक्तगौणवृत्तिलक्षणनिरासोपयोगमाह—**इतीति**[1]।

न चासतीति भाष्यमारोपितार्थवृत्तित्वरूपगौणवृत्तिलक्षणनिरासार्थत्वेन व्याख्यातुं तन्मतं तावदुपन्यस्यति—**कश्चिदिति**। समारोपिते तस्मिन् वाच्ये भावः–प्रवृत्तिर्यस्य शब्दस्य, स गुणतो वाच्यमारोप्य प्रवर्त्तमानत्वात् तत आगत इत्यस्मिन्नर्थे तद्धितोत्पत्तेगौंण इति उच्यते। समारोपितो वा यस्मिन्नर्थे तस्य वाच्यस्य सद्भावः, सोऽर्थो गुणतो वाच्यारोपेण शब्दात् प्रतीतत्वात् गौण इत्युच्यते। ततश्च समारोपितार्थवृत्तित्वं शब्दस्य, गौणत्वलक्षणम्। समारोपितार्थाश्रयत्वं चार्थस्य। तच्च वेदे समारोपकपुरुषाभावान्न सम्भवतीत्याशयः। एतदेव लक्षणमुपपादयितुमाह—**तस्येति**। शब्दस्येहाभिधानं वृत्तिर्व्यापारो। न चासावभिधेयाऽभावे सम्भवतीत्याशयः।

ननु सिंहशब्दस्य देवदत्ताभिधाने व्यापाराभावेऽपि स्वाभिधेयलक्ष्यमाणगुणयोगेन देवदत्तप्रतिपत्त्यर्थं प्रयोगो भविष्यतीत्याशङ्क्याह—**न चेति**। सिंहशब्दाभिहितेन सिंहत्वेन गम्यमानस्यापि गुणस्याशाब्दत्वाच्छब्देन देवदत्तेनान्वयायोगादित्याशयः। सिद्धान्त्यभिमतलक्षणासम्भवमुक्त्वा, स्वाभिमतं प्रश्नपूर्वकमुपपादयति—**कथं तर्हीति**। ननु सिंहशब्देनैव देवदत्ते स्ववाच्यसिंहत्वरूपमारोपेणार्पितं विषयीकृत्य शब्दप्रवृत्तावितरेतराश्रयः स्यादित्याशङ्क्य, स्वयमेव वक्त्राध्यारोप्येत्युक्तम्। आरोपनिमित्तमाह—**सिंहादीति**। सिंहादिरूपतां प्रतिपद्यन्त इत्यर्थः। ननु देवदत्ते सिंहत्वं वक्त्रारोपितमिति कथं ज्ञायत इत्याशङ्क्याह—**ततश्चेति**। शब्दप्रयोगस्य स्वार्थएवोपपत्तेः सिंहशब्दप्रयोगान्यथानुपपत्त्या सिंहत्वारोपः कल्प्यत इत्याशयः। नन्वेवं वाच्ये एव शब्दप्रयोगान्मुख्यत्वं स्यादित्याशङ्क्याह—**न चेति**। नन्वारोपिते वाच्येऽर्थान्तराभिधानानपेक्षत्वात् मुखवत्प्रथमप्रवृत्तेर्मुख्यत्वाविरोध इत्याशङ्क्याह—**यत्र त्विति**। वस्तुवृत्त्या स एवार्थो यत्र न पुनरारोप्यते, तत्र प्रवर्त्तमानः शब्दो मुख्य इत्युच्यते। इतरत्र तु जघनवदारोपात् पश्चात्प्रवृत्तेर्ज्जघन्यो गुणतश्चारोपात् गौण इत्युच्यत इत्याशयः। न च शुक्तिकादावपि रजतत्वारोपेण रजतादिशब्दप्रवृत्तेर्गौणत्वापत्तिः। पुरुषोत्प्रेक्षाप्रभवत्वाभावेन शुक्तिकादौ रजतादिबुद्धेरारोपितत्वाभावादिति सूचनायाऽदोष इत्युक्तम्। एतन्मतनिरासार्थत्वेन भाष्यं व्याचष्टे-**तत्रेति**। एतदेवोपपादयति-**तथा हीति**। सिंहदेवदत्तयोरत्यन्तवैलक्षण्येनारोपा-

---

१. तृतीयलक्षणस्य निरासोऽनेमक्रियते।

योगादसम्भवविनश्वार्थापत्त्यापि कल्पयितुमशक्यत्वात् नाभिधानसिद्धयर्थमप्यारोपो युक्त इत्यर्थः वैलक्षण्येऽप्यूषरादौ तोयाध्यारोपदर्शनाद्—**भ्रान्तिवर्जितैः इत्युक्तम्।** नचैवं सति 'योषा वा गौतमाग्निरिति योषायामग्नित्वारोपविधिर्न स्यादिति वाच्यम्। 'तद्रेतः प्रक्षेपस्य मध्यायत्कर्त्वमभवदभीक' इति द्वाभ्यामृग्भ्यां स्वाहाकारान्ताभ्यां रेतः सिञ्चेदिति स्वाहाकारसाध्यत्वस्मृतेः तथाविधस्य च होमत्वप्रसिद्धे'र्यूपशकला होतव्या' इति च देवतोद्देशद्रव्यत्यागनिरपेक्षप्रक्षेपमात्रेऽपि जुहोतेर्वेदे दर्शनात्तत्कर्मीभूतस्य रेतसोऽर्चिशुचिहूसृपिछदिछविभ्य इसिग्ति जुहोतेरिसिप्रत्ययान्वाख्यानाद्धविःशब्दव्यपदेश्यत्वेन योषाया रेतोरूपहविराधारतयाग्निसादृश्यसम्भवा'च्छ्येनचितं चिन्वीते'ति च योषायामग्निसादृश्यारोपस्य विधेयत्वादित्याशयः।

ननु भ्रान्तिवर्जितानां विसदृशे वस्तुनि वस्त्वन्तरारोपाशक्तावपि भ्रान्त्यवसितसादृश्येऽपि तत्त्वारोपेण शब्दः प्रयोक्ष्यत इत्याशङ्क्याह—**यदेति।** रश्मितप्तोषरे भ्रान्त्या शौक्ल्यचञ्चलत्वादितोयगुणदर्शनेन तोयसादृश्याध्यवसानात्, तोयमुत्प्रेक्ष्य तोयशब्दप्रयोगे तत्त्वतो भ्रान्तावपि भ्रान्त्यध्यवसितस्यैव कारणत्वोपपत्तेरुत्प्रेक्षामात्रत्वाभावेनारोपाभावाद् दूरमपि गत्वा भ्रान्तित्वस्य परिहर्त्तुमशक्यत्वे प्रथममेव सादृश्यज्ञानानपेक्षस्य भ्रान्त्यङ्गीकरणस्य च युक्तत्वात् मुख्यतैवावसीयते न गौणतेत्याशयः। परानभिमतमपि वा भ्रान्तेरारोपत्वं लोकप्रसिद्धयनुसारेणापाद्यारोप्येत्युक्तम्। तोयस्य तत्राविद्यमानत्वात् मुख्यत्वानुपपत्तिमाशङ्क्य—**भ्रान्तीत्युक्तम्।** भ्रान्त्यध्यवसितस्यापि प्रथमं शब्दात्प्रतीतेर्मुख्यत्वाविरोध इत्याशयः। भ्रान्त्यध्यवसितो मुख्यो भ्रान्तिमुख्य इति शाकपार्थिववन्मध्यमपदलोपी समासः।

ननूभयोर्भ्रान्तावर्थान्तराभिधाननैरपेक्ष्येण प्रथमवृत्तेर्मुख्यत्वाद् गौणत्वासम्भवेऽपि वक्तुर्भ्रान्त्यभावेऽपि श्रोतृप्रतारणायोषरे तोयशब्दप्रयोगे भ्रान्तिमुख्यत्वस्याप्यसम्भवाद् गौणत्वं भविष्यतीत्याशङ्क्याह—**अथापीति।** श्रोतृवञ्चनार्थेनैव परशब्दस्य परत्र प्रयोगोपपत्तेर्नासम्भविनोऽध्यारोपस्य कल्पना युक्तेत्याशयः। ननु द्वयोः श्रोतुरेव वा भ्रान्त्या वारोपाभावेऽपि भ्रान्त्या प्रतारणार्थेन वा परशब्दस्य परत्र प्रयोगोपपत्तेर्माभूदारोपकल्पना, द्वयोरपि तु भ्रान्त्यभावे सिंहो देवदत्त इत्यादावारोपं विना शब्दप्रयोगानुपपत्तेस्तत्कल्पनैवोचितेत्याशङ्क्याह—**यदा त्विति।** सादृश्यम्, आदिशब्दोपात्तो वा सादृश्यहेतुर्गुणयोगो निमित्तं यस्य वेत्यर्थस्य, तस्य परत्र परशब्दप्रवृत्तौ निमित्तत्वेनाध्यवसानान्नारोपकल्पना युक्तेत्यर्थः। वत्प्रयोगात्तदर्थाध्यवसानासम्भवाशङ्कानिरासायाऽन्तर्णीतशब्देनाभिप्रेतत्वमुक्तम्।

ननु वत्यर्थाभिप्रायस्यैव तत्र निमित्तत्वम्, नारोपस्येति नियमे को हेतुरित्याशङ्का पूर्वश्लोकव्याख्यानेन निरस्यति—**तथा हीति।** ननु सत्यपि विवेके प्रसह्यकारित्वादिसादृश्यादारोपः सम्भवतीत्याशङ्क्याह— **यथेति।** विवेकज्ञानाम् पुंसाम् आरोपानुपपत्तौ हेतुमाह— **न हीति।** ज्ञानस्य व्यवहाराङ्गत्वात् अर्थनिरपेक्षेण च ज्ञानरूपेण व्यवहारा-

भावात् अर्थाध्यवसानात्मकमेव सर्वं ज्ञानम्, न ततोऽन्यादृशम्, न च विवेकेनार्थेऽध्यवसिते तत्त्वारोपः सम्भवतीत्याशयः।

यद्वा विवेकज्ञानाङ्गतत्त्वभ्रान्त्यसम्भवेऽप्युत्प्रेक्षामात्रप्रभवा कल्पनारूपा बुद्धिरारोपशब्दवाच्योपपत्स्यत इत्याशङ्क्य—**न हीत्युक्तम्**। अयमाशयःकल्पनारूपापि बुद्धिरर्थान्तरात्मना यद्यर्थान्तरमवभासयेत्, ततो मानान्तरेण भ्रान्तिरेव स्यात्। सा च विवेकिनां न सम्भवतीत्यर्थानवभासिकासावभ्युपगन्तव्या। न चार्थानवभासिका बुद्धिः सम्भवतीति, व्यवहारानङ्गत्वापत्तेस्तावन्निरालम्बना बुद्धिर्न सम्भवतीत्युक्तम्। बुद्धिस्वाभाव्यादप्येवमित्याह—**किं चेति**। पुरुषप्रयोज्यत्वात्तदधीनोऽपि शब्दः प्रवृत्तिनिमित्तं विषयं विना न प्रवर्त्तते। घटे वैयात्यात्पटशब्दोच्चारणेऽपि बुद्ध्यनुपपत्तेः। बुद्धिस्तु स्वच्छन्दत्वाद्विषयं विनोत्पत्तुमेव नार्हतीत्यर्थः।

ननु स्वांश एव विषयो भविष्यतीत्याशङ्क्याह—**न चेति**। आरोपसम्भवात्कल्पना न युक्तेत्युक्त्वा, कल्पकाभावादपि तत्कल्पना न युक्तेत्याह—**अपि चेति**। अयमाशयः। स्वप्रत्ययानुसारेण श्रोत्रा वक्त्रभिप्रायानुसारात् श्रोतुरारोपितार्थप्रत्यये सति वक्तर्यारोपकल्पना युज्येत, तस्यैव देवदत्तपदसामानाधिकरण्यात्पूर्वं सिंहपदात्सम्बन्धग्रहणकालावगतानारोपितसिंहत्वरूपार्थप्रतीतेस्तत्सामानाधिकरण्योत्तरकालमपि सिंहसादृश्यमात्रप्रतीतेरारोपितार्थप्रत्ययाभावान्न वक्तर्यारोपकल्पना युक्तेति, पदजन्यस्य पदार्थज्ञानस्य केवलसंस्कारजन्यत्वाभावात् स्मृतित्वाभावेऽपि अधिकार्थत्वाभावसूचनार्थः स्मृतित्वोपचारः। ततश्चानारोपितमुख्यार्थग्रहणान्न श्रोतरि, नापि वक्तर्यारोप इत्यर्थः। श्लोकं व्याचष्टे—**सर्वथेति**। यदि द्रुतमध्यादिविभागवदर्थविशेषनिरपेक्षो गौणमुख्यविभागः स्यात्, ततः श्रोतृप्रत्ययानपेक्षत्वात् परत्र परशब्दप्रयोगान्यथानुपपत्त्याध्यारोपः कल्प्येतापि। स त्वर्थप्रत्ययापेक्षत्वात् तस्य श्रोतृगामित्वात् श्रोतुरारोपितार्थप्रत्ययान्यथानुपत्त्या कल्पनीयः। न च तस्यारोपितार्थप्रत्ययः सम्भवतीति दर्शयितुम्—**श्रोतॄणामित्युक्तम्**। सादृश्यादीत्यादिशब्देन तद्धेतुगुणयोगोपादानम्।

नन्वेवं सति सादृश्यस्यैव वाच्यत्वापत्तेः स्वार्थत्यागः स्यादित्याशङ्क्य—**सा चेत्युक्तम्**। तमेवन्यायं प्रश्नपूर्वकं वक्तुम्—**कथमित्युक्तम्**। अस्यैव श्लोकस्योत्तरार्द्धं व्याख्यातुम्—**यथा चेत्युक्तम्**। कीदृशी तर्हि परत्र परशब्दप्रयोगोपपत्त्यर्थं वक्तरि कल्पनेत्यपेक्षायाम्, प्रश्नपूर्वकम्—**कथं तर्हीत्युक्तम्**। प्रसह्यकारित्वादेः सिंहत्वेनाविनाभावे देवदत्तेऽनुपपत्तिप्रसङ्गात् बहुव्रीह्यभ्युपगमे चाविनाभूतशब्दस्य विशेषणत्वात्पूर्वनिपातापत्तिः। व्याधिते[1] च सिंहे व्यभिचारात् 'प्रसह्यकारिता तत्र प्रायेणे'ति भाष्ये प्रायशब्देनाविनाभावानादरसूचनात्सम्बन्धमात्रविवक्षयाऽविनाभूतशब्दः। अनेन च 'कथं तु स्वार्थाभिधानेन प्रत्यय' इत्यादिभाष्यमनागतावेक्षणन्यायेन व्याख्यातं भवति।

---

१. बाधिते इति २ पु० पा०।

स्वोत्प्रेक्षितगौणवृत्तिलक्षणाभ्युपगमेऽनवस्थितवेदप्रामाण्यापह्नवस्यानुचितत्वात्, नारोपितार्थवृत्तित्वं गौण्या वृत्तेर्लक्षणमित्याह—**किञ्चेति**। आरोपस्य पुरुषधर्मप्रदर्शनार्थं वक्तृणामित्युक्तम्। किं तर्हि गौणवृत्तिनिमित्तलक्षणमित्याशङ्क्य, इति गुणाश्रया इतीतिकरणेन प्रकारवाचिना तत्सिद्ध्यादिगुणयोगस्य गौणवृत्तिनिमित्तत्वाभिधानात्सूचितम्। गुणयोगवृत्तित्वं गौणवृत्तिलक्षणमाह—**तस्मादिति**। उपपदाधीनवृत्तित्वादीनां गौणवृत्तिलक्षणानां वेदाप्रामाण्यापादकत्वात्, इहा निराकरणेऽपि गौणमुख्याधिकरणे निराकरिष्यमाणत्वात् परिशेषसिद्धिप्रदर्शनार्थम्—**तस्मादित्युक्तम्**। गुणयोगनिमित्तायाः शब्दप्रवृत्तेर्गौणत्वेनेष्टत्वाद्वाच्यगुणानां प्रभूतानामर्थान्तरे वृत्तिर्योगः प्रयोजनप्रवृत्तौ निमित्तं यस्य, स गौण इत्येवं व्याख्येयम्। गुणानामशब्दत्वाच्छाब्देनार्थान्तरेणान्वयानुपपत्तिः प्रसह्यकारित्वादिवच्च दंष्ट्रित्वादेरपि प्रत्ययापत्तिरित्याशङ्कानिरासार्थम्। यो हि मन्यते प्रसह्यकारिणं प्रत्याय येयमिति भाष्यावयवव्याख्यानार्थेन सिंहत्वाविनाभूतानेकक्रियागुणसमुदायोऽनेन विवक्षित इति ग्रन्थेन प्रसह्यकारित्वादीनां तात्पर्यवृत्त्या व्यवस्थितं शाब्दत्वं यत्सूचितम्, तद्विवरणार्थेन प्रयोजनशब्देन प्रयुज्यतेऽनेनेति व्युत्पत्त्या निमित्तमुक्तम्। भेदनादेर्निमित्तस्य होमादिप्रयोजकत्वाभ्युपगमान्नाशेषिणोऽपि तावन्निमित्तस्याप्रयोजकत्वासम्भवोपालम्भः। इह तु यथा रामस्य वेतनदाने निमित्तस्य शेषित्वरूपमपि प्रयोजनत्वम्, तथा देवदत्ते सिंहगुणयोगस्य सिंहशब्दप्रवृत्तौ निमित्तत्ववत् प्रतिपाद्यत्वेन प्रयोजनत्वमप्यस्तीतिसूचयितुं प्रयोजनशब्देनाभिधानं युक्तमेव।

आरोपवाद्यस्य लक्षणस्याव्यापकत्वमाशङ्कते—**नन्वेवमिति**। खपुष्पादेरसद्रूपत्वेन गुणाभावादात्मादौ तद्गुणयोगानुपपत्तेः खपुष्पादीनां शब्दानां खपुष्पमात्मेत्यादिगौणप्रयोगोऽस्मिन् लक्षणे न युज्येतेत्यर्थः। नन्वसद्रूपस्याध्यारोपयितुमशक्यत्वादारोपितार्थवृत्तित्वमपि खपुष्पमात्मेत्यादिगौणप्रयोगेष्वसम्भवादव्यापकं स्यादित्याशङ्क्याह—**सांख्याविति**। असद्रूपस्यारोपासम्भवे प्रधानादेरसद्रूपत्वेनाऽप्रतीतिप्रसङ्गात्, अप्रसक्तस्य प्रधानं नास्तीत्यादिनिषेधायोगात्, प्रसक्त्यर्थं सद्रूपत्वाभ्युपगमे निषेधविरोधापत्तेः, अरारोपस्यैव प्रसक्तिसिद्धयेऽवश्याङ्गीकार्यत्वादसतोऽप्यारोपापत्तेरात्मनि खपुष्पत्वारोपेण खपुष्पमात्मेति गौणप्रयोगसम्भवान्नास्मत्पक्षे लक्षणस्याव्यापकतेत्याशयः।

सिद्धान्ते तु त्वदीयस्यैव लक्षणस्याव्यापकत्वाख्यो दोषः नास्मदीयस्येति प्रतिजानाति तावत्—**अत्रेति**। परपक्षे तावत्प्रश्नपूर्वकं दोषमुपपादयति—**कुत इति**। किंचिद्रूपमुपादायाऽतद्रूपे तद्रूपकल्पनारोपः। खपुष्पस्य त्वेवंविधमिति निरूपणासम्भवान्न शक्या कल्पना। गौणप्रयोगसिद्ध्यर्थं चार्थान्तरेऽन्यारोपो वाच्यः। अर्थान्तरस्य चात्मनो सद्रूपतयात्मा खपुष्पमात्मेति गौणशब्दप्रयोक्तुर्बौद्धादेरभिप्रेतत्वान्न तस्मिन्नारोपोपत्तिरित्यर्थः।

एतदेव व्यतिरेकमुखेनोत्तरार्द्धेन विवृतम्। गुणे रूपं सत्ता च प्रज्ञाते यस्येति विग्रहः। एतदेवोपपादयति—**यस्तावदिति**। असद्रूपस्यारोपाभावे प्रसक्त्यभावात् खपुष्पं नास्तीति

प्रयोगानुपपत्तेरसद्रूपस्यापि खपुष्पादेरारोपोऽङ्गीकार्य इति या शङ्का प्रधानादिनिषेधोपन्यासेन कृता, सा येऽपि प्रधानात्मादीनां निषेधा इत्युपन्यासपूर्वकं पश्चात्परिहरिष्यते। खपुष्पमात्मेत्यादिगौणप्रयोगे तावत् खपुष्पशब्दस्यारोपासम्भवोऽधुनोच्यत इति तावच्छब्दार्थः। खपुष्पशब्दस्य गौणत्वद्योतनार्थः स्थानीयशब्दः। अनिर्द्धारितरूपस्यारोपासम्भवद्योतनार्थं निर्द्धारणार्थतरप्प्रत्ययप्रयोगः। अन्यस्य चान्यत्रारोपो भवति। खपुष्पस्यारोप्यत्वेनाभिमतस्यारोप्याश्रयादात्मनो अन्यत्वेनानवधारणान्नात्मन्यारोपः सम्भवतीत्यन्यशब्देनोक्तम्।

नन्वात्मनः सद्रूपादसद्रूपस्यान्यता प्रसिद्धैवेत्याशङ्क्य—**त्वयेत्युक्तम्**। नैरात्म्यवादिनो बौद्धादेः खपुष्पमात्मेति प्रयोगः। तन्मते चासत्वाविशेषान्नान्यत्वं सम्भवतीत्याशयः। यद्यपि खपुष्पशब्दस्य खाधारपुष्पावच्छिन्नाभाववाचित्वं गम्यते, तयोश्चासाववाचित्वं पूर्वेणैवाभावेऽवगते इत्यादिना वक्ष्यते। तेनैव न्यायेनात्मशब्दस्यापि नैरात्म्यपक्षे शरीराद्याधाराहम्प्रत्ययग्राह्यावच्छिन्नाभाववाचित्वं गम्यते। तयोश्चाभावयोर्द्धर्मिप्रतियोगिभेदेन भेदादात्मनोऽन्यत् खपुष्पं नैरात्म्यवादिनापि वक्तुं शक्यते, तथापि खपुष्पत्वरूपस्य शरीराद्याधाराहम्प्रत्ययग्राह्यरूपेऽप्यारोपाभावात् स्वरूपेण चाऽभावयोरवैलक्षण्यान्नारोप्यरूपस्यान्यत्वावधारणं सम्भवतीति दर्शयितुम्—**यदप्यारोप्येतेत्युक्तम्**। तस्मादात्मनि खपुष्पारोपासम्भवेनारोपितार्थवृत्तित्वस्यास्मिन्प्रयोगेऽनुपपत्तेस्तवैवाऽव्यापकत्वलक्षणो दोषः सिद्ध इति तात्पर्यार्थः।

ननु खस्य पुष्पस्य च कथंचित् संसर्गकल्पनमारोपात्मकं खपुष्पमभ्युपगम्यात्मन्यारोपयिष्यते इत्याशङ्क्याह—**तेनेति**। एवं[1] खपुष्पशब्दस्य खपुष्पसंसर्गात्मकारोपितार्थत्वेन खपुष्प एव गौणत्वोपपत्तेर्गौणशब्दवृत्तिविषयतया खपुष्पस्यैवारोप्यस्य गौणत्वमापद्येत, न चैतस्यारोप्यस्य लोके गौणत्व प्रसिद्धम्। सिंहत्वादेरारोप्यस्य गौणत्वप्रसिद्धेः। ततश्चैतद्गौणत्वलक्षणमतिव्यापकं स्यादित्याशयः। येन कारणेन स्वरूपेणानवधारितस्यान्यत्रारोपो न सम्भवति तेन पूर्वं तावत्स्वरूपमेवारोपात्मकमभ्युपगन्तव्यम्, ततश्च गौणतापि तस्यैवापद्येत। सा च लोकाननुसारित्वादयुक्तेत्यर्थः। गौणमुख्यविभागस्यार्थविषयत्वेऽर्थस्यारोपितार्थवृत्तिशब्दविषयत्वं गौणत्वलक्षणमभिप्रेत्यैतदुक्तम्। शब्दविषयत्वेन चैतस्मिन्नारोप्ये खपुष्पशब्दस्य सिंहादिशब्दस्येव लोके गौणत्वप्रतीतिरिति व्याख्येयम्।

ननु नारोपितार्थशब्दावृत्तिविषयत्वगौणत्वलक्षणम्, येन सिंहत्वादेरपि गौणत्वं प्रसज्येत, किं त्वारोपितार्थाश्रयत्वम्। ततश्च सिंहत्वादेस्तावन्न गौणत्वापत्तिः। खपुष्पस्य तु गौणत्वं युक्तमेव। तथा हि खपुष्पशब्दस्याभावेऽवृत्तिर्वक्ष्यते। न चाभावस्तस्य वाच्यः तथा सति खपुष्पं नास्तीति प्रयोगानुपपत्तिप्रसङ्गात्। अतो स्ववाच्यखपुष्पसंसर्गारोपेणाभावे वर्त्तमानः खपुष्पशब्दो गौणो भविष्यति आरोपितखपुष्पसंसर्गाश्रयत्वाभावा-

---

१. एवं सतीति २ पु० पा०।

च्चाभावो गौण इत्याशङ्क्याह—**मुख्य इति**। अयमाशयः—समासं विना खपुष्पशब्दात्संसर्गाप्रतीतेः समासवाच्यत्वं खपुष्पसंसर्गस्याभ्युपगन्तव्यम्। विग्रहवाक्यार्थश्च समासवाच्यः। प्रमाणान्तरेण च खस्य पुष्पस्य खसंसर्गाप्रतीतेः खस्य पुष्पमस्तीति विग्रहायोगात्खस्य पुष्पं नास्तीति वाक्यार्थे समासप्रतीतेः खपुष्पभाव एव खपुष्पशब्दस्य वाच्यत्वान्मुख्योऽर्थ इति संसर्गस्यैव वाच्यत्वं पराभिमतमभ्युपेत्य लोके गौणस्य मुख्यपूर्वकत्वप्रसिद्धेर्मुख्यार्थान्तराभावेन गौणताऽनेन निरस्यते।

नन्वारोपितस्य मृगतोयादेर्लोके मुख्यत्वप्रसिद्ध्यभावात्पारिशेष्याद्गौणतैव स्यात् इत्याशङ्क्याह—**प्रथमेति**। गौणमुख्यव्यवहारे मुखवत् प्रथमं प्रतीयमानं मुख्यत्वेन प्रसिद्धमित्याशयः। ऊहितां शङ्कामुद्घाटयति—**कथमिति**। आरोपिते मुख्यत्ववत् गौणत्वस्याप्यप्रसिद्धेस्तुल्यत्वमाह—**तुल्यमिति**। नन्वसतो गुणयोगासम्भवान्माभूत्तन्निमित्तं गौणवत्त्वम्। आरोपनिमित्तं तु भविष्यतीत्याशङ्क्याह—**यत्र हीति**। आरोप्याश्रयस्य देवदत्तादेर्गौणत्वं प्रसिद्धम्, नारोप्यस्य सिंहत्वादेरित्यर्थः। नन्विहाप्यारोप्यस्य खपुष्पस्य गौणवत्त्वासम्भवेऽप्यारोप्याश्रयस्यात्मनो गौणत्वं भविष्यतीत्याशङ्क्याह—**खपुष्पं चेति**। खपुष्पमात्मेति गौणप्रयोगवादिमते आरोप्यखपुष्पाश्रयत्वेनाभिमतस्यात्मनोऽप्यसत्त्वाद्भेदाधिष्ठानत्वेन चाश्रयाश्रयिभावस्य खपुष्प एव खपुष्पारोपस्यानाशङ्कनीयत्वात्। आश्रयानपेक्षकेवलारोप्यमात्ररूपतया खपुष्पस्यारोपितार्थाश्रयस्वरूपलोकप्रसिद्ध्यनुसारिलक्षणायोगात् आरोपितार्थवृत्तिशब्दविषयत्वमेवारोपवादिना लक्षणं वाच्यम्। तच्च मुख्येऽपि सिंहत्वादावारोपवादिमतेऽस्तीति अतिव्यापकं लक्षणं स्यात्, आरोपितार्थाश्रयत्वं तु खपुष्पमात्मेति प्रयोगेऽनुपपत्तेरव्यापकमिति तात्पर्यार्थः।

एवमविद्यमानमेव खस्य पुष्पस्य च संसर्गमारोप्य खपुष्पाभावे खपुष्पशब्दप्रवृत्तेरारोपितार्थवृत्तित्वं शब्दस्य गौणत्वलक्षणमारोपितार्थवृत्तिशब्दविषयत्वं चार्थारोपवाद्यभिमतमित्यङ्गीकृत्य सिंहत्वेऽपि सिंहशब्दस्य गौणत्वापत्तेर्दूषणेऽभिहिते, अध्यारोपवादी स्वाभिमतमारोपिताश्रयत्वाद् गौणवत्त्वलक्षणं मनसि कृत्वा खपुष्पस्याप्यारोपितघटादिसत्ताश्रयत्वाद् गौणत्वमस्त्येवेति नाव्यापकत्वं लक्षणस्येति शङ्कते—**तत्रैतत्स्यादिति**। आत्मन्यारोपितसत्ताकत्वरूपखपुष्पगुणदर्शनेन देवदत्ते सिंहत्ववत् खपुष्पत्वारोपोपपत्तेः। खपुष्पमात्मेति अत्रापि गौणप्रयोगलक्षणसद्भावादव्यापकत्वमनाशङ्क्यमेवेति भावः। विद्यमानस्य घटादेर्यत्सद्रूपम्, तत्तत्र खपुष्पादावारोप्यते, प्रातिपदिकार्थः सत्तेति सर्वप्रातिपदिकानां सत्तावाचित्वस्मृतेः। ततश्चारोपितसत्तारूपार्थाश्रयत्वात् खपुष्पादेर्गौणताऽस्त्येवेत्यर्थः। सर्वप्रातिपदिकानां सत्तावाचित्वस्याकृत्यधिकरणे निरस्तत्वात्, स्मृतेश्च लिङ्गसंख्यान्वययोग्यसिद्धरूपार्थप्रतिपादनमात्रपरत्वात्। यदि परं प्रतीतिबलेन खपुष्पशब्दस्य सत्तावाचित्वं वक्तव्यम्। न च खपुष्पादिशब्दात् सद्रूपप्रतीतिरस्तीति निराकरोति—**तदिति**।

नन्वेवं सति पदात्सदसत्साधारणरूपार्थप्रतीतेरभावस्यापि खपुष्पशब्दवाच्यत्वं न स्यात्। अथ सदसत्साधारणपदार्थस्वरूपमात्रवाचिनोऽपि पदस्य व्यवहारयोग्यार्थाभिधाने

तात्पर्यात् साधारणस्वरूपस्य च व्यवहारायोग्यत्वात् अभाववाचितेष्यते । तथा सति खपुष्पं नास्तीति असद्रूपस्य खपुष्पस्य निषेधे सद्रूपत्वापत्तेर्निषेधान्वयसिद्ध्यर्थं खपुष्पशब्दस्य सद्रूपताभिधायितैवेष्टेत्याशङ्क्याह—**अवश्यं हीति** । यदि कश्चिदाकाशस्यानन्तदेशगतत्वान्न क्वचिद्देशे पुष्पमस्तीत्यवधारणाऽशक्तेः । खपुष्पशब्दस्याभावेन सम्बन्धग्रहणाऽयोगात् भावाऽभावासन्देहे चाभावज्ञानस्य भावज्ञानसापेक्षत्वात् सद्रूपेणैव खपुष्पस्यानुभवमाशङ्केत, तं प्रति, उदाहरणान्तरम् निषेधान्वयस्तु समासार्थकथनार्थो भवीष्यतीत्याशयः । ननु घटादेः सद्रूपस्यैव वाच्यत्वदर्शनात् शशविषाणादेरपि वाच्यत्वसिद्ध्यर्थं प्रमाणानवगतमपि सद्रूपत्वं घटादिगतमारोपयिष्यते इत्याशङ्क्याह—**न चेति** । सम्बन्धिग्रहणपूर्वकसम्बन्धग्रहणापेक्षत्वात् वाच्यत्वस्य, यो अर्थो येन रूपेण सम्बन्धिग्रहणकाले गृहीतः तेनैव रूपेण तस्य सम्बन्धग्रहणात्तद्वाच्यत्वं न्याय्यम् । न चार्थान्तरस्य सद्रूपत्वग्रहणमात्रेण खपुष्पादौ सद्रूपेण सम्बन्धग्रहणं सम्भवतीत्यर्थः ।

नन्ववयवद्वारा खपुष्पशब्दस्यार्थप्रतिपादकत्वात्, तयोश्च सद्रूपेण खेन पुष्पेण च सम्बन्धानुभवात्तद्रूपप्रत्ययोपपत्तिरित्याशङ्क्याह—**ययोरिति** । समासार्थोऽत्र चिन्त्यते । न चासौ सद्रूपतया सम्बन्धग्रहणं विना सद्रूपतयाभिधातुं शक्यत इति भावः । ननु सद्रूपत्वेनाप्रतीतस्य शशविषाणादेरप्रसक्तत्वान्निषेधो न युज्येतेत्याशङ्कते—**कथं तर्हीति** । सद्रूपप्रतीतावपि निषेधानुपपत्तिसाम्यमाह—**सदिति** । सद्रूपत्वेनापि प्रतीतस्य घटादेर्देशान्तरादौ निषेधदर्शनादात्यन्तिकेत्युक्तम् । एतदेव विवृणोति—**पश्येति** । शशविषाणादौ देशकालाद्यवच्छेदाप्रतीतेरविशेषेण सर्वत्र भावाभावप्रसङ्गादेकत्रैवेत्युक्तम् । ननु वस्तुवृत्त्यैकत्र सदसद्रूपत्वासम्भवेऽपि, आरोपेण सद्रूपतया प्रतीतस्यैकत्र शुक्तिरजतवदविरुद्धो निषेध इत्याशङ्कते—**तेनेति** । येन कारणेनैकत्र वस्तुवृत्त्या सदसत्त्वे विरुध्येते, तेनैव कारणेन सद्रूपत्वमारोप्यत इत्युक्तमिति शेषः । खपुष्पे वान्यदारोप्येत, खपुष्पं वान्यत्र । तस्य त्वसिद्धसद्भावत्वान्नारोप्याश्रयत्वेनारोप्यारोपविषयत्वं युक्तमित्याह—**नेति** । यथापवरके घटो नास्तीति निषेधोऽपवरकाख्यस्य निषेधाश्रयस्य निषेध्यघटप्रदेशात् प्रदेशान्तरस्य सद्भावम्, निषेध्यस्य च घटस्य प्रदेशान्तरे सद्भावमपेक्षते, तथारोप्येऽप्यारोप्याश्रयस्योषरादेरारोप्यतोयादिप्रदेशान्नद्यादेः प्रदेशान्तरस्य सद्भावम्, आरोप्यस्य च तोयादेः प्रदेशान्तरे नद्यादौ सद्भावमपेक्षते इति प्रदेशान्तरसद्भावशब्दस्यावृत्त्या षष्ठीसमासम्, सप्तमीसमासं चाङ्गीकृत्य योज्यम् ।

ननु यद्यपि खपुष्पस्यात्यन्तासत्त्वान्न घटादिसत्तायास्तस्मिन्नारोपः, तस्य वा घटादावारोपः सम्भवति, तथापि वृक्षादौ ज्ञातसद्भावस्य पुष्पस्याकाशेऽध्यारोपो भविष्यतीत्याशङ्क्याह—**न चेति** । खपुष्पशब्दस्य केसरादिमद्रूपाकाशावयवपरिमाणवाचित्वाद् वृक्षादिपुष्पस्य च तादृूप्याभावेन ततोऽन्यत्वात् नान्यस्य वृक्षादिपुष्पस्य सद्भावेनान्यस्याकाशावयवसन्निवेशविशेषरूपपरिमाणात्मकस्यात्यन्तासत्ताकस्यारोपः सम्भवतीत्यर्थः ।

ननु यथा केशोऽण्ड्रकादौ मनुष्यमस्तकादिगतकेशेभ्योऽन्यत्वेऽप्याकाशावयवसंनिवेशविशेषरूपपरिमाणात्मकानामत्यन्तासतां केशानामारोपो दृष्टः तथेहापि भविष्यतीत्याशङ्क्य—**असम्बन्धादित्युक्तम्**। तिमिरादिविरलीकृता लोकविच्छिन्नास्तमोऽवयवास्तत्रात्यन्तसौक्ष्म्यकार्ष्ण्यादिदैर्घ्यादिगुणसम्बन्धेन सादृश्यात् केशरूपतयाऽऽरोप्यन्ते। खपुष्पवृक्षपुष्पयोस्तु सदसद्रूपतया कथं चिदवयवसामान्यसम्बन्धाभावेनाऽसादृश्यान्न केशोऽण्ड्रकादितुल्यतेत्याशयः।

यद्वाऽन्यस्यारोपाश्रयभूतस्यावाकाशस्य सद्भावेनान्यस्यात्यन्तासतः खपुष्पस्यारोपो न सिध्यति, सदसतोरेकधर्मसम्बन्धाभावेनाऽसादृश्यादित्यर्थः।

अथ वा प्रदेशान्तरस्यारोप्याश्रयस्य खपुष्पस्यासत्त्वात् न घटादिसत्तायास्तस्मिन्नारोपः सम्भवतीति पूर्वग्रन्थेनोक्ते, खपुष्पस्यैव तर्हि घटादावारोपोऽस्त्वित्याशङ्क्य, अन्यस्य प्रदेशान्तरस्य घटादेः सद्भावमात्रेणान्यस्यारोपविषयस्य खपुष्पस्यारोपो न सिध्यति, खपुष्पस्य घटादिनैकधर्मसम्बन्धाभावेनाऽसादृश्यादित्यनेन ग्रन्थेनोच्यते।

यद्यपि ध्वनिधर्माणामसदृशेष्वपि वर्णेष्वभिव्यङ्ग्याभिव्यञ्जकत्वसम्बन्धनिमित्तारोपदर्शनात् पित्तधर्मस्य च पीतत्वस्य चाक्षुषरश्मीनां शङ्खप्राप्तौ रश्मिसंयुक्तानां पित्तावयवानामपि शङ्खप्राप्तेः शङ्खसंयुक्तसमवायनिमित्तारोपदर्शनात् सादृश्यादिना केनचित्सम्बन्धेनारोपो भवति, न सम्बन्धं विनेति दर्शयितुम्—**असम्बन्धादित्युक्तम्**। तथापि द्रव्यस्य द्रव्यान्तरे सादृश्यं विनारोपादर्शनात् सादृश्याभावार्थत्वेन व्याख्यातम्।

ननूषरेण तोयस्य सादृश्यादिना केनचित्सम्बन्धाभावात् कथं तत्र तोयादेरारोप इत्याशङ्कते—**कथमिति**। तोयस्य सद्रूपत्वे सादृश्यादिसम्बन्धसद्भावात् शौक्ल्यचञ्चलत्वादिधर्मकरश्मिसंयुक्तेनोषरेण सह साक्षात् सादृश्याभावेऽप्यूषरसंयुक्तरश्मिसादृश्यादारोपोपपत्तिरित्याशयेन परिहरति—**प्रदेशान्तरेति**। खपुष्पस्यासम्भवा[1]दारोपासम्भवेऽभिहिते तोयस्याप्यसम्बन्धादारोपो न स्यादित्याशङ्कार्थप्रतीतेरत्यन्तासत्त्वाभिप्रायस्य च प्रत्यक्षविरोधेनानुपपत्तेस्तन्निरासार्थं तोयस्य सद्भावादूषरसम्बन्धप्रतीतेरिति व्याख्येयम्। सम्बन्धापेक्षणे च तत्रासतः, अत्यन्तासतश्च विशेषाभावात्तत्रासदपि भ्रान्तौ प्रकाशते, अत्यन्तासत्तु न प्रकाशते इति व्यवस्थाहेत्वभावात्परिभाषामात्रापत्तेरत्यन्तासतोऽपि शुक्तिरजततादात्म्यस्य प्रकाशनदर्शनात् प्रदेशान्तरसत्ताया न कश्चिदुपयोगः। अत एव च प्रज्ञातगुणसत्ताकमित्यत्र गुणाग्रहणं कृतम्।

ननु शशविषाणस्य निषेधानुपपत्तौ शशविषाणं नास्तीति नास्तिशब्दप्रयोगः कथं घटेतेत्याशङ्कते—**कथमिति**। नायं नास्तिशब्दो निषेधार्थः। किं त्वनुवादमात्रमिति परिहरति—**पूर्वेणेति**। अप्राप्तस्यानुवादानुपपत्तिमाशङ्क्य—**पूर्वेणैवेत्युक्तम्**। प्रमाणान्तरेण कदाचिच्छशशृङ्गानुपलब्धेः शशे विषाणमस्तीति विग्रहवाक्यार्थे समासायोगाद-

---

१. असम्बन्धादिति २ पु० पा०।

भावाख्यप्रमाणावगतस्यात्यन्ताभावस्यैव सम्बन्धग्रहणसम्भवात्समासार्थत्वोपपत्तेः । शशे विषाणं नास्तीति विग्रहवाक्यार्थेऽन्तर्णीतनिषेधोऽयं समासश्चन्द्राननमित्यन्तर्णीतवत्यर्थो यथेति अवधारणाच्छशविषाणशब्दस्यात्यन्ताभाववाचित्वप्रतीतेः । शशविषाणशब्देनैव अभावावगमान्नास्तिशब्दस्यानुवादत्वोपपत्तिरित्यर्थः ।

अनुवादमात्रानर्थक्यापत्तेरपरितोषात्, अभावसामान्यस्य नास्तिशब्दोक्तस्य विशेषणार्थोऽत्यन्ताभावाख्यविशेषवाचिशशविषाणप्रयोग इति परिहारान्तरमाह—**अथ वेति** । नन्वीदृशएव विशेषणविशेष्यभावः न तु विपरीत इति कथं निश्चेयमत आह—**नेति** । अर्थद्वारशब्दयोर्विशेषणविशेष्यभावः । न चाभावसामान्येनात्यन्ताभावाख्यविशेषरूपं शशविषाणं विशेष्यते । गोत्वादिसामान्यं हि बाहुलेयादिविशेषान्तरे व्यभिचा च्छाबलेयादिविशेषेण विशेष्यमाणं दृष्टम्, विशेषस्य व्यभिचारात् सामान्येन विशेषणं न युक्तमित्यर्थः ।

एवमपि शशविषाणादिशब्दादेव कर्कादिवद्व्यभिचाराभावेन विशेषान्तर्गतसामान्यप्रतीतेरपि सिद्धेर्नास्तिशब्दानर्थक्यमपरिहार्यमित्यपरितोषात्प्रमाणान्तरेण शशे शृङ्गाप्रतीतावपि शशविषाणशब्दादेव वस्तुतोऽत्यन्तभाववचनादपि भ्रान्तस्य संसर्गप्रतीतिं वारयितुम् अयं निषेध इति परिहारान्तरमाह—**अथ वेति** ।

नन्ववयवार्थग्रहणे षष्ठ्यर्थस्मृतिप्रसङ्गेऽपि योग्यानुपलब्ध्या शशस्य शृङ्गराहित्यावगमात् कथं संसर्गभ्रान्तिरित्याशङ्क्य—**न चेत्युक्तम्** । एवं त्वाभाववाचित्ववादिनं प्रति प्रयोगानुपपत्तेरपरिहारेणाऽपरितोषात् स्वमतेन समासार्थकथनार्थत्वं नास्तिशब्दस्य द्योतयितुमाह - **अथ वेति** । शशे विषाणं नास्तीति विग्रहवाक्यसूचनार्थम्—**विनैवेत्युक्तम्** । शृङ्गोत्पत्त्याश्रयत्वे निषेधविवक्षासूचनाय—**अधिकरणत्वेनेत्युक्तम्** । विषाणस्याधेयत्वविवक्षायामपि प्रथमाया एव प्रयोज्यत्वात् तस्याश्च निर्द्देशार्थत्वेनैव प्राप्तेः विषाणं च निर्दिश्येतेत्येतावदुक्तम् । नन्वसतोऽध्यारोपं विनाऽधेयत्वनिर्देशायोगात् परपक्षापत्तिरित्याशङ्क्य—**गवादीत्युक्तम्** । शशगतस्य शृङ्गस्य निर्देशो नारोपं विना युज्यते । गवादिगतस्य तु प्रमाणसिद्धत्वान्नारोपापेक्षेति भावः । गवादिगतस्य निषेधानुपपत्तिमाशङ्क्य, निषेधभूतस्य शशसम्बन्धविषयत्वं वक्तुम्—**तयोरित्युक्तम्** । **शशविषाणयोः** सम्बन्धस्याप्रसक्तेर्निषेधानर्थक्यमाशङ्क्य शशविषाणस्यात्यन्ताभावेन सह वाच्यवाचकसम्बन्धकथनार्थत्वसूचनार्थं तेनैवेत्युक्तम् । चन्द्राननेन समासार्थकथनार्थं चन्द्र इवाननमिति विग्रहवाक्यवच्छशविषाणसमासार्थकथनार्थेन शशे विषाणं नास्तीति विग्रहवाक्येनानुभूतस्य सम्बन्धस्य श्रोतुः शशविषाणशब्दः तद्वाक्यप्रतिपाद्यमेवात्यन्ताभावं गमयिष्यतीत्येदर्थं नास्तिशब्दप्रयोग इति व्यवहितेनान्वयः । क्रियायां च क्रियार्थायामिति लृङः क्रियार्थक्रियोपपदनिमित्तत्वात् गमयिष्यतीत्येतदर्थमित्यर्थो लभ्यते । शशविषाणं नाम किमित्यपेक्षायामेकदेशेन विग्रहवाक्यसूचनार्थे नास्तीति शब्दप्रयोग इति तात्पर्यार्थः । शशे विषाणं

नास्तीति विग्रहवाक्यस्य निषेधार्थत्वमभ्युपगम्य समासार्थकथनप्रयोजनं तेनैवानुभूतसम्बन्धस्येत्यनेन सूचितम् ।

वस्तुतस्तु । भावान्तरमभावोऽन्यो न कश्चिदनिरूपणादित्यनेन न्यायेन भावनिरपेक्षस्याभावस्य वक्तुमशक्यत्वात् शृङ्गाकारेण परिणतः शशमूर्द्धैव भावरूपो विग्रहवाक्यार्थ इति निषेधार्थत्वाभावान्नारोपापेक्षेत्याह— **अथ वेति** । ततश्च शशविषाणं नास्तीत्यत्राप्येकदेशेन समासार्थकथनार्थविग्रहवाक्यसूचनार्थस्य नास्तिशब्दस्याप्यसावेव विषय इति निषेधार्थत्वाभावादारोपाभावेऽपि प्रयोगाविरोध इति निषेधार्थत्वाभावादारोपाभावेऽपि प्रयोगाविरोध इति । कथं तर्हि शशविषाणं नास्तीति प्रयोग इत्याशङ्कानिरासमुपसंहरति— **इतीति** । भावस्यापि नास्तिबुद्धिविषयत्वं दृष्टान्तेनोपपादयितुं वृद्धसम्मतिमाह— **तथा चेति** । तिष्ठतेर्गतिनिवृत्तौ स्मरणेऽपि, पूर्वां सन्ध्यां जपंस्तिष्ठेदित्यादावूर्ध्वावस्थाने प्रयोगाद्वस्तुवाचितोक्ता । स्वातन्त्र्यमात्रं चाभावस्य नास्तीति अभिप्रेतम् । न सर्वात्मना निरूपणाभावः । सदसद्विवेकाभावप्रसङ्गादिति । एवं तवैवायं दोष इत्यनेनारोपितार्थवृत्तित्वस्य गौणत्वलक्षणस्याव्यापकत्वं दोषं प्रतिज्ञातम् । खपुष्पस्यात्मन्यारोपायोगात्तदारोपेण खपुष्पस्यात्मनि वृत्त्यनुपपत्तेः खपुष्पमात्मेति गौणप्रयोगे लक्षणासम्भवेनोपपाद्यम् ।

नन्वेवं सति खपुष्पादीनां स्वार्थाविनाभूतगुणाभावात् गौणप्रयोगाभावप्रसङ्ग इत्यनेनाशङ्कितं गुणयोगनिमित्तवृत्तित्वस्य गौणलक्षणस्याव्यापकत्वं परिहरति— **तेनेति** । आरोपितस्य खपुष्पादेर्गुणायोगाद्वास्तवत्वप्रतिपादनार्थो लब्धशब्दः । मुख्यार्थान्तराभावादित्यादिनोपपादितस्य मुख्यत्वस्य गौणप्रयोगोपपादनोपयोगसूचनार्थो मुख्यशब्दः । येन कारणेन लब्धो वास्तवोऽत्यन्ताभावाख्यो वाच्योऽर्थः शशविषाणादिशब्दानाम्, तेनान्यत्राप्यात्मादौ शशविषाणमात्मेति गौणः प्रयोगः सिद्ध इत्यर्थः । तन्निमित्तगुणाभिधानार्थम् प्रसिद्धीत्युक्तम् । वस्तुतः सद्रूपत्वेन या प्रसिद्धिः । ततोऽन्येन प्रकारेण सद्रूपत्वेनावस्थानं नाम खपुष्पादेर्गुण इति भावः । मुख्यशब्दसूचितम् मुख्यत्वस्य गौणत्वोपयोगं प्रकटयितुमाह— **तव त्विति** । आरोपवादिनो ह्याकाशस्य पुष्पस्य च संसर्गः खपुष्पशब्दस्य मुख्योऽर्थोऽभिमतः । तस्य च वस्तुतोऽसत्त्वात्, तत्पूर्वको गौणो न सिध्येदिति भावः । लब्धमुख्यार्थानामिति मुख्यशब्देनैव न चैतस्य लोके गौणत्वप्रतीतेरिति खपुष्पगौणत्वप्रतीतेरिति खपुष्पगौणत्वनिरासस्यार्थाद् गौणप्रयोगोपपादनोपयोगं सूचितं प्रकटयितुमाह— **यदि चेति** । पुष्पाकाशयोः संसर्गारोपेण स्वार्थेऽत्यन्ताभावे खपुष्पशब्दस्य गौणता आरोपवादिनोऽभिमता तथा च सत्यात्मनि गौणत्वं न स्यादित्यर्थः । एतदेवोपपादयति— **न हीति** । नन्वग्निशब्दस्यापि[1] गौणमाणवकद्वाराऽन्यत्र गौणत्वं कस्मान्न भवतीत्याशङ्क्य, षाष्ठं न्यायमाह— **तथा चेति** । प्रतिनिधावुपात्तेऽपचरिते प्रतिनिधिसदृशमुपादेयम्, मुख्यसदृशं वेति सन्देहे प्रतिनिधेरुपात्तत्वेन शास्त्रपरिगृहीतत्वात्तादृशोपादाने प्राप्ते, 'वचनात्त्वन्याय्यमभावे तत्सामान्येन प्रतिनिधेरभावात् इतरस्ये (६-३) ति सूत्रादभावे

१. पूर्वपक्षसूत्रादिति २ पु० पा० ।

तत्सामान्येन प्रतिनिधिरिति पदत्रयानुषङ्गेण प्रतिनिधावुपात्ते तदभावेन तत्सामान्येन प्रतिनिधिर्नोपादेयः मुख्याऽवयवोऽभादितस्योपात्तस्यापि प्रतिनिधेरचोदितत्वेनेतरसाम्यादिति षष्ठे वक्ष्यते । तेनैव न्यायेन माणवकस्याप्यवाच्यत्वसामान्यान्नाग्निशब्दस्य तद्द्वाराऽन्यत्र गौणतेत्याशयः । यदप्यसद्रूपस्यारोपाभावे सांख्यादिकल्पितप्रधानादिनिषेधो न— **सम्भवतीत्युक्तम्** । तदप्यनुभाषणपूर्वकं परिहरति —**येऽपीति** । परमाणुकारणवादिभिर्वैशेषिकैः परमाणुभ्योऽन्यदेव प्रधानरूपम्, शरीरात्मवादिभिश्चार्वाकैः शरीरादन्यादृगात्मरूपं शरीरादीत्यादिशब्दोपात्तज्ञानसन्तानात्मवादिभिर्बौद्धैर्ज्ञानसन्तानादन्यादृगात्मादीत्यादिशब्दोपात्तपृथिव्यप्तेजोवाय्वाख्यचतुष्टयतत्त्ववाचिभिश्चार्वाकैस्तेभ्योऽन्यादृक्रूपशब्दोपलक्षितमाकाशादितत्त्वं नास्तीति वर्ण्यत इति योज्यम् । श्लोकं व्याचष्टे—**प्रधानादिति** । एवं 'स्वार्थाभिधानेनेति' भाष्यमुपसंहारार्थत्वेन व्याख्यातुमाह—**तस्मादिति** । एवम् इति गुणाश्रयाः इति सूत्रावयवसूचितं गौणवृत्तिलक्षणाभिधानार्थं 'कथमगुणवचनो गुणं ब्रूयादि'ति भाष्यं व्याख्याय, प्रकृतोदाहरणे कीदृशो गुणसम्बन्ध इति प्रश्नोत्तरत्वेन तत्सिद्धिशब्दव्याख्यानार्थं इह त्विति भाष्यं व्याचष्टे—**अतश्चेति** । 'प्राप्योति परमां सिद्धिमि'त्यादावोप्सिते कार्ये सिद्धिशब्दप्रयोगात्, तस्य मुख्यस्याऽर्थस्य सिद्धिः कार्यमस्येति व्यधिकरणबहुव्रीहिणा तत्सिद्धिशब्देन तत्कार्यकारिता उक्तेति दर्शयितुं स्वार्थस्य यजमानस्य या सिद्धिःकार्यं— **तत्करत्वमित्युक्तम्** । भाष्यं तु कीदृशः प्रस्तरादेर्यजमानगुणसम्बन्ध इति पृष्टे यजमानसिद्धिकरः प्रस्तरादिरिति योज्यम् । सर्वो हीत्यादिभाष्यं संक्षिप्य व्याचष्टे—**प्रस्तरेति** । तस्यादित्युपसंहारभाष्यापेक्षया विध्यर्थवादविचारानादरः सूचितः । जात्यादिविषयभूतेष्वप्याग्नेयाद्युदाहरणेषु विध्यर्थवादविचारोपक्रमस्य गुणवादनिमित्ताभिधानावसरकरणार्थत्वात्त विध्यर्थवादविचारेऽभिनिवेष्टव्यमिति सूचयितुमाह—**एतेनेति** । तत्सिद्धेर्गुणवादनिमित्तत्वाभिधानेन जात्यादीन्यपि तन्निमित्तत्वेन व्याख्यातानीत्यर्थः ॥२२॥

भा० प्र०—पूर्व प्रदर्शित पूर्वपक्ष के समाधान में सिद्धान्ती का कथन है कि अष्टाकपाल आदि को गुणफलविधि मानने पर आनर्थक्य होने से ब्रह्मवर्चस्, पूतत्व आदि अष्टाकपालत्व आदि का कारण अर्थात् प्रयोजक नहीं हो सकता है, अर्थात् ब्रह्मवर्चस् आदि फल के लिए अष्टाकपाल आदि गुणों का विधान नहीं हो सकता है, क्योंकि, गुणफलविधि स्थल में गुण याग के कर्ता के ही फल विशेष का जनक होता है, जैसे— 'गो-दोहनेन पशुकामस्य' इत्यादि स्थलों में गुण का विधान होने पर कर्म के कर्ता का ही पशुरूप फल का जनक होता है । अतः, फलविशेष के उद्देश्य में गुणविशेष में कर्ता की प्रवृत्ति होने से फल ही कर्ता का कारण अर्थात् गुणविशेष में प्रयोजक या प्रवृत्ति का हेतु है । इसीलिए सूत्र में कहा गया है कि 'कर्तुर्हि कारणानि' । इस स्थल में अष्टाकपालत्व आदि गुणों से पूतत्व आदि जो फल उत्पन्न होते हैं, वे वैश्वानर इष्टि के कर्ता के साथ समवेत नहीं हैं, वरन् वह उत्पन्न कुमार के साथ ही सम्बद्ध है, इसीलिए 'गो दोहन' आदि दृष्टान्त देकर इसको फलविधि नहीं कहा जा सकता है ।

इसको फलविधि मानने पर इस स्थान में वाक्यभेद मानना ही पड़ेगा, क्योंकि, विभिन्न फलों के उद्देश्य से विभिन्न गुणों का विधान करने पर विधायक वाक्य की भी विभिन्नता अपरिहार्य है, किन्तु इस स्थल में पर्यालोचना करने पर यह देखा जाता है कि 'वैश्वानरं द्वादशकपालम्' इत्यादि से आरम्भ कर 'यस्मिन् जाते एतामिष्टि निर्वपति स पूत एव तेजस्व्यन्नाद इन्द्रियावी पशुमान् भवति' इतने अंशों में एकवाक्यता ही रहती है, क्योंकि, 'वैश्वानरं द्वादशकपालम्' इत्यादि वाक्य में जो इष्टि के विधान का उपक्रम किया गया है—'यस्मिन् जाते एतामिष्टि निर्वपति' इस वाक्य में उसी का उपसंहार किया गया है, क्योंकि, इस स्थल में 'एताम् इष्टिम्' इस अंश में 'एतद्' शब्द के द्वारा वैश्वानर इष्टि का ही उल्लेख किया गया है, अतः, इस उपक्रम और उपसंहार के मध्य में पठित 'अष्टाकपालः' इत्यादि वाक्य यदि उसके साथ एकवाक्यतापन्न न होकर विभिन्न अर्थ को व्यक्त करे तो ये अनर्थक हो जायेंगे। इसलिए, उपक्रम उपसंहार भङ्ग रूप दोष का प्रसङ्ग होने से अष्टाकपालादि वाक्य को स्वतन्त्र नहीं कहा जा सकता है, स्वतन्त्र नहीं कहने पर इनको अर्थवाद ही मानना होगा, क्योंकि, ऐसा न मानने पर विधिवाक्य के साथ उनका अन्वय नहीं हो सकता है, इसलिए ब्रह्मवर्चस् आदि फल अष्टत्व आदि गुण का कारण अर्थात् प्रयोजक नहीं है, वरन् इस स्थल में गुणार्थ अर्थात् प्रशंसा प्रयोजन में ही वाक्य का तात्पर्य है, इसीलिए सूत्र में कहा गया है कि, 'गुणार्थो हि विधीयते'। फलतः अंशीभूत द्वादशत्व की गई है।

'आनर्थक्यात्' = वाक्य की अनर्थकता होने से, 'अकारणम्' = ब्रह्मवर्चस् आदि फल अष्टत्वादि गुणों का फल नहीं है, 'हि' = क्योंकि, 'कर्तुः' = कर्ता का अर्थात् याग कर्ता का, 'कारणानि' = कारण होता है, अर्थात् फल यागकर्ता का ही कारण अर्थात् प्रयोजक होता है। जो प्रयोजक होता है वही फल का भोग करेगा, 'गुणार्थः' = गुण के लिए अर्थात् स्तुतिरूप प्रयोजन, 'हि' = एव अवश्य 'विधीयते' = तात्पर्य का विषय होता है ॥ २२ ॥

इति वैश्वानर इष्टि अधिकरण।

॥ अथ आग्नेयादिशब्दानां ब्राह्मणस्तुत्यर्थत्वाधिकरणम् ॥ १३ ॥

न्या० सु०—भाष्योक्तोदाहरणं दूषयति— **तत्रेति**। अर्थवादान्तरोक्तप्रजापतिमुखाद्येकप्रकृतिप्रभवत्वेन ब्राह्मणादीनामग्न्यादिभिर्भ्रातृवत्[1] सम्बन्धसद्भावादर्थवादोक्तस्यापि च सम्बन्धस्यान्यैः स्तुवत इत्यादिषु मुख्यशब्दप्रवृत्तिनिमित्तत्वदर्शनात् ब्राह्मणादिष्वाग्नेयादिशब्दानां मुख्यतेत्याशयः। ननु देवतातद्धितस्येह मुख्यत्वं न सम्भवतीत्याह—**येनेति**। 'सर्वत्राग्निकलिभ्यां ढगिति सम्बन्धमात्रेऽग्निशब्दात् ढक्स्मृतेस्तस्येदमिति चाण्प्रत्ययस्यापि तन्मात्रे स्मृतेः नायं देवताभिराग्नेयादिभिर्देवतासम्बन्ध एव वक्तुं शक्यत इत्याह — **देवतेति**।

1. भ्रातृत्वेति २ पु० पा०।

ननु देवताशब्दस्य सम्बन्धिशब्दत्वात् प्रतिसम्बन्धित्यज्यमानं हविरेवापेक्ष्य प्रवृत्तेः शिष्यस्यैव गुरुसम्बन्धवत्तत् विषयएव[1] देवतासम्बन्धो नान्यस्येत्याशङ्कयाह—**न हीति**। त्यक्तारमपेक्ष्य देवताशब्दस्याप्रवृत्तावपि देवतोद्देशपूर्वकद्रव्यत्यागाख्यैकक्रियाविषयनियमलक्षणत्वात् द्रव्यदेवतयोः सम्बन्धस्यैतस्य च त्यक्त्रपेक्षत्वात् येन देवतोद्देशपूर्वकद्रव्यत्यागाख्यैकक्रियासम्बन्धेन द्रव्यस्य सम्बन्धिनी देवता, तेनैव त्यक्तुरपीत्यर्थः। त्यक्तुरपि देवतासम्बन्धे भाष्यकृत संमतिमाह—**यथेति**। आग्नेयो ब्राह्मणः, स सोमेनेष्ट्वाऽग्नीषोमीयो भवति, यत्देवादः पौर्णमासं हविस्तत्, तर्ह्यनुनिर्वपेत्तर्हि स उभयदेवतो भवतीत्यनेन सोमयागादूद्ध्वं ब्राह्मणोऽग्नीषोमदेवतो भवतीत्यभिधानादग्नीषोमीयहविर्मात्रमुत्कृष्यते, न दर्शपौर्णमासौ, नापि कृत्स्ना पौर्णमासीत्युक्तेः, कथं पुरुषस्य देवतान्वय इत्याशङ्कयैतत्पञ्चमे भाष्यकृतोक्तं दूषणमुपसंहरति- **तस्मादिति**।

स्वयमुदाहरणान्तरमाह—**अत इति**। नन्वग्न्यादिगुणस्य ब्राह्मणादिष्वदर्शनात् कथमत्र गौणप्रयोगोपपत्तिरित्याशङ्कयाह—**अग्निरिति**। भाष्यकृता गुणवादनिमित्ताभिधानावसरार्थं को गुणवाद इत्यनेन वादशब्दमुद्यतइति कर्मव्युत्पत्त्याऽभिधेयवाचिनमङ्गीकृत्य कर्मधारये को गुणो विवक्षित इति पृष्ट्वा, अग्निसम्बन्ध इत्यनेनाग्नेयशब्दवाच्यस्याग्निदेवत्यस्य हविषोऽग्निसम्बन्ध इति पृष्ट्वा तदुत्तरत्वेन जातिशब्दव्याख्यानाय—**एकजातीयत्वादित्युक्तम्**। तत्सामान्यवाचितया जातिशब्दव्याख्यानार्थमिति शङ्कां निवर्त्तयितुमाह—**जातिरिति**। जातिशब्दस्याद्यभावविकारवाचित्वज्ञापनार्थं जन्मेत्युक्तम्। जायतेऽस्मादिति व्युत्पत्त्या प्रकृतिवाचित्वज्ञापनायोपादानशब्देनोत्पत्तिहेतुः प्रकृतिरुक्ता। तच्छब्दानुषङ्गेण तस्य मुख्यस्याग्नेर्या जातिः प्रकृतिः, सैव यस्य ब्राह्मणस्य जातिरिति पूर्ववद्व्यधिकरणबहुव्रीहिणा तज्जातिशब्देन द्वयोरेकजातीयतोक्ता भवतीति कृत्वैकजातीयत्वं भाष्यकृतोक्तम्।

ननु संसारानादित्वेनाग्निब्राह्मणादेः प्रजापतिमुखादिप्रकृतिकत्वं नास्तीति किमेवजातीयकत्वमिति भाष्येणाशङ्कयार्थवादोपन्यासस्याशङ्कानिरासार्थत्वं सूचयितुमाह—**यद्यपि चेत्**। अन्तरशब्देनाग्नेयो ब्राह्मण इत्यस्याग्नेयमष्टाकपालं निर्वपेत् ब्राह्मणो ब्रह्मवर्चसकाम इति विध्यन्तरशेषत्वेनार्थवादत्वसिद्धान्तानुसन्धानं सूचितम्। एकस्मिन्निति भाष्यतात्पर्यं वक्तुमिहेत्युक्तम्। इहोदाहरणेऽग्न्यादिशब्दस्य ब्राह्मणादौ प्रवृत्तिनिमित्ततां प्रतिपत्स्यत इत्यर्थः। स्वरूपार्थस्त्वग्निर्हीत्यनेनैवानागतावेक्षणेनोक्तः ॥ २३ ॥ (२२)

॥ यूपादिशब्दानां यजमानस्तुत्यर्थत्वाधिकरणम् ॥ १४ ॥

भा० प्र०—'तत्सिद्धिजातिसारूप्यप्रशंसाभूमलिङ्गसमवायाः' यह एक ही सूत्र है, किन्तु भाष्य में विभाग कर सात सूत्रों के रूप में व्याख्या की है। एक सूत्र होने के कारण द्वन्द्वसमास के अन्त में श्रूयमाण 'गुणाश्रयाः' प्रत्येक के साथ सम्बन्ध होता है अर्थात्

---

१. विषयस्थाने हविषइति २ पु० पा०।

'तत्सिद्धिः गुणाश्रया'। पूर्व अधिकरण में कहा गया है कि 'अष्टाकपालम्' इस वाक्य में अंश के द्वारा जिसका यह अंश है, उस अंशी की प्रशंसा की गई है। इस प्रसङ्ग में पूर्वपक्षवालों का कहना है कि इस प्रकार अर्थवाद सम्भव होने पर भी 'यजमानः प्रस्तरः' (तै० सं० २।६।५) 'यजमान एककपालः' (तै० ब्रा० १।६।३) इत्यादि स्थलों में पूर्वोक्त नियम के अनुसार अर्थवादवाक्य इसको नहीं माना जा सकता है क्योंकि प्रस्तुत प्रसङ्ग में पूर्वोक्त नियम के अनुसार अर्थवाद नहीं हो सकता है, कारण, इस स्थल में अष्टाकपाल एवं द्वादशकपाल के समान अंशांशिभाव नहीं है। 'वायुर्वै क्षेपिष्ठा देवता' इत्यादि वाक्यों को जिस प्रकार अर्थवाद माना गया है, उसी तरह यहाँ नहीं कहा जा सकता है, क्योंकि, 'वायुर्वै' इत्यादि स्थल में उत्कर्ष का प्रतिपादन किया गया है। किन्तु प्रकृत में किसी प्रकार के उत्कर्ष का प्रतिपादन नहीं होता है, अतः, 'यजमानः प्रस्तरः' यह अर्थवाद वाक्य नहीं है, किन्तु यहाँ 'प्रस्तर' यह यजमान का नामधेय है। क्योंकि, 'उद्भिदा यजेत' इत्यादि के समान इस स्थल में भी सामानाधिकरण्य है, या इस स्थल में गुणविधि भी हो सकती है, इनमें पूर्व प्राप्त यजमान में 'प्रस्तर' द्रव्य रूप गुण का विधान नहीं हो सकता है, क्योंकि, अचेतन प्रस्तर = एक मुट्ठी कुशा यजमान का कार्य जो जप आदि है, उसका सम्पादन नहीं कर सकती है, इसलिए, अन्य वचन से प्राप्त प्रस्तर कार्य में यजमान रूप गुण का ही विधान हो सकता है। 'क्योंकि, यजमान प्रस्तर के कार्य में समर्थ है।

'प्रस्तरे जुहुमासादति, सर्वा वा स्रुचः' प्रस्तररूपी कुशमुष्टि पर जुहु को या स्रुच = यज्ञ का पात्रविशेष को रखता है। स्रुचः यज्ञ का पात्र विशेष आदि का धारण करना ही प्रस्तर का कार्य है, क्योंकि, बिछाये हुए प्रस्तर अर्थात् कुशसमूहपर स्रुक् आदि यज्ञ के पात्र विशेष को स्थापित किया जाता है, यजमान भी हाथ के द्वारा स्रुक् आदि यज्ञपात्र को धारण करने में समर्थ है। अतः 'यजमानः प्रस्तरः' यह नामधेय या गुणविधि है।

इसका समाधान करते हुए सिद्धान्ती ने कहा है कि इसको नामधेय नहीं कहा जा सकता है, क्योंकि, यजमान और प्रस्तर इन दोनों का अर्थ अत्यन्त प्रसिद्ध है, पूर्व प्रकरण के विवरण से ही यह निश्चित है, गो आदि शब्दों के समान जिनका अर्थ अत्यन्त प्रसिद्ध अर्थात् निरूढ़ है, उनको नामधेय नहीं कहा जा सकता है। यहाँ गुणविधि भी नहीं हो सकती है, क्योंकि, गुणविधि मानने पर प्रस्तर रूप कार्य में यजमान के गुण का विधान मानना होगा। व्रतग्रहण ऋत्विक् का वरण, आहुति प्रदान, आदि गुणों का प्रस्तर में विधान सम्भव नहीं है, इसी प्रकार स्रुक् धारण आदि प्रस्तर का कार्य है, इसी प्रकार प्रस्तर अर्थात् दर्भमुष्टि का अग्नि में प्रक्षिप्त होना भी प्रस्तर का

कार्य है, क्योंकि, 'सूक्तवाक्येन प्रस्तरं प्रहरति' (का० श्रौ० ३।१।३१) = सूक्त वाक्य से अर्थात् मन्त्र विशेष के द्वारा प्रस्तर = दर्भमुष्टि को प्रहार = होम अर्थात् अग्नि में प्रक्षेप करे। इन प्रस्तर कार्यों का यजमान में विधान होने पर यजमान को भी अग्नि में होम करना होगा ऐसी स्थिति में वास्तव कर्म का लोप हो हो जायगा। अतः, इसको गुणविधि नहीं माना जा सकता है। वेदवाक्य होने से इसे अप्रमाण भी नहीं कहा जा सकता है। अतः, 'यजमानः प्रस्तरः' यह वाक्य कर्मों के मध्य विधेय प्रस्तर = कर्ममुष्टि की प्रशंसा को ही व्यक्त कर रहा है, अतः यह अर्थवाद वाक्य है। यजमान के कार्य यागसम्पादन करने को प्रस्तर = दर्भमुष्टि भी स्नुक् के धारण आदि कार्यों के द्वारा सम्पादन करता है, अतः, गुणवृत्ति के अनुसार प्रस्तर को यजमान कह कर प्रशंसा की गई है। 'सिंहो देवदत्तः' = देवदत्त सिंह है, 'अग्निः माणवकः' = माणवक = उपनीत या उपनयन योग्य बालक अग्नि है, इत्यादि में सिंह का शौर्य, क्रौर्य आदि, अथवा अग्नि की पीतिमाया तेजस्वितारूप सादृश्य रहने से जैसे गुणवृत्ति के अनुसार देवदत्त को सिंह और माणवक को अग्नि कहा जाता है, प्रस्तुत प्रसङ्ग में भी इसी प्रकार यजमान का धर्म जो क्रिया का सम्पादन करना है उसके सादृश्य से यजमान को प्रस्तर कहा जाता है। इस स्थल में लाक्षणिक अर्थ नहीं माना जाता है, क्योंकि, शक्य = अभिधाशक्ति के द्वारा बोध्य अर्थात् वाच्य अर्थ के साथ सम्बन्धयुक्त जो अन्य अर्थ जहाँ विशेष प्रयोजन से या रूढ़ि प्रसिद्धि से या वृद्धि प्रयोग से बोधित होता है—उसी को लक्षणा कहते हैं। जैसे मञ्चाः क्रोशन्ति=मञ्च सम्बन्धयुक्त पुरुष चिल्लाता है, 'यष्टीः प्रवेशय= यष्टि सम्बन्धयुक्त यष्टिधारी पुरुष का बोध कराता है, 'गङ्गायां घोषः' गङ्गा शब्द गङ्गा के साथ सम्बन्धयुक्त गङ्गातीर का बोध कराता है, किन्तु गौण अर्थ के स्थल में लक्षणा के द्वारा प्रथम शब्द का धर्म विशेष बोधित होता है, इसके बाद उसके सादृश्य के अनुसार अर्थ विशेष की प्रतीति होती है। यही कारण है कि वृत्तिकार ने कहा है—

अभिधेयाऽविनाभूते प्रवृत्तिर्लक्षणेष्यते।
लक्ष्यमाणगुणैर्योगाद् वृत्तिरिष्टा तु गौणता॥

अभिधेय=वाच्य अर्थ के साथ नियतसम्बन्धविशिष्ट जो अर्थान्तर जिससे प्रतीत होता है—वह लक्षणावृत्ति है। जो लक्षणा के द्वारा बोधित धर्म विशेष के सादृश्य के अनुसार अन्य अर्थ का बोध कराती है—वह गौणी वृत्ति है। जैसे 'सिंहो देवदत्तः' आदि। इस प्रस्तुत प्रसङ्ग में तत्सिद्धिः अर्थात् उसके मुख्य अर्थ की सिद्धि=साधकता शक्ति के अनुसार प्रस्तर को यजमान कहा गया है, 'यजमानः एककपालः' यहाँ भी इसी प्रकार एककपाल=पुरोडाश यजमान शब्द से कहे जाते हैं।

युधिष्ठिर मीमांसक ने इस सूत्र के विवरण में कहा है—प्रस्तर-दर्शपौर्णमासेष्टि में वेदि में बिछाने के लिए जो चार मुट्ठी (=खड़ी हुई कुशाओं को इकट्ठा करके मुट्ठी में बांधकर) कुशा काटी जाती है, उनमें बर्हिर्देव सदनं दामि (मैं० सं० १।१।२) मंत्र से काटी गई प्रथम मुट्ठी की कुशा प्रस्तर कहाती है। ३ मुट्ठी कुशावेदि में प्रागग्र (=पूर्व दिशा में जिसका अग्रभाग होवे, इस प्रकार) बिछाई जाती है। बिछाते समय पश्चिम में काटा हुआ जो भाग होता है, उसे अन्य कुशा के अग्रभाग से छिपाया जाता है, अर्थात् पहले बिछाई हुई कुशा के पश्चिम कटे हुए भाग के ऊपर अगले कुशाग्र भाग को रखा जाता है। इन्हीं तीन मुट्ठियों में मध्य (=द्वितीय) मुट्ठी से अथवा अन्य कुशा से सुदृढ़ दो कुशा के ग्रहण किए गए तृण विधृत कहाते हैं। इन विधृतसंज्ञक दो कुशा तृणों को पूर्व बिछाई गई प्रागग्र कुशाओं के ऊपर उदग्र (अग्रभाग उत्तर में और कटा भाग दक्षिण में रखते हुए) दोनों में अन्तर (=फासला) रखा जाता है। इनके ऊपर प्रस्तर संज्ञक प्रथम मुट्ठी की कुशा प्रागग्र फैलाकर बिछाई जाती है। पूर्व बिछाई प्रागग्र कुशा और ऊपर प्रागग्र बिछाई प्रस्तर-संज्ञक कुशाओं के मध्य में विधृति-संज्ञक दो कुशातृण रहते हैं, वे पूर्व बिछाई प्रागग्र कुशाओं से प्रस्तर-संज्ञक प्रागग्रकुशाओं को पृथक् करते हैं। पृथक्ता से धारण करने के कारण उक्त दो उदग्र तृण विधृति कहते हैं। इष्टि के अन्त में प्रस्तर-संज्ञक कुशाओं को अग्नि में छोड़ा जाता है। इन प्रस्तरसंज्ञक कुशाओं के ऊपर जुहू वा उपभृत् ध्रुवा आदि सभी स्रुक् संज्ञक पात्र रखे जाते हैं।

इस सूत्र के विवरण में कहा है – न च सर्वे गुणसमुदायवचनाः— इस पर तंत्रवार्तिक में कुमारिल ने लिखा है—अन्य आचार्यों का मत है कि सब सिंह आदि शब्द जाति-गुणक्रिया के समुदाय के वाचक हैं। समस्त समुदायरूप अर्थ के सम्भव न होने पर कतिपय गुण वा क्रियाओं के योग में भी वे प्रयुक्त होते हैं। सम्भव है भट्टकुमारिल का यह संकेत महाभाष्यकार पतञ्जलि की ओर हो। भगवान् पतञ्जलि ने नञ् (अष्टा० २।२।६) सूत्र के शब्द में अथवा सर्व एते शब्दागुणे समुदायेषु वर्तन्ते ब्राह्मणः क्षत्रियो वैश्यः शूद्र इति (ब्राह्मणादि सब शब्द गुणसमुदाय को कहते हैं) लिखकर विस्तार से इनकी करिका की है। मीमांसक द्रव्यशब्दों को जातिवाचक मानते हैं। इसी कारण गुण समु-दायवचनता में शबर स्वामी ने दो दोष दिये हैं। (१) समुदायवाची शब्द अवयव में वर्तमान नहीं होते (२) पूर्व (मी० १।२।३३) स्थापित 'द्रव्य शब्द जातिवाचक है' इस सिद्धान्त की हानि होवेगी। जहाँ तक प्रथम दोष का सम्बन्ध है, वह हमारे विचार चिन्त्य है। समुदायवाचक शब्द का अवयव में प्रयोग लोग में प्रायः होता है। यथा हस्तपाद आदि का समुदाय शरीर कहाता है। हस्तपाद आदि एकदेश में चोट लगने पर जैसे 'मेरा हाथ वा पाँव दुःखता है अथवा हाथ वा पाँव में चोट लगी है' का प्रयोग होता है, ऐसे ही मेरा शरीर दुःखता है, मेरे शरीर में चोट आई है का प्रयोग होता है। वनवृक्षसमुदाय का वाचक है। उसके एकदेश के आग से जल जाने पर लोग कहते

हैं—'वन जल गया।' शबर स्वामी ने वन की सत्ता का निराकरण मी० १।१।५ के भाष्य (पृ० ४०) में किया है। तदनुसार उनके मत में शरीर भी नहीं है क्योंकि अंगों के पृथक्-पृथक् कर देने पर शरीर नाम का कोई पदार्थ नहीं बचता। इस विषय में नैयायिकों का मत 'वृक्षसमुदाय का वाचक वन है' युक्त हैं। लोक भी इसी में प्रमाण है। दूसरा दोष मीमांसक मत में उचित है।

तत्सिद्धि-जाति-सारूप्य-प्रशंसा-भूम-लिङ्गसमवायोः तत्सिद्धि, जाति=जन्म, सारूप्य= सादृश्य, प्रशंसा, भूमा=बाहुल्य और लिङ्गसमवाय=किसी विशेष ज्ञापक शब्द के सन्निधान में पढ़े जाने पर या स्थिति रहने पर गुणाश्रयः=गुण के अर्थात् गौणीवृत्ति या गौण अर्थ के आश्रय अर्थात् निमित्त होते हैं। तत्सिद्धिः=उसकी यजमान कार्य की सिद्धि अर्थात् साधन करते हैं. "यजमानः प्रस्तरः" इस स्थल में प्रस्तर को=कुश समूह को यजमान कहा गया है, 'जातिः'=जन्म 'अर्थात् एकही स्थान से जन्म होने पर 'अग्निर्वै ब्राह्मणः' इस स्थल में ब्राह्मण को अग्नि कहा गया है। "सारूप्यम्"=सारूप्य अर्थात् तेजस्विता=उज्ज्वलता स्वरूप सादृश्य रहने पर "आदित्यो यूपः" इस स्थल में यूप को आदित्य कहा गया है, 'प्रशंसा', गौ एवं अश्व की प्रशंसा करने के लिए "अपशवो वा अन्ये गोऽश्वेभ्यः" इस वाक्य में गौ और अश्व को छोड़कर अन्य पशु को अपशु अर्थात् पशु के मध्य में गिनने योग्य नहीं है यह कहा है। 'भूमा'=आधिक्य या बाहुल्य रहने पर 'सृष्टिरूपदधाति' इस स्थल में जो मन्त्र सृष्टि शब्द से युक्त नहीं है उनको भी सृष्टि शब्द से युक्त कर निर्दिष्ट किया गया है, क्योंकि, अधिक मन्त्र सृष्टि शब्द से युक्त है, "लिङ्गसमवायः"=लिङ्ग अर्थात् ज्ञापक का समवाय अर्थात् सान्निध्य अर्थात् "प्राणभृत् उपदधाति" इस स्थल में प्राणशब्द से रहित मन्त्रों को भी प्राणभृत्=प्राणशब्द से युक्त कहा गया है, क्योंकि, इस स्थल में प्रथम मन्त्र प्राणशब्द से युक्त पढ़ा गया है, इसलिए उसके समीप में स्थित अन्य मन्त्रों को भी प्राणशब्द से रहित होने पर भी 'प्राणभृत्' नाम से उद्दिष्ट किया गया है। इस प्रकार कहे जाने से तत्सिद्धि, जाति, सारूप्य, प्रशंसा, भूमा एवं लिङ्गसमवाय ये इन छः कारणों से शब्द का गौण अर्थ प्रतीत होता है। अर्थात् इन कारणों के रहने पर शब्द का मुख्य अर्थ छोड़कर गौण अर्थ का ग्रहण किया जाता है। इस स्थल में तत्सिद्धि आदि छः कारणों में एक-एक का ग्रहण कर एक-एक अधिकरण की रचना की गई है। यह सत्य है कि सूत्र में एक ही साथ सभी का उल्लेख है, किन्तु व्याख्यान के सहज की दृष्टि से शबर स्वामी एवं वार्तिककार भी एक-एक साधन को लेकर एक-एक अधिकरण के रूप में वर्णन कर रहे हैं ॥ २३ ॥

न्या० सु०—लिङ्गसमवाया इति द्वन्द्वसमासे प्रथमाबहुवचनदर्शनात् तत्सिद्धिश्च जातिश्च सारूप्यं च प्रशंसा च भूमा च लिङ्गसमवायश्चेति प्रथमयैव सर्वत्र विगृहीतव्येऽपि प्रस्तरादेर्यजमानादिसारूप्यं तत्कार्यकरत्वादिधर्मसामान्यात् सम्भवदपि शब्दस्य

तत्कार्यंकरत्वादिमात्रे पर्यवसानेन शाब्दबुद्धिविषयत्वाभावात्, अविषयस्य च प्रतिपादनात्मकशब्दप्रवृत्तिनिमित्तत्वायोगात् न शब्दप्रतीतिविषयत्वाच्छब्दप्रवृत्तिनिमित्तमिति वैषम्यं दर्शयितुं पञ्चम्यध्याहृता। गुणाश्रयशब्देन सर्वेषां गौणत्वनिमित्तत्वेऽभिहिते पुनः सारूप्यस्य निमित्तत्वाभिधानाच्छाब्दबुद्धिविषयत्वात्मकनिमित्तत्वविशेषप्रतीतमेवाशयं शङ्कापूर्वकं विवृणोति—**नन्विति**। सारूप्यं विना गौणत्वाभात्, तस्य गौणत्वनिमित्तत्वेऽपि बोधकत्वातिरिक्तायाः शब्दस्य वृत्तेरभावान्निर्विषयायाश्च बुद्धेरसम्भवाच्छाब्दबुद्धिविषयस्यैव शब्दवृत्तिनिमित्तत्वं वाच्यम्। न शब्दतात्पर्यावधारणं विना शाब्दबुद्धिविषयत्वं युक्तम्। तत्कार्यकरत्वादिनिमित्ते च सारूप्ये तन्मात्रपर्यवसितस्य शब्दस्य तात्पर्यावधारणमशक्यम्। इह तु प्रत्यक्षत्वेन सारूप्यस्य प्रथमे प्रतीतेस्तत्रैव शब्दस्य तात्पर्यावधारणाच्छाब्दबुद्धिविषयत्वेन शब्दप्रवृत्तिनिमित्तत्वं युक्तमित्याशयः। चक्षुर्ग्राह्ये सादृश्ये तात्पर्याख्यविवक्षावधारणसम्भवात् शाब्दबुद्धिविषयत्वरूपशब्दप्रवृत्तिनिमित्तत्वविशेषाभिधानार्थं तत्कार्यकरत्वादिहेतुकेभ्यः सद्भावमात्रेण गौणत्वनिमित्तेभ्यः सादृश्येभ्योऽस्य पृथगसाधारण्येनेहोपादानमित्यर्थः। 'अशक्यत्वादि'ति सिद्धान्तभाष्यं यजमानेऽपि पशोर्बन्धुं शक्यत्वात् अयुक्तमाशङ्क्याह—**यजमानस्य हीति**। खलेवालीवदयूपस्यैव यूपकार्ये विधानात् यूपनिष्पत्तिमात्रापवर्गिणां धर्माणां निवृत्तावप्युत्तरवेदेः प्राग्देशे पशुधारणस्य निखननस्य च पशुनिरोधार्थत्वेन यूपकार्यान्तःपातात्, तत्कार्यापन्ने यजमाने प्राप्ते दक्षिणोपविष्टस्य पदार्थकरणविरोधप्रसङ्गादशक्यतेति भावः। आदित्यस्य यूपकार्यार्थित्वनिरासः कस्मान्न कृत इत्याशङ्क्य, स्पष्टत्वादिति सूचयितुमाह—**सहस्ररश्मेस्त्विति**। ननु दारुमय्यामादित्यप्रतिकृतौ शङ्क्यं पशुबन्धनमित्याशङ्क्याह—**यदि चेति**। प्रतीयमानयूपोच्छ्रयणविध्येकवाक्यत्वत्यागापत्तिदोषसूचनार्थम्—**नास्तिवाक्यादित्युक्तम्**। ननु 'श्येनचितं चिन्वीतेत्या'दौ सादृश्यसम्पत्तेरपि विधिविषयता दृष्टेत्याशङ्क्याह—**तदिति**। स्तुतौ गौणत्वसम्भवे विधौ तदाश्रयणं न युक्तमित्याशयः ॥२४॥ (२२)

॥ अपशवादिशब्दानां गवादिस्तुत्यर्थत्वाधिकरणम् ॥ १५ ॥

भा० प्र०—श्रुति में कहा गया है कि "आग्नेयो वै ब्राह्मणः" (तै० सं० २।६।३) ब्राह्मण आग्नेय है=अग्निसम्बन्धयुक्त है। इस स्थल में भी पूर्व अधिकरण के समान नामधेय एवं गुणविधि सङ्गत न होने से इसको अर्थवाद ही माना है। प्रकृत में 'तत्सिद्धि' के अनुसार गौण अर्थ नहीं हो सकता है, किन्तु जाति=जन्म के अनुसार गौण अर्थ हो सकता है। श्रुति में पठित है "प्रजापतिरकामयत प्रजाः सृजेयमिति। स मुखतस्त्रिवृतं निरमिमीत। तमग्निर्देवता अन्वसृज्यत, गायत्रीच्छन्दः, रथन्तरं साम, ब्राह्मणो मनुष्याणाम्, अजः पशूनाम्। तस्मात्ते मुख्याः, मुखतो ह्यसृज्यन्त। उरसोबाहुभ्यां पञ्चदशं निरमित। तमिन्द्रो देवताऽन्वसृज्यत, त्रिष्टुप्छन्दः, बृहत् साम, राजन्यो मनुष्याणाम्, अविः पशूनाम्। तस्मात्ते वीर्यवन्तः, वीर्याद्धि असृज्यन्त। उरुभ्यां मध्यतः सप्तदशं निरमिमीत। तं विश्वेदेवा देवता अन्वसृज्यन्त जगतीच्छन्दः,

वैरूपं साम, वैश्यो मनुष्याणाम्, गावः पशूनाम् (तै० सं० २।६।३)=प्रजापति ने कामना की कि प्रजा को उत्पन्न करूँ, उसने मुख से त्रिवृत्=स्तोम को उत्पन्न किया, उसके अग्नि देवता उत्पन्न हुआ, गायत्री छन्द, रथन्तरसंज्ञक साम, मनुष्यो में ब्राह्मण या पशुओं में अज, अतः ये मुख्य हैं, मुख से ही उत्पन्न हुए हैं, उर और बाहुओं से पञ्चदश=स्तोम को उत्पन्न किया, उसके बाद इन्द्र देवता उत्पन्न हुआ, त्रिष्टुप् छन्द, बृहत् संज्ञक साम, मनुष्यों में राजन्. और पशुओं में भेड़। इसलिए ये वीर्यवान्, वीर्य से ही उत्पन्न हुए हैं, मध्य भाग जङ्घाओं से सप्तदश स्तोम को उत्पन्न किया, उसके बाद विश्वेदेव देवता उत्पन्न हुए, जगती छन्द, वैरूप संज्ञक साम, मनुष्यों में वैश्य और पशुओं में गौएँ, इस प्रकार अनेक पदार्थों की उत्पत्ति करने पर एक जातीय एक पदार्थ जानने पर अन्य सजातीय भी हृदयङ्गम होता है। इस प्रकार श्रुति के अनुसार ब्राह्मण और अग्नि दोनों की ही जाति=जन्म सदृश अर्थात् एक स्थान से उत्पत्ति है। इसलिए जाति=जन्म के अनुसार ब्राह्मण को आग्नेय कहा गया है। "ऐन्द्रो राजन्यः वैश्यो वैश्वदेवः" (तै० सं० २।६।३) इत्यादि प्रसङ्ग में भी जाति जन्म के अनुसार क्षत्रिय को ऐन्द्र एवं वैश्य को वैश्वदेव कहा गया है।

सामवेद के दो भाग हैं—मन्त्र और गान। सामवेदीय सभी मन्त्र ऋक् अर्थात् पादबद्ध (पद्यरूप) हैं। साममन्त्रसंहिता के दो भाग हैं—पूर्वार्चिक और उत्तरार्चिक। पूर्वार्चिक में उन मन्त्रों का पाठ है. जिनमें विभिन्न ऋषियों ने सामगान का दर्शन किया। इसलिये पूर्वार्चिक की ऋचायें योनिऋक् कहाती हैं। एवं सामतृचे क्रियते (=एक साम तीन ऋषियों पर गाया जाता है) नियम के अनुसार किसी भी साम को योनि-ऋक् के साथ दो अन्य ऋचाओं को मिलाकर गान किया जाता है। इसलिये उत्तरार्चिक में पूर्वार्चिक की ऋचा के पश्चात् सामान्यतः दो ऋचायें और पढ़ी गई हैं। (कहीं-कहीं दो ही ऋचायें हैं, कहीं-कहीं उससे अधिक भी हैं, उन पर सामगान की व्यवस्था के पृथक् नियम हैं)।

एक साम तीन ऋचाओं पर गाया जाता है। इसकी तीन आवृत्तियाँ की जाती हैं। इन्हें पर्याय कहा जाता है। पर्याय में मन्त्रावृत्ति की संख्या के दो भेद से किए गए गान को स्तोम कहते हैं। उनके संख्या भेद से त्रिवृत्पञ्चदश सप्तदश एकविंशत्रिण व त्रयस्त्रिंश चतुस्त्रिंश चतुश्चत्वारिंश और अष्टचत्वारिंश नाम है। किस यज्ञ में किन साम का किस स्तोमरूप में गान करना चाहिए, इसका निर्देश ताण्ड्यब्राह्मण आदि याज्ञिक ग्रन्थों में उपलब्ध होता है। तीन ऋचाओं की तीन पर्यायों में जिस प्रकार आवृत्ति की जाती, उसे विष्टुति कहते हैं। स्तोमों के विष्टुतिभेद का निर्देश भी ताण्ड्य-ब्राह्मण आदि ग्रन्थों में उपलब्ध होता है। उसके अनुसार त्रिवृत् स्तोम की विष्टुति पञ्चदशस्तोम की ३ विष्टुतियाँ, सप्तदश स्तोम की ७ विष्टुतियाँ, एकविंशस्तोम की ४ विष्टुतियाँ, त्रिणव स्तोम की २ विष्टुतियाँ, त्रयस्त्रिंश स्तोत्र की ५ विष्टुतियाँ, चतु-

स्त्रिंशस्तोम की १ विष्टुति, चतुश्चत्वारिंशस्तोम के ३ विष्टुतियाँ और अष्टचत्वारिंशस्तोम की २ विष्टुतियाँ अर्थात् सब मिलाकर २८ विष्टुतियाँ होती हैं। इन विष्टुतियों के प्रकार के परिज्ञान के लिए गुरूवर्य म० म० श्री पं० चिन्नस्वामीजी संपादित ताण्ड्य-ब्राह्मण भाग २ की भूमिका देखनी चाहिए। हम यहाँ प्रकार के निदर्शन के लिए त्रिवृत्त स्तोम और पञ्चदशस्तोम की विष्टुतियों का चित्रण करते हैं। उन्हें इस प्रकार जानना चाहिए— प्रत्येक विष्टुति में ऊपर संकेतिक १-२-३ संख्या गोप साम की तीन ऋचाओं के क्रम की हैं। बायीं ओर बगल में तीन पर्यायों का निर्देश किया है। किस पर्याय में सामको किस ऋक्साम का कितनी बार उच्चारण होता है, उसका संकेत (—) ऐसी आड़ी वा (।) खड़ी रेखा से किया है। यथा—

त्रिवृत् स्तोम की विष्टुति

ऋक्क्रम-संख्या	१	२	३	गणना की स्मृति के लिए गूलर के वृक्ष के प्रादेशमात्र
तृतीय पर्याय	—	—	—	(१० अङ्गुल परिणाम) के कीलाकारि-तीक्ष्णाग्र काष्ठ
द्वितीय पर्याय	।	।	।	उतनी संख्या में दर्शाए गए ढंग से आड़े खड़े रखे जाते
प्रथम पर्याय	—	—	—	हैं। उन्हें याज्ञिक 'कुशा' कहते हैं।

इस स्तोम में प्रत्येक पर्याय में तीन ऋचाओं में गेय ऋक् साम का एक बार गान होने से ३×३=९ ऋचाओं पर साम का गान होने से यह त्रिवृत् (तीन आवर्तन) होने से त्रिवृत्त् स्तोम कहलाता है।

पञ्चदशस्तोम की प्रथम विष्टुति

ऋक् क्रमसंख्या	१	२	३
तृतीय पर्याय	—	—	—
द्वितीय पर्याय	।	।।।	।
प्रथम पर्याय	☰	—	—

इस स्तोम में १५ संख्या की उत्पत्ति के लिए प्रथम पर्याय में पहली ऋचा की ३ बार दूसरी और तीसरी का एक बार, इस प्रकार ३+१+१=५ प्रथम पर्याय में ५ संख्या उत्पन्न होती है। द्वितीय पर्याय में दूसरी ऋचा ३ बार, पहली और तीसरी का एक-एक बार (१+३+१=५)। तृतीय पर्याय में पहली दूसरी ऋचाओं का एक-एक बार और तीसरी का तीन बार (१+१+३=५)। इस प्रकार प्रत्येक पर्याय में एक-एक पञ्चक (=पाँच का समूह) की उत्पत्ति होने से ३×५=१५ संख्या बनती है। इसलिए इसका नाम पञ्चदशस्तोम है। पञ्चदशस्तोम की शेष दो विष्टुतियाँ इस प्रकार बनती है। एकादशस्तोम की द्वितीयविष्टुति पञ्चदशस्तोम की तृतीय विष्टुति—

ऋक् क्रमसंख्या	१	२	३		१	२	३	
तृतीय पर्याय	—	≡	≡	(७)	≡	—	≡	(७)
द्वितीय पर्याय	।	।	।	(३)	।	।।।	।	(५)
प्रथम पर्याय	≡	—	—	(५)	—	—	—	(३)

इस प्रकार इन विष्टुतियों में भी प्रतिपर्याय ऋक्संख्या के भेद से पञ्चदशसंख्या उत्पन्न होती है। विष्टुतियों की संख्या विशेष का भी निर्देश सामग्रन्थों में मिलता है।

इस प्रसङ्ग में वार्तिककार ने "आग्नेयो वै ब्राह्मणः" इस उदाहरण को छोड़कर "अग्निर्वै ब्राह्मणः" (तै० सं० ५।२।८) इस उदाहरण को समीचीन माना है, क्योंकि, "आग्नेया" यह शब्द तद्धितान्त होने से अन्य दृष्टि से भी इसकी उपपत्ति हो सकती है, किन्तु "अग्निर्वै ब्राह्मणः" इत्यादि में ब्राह्मण को अग्नि कहा गया है, इसमें जाति= जन्म ही स्थानगत सादृश्य ही गौणीवृत्ति का मूल है। "प्रजापतिरकामयत" इत्यादि श्रुति ही जाति=जन्म का ज्ञापक है ॥ २४ ॥

न्या० सु० – गोअश्वान् प्रशंसितुमित्यादिभाष्यात् प्रशंसायाः प्रयोजनत्वेन रामस्येव वेतनदाने निमित्ततोक्तेत्याभाति। तस्याश्च सर्वत्र प्रयोजनत्वाविशेषादिहोपादानमर्थक-मित्याशङ्क्ते—**नन्विति**। नात्र प्रयोजनत्वेन निमित्वं विवक्षितं, किं तु प्रसह्यकारित्वा-दिवदभिधेयलक्ष्यमाणत्वेनेत्याशयेन परिहरति—**फलमिति**। ननु गवाश्वव्यतिरेकेष्वजा-जाजिष्वपि पशुशब्दप्रवृत्तौ प्रशंसाया निमित्तत्वं न सम्भवति। गवाश्वावुपादेयत्वेन विहितौ प्रशंसितुमत्रान्येषां निन्दाया विवक्षितत्वा, इत्याशयेन कथं प्रशंसाप्रवृत्तिनिमित्त-त्वमिति पृच्छति—**कथमिति**। नञ्समासावयवभूतस्य पशुशब्दस्य समासान्तर्गत्याऽजादिषु प्रवृत्तौ प्रशंसानिमित्तमित्याशयेनोतरमाह—**गवेति**। नञ्समासावयवभूतेन पशुशब्देन प्रशस्ततां लक्षयित्वा नञ्समासेनाऽन्यपशुषु तद्भावः कथ्यत इत्यर्थः। ननु पशुशब्दस्य नञ्समासे कृते निषेधपर्यवसायित्वादकृते च परशब्दत्वाभावान्न प्राशस्त्यलक्षणार्थता युक्तेत्याशङ्क्य—**पूर्वमित्युक्तम्**। समासविध्यर्थं तद्योग्यार्थलक्षणा गङ्गावास्यादिशब्दवद-विरुद्धेत्याशयः। नन्वजादेरपि पयोदानाद्युपकारित्वेन प्राशस्त्यसद्भावान्निषेधानुपपत्ति-रित्याशङ्क्य—**गवेत्युक्तम्**। गवाश्वन्यत्वोक्त्या तद्गतप्राशस्त्यातिशयलक्षणार्थताऽवसी-यत इत्याशयः। उदाहरणान्तरविषयावादिशब्दौ।

ननु पशुत्वाभाव एव नञ्समासेन कस्मान्न कथ्यत इत्याशङ्क्याह—**नेति**। पशुत्व-स्यायं निषेधः तल्लक्षितस्य वा यागादिकार्यस्य पुत्रकार्यमकुर्वतीय पुत्रे न ममैष पुत्र इति। तत्राद्ये प्रत्यक्षविरोधो द्वितीयेऽग्नीषोमीय इत्यादिवचनविरोध इत्यर्थः। अनेन चोत्पत्तिरनर्थिकास्यादिति भाष्यावयवगतेनोत्पत्तिशब्देन प्राथम्यगुणयोगात्पशुयज्ञसत्रग्राहि-प्रत्यक्षमुक्तम्। तस्य च निर्विषयत्वापत्तिः स्वरूपनिषेधेऽनर्थिकेत्यनेनोक्ता। कार्यनिषेधे वचनविरोधो विध्यन्तरं चेत्यनेनोक्त इति व्याख्यातम्। ननु विकल्पाङ्गीकरणेन विरोधः

परिहरिष्यतेऽत आह—**न चेति**। नन्वगत्या वैषम्येऽपि विकल्पः स्यादित्याह—**स्तुत्या चेति**। न च मुख्यार्थत्यागापत्तेस्स्तुत्यर्थत्वासम्भवः। कार्यलक्षणायामपि तुल्यत्वादित्याह—**तुल्यश्चेति**। गवाश्वव्यतिरिक्तस्य च पशुकार्यकरत्वनिषेधे पारिशेष्यात् गवाश्वस्य पशुकार्यकरत्वसिद्धेस्तदुपादानानर्थक्यम्। प्राशस्त्यनिषेधे तु गवाश्वगतं प्राशस्त्यविषयत्वं निषेधस्य ज्ञापयितुं पशुशब्दस्य गवाश्वशब्दसमानाधिकरण्योपादानमनर्थकमित्याशयेनाह—**पशव इति**।

ननु पशुस्वरूपस्य, तत्कार्यस्य वा निषेधासम्भवेऽपि पशुगता क्रिया, गुणो वा अजादौ निषेत्स्यत इत्याशङ्क्याह—**न चेति**। पशुमात्रवर्तिक्रिया, गुणसामान्यं वा निषिध्येत, गवाश्वगताः क्रिया गुणविशेषा वा। आद्ये पूर्ववत्प्रत्यक्षविरोधः। द्वितीये योग्यानुपलब्धितोऽपि ज्ञातुं शक्यत्वान्मन्दफलत्वम्। अन्यगतस्य विशेषस्यान्यत्रासम्भवादन्यशब्देनैव सिद्धेरत्यन्तानर्थक्यमित्यर्थः। ननूक्तेन प्रकारेण नञ्समासस्य निषेध्यान्तरासम्भवात्प्राशस्त्यस्य निषेधकत्वे प्रशंसालक्षणार्थत्वाभावान्न प्रशंसोदाहरणत्वं युक्तमित्याशङ्कानिरासाय श्लोकगतपूर्वशब्दोक्तम् निषेधान्वयात् प्राक् समासावयवभूतेन पशुशब्देन प्राशस्त्योपादानमुपपादयति—**अवश्यं चेति**।

नन्वेवं सति केवलस्य पशुशब्दस्य मुख्यार्थत्वसम्भवात्प्राशस्त्यलक्षणा न युक्तेत्याशङ्क्याह—**न चेति**। निषेधान्वयायोग्यत्वान्न मुख्योऽर्थः सम्भवतीत्याशयः। ननु प्राशस्त्यस्यापि क्रियागुणवत् पशुमात्रवर्तिनो निषेधाशक्तेः गवाश्वगतस्य च प्राशस्त्यस्याप्रतीतेर्निषेधो न सम्भवतीत्याशङ्क्याह—**शक्नुवन्ति चेति**। गवाश्वशब्दसमभिव्याहारात् गवाश्वगतप्राशस्त्यातिशयप्रतीतिरित्यर्थः।

ननु पशुशब्दोदाहरणे 'पशवो गो अश्वा' इति गवाश्वपदसामानाधिकरण्येन पशुशब्दोपादानात्तद्गतप्राशस्त्यातिशयप्रतीतिसम्भवेऽपि, अयज्ञाऽसत्रशब्दोदाहरणयोः सामवच्छन्दोमवच्छब्दसामानाधिकरण्येन यज्ञसत्रशब्दानुपादानात्कथं तद्गतप्राशस्त्यातिशयप्रतीतिरित्याशङ्कानिराससूचनायादिशब्दः। सामरहितस्य वाऽयज्ञत्वेऽभिहिते छन्दोमरहितस्य वाऽसत्रत्वेऽभिहितेऽर्थात् सामवान् यज्ञः छन्दोमवत्सत्रमिति सामानाधिकरण्यप्रतीतेः। सामवच्छन्दोमवत्तद्गतप्राशस्त्यातिशयावगतिः सम्भवतीत्याशयः। ननु पशुषु हिताहितविवेकराहित्यादिदोषदुष्टत्वेनाप्राशस्त्यस्यापि भावात्, तस्यापि च निषेध्यत्वोपपत्तेः, एकान्ततः पशुत्वेन प्राशस्त्यस्य लक्षयितुमशक्यत्वात् नेह प्रशंसाया गुणवादनिमित्तत्वाभिधानं युक्तमित्याशङ्क्याह—**यद्यपीति**। 'पुरस्तात्प्रतीचीनमश्वस्योपदधाति। पश्चात्प्राचीनमृषभस्येति, गवाश्वविधिप्रक्रमेण तदप्राशस्त्यानपेक्षितत्वात् तदपेक्षितगवाश्वप्राशस्त्यसिद्ध्यर्थं पश्वन्तरप्राशस्त्यस्यैव निषेधार्हतेत्यर्थः। ननु पश्वन्तरप्राशस्त्यनिषेधस्य तन्निन्दार्थत्वात् निन्दायाश्च विधिनाऽनपेक्षणात् न गवाश्वविधिनाऽन्वयः सम्भवतीत्याशङ्क्याह—**तदिति**[1]। गवाश्वप्राशस्त्यख्यापनार्था पश्वन्तरनिन्देत्याशयः। पश्वन्तर-

---

१. तत्प्रतिषेधेति २ पु० पा०।

प्राशस्त्यनिषेधेन गवाश्वप्राशस्त्यख्यापनात्, तेषामपि च प्राशस्त्यसद्भावेन तन्निषेधायोगात् कथं तद्द्वारेण गवाश्वप्राशस्त्यख्यापनमित्याशङ्क्य, गवाश्वगतप्राशस्त्यातिशयः पश्वन्तरे निषिध्यत इति सूचनार्थस्तरप्प्रत्ययः। पश्वन्तरस्य हि प्राशस्त्यातिशये निषिद्धे तत्सद्भाव एव गवाश्वस्य ख्यापितो भवति। अनेन च गोअश्वान् प्रशंसितुमित्यादिभाष्यं पश्वन्तरे प्राशस्त्यनिषेधस्य गवाश्वप्राशस्त्यख्यापनपर्यवसानाभिधानार्थत्वेन व्याख्यातम्। तरपा सूचितमर्थं विवृणोति—**एतदिति**। पश्वन्तरेष्वपशुशब्दप्रवृत्तेः प्रशंसाया निमित्तत्वमुपसंहरति—**एवमिति**। गवाश्वादिगता प्रशंसा यस्या प्रतिषेधस्यापशुशब्दस्य पश्वन्तरेष्वपशुशब्दप्रवृत्तौ निमित्तम्, स तथोक्तः।

ननु पश्वन्तरप्राशस्त्यनिषेधस्य गवाश्वप्रशंसार्थत्वात्कथं प्रशंसाया निषेधं प्रति निमित्ततेत्याशङ्क्याह—**सा चेति**। शब्देनार्थप्रतिपादने कृते तस्य कैमर्थ्याकाङ्क्षायां विध्येकवाक्यत्वेन प्रशंसार्थत्वं कल्पनीयम्। परशब्दस्य परत्र प्रवृत्तेर्निमित्तमन्तरेणासम्भवात् प्रथममेव गवाश्वगता प्रशंसा प्रवृत्तिनिमित्तत्वेनाश्रितेति कृत्वा प्रशंसानिमित्तः प्रतिषेध इत्यन्तेनान्वयः[1]। प्रयोजनत्वाभिधानं तर्हि विरुध्येतेत्याशङ्क्याह—**अनन्येति**। प्रशंसां निमित्तीकृत्य पश्वन्तरेष्वपशुशब्दे प्रवृत्ते पश्वन्तरप्राशस्त्यनिषेधस्य कैमर्थ्यापेक्षायां प्रयोजनान्तरासम्भवान्निमित्तभूतैव प्रशंसाप्रयोजनतया शब्दप्रवृत्तेः पश्चादवगम्यत इत्यर्थः। ननु यजमानादिशब्दानामपि प्रस्तरादिषु प्रवृत्तौ प्रशंसानिमित्तं कस्मान्नेष्टेत्याशङ्क्याह—**अन्यत्र पुनरिति**। शब्दप्रवृत्तेः प्रथममप्रतीतत्वात् प्रशंसाया निमित्तत्वं न सम्भवतीत्याशयः॥ २५॥ (२२)

॥ अथ बाहुल्येन सृष्टिव्यपदेशाधिकरणम् ॥ १६ ॥

भा० प्र०—"यजमानो यूपः, आदित्यो यूपः" (तै० ब्रा० २।१।५) यूप ही यजमान है यूप ही आदित्य है, यह श्रुति में कहा गया है। इस स्थल में तत्सिद्धिः या जाति से गौण अर्थ नहीं हो सकता है, अपितु 'सारूप्य' अर्थात् नेत्र के द्वारा ग्रहण के योग्य सादृश्य है, यजमान सम्मितो यूपो भवति, यजमान की ऊँचाई के समान या आदित्य की तेजस्विता के समान ही यूप की ही (यज्ञ में पशु के बन्धन के लिए निर्मित काष्ठ विशेष) ऊँचाई या तेजस्विता अर्थात् घृत आदि के द्वारा दीप्ति विवक्षित है—यह नेत्र के द्वारा ही देखा जा सकता है, अतः इस चक्षु से ग्राह्य सादृश्य के अनुसार यूप को भी यजमान एवं आदित्य कहा गया है। पूर्वोक्त जन्म स्थानगत सादृश्य अदृश्य है, वह शास्त्र के द्वारा ही अवगत किया जा सकता है, किन्तु प्रकृत में जो सादृश्य है वह नेत्र से ग्राह्य है, इसलिए इसका भिन्न रूप से निर्देश किया गया है। यह गौण अर्थ का ग्रहण यूप का आदित्य एवं यजमान के सारूप्य से होता है। क्योंकि, दोनों का बराबर सारूप्य है॥ २५॥

1. इत्यतीतेनेति २ पु० पा०।

व्या० सु०—सृष्टिमन्त्रका उपदधातीति भाष्यावयवात् पदद्वयस्यापि विधित्वाशङ्का-निरासः प्रतिभाति। तच्च समस्तवाक्यार्थानर्थक्यापत्तेरयुक्तमित्याशङ्क्योपधानानुवादेन शब्दविधिः, पूर्वपक्षिणोऽभिमतो निरस्यते। सृष्टिशङ्कायास्तु सबीजत्वायाख्यातोपन्यास इति सूचयन् यदीति भाष्यं व्याचष्टे—**यदीति**। तत्रेत्याशङ्काभाष्यं व्याचष्टे—**तत्रेति**। तद्वानासामुपधानो मन्त्र इतीष्टकासु लुक् च मतोरिति स्मृतेः। सृष्ट्यभिधायिमन्त्रैरुपधेया-नामिष्टकानां सृष्टिशब्दवाच्यत्वावगमेऽपि कासामिष्टकानां सृष्टिमन्त्रैरुपधानमिति विशेषानवगमात् वाक्यान्तराद्वा विशेषावगमे सत्येतद्वाक्यानर्थक्यापत्तेर्नोपधानानुवादेन सृष्टिसंज्ञकेष्टकाविधिः विशिष्टविधिर्वा सम्भवतीत्याशयः।

ननूपधानानुवादेनेष्टकाविधेरिष्टकाविशिष्टोपधानविधेर्वाऽनुपपत्तावप्युपधानानुवादेन सृष्टिलिङ्गमन्त्रविधिर्भविष्यतीत्याशङ्कानिरासार्थं तत्र सर्वासामिति भाष्यं व्याचष्टे—**तत्रेति**। पूर्वपक्षनिरासभाष्यं व्याख्याय, तस्मादिति सिद्धान्तभाष्यं व्याचष्टे—**तस्मादिति**। भाष्योक्तं सिद्धान्तमाक्षिपति—**अत्रेति**। उपधानस्याविधेयत्वान्मन्त्रविधेश्च मन्त्राम्नानानुमेयत्वेन प्रदेशान्तरस्थत्वाद्विध्येकवाक्यकल्पत्वाच्चार्थवादत्वस्य तदभावान्ना-यमर्थवाद इत्यर्थः। विध्येकवाक्यत्वं च विनार्थवादत्वानुपपत्तिः येन विधीयते तस्य शेषोऽर्थवाद इति प्रथनार्थवादेऽभिधानाद्भाष्यकृतोऽप्यभिमतेत्याह—**तथा चेति**। भाष्योक्तेऽर्थवादत्वेनिरस्ते यदि कश्चित्प्रकरणप्राप्तमन्त्रेषु पुनः श्रुतेरभ्यादानमन्त्रवद् गुणार्थत्वं 'शङ्केत' तदपि मन्त्रव्यतिरिक्तिगुणाश्रवणादयुक्तमित्याह—**न चेति**। मन्त्रान्तरपरिसंख्यार्थता तु मन्त्रान्तरानर्थक्यापत्त्यैव निरस्तेत्याह—**तत्रेति**। तस्माद् ग्रहणादिकार्यान्तरपरिसंख्यार्थोऽयमुपधाने मन्त्रविधिरिति पूर्वपक्ष एव ज्यायानित्यु-पसंहरति—**तत्रेति**। नन्वनुपधीयमानाभिरिष्टकाभिश्चयनस्य कर्त्तुमशक्यत्वादिष्टकाभिरग्निं चिनुत इति इष्टकासाध्यतया विहितेन चयनेनेष्टकोपधानस्यार्थादाक्षेपाद्विधानानर्थक्यमिति शङ्कामनुभाषणपूर्वकं निराकरोति—**चयनेनेति**। व्यूहविशेषेण च स्थापनम् उपधानम्। तद्विधानाभावे यथाकथंचित्स्थापनेऽपि चयनं सम्भवति। समुदितानामपि च स्थापनो-पपत्तेर्न प्रत्येकं स्थापनसिद्धिरित्यर्थः। ननु समुदितोपधानस्यापि सम्भवात्तदपि कथं प्रत्येकं सिध्येदिति शङ्कते—**नन्विति**। विहितत्वेन तस्याङ्गत्वात्, प्रतिप्रधानमावृत्ति-र्न्यायात्सेत्स्यतीति परिहरति—**नेति**। उपादेयत्वेनाङ्गत्वं लक्षितम्। अर्थाक्षेपस्य श्रुत्यनुमानेन विलम्बितत्वादप्राप्तावस्थस्योपधानस्य शीघ्रप्रवृत्तिना प्रत्यक्षविधिना विधानोपपत्तेर्निष्प्रयोजनत्वमात्रेणाविधानं वक्तव्यम्। अस्तित्वे चाध्वर्युकर्तृकत्वसिद्धिर्विधेः प्रयोजनमित्याह—**अपि चेति**। आध्वर्यवसमाख्यातचयनविधिनापि कल्पितस्योपधा-नविधेरसमानत्वात्तादृशे चाभियुक्तैराध्वर्यवादिशब्दाप्रयोगेणाऽऽध्वर्यवसमाख्यानालाभाद-ध्वर्युकर्तृकत्वं नलभ्यत इत्युक्तम्। ननु चयनस्य समाख्ययाऽध्वर्युकर्तृकत्वात्तस्य चोपधाना-दृतेऽध्वर्युणा कर्त्तुमशक्यत्वात् उपधानस्याध्वर्युकर्तृकत्वं लप्स्यत इत्याशङ्क्यैककर्तृकत्वं चेत्युक्तम्। अन्यसहायेनापि सन्धुक्षणादाववान्तरव्यापारे कृते देवदत्तेन पाकः कृत इति

लोके व्यपदेशादुपधानेऽन्यसहायेनापि कृते चयनस्याध्वर्युकर्तृकत्व प्रसिद्धेर्नैकाध्वर्युकर्तृकत्वं सेत्स्यतीत्याशयः। एवं तु सर्ववाक्येषूपधानमात्रविधानात् अभ्यासन्यायेनोपधानभेदापत्तेः सकृद्विहितस्यापि चेष्टकाः, प्रत्यङ्गत्वात्प्रतीष्टकमावृत्तिसिद्धेरसकृद्विधिप्रयोजनाभावेनापरितोषात्, स्वमतेनार्थाक्षिप्तोपधानानुवादेन मन्त्रविधिरिति पूर्वपक्षमेव न्याय्यं मत्वा प्रकरणप्राप्तमन्त्रेषु पुनःश्रुतेर्मन्त्रान्तरपरिसंख्यार्थत्वासम्भवेऽपि ग्रहणादिकार्यान्तरपरिसंख्याप्रयोजनत्वं दर्शयितुमाह—**न चेति**। ग्रहणादीनामपि चयनचोदनाक्षिप्तत्वाविशेषेणोपधानतुल्यत्वात् लिङ्गविशेषरहितानां मन्त्राणां प्रकरणादुपधाने ग्रहणादिषु च प्राप्नुवतामुपधानसम्बन्धः पुनःश्रवणमश्वाभिधान्यादानसम्बन्धपुनःश्रवणवत् कार्यान्तरपरिसङ्ख्यार्थम्। न त्वाज्यभागपुनःश्रवणवदङ्गान्तरपरिसङ्ख्यार्थम्, येन मन्त्रान्तरानर्थक्यमापद्यतेत्याशयः।

पञ्चमे तु मध्यमायां तु वचनात् ब्राह्मणवत्यः इत्यत्र यां वै काञ्चन' ब्राह्मणवतीमिष्टकामभिजानीयात्तां मध्यमायां चितावुपदध्यादिति वचनवशेनाभिपूर्वस्य जानातेः प्रत्यक्षज्ञानवाचित्वात् प्रत्यक्षब्राह्मणविहितानामिष्टकानामध्यमचित्याश्रयत्वस्य वक्ष्यमाणत्वादिष्टकानां चोपधानंकरणभूतमन्त्रान्वयं विना निरूपणाशक्तेस्तद्द्वारेणैव विधेयत्वान्मध्यमचित्याश्रयत्वसिद्धिरप्युपधानसम्बन्धितया मन्त्रविधेः प्रयोजनं भविष्यत्याह—**अपि चेति**। मन्त्राणामुपधानसम्बन्धो विधेय इत्यर्थः। अनारभ्याधीतानां च मन्त्राणां प्राकरणिकसामान्यसम्बन्धासम्भावात्, तदपेक्षलैङ्गिकविनियोगानुपपत्तेरप्राप्तविधिरेव भविष्यति इत्याह—**ये त्विति**। ननु सृष्टिमन्त्राणां विधानाभ्युपगमेऽर्थवादत्वसिद्धान्तो भज्येतेत्याशङ्क्याह—**न चेति**। **गुणाश्रया** इति सूत्रान्ते गुणवादनिमित्तत्वाभिधानदर्शनात्तादर्थ्यनिश्चयसूचनार्थः सूत्रावयवे सूत्रशब्दः। सकलसूत्रविषयत्वे वा तल्लिङ्गे तत्सिद्धचादेरप्युपलक्षणार्थम्। ननु भूमेत्येतावदेव सूत्रं तत्सिद्धचादेरेकसूत्रत्वेनादौ पठितत्वाद् देवतावतश्चावाचकत्वात् 'तिसृभिरस्तुवत' ब्रह्मासृज्यत ब्रह्मणस्पतिरधिपतिरासीदित्यादिष्वाद्यचतुर्दशान्त्यव्यतिरिक्तेषु चतुर्दशसु सृजधातुयोगात् सृष्टिलिङ्गेष्वेकया स्तुवतप्रजा अधीयन्त प्रजापतिरधिपतिरासीत्सप्तविंशत्याऽस्तुवत द्यावापृथिव्यौ तां वसवो रुद्रा आदित्या अनुव्यायन्, तेषामाधिपत्यमासीत्, त्रयस्त्रिंशताऽस्तुवत भूतान्यशाम्यन् प्रजापतिः परमेष्ठ्यधिपतिरासीदित्याद्यचतुर्दशान्त्येषु त्रिष्वसृष्टिलिङ्गेषु भूयस्त्वनिमित्ता सृष्टिशब्दस्य प्रवृत्तिरित्येतावन्मात्रस्यानेन सूत्रेण कथनात् नार्थवादत्वं प्रतिपाद्यत इत्यर्थः।

ननु भाष्यकृतार्थवादत्वस्योक्तत्वात् सूत्रस्यापि तादर्थ्यमवसीयत इत्याशङ्क्याह—**अत इति**। युक्त्यागमानुपेतत्वादुपेक्ष्यं तद्भाष्यमित्याशयः। किमर्थं तर्हि भाष्यकृताऽर्थवादतोक्तेत्यपेक्षायामाह—**भाष्यकारेण त्विति**। एतमेव भाष्यकाराभिप्रायं प्रकटयितुमपि चेतिभाष्यं व्याचष्टे—**एकयेति**। प्रतीकेन सप्तदशमन्त्रसमुदायात्मकसर्वोऽनुवाको गृहीत इति सूचनार्थोऽनुवाकशब्दः। मुख्यलक्षणायाः क्वचिददृष्टत्वादत्यन्तानौचित्यसूचनायाऽद्यशब्दः। आत्मत्यागाऽन्यद्वारस्वीकारयोरिव स्वार्थस्यापि त्यागान्यद्वारस्वीकारयोरत्य-

न्तानौचित्यसूचनार्थं शब्दार्थयोरभेदोपचारेण स्वार्थविषयावात्मशब्दौ सृष्टीरुपदधातीत्युपक्रम्यैकया स्तुवतेत्यादिसप्तदशमन्त्रोपधानसाधनिकानामिष्टकानां प्रत्येकं स्तुतिं कृत्वा यत्सप्तदशेष्टका उपदधातीत्युपसंहारात् सृष्टिशब्दस्य सप्तदशमन्त्रविषयत्वावगते स्ववाच्यसृष्टिलिङ्गमन्त्रमात्रपरत्वे तद्बाधप्रसङ्गात्स्वार्थपर्यवसायित्वत्यागेनेतरा सृष्टिलिङ्गमन्त्रलक्षणार्थता वाच्यलक्षितसमुदायद्वारा स्यात्। समुदायस्य चैकार्थ्याभावेनोपधानप्रकाशकत्वानुपपत्तेस्तत्रापि पर्यवसानासम्भवात् तदितरमसृष्टिमन्त्रवाच्यसृष्टिमन्त्रलक्षितसमुदायद्वारेण लक्षयित्वा सृष्ट्यसृष्टिमन्त्रलिङ्गमन्त्रसमुदायसम्बन्धित्वाविशेषादसृष्टिमन्त्रवत् स्वार्थसृष्टिमन्त्रोऽपि तात्पर्यतः सृष्टिशब्देन प्रतिपादनीय इति षष्ठ्यन्तं तृतीयान्तं सृष्टिशब्दमध्याहृत्य योज्यम्। स्वरूपाभिधानस्य शून्यवादवार्तिकेन निरस्तत्वादजहत्स्वार्थत्वस्य चात्रैवोक्ते वक्ष्यमाणत्वात्[1] वाच्येन च समुदायलक्षणया 'मन्त्रगणं लक्षयेदि'ति भाष्ये वक्ष्यमाणत्वादेवं व्याख्यातम्। अनेन चैकया स्तुवतेत्यत्रानुवाके याः सृष्टयस्तन्मात्रपर्यवसानरूपेण त्यक्त्वा तत्र[2] तत्सृष्ट्यसृष्टिसमुदायं लक्षयित्वा पश्चादितराभिः सहितास्तात्पर्यतः सृष्टिशब्दो लक्षयेत्प्रतिपादयेदित्येवं भाष्यं व्याख्यातम्। नन्वित्याशङ्कानिरासार्थं नानुवादेति भाष्यं व्याचष्टे—**उपधानेति**। कथं त्विति भाष्यं तल्लिङ्गेति सूत्रावयवेनैव व्याख्याततत्वान्न व्याख्यातम्॥ २६॥ (२२)

भा० प्र० 'अपशवो वा अन्ये गोऽश्वेभ्यः पशवो गो अश्वाः" (तै० सं० ५।२।९) गौ एवं अश्व को छोड़कर अन्य अज, मृग आदि पशु अपशु अर्थात् पशु नहीं है। इस स्थल में अपशु शब्द का पशुपद लक्षणा के द्वारा पशुगत प्राशस्त्य का बोधक है। नञ् के द्वारा उस प्राशस्त्य के अभाव स्वरूप गुण का बोध होता है, इसलिए—यह गुणवाद है। गौ एवं अश्व की प्रशंसा करना ही इस गुणवाद का साधन है। अयज्ञो वा एष योऽसामा=जिस यज्ञ में साम=गान योग्य मन्त्र नहीं हैं वे अयज्ञ हैं, इसी प्रकार 'असत्रं वा एतम् यदच्छन्दोमम्' जिस यज्ञ में छन्दोम=स्तोम अर्थ विशिष्ट संख्यक गेय ऋक् मन्त्र विशेष नहीं है, वह असत्र है। इत्यादि स्थल में साम एवं छन्दोम आदि की प्रशंसा करने के लिए उससे रहित यज्ञ की अयज्ञ एवं असत्र कहा गया है। जैसे साधारण लोकव्यवहार में भी कहा जाता है कि जिस भोजन में घी नहीं है—वह भोजन ही नहीं है। जो वस्त्र मलिन है, वह वस्त्र ही नहीं है। इन स्थलों में घृतयुक्त भोजन एवं परिष्कृत वस्त्र की प्रशंसा करने के लिए घृतशून्य भोजन को अभोजन एवं मलिन वस्त्र को अवस्त्र कहा गया है। यहाँ अर्थवाद में लक्षणामूलक गुणवृत्ति है॥ २६॥

॥ अथ प्राणभृदादिशब्दानां स्तुत्यर्थताधिकरणम्॥ १७॥

न्या० सु० —ननु सृष्टिशब्दस्योपधानविधिशेषतयाऽर्थवादत्वं युक्तम्। प्राणभृदादिवाक्येषु तु सृष्टिवाक्यविहितत्वेनोपधानस्य विधातुमशक्यत्वात्। विध्येकवाक्यत्वं च विनाऽर्थवाद-

1. वक्ष्यमाणत्वादिति २ पु० ना०। 2. ताभिरिति २ पु० ना०।

त्वायोगाद् गुणाश्रवणाच्च प्रकरणप्राप्तमन्त्रपुनःश्रुतेस्तादर्थ्यस्यापि कल्पयितुमशक्यत्वात्, परिसंख्यार्थत्वे च मन्त्रान्तरानर्थक्यापत्तेः, प्राणभृदादिशब्दस्य न किञ्चित्प्रयोजनमित्याशङ्क्याह—**सृष्टिवदिति**। सृष्टौ यथास्माभिर्ग्रहणादिकार्यान्तरपरिसंख्यामब्यमचित्याश्रयत्वसिद्धिश्चोपधानसम्बन्धितया मन्त्रपुनःश्रुतेः परिहारोऽस्य चोद्यस्योक्तः तथाऽत्रापि वक्तव्यः। भाष्यपक्षे त्विदं चोद्यम्। यथा प्राणभृदादिष्वपरिहार्यम्, तथा सृष्टावपि विशेषाभावेन प्राणभृद्वाक्यविहितत्वात् सृष्टिवाक्यमुपधानस्याविधायकमित्यपि वक्तुं शक्यत्वादिति द्वन्द्वनिर्देशेन सूचितम्। ननु वाच्यैकसमुदायिलक्षितसमुदायद्वारा समुदाय्यन्तरे शब्दवृत्तेरुभयत्र तुल्यत्वान्नोदाहरणभेदो युक्त इत्याशङ्क्याह—**अल्पैरिति**। अयमाशयः शब्दस्य प्रवृत्तिर्नाम बोधकत्वमेव। निर्विषयायाश्च बुद्धेरसम्भवात् बुद्धिविषयस्यैव प्रवृत्तिनिमित्तत्वं वाच्यम्। अत एवाभिधेयगुणयोगेन सारूप्यं सर्वत्र सम्भवदपि आदित्यो यूप इत्यत्रैव बुद्धिविषयत्वादुक्तम्, नान्यत्र। न हि यजमानः प्रस्तर इत्यत्र यजमानसदृशः प्रस्तर इति बुद्धिरुदेति। तत्कार्यकारित्वमात्रबुद्धेर्ब्राह्मणस्याप्यर्थवादवशात् प्रजापतिमुखजातत्वमात्रबुद्धिः, अजादौ गवाश्वगतप्राशस्त्याभावमात्रबुद्धिः, यूपे त्वादित्यसारूप्यमात्रबुद्धेः सारूप्यं प्रवृत्तिमिमित्तमुक्तम्। तेनेहापि सृष्टिशब्दात् सृष्टिबाहुल्यबुद्धेस्तस्यैव प्रवृत्तिनिमित्तत्वम्। प्राणभृच्छब्दात्तु प्राणभृल्लिङ्गसमवायमात्रबुद्धेस्तस्यैव प्रवृत्तिनिमित्तत्वाद् भेदेनोपादानं युक्तमेवेति, भूयस्त्वाप्रतीतिप्रदर्शनार्थोऽल्पशब्दः। भूयस्त्वानपेक्षस्य लिङ्गसमवायमात्रस्य निमित्तत्वसूचनार्थैव लिङ्गसमवायादिति[1] पञ्चम्युदाहृता। एकेनेति भाष्येण लिङ्गशब्दं चिह्नार्थत्वेन व्याख्याय, ननु सम्बन्धं विना लिङ्गत्वायोगात् लिङ्गशब्देनैव समवायशब्दोक्तसम्बन्धसिद्धेः समवायशब्दोऽनर्थक इत्याशङ्क्य, न चायमित्यादिभाष्येण लिङ्गस्यापि स्वलक्षिते गणेऽन्तर्भावप्रतिपादनार्थत्वं समवायशब्दोक्तम्, तद्व्याचष्टे—**स्वार्थेति**। उभयत्रेत्यनेन भूम्न्यपि समवायशब्दानुषङ्गः सूचितः। मन्त्रगणलक्षणायां व्यापृतः प्राणभृदादिशब्दः किमिति स्वार्थं न जहाति इत्याशङ्कानिरासार्थत्वेन समवायशब्दव्याख्यानार्थं तद्गुण इतिभाष्यावयवं व्याख्यातुम्—**उपादीयमानत्वादित्युक्तम्**। सर्वसमुदायिव्यासक्तेन समुदायेन स्वसमवायितयेतरसमुदायिवल्लक्षकस्यापि [2]समुदायिन उपादीयमानत्वात् स्वार्थापरित्याग इत्यर्थः।

ननु सृष्टिशब्दस्याप्यभिधेयसृष्टिलक्षितसृष्ट्यसृष्टिसमुदायलक्षणगुणयोगेनाऽसृष्टिषु प्रवृत्तेर्गौणत्वात्, तद्गौण्यां च वृत्तावभिधेयसम्बन्धित्वरूपानादरात् सृष्टिलक्षितस्य समुदायस्य सृष्टिसमुदाय्यनादरेणासृष्टिष्वेव व्यासज्यवृत्त्युपपत्तेः कथं तेनाभिधेयानां सृष्टीनां लक्षणभूतानामुपादानमित्याशङ्कानिरासार्थं वृद्धवाक्यं पठति—**आह चेति**। लक्ष्यमाणगुणयोग-

---

१. द्वादशाधिकरणमारभ्य सप्तदशाधिकरणपर्यन्तमेकमेवाधिकरणम् वार्तिके नाधिकरणभेदः।

२. स्वार्थसमुदायिन इति २ पु० पा०।

निमित्तवृत्तिरूपगौणत्वलक्षणसद्भावात्सृष्ट्यादिशब्दानां गौणत्वेऽपि स्वार्थासम्बद्धस्य समुदायाख्यस्य गुणस्य लक्षयितुमशक्यत्वात् । तस्य च व्यासज्यवृत्तित्वेनैकसमुदायित्यागे समुदायस्याप्यभावोपपत्तेः सर्वेषामपि समुदायिनामविशेषेणैवोपादानम् । पैङ्गल्यादेस्तु सामान्यरूपेणाऽग्नित्वादिना लक्षितस्य प्रत्येकं पैङ्गल्यादिगुणव्यक्तिषु वृत्तेरग्न्यादिगतायाश्च पैङ्गल्यादिगुणव्यक्तेर्माणवकादावभावाद्युक्तोऽग्न्यादिसम्बन्धानादर इत्याशयः ।

अभिधेयसम्बन्धादरानादरलक्षणे तु गौणी-लक्षणावृत्तिविवेके सृष्ट्यादिशब्दानामपि लक्षणावृत्तिरेवास्तु, गौणत्वाभ्युपगमे, न तु जहत्स्वार्थवृत्तित्वादिलक्षणान्तरनिरासार्थमिहोदाहरणं श्लोकस्त्वेवं योज्यः । यत्र यजमानादिशब्दे लक्षणं यजमानाद्युपलक्षणमात्रीकृत तल्लक्ष्ये यजमानकार्ययागापूर्वनिष्पत्त्यादौ प्रस्तरादेर्यजमानादिसम्बन्धिसाङ्गप्रधानानुष्ठानसाध्यापूर्वनिष्पत्त्याख्यकार्यकरत्वाभावाद्यजमानादिसम्बन्धिरूपनिरपेक्षशब्दकार्यमर्थ - प्रत्यायनं नियुज्यते, वाच्यसम्बन्धित्वानादरेण वाच्यगुणस्वरूपमात्रलक्षणे यत्र शब्दस्य तात्पर्यमित्यर्थः । तस्मिन् शब्दे लक्ष्यस्वरूपमात्रस्य शाब्दप्रतीतिविषयत्वेन ग्रहणम्, न तूपायमात्रतयाऽवस्थितस्य लक्षणस्यापि । यत्र सृष्ट्यादिशब्दे लक्षणभूतसृष्ट्यादिलक्षितेन सृष्ट्यादिसम्बन्धिना समुदायेन सृष्ट्यादित्यागे व्यासज्यवृत्तित्वाभावादात्मानमलभमानेन सृष्ट्यादेर्ल्लक्षणस्यापि स्वाश्रयत्वेनोपादानम् । तत्र लक्ष्यलक्षणयोः शाब्दप्रतीतिविषयत्वेन ग्रहणमिति ॥ २७ ॥ (२२)

॥ इति तत्सिद्धिपेटिका ॥

भा० प्र०—अग्निचयन प्रकरण में इष्टका उपधान विधि में श्रुति कहती है कि सृष्टीरुपदधाति (तै० सं० ५।३।४) इस "एकया स्तुवते" (तै० सं० ४।३।१०) इस प्रकार के सत्तर मन्त्रों में सत्तर ईंटों का उपधान=स्थापन करने की विधि है, इसको सृष्टि कहा जाता है, क्योंकि, उनमें सृष्टि शब्द का मूलीभूत भुज् धातु का प्रयोग है। इस स्थल में सृष्टिरुपदधाति इत्यादि वाक्य गुणविधि है या अर्थवाद है, यह संशय होने पर पूर्वपक्षी का कहना है कि यह गुणविधि है ।

इसके समाधान में सिद्धान्ती ने कहा है कि यह गुणविधि नहीं हो सकती है, यह अर्थवाद है । क्योंकि, इनका चयन प्रकरण में पाठ होने से चयन के साथ इनका सम्बन्ध पूर्व से ही प्राप्त है, जो पूर्व से प्राप्त होता है उसमें विधि नहीं हो सकती है। वरन्, वह पूर्व प्राप्त सृष्टि मन्त्रों का अनुवाद कर इष्टका के उपधान=स्थापन का ही विधान करती है। इस स्थल में सृष्टि शब्द गौणीवृत्ति के अनुसार उस प्रकरण में पठित भुज् धातुरहित सभी मन्त्रों का प्रकाशक है। इस प्रकरण में जो मन्त्र पढ़े गये हैं, उनमें अधिकांश मन्त्र सृजि धातु से युक्त होने से सभी को 'सृष्टि' कहा गया है। अतः 'भूमा' अर्थात् आधिक्य या बाहुल्य ही इस स्थल में गौणी वृत्ति का हेतु है ॥ २७ ॥

॥ अथ वाक्यशेषाधिकरणम् ॥ १३ ॥

न्या० सु०—विध्युदेशान्तर्गतानामप्युद्भिदादिपदानां विधानातिरेकेण नामधेयतयोपयोगे प्रतिपादिते, अर्थवादानामपि स्तावकत्वातिरेकेण सन्दिग्धार्थनिर्णायकत्वेनोपयोगप्रतिपादनार्थं कल्पनैकदेशत्वादिति उत्तरसूत्रगतपदद्वयानुषङ्गेणैतत्सूत्रम्, प्रकरणान्तरत्वाच्चानन्तरसङ्गत्यभावेऽपि न दोषः। प्राणभृदादिशब्दानां वा लिङ्गसमवायात्तल्लिङ्गातल्लिङ्गेषु प्रवृत्तावुक्तायां घृतशब्दस्यापि घृताघृतोक्तेषु लिङ्गसमवायात् प्रवृत्तिः प्राप्ताऽत्र अपोद्यत इत्यनन्तरसङ्गतिरपि सम्भवति। प्रतिपादितप्रामाण्योपयोगिद्वाराणामपि तद्विशेषोपयोगिद्वारान्तरप्रतिपादनात्पादाध्यायसङ्गतिरिति सूचयितुमाह—**विधीति**। निर्णयार्थत्वेन कल्पनाशब्दव्याख्यानाय—**अवधार्यत इत्युक्तम्**। अर्थवादस्य विधिगतसन्देहापनायकत्वेन साध्ये 'यद्दचा स्तुवते, तदसुरा अन्वायन्' इत्याद्यर्थवादगतस्तुतिनिन्दार्थत्वसन्देहापनायकत्वं 'य एवं विद्वान् साम्ना स्तुवीते'त्यादिविधेरर्थवादाधिकरणोक्तं दृष्टान्तयितुमेकत्रैतरेणेत्युक्तम्।

ननूपक्रमानुरोधेनोपसंहारव्याख्यानस्य तृतीये वेदो वा प्रायदर्शनादित्यत्र वक्ष्यमाणत्वान्नोपसंहारस्थेनार्थवादेनोपक्रमस्थविध्यर्थनिर्णयो युक्त इत्याशङ्क्य—**सन्दिग्धमित्युक्तम्**। तत्रोपक्रमस्य वेदविषयत्वेन निश्चितत्वादुपसंहारगतानामृगादिशब्दानां तदनुरोधवृत्तिता युक्तेत्याशयः। ननूपक्रमोपसंहारविप्रतिपत्त्यालोचनया सन्देहस्तत्राप्यस्तीत्याशङ्क्य—**एकत्रेत्युक्तम्**। सन्दिग्धशब्देनाऽव्यवस्थितार्थप्रतीतिरभिमता। सा विध्युद्देशमात्रपरामर्शाद्भवन्तीति वाक्यशेषावधारितया व्यवस्थया वार्यत इत्याशयः। निर्णीयत इति वक्तव्येऽवधार्यते पदं प्रयुञ्जानेनैतदेव सूचितम्। सन्दिग्धावधारणरूपप्रामाण्यविशेषोपयोगिद्वारान्तरप्रतिपादनाच्च पादलक्षणसङ्गतिः सूचिता। अनन्तरसङ्गतेस्त्वभावः, यथा सृष्टिष्वसृष्टिषु चेति भाष्यसूचितत्वाद्वा स्पष्टत्वमनभिधानेन सूचितम्।

एकदेशशब्दमेकोऽर्थो दिश्यते प्रतिपाद्यते याभ्यां विध्यर्थवादाभ्यां तावेकदेशौ तयोर्भावस्तत्त्वमिति व्युत्पत्त्यैकविषयत्वाभिभानार्थत्वेन व्याख्यातुं पूर्वार्द्धसम्भराय सदाशब्देन च स्तुतिनिरपेक्षस्य विधेरपर्यवसानमुक्तम्। प्ररोचनानपेक्षस्य विधेः पर्यवसानसम्भवेऽर्थवादान्वयासम्भवात्प्रागेवार्थाक्षिप्तविशेषकल्पनया निर्णये कृते पश्चादर्थवादानर्थक्यपरिहाराय वैकृताङ्गवदन्यतराकाङ्क्षयार्थवादान्वये सत्यपि निर्णीतार्थत्यागायोगात्तदर्थवादस्यैवासामञ्जस्यमङ्गीकार्यमपर्यवसाने त्वर्थवादावगतस्यैव विशेषस्य ग्रहणमिति न्यायावताराङ्गभूतोपन्यस्तसन्देहकारणप्रश्नार्थं 'कथमिति' भाष्यं वृत्यन्तरोक्तसन्देहकारणनिरासार्थमिति दर्शयितुं स्वरूपतस्तावद् व्याचष्टे—**किमिति**। तत्र विध्यर्थवादयोर्भिन्नवाक्यत्वेनाऽर्थवादिकस्य विशेषस्य विधिवाक्यार्थावधारणवेलायामप्रतीतेः। सामान्यमात्रप्रत्ययाद्विशेषं प्रतिसन्देह इत्येकेषां मतमुपन्यासपूर्वकं दूषयति—**विधाविति**। विधिसामान्याक्षिप्ताञ्जनसमर्थद्रव्यमात्रनिर्णयान्नैतत्सन्देहकारणं युक्तमित्यर्थः। सामान्यमात्रनिर्णयादिति यावच्छ्रुतं मत्वा तेषामाशयं विवृणोति—**स्यादिति**। दूषयित्वा दृष्टान्ता-

भिधानेनोत्तरं विवृणोति—**घृतवदिति**। यथा घृतत्वसामान्यं तत्रोपलक्षितयत्किञ्चिद्विशेषावधारणेनाङ्गम्, एवमञ्जनक्रियाक्षिप्तं स्नेहद्रव्यसामान्यमपीत्यर्थः।

एतदेव घृतेऽपि सन्देहोपादनपूर्वकं विवृणोति—**तन्नेति**। (विधौ सामान्यश्रवणात्, अर्थवादे च विशेषश्रवणात् वाक्यद्वयविप्रतिपत्तिः। सन्देहकारणमित्यन्येषां मतमुपन्यस्यति[1])—**तस्मादिति**। विधिगतसामान्यश्रवणमात्रस्य सन्देहकारणतोक्तेति भ्रान्त्या विधिनिरपेक्षस्य घृतप्रापकत्वायोगाद्विध्यर्थवादयोरेकवाक्यत्वमभिप्रेत्यैतदुक्तमिति भ्रान्त्या दूषयति—**तथापीति**। एकवाक्यगतसामान्यविशेषश्रवणं न सन्देहकारणमिति, दृष्टान्तेनोपपादयितुं—**न हीत्युक्तम्**। दृष्टान्तवैषम्याभिधानेनापरेषामाशयं विवृणोति—**विषम इति**। गौः शुक्लः इत्येकवाक्यगतयोः सामान्यविशेषयोः श्रवणात्, इह तु भिन्नवाक्यगताविति वैषम्यम्। एतदेव प्रश्नपूर्वकं विवृणोति—**कथमिति**। सामान्यविषयविधिवाक्यगत एव यदि विशेषः स्यात् ततोऽत्रापि न सन्देहः। शुक्लः प्रशस्त इति वाक्यान्तरगते तु विशेषे तत्रापीति सन्देह इत्यर्थः। श्लोकं व्याचष्टे—**यदि हीति**। अन्वयमुखेनैतमेवाशयं विवृणोति—**अत इति**।

चकारेण सामान्यश्रवणसहितस्य विशेषश्रवणस्य सहकारित्वाभिधानादाद्या भ्रान्तिर्निरस्ता। विध्यर्थवादयोर्भिन्नवाक्यत्वाभ्युपगमेनैतन्मतद्वयम्। तच्चैकवाक्यत्वावगतेरयुक्तमिति दर्शयिष्यन्सन्देहदर्शनमेवोभयेषां भिन्नवाक्यत्वभ्रान्तौ कारणमित्याह—**केचिदिति**। केचित्सामान्यमात्रश्रवणसन्देहकारणवादिनः चकारादपरेऽपि भिन्नवाक्यगतसामान्यविशेषश्रवणसन्देहकारणवादिनः इत्यर्थः। एतदेवोपपादयति—**यदि हीति**। नन्वेवं सति सूत्रविरोधः स्यादित्याशङ्क्याह—**यत्त्वति**। नन्वाकाङ्क्षानिबन्धनत्वात्सम्बन्धस्यावान्तरवाक्यार्थप्रतिपादनमात्रेणाकाङ्क्षापर्यवसाने वाक्यान्तरान्वयायोगात्कथं भिन्नयोः पश्चादेकवाक्यतेत्याशङ्क्याह—**यथा हीति**। पदार्थानां परस्परान्वयाकाङ्क्षापर्यवसानेऽपि वाक्यार्थानां परस्परापेक्षयाऽन्वयो न विरुद्ध इत्याशयः।

भावप्रत्ययेन सम्बन्धाभिधानादङ्गस्याङ्गिसम्बन्धापेक्षयाङ्गिनश्चाङ्गसम्बन्धापेक्षयादिशब्देनाग्नेयादिप्रधानानामेकफलसम्बन्धापेक्षयाङ्गानां चैककरणोपकारसम्बन्धापेक्षया स्वार्थपर्यवसितानामपि वाक्यानां संहत्यैकमहावाक्यार्थापादनेनैकवाक्यत्वं भवतीत्यर्थः। अङ्गप्रधानवाक्यैः सहार्थवादानां वैषम्याभिधानेनैतद् दूषयति—**न त्विति**। सिद्धार्थप्रतिपादकानामप्युपनिषद्वाक्यानां चतुस्त्रिंशदाश्वीनानि सरस्वत्याविशनात् प्लक्षश्रवणमित्यादीनां च पुरुषार्थौपयिकस्य कर्मौपयिकस्य वा प्रयोजनस्य लाभात्स्वार्थपर्यवसानं युक्तम्। अर्थवादार्थस्य तु निष्प्रयोजनत्वान्न तत्रार्थवादानां पर्यवसानमिति प्रयोजनशब्देनोक्तम्। भिन्नवाक्यत्वे च व्रीहियववाक्यवत्सामान्यविशेषवाक्ययोरप्यन्योन्यनिरपेक्षवैकल्पिकसाधननिश्चायकत्वात्सन्देहो नतरां युज्येतेत्याह—**दुर्लभेति**। सामान्यविशेषयोर्मध्ये इतरत्र सामान्ये सामान्यवाक्यस्येतरत्रविशेषे विशेषवाक्यस्य पर्यवसानादित्यर्थः।

---

१. अयंपाठः २ पुस्तके नास्ति।

ननु वाक्यद्वयस्यान्योन्यनिरपेक्षस्वार्थपर्यवसानेऽपि विप्रतिपत्तेः सन्देहः स्यादित्याशङ्क्याह—**यदिति**। वैकल्पिकानुष्ठानेन विरोधपरिहार इत्याशयः। नन्वङ्गाङ्गिवत्सामान्यविशेषयोरप्यन्योन्यापेक्षितत्वात्स्वार्थपर्यवसितयोरपि तद्वाक्ययोरङ्गाङ्गिवाक्यवत्पश्चादेकवाक्यत्वकल्पनायामेकविषयत्वार्थैकानुरोधेनेतरवृत्तेरवश्यम्भाविनीत्वात्कस्यानुरोधेन किं वर्त्तत इति जिज्ञासायां विशेषानिर्द्धारणात्सन्देहः स्यादित्याशङ्क्याह—**सामान्येति**। एवं सति सामान्यमात्रे पर्यवसितस्य विधेरर्थवादविरोधाद्विषयसङ्कोचात्मकबाधाभ्युपगमेन सिद्धान्तः स्यात्, न चार्थवादानुरोधेन विधिबाधो युक्त इत्याशयः। न विद्यते विशेषोऽस्येत्यविशेषो विशेषरहितः स्यात् इत्यर्थः।

ननु यथा पशुमालभेतेति सामान्यपर्यवसितस्यापि विधेः 'छागस्य वपाया मेदसोऽनुब्रूहीति' मन्त्रवर्णानुरोधेन सङ्कोचः, विधिमन्त्रयोरेकविषयत्वात्। सामन्यस्य च कृत्स्नस्य छागेऽपि विभागेनाविरोधान्नियमसम्भवे चानियमानुपपत्तेः षष्ठान्त्ये वक्ष्यते। तथात्रापि भविष्यतीति शङ्कते—**मन्त्रेति**। पौनरुक्त्यापत्त्या तं दूषयति—**एवमिति**। एकवाक्यत्वे उपक्रमबलीयस्त्वेनाऽत्र पूर्वपक्षसम्भवादपौनरुक्त्यमिति भावः।

स्वाभिमतन्यायावताराङ्गभूतसन्देहकारणाभिधानार्थमञ्जनसामान्येनेत्यादिभाष्यं व्याचष्टे—**तस्मादिति**। ननूपक्रमबलीयस्त्वस्य 'वेदो वा प्रायदर्शनादित्यत्र वक्ष्यमाणत्वात्सिद्धान्तवचनव्यवत्यसम्भवेनैकवाक्ये सन्देहो न युक्त इत्याशङ्क्य - **किमधीनेत्युक्तम्**। अर्थवादप्रवृत्तेर्विध्यधीनत्वे विप्रतिपत्त्यभावात्प्ररोचनां विना विध्यपर्यवसानेनार्थवादाधीना किं विधेः प्रवृत्तिः, पर्यवसानेन वा तदधीनार्थवादस्येति सन्देहार्थः। अतोऽनेन प्ररोचनापेक्षविधिपर्यवसानसम्भवासम्भवसन्देहः—**सन्देहकारणमित्युक्तम् भवति**।

पर्यवसाने विध्युद्देशेन सामान्याक्षिप्तविशेषमात्रनिर्णयादर्थवादानर्थक्यपरिहाराया‍ऽन्यतराकाङ्क्षया वैकृताङ्गवदर्थवादः पश्चादन्वीयमानोऽपि विध्यनुरोधेनैव व्याख्येयः। अपर्यवसाने त्वर्थवादोक्तविशेषसद्भावे विशेषाक्षेपकत्वायोगादर्थवादोक्तस्यैव ग्रहणमिति, किं समञ्जसमिति भाष्यावयवमर्थतः पठित्वा व्याचष्टे—**कस्येति**। 'एवमिति पूर्वपक्षभाष्यं व्याचष्टे—**तत्रेति**। विध्यधीनत्वेऽप्युपक्रमस्थायाः स्तुतेः श्रौतत्वदर्शनादुपसंहारस्थत्वाभिधानायानुपश्चाद्—**वादावित्युक्तम्**।

अनेन च 'विनिगमने' त्विति भाष्यावयवो विधिना त्वेकवाक्यत्वादित्येतत्सूत्रसिद्धविध्यधीनत्वाङ्गीकरणेन विधेरपि प्ररोचनं विना प्रवृत्त्यशक्तत्वेन स्तुत्यधीनत्वान्नानेन हेतुनार्थवादे लक्षणावृत्तिर्निश्चेतुं शक्येत्याशङ्कानिरासार्थत्वेन व्याख्यातः। **चकारेण च** लक्षणार्थं घृतवचनमिति भाष्यावयवो विशेषस्याव्यभिचारेण सामान्यलक्षणे सामर्थ्यात् घृताख्यविशेष्यवचनं स्नेहद्रव्यसामान्यलक्षणार्थमित्येव व्याख्यातः।

मुख्यत्वादित्यनेनाविरोधाच्चेति चकारसहितेनोपक्रमस्थत्वेन विरोधात्सामान्येन च व्यभिचारिणा विशेषस्य लक्षयितुमशक्यत्वात् उपक्रमस्थेन सामान्यवचनेन न विशेषः

परिकल्पयितुं लक्षयितुं युक्तमित्येवमुपक्रमे सामान्यवचने सति न विशेषः कल्प्यत इति भाष्यावयवं व्याख्याय, अविरोधाच्चेत्यनेन ननु सामान्यमात्रस्याननुष्ठेयत्वाद्विशेषस्य चानिश्चयादुपक्रमोऽपि सन्दिग्धार्थत्वादुपसंहारेण निर्णेतव्य इत्याशङ्कानिरासार्थत्वेन सन्दिग्धेष्वविरोधादिति भाष्यावयवोऽप्यापातप्रतिभानात्सन्देहेऽपि सामान्याक्षिप्तस्नेहद्रव्यमात्रनिर्णयोपपत्तेरर्थवादाभावेऽप्यननुष्ठेयसामान्यमात्ररूपार्थाविधायकत्वलक्षणविरोधाभावादित्येवं व्याख्यातः।

प्ररोचनानपेक्षस्य विधेः प्रवृत्तावसामर्थ्यादर्थवादसन्निधाने च स्वयमप्ररोचकत्वादर्थवादसहितस्यैव विधायकत्वावगतेस्तत्समर्पितविशेषलाभे विशेषान्तरकल्पनायोगेनोपक्रमस्थस्यापि विधेर्निर्णायकत्वाशक्तेरुपसंहारस्थेनापि अर्थवादेन निर्णयो युक्त इत्याशङ्कानिरासार्थत्वेन प्ररोचनानपेक्षस्यैव विधेः स्वविषयेष्टसाधनत्वज्ञापनमात्रेण प्रवर्त्तकत्वोपपत्तेरर्थवादाभावेऽपि विधायकत्वाविरोधादिति भाष्यावयवो व्याख्यातः।

श्लोकं व्याचष्टे—**विधीयमानं हीति**। स्तुतेर्विध्यधीनत्वोक्त्याऽर्थाद्विधेयस्तुत्यनधीनताऽनुवादत्वोक्त्या च प्राप्तार्थतोक्तेति सूचनार्थम्—**नन्वित्याद्युक्तम्**। ननु विधेः स्तुत्यनधीनत्वे कथमुच्चैरृचा क्रियते इत्यादिविध्युद्देशस्थानामृगादिशब्दानामर्थवादानुरोधेन वेदलक्षणार्थं तृतीये वक्ष्यत इत्याशङ्कानिरासार्थत्वेन मुख्यत्वादित्यवयवं व्याख्यातुम्—**यद्यपि तावदित्युक्तम्**। अविरोधाच्चेत्यवयवं व्याख्यातुं विनापि चेत्युक्तम्। विधेः स्तुत्यनधीनत्वं च पूर्वोक्तमनेनोपपादितम्। 'स्तुतिपदान्यनर्थकान्यभविष्यन् साकाङ्क्षाणीत्यादेर्योऽसौ विध्युद्देशः, स शक्नोति निरपेक्षार्थं विधातुमित्यर्थवादाधिकरणभाष्यादर्थवादनिरपेक्षस्य विधिमात्रस्य प्रवृत्तिशक्तावप्यर्थवादानर्थक्यपरिहारमात्रार्थमर्थवादान्वयप्रतीतेरेतत्पूर्वपक्षिणोक्तम्। स्तुतेर्विध्यधीनत्वोपपादनायार्थ**वादस्त्वित्युक्तम्**।

आद्यचकारसूचितं द्वितीयभाष्यावयवार्थं व्याचष्टे—**विशेषश्चेति**। द्वितीयचकारसूचितमाद्यभाष्यावयवार्थं व्याख्यातुमाह—**न समान्यमिति**। वाक्यशेषस्यैव सन्दिग्धार्थनिर्णायकतास्ति न वेति चिन्ताविषयत्वेनोदाहरणत्वे विध्युद्देशोपन्यासस्तु तद्विषयत्वमात्रेणेति सूचनार्थम्। व्युत्क्रमेण व्याख्यातमुपसंहरति—**तस्मादिति**। एवं प्ररोचनानपेक्षस्यापि विधेः प्रवृत्तिसामर्थ्येनार्थवादान्वयात्प्रागेव विध्युद्देशार्थनिर्णयान्नार्थवादोक्तविशेषग्रहणमित्युक्त्वा, प्ररोचनानपेक्षस्यासामर्थ्येऽप्यर्थवादाभावे विधेरेव प्ररोचनाशक्त्याविर्भावात्सामान्यविधेर्विशेषाकाङ्क्षायां घृते सार्थवादकस्याभिधायकत्वमितरयोः केवलस्य भविष्यतीति घृतशब्दस्य स्नेहमात्रलक्षणार्थतापि नास्तीत्याह—**कामं वेति**।

ननु यथाग्निविद्यासाध्यस्याग्निहोत्रादेस्तदनुरोधेन त्रैवर्णिकविषयतया सङ्कोचो वक्ष्यते, तथा विधानस्याप्यर्थवादसाध्यत्वात् तदनुरोधेन विषयसङ्कोचः कस्मान्न स्यादित्याशङ्क्याह—**यथेति**। अयमाशयः येनाङ्गेन विना प्रधानं न सिध्यति, स्वयं च नाक्षिप्यते तदनुरोधेन प्रधानस्यापि सङ्कोचो भवति विनापि त्वर्थवादेन, विधेरेव तु प्ररोचनाशक्तिकल्पनेन विधायकत्वोपपत्तेः 'यथेन्द्राय त्वा वसुमते गृह्णामीत्यैन्द्र-

मन्त्रसाध्यस्यापि सोमग्रहणस्य मन्त्राभावे ध्यानादिनापि स्मृतस्यानुष्ठानोपपत्तेर्नाङ्गभूतमन्त्रानुरोधेन प्रधानस्य सोमग्रहणस्यैन्द्रप्रदानमात्रसङ्कोचो युक्त इति तृतीये लिङ्गविशेषनिर्देशात्समानविधानेऽप्यैन्द्राणाममन्त्रत्वम्, (३·२) इत्यत्र वक्ष्यते, तथाङ्गभूतार्थवादानुरोधेन प्रधानभूतस्य विधेः सङ्कोचो न युक्त इति ।

नन्वत्राप्यर्थवादसद्भावेन विधेः प्ररोचनाशक्त्यभ्युपगमात्तैलादावर्थवादाभावेन विधायकत्वायोगात्तदनुरोधेन सङ्कोचो युक्त एवेत्याशङ्क्याह—**यत्रेति** । अर्थवादसद्भावकृतत्वात्प्ररोचनाशक्त्यपगमस्य घृतमात्रे तत्सद्भावादपगमो युक्तः, नेतरत्रेत्याशयः । पूर्वपक्षमुपसंहरति- **इतीति** ।

सन्दिग्धेष्वित्यादिसिद्धान्तभाष्यमक्तशर्कराेपधानस्य अर्थवादसद्भावे वर्त्तमानापदेशानुपपतेः, आख्यातस्य पञ्चमलकारत्वेन विधायकत्वावगमात् विध्यभावे च विध्येकवाक्यत्वकल्पकस्यार्थवादत्वस्याप्ययोगादिमां स्पृष्ट्वोद्गायेदित्येतदुदाहरणाव्यापकत्वाच्चायुक्तमाशङ्क्यार्थवादानपेक्षविधिपर्यवसानाभावाभिप्रायेण व्याचष्टे—**उच्यत इति** । प्रवृत्तिप्रतिबन्धकालस्यादिभङ्गं विना चेतनस्य प्रवर्त्तयितुमशक्यत्वादालस्यादिभङ्गाख्यप्ररोचनासापेक्षस्यैव विधेः प्रवर्त्तकत्वनिर्वाहादर्थवादसद्भावे च विधेः प्ररोचनशक्त्यभावात्, अर्थवादस्य च घृतमात्रविषयत्वाद्विधेरपि तन्मात्रविषयतैव युक्तेत्याशयः ।

श्लोकं व्याचष्टे- **यद्यपीति** । प्रक्रमशब्देनाऽपर्यवसानं सूचितम् । यद्यप्यञ्जनक्रियासाधनत्वाविशेषात्तैलवसयोरप्यर्थाक्षेपेणोपादानम्, तथाप्यनुष्ठानस्य विध्यधीनत्वाद्विधेश्च प्ररोचनापेक्षत्वे घृतमात्रविषयत्वात्तैलवसे नानुष्ठेये इत्यर्थः । वस्तुतस्तु प्रत्यक्षश्रुतेर्घृतेऽर्थाक्षेपायोगान्नार्थाक्षेपात्मकमुपादानमपि तैलवसयोरस्तीति क्रियामात्रमिवोदितमित्यादिना वक्ष्यत इति तावच्छब्देन सूचितम् ।

यत्तु तैलवसयोरर्थवादाभावाद्विधेरेव प्ररोचनाशक्तिकल्पनया पर्यवसानं कामं वेति श्लोकेनोक्तम् । तदाग्नेयाधिकरणव्युत्पादयिष्यमाणगौरवलक्षणवाक्यभेदापादनेन निराकरोति—**कल्पयितव्येति** । घृतप्ररोचनोपादानेन वा समाप्ते वाक्ये काल्पनिकतैलादिप्ररोचनया वाक्यान्तरारम्भापत्तेर्वाक्यभेदोऽभिप्रेतः । वैरूप्यलक्षणोऽपि वाक्यभेदोऽस्मिन् पक्षे स्यादित्याह—**घृत इति** । अतोऽर्थवादस्य घृतमात्रविषयत्वात्, तत्सद्भावे च विधेः प्ररोचनाकल्पनायोगात्तस्यापि तन्मात्रविषयतेति । श्लोकार्थमुपसंहरति—**तस्मादिति** ।

एवं तात्पर्यतो भाष्यं व्याख्याय, स्वरूपतो व्याचिख्यासुः सामान्यवचनेनेति भाष्यावयवमञ्जनसमर्थद्रव्यसामान्यस्याश्रवणादयुक्तमाशङ्क्याभ्युपेत्यवादत्वेन व्याचष्टे— **यद्यपि चेति** । अभ्युपेत्यवादस्य च वासः परिधत्ते इत्यादौ निरासतुल्यत्वसिद्धिः प्रयोजनम्, कथं न तद्विशेष इत्याशङ्क्य, भाष्यशेषव्याख्यानेन परिहरति—**तत्रेति** । अनेन च यो वाक्यस्य सामान्यवचनेनोपक्रमः, सनिगमनवशेन श्रुत एव विशेषे व्यवस्थाप्यते । तस्योपक्रमापेक्षितविशेषसमर्पणेन तदानुकूल्यादिति व्यवस्थाप्यत इत्यध्याहारेण योजितम् ।

ननूपक्रमस्थसामान्याक्षिप्तस्य तैलादेर्नोपसंहारानुरोधेन त्यागो युक्त इति भाष्येणाशङ्क्य, श्रुतविशेषसद्भावेऽर्थाक्षेपायोगान्न स्नेहसामान्यमर्थाद्विहितम्, येन निगमनस्योपक्रमनिरोधः स्यादिति 'न ही'त्यनेन परिहृतम्। तद्व्याचष्टे— **घृते चेति**। ननु विध्युद्देशमात्रपरामर्शात्स्नेहमात्रप्रतीतिर्भवत्येवेति कथमुच्यते न सामान्यं विहितमित्याशङ्कानिरासार्थत्वेन 'सन्दिग्धेष्विति भाष्यावयवं व्याचष्टे'—**सन्देहमात्रं हीति**।

पूर्वमनिर्द्धारितविशेषाभिप्रायेण सामान्यशब्दं व्याख्याय, द्रव्यसामान्यमपि न विहितमिति, यथाश्रुतं व्याख्यातुमाह—**क्रियामात्रमिति**। विधानेत्यादिभाष्यस्यापर्यवसानाभिप्रायेण श्लोकेनैव व्याख्याततत्त्वान्नापीत्यस्य च घृतेः प्रत्यक्षस्तुतिसद्भावात्सामान्यस्नेहमात्रस्य तैलादेः साक्षात्स्वयमेव विधितः स्तुतिः कल्पयितुं न युक्तेत्येव विधेः प्ररोचन[1]-कल्पनाशङ्कानिरासार्थत्वेन कल्पयितव्या चेत्यादिनैव व्याख्याततत्त्वा'ल्लक्षणयेति' भाष्यं लक्षणात्रयोपलक्षणार्थत्वेन व्याख्यातुमाह— **तैलादिति**। 'तस्मादि'त्युपसंहारभाष्यं व्याचष्टे —**तस्मादिति**। वृत्त्यन्तरोदाहृतमन्त्रवर्णापेक्षणे भाष्यकृतोऽभिप्रायमाह—**वृत्त्यन्तरेष्विति**। विध्यर्थवादयोर्भिन्नवाक्यत्वाभ्युपगमेनाऽस्मिन्विचारे तुल्यन्यायत्वान्मन्त्रवर्णोऽप्युदाहरणं स्यात्। भिन्नवाक्यगतस्य विशेषशब्दस्यात्रैव नियामकत्वेऽभिहिते षष्ठान्त्यमनर्थकं स्यादित्यर्थः॥ २८॥ (२२)

भा० प्र०— "प्राणभृद् उपदधाति" (तै० सं० ५।२१०) प्राणयुक्त मन्त्र के द्वारा इष्टका का उपधान=स्थापन करें। इस स्थल में पूर्व के समान भूमा=बाहुल्य न रहने पर भी लिङ्गसमवाय रहने से इस प्रकरण में जो मन्त्र पढे गये हैं, प्रथम प्रस्ताव में पचास द्वितीय प्रस्ताव में पाँच एवं तृतीय प्रस्ताव में दश मन्त्र हैं, उनमें यथाक्रम में प्रथम प्रस्ताव में तीन और द्वितीय एवं तृतीय में एक-एक मन्त्र में प्राण शब्द का प्रयोग रहने पर भी अधिक मन्त्रों में प्राणशब्द का प्रयोग नहीं है, किन्तु उन मन्त्रों को भी 'प्राणभृत्' कहा जाता है। इस स्थल में प्रथम प्राण शब्द से युक्त होने से उसके अनुसार सभी को छत्रिन्याय[2] से प्राणभृत कहा गया है। फलतः, इस स्थल में प्राण लिङ्ग अर्थात् ज्ञापक है। इसलिए, ऐसे स्थलों में लिङ्ग का समवाय अर्थात् समवधान ही गौणीवृत्ति का हेतु है। इस प्रकार तत्सिद्धि, जाति, सारूप्य, प्रशंसा, भूमा एवं लिङ्गसमवाय इन छ को गौणीवृत्ति का कारण कहा गया है। पूर्व में द्वितीय पाद में "रूपात् प्रायात्" (१।२।११) दूरभूयस्त्वात् (१।२।१२) इत्यादि सूत्रों में इस अधिकरण का बीज उपस्थापित है और यहाँ उसको अङ्कुरित एवं पुष्पित एवं फलित किया गया है॥ २८॥ इति तत्सिद्धिपेटिका।

---

१. प्ररोचकत्वेति २ पु० पा०।

२. किसी वर्ग में अनेक छाताधारियों के रहने पर छत्रिणो यान्ति, छाताधारी जाते हैं, यह प्रयोग होता है।

॥ अथ त्रयोदशं शेषाधिकरणम् ॥

[१३] संदिग्धेषु वाक्यशेषात् ॥ २९ ॥ सि०

शा० भा०—अक्ताः[1] शर्करा उपदधाति, तेजो वै घृतम्, इति श्रूयते। तत्र संदेहः—किं घृत-तैल-वसानामन्यतमेन द्रव्येणाञ्जनीयाः शर्कराः, उत घृतेनैवेति। कथं संदेहः ? अञ्जनसामान्येन वाक्यस्योपक्रमः, घृतेन विशेषेण निगमनम्। यथोपक्रमं निगमयितव्यमेकस्मिन् वाक्ये। तत्र यद्वा सामान्यमादौ विशेषोपलक्षणार्थं विवक्ष्यते। यद्वा निगमने विशेषः सामान्यलक्षणार्थः। तदारम्भनिगमनयोः किं समञ्जसमिति संशयः। एवं संदिग्धेषूपक्रमे सामान्यवचने विरोधाभावान्न विशेषः परिकल्प्यः। निगमने तूपजातः सामान्यप्रत्यय इति, विरोधाल्लक्षणार्थं घृतवचनम्। यथा सृष्टिष्वसृष्टिषु च सृष्टिशब्दः, एवं घृतमघृतं च घृतमित्युच्यते। संदिग्धेष्वेवं प्राप्ते।

सिद्धान्तः

ब्रूमः—सामान्यवचनेन विशेषापेक्षिणोपक्रमो वाक्यस्य विशेषे निगमनवशेन। कुतः ? न हि सामान्यं विहितम्। येन विरोधो निगमनस्य। कथमविहितम् ? संदिग्धेषु विधानशब्दाभावात्। न हि विधानशब्दोऽस्ति। 'अक्ताः शर्करा उपदधाति' इति वर्तमानकालनिर्देशात्। नापि सामान्यस्य साक्षात्स्तुतिः, प्रत्यक्षं तु घृतस्य स्तवनम्। श्रुत्या घृतस्य स्तुतिः, लक्षणया सामान्यस्य। श्रुतिश्च लक्षणाया ज्यायसी। तस्माद् घृतविधानम्। एवं, 'वासः परिधत्ते, एतद्वै सर्वदेवत्यं वासः, यत्क्षौममि'ति। तथा, 'इमां स्पृष्ट्वोद्गायेत्, इमां ह्यौदुम्बरीं विश्वा भूतान्युपजीवन्ति' इति ॥ २४ ॥ वाक्यशेषेण संदिग्धार्थनिरूपणाधिकरणम् ॥ २९ ॥ (२२)

भा० वि०—स्तुत्युपयोगित्वेन प्रतिपादितप्रामाण्यस्याप्यर्थवादस्य सन्धिग्धार्थनिर्णयोपयोगित्वेनापि प्रामाण्यमिह प्रतिपद्यत इति सङ्गतिः। विषयसंशयावाह—**अक्ता इत्यादिना**। ननु घृतशब्दात्तेनैवेति निर्णयोपपत्तेः कथं सन्देह इति प्रश्नपूर्वकं सन्देहकारणमाह—**कथमित्यादिना**। ततः किमत आह— **यथोपक्रमं चेति**। तथापि किं सन्देहकारणमत आह—**तत्रेति**। निगमनस्य यथोपक्रमत्वे सति निगमेन विशेषप्रतीतेरादावपि सामान्यस्य विशेषोपलक्षणार्थत्वाद् घृतेनैव। यद्वा आदौ सामान्यप्रतीतेर्निगमनस्यापि तल्लक्षणार्थत्वात् येन केनचिद् द्रव्येणेति भवति सन्देह इत्यर्थः।

---

1. तै० ब्रा० ३-१२-५। तै० सं० ४-३-१०।

ननु किमनेन सन्देहकारणमुक्तं भवतीति तत्राह— **अत्रेति**[१]। किं समञ्जसं मुख्यमित्यर्थः इति सन्देहः प्रकृतसन्देहकारणमिति शेषः। अनेन प्ररोचनानपेक्षविधिपर्यवसानसंभवासंभवस्सन्देहकारणमित्युक्तं भवति। पर्यवसाने हि विध्युद्देशेनैव सामान्याक्षिप्तविशेषमात्रनिर्णये तदनुरोधेन च पश्चादर्थवादान्वये सति विध्युद्देशस्य सामञ्जस्यमर्थवादस्य चासामाञ्जस्यं स्यात्। अपर्यवसाने··· विशेषापेक्षत्वेन तदनुरोधेन नयनादर्थवादस्यैव सामञ्जस्यम्, न विध्युद्देशस्येति। विचारप्रयोजनं तु घृतेनैवाञ्जनीया इति नियमसिद्धिः।

पूर्वपक्षमाह—**एवमिति**। विध्युद्देशस्योपक्रमस्थस्यासञ्जातविरोधितया विशेषमात्राक्षेपकत्वान्नार्थवादिकविशेषलक्षकत्वम्, अर्थवादस्य तु उपजातसामान्यप्रत्ययविरोधेन विशेषार्थसत्त्वासंभवात् सामान्यलक्षणार्थत्वमित्यर्थः। घृतशब्दस्यार्थवादिकस्य स्नेहनसमर्थघृताघृतद्रव्यमात्रपरत्वे दृष्टान्तमाह—**यथेति**। सन्दिग्धेषु घृतादिषु सत्स्वनुपजातविरोध्युपक्रमानुरोधेन घृतमघृतं च घृतमित्युच्यत इत्यर्थः।

सिद्धान्तमाह—**एवमिति**। यद्यप्यञ्जनक्रियाद्वारा द्रव्यसामान्यवचनेनाक्ता इत्यनेनोपक्रमः। तथापि तस्याननुष्ठेयतया विशेषापेक्षायामर्थवादवशेन विशेषकल्पना युक्तेत्यर्थः। ननु उपक्रमस्थसामान्याक्षिप्ततैलादेर्नोपसंहारानुसारेण त्यागो युक्त इति शङ्कते—**कुत इति**। श्रुतविशेषसंभवेऽर्थाक्षेपायोगान्न द्रव्य सामान्यमर्थाद्विहितं येन निगमनस्योपक्रमविरोधस्स्यादिति परिहरति—**नहीति**।

ननु विधेरर्थवादनिरपेक्षस्य प्ररोचनाशक्तिसंभवात्तस्याश्च द्रव्यमात्रविषयत्वोपपत्तेः कथमविहितमिति पृच्छति—**कथमिति**। सति हि विधायके शब्दे प्ररोचनाशक्तिर्भवेत्। स एव तु नास्तीति परिहरति—**विधानेति**। पर आह—विधानशब्द इति। दूषयति—**न वर्तमान इति**। तस्य च पञ्चमलकारतया विधित्वस्यार्थवादाधीनत्वात्तद्वशेन घृताख्यविशेषव्यवस्थापना युक्तेति भावः। क्लृप्तत्वाच्च घृतस्तुतेः। न विधिवशेन द्रव्यसामान्यस्तुतिः कल्पयितुं शक्येत्याह—**नापीति**।

ननु माभूद्विधिवशेन सामान्यस्तुतिः घृतशब्देनैवास्तु तत्राह—**श्रुत्येति**। यस्मात् घृतस्यैव स्तवनं तस्मादित्युपसंहरति—**तस्मादिति**। यत्र क्रियां विना द्रव्यसामान्यमभिधीयते, यत्र वा विधिविभक्तिः श्रूयते तत्राप्यार्थवादिक एव विशेष इत्यतिदिशति—**एवमिति**॥ २९॥ (२२)

अथ चतुर्दशं वाक्यशेषाधिकरणम्

त० वा०—विधिस्तुत्योः सदा वृत्तिः समानविषयेष्यते।
　　तस्मादेकत्र संदिग्धमितरेणावधार्यते॥

अधिकरणांगसंशये मतभेदोपन्यासः तन्निराशः

१, तत्रेति भाष्यपाठः।

किं पुनरत्र संदेहकारणम् ? विधौ सामान्यग्रहणमिति केचित् । तदप्युक्तम् । तत्र तावन्मात्रनिर्णयात् । स्यादेतत् । कथं निर्विशेषं सामान्यं संभवतीति ? घृतवदिति वदामः । तत्रापि च नवपुराणगव्यमाहिषादिसन्देहस्तदवस्थः । तेन यथाऽत्र घृतमात्रनिर्णयादसन्देहः विशेषानभिधानेऽपि सर्वैः कार्यसिद्धिः, एवमिहापि स्नेहनसमर्थद्रव्यमात्रग्रहणादसंदेहः । तस्मादर्थवादे घृतश्रवणात्संशयः इत्यपरे । तथापि न युक्तः, विशेषप्रतिपत्त्या निर्णीतत्वात् । न हि गौरानीयतां शुक्ल इत्यत्र कैश्चित्सन्दिह्यते । विषम उपन्यासः ।

विधौ यदि विशेषः स्यात्सन्देहः कस्य वा भवेत् ।
स्तुतिस्थे त्वितरस्यापि तुल्यैवैषा विचारणा ॥

यदि ह्येवं भवेत् 'अक्ताः शर्करा उपदधाति' घृतेनेति । ततो नैव किंचिद्विचार्येत । अथ त्वञ्जनवाक्यवदिहाप्येवं श्रूयेत, गामानय शुक्लः प्रशस्त इति, ततोऽस्त्येव सन्देहकारणमित्येतदप्युदाहरणमेव स्यात् । अतोऽन्यत्र सामान्यम् । अन्यत्र च विशेष इत्येतस्मात्सन्देहः ।

केचिच्च संशयदर्शनादेव विधिस्तुत्योर्वाक्यान्तरत्वमाचक्षते ।

यदि ह्येकं भवेद्वाक्यं विशेषे तत्समाप्यते ।
विशेषावगमात्तत्र न सन्देहः प्रसज्यते ॥

वाक्यभेदे पुनरेकं सामान्ये परिसमाप्तम् । अन्यद्विशेषपरमिति युक्तः सन्देहः ।

अर्थवादाधिकरणेनागतार्थत्वस्योपपादनम्

यत्तु 'विधिना त्वेकवाक्यत्वात्'[1], इति, तत्, अङ्गप्रधानवाक्यानामिव, पश्चात्संबन्धसद्भावाभिप्रायेण ।

तथा हि—

स्वार्थबोधे समाप्तानामङ्गाङ्गित्वाद्यपेक्षया ।
वाक्यानामेकवाक्यत्वं पुनः संहत्य जायते ॥

न त्वेतद्युक्तमिव, ये हि पदसंघाताः कर्मौपयिकेष्वर्थेषु पर्यवस्यन्ति, तेषां नानावाक्यत्वं युक्तम् । न त्वर्थवादानामेकवाक्यत्वात्प्राक्प्रयोजनलाभ इति, प्रथममत्रैकवाक्यता दुर्लभतरश्च संदेहः स्यात्, अन्योन्यनिरपेक्षयोः सामान्यविशेषयोरितरत्रेतरत्र च पर्यवसानात् । यदेव हि यत्रोपात्तं तदेव तत्रासन्दिग्धं गृह्यते । सामान्यसमाप्तश्चात्र विधिः पश्चाद्विशेषः स्यात् ।

छागन्यायेनागमार्थत्वस्य प्रतिपादनम्

मन्त्रवर्णवदिति चेत् ? एवमपि तदधिकरणविषयत्वात्पौनरुक्त्यप्रसङ्गः । तस्मादेकवाक्यतायामेवोपक्रमोपसंहारयोः सामान्यविशेषयत्वेन विप्रतिपत्तेरव-

---

१. जै० सू० १–२–१ ।

श्यंभाव्येकगोचरत्वाच्च किमधीना कस्य प्रवृत्तिरिति जायते सन्देहः। कस्य साम-ञ्जस्यमिति—यच्छ्रुतिवृत्तम्, तत्समञ्जसम्। न लक्षणावृत्तम्।

तत्र च—

स्तुतीनां विध्यधीनत्वादनुवादाच्च लक्षणा।
मुख्यत्वात्तु विधेर्नासावविरोधाच्च कल्प्यते॥

विधीयमानं हि स्तोतव्यम्, न तु स्तुत्यं विधेयम्, अप्राप्तार्थश्च विधिरिति न श्रौतार्थात् प्रच्यवते। यद्यपि तावदर्थवादोपक्रमत्वं भवेत्, ततः प्रथमज्ञानानुरोधेन कदाचिद्विधिर्वशीक्रियेत। विध्युपक्रमं त्विदम् 'अक्ताः शर्कराः' इति। तस्मान्निर्दिष्टसामान्ये यद्यर्थवादो न तादर्थ्यं प्रतिपद्यते, ततोऽनर्थको भवतीत्यशक्तः स्वतन्त्रीभवितुम्। विनाऽपि चार्थवादे न विध्युद्देशः समर्थत्वान्न युक्तस्तद्वश्यः कर्तुम्। अर्थवादस्त्वगतित्वाद्विधिवशेन वर्तते। विशेषश्च सामान्यमव्यभिचाराच्छक्नोति लक्षयितुम्, न सामान्यं व्यभिचाराद् विशेषम्। तस्माद् घृतशब्दः स्नेहमात्र-लक्षणार्थः।

कामं वा सोऽर्थवादोऽस्तु सामान्यस्थो घृते विधिः।
विना स्तुत्या विधानं तु स्नेहद्रव्यान्तरे भवेत्॥

यथा रौद्रेणापि मन्त्रेण सोमो गृह्यमाणो न केवलं तदर्थो भविष्यति, अन्यदेवत्यस्यामन्त्रग्रहणोपपत्तेरेवमनर्थवादकं तैलवसयोर्विधानम्, यत्रैव चांशे स्तुतिर्दृश्यते, तत्र विध्युद्देशस्य प्ररोचनाशक्तिरपगच्छति, अन्यत्र त्वाहितशक्तिना विधानमिति सर्वस्नेहग्रहणम्।

सिद्धान्तः

उच्यते—

समाप्यते विधिः कश्चित्कदाचिन्नाप्ररोचितः।
घृते प्ररोचनां दृष्ट्वा विधिस्तत्रानुमीयते॥

यद्यपि तावद्विधिप्रक्रमे तैलवसयोरप्युपादानम्, तथाऽपि प्ररोचनातो विधिर्घृते दृश्यते, नेतरयोरित्यनुपादातव्ये कल्पयितव्या न तद्विषया विधेः प्ररोचनाशक्तिः, क्लृप्ता च घृते। तस्यां च सत्यां काल्पनिकी वाक्यं भिनत्ति, घृते च क्लृप्तां गृह्णन्नितरत्र च कल्पयन्, वैरूप्येणापि विधिर्भिद्येत। तस्माद्विध्युद्देशोऽपि तैलादिभ्योऽपनीयते।

यद्यपि च सामान्यशब्दः स्यात् तथाऽपि न कश्चिद्विशेषः। तत्र सामान्यान्यथानुपपत्त्या यत्र क्वचनाश्रुते विशेषेऽपेक्षिते वाक्यशेषाद् घृत एव प्रत्ययो भवति, घृते च शब्दार्थे यदि श्रुत्यनुरोधेनात्यन्ताश्रुततैलादित्यागः क्रियते, किं विरुध्यते। सन्देहमात्रं हि तत्र बाधितम्, न तु प्रमाणं किंचित्। क्रियामात्रमेव

चेह चोदितम्, न द्रव्यम्। तत्र यावत्किंचित् द्रव्यमाक्षिप्येत, यदि कश्चिदपि श्रुतिलेशो न स्यात्। घृतार्थवाददर्शनात्त्ववश्यकर्तव्यायामश्रुतद्रव्यविधिकल्पनायां नान्यत्र प्रमाणमस्तीत्यङ्गीकृत्य घृताञ्जनविधिर्गम्यते। तत्र भ्रान्त्युत्पन्नतैलाद्याकङ्क्षा निर्मूलत्वाद् बाध्यमाना न दुष्येतेत्यविरोधः।

तैलादिग्रहणे च लक्षणात्रयं स्यात्। क्रियया द्रवद्रव्येण च विशेषः, घृतशब्देन च सामान्यं लक्षयितव्यम्। तस्माद् घृतग्रहणं प्रमाणमिति सिद्धम्। वृत्त्यन्तरे तु अत्रैव मन्त्रवर्णोऽप्युदाहृतः। तत्र तु घृतेन किं करिष्यत इति वक्तव्यम् ॥२९॥

॥ अथ सामर्थ्याधिकरणम् ॥ १४ ॥

न्या० सु०—वाक्यशेषस्य सन्दिग्धार्थनिर्णायकत्वे स्तावकत्वातिरिक्तधर्मप्रमोपयोगद्वाराभिधानार्थं व्युत्पादिते, प्रसङ्गात्सामर्थ्यस्यापि सन्दिग्धार्थनिर्णायकत्वव्युत्पादनेनानन्तराधिकरणसङ्गतिं सूचयन् पूर्वसूत्रगतसन्दिग्धपदानुषङ्गेण सूत्रं व्याचष्टे—**अथेति**। नन्वर्थशब्दोक्तसामर्थ्यकल्प्यद्रवादिविषयविशेषस्याशाब्दत्वाच्छाब्देन विधिना **अन्वयो न सम्भवतीत्याशङ्कानिरासार्थत्वेनैकदेशत्वादिति** सूत्रावयवं व्याख्यातुं **सामर्थ्यकल्पितेन शब्देन—विध्यंशेनेत्युक्तम्**। व्यवस्थार्थत्वेन कल्पनाशब्दं व्याख्यातुं निर्णयशब्दः। **ननु** सामर्थ्यस्य लिङ्गत्वात्तत्प्रामाण्यं व्युत्पादनस्य च तृतीयविषयत्वान्नास्मिल्लक्षणे सङ्गतिरित्याशङ्क्य, प्रासङ्गिकसङ्गतिसूचनाय—**अथेत्युक्तम्**। प्रसङ्गकारणं[1] वक्तुं सन्दिग्धशब्दः। इतिकरणो भ्रान्त्युत्पन्नतैलाद्याकाङ्क्षेति वार्त्तिकसूचितविध्युद्देशमात्रपर्यालोचनोत्थविषयोपलक्षणभूताव्यवस्थितार्थप्रतीतिरूपसन्देहप्रकारपरामशर्थः। न्यायावताराङ्गभूतस्तु सन्देहः किमव्यवस्थितविषयतया भासमानस्य विधेरव्यवस्थितविषयतैवोचिता, सामर्थ्याद्वा विषयव्यवस्थाकल्पना येत्येवंरूपो यथाभाष्यमेव स्पष्टत्वान्नोक्तः। विधेर्वस्तुसामर्थ्यापेक्षासदसद्भावसन्देहश्च तत्कारणमाख्यातशब्दानामर्थं ब्रुवतां शक्तिः सहकारिणीति सिद्धान्तभाष्यपर्यालोचनयाऽवगन्तुं शक्यत्वान्नोक्तम्। पूर्वपक्षोऽपि प्रमाणान्तरगम्यवस्तुसामर्थ्यापेक्षणे वेदस्य सापेक्षत्वेनाप्रामाण्यापत्तेर्वस्तुसामर्थ्यानपेक्षत्वात्तीक्ष्णपुष्करधारस्य च स्रुवस्य संहतशब्दोक्तकठिनद्रव्यावदानेऽपि सामर्थ्यसम्भवादायसावष्टम्भेन स्रुवहस्तयोर्मांसावदानेऽपि शक्तिसम्भवात्, कोटरवतश्च स्वधितेर्द्रवावदानेऽपि सामर्थ्योपपत्तेरनुग्राहकापेक्षायामपि निरपेक्षायामपि निरपेक्षसाधनत्वाविधातादव्यवस्थैव युक्तेत्येवंरूपो भाष्योक्तविशेषानभिधानेनैव स्वष्टत्वान्नोक्तः। वाक्यशेषप्रत्युदाहरणरूपेणात्र पूर्वपक्षिणः प्रत्यवस्थानादनन्तरसङ्गतिं वक्तुम्—**यत्र वाक्यशेषो न विधीयत इत्युक्तम्**। सापेक्षत्वेन वेदाप्रामाण्यापत्तेः प्रमाणान्तरगम्यवस्तुसामर्थ्यापेक्षा विधेर्न युक्तेत्याशङ्कानिरासायैवकारः। अशक्यार्थानुष्ठानायोगात्प्रवर्त्तकत्वव्याघातापत्तेः सर्वविधिभिः सामर्थ्यस्यावश्यापेक्षणीयत्वात्सामर्थ्यस्य च प्रमाणान्तरगम्यत्वेऽपि विषयस्यान्यतोऽनवगतेर्वेदस्य नैर-

---

१. प्रकारमिति–पु० पा०।

पेक्ष्याविघातात्तीक्ष्णपुष्करधारिणापि स्रुवेण मांसावदानाशक्तेर्निरपेक्षसाधनत्वविरोधाच्चायसावष्टम्भवकल्पनानुपपत्तेः । केवलेनापि च स्रुवेण द्रवावदानोपपत्तेरायसस्यानुग्राहकत्वकल्पनायोगात्, स्वधितेश्च 'रूपं वा शेषभूतत्वादित्यनेन न्यायेन वासोवल्लोकसिद्धस्य चोपादेयत्वात्कोटरकरणेन सामर्थ्याधीनकल्पनानुपपत्तेः सामर्थ्याद् व्यवस्थितविषयत्वकल्पना युक्तेत्याशयः ।

स्रुवाद्युदाहरणेषु सामर्थ्येनानुवाद्यगतसन्देहनिरासदर्शनाद्विधेयगतसन्देहनिराससामर्थ्यशङ्कानिरासायोदाहरणान्तरस्य सिद्धान्तभाष्ये दत्तस्याकोशेऽप्यञ्जलिशब्दवाच्यद्विहस्तसंयोगाविरोधात्सन्देहविषयत्वानुपपत्तिमाशङ्क्याकोशाख्यविशेषविवक्षासदसद्भावविषयत्वेन सन्देहमुपपादयञ्छ्लोकं व्याचष्टे **देवतेति** । एकदेशसंयोगेऽपि संयोगप्रसिद्धेः सर्वावयवसंयोगप्रदर्शनार्थं संहतयोर्हस्तयोः—**संयोग इत्युक्तम्** । आकोशशब्दवाच्येषत्कोशाकारव्यावृत्त्यर्थो मात्रशब्दः । आकोशे तर्हि सर्वावयवसंयोगाभावान्नाञ्जलित्वं स्यादित्याशङ्क्य, नाञ्जलिनेति प्रयोगो दर्शितः संहतत्वाकोशत्वयोर्विशेषयोः सामान्यवाचिनोऽञ्जलिशब्दात्सन्देहः सक्तुहोमेऽञ्जलिचोदनायां भवतीत्यर्थः । 'चोदनाशब्देन' विधेयगतत्वं दर्शितम् । 'असति चे'त्यनेन घृतवत्सन्देहव्यावर्त्तकाकोशविषयवाक्यशेषाश्रवणेऽपि होमान्यथानुपपत्तिकल्पितेन वाक्यशेषेणाकोशनिर्णयाभिधानाच्छ्लोको व्याख्यातः ।

ननु सामान्यतः प्रवृत्तस्य विधेः सामर्थ्यकल्पितवाक्यशेषानुरोधेन विषयसङ्कोचाभ्युपगमे दर्शपूर्णमासविधेरपि सामान्यतः सर्वाङ्गविशिष्टकर्मविषयप्रवृत्तस्य सामर्थ्यकल्पितवाक्यशेषानुरोधेन शक्यमात्राङ्गविषयतया सङ्कोचापत्तेरन्धादीनामपि कर्मण्यधिकारप्रसङ्गात् तिर्यगधिकरणविरोधः स्यादित्याशङ्कते - **नन्विति** । येन प्रकारेण कर्त्तुं शक्नुयात्तेन प्रकारेण कुर्यादिति वाक्यशेषेणान्धादीनामाज्यावेक्षणादिप्रकारव्यावृत्तेस्तद्रहितोऽधिकारः स्यादित्यर्थः । विधिस्त्वेकश्रुतित्वादित्येकादशाधिकरणन्यायेन सर्वाङ्गोपसंहारनिश्चयात्किमङ्गं प्रयोक्तव्यमिति सन्देहानुपपत्तेर्नात्र सामर्थ्यानुरोधेन सङ्कोचापादको वाक्यशेष इति परिहरति—**नेति** । एतदेव विवृणोति - **सन्दिग्धेति** । ननु प्रयोगविधिपर्यालोचनया सर्वाङ्गोपसंहारावगमेऽप्यधिकारस्य सामर्थ्यानपेक्षत्वादन्धादेश्चाज्यावेक्षणादौ सामर्थ्याभावात्किं प्रयोगशास्त्रानुरोधेनाधिकारशास्त्रं समस्ताङ्गोपसंहारसमर्थपुरुषविषयतया सङ्कोचनीयम्, अधिकारशास्त्रानुरोधेन वा प्रयोगशास्त्रं शक्यमात्राङ्गविषयतयेति सन्देहेऽधिकारस्य फलपर्यवसायित्वेन प्राधान्यात्, तदनुरोधेन यथा शक्नुयात् तथा कुर्यादिति वाक्यशेषकल्पनया प्रयोगविधेः शक्यमङ्गविषयतया सङ्कोचोपपत्तेरन्धाद्यधिकारो दुर्वार इत्याह - **न चेति** । कार्ये ज्ञातेऽधिकारः स्यादित्यनेन न्यायेन प्रयोगविधि-प्रयोज्यसमस्ताङ्गावधारणपूर्वकत्वेनाधिकारविधेरेव प्रयोगविध्यनुरोधवृत्तित्वस्य न्याय्यत्वात् समस्तधर्मोपेतं यः शक्नुयादिति वाक्यशेषकल्पनेन सर्वाङ्गोपसंहारसमर्थस्यैवाधिकारनिश्चयान्नाधिकारेऽपि सन्देह इत्यपि शब्दार्थे च शब्दमङ्गीकृत्य योज्यम् ।

यः शक्नुयात् स कुर्यादिति वक्तव्ये प्रतिसमाधेयाङ्गवैकल्ये सति तिमिराद्यपनयेनापादितस्याप्यधिकारसद्भावमङ्गहीनस्य सद्धर्मेत्यत्र षष्ठाद्यधिकरण एव वक्ष्यमाणं सूचयितुं यथा शक्नुयात्—**तथा कुर्यादित्युक्तम्**। द्रव्येन्द्रियवैकल्यादिना स्वतोऽशक्तोऽपि द्रव्यार्ज्जनादिना यथा शक्तो भवति, तथा शक्तिमापाद्य सर्वधर्मोपेतं कुर्यादित्यर्थः। यदि तु न कश्चित्सर्वाङ्गोपसंहारसमर्थः स्यात् ततः कतिपयाङ्गोपसंहारेणाप्यधिकारः कल्प्यते न त्वेतदस्तीत्याह- **सन्ति चेति**। अतः प्रयोगविधेः सङ्कोचं विनाऽनुपपत्त्यभावान्न शक्यमात्राङ्गविषयतया सङ्कोचकल्पना युक्तेत्युपसंहरति—**इतीति**।

नन्वेवं सति नित्याधिकारेऽपि यो समस्तधर्मोपेतं कर्त्तुं शक्नुयात्, सोऽवश्यं कुर्यादिति वाक्यशेषकल्पनया सर्वाङ्गोपसंहारसमर्थस्यैवाधिकारोपपत्तेः सर्वशक्त्यधिकरणविरोधः स्यादित्याशङ्क्याह—**यत्र त्विति**। जीवने सत्यप्यकरणे जीवितस्य निमित्तत्वव्याघातापत्तेः पौर्णमास्यादिकालवद्याज्यावेक्षणादेरुपादेयत्वेनानुपादेयनिमित्ततावच्छेदकत्वायोगान्निमित्तपरतन्त्रविधि-प्रयोगविधेः, तदनुरोधेन निमितश्रुतिबाधायोगान्निमित्तश्रुत्यवगतावश्यकर्त्तव्यतानुरोधेन यावज्जीवादिप्रयोगविधेः शक्यभावाङ्गविषयतया सङ्कोचकल्पना युक्तेत्याशयः। प्रयोगचोदनान्यथानुपपत्तिरेवशब्देन परामृष्टा। अनुष्ठानमात्रादविषयश्चात्र सङ्कोचः कल्प्यते। प्रयोगविधिस्तु नित्याधिकारेऽपि सर्वाङ्गविशिष्टमेव प्रधानमनुष्ठापयतीति, तत्रापि सामर्थ्यापादने यतितव्यमिति त्यागशब्देन सूचितम् अशक्याङ्गत्यागस्य च विधिनाऽनुपातत्वान्न वैगुण्यापादकतेति विशेषेणोक्तम्। चोदनयानुज्ञातत्वं चोदनाशब्देनोक्तम्। अतः कामाधिकारेऽन्धादीनामधिकारस्यानिर्दिष्टस्यानापत्तेर्नित्याधिकारे चापाद्यामानस्येष्टत्वात्सामान्यतः प्रवृत्तस्य विधेः सामर्थ्यानुरोधेन सङ्कोचकल्पनेऽपि नानिष्टापत्तिरित्युपसंहरति—**इतीति**। अन्धादीनामधिकारमिति विपरिणतेव्यंवहितान्वयेन योज्यम्।

ननु यदि सामर्थ्येनाश्रुतोऽपि वाक्यशेषः कल्प्यते ततः कामाधिकारे सन्हाभावेऽपि यथाशक्नुयात्तथा कुर्यादिति वाक्यशेषस्य कल्पयितुं शक्यत्वादन्धाद्यधिकारोऽनिर्वार एव स्यादित्याशङ्क्याह—**तस्मादिति**। अयमाशयः—वैदिकस्यार्थस्य प्रमाणन्तरागोचरत्वाद्वैदिक एव वाक्यशेषः सामर्थ्येन कल्पनीयः कल्प्यस्य वाक्यशेषस्य वेदानुगतत्वेन व्यतिरिक्तं वैदिकत्वं न सम्भवति न च निर्णीतार्थो वेदो वाक्यशेषमनुमन्यत इति तस्माच्छब्दस्य योग्यतया चोदितशब्दोक्तचोदनानुमितत्वपरामर्शित्वात् चोदनयानुमतत्वादित्यर्थः। अलब्धात्मकशब्देन सन्दिग्धार्थत्वाद्—**अपर्यवसितत्वमित्युक्तम्**। सिद्धशब्देन पर्यवसितत्वं पौरुषेयत्वशब्देन पुरुषोत्प्रेक्षाप्रभवत्वम्॥ २९॥

भा० प्र०—अर्थवाद का निरूपण करते हुए अर्थवाद वाक्यों की अन्य दृष्टि से भी उपयोगिता प्रदर्शन करते हुए इस सूत्र को अवतारणा की गई है। "अक्ताः शर्करा उपदधाति" (तै० ब्रा० १।१२।५) अक्त=अभ्यञ्जनकृत अर्थात् स्निग्ध द्रव्यों से सिक्त शर्करा कङ्करजाति की मृत्तिका का उपधान=स्थापन करें। इसके बाद ही अर्थवाद में कहा गया

है "तेजो वै घृतम्" (तै० ब्रा० ३।१४।५) घृत ही तेल है। इस स्थल में यह सन्देह है कि "अक्ताः शर्कराः" इत्यादिविधिवाक्य में शर्करा अर्थात् कङ्कर वाली मिट्टी का अभ्यञ्जन करना कहा गया है, वह क्या घी तैल वसा आदि किसी स्निग्ध द्रव्य से किया जायेगा अथवा किसी विशेष स्निग्ध द्रव्य से अर्थात् अर्थवाद वाक्य से ज्ञात घृत के द्वारा करना होगा ? पूर्वपक्षी का कहना है कि घृत, तैल, वसा आदि किसी भी स्निग्ध द्रव्य का यहाँ ग्रहण करना चाहिए, क्योंकि, विधिवाक्य में केवल अभ्यञ्जन की चर्चा है, उसके लिए किसी विशेषस्निग्ध द्रव्य का उल्लेख नहीं है। अर्थवाद की अपेक्षा विधि का ही प्राबल्य माना गया है, अतः उक्त कर्म में अर्थवाद से बोधित घी का ग्रहण नहीं किया जाता है। क्योंकि विधि मुख्य अर्थ को कहती है विधि असञ्जात विरोधि एवं अज्ञात अर्थ की ज्ञापक है, अतः अर्थवाद से वह प्रबल है। अर्थवाद विधि का ज्ञापक होने से मुख्य नहीं है, अपितु गौण है एवं परवर्ती वाक्य से बाधित होने से असञ्जात विरोधी न होकर सञ्जात विरोधी है, जो पूर्व से रहता है, उसकी स्थिति के समय अन्य किसी की भी उपस्थिति न होने से विरोधी का उद्भव नहीं है, किन्तु जो बाद में आता है उसके पूर्वकाल से उपस्थित विषय उसका विरोधी होकर उपस्थित होता है—वह सञ्जात विरोधी रहता है। उस स्थल में विधिवाक्य प्रथम से श्रुत होने से असञ्जात विरोधी है और अर्थवाद बाद में पठित होने से वह सञ्जात विरोधी है। प्रस्तुत प्रसङ्ग में विधिवाक्य प्रथम श्रुत होने से असञ्जात विरोधी एवं अर्थवाद पश्चात् पठित होने से सञ्जात विरोधी है। साथ ही अर्थवाद विधिबोधित विषय का ही स्तावक होने से वह अज्ञात अर्थ का ज्ञापक नहीं है, अपितु प्राप्त अर्थ का ही बोधक है। अतः अर्थवाद विधि की अपेक्षा दुर्बल होता है। दुर्बल से प्रबल का बाध नहीं हो सकता है। इसलिए अर्थवाद विधि की अपेक्षा दुर्बल है। दुर्बल से प्रबल का बाध नहीं होता है, अतः अर्थवाद से बोधित घृत से विधिबोधित स्नेहद्रव्य सामान्य का बाध मानना उचित नहीं है। अतः घी, तेल, वसा आदि में किसी भी स्निग्ध द्रव्य से शर्करा का अभ्यञ्जन किया जा सकता है, घृत से अभ्यञ्जन किया जायगा—यह बात नहीं है। यह पूर्वपक्षियों का कहना है।

इसके समाधान में सिद्धान्ती का कथन है कि "सन्दिग्धेषु वाक्यशेषात्" सामान्य क्रिया युक्त नहीं है, अतः अभ्यञ्जन विधि के आधार पर किसी एक विशेष स्निग्ध द्रव्य का ही ग्रहण करना उचित है। घी, तेल, वसा आदि विशेष-विशेष स्नेह द्रव्यों में कौन ग्राह्य है, उसके निर्णय के लिए कारण न होने से विधि सन्दिग्ध होगी। यदि विधि सन्दिग्ध रहेगी तो विधि का विधायकत्व ही सम्भव नहीं होगा। क्योंकि, संशयात्मक अप्रामाणिक होता है। वेदविधि को अप्रामाणिक नहीं माना जा सकता है। द्वितीयपाद के प्रथम अधिकरण के अनुसार यह अवगत होता है कि विधि एवं अर्थवाद परस्पर सापेक्ष है। इसलिए, इस स्थल में अर्थवाद से विधि के प्रामाण्य की रक्षा हो सकती है कि नहीं यही प्रथम विवेच्य है। उसके अनुसार देखा जाता है अर्थवाद में

घृत को तेल कहा गया है, और जिसकी प्रशंसा की जाती है—वही विधेय होता है—इस नियम के अनुसार, यहाँ घी के ही विधान में विधि का तात्पर्य अवगत होता है। अतः, घी से ही अभ्यञ्जन करना उचित है। अर्थवाद में बोधित घी से अभ्यञ्जन करने पर विधि का बाध होगा—यह आशङ्का भी ठीक नहीं है, क्योंकि, विरोध रहने पर बाध होता है, प्रकृत में विधि के अर्थ के साथ अर्थवाद का कोई विरोध ही नहीं है, क्योंकि, अभ्यञ्जन ही विधि का विषय है उस अभ्यञ्जन के लिए घी का ग्रहण करने पर भी विधि से बोधित अभ्यञ्जन सम्पादित हो जाता है, फलतः अर्थवाद ही इस स्थल में विधि के अर्थ के विषय में उपलब्ध सन्देह का निवारक है।

इस प्रसङ्ग में **भाट्टदीपिका** और **भाट्टचिन्तामणि** टीकाओं में कहा गया है कि दूसरे अन्तिम सूत्र का अर्थात् "एकदेशत्वात्" यह अंश का इस स्थल में अपकर्ष कर सूत्र का अर्थ यह होगा कि—सन्दिग्ध विध्यर्थ का स्थल में वाक्यशेष = अर्थवाद से अर्थ का निर्णय किया जाता है, क्योंकि, अर्थवाद विधिवाक्य का ही एक अंश होता है।

"सन्दिग्धेषु" = सन्दिग्ध स्थलों में अर्थात् जिन स्थलों में विधि का अर्थ सन्देहयुक्त होगा वहाँ "वाक्यशेषात्"—वहाँ वाक्यशेष से अर्थात् अर्थवाद से अर्थ का निरूपण होता है ॥ २९ ॥

अर्थाद्वा कल्पनैकदेशत्वात् ॥ ३० ॥ (उ०)

शा० भा०—स्रुवेणाऽवद्यति, स्वधितिनाऽवद्यति, हस्तेनाऽवद्यति इति श्रूयते। तत्र सन्देहः, किं स्रुवेणावदातव्यं सर्वस्य द्रवस्य संहतस्य मांसस्य च, तथा स्वधितिना हस्तेन च, उत सर्वेषामर्थतो—द्रवाणां स्रुवेण, मांसानां स्वधितिना, संहतानां हस्तेनेति ? अविशेषाऽभिधानादव्यवस्था इति। एवं प्राप्ते ब्रूमः—

अर्थाद्वा कल्पना, सामर्थ्यात् कल्पना इति। स्रुवेणावद्येद्, यथा शक्नुयात्। तथा यस्य शक्नुयात् तस्य चेति। आख्यातशब्दानामर्थं ब्रुवतां शक्तिः सहकारिणी। एवञ्चेद्, यथाशक्ति व्यवस्था भवितुमर्हति। तथा—अञ्जलिना सक्तून् प्रदाव्ये जुहोति[1] इति, द्विहस्तसंयोगोऽञ्जलिः, स व्याकोशोऽर्थात् कर्त्तव्यः। तथा हि शक्यते होमो निर्वर्त्तयितुम्। तद् यथा—कटे भुङ्क्ते इत्यर्थात् कल्प्यते-कटे समासीनः कांस्यपात्र्यामोदनं निधाय भुङ्क्ते इति ॥३०॥

इति सामर्थ्याऽनुसारेणव्यवस्थितानां व्यवस्थाऽधिकरणम् ॥ १९ ॥

॥ इति श्रीशबरस्वामिकृतौ मीमांसाभाष्ये प्रथमाध्यायस्य चतुर्थः पादः ॥

॥ समाप्तोऽयं प्रथमोऽध्यायः ॥

---

१. सोमयागस्य अवभृथकर्मणोऽनन्तरं वेद्याः प्रदाहे दावाग्नौ 'अञ्जलिना सक्तून् प्रदाव्ये जुहुयात्' (तै० सं० ३।३।८; गोपथ-ब्राह्मण २।४।८) इति श्रूयते।

भा० वि०—विधेरपि सामर्थ्यकल्पितावयवस्य सन्दिग्धार्थनिर्णयोपयोगित्वेनापि प्रामाण्यमिह प्रसङ्गात्प्रतिपद्यत इति सङ्गतिः। विषयमाह—**स्रुवेणेति**। विधेर्वस्तुसामर्थ्यापेक्षासदसद्भावाभ्यां संशयमाह—**तत्रेति**। किं सर्वस्य मांसादेरवदानं स्रुवेण कर्तव्यमित्यर्थः। सर्वेषामवदातव्यमित्यनुषङ्गः—**अर्थत इति**। वस्तुसामर्थ्यादित्यर्थः, प्रयोजनं तु व्यवस्थयाऽनुष्ठानसिद्धिः। पूर्वपक्षमाह—**अविशेषेति**। विशेषाभिधानाभावात् सामर्थ्यापेक्षत्वे च शब्दस्याप्रामाण्यापत्तेरव्यवस्थैव युक्तेत्यर्थः।

सूत्रं व्याकुर्वन् सिद्धान्तमाह—**एवमिति**। वाशब्दः पक्षव्यावृत्त्यर्थः, कल्पनाशब्दो व्यवस्थाविषयः। सामर्थ्याधीनां व्यवस्थां विवृणोति—**स्रुवेणेति**।

ननु सामर्थ्यापेक्षत्वे शब्दस्याप्रामाण्यप्रसङ्ग इत्याशङ्कानिरासार्थमेकदेशत्वादिति सूत्रावयवं व्याचष्टे—**आख्यातानामिति**। सामर्थ्यकल्पितैकदेशापेक्षयार्थमभिदधतामाख्यातानां सामर्थ्यमपि सहकार्येवेत्यर्थः। सामर्थ्यापेक्षत्वे च तस्य व्यवस्थितत्वाद्व्यवस्था युक्तेत्याह—**एव चेदिति**।

स्रुवाद्युदाहरणेषु सामर्थ्यस्यानुवाद्यगतसन्देहनिरासार्थत्वदर्शनाद्विधेयगतसन्देहनिरासासामर्थ्यमाशङ्क्योदाहरणान्तरमाह—**एवमिति**। कथं तत्राञ्जलिशब्दस्याव्यवस्थितविषयत्वसन्देहस्तत्राह—**हस्तद्वयेति**। संयोगस्सर्वावयवसंयोगोऽभयप्रार्थनादौ संहतहस्तसंयोगोऽञ्जलिः, नाञ्जलिना पिबेदित्यादावित्यर्थः। एवं च किं येनकेनचिदञ्जलिना उताक्रोशेनैवेति भवति सन्देह इति भावः। विशेषानभिधानादव्यवस्थायां सिद्धान्तमाह—**सोऽर्थादिति**। अकोशः ईषत्कोशाकारः। अर्थादित्येतद्विवृणोति—**तथा हीति**। अकोशाभ्युपगम इत्यर्थः। सामर्थ्यस्य व्यवस्थापकत्वे दृष्टान्तमाह— **तद्यथेति** ॥ ३० ॥

इति श्रीमन्नारायणपूज्यपादशिष्यश्रीगोविन्दामृतमुनिविरचिते
शाबरभाष्यविवरणे प्रथमाध्यायस्य चतुर्थः पादः
समाप्तश्च प्रथमोऽध्यायः

त० वा०—अथ यत्रेति सन्दिग्धे वाक्यशेषो न विद्यते। तत्र सामर्थ्यसिद्धेन विध्यंशेनैव निर्णयः। देवताप्रसादाभयप्रार्थनादौ संहतहस्तसंयोगमात्रमञ्जलिः; नाञ्जलिना वारि पिबेत् इत्यादावाकोशः। सक्तुहोमचोदनार्था शब्दात्सन्देहे सत्यसति चाकोशस्य वाक्यशेषेऽन्यथानुपपत्तेरेवाकोशाश्रयणम्। नन्वनेनैव न्यायेन यथा शक्नुयादिति वाक्यशेषादन्धादीनामाज्यावेक्षणादिरहितः कर्माधिकारः स्यात्। नासन्देहात्, सन्दिग्धनिर्णयार्था त्वेवं कल्पना भवति। न चाधिकारे सन्देहः समस्तधर्मोपेतं यथा शक्नुयात्तथा कुर्यादितिवाक्यशेषात् सन्ति च तादृशस्य कर्तारश्चतुष्पादादयः इति न प्रयोगचोदनाऽन्यथाऽनुपपत्तिः।

यत्र तु यावज्जीवचोदनादावेवं भविष्यति तत्र शक्तिकृताङ्गत्यागेऽपि सत्यवैगुण्यं प्रधानस्य चोदितमित्याश्रयिष्यामह एव तस्माद्यावदेव लब्धात्मको विधिस्तावद्यत् कल्पते तद्वैदिकम्। सिद्धे तु तत्कल्पनं पौरुषेयत्वादप्रमाणं सामर्थ्याधीनत्वाद्वाक्यशेषसिद्धेः।

आह च—

यथैव पाठः प्रतिपत्त्युपायस्तथैव सामर्थ्यमपि श्रुतीनाम्।
तेनैव चैता न समामनन्ति सहस्रभागं तु समामनेयुः॥

इति कृतबहुमार्गं मन्त्रविध्यर्थवादैः
स्मृति-परिखमुद्रां खेदशालोपगूढाम्।
अनभिभवसमर्थं धर्मदुर्गं प्रविश्य
प्रविभजति समर्थामर्थचिन्तामिदानीम्॥ ३०॥

इति श्रीभट्टकुमारिलविरचिते मीमांसातन्त्रवार्तिके
प्रथमाध्यायस्य चतुर्थः पादः
समाप्तः प्रथमाध्यायः

न्या० सु०—ननु वैदिकशब्दसामर्थ्यस्यैव वेदानुमतत्वात् वैदिकत्वोपपत्तेः किं वाक्यशेषकल्पनयेत्याशङ्क्याह—**सामर्थ्येति**। वाक्यशेषसिद्धमात्रं सामर्थ्याधीनम्, न वैदिककार्थनिर्णयः, शब्दैकसमधिगम्यत्वात्तस्य। सामर्थ्यस्य चाशाब्दत्वात्कल्पितस्य चार्थस्याशाब्दवैदिकार्थान्वयानुपपत्तेर्वेदानुमतत्वासम्भवादित्याशयः। ननु व्यवस्थितविषयस्य सामर्थ्यस्य व्यवस्थितविषयभङ्गत्वं विनानुपपत्तेः सामर्थ्यव्यवस्थयाङ्गत्वं व्यवस्थामात्रं कल्पयितुं युक्तम्। शब्देन तु विनानुपपत्त्यभावाच्छब्दकल्पना न युक्तेत्याशङ्क्य सामर्थ्यस्य शब्दकल्पकत्वे वृद्धसम्मतिमाह—**आह चेति**। विभज्यमानसाकाङ्क्षसंहत्यार्थविशिष्टैकार्थप्रतिपादकपदसमुदायस्य वाक्यत्वात् तस्य च वाक्यार्थप्रतिपत्त्युपायभूतकल्पपदार्थवाचिपदाभावे सकाङ्क्षत्वेनाऽपरिपूर्णस्य विशिष्टार्थप्रतिपादकत्वायोगात् विशिष्टाश्रुतिपादनार्थं च विना व्यवहारासाधनत्वेनानर्थक्यापत्तेः, परिपूर्णत्वाय श्रुतपदैकवाक्यभूतपदान्तरकल्पना युक्तेति भावः। प्रतिपत्तेर्नित्यं प्रतिपाद्यसापेक्षत्वात्प्रतिपत्तिशब्दस्य श्रुतशब्दसापेक्षत्वेऽपि उपायशब्देन सह समासाविघातः सामर्थ्यकल्पितायाः श्रुतेः स्मृतिकल्प्यश्रुतिवत् पृथक्वाक्यत्वाभावाच्छ्रुतवाक्यशेषभूतपदविषयः श्रुतिशब्दः।

ननु कल्प्यानां श्रुतीनां कस्य चिच्छाखायामनाम्नानादभावावगतेः शशशृङ्गवत्कल्पना न युक्तेत्याशङ्क्य—**तेनैव चेत्युक्तम्**। सामर्थ्यलभ्यत्वेनाम्नानोपपत्तेर्नाभावकल्पना युक्तेति भावः। ननु सामर्थ्यलभ्यानामपि प्रतिपत्तिसौकर्यादाम्नानं युक्तमित्याशङ्क्य—**सहस्रेत्युक्तम्**। सहस्रशब्दोऽयमनन्तवाची। सामर्थ्यलभ्यानामाम्नानेऽनन्तावयवे-

नाम्नानापत्तिरिति क्लेशः स्यादित्यर्थः। श्रोतृप्रोत्साहनाय सूत्रकृतः शत्रूत्थभयशङ्का-निरासाय यत्नपूर्वकमर्थचिन्तां कुर्वता राज्ञा सह रूपकालं कारद्वारेण श्लेषं दर्शयन् प्रमाणलक्षणसमाप्तिं तस्याश्च प्रमेयचिन्तार्थोत्तरैकादशलक्षणीं प्रति हेतुत्वात्तदारम्भ-सम्भवं सूचयति—**इतीति**। बहुमार्गं विस्तीर्णं च दुर्गं तद्रक्षिणां प्रवेशनिर्गमकविरोधा-शक्तेः परिखाप्राकारोपेतं चतुरस्रं प्रवेष्टुमशक्तेः परैरभिभवितुमशक्यं प्रविश्यार्थस्य हिरण्यादेः कियानर्थः कश्च किमर्थः किमर्थं वोपादीयते केन च क्रमेण कश्च कस्मिन्स्वामी-त्यादिविभागेन चिन्ता क्रियते तथा धर्मस्यापि दुरधिगमत्वात् दुर्गत्वेनोपचरितस्य मन्त्रादिभिः कृताः कर्मस्मृत्यादयः प्रकारभेदेन प्राप्तिहेतुत्वात् बहवो मार्गाः नामधेय-सामर्थ्ययोर्विध्यन्तर्भावाद् वाक्यशेषस्य चार्थवादान्तर्भावात्पृथगुपन्यासः। स्मृतिशब्दो-पलक्षितानि वेदातिरिक्तधर्मप्रमाणानि शिष्टाचारसहितानि विद्यास्थानानि। प्रकारतयो-पचरितवेदव्यवधानेन धर्मदुर्गरक्षाहेतुत्वात्, वेदानां प्राकारस्थानीयशालाशब्देन गृह-वाचिना परिवेष्टनभित्तिरूपत्वगुणवशेन प्राकारत्वोपचारः। गृहतेः सम्वरणार्थत्वात् सम्वरणेन च सम्वेष्टनापरपर्यायेण शत्रुकृतपराभवात् दुर्गस्य रक्षणात् वेदाख्यशालया प्राकारेण गूढंरक्षितमित्यर्थः। साक्षाद्रक्षाहेतुत्वसूचनायोपशब्देन सामीप्यमाधिक्यं चोक्तम्। प्रमाणस्य प्रमेयतद्भावपरिच्छेदकत्वाद्रक्षितत्वोपचारः। बहुदातर्युदारशब्द-प्रसिद्धेर्विस्तीर्णबहूनामवकाशदानादुदारशब्देन विवक्षितम्। पराक्रान्ते दुर्गे तान्सम्प्र-विश्येत्यनेन साधितम्। दुर्गमिति व्यवहारात्साधने प्रवेशत्वेनोपचारः। वेदार्थस्याप्यर्थ-शब्दवाच्यत्वसामान्येन हिरण्यादिना क्लेशस्तस्यापि हिरण्यादिवत्परिमाणविनियोग-प्रयुक्तक्रमाधिकार्यादिप्रविभागेन द्वितीयादौ चिन्तां करोतीत्यर्थः। प्रथमपादे प्रमाण-चिन्तापर्यवसानादर्थचिन्तैव त्रिपाद्यामपि कृतेत्याशङ्कानिरासाय—**इदानीमित्युक्तम्**। अर्थवादपादगतस्य विचारस्यार्थपरत्वाभावेऽपि नामधेयपादगतस्यार्थपरत्वशङ्कानिवृत्त्यर्थं समस्तशब्दः, इतिकरणः समस्तोक्तप्रकारपरामर्शार्थः।

इति श्रीमत्त्रिकाण्डमीमांसामण्डनप्रतिवसन्तसोमयाजिभट्टमाधवात्मजभट्टसोमेश्वर-

विरचितायां तन्त्रवार्त्तिकटीकायां सर्वानुवद्यकारिण्यां न्यायसुधाख्यायां

प्रथमाध्यायस्य चतुर्थः अध्यायश्च समाप्तः।

भा० प्र०—शास्त्र में कहा गया है कि "स्रुवेणावद्यति", "स्वधितिनावद्यति", "हस्तेनावद्यति" इत्यादि। स्रुव अर्थात् जिससे हवन किया जाता है उस विशेष द्रव्य से स्वधि=अस्त्र विशेष से, हाथ से अवदान अर्थात् खण्ड करना चाहिए इत्यादि। कोई द्रव्य स्रुव से, कोई स्वधिति से एवं कोई पदार्थ हाथ से खण्ड करना चाहिए, इसका व्यवस्थापक कोई विशेष शास्त्र न रहने पर जिस किसी से होमीय द्रव्य का खण्ड किया जा सकता है—इस प्रकार पूर्वपक्ष होने पर सिद्धान्ती का कहना है कि "अर्थात् वा कल्पना", जिस वस्तु में खण्ड करने का सामर्थ्य है अर्थात् जिस वस्तु की जिससे खण्ड

करने की सुविधा होगी उसी से उसका अवदान (खण्ड) करना उचित है। इसलिए स्रुवा के द्वारा ही आज्य आदि द्रव द्रव्य का अवदान=खण्ड करना चाहिए एवं पुरोडाश आदि संहत द्रव्य हाथ के द्वारा खण्डित किया जायेगा। जैसे अञ्जलि शब्द का अर्थ अवकाश रहित रूप में दो हाथों का संयोग अर्थ होने पर भी "अञ्जलिना शत्रून् जुहोति"—अञ्जलि से शत्रु का होम करे इस स्थल में दो हाथों का अवकाशरहित संयोग विवक्षित नहीं है इसलिए, इस स्थल में 'सामर्थ्य'=शक्ति के अनुसार ही वस्तु ग्रहण के योग्य है, इसीलिए कहा गया है—"आख्यातार्थं ब्रुवतां शक्तिः सहकारिणी"=शक्ति को सहायक कर आख्यात अपने स्वार्थ का प्रतिपादन करता है, अतः, इन स्थलों मे विशेष शास्त्र न रहने पर भी सामर्थ्य या शक्ति ही अर्थ विशेष की व्यवस्था करती है। "एकदेशत्वात्" क्योंकि, शक्ति कल्पित 'स्रुव', 'स्वधिति' आदि शब्द भी विधि का ही एकदेश होकर विधेय पदार्थ की व्यवस्था करता है। इस स्थल में पूर्वसूत्र का "सन्दिग्धेषु" यह शब्द का अनुषङ्ग करना होगा, ऐसी स्थिति में सूत्र का अर्थ यह होगा कि जिन स्थलों में विधि का अर्थ सन्दिग्ध है उसमें सामर्थ्य के अनुसार ही कार्यसाधक वस्तुवाचक पद की कल्पना की जायगी, क्योंकि, वह भी विधि का एकदेश है। इससे यह भी अवगत होता कि सन्देह रहित स्थलों में सामर्थ्य के अनुसार कल्पना करना निष्प्रयोजन है।

"अर्थात् वा"=अर्थात् एवं अर्थात् अर्थ से ही=वस्तु विशेष की कार्यकारिता सामर्थ्य से ही, "कल्पना"=विधि की व्यवस्थितविषयत्व कल्पना की जायगी, एकदेशत्वात्"=क्योंकि वह=सामर्थ्य कल्पित शब्द भी एकदेश अर्थात् विधि का ही अंश होता है॥ ३०॥

॥ इति सामर्थ्याधिकरण॥

भाष्यभावप्रकाशिका के प्रथम अध्याय का चतुर्थ पाद समाप्त हुआ।

प्रथम अध्याय समाप्त हुआ।

अथ द्वितीयाऽध्याये प्रथमः भावार्थपादः ॥

प्रथमो भावार्थाधिकरणं

[१] भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयेतैष ह्यर्थो विधीयते ॥ १ ॥ सि० ॥

शा० भा०—प्रथमेऽध्याये प्रमाणलक्षणं वृत्तम्। तत्र विध्यर्थवादमन्त्रस्मृतयस्तत्त्वतो निर्णीताः। गुणविधिर्नामधेयं परीक्षितम्। संदिग्धानामर्थानां वाक्यशेषादर्थाच्चाध्यवसानमुक्तम्[१]। तन्न प्रस्मर्तव्यम्। अनन्तरं प्रधानाप्रधानानि परीक्षिष्यन्ते, भिन्नान्यभिन्नानि चेति। एवार्थो वर्णनीयो नान्यः। एष एव चाध्यायसंबन्धः। तदिह षड्विधः कर्मभेदो वक्ष्यते—शब्दान्तरम्, अभ्यासः, संख्या, गुणः, प्रक्रिया, नामधेयमिति। वक्ष्यमाणमनुसंकीर्त्यते, प्रदर्शितमुच्यमानं सुखं ग्राहयिष्यत[१] इति श्रोतुश्च बुद्धिः समाधीयते। तदेतन्नानाकर्मलक्षणमित्यध्यायमाचक्षते, एतत्तात्पर्येण, अतोऽन्यदुपोद्घातप्रसक्तानुप्रसक्त[२] चेति॥

तत्र[३] प्रथमं तावदिदं चिन्त्यते—प्रथमेऽध्याय इदमुक्तं-चोदनालक्षणोऽर्थो[४] धर्म इति। चोदना[५] च क्रियाया अभिधायकं वाक्यम्। आक्ये च पदानामर्थाः। तत्र किं पदेन पदेन धर्मः,[६] उत सर्वैरेक एवेति। किं तावत्प्राप्तम्। प्रतिपदं धर्म इत्येवं[७] प्राप्ते।

उच्यते—यदेकस्मादपूर्वं, तदाऽन्यत्[८] तदर्थं भविष्यति। एवमल्पीयस्यदृष्टानुमानप्रसङ्गकल्पना भविष्यति। तस्मादेकमपूर्वम्।

यदैकं तदा संदेहः—किं भावशब्देभ्यः,[९] उत द्रव्यगुणशब्देभ्य इति। कः पुनर्भावः, के ते पुनर्भावशब्दा इति। यजतिददातिजुहोतीत्येयवमादयः।

ननु यागदानहोमशब्दा एते न भावशब्दाः नैतदेवम्[१०]। यगादिशब्दाश्चैते, भावशब्दाश्च। यज्याद्यर्थश्चातोऽवगम्यते, भावयेदिति च। यथा यजेत[११] यथा किंचिद्भवतीति। तेनैते भावशब्दाः[१२]। द्रव्यगुणशब्देभ्यो द्रव्यगुणप्रत्ययो न

---

१. ब. ग्राहयिष्यते श्रोतुश्च।
२. ब. प्रसक्तंच।
३. ब. तत्र शब्दो नास्ति।
४. ब. नोदना।
५. ब. नोदनेति।
६. ब. धर्म उच्यते।
७. ब. इति प्राप्ते।
८. ब. तदेतरत्त।
९. ब. शब्देभ्योऽपूर्वं।
१०. ब. नैतदस्ति।
११. ब. यतेत।
१२. ब. भावशब्दा इति।

भावनायाः। अतस्ते न भावशब्दा इति। किं तावत्प्राप्तम्, अविशेषेणेति। तत उच्यते। भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयेत यजेतेत्येवमादिभ्यः। कुतः? भावार्थत्वादेव। य आहुः–किमपि भावयेदिति, स्वर्गकामपदसम्बन्धात् स्वर्गं भावयेदिति ब्रूयुः। तस्मात्तेभ्यः क्रिया प्रतीयेत। फलस्य क्रिया करणं निष्पत्तिरिति। ते च यागदानहोमसंबद्धाः स्वर्गस्योत्पत्तिं वदन्ति। कुतः? एष ह्यर्थो विधीयते। यथा यागादिना स्वर्गकामः, केन भावयेत् स्वर्गम्, यागादिनेति। यस्य च शब्दस्यार्थेन फलं साध्यते, तेनापूर्वं कृत्वा, नान्यथेति ततोऽपूर्वं गम्यते। अतो यस्तस्य वाचकः शब्दः, ततोऽपूर्वं प्रतीयत इति। तेन भावशब्दा अपूर्वस्य चोदका[1] इति ब्रूमः। न तु कश्चिच्छब्दः साक्षादपूर्वस्य वाचकोऽस्ति। भावार्थैः किमपि भावयितव्यम्। स्वर्गकामस्य च केनापि भाव्येतेति। तयोर्नष्टाश्वदग्धरथवत्संप्रयोगः[2]। यजेतेत्येवमादयः साकाङ्क्षाः। यजेत किं केन कथमिति, स्वर्गकामः इत्यनेन प्रयोजनेन निराकाङ्क्षाः नैव द्रव्यगुणशब्दाः। तस्माद् भावार्थाः कर्मशब्दा अपूर्वं चोदयन्तीति।

अथ कस्मादुभयं सूचितं–भावार्थाः कर्मशब्दा इति? उच्यते—भवन्ति केचित् कर्मशब्दाः, न भावार्थाः। यथा श्येनैकत्रिकादयः। केचिद् भावार्थाः, न कर्मशब्दाः। यथा भवनं भावो भूतिरिति। किं पुनरिहोदाहरणम्? श्येनेनाभिचरन् यजेत, चित्रया यजेत पशुकाम इति। किं श्येनेनाभिचरन्नुत यजेताभिचरन्निति। तथा चित्रया पशुकामः, उत पशुकामो यजेतेति स्थित एतस्मिन्नधिकरणे गुणविधिः, नामधेयमिति विचारो भविष्यति[3]। तथा दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति दर्शः कालः, पूर्णमास इति किं ताभ्यां स्वर्गकामः उत स्वर्गकामो यजेतेति। दर्शपूर्णमासाभ्यामिति च, श्येनेनेति च चित्रयेति च नैते भाववचनाः। न चैषामर्थिना कश्चित्संबन्धोऽस्ति। विविभक्तित्वात्[4]। तस्मान्न द्रव्यगुणशब्दा अपूर्वस्य विधायका इति॥ १॥

भा० वि०—प्रथमद्वितीययोरध्याययोः हेतुहेतुमद्भावलक्षणां सङ्गतिं वक्तुं प्रथमाध्यायार्थमनुवदति—'प्रथमेऽध्याये' इति। अस्य वृत्तमित्यादिभिरुक्तमित्यन्तैः क्रियापदैः सम्बन्धः। अत्र प्रतीयत इति व्युत्पत्त्या प्रमाणशब्दः प्रकृतधर्माख्यप्रमेयपरः, लक्षणशब्दः प्रमाणपरः, न तु तद्गतातद्व्यवच्छेदकधर्मपरः। ततश्च धर्मे प्रमाणं वृत्तमित्युक्तं भवति। अथ वा प्रमाणशब्दः करणसाधनः। लक्षणशब्दो व्युत्पादनापरपर्यायप्रमाणविषयः, तेन प्रतिज्ञातस्य धर्मप्रमाणस्य लक्षणम्—

---

१. ब. बोधका। २. ब. तयोश्च।
३. भविष्यति इति। ४. क. विभक्तिकत्वात्।

व्युत्पादनं **'तस्य निमित्तपरीष्टिरि'**त्यादिना वृत्तमित्यर्थः। एवं प्रथमपादार्थमनूद्येदानीमवशिष्टपादत्रयार्थमनुवदति—**तत्रेति**। धर्मप्रमाणे निरूपिते सतीति यावत्। तत्त्वतः प्रामाण्येतेत्यर्थः। अपौरुषेयतया सिद्धप्रमाणभावानामपि विध्यर्थवादमन्त्राणां धर्मप्रत्युपयोगविशेषाभावादप्रामाण्यमाशङ्क्य तत्प्रतिपादनेन प्रामाण्यं प्रतिपादितमित्यर्थः। तत्र च मन्त्रार्थवादयोस्त्र्यंशभावनाविध्येकवाक्यतया स्मृतिस्तुत्युपयोगाभिधानेन विधेरपि त्र्यंशभावनाविधानेनोपयोगोऽर्थाद् दर्शितः। स्मृतयोऽपि त्र्यंशात्मकवेदमूलतया त्र्यंशात्मकत्वाल्लब्धोपयोगा अपि श्रुतिमूलत्वप्रतिपादनेन प्रमाणतया स्मृतिपादे निर्णीता इत्यर्थः, नामधेयस्यापि विध्युद्देशान्तर्गतत्वेन सिद्धप्रामाण्यस्य तदन्तर्गतिनिर्वाहाय विशेषविचारमपि नामधेयपादेन कृतमनुकीर्तयति—**गुणेति**। आग्नेयादिपदानां नामधेयत्वनिरासेन गुणविधित्वम्, उद्भिदादिशब्दानां गुणविधित्वनिरासेन नामधेयत्वं च परीक्षितमित्यर्थः। वाक्यशेषाणाम्, सामर्थ्यकल्पितैकदेशानां च विधीनां सन्दिग्धार्थनिर्णायकत्वेनापि प्रामाण्यमुक्तमित्याह—**'सन्दिग्धानामि'ति**। एवं सामान्यविशेषाभ्यां विचारितं प्रामाण्यम्, तदभ्युपगमेन प्रवृत्तमुत्तरविचारं प्रति हेतुत्वात् सर्वदानुसन्धेयमित्याह—**'तन्ने'ति**। द्वितीयाध्यायार्थमपि अनुवदति—**'अनन्तरमि'ति**। धर्मप्रमाणविचारादनन्तरं तत्प्रमेयरूपाणि धर्मशब्दवाच्यानि कर्माणि किं भिन्नान्यभिन्नानि चेति परीक्षिष्यन्ते। तदनु निष्पाद्यपूर्वभेदाभेदसिद्ध्यर्थं च प्रधानकर्मभेदनिबन्धनत्वादपूर्वभेदासिद्धेः, किं द्रव्यं प्रति प्रधानानान्युताप्रधानानि इति प्रथमेन पादेन परीक्ष्यत इत्यर्थः[1]।

अन्ये तु प्रथमाध्यायप्रतिपादितप्रामाण्यस्य शास्त्रस्य साध्यानुबन्धभेदाभ्यां भेदोऽस्मिन्नध्याये प्रतिपाद्यते, नोत्सर्गापवादाभ्यां कर्मभेद इति मन्यते; तन्निराकरोति—**'एष एवे'ति**। इतिर्हेतौ, यस्मादेव एवार्थो वर्णनीयः, तस्मादयमेव परीक्षिष्यत इति सम्बन्धः। तत्र किं शास्त्रासाध्यानुबन्धभेदयोः शास्त्रार्थभेदद्वारं वा शास्त्रभेदकत्वम्, तन्निरपेक्षं वा ? नाद्यः, शास्त्रभेदावधारणात् प्रागेव शास्त्रार्थभेदेऽवधारितेऽनुनिष्पादिनश्शास्त्रभेदावधारणस्यानर्थक्यात्, न द्वितीयः साध्यानुबन्धयोश्शास्त्रार्थेन भावनया नियोगेन वा सम्बन्धं विना शास्त्रेणासम्बन्धात्तद्भेदकत्वानुपपत्तेः। तस्मादङ्गाङ्गित्वाद्यवधारणाद्यर्थत्वेनानुष्ठानोपयोगित्वाच्छास्त्रार्थरूपकर्मभेद एव विचार्यः, नानुपयोगी शास्त्रभेद इत्याशयः।

ननु कर्मभेदस्य लक्षणार्थत्वेऽपि कथं प्रमाणलक्षणानन्तरसङ्गतिरित्याशङ्क्याह—**'एष चे'ति**। शेषशेषित्वप्रयोजकाप्रयोजकत्वक्रमाणां कर्मभेदनिबन्ध-

---

१. प्राभाकरसंम्मतां संगतिमनुवदति निरसितुं अत्रत्यो विषयः, ऋजुविमलापंचिकातिलकैरनुसन्धेयः।

नत्वादधिकारस्य च कर्मस्वरूपावधारणाधीनत्वादुत्तरषट्कस्यातिदेशविषयस्योपदेशापेक्षत्वेन पूर्वषट्काधीनत्वात् परिशेषसिद्धोऽयं वेदलक्षणस्यानन्तर्यलक्षणस्सम्बन्ध इत्यर्थः ।

यदुक्तमनन्तरं भिन्नान्यभिन्नानि च परीक्षिष्यन्त इति, तद्विवृणोति—**तदिहेति ।** वक्ष्यमाणसूत्रक्रमानुरोधान्नामधेयं सङ्ख्यानन्तरं पठितव्यम् । इतिकरणे हेत्वर्थः । एतैर्हेतुभिः षड्विधः कर्मभेद इत्यर्थः ।

नन्वध्यायार्थसंक्षेपमात्रेण सङ्गतिसिद्धेस्तद्व्याख्यानमनर्थकमत आह—**वक्ष्यमाणमिति ।** सङ्क्षेपप्रदर्शनपूर्वस्य विस्तारवचनस्य प्रयोजनं व्याख्यातुः प्रतिपादनसौकर्यं श्रोतुः प्रतिपत्तिसौकर्यं चेत्यर्थः । अनादिसमाख्याबलेनापि कर्मभेद एव लक्षणार्थः न शास्त्रभेद इति सूचयन्नुपसंहरति —**तदेतदिति ।**

नन्वन्यदपीह धात्वर्थस्य फलभावनाकरणत्वादिति प्रतिपाद्यते, तत्कथं भेदलक्षणत्वम् ? अत आह—**एतदिति ।** भेदप्रतिपादनमात्रम् । **अन्यदिति ।** फलभावनाकरणत्वादीत्यर्थः । प्रकृतसिद्ध्यर्थमर्थान्तरप्रतिपादनमुपोद्‌वातः । प्रस्तुतमाश्रित्योपजायमानं प्रसक्तानुप्रसक्तमितिभेदः ।

ननूपोद्घाततयापि धात्वर्थस्यैव फलभावनाकरणत्वम्, उत नामार्थस्यैवेति चिन्तानुपपन्ना । सर्वेषामविशेषेण फलकरणत्वोपपत्तेरिति शङ्कानिवृत्तये विचारान्तरमवतारयति—**'प्रथमं तावदि'ति ।** किं पदेन धर्म उच्यते, उत सर्वैरेक इति, इदं तावत्प्रथमं चिन्त्यते इत्युत्तरेण सम्बन्धः । धर्मः फलभावनाकरणत्वं किं प्रत्येकं फलपदसंबन्धद्वारा धर्मबोधकत्वम्, उतैकस्यैवेतरपदानुगृहीतस्येत्यर्थः ।

नन्वेकस्य धर्मस्य कथं प्रतिपदं वाच्यत्वमाशङ्क्यत इत्याशङ्क्यानेकात्मकवाक्यप्रतिपाद्यत्वेन धर्मस्यानेकात्मत्वं दर्शयितुं वाक्यार्थत्वं तावदाह—**'प्रथमेऽध्याय' इति ।**

ननु चोदना लिङादिरेव, नेत्याह—**'चोदना च वाक्यमि'ति ।** अत्र त्र्यंशभावनाभिधायित्वं हेतूकरोति—**'क्रियाया अभिधायकमि'ति ।** अस्त्वेवं वाक्यार्थत्वम्, ततः किमत आह—**वाक्ये चेति ।** अनेकपदात्मके हि वाक्ये वाक्यार्थोऽप्यनेकपदार्थात्मकत्वादनेकात्मको युक्त इत्याशयः । एवं च युक्तस्संशय इत्याह—**तत्रेति ।** अयं चान्वयैकरूप्यकल्पनालाघवाभ्यां संशय उपगन्तव्यः प्रश्नपूर्वकं पदेन धर्म उच्यते इति पूर्वपक्षमाह—**किं तावदिति ।** अगृह्यमाणविशेषतया सर्वेषां पदानां फलपदसंबन्धयोग्यत्वादेकं फलपदसंबन्धि, तत्संबन्धोनीतराणि इति च कल्पनायां वाजपेयाधिकरणन्यायेन वैरूप्यनिमित्तवाक्यभेदप्रसङ्गात् । सति च संभवे सर्वेषां प्रधानसंबन्धस्यैव युक्तत्वात्प्रत्येकं फलपदसंबन्धद्वारा धर्मबोधकत्वं युक्तमित्याशयः । सिद्धान्तयति—**इति प्राप्त इति ।** यदैकस्मात्पदात्

फलपदसंबन्धिनः फलसाधनत्वलक्षणधर्मबोधकादन्यथानुपपत्त्याऽपूर्वं गम्यते तदा इतरत्पदं तदर्थं भविष्यतीति न सर्वेभ्योऽपूर्वकल्पना युक्तेत्यर्थः।

नन्वितरस्य तादर्थ्यं क्रमादभ्युपगम्यते, तत्राह—**एवमिति**। अदृष्टानुमानस्य प्रसङ्गो यस्यां कल्पनायां सैवं सत्यल्पीयसी भविष्यतीत्यर्थः। सर्वेषामपि हि फलपदान्वयि-पदार्थानां संहत्य फलकारित्वेऽप्युत्पत्त्यपूर्वभेदस्यावश्याङ्गी-कार्यत्वात्, विकल्पेऽपि प्रत्येकमपूर्वकल्पनाप्रसङ्गादेतत्परिहाराय च धात्वर्थस्यैव फलसाधनत्वे नामार्थस्य तन्निष्पादकत्वेन नामार्थस्यैव वा साधनत्वे धात्वर्थस्य तदाश्रयत्वेन तादर्थ्यसम्भवेनानेकादृष्टकल्पनाभावादेकस्यैव फलसाधनतया अपूर्व-हेतुत्वम्, नेतरेषाम्, न च वैरूप्यं श्येनादीनां नामत्वात्, सोमादिषु च मत्वर्थ-लक्षणाश्रयणात् लक्षणा चानेकादृष्टकल्पनातो वरमित्याशयः। यत एकमेव फल-पदसम्बन्धि, ततस्तस्मादेकमपूर्वं गम्यत इत्युपसंहरति—**'तस्मादि'ति**।

एवं तावदेकस्यैव पदस्य फलपदसम्बन्धः, तदर्थस्यैव च फलसाधनतया धर्मत्वम्, तस्मादेकमपूर्वमिति चिन्तां परिसमाप्य, धात्वर्थस्य फलभावनाकरणत्व-विषयां प्रस्तुतामुपोद्घातचिन्तां वर्णयति—**'यदैकमि'ति**। अयं च भावशब्दस्य, द्रव्यगुणशब्दस्य वा फलकाङ्क्षोत्पादकता इत्यनिर्धारणात् संशयः। प्रयोजनं तु धात्वर्थभेदात् फलभावनानुबन्धिनोऽपूर्वभेदस्य सिद्धिः, अन्यदुपोद्घातादित्यु-पोद्घातशब्देनोक्तम्। तत्र भावशब्दस्वरूपं सविषयं पृच्छति—**'कः पुनरि'ति**। धात्वर्थातिरिक्ताया भावनायाः स्वरूपेणैवासिद्धायाः प्राधान्य-प्रत्ययार्थत्वयोः दूरापेतत्वात् धात्वर्थ एव भावः। प्रत्ययार्थः कर्तृविशिष्ट आख्यातार्थो नातिरिक्त इति भावः। यद्यपि भावनाक्षेपेण तद्वाचिशब्दाक्षेपः सिद्धः तथापि यो यजन-मिज्या याग इत्यादिपदवाच्यस्य भावत्वाभ्युपगमेनार्थपर्यनुयोगं परिहरेत्तं प्रति-श्येनेनेत्याद्ये तदधिकरणोदाहरणेषु तादृगभावशब्दावभावादन्योऽभावो भाव-शब्दश्च सूत्रकारस्यभिप्रेत इत्युत्तरं सूचयितुमुभयप्रश्न इत्यवगन्तव्यम्, प्रश्नद्वयं परिहरन्नुदाहरति—**'यजते' इति**। भवतेर्णिजन्तादच्प्रत्यये कृते व्युत्पन्नस्य भावशब्दस्य धात्वर्थातिरिक्त एव भावनाख्योऽर्थः। तस्य चान्वयव्यतिरेकाभ्यां कर्त्रभिधानप्रतिषेधाच्चाख्यातप्रत्यय एवाभिधायक इत्यर्थः। धात्वर्थातिरिक्तं भाव-नाख्यं भावमभ्युपगमस्य तस्याख्यातवाच्यत्वासम्भवं शङ्कते-**'नन्वि'ति**। भावनाया णिजन्तभवतिवाच्यत्वेऽपि नाख्यातार्थता भावयतेस्सनाद्यन्तत्वेन धात्वन्तरत्वात् तदर्थस्य च भावनाया यजतिस्समुच्चारितप्रत्ययार्थतानुपपत्तेः कर्त्रादिविशिष्ट-धात्वर्थं एव प्रत्ययार्थ इत्यर्थः। आख्यातप्रत्ययेन यागदानाद्यनुस्यूतस्य भावना-त्मनोऽवगम्यमानत्वात् युक्ता भावनायाः प्रत्ययार्थतेति परिहरति—**नैव-मिति**। कुत इत्यत आह—**यज्याद्यर्थश्चेति**। अत आख्यातसमुदायाद्धात्वंशेन यज्याद्यर्थः प्रत्ययांशेन भावयेदिति चावगम्यत इति युक्ता धात्वर्थोपरक्ता भावनावाचिताख्यातपदस्येत्यर्थः।

ननु केयं भावनायां प्रत्ययोऽवगमयति, तत्राह—**तथेति** । भवत्यर्थकर्तृप्रयोज्यविषयः प्रयत्नाख्यः प्रयोजकव्यापारो भावनेत्यर्थः, आख्यातानां भावनावाचित्वे फलितमाह—**तेनैत इति** ।

नन्वेवं प्रत्ययांशस्य भावार्थत्वेऽपि न फलभावनाकरणत्वाभिधानेनापूर्वंगमकस्य धात्वंशस्य भावार्थता, प्रत्ययसम्बन्धात्तु भावनानुरञ्जकस्वार्थवाचित्वे द्रव्यगुणशब्दानामपि भावशब्दत्वापत्तिरित्यत आह—**एवं द्रव्यगुणशब्देभ्य इति** । प्रत्ययशब्दस्य समासान्निष्कर्षं कर्मं व्युत्पत्ति भावनापदान्वयं चाङ्गीकृत्य, न तु तेभ्यो भावना प्रतीयते तदर्थस्य भावनानुरञ्जकत्वायोगात् इति व्याख्येयम्, यद्यप्यत्र ते द्रव्यगुणशब्दा इति प्रश्नोत्तरे कर्तुमुचिते तथाप्याख्यातार्थस्य भावशब्दत्वाभिधानेनैव 'सोमेन यजेत, यः कामयते वीरो म आजायेतेति स चतुर्होतारं जुहुयात्' इत्यादिवाक्यगतस्य सोमेनेत्यस्य चतुर्होतारमित्यस्य च द्रव्यगुणशब्दत्वं ज्ञायत एवेति, न कृते भावनाप्रतीत्यभावफलमाह—**अत इति** । पूर्वपक्षयति—**किं तावदिति** । आकाङ्क्षानिबन्धनो हि फलपदसम्बन्धः । तत्र यथाख्यातशब्दात् फलाकाङ्क्षोत्पद्यते, एवं द्रव्यगुणशब्देभ्योऽपि करणविभक्त्यन्तेभ्यस्साध्याकाङ्क्षोत्पत्तेरविशेषात्, फलस्य च साध्यत्वेन सिद्धरूपसाधनापेक्षित्वान्नामार्थस्य च सिद्धत्वेनापेक्षापूरणसमर्थत्वान्नाम्न एव फलपदान्वयिनोऽपूर्वंगमकत्वम्, नाख्यातस्येत्यर्थः । सूत्रं व्याचक्षाणः सिद्धान्तमाह—**तत इति** । तेभ्यो यजेतेत्येवमादिभ्य इति सम्बन्धः । क्रियाफलस्येति शेषः । कुतो भावशब्देभ्य एव फलक्रिया प्रतीतिः द्रव्यगुणशब्देभ्य इति पृच्छति—**कुत इति** । अंशत्रयाकाङ्क्षभावनावाचित्वादेवेत्युत्तरमाह—**'भावार्थत्वादेवे'ति** । एतदेवोपपादयति—**य आहुरिति** । भावशब्दा इत्यर्थः । किमपीतिभाष्याकाङ्क्षोक्ता तस्माद्भावशब्देभ्य एव फलपदान्वयिभ्य फलभावनाकरणत्वावगतिद्वाराऽपूर्वावगतिरित्याह—**तस्मदिति** । क्रियाशब्दार्थमाह—**करणं निष्पत्तिरिति** । अनेन निष्पादना लक्ष्यते ।

नन्वाख्यातस्य फलपदान्वयिनो भावनावाचित्वेऽपि करणाकाङ्क्षायां नामार्थस्यापि करणत्वोपपत्तेः कथं धात्वर्थस्य करणत्वसिद्धिरित्याशङ्क्य कर्मशब्दा इत्येतत्सूत्रावयवेन परिहरति—**ते चेति** । यतस्ते भावशब्दा धात्वर्थानुरक्तभावनावाचित्वाद्धात्वर्थसम्बद्धा एव स्वर्गस्योत्पत्तिमुत्पादनं वदन्ति, अतः प्रत्यासत्तेर्धात्वर्थस्यैव करणत्वावगतिरित्यर्थः ।

नन्वेकप्रत्ययोपात्ताया भावनाया एव विध्यन्वयात् फलसम्बन्धेऽवगते करणाकाङ्क्षायां प्रत्यासन्नमप्यनिष्पन्नत्वेनायोग्यं धात्वर्थमपहाय, नामार्थस्यैव करणत्वावगतेः कुतो धात्वर्थस्य करणत्वसिद्धिरिति पृच्छति—**कुत इति** । सूत्रावयवेनोत्तरमाह—**एष हीति** । काम्यत इति कामः स्वर्गश्चासौ कामश्चेति स्वर्गकामः

यथा यागादेः स्वर्गं प्रति करणत्वेनान्वयसिद्धिः। एष ह्यर्थो विधीयत इत्यर्थः। यागादेः करणत्वसिद्धिं विवृणोति—**केनेति**। प्रकृतिप्रत्ययपौर्वापर्यनियमाच्छुद्धभावनानवगतेर्धात्वर्थानुरक्ताया एव फलोद्देशेन विधीयमानत्वात् प्रत्यासत्त्या धात्वर्थस्यैव विधिगम्यं करणत्वम्, न नामार्थस्येत्यभिसन्धिः। एवं धात्वर्थस्य फलभावनाकरणत्वाभिधायित्वेऽपि भावशब्दानां कथमपूर्वगमकत्वसिद्धिरित्यत आह—**यस्य चेति**। तेनेत्यर्थस्य परामर्शः। तत इति चानुपपद्यमानार्थस्य क्षणभङ्गिन्याः क्रियायाः श्रुत स्वर्गादिफलकरणत्वमपूर्वं कृत्वा नान्यथेत्यर्थापत्त्या तदवगतिरित्यर्थः। अन्यथानुपपद्यमानादर्थादपूर्वाधिगमेऽपि कथं शब्दात्तदधिगतिः? तेनाह—**अत इति**।

ननु भावशब्दानामपूर्ववाचकत्वस्य तत्र तत्रोपगमादन्यथानुपपद्यमानार्थवाचित्वेन तद्गमकत्वं कस्मादुच्यते, तत्राह—**तेनेति**। गमकत्वमात्रेणेत्यर्थः, अपि चाकाङ्क्षाधीनत्वात्सम्बन्धस्य, द्रव्यादीनां च करणानां क्रियामात्राकाङ्क्षित्वेन भाव्यानपेक्षित्वात् भावार्थस्य तु क्रियार्थत्वेन तदपेक्षत्वात् तस्यैव फलसम्बन्धः, न नामार्थस्येत्याह—**भावार्थैरिति**। न च फलस्यानाकाङ्क्षत्वात् असम्बन्ध इत्याह—**स्वर्गकामस्य चेति**।[1] उभयाकाङ्क्षाफलमाह—**तयोरिति**। भावार्थस्यैव क्रियात्मनो भाव्याकाङ्क्षा, न द्रव्यादेः करणस्येति कथमवगम्यत इत्याशङ्क्य भावशब्दस्यैवाकाङ्क्षोत्पादकत्वात्, द्रव्यादिशब्दानां तदनुत्पादकत्वादित्याह—**यजेतेत्येवमादय इति**। आकाङ्क्षोत्पादकत्वमभिनयति—**यजेतेति**। न केवलं भावशब्दादाकाङ्क्षोत्पत्तिरनुभवसिद्धा, भाव्यशब्दात्तन्निवृत्तिरपि इत्याह—**स्वर्गकाम इति**। **नैवमिति**[2]। न साकाङ्क्षा। न निराकाङ्क्षा इत्यर्थः। सूत्रार्थमुपसंहरति—**तस्मादिति**। ये धात्वर्थोपरक्तभावनावचना आख्यातशब्दान्त एव फलपदान्वयिनोऽपूर्वं गमयन्ति, न तु द्रव्यगुणशब्दा इत्यर्थः।

ननु भावार्थत्वकर्मशब्दत्वयोरेकैकेनाख्यातोपलक्षणसिद्धेरुभयोपादानमनर्थकमित्याशङ्कते—**अथेति**। तत्र प्रथमं भावार्थविशेषणप्रयोजनं दर्शयन् परिहरति—**उच्यते इति**। श्येनादिशब्दानां यजिसामानाधिकरण्यलब्धकर्मनामधेयत्वानामपि न भावर्थत्वम् अत्यन्तपारतन्त्र्यात्। अतस्तन्निरासाय भावार्थविशेषणमित्यर्थः। कर्मशब्दविशेषण-प्रयोजनमाह—**केचिदिति**। भवतेर्णिजन्तादच्प्रत्यये कृते भावशब्दव्युत्पत्तेर्भावशब्दस्य भावार्थता स्पष्टैव। भवनंभूतिरित्यनयोरपि प्रयोज्यव्यापाराशंवाचिनोः तद्विशिष्टप्रयोजकव्यापारलक्षणया भावार्थता, न चैते कर्मशब्दाः असिद्धकर्तृक्रियावाचिनामेषामनुष्ठेय धात्वर्थवाचित्वाभावात्,

---

१. वेति—क० पु० पा०।

२. नैवेति—क० पु० पा०।

अतस्तन्निरासाय **कर्मशब्दविशेषणमित्यर्थः।** एवमधिकरणार्थमुक्त्वा इदानीमस्य विषयं प्रश्नपूर्वकं दर्शयति—**किं पुनरिति।** उपलक्षणमेतत्। द्रव्योपपदम्, गुणोपपदं च सोमेन यजेतेत्याद्युदाहर्तव्यम्। किं नाम्नः फलपदसम्बन्धः उताख्यातस्येति विचारस्वरूपमुदाहरणानिष्ठतया स्पष्टयति—**किं श्येनेनेति।** यदि श्येनादिशब्दाः फलकरणवाचितया फलपदैः सम्बध्येरन्। ततो यागस्य फलकरणत्वाभावात् तत्सामानाधिकरण्यनिमित्तनामधेयत्वानुपपत्तेः नामधेयविचारविरोधः स्यादित्याशङ्क्याह—**स्थिति इति।** अनेन श्येनादिपदानां फलपदसम्बन्धनिरासेन धातुसम्बन्धेऽभिहिते किं नामधेयत्वेन उत गुणविधित्वेनेति विचारावतारादर्थतोऽस्य प्राथम्यमित्यर्थः। नामोपपदमेवोदाहरणान्तरं समुच्चिनोति—**तथेति।** श्येनादिशब्दवद्दर्शपूर्णमासशब्दयोरपि फलसम्बन्धयोग्यमर्थं प्रसिद्धया दर्शयति—**दर्श इति।** एवं विचारस्वरूपमुक्त्वा सिद्धान्तार्थं व्यतिरेकमुखेनाह—**दर्शपूर्णमासाभ्यामिति।** एवं च न फलसम्बन्धोऽपीत्याशयः। इतश्च न फलपदसम्बन्ध इत्याह—**न चैषामिति।** अर्थिशब्देन कामिवाचिना तत्परं स्वर्गकामादिपदं लक्ष्यते। कुत इत्याह—**विविभक्तिक**त्वादिति। विगता सम्बन्धनिमित्तभूता तद्विभक्तिः येभ्यस्तेषां भावो विविभक्तिकत्वम्, सिद्धान्तमुपसंहरति—**तस्मादिति।**[1] वाचका आक्षेपका इति यावत्॥ १॥

त० वा०—सम्बन्धं तावल्लक्षणद्वयस्य **करोति।** तत्र **प्रथमेऽध्याये प्रमाणलक्षणं वृत्त**मित्युक्तम्। तत्कुतः, नैव हि प्रथमेऽध्याये सूत्रकारेण किंचन लक्षणेन प्रमाणादेः स्वरूपमुपवर्णितम्। तन्नाम लक्षणमुच्यते येन तद्व्यतिरिक्तेभ्यस्तस्य स्वरूपं व्यावृत्ताकारं निरूप्यते। न चेह प्रमाणादीनां लक्षणमुक्तम्। अनुमानादीनि तावन्नैव सूत्रितानि। प्रत्यक्षमपि धर्मं प्रत्यनिमित्तत्वेनोपन्यस्तम्, न लक्ष्यत्वेनेति व्याख्यातम्। न च शब्दोऽपि कश्चिद्धर्मप्रमाणभूतो लक्षितः, अस्मिन्नेवाधिकरणे तस्य लक्ष्यमाणत्वात्। यदपि च वृत्तिकारेण सर्वेषां लक्षणं प्रदर्शितम्, न तत् अध्यायार्थत्वेनोपसंहर्तुं युक्तम्—सूत्राध्यायार्थानुपसंहारात्। कथं च समस्तलक्षणार्थव्यतिरिक्त एवार्थे सूत्राणि क्षीयेरन्।

अपि च वृत्तिकारेण योऽप्युक्तः षट्क प्रत्यक्षपूर्वकोऽ-
परीक्ष्यतया सोऽपि नैव लक्षणगोचरः॥

लोकप्रसिद्धार्थानि हि तान्यपरीक्ष्यत्वेनोक्तानि न प्रथमाध्यायविषयत्वेनोपसंहारमर्हन्ति। तस्माद्यत्प्रथमाध्याये वृत्तम्, तदालोच्यैतद्भाष्यं नेयम्। तत्र प्रमाणलक्षणं तावच्चोदनालक्षणाश्रयणस्य, विध्यादितत्त्वनिर्णीतिः प्रमाणेनैव स्थिता। समस्तो हि प्रथमः पादश्चोदनासूत्रपरिकरः। तत्र च धर्मस्य चोदना-

---

१. विधायका इति मु० पु० पा०।

लक्षणत्वमुक्तम्। अतोऽवधारितार्थलक्षणशब्दसाहचर्यात्प्रमाणशब्दः प्रतिपाद्यत इत्येवं व्युत्पाद्य[1] धर्मविषय एव व्याख्येयः[2]। सत्यपि प्रमेयमात्रवाचित्वे, अस्मिन् शास्त्रे जिज्ञास्यत्वेन धर्मः प्रमेयः प्रक्रान्त इति, स एव गृह्यते।

अथ वा करणमेव प्रमाणं तस्यैव लक्षणमुक्तम्। यद्यपि च सर्वप्रमाणानां तन्नोक्तम्, तथाऽपि धर्मप्रमाणस्य चोदनात्वं लक्षणमित्येतावतैवोक्तं मन्यते। न चावश्यं सर्वात्मनैव लक्षिते लक्षणत्वम्, विशेषरूपाणामानन्त्येन सर्वलक्षणाभावप्रसङ्गात्। अपि चौत्पत्तिकसूत्रेण विशेषोऽप्युक्त एव। येनाऽऽगमविशेषो गम्यते।

अथ वोपन्यस्तस्य चोदनात्मकस्य प्रमाणस्य लक्षणं प्रामाण्यकारणमित्युपसंहारः। तथा यद्यपि विधेरिदं रूपम्, इदमर्थवादस्येदं मन्त्रस्येत्येवं नोक्तम्, तथाऽपि धर्मं प्रत्युपयोगाभिधानात्तत्त्वं निर्णीतम्। अवसराभावात्तु तत्स्वरूपं न निर्दिष्टम्। श्रुतिमूलत्वं विज्ञानस्य स्मृतिप्रामाण्ये तत्त्वम्। नामधेयस्य चोदनान्तर्गतत्वात्प्रमाणत्वम्। संदिग्धार्थनिर्णये वाक्यशेषसामर्थ्ययोः प्रामाण्यमित्येवं समस्तमध्यायं प्रमाणलक्षणमाचक्षते। **तत्र प्रस्मर्तव्यमिति**। अविस्मृतप्रामाण्यो हि भेदादिप्रतिपादनम् **'अविशेषादनर्थकं हि स्यात्'** इति क्रियमाणं सहते। अन्यथा ह्यनर्थकं नामेत्येव प्रत्यवतिष्ठेत।

ननु प्रधानाप्रधानचिन्ता तृतीयचतुर्थयोर्विषयः कथमत्रोपन्यस्यते? केचिदाहुः। इह द्रव्यकर्मणोरुत्तरत्र तु कर्मणामेव गुणप्रधानत्वविचारादपौनरुक्त्यमिति।

तदयुक्तम्। 'द्रव्यगुणसंस्कारेषु' इत्यत्र सर्वाभिधानात्। तेनैवं वाच्यम्—

लक्षणार्थोऽत्र तत्त्वेन भेदः शब्देतरादिभिः।
तमन्वपूर्वभेदोऽपि प्राधान्यं तत्प्रसिद्धये॥

कर्मभेदस्तावदौत्सर्गिको लक्षणार्थः तदपवादत्वेनाऽभेदः। तदनुनिष्पादिनौ त्वपूर्वभेदाभेदौ। तत्र प्रतिकर्मभेदमपूर्वभेदप्रसक्तौ तृतीयसिद्धः प्रधानाप्रधानविचारः पुनरपवादत्वेनाऽऽरप्स्यते। सत्यप्यवहन्त्यादीनां शब्दान्तरादिभिर्भेदे कर्माकाङ्क्षितदृष्टप्रयोजनपर्यवसानान्न क्रियाजन्यापूर्वान्तरोत्पत्तिः। यत्तु नियमापूर्वं तत्क्रियाकृतं न भवतीति, न तथा व्यपदिश्यते। तेन यत्रैव द्रव्यादीनि प्रति क्रियाणां प्रधानत्वम्, तत्रैव तद्भेदनिमित्तापूर्वभेदसिद्धिः। अस्य च विवेकार्थं यद् गुणप्रधानलक्षणं वक्ष्यते, तदपवादार्थं 'धर्ममात्रे तु' 'स्तुतशस्त्रयोः' इति चाधिकरणद्वयं प्रस्तोष्यते। ततश्चाऽऽख्यातद्वैविध्ये विचारिते प्रसङ्गात्तृतीयं

१. क. नोत्पाद्य। २. क. व्याख्याय।

प्रकारमभिधाय कत्वं प्रतिपादयितुं मन्त्रप्रस्तावः, तल्लक्षणादीनि तु प्रसक्तानुप्रसक्तेन यावत्पादसमाप्ति ।

ततः शब्दान्तराभ्यासाभ्यां भेदमुक्त्वा, पौर्णमास्यधिकरणेनाभ्यासापावादः करिष्यते, समुदायानुवादत्वात् । ततस्तदपवादर्थमुपांशुयाजाघाराग्निहोत्रपशुसोमाधिकरणानि । ततः संख्यासंज्ञागुणैर्भेदः । तावच्च गुणगतो विचारो यावत्प्रकरणान्तराधिकरणम् । ततस्तन्न्यायानुवृत्तिराशाखान्तराधिकरणात् । तत्र च षट्कातिरिक्तभेदकारणव्युदासः संज्ञाभ्यासगुणप्रक्रियाणां चाऽऽशङ्कानिवृत्तिरित्येतावान् भेदलक्षार्थः । एष एव चार्थोऽवश्यं वक्तव्योऽङ्गाङ्गित्वाद्यवधारणार्थम् । न चान्यस्येदानीमवसरोऽस्तीत्ययमेवाध्यायसम्बन्धः । कुतः ?

शेषशेष्यादयः सर्वे कर्मभेदनिबन्धनाः ।
कार्ये ज्ञातेऽधिकारः स्यादुपदेशोऽतिदेशधीः ॥

प्राक् तावत्प्रमाणलक्षणाद्वेदार्थविचारात्मकत्वान्न कस्यचिद्भेदलक्षणादेः प्रस्ताव इत्युत्तरकालमारम्भः ।

तत्रापि शेषशेषित्वम्, प्रयोजकाप्रयोजकत्वम्, क्रमश्च भिन्नानां भवतीति न भेदलक्षणात्प्रागारभ्यते । तथाऽधिकारः कर्मस्वरूपेऽवधारिते तद्योग्यतया शक्यो निरूपयितुमिति पश्चापि लक्षणानि प्रतीक्षते तथोत्तरः । षट्कोऽतिदेशविषयत्वादुपदेशज्ञानाधीनसिद्धिः समस्तः समस्तं पूर्वषट्कमपेक्षते । ततश्च परिशेषसिद्धोऽयं भेदलक्षणस्य सम्बन्ध इत्यत्राऽऽरभ्यते । **षड्विधः कर्मभेद इति**—साधनभेदोपचारात् । वक्ष्यमाणसूत्रक्रमानुरोधान्नामधेयं संख्यानन्तरं पठितव्यं सादनादरादन्ते पठितम् । इतिकरणो हेत्वर्थः । षड्विधः कर्मभेद एतैः कारणैरिति यावत् ।

अथ वा करणे भेदशब्दं व्युत्पाद्य, सामानाधिकरण्येनैव शब्दान्तरादीनि व्याख्येयानि । संज्ञाशब्दान्तरयोः संख्यागुणयोश्चापौनरुक्त्यं स्वस्थाने वक्ष्यामः । सर्वदा[1] चैषां भिन्नविषयत्वान्न श्रुत्यादिवद् बलाबलचिन्ता भविष्यतीति, तद्भेदप्रतिपादनमात्रं तात्पर्येण, अन्यदुपोद्घातप्रसक्तानुप्रसक्त्यादिना ।

तत्र—

चिन्तां प्रकृतसिद्ध्यर्थामुपोद्घातं प्रचक्षते ।
प्रसक्तानुप्रसक्तादि प्रस्तुतादुपजायते ॥

यथेदमेवादिकरणं प्रकृतानुनिष्पाद्यपूर्वभेदानुसारिसिद्ध्यर्थमुपोद्घातत्वेन भविष्यति । कतरस्मात्पदात्फलेन संबध्यमानादपूर्वभेदाभेदावनुगन्तव्याविति । यदा निरवयौ वाक्यवाक्यार्थौ स्यातां, ततः किं प्रतिपदं धर्म इत्यादिरसम्बद्ध एव विचारः स्यात् । अत आह—**वाक्ये च पदानामर्थाः[2] इति** ।

१. क. सर्वत्र । २. क. अर्थौ ।

अत्रापि चोद्यते—

चोदनालक्षणत्वेन वाक्यार्थोऽवस्थितो यदा ।
धर्मः प्रतिपदं वाच्यः कथमाशङ्क्यते तदा ॥

यदि हि धर्मस्वरूपमभिधीयेत, ततः **किं पदेन पदेनोच्यत** इति विचारो युज्यते । लाक्षणिके त्वयुक्तः ।

तदुच्यते—

धर्मत्वं फलसम्बन्धात्पदार्थस्यैव युज्यते ।
तत्किमेकस्य सर्वेषामिति युक्ता विचारणा ॥

न चात्र यो धर्मः, स किं पदेन पदेनोच्यत इत्येवं विचार्यते । किं तर्हि ? यः पदेन पदेनोच्यते, स किं फलसम्बन्धोत्तरकालं वाक्यार्थात्मना गम्यमानो धर्मो भवति, अथेतरपदार्थानुगृहीत एकः पदार्थ इति । तथा च सर्वैरेकस्य धर्मत्वं प्रतिपादितं भवति—साक्षात्फलसाधनमात्रस्य धर्मत्वाभ्युपगमात् । न तु सर्वेषामेकः कश्चिदर्थोऽस्ति, यः सर्वैरेक इत्येवमाश्रीयते । यच्च फलपदेन सह संबध्यते । तस्यार्थं धर्ममपूर्वसाधनं च मन्यन्ते । तेन किं सर्वाणि पदानि फलेन संबध्यन्ते, किं वैकमिति विचारः । किं प्राप्तम् ? **प्रतिपदमिति** ।

कुतः—

ऐकरूप्येण सम्बन्धः प्रधानेन च सिध्यति ।
तस्मात्फलपदेनैव सर्वं सम्बध्यते पदम् ॥

यदि हि विशेषो गम्येतेदं फलसम्बन्धयोग्यम्, इदं नेति, ततः किंचिदेव सम्बध्येत । अनवगम्यमाने तु सर्वाणि पदानि फलेनैव सम्बध्यन्ते । यदि चैकं फलसम्बद्धि इतराणि च तत्सम्बन्धीनीति कल्प्यते, ततो वाजपेयाधिकरणन्यायेनैकस्य फलं प्रत्युपादानविधानं गुणभावात्, इतरत्तु प्रत्युद्देशानुवादप्राधान्याद्वैरूप्यनिमित्तवाक्यभेदप्रसङ्गः । सर्वेषां तु फलं प्रत्युपादीयमानानामैकरूप्यात्तन्त्रसम्बन्धोपपत्तिः । सर्वश्च सति संभवे गुणमतिलङ्घ्य प्रधानेनैव नित्यं सम्बध्यते । तस्मात्सर्वेषां फलसम्बन्धाद्धर्मत्वम् । तत्र तु किं सत्रिवत्प्रत्येकं कृत्स्नं फलं साधयन्ति, अथ दर्शपूर्णमासवत्संहत्य । तथा किं विकल्पेन, समुच्चयेन वेत्यादि यथेष्टं कल्पनीयम् । तत्र फलभूमगरीयस्त्वादेकशब्दोपादानाभावात्सत्रिवत्प्रत्येकं साधनशक्त्यवगमात्सर्वेभ्यः पृथक्फलमिति पक्षः ।

अथ वारुणादिन्यायेनैकवाक्योपादानात्संहतानां फलम् ।

अथ वैकनिराकाङ्क्षत्वान्न तदानीमेवेतरसम्बन्धोपपत्तिः तस्माद्विकल्प इति ।

अत्राभिधीयते—

फलेन यस्य सम्बन्धस्ततोऽपूर्वं प्रकल्प्यते ।
तदल्पत्वोपपत्तौ च न युक्ता बहुकल्पना ॥

यदि हि फलसम्बन्धमात्रपर्यवसाय्येव वाक्यं भवेत्, ततः कदाचिदपि सर्वाणि फलेन सम्बध्येरन् । इह तु तावन्मात्रेणासिद्धेरपूर्वमन्यत्कल्पयितव्यम् । तच्चानुपपत्तिप्रमाणकम्, तत्रैकापूर्वकल्पनयोपपन्ने नादृष्टान्तरकल्पनाप्रमाणमस्ति । यो ह्यनेकान्यपूर्वाणि कल्पयति, कल्पयत्यसावेकं, तच्चेत्कल्पितमर्थवत्त्वाद्वाक्यस्य क्षीणान्यथानुपपत्तिर्नापूर्वान्तरस्य प्रमाणं भवति । तस्मादेकमेव फलसम्बन्धि, तस्माच्चापूर्वम्, इतरत्फलवदुपकारीत्यध्यवसीयते । न चात्र विरोधो भविष्यति, नामधेयत्वेन परिहारात् । अगत्या वा 'दशापवित्रेण ग्रहं संमार्ष्टि' इतिवन्मत्वर्थलक्षणाश्रयणात्, अर्थाक्षिप्तसाध्यांशद्वारेण वा धात्वर्थैरात्मीयकरणग्रहणसिद्धेः । एवं स्थिते कतरदेकं सम्बध्यतामिति । सर्वथाऽनेकादृष्टकल्पनापरिहारादनियमप्राप्तावुच्यते—

प्रधानफलसम्बन्धि[1] तत्सम्बन्ध्यङ्गमिष्यते ।
प्रधानाङ्गत्वमेकस्य न चैकत्रावकल्पते ॥

न ह्येकस्मिन्वाक्य तदेव कदाचित्फलसम्बन्धात्प्रधानं, कदाचित्फलवदुपकारादङ्गं युज्यते, नियतरूपत्वादङ्गाङ्गिभावस्य । तस्मान्नियोगेनैवाऽऽख्यातपदात्, नामपदाद्वाऽपूर्वप्रतीतिः ।

कः पुनर्भावः के वा पुनः भावशब्दा इति । यावन्तः फलसम्बद्धेषु वाक्येष्वाख्यातशब्दा यजति जुहोतीत्येवमादयः तेषु प्रत्ययार्थप्राधान्यात्कर्तरि च लकारोत्पत्तेर्यागादिविशिष्टकर्त्रभिधानम् । कथंचिद्वा विपर्ययात्कर्तृविशिष्टयागाद्यभिधानं मन्वानस्य प्रश्नः ।

सत्यामपि चैकपर्यनुयोगेनोभयपर्यनुयोगसिद्धौ, योऽयं यजनमिज्या याग इत्याद्युदाहृत्यैव भावार्थतां ब्रवीति, तन्नूनं केऽप्यलौकिका भावशब्दा अपीत्युभयप्रश्नः । सिद्धान्तवादी तु भवतेर्णिजन्तात् 'एरच्' इत्यच्प्रत्यये कृते भावनावाचिनं भावशब्दं व्युत्पाद्य, आख्यातस्य चान्वयव्यतिरेकाभ्यां तत्परत्वम्, कर्त्रभिधानप्रतिषेधं चाभिप्रेत्योदाहरति—**'यजति ददाती'ति** । परः पुनर्भवतेर्णिजन्तादन्येन नैषोऽर्थोऽभिधीयते, न चाऽऽख्यातप्रत्ययस्यात्र व्यापारः, धात्वन्तरार्थत्वात् । कामं तुल्यजातीयत्वेन धातवो ब्रूयुः तेऽपि तु यात्रादिवचनत्वादसमर्था इति मत्वाह[1]—**ननु यागदानहोमशब्दा** इति ।

अत्रोच्यते—

यागदानाद्यनुस्यूतो भावनात्माऽवगम्यते ।
नित्यमाख्यातशब्देभ्यस्तस्माद्भावार्थतेष्यते ॥

---

१. क. हवनयागदानहोमशब्दा इति ।

यावानेन 'ह्यनन्यलभ्योऽर्थः शब्दाद् गम्यते, स सर्वः शब्दार्थः'। सर्वत्र चाऽऽख्याते धात्वर्थः, तदनुरक्ता च भावना विज्ञायते। तस्माद्भावार्थत्वव्यपदेशः। तद्व्यतिरिक्तास्तु द्रव्यगुणशब्दा विज्ञायन्त एवेति न पृष्टाः। तत्र द्रव्यादिशब्दानां निष्पन्नार्थाभिधायिनां करणार्थत्वयोग्यत्वात्प्राप्नोति फलसंगतिः। सर्वत्र हि फलं साध्यत्वात्सिद्धरूपं साधनमपेक्षते, न साध्यान्तरम्। नामार्थश्च सिद्धत्वात्तदपेक्षापूरणसामर्थ्यो। नाऽऽख्यातार्थः, स्वयमेव तावत्साध्यत्वात्। तस्माद् द्रव्यादिभिः फलमिति प्राप्ते।

सूत्रेणोत्तरं दीयते—

भावार्थाः कर्मशब्दा ये तेभ्योऽपूर्वक्रियागतिः।
तैः कुर्याद्यजिना स्वर्गमेष ह्यर्थो विधीयते ॥

फलसम्बन्धो हेतुरपूर्वप्रतिपत्तेः[1]। सम्बन्धाश्चाऽऽकाङ्क्षापूर्वकः। सा च भावशब्देभ्यः प्रसर्पन्ती दृश्यते, न द्रव्यगुणशब्देभ्यः। तस्मादाख्यातेभ्योऽपूर्वं भावना गम्यते। तत्र च धात्वर्थस्य करणत्वप्रतिपत्तिः, प्रत्यासत्तेः। अतस्तेनैव फलकरणभूतेनाऽन्यथानुपपत्त्याऽपूर्वं भाव्यत[2] इत्यवधार्यते। कथं पुनर्यज्यादीन्पृथक्कृत्य केवलप्रत्ययवाच्य एव भावनार्थो लभ्यते भावयेदिति।

कुतः ?

अभिदध्युः स्वशक्त्या हि विधिमात्रं लिङादयः।
ण्यन्तस्य भवतेरर्थः केनांशेनाभिधीयते ॥

न च धात्वन्तरार्थं यज्यादयः प्रतिपादयन्ति, स्वार्थमात्रव्यापृतत्वात्। अतः शब्दरहितमेवेदमारोप्यते भावयेदिति। किं च—

शब्दान्तरस्य योऽप्यर्थः पर्यायैरभिधीयते।
न स तेनैव सहितस्तस्मिन्नर्थे प्रयुज्यते ॥

तद्यथा पिकमानयेत्युक्ते यो नामार्थं न प्रतिपाद्यते, तस्मै कोकिलशब्दमेव केवलं प्रयुञ्जते, न कोकिलः पिक इति, तथाऽत्र यद्याख्यातस्य करोतिर्ण्यन्तो वा भवतिः पर्यायः, ततस्तदर्थकथने तन्मात्रमेव प्रयोक्तव्यम्, नाऽऽख्यतप्रत्ययोऽपि, न हि तदानीं विविच्य ज्ञायते, केनांशेन क्रिया प्रत्याय्यत इति। अत्र तु भावयेत्कुर्यादिति वा पुनरपि लिङ् प्रयुज्यत एव। अतश्च योऽनेन यजतेः परेणार्थः प्रतिपादितोऽसौ भावयतेरपि परेण तेनैवेत्यधिकावाप एव भावयतिः। तस्मादवैदिक इति।

अत्राभिधीयते—सर्वत्रैव तावत्—

सिद्धकर्तृक्रियावाचिन्याख्यातप्रत्यये सति।
सामानाधिकरण्येन करोत्यर्थोऽवगम्यते ॥

---

१. क. प्रतीतेरिति। २. क' अपूर्वभावनाऽवगम्यते।

इह केभ्यश्चिद्धातुभ्यः परा तिङ्विभक्तिरुच्चार्यमाणा कर्त्रात्मलाभमात्रमेव व्यापारं प्रतिपादयति। यथास्तिभवतिविद्यतिभ्यः। अपरेभ्यस्तु सिद्धे कर्तर्यन्यात्मलाभविषयव्यापारप्रतीतिः। यथा यजति ददाति पचति[1] गच्छतीति। द्रव्यमेव च विशिष्टशक्त्युपेतं प्रचलितात्मतत्त्वं विप्रकीर्णस्वभावं पूर्वापरीभूतं प्रथमावस्थामप्राप्तं व्यापारशब्दवाच्यं भवति। तत्र कदाचित्कर्त्रैवमवस्थः[2] प्रतीयते, कदाचित्सिद्धे कर्तर्यन्यः। तद्यदा कर्तुरेवैषाऽवस्था भवति, तदाऽसौ स्वयमेवान्यस्मदात्मलाभमपेक्षमाणः परनिष्पत्तावव्याप्रियमाणत्वान्न करोतिशब्दवाच्यतां प्रतिपद्यते[3]। यदा तु लब्धात्मकोऽन्यत्र व्याप्रियते, तदा करोतीत्येवमपदिश्यते। तथा च किं करोति? पठति गच्छतीति सामान्यविशेषरूपेण सामानाधिकरण्यप्रयोगो दृश्यते, न तु किं करोति। भवत्यस्ति वेति प्रयुज्यते। तस्माल्लब्धात्मककर्तृव्यापारवचनानि करोत्यर्थवन्त्याख्यातानि। तत्र च क्रियमाणेन केनचिदवश्यं भवितव्यम्।

कुतः—

करोतिः क्रियमाणेन न कश्चित्कर्मणा विना।
भवत्यर्थस्य कर्ता च करोतेः कर्म जायते॥

करोतेर्नित्यं सकर्मकत्वाद्यावत्क्रियमाणं न लभ्यते, न तावदर्थः पर्यवस्यति। सर्वकारकाणां चावान्तरक्रियासु कर्तृत्वं प्रतिपाद्यमानानां प्रधानक्रियासु कर्मादिविभागो जायते। प्रतिक्रियं योग्यताभेदादवान्तरक्रियावैचित्र्यं भवति। तत्रान्वयव्यतिरेकाभ्यामिदमवगतं भवतिक्रियायाः कर्ता करोतेः कर्म संपद्यत इति।

तथा हि—

नित्यं न भवनं यस्य यस्य वा नित्यभूतता।
न तस्य क्रियमाणत्वं खपुष्पाकाशयोरिव॥

य एव हि प्रवृत्तभवनः संभावितभवनो वाऽन्येन प्रयुज्यते, स एव क्रियमाणत्वेनावधार्यते, नान्यः। तथा च न कश्चित्खपुष्पमाकाशं वा कुर्वन्नुपलभ्यते। यत्रापि पादौ कुर्वित्यादिषु निष्पन्नानां कर्मत्वप्रयोगो दृश्यते, तत्राप्यनिष्पन्नसंस्कारादिविवक्षया पादादिशब्दप्रयोगादव्यभिचारः। सत्यपि च करोतेरनेकार्थत्वे सर्वत्र गन्धनावक्षेपणादौ किंचिदनुत्पन्नोत्पादनसामान्यमवगम्यते।

अथ वा यदाऽस्योत्पादनाभिधायित्वम्, तदैव विशिष्टाख्यातसामानाधिकरण्यं दृष्टमिति तद्गतस्योत्पाद्यमानमेव कर्म भवतीत्युपपन्नम्। तेन भवतिक्रिया तावल्लब्धा।

---

१. क. (टिप्पण्यां) पठतीत्यधिकम्।
२. क. प्रथमावस्थातः प्रत्युत परामवस्था।
३. क (टिप्पण्यां) भजत इति।

ततश्च—

करोत्यर्थस्य यः कर्ता भवितुः स प्रयोजकः।
भविता तमपेक्ष्याथ प्रयोज्यत्वं प्रपद्यते॥

भवतिकरोत्योः शक्तिभेदाद्विक्लिदिपचत्योरिव नियतं प्रयोज्यप्रयोजकव्यापारवचनत्वम्। तत्र च कदाचिदभिधीयमानकर्मशक्त्याऽऽक्षिप्तप्रयोज्यव्यापारो वा स्वयमेवाऽऽक्षिप्तप्रयोज्यव्यापारो वा केवलं प्रयोजकव्यापार एव विवक्ष्यते—कटं करोति, ओदनं पचतीति। कदाचिदाक्षिप्तप्रयोजकव्यापारं प्रयोज्यव्यापारमात्रं, घटो भवति, विक्लिद्यन्ति तण्डुला इति। कदाचिदुभौ भिन्नौ समुच्चित्य प्रयोगः, करोति कटं देवदत्तः स च भवति। कदाचिदुपसर्जनीभूतप्रयोजकव्यापारः प्रयोज्यव्यापारः क्रियते देवदत्तेनेति, स्वयमेवेति वा प्रयोगे। कदाचित्पुनः समानपदैकदेशोपात्तोपसर्जनीभूतप्रयोज्यक्रियः प्रयोजकव्यापारो विवक्ष्यते, तदा च करोतिपचत्योस्तादात्म्येनाशक्तेरप्रयोगाद्भूविक्लिद्योश्च केवलप्रयोज्यक्रियानिष्ठत्वान्न साक्षात्प्रवर्तितुं शक्तिरस्तीति वाचकत्वेन, द्योतकत्वेन वा णिजपरः प्रयुज्यते—भावयति विक्लेदयतीति च।

तथा चाऽऽह—

प्रयोज्यकर्तृकैकान्तव्यापारप्रतिपादकाः।
ण्यन्ता एव प्रयुज्यन्ते तत्प्रयोजककर्मसु॥

न च तेषामण्यन्तानामशक्तिरित्यन्येषामशक्त्या भवितव्यम्। अन्येषां वा शक्तिरित्येषामपि तद्वद्भवितव्यम्। कुतः—

शक्तयः सर्वभावानां नानुयोज्याः स्वभावतः।
तेन नाना वदन्त्यर्थान्प्रकृतिप्रत्ययादयः॥

एवं करोत्यर्थद्वारेण सर्वाख्यातेषु भावयत्यर्थः सिद्धः।

तेन भूतिषु कर्तृत्वं प्रतिपन्नस्य वस्तुनः।
प्रयोजकक्रियामाहुर्भावनां भावनाविदः॥

यत्तूक्तं न विधित्वव्यतिरिक्तं[1] लिङादयोऽर्थं वदन्तीति।

तदयुक्तम्।

कुतः—

अभिधाभावनामाहुरन्यामेव लिङादयः।
अर्थात्मभावना त्वन्या सर्वाख्यातेषु गम्यते॥

---

१. क व्यतिरिक्ता।

यदा हि सर्वाख्यातानुवर्तिनी करोतिधातुवाच्या पुरुषव्यापाररूपा भावनाऽवगता भवति, तदा तद्विशेषाः सामान्याख्यातव्यतिरिक्तशब्दविशेषवाच्या विधिप्रतिषेधभूतभविष्यद्वर्तमानादयः प्रतीयन्ते। तथा च सर्वत्र सामान्यतः करोत्यर्थोऽवगम्यते। किं करोति? पचति किमकार्षीत् अपाक्षीत्, किं करिष्यति? पक्ष्यति, किं कुर्यात्? पचेत्, किं न कुर्यान्न पचेदिति। **तत्रार्थात्मिकायां भावनायां लिङादिशब्दानां यः पुरुषं प्रति प्रयोजकव्यापारः, सा द्वितीया शब्दधर्मोऽभिधात्मिका भावना विधिरित्युच्यते।** विशेषतश्चेयमर्थवादाधिकरणे वर्णिता। यत्तु पर्यायस्थित्यतिलङ्घनं प्रत्ययापरित्यागादभिहितम्।

तत्रोच्यते—

केवलस्याप्रयोगित्वात्कर्तृसंख्यादिसंग्रहात्।
रूपाविनाशसिद्धेश्च प्रत्ययोऽपि प्रयुज्यते॥

यदि हि केवलः करोतिर्भावयतिर्वा प्रयोगार्हौ स्यातां, ततः कोकिलशब्दप्रयोगे पिकशब्दवत्प्रत्ययो न प्रयुज्यते, न तु केवलायाः प्रकृतेः प्रयोगः, अपभ्रंशत्वप्रसङ्गात्। तेन यस्मिन् कस्मिंश्चित्प्रत्यये प्रयोक्तव्ये, यस्यैवार्थः कथ्यते। स एवानुवादभूतः प्रकृत्यनुग्रहार्थं प्रयुज्यते, नान्यः, अभ्यदिकार्थान्तरापत्तिप्रसङ्गात्।

ननु च, इकश्तिपौ धातुनिर्देशे विहितावतस्तद्युक्तौ करोतिभावयती प्रयुज्येयाताम्। नैतदस्ति। तथा सति शब्दपदार्थकत्वान्नैव ताभ्यामाख्यातार्थः कथ्येते। यत्तु क्वचिदर्थेऽपि धातुमिकश्तिबन्तं प्रयुञ्जते-याजिः यजतिः, इति च। तत् शब्देऽभिहिते लक्षणयाऽर्थप्रतीतिरित्यवगन्तव्यम्। न चेह किंचिल्लक्षणाश्रयणे प्रयोजनमस्ति येनावाचकः प्रयुज्यते। तत्रान्यदेवानिष्टमापद्येत, कृञ्भुवौ धातू तिङाऽभिधीयेते इति। तस्मादर्थपरत्वसिद्ध्यर्थमाख्यातप्रत्ययसहितावेव प्रयुज्येते।

यदि च भावनैवैका प्रत्ययार्थः स्यात्, करोतिभावयती वा, समस्तप्रत्ययार्थोपादानसमर्थौ भवेतां, ततः केवलप्रयोगोऽप्याशङ्क्येत, न तु तदुभयमप्यस्तीति करोतिभावयतिभ्यां कथितेऽपि भावनार्थे, कर्तृसंख्यादिप्रत्यायनार्थं पुनः प्रत्यय उच्चार्यते। यस्तु तत्र भावनाभिधानांशः, स प्राप्तत्वादनूद्यते, अन्यथा हि भावनैवेका प्रत्ययार्थः, करोतिभावयती वा कर्तृसंख्यादीनामप्यभिधायकाविति भ्रान्तिः स्यात्।

नित्यं च पूर्वापरीभूता भावनाऽऽख्यातेनोच्यते। तत्र यदि प्रत्ययान्तरं प्रयुज्यते, ततः करोतिभावयतिभ्यां द्रव्यवदुपसंहृतरूपोच्यमाना नैवाऽऽख्यातसदृशी कथ्येत्। तस्मादवश्यं तदपि प्रयोक्तव्यमिति।

वाक्याधिकरणे उक्तस्यार्थस्योपवर्णनम्।

किं च—

भावना गम्यमाना च धातुप्रत्ययसंनिधौ।
कस्य वाच्येति विस्पष्टं न कदाचित्प्रतीयते ॥

यदि ह्येकान्तेनास्याः प्रत्ययार्थत्वमवधार्येत, ततः करोतिभावयतिभ्यां प्रत्ययपौनरुक्त्याशङ्का स्यात् तु तदस्ति, उभयसंनिधौ गम्यमानत्वात्। केवल-प्रकृतिप्रत्ययप्रयोगाभावाद्धि न विवेको विज्ञायते। शक्यते हि वक्तुं धातुसहितेन प्रत्ययेनोच्यत इति। अथवा प्रत्ययानुगृहीतेन धातुना। अथ वोभाभ्याम्। न च शक्तिकल्पनायां विशेषः, सर्वथाऽर्थापत्तिसाम्यात्। न च विवेकज्ञानप्रयो-जनमस्ति।

स्यादेतत् कृदन्ताद्धातोरप्रतीतोस्तिङव्यभिचारिण्येव नेति। तदयुक्तम्। अस्ति-विद्यतिभवतिपरेषु प्रत्ययेष्वप्यदर्शनात्। न वा कृदन्तेष्वप्यत्यन्तं भावना नास्ति, किंचिदपकृष्यमाणरूपप्रतीतेः। कृत्येषु तावद्भोक्तव्यम् यष्टव्यमिति किंचिन्न्यूनाऽऽ-ख्यातादुगम्यते। तत्रापि कर्मोत्पन्नेषु द्रव्यप्राधान्याद्। ब्राह्मणो न हन्तव्य इति भावोत्पन्नेभ्यो न्यूनतरा। न हि तत्र प्रयोजकव्यापारप्राधान्यम्। एकत्र धात्वर्थप्राधान्यात्, परत्र स्वव्यापारविशिष्टप्रयोज्यपरत्वात्।

एतेन भावकर्मोत्पन्नलकारास्तिङोऽपि व्याख्याताः। तेष्वपि हि प्रयोजक-व्यापारगुणत्वप्रतीतिरविशिष्टा। अतो न तिङन्तानां तुल्यकल्पत्वम्।

तथा 'अव्ययकृतो भावे भवन्ति' इति स्मरणाविशेषेऽपि स्वसंवेद्यमीषन्न्यून-भावनाविज्ञानम्। 'अभिक्रामं जुहोति' 'दर्भतरुणकेनोपघात जुहोति' 'अभिषुत्य हुत्वा भक्षयन्ति पुरा वाचः प्रवदितोः' इति सर्वत्र श्रुत्यैव भावनान्तरसापेक्षा भावनाऽवगम्यते। पक्वः पक्ववानित्यपि निर्वृत्तरूपभावनोपसर्जनद्रव्यप्रतीतिः। प्रत्यक्षा। एवं पाचकादिष्वपि द्रष्टव्यम्।

तथा सर्वत्र कारकापेक्षा दृश्यते। अन्यथा हि रूढितद्धितसमासेष्विवेयं न स्यात्। न च निर्व्यापाराणामेते व्यपदेशा भवन्ति। न चास्ति स व्यापारः यत्र किंचिदसन्न जन्यते। ततश्च सिद्धः करोतिभावयत्योरर्थः।

शक्यते च सर्वत्र सामानाधिकरण्यमपि दर्शयितुं विनाऽपि पूर्वापरीभूतत्वेन। तद्यथा किं कर्तव्यम्। पक्तव्यम्। कथंकारं जुहोतो अभिक्रामम्। किं कृत्वा जुहोति ? अभिषुत्य। किं कृतवान् ? पक्ववान्, किं कृतम् ? पक्वम्, किंक्रियो देवदत्तः ? पक्ता, केयं क्रिया ? पाक इति। न च करोति सामानाधिकरण्यातिरिक्तमाख्यातेष्वपि भावनाप्रमाणं विद्यते। तस्माद्धातवोऽपि भावनां न मुञ्चन्ति। तथा चाऽऽहुः करोतिरर्थेष्विव सर्वधातूनिति।

यत्त्वस्याः प्राधान्यम्, तत्कामं तिङाऽभिधेयं, द्योत्यं वाऽन्वयव्यतिरेकाभ्यामस्तु, न स्वरूपम्। नन्वेवमपि यागेनेति धात्वर्थे निष्कृष्टे तेनैव भावनाऽप्युपात्तेति,

भावयेदिति पुनः प्रयोगो न प्राप्नोति । नैष दोषः तथा हि । ह्यर्थस्य धातोर्भेदेनार्थे कथ्यमाने यागेनेति विशेषरूपं करणात्मना निष्कृष्टम् । इतरत्तु भावनात्मकं सामान्यरूपः शब्दान्तरेण भावयेदित्यनेन कथ्यते ।

अथवा केचित्करणांशकर्तृसंख्यादयः प्रकृतिप्रत्यययोर्भेदेन वाच्याः । भावना तु समुदायाव्यभिचारात्समुदितयोरेवार्थ इत्यपि शक्यं वक्तुम् । तथा च सूत्रकारभष्यकाराभ्यां भावार्थाः कर्मशब्दा इति सामानाधिकरण्यमेवाऽऽश्रितं[1] न भावार्थत्वेन प्रत्ययाः कथिताः । शास्त्रे तु सर्वत्र प्रत्ययार्थो भावनेति व्यवहारः ।

तत्रायमभिप्रायः—

प्रत्ययार्थं सह ब्रूतः प्रकृतिप्रत्ययौ सदा ।
प्राधान्याद्भावना तेन प्रत्ययार्थोऽवधार्यते ॥

यद्यप्यन्यद्विवेककारणं नास्ति, तथाऽपि प्राधान्यं प्रत्ययार्थधर्मं दृष्ट्वा नूनमियं प्रत्ययार्थ इत्यवगम्यते—

तथा क्रमवतोर्नित्यं प्रकृतिप्रत्ययांशयोः ।
प्रत्ययश्रुतिवेलायां भावनात्माऽवगम्यते ॥

न केवलमेतावेवान्वयव्यतिरेकौ, यौ परस्परपरित्यागेन लक्ष्येते । तस्मिन्नेव हि पदे 'तदागमे हि तद् दृश्यते' इत्यनेन न्यायेन विवेकोऽवधार्यते ।

यत्त्वस्त्यादिपरः प्रत्ययोऽपि भावनां जहातीति, तुल्यं धातुसमुदायपक्षयोरप्येतत् सर्वथा यत्र प्रतीयते, तत्र तावत्प्रत्ययार्थत्वं निश्चीयते । अन्यत्र त्वयं विचार एव नास्ति । क्वचिद् व्यभिचारस्य चोत्तरमुक्तं तद्भूताधिकरणे ।

अथ वा नैवात्रापि व्यभिचारः । कुतः ?

अस्त्यादावपि कर्त्रंशे भाव्येऽस्त्येव हि भावना ।
अन्यत्राशेषभावात्तु न तथा सा प्रकाशते ॥

यद्यपि कर्तुरनिष्पन्नत्वाद्व्यतिरिक्तभावयितव्याभावादस्त्यादिषु प्रयोजकव्यापारो नातीव लक्ष्यते, तथाऽपि प्रत्ययसामर्थ्याद्भावयतीत्यवगम्यते । किमित्यपेक्षिते चानिष्पन्ने कर्तर्यन्यत्किंचिदित्यकल्पनादात्मानमित्येव संबध्यते । केन ? भावनेन । कथं ? अवयवजनादिप्रकारेणेति । त्रयोऽपि[2] तत्र भावनांशा भवनेनैव पूर्यन्ते, व्यापारान्तरासंभवात् । तत्र केचिदवयवा भावनाव्यापृताः प्रयुज्यन्ते । केचित्सिद्धभवनाः प्रयोजकाः । सिद्धभवनासिद्धभवनवर्ति च सामान्यमुभयसंपर्काद्भावनेत्युच्यते ।

---

१. क. (टिप्पण्यां) अभिहितमिति ।

२. अयमंशो ब्रह्मानन्दगौडैर्न्यायरत्नावल्यां चतुर्थ श्लोकव्याख्यायामनूदित इतिध्येयम् ।

एतेन जायते, निष्पद्यते सिध्यतीत्यादीनि व्याख्यातानि। अस्तिः पुनर्जनिसमानार्थाद्भवतेरुपरीतनीमवस्थामभिलपन्सत्तयाऽऽत्मभवनं भवद्भावयतीत्येवमाख्यातप्रत्ययं लभते। तत्रापि तु कालकृतभेदपूर्वोत्तरसामान्यसत्तारूपेण पूर्ववदेव प्रयोज्यप्रयोजकव्यापारकल्पनाऽनुसर्तव्या। सत्यामपि त्वेवप्रादिषु भावनायाम्, निष्पन्नचेतनकर्तृविषयत्वाद्विधिप्रतिषेधयोरसंभवः।

स्यादेतत्। दृष्टो विधिरपि 'तस्मात्प्रायणीयस्याह्न ऋत्विजा भवितव्यम्', रथंतरं भवति, अत्राध्वर्युः स्यात्, 'इहोक्थ्यानि स्युः' इति। सत्यं दृश्यते। न त्विह पूर्वेण तुल्यो भवत्यर्थः। सिद्धो हि पुरुषः कर्मसंबन्धनिमित्तमृत्विक्त्वं भवदन्यैरेव वाक्कायमनोव्यापारैर्भावयेदित्युच्यते। तथा रथंतरादिषु सत्यपि श्रुत्या भवनविधिसंबन्धे, तत्र संभवादनुमीयमाना भावनैव विधीयते। यत्र त्विहामुको भवेदिति प्रयोगः। तत्र भवतेस्तिष्ठत्यर्थवाचित्वात्संभवत्येव व्यतिरिक्तं भावयितव्यमित्येवं विज्ञायते। स्थानेनान्यत्किंचिद्भावयेदिति। तेन भूतभविष्यद्वर्तमानापदेशमात्रेष्वेवापारमार्थिकं भवितृव्यापारस्य भावनात्वम्, न विध्यादिषु। भूतादिकथनेऽपि यदा समस्तं व्यापारं धातुरेवोपादत्ते, नावयवकालादिकृतभेदाश्रयणम्, तदा विस्पष्टाद्विरोधाद्धात्वर्थमात्रम्[१], कर्तृसंख्यादयश्चाऽऽख्यातपदार्थत्वेनावधार्यन्ते न भावना। न च भावनाव्यभिचारेण दोष इत्युक्तम्।

यत्तु कृदन्तेष्वपि धातवो भावनां न व्यभिचरन्तीति। सत्यम्। धात्वर्था न व्यभिचरन्ति, तैरेव तु गम्यमानत्वादनभिधेयत्वमपि शक्यं वक्तुम्।

तथा हि—

धात्वर्थकारकैरेव गुणभूतोऽवगम्यते।
भावनात्मा कृदन्तेषु तस्मान्नैवाभिधीयते॥

यथैव भावप्रधानत्वादाख्याते, तत्संबधादेव गुणभूतकारकप्रतीतिसिद्धेर्न कर्तृकर्मणोरभिधानं भविष्यति, एवं कर्त्राद्यभिधानादेव तदन्यथानुपपत्त्या भावनासिद्धेरनभिधानम्। गम्यमानापेक्षयैव च करोतिसामानाधिकरण्यम्। यथा पचतिशब्दस्य देवदत्तशब्देन। अतथाभूतयैव च कारकसंबन्धोऽप्युपपत्स्यते।

अथ वा भावनोपसर्जनधात्वर्थनिष्पत्त्यर्थत्वात्कारकाणां धात्वर्थेनैव सम्बन्धसिद्धिः। स एव हि तानि स्वसिद्ध्यर्थमपेक्षते। भावनाऽपि च तथाभूतान्येव तानि गृह्णातीत्यविरुद्धः सम्बन्धः।

कृष्यानां तु प्रैषवाचित्वात्सत्यपि भावनानभिधाने तावत्स्वार्थपर्यवसानं नास्ति, यावदंशत्रयपरिपूर्णा भावना न लब्धा। कुतः?

---

१. क. (टिप्पण्यां) विशेषादिति।

स्वव्यापारे हि पुरुषः कर्तृत्वेन नियुज्यते ।
प्रैषैस्तस्य स्वरूपं च भावनांशत्रयात्मिका ॥

न हि पुरुषः स्वव्यापारं युक्त्वाऽन्यदनुष्ठातुं शक्तः । प्रैषाश्चैनमनुष्टापतन्ति । ते यदि तद्व्यापारं कथंचिन्नोपादद्युः, न नियक्तुं शक्नुयुरित्येवमपि भावनाक्षेपसिद्धिः यावांश्च ब्राह्मणगतः कश्चित्प्रैषः, स सर्वः प्राप्त्यभावाद्विधिरेव भवतीति, विनाऽपि स्मरणेन कृत्यानां विधायकत्वम् ।

अयमेव च विधिप्रैषयोर्विशेषः ।

प्रवर्तनस्मृतिः प्राप्ते प्रैष इत्यभिधीयते ।
अप्राप्तप्रैषणं सर्वं विधित्वं प्रतिपद्यते ॥

तस्मात्प्रत्ययार्थो भावनेत्युपपन्नम् ।

ननु च यदि प्रयोजकव्यापारो[1] भावनेष्यते, ततः पचावधिश्रयणादीनि, यजौ च मानसः संकल्प इत्यादीनां भावनात्वम् । त एव धात्वर्था इति, धातुवाच्यैव भावना स्यात् ।

धात्वर्थातिरिक्तभावनासाधनम्

नैष दोषः—

धात्वर्थव्यतिरेकेण यद्यप्येषा न लभ्यते ।
तथाऽपि सर्वसामान्यरूपेणाऽन्याऽवगम्यते ॥

सर्वत्र ह्यधिश्रयणादौ करोतीत्यपि सामान्यव्यापारांशः प्रतीयते । पचत्यादिवाच्या विक्लित्त्यधिश्रयणादयः कर्मस्थाः, कर्तृस्थाश्च । तत्र यदौदासीन्यप्रच्युतिमात्रेण परिस्पन्दरूपं निरूप्यते, सा भावना । ये तु तदनुरञ्जनसमर्थाः कर्तृकर्मगता विशेषाः ते तस्या एव करणेतिकर्तव्यतांशयोर्निविशन्ते ।

एवं तर्हि धात्वर्थसामान्यं भावनेत्येतदापन्नम् । सत्यम् । साध्यतया सामान्यं, न तु गोत्वादिरूपेण । कथम् ?

अन्यदेव हि यागादौ सामान्यं करणात्मकम् ।
अन्यच्च भावना नाम साध्यत्वेन व्यवस्थितम् ॥

भावनायां हि स्वयमेव प्रतिपुरुषं सामान्यविशेषौ भवतः । तथा तत् करणभूते यागादौ समवेतं भावनाकरणांशापेक्षितं धात्वर्थसामान्यं नाम यत्कर्मशब्देनाभिधीयते । विशेषणभावाच्च यागादयो भावनाविशेषा इत्युच्यन्ते, न तद्व्यक्तित्वेन । शास्त्रप्रदेशे तु क्रियाकर्मशब्दौ कदाचिद्धात्वर्थे प्रयुज्येते, कदाचिद्भावनायां, कदाचित्तु प्रत्यासत्त्योभयत्रापि प्रयोगः, न स्वरूपाभिधानेन ।

---

१ क. स[illegible]एवं इति टिप्पण्यां ।

कुतः ?

यादृशी भावनाऽऽख्याते धात्वर्थश्चापि यादृशः ।
नासौ तेनैव रूपेण कथ्यतेऽन्यैः पदैः क्वचित् ॥

भावनाशब्दो हि निष्पन्नात्मिकां सत्त्वरूपापन्नां लिङ्गसंख्यायोगिनीमभिधत्ते । न चासावाख्याते तादृश्यभिधीयते, लिङ्गसंख्यारहितरूपेण गम्यमानत्वात् । एवं धात्वर्थोऽपि वेदितव्यः ।

तथा करोतिभावयतीत्येताभ्यामपि श्रुत्या तावदन्यादृगेवार्थः प्रतीयते । कृञ्भावयत्यर्थकरणिका भावना । न चैवंरूपाऽसौ यजेतेत्यादिष्वस्तीत्यपर्यायत्वम् । तत्रानन्तरप्रत्ययोत्थापितभावनान्तरबुद्धिमविवक्षित्वाऽर्थसंवादः कर्तव्यः । तेनादूरविप्रकर्षमात्रेणैष प्रयोगः, नार्थसाम्येनेत्यवस्थितमनन्यशब्दवाच्यत्वं भावनायाः ।

भावनाया अंशत्रयेम् साध्यांशनिरूपणम्

सा तु प्रतीतमात्रैव प्राधान्यादपेक्षान्तरानधीनत्वाच्च प्रथमं तावत्साध्यांशमपेक्षते—भावयेत्किमिति । तत्र यावती विध्युपेता भावना, तस्यां पूर्वप्रतीतमपि विधित्वं तावन्नाऽश्रीयते, यावदंशत्रयपूर्णा भावनाऽनुष्ठानयोग्या न भवति । विधित्वप्रक्रमाच्च प्रथममेवैतज्ज्ञायते यादृशैरंशैः पूर्णेयं विधानमर्हति, तादृशैः पूरयितव्येति । न च बुद्धिपूर्वकारी पुरुषः पुरुषार्थरहितं व्यापारं वचनशतेनाप्युक्तोऽनुतिष्ठति । न च पुरुषार्थः साध्यव्यतिरिक्तांशपातित्वेन कैश्चित्प्रार्थ्यते । ततोऽभ्यर्हिततरस्यान्यस्य साध्यस्याविद्यमानत्वात् । तत्र यद्यस्यां भावनायामपुरुषार्थः साध्यः स्यात्, ततः पुरुषेष्वप्रवर्तमानेषु प्रत्ययस्य प्रयोजकशक्तिर्बाध्येत । तेन यद्यपि समानपदोपादानप्रत्यासत्तेर्धात्वर्थः साध्यांशपूरणायोपप्लवते, तथाऽप्ययोग्यत्वान्निराक्रियते । न हि प्रत्यासत्तिरेवैका सम्बन्धकारणम्, योग्यत्वाद्यपि । तथा च वक्ष्यति यस्य येनार्थसम्बन्ध इति ।

किञ्च—

सम्बन्धमात्रमुक्तं च श्रुत्या धात्वर्थभावयोः ।
तदेकांशनिवेशे तु व्यापारोऽस्या न विद्यते ॥

सम्बन्धमात्रं कृत्वा निवृत्तव्यापारायां श्रुतौ, अन्यतरांशनिवेशो योग्यत्वादाश्रयितव्यः । तद्यदि साध्यांशादेकप्रत्ययोपात्तेन प्रत्यासन्नतरेण विधित्वेन प्रच्याव्यते, ततोंऽशान्तरेण नूनं संपत्स्यत इत्येवं प्रतीक्ष्यते ।

किं च—

साध्यांशे पुरुषाणां च प्रत्ययो न नियोजकः ।
स्वयमेव हि जानन्ति कर्तव्यं पुरुषाः सदा ॥

यत्र हि शास्त्राधीना पुरुषप्रवृत्तिः तत्र तत्संनिकर्षविप्रकर्षावपेक्ष्येते। साध्यं पुनः स्वर्ग-पशु-पुत्र-ग्रामादि प्रागेव शास्त्रात्सर्वे पुरुषाः प्रतिपद्यन्ते। ततश्च भावयेत्किमित्यपेक्षितमात्रे विनैव तावच्छास्त्रेणैतावदवगतं पुरुषार्थः कश्चिदिति। तत्र विशेषमात्रमनवगतत्वादपेक्ष्यते। तदपि च न साध्यात्मना, किं तर्हि? एतद्भावनाविषयत्वेन। ततश्च दूरस्थस्यापि स्वर्गादेरेव कृतास्पदस्य संगतिः। धात्वर्थसम्बन्धस्त्वनपेक्षित क्रियेत विध्यानर्थक्याच्च बाध्येततरां श्रुतिः।

किं च—

भवने यस्य कर्तृत्वं कथंचिदवधारितम्।
स्ववाक्ये वाऽन्यवाक्ये वा स साध्यत्वं प्रपद्यते॥

न चात्र धात्वर्थादेर्भवनक्रियासम्बन्धोऽवगतः, स्वर्गादीनां तु कामशब्दोपसम्बन्धाद् भवनसम्बन्धो विज्ञायते।

कुतः?

स्वर्गो मे स्यादितीत्थं हि स्वर्गादिः प्रार्थ्यते भवन्।
तेनासौ भावनापेक्षः प्रयोज्यत्वेन गम्यते॥

साधनांशनिरूपणम्

ततोऽवधूतस्वर्गादिसाध्यांशा भावना केन भावयेदित्येवं करणमपेक्षते। तत्र च शास्त्राधीनप्रवृत्तित्वात्तत्संनिकर्षादावाश्रीयमाणे प्रमाणान्तराच्च योग्यायोग्यत्वयोरज्ञानाद्विध्यविरोधाच्चात्यन्तप्रत्यासत्त्युपस्थितधात्वर्थातिक्रमकारणाभावात्सर्वफलभावनानां च केनचिद्धात्वर्थविशेषेण विनाऽनुपपत्तेर्यागेनेत्येवं विज्ञायते। यद्यपि च यागः स्वयमेव तावदनिष्पन्नस्तथाऽपि स्वसाधननिष्पादितः सन्साधयिष्यति सर्वमेव च कदाचिन्निष्पन्नं कदाचिदनिष्पन्नम्। न च प्राक्छास्त्रप्रवृत्तेर्निष्पत्तिः क्वचिदुपयुज्यते, फलसिद्धिकालमात्रोपयोगित्वात्करणनिष्पत्तेः। प्रमाणवशाच्च त्रिकालवर्तिनामपि साधनत्वाविरोधः।

भावनायास्सकर्मकत्वनिरूपणमुखेन सूत्रार्थवर्णनम्

तस्माद्यागादीनां करणत्वं तच्चापूर्वद्वारेणेति, तच्छब्देभ्योऽपूर्वप्रतीतिः। अतश्चैवमपि सूत्रार्थः सम्भवति। ये भावार्थाः—भावनाप्रयोजनाः कर्मशब्दाः—यज्यादयः, तेभ्यः क्रिया प्रतीयेतेति।

ननु चोक्तेन कर्मकरणसम्बन्धन्यायेन सकर्मकधातुयुक्तादेवाऽऽख्याताद्भावनाऽवगतिः प्राप्नोति?

तथा हि—

येनेप्सिततमैर्भावैः किमित्यंशोऽवरुध्यते।
तद्योगी तेन धात्वर्थो न कश्चित्स्यादकर्मकः॥

भावनायास्सकर्मकत्वम् । कर्मकत्वनिरूपणम्

यदि वा सर्वधातूनां सकर्मकत्वापत्तिरथ वाऽकर्मकेभ्यो भावनया न भवितव्यम् । नैष दोषः ।

कुतः—

अन्यदेव हि धात्वर्थप्राप्यं कर्म सकर्मके ।
अन्यदेव च सर्वत्र प्रत्ययार्थनिबन्धनम् ॥

ओदनं पचति, ग्रामं गच्छतीति धात्वर्थापवर्गलभ्यमेकं कर्म । अपरं पुनर्भावनाकर्म । तत्र कदाचिद्धात्वर्थकर्मैव भावनाकर्मत्वमपि प्रतिपद्यते पाकेनौदनं भावयतीति । कदाचित्पुनः स्वकर्मविशिष्टधात्वर्थयुक्ता भावना कर्मान्तरेण युज्यते—ग्रामगमनेन स्वार्थं भावयेदिति, ओदनपाकेन चेति । तच्चैतद्धात्वर्थात्परतस्तदवाप्यमात्रत्वेन गम्यमानं धात्वर्थान्तरतिरोहितं भावनाकर्मतया सर्वत्रावधार्यते । तच्च प्रायेणैवंकामशब्देनैव सम्बन्धमापद्यते—सुखकाम आसीत्, स्वास्थ्यकामः शयीतेति । सत्यपि आसिशेत्योरकर्मकत्वे, यः प्रत्यनेन करोत्यर्थोऽभिहितः तत्कर्मत्वेन च स्वादीन्यवधार्यन्ते । तेन करोतेः सर्वदा सकर्मकत्वादकर्मकाख्यातानामपि च तत्सामानाधिकरण्यदर्शनात्किं करोति ? आस्ते, किं करोति ? शेत इति सिद्धाएवमादिष्वपि सकर्मिका भावना ।

यजेरपि तु यत्कर्म पूज्यत्वाद्देवतेष्यते ।
तदुज्झित्वैव पुत्रादेः कर्मत्वं भावनाश्रितम् ॥

तस्मात्सकर्मकाकर्मकयोरविशेषादासनेन भावयेदित्यपि प्रयोगासिद्धिः । कस्तर्हि सकर्मकाकर्मकयोर्भेदः ?

उच्यते—

साक्षादव्यभिचारेण धात्वर्थो यत्र कर्मभाक् ।
सकर्मकः स धातुः स्यात्पारम्पर्ये त्वकर्मकः ॥

आसनशयनादौ हि न नियमेन, आनन्तर्येण वादं तदिति वा कर्म निरूप्यते । इतेनाऽकर्मका अभिधीयन्ते । पचिगम्यादिनां तु विक्लिद्यतत्संयुज्यमानसाक्षात्संबन्धिकर्माव्यभिचारात्सकर्मकत्वं न तु भावनाविशेषणे कश्चिद्विशेषः ।

इति कर्तव्यतांशस्य प्रतिपादनम्

सेयं भावनांऽशद्वयपरिपूर्णा सती सर्वकरणानामुपायाननुगृहीतानां करणत्वानुपपत्तेः कथं भावयेदितीतिकर्तव्यतामपेक्षते । सा च प्रत्यक्षादीनामनुग्राहकदर्शनशक्त्यभावादत्यन्तशास्त्रगम्येति यथासंनिकर्षं तदसंभवाद्वा यथाकथंचिदुपस्थाप्यमाना शास्त्रानुसारेण श्रुत्याद्युपदेशेन, चोदनासामान्याद्यतिदेशेन

वाऽत्यन्तादृष्टोपकारद्वारेणाऽन्यथानपपत्त्या कल्प्यते। ततः परिपूर्णत्वादनुष्ठातुं योग्येति विधीयते। तद्विधानाच्चाऽर्थापत्त्या यागादिविधानमित्युपपन्नं भावार्थसूत्रम्।

भवन्ति केचित्कर्मशब्दा यागो यजनमिज्येत्युदाहर्तव्ये तत्सामानाधिकरण्यसिद्धश्येनैकत्रिकाद्युदाहरणम्। यागादिकरणत्वचोदनोत्तरकालभाविकर्मशब्दत्वेन पारतन्त्र्यात्सुज्ञानम्। स्वतन्त्राणां कथंचिदपि भावार्थत्वाशङ्कासंभवात्। यागादयो हि स्वातन्त्र्येणापि कदाचिदनुमानाद् भावार्थाशङ्काविषयाः स्युरिति। **केचिद्भावार्था न कर्मशब्दा**। यथा भावयेत्कुर्यादिति चोदाहरणम्। भूत्यादयस्तु प्रयोज्यव्यापारवचनत्वान्नैव यथावर्णितभावार्था इत्यनुदाहरणम्। तत्र यथाकथंचिण्णिजन्तव्युत्पत्त्या भावशब्द एको नियेत, नेतरौ। तावपि तु प्रयोज्यव्यापारांशेन कथंचिद् भावर्थावित्युदाहृतौ।

अथ वा द्वितीयसूत्रार्थव्याख्यानेन भावनाप्रयोजनत्वमंशवाचित्वे नास्तीति विनाऽपि सकलर्थाभिधानाद्भवन्ति भावार्थाः। कथं पुनरमी न कर्मशब्दा? यदा धातुमात्रं कर्मशब्दत्वेनोक्तम्, निर्विशेषस्य सामान्यस्यानुष्ठातुमशक्यत्वादकर्मशब्दत्वम्। अतो विशेषवाचिनामेव धातुनां कर्मशब्दत्वग्रहणादचोद्यमेतत्। यदि हि श्येनन्, चित्रादर्शपौर्णमासशब्दाः फलैः संबध्येरं ततो यागकरणत्वाभावात्तत्सामानधिकरण्यनिमित्तनामधेयत्वानुपपत्तेः प्रसिद्धयादिभिर्गुणविधित्वमेव स्यात्, अतः **स्थित एतस्मिन्नाधिकरणे** इत्याह। कस्मात्पुनरिदं तत्रैव न नीतम्? प्रमाणलक्षणेनाऽसंबन्धात् अथ नामधेयत्वं कस्मादत्र नाऽऽनीयते? भेदलक्षणेनाऽसंबन्धात्। तस्माद्यथान्यासमेव स्थितयोरर्थात्पौर्वापर्यसिद्धिः। **न चैषामर्थिनेति**—फलपदाभिप्रायम्। **विविभक्तित्वादिति**। संबन्धनिमित्ताख्यातविभक्तिविगमात्। अथ वा निष्पन्नार्थाविधायिसुब्विभक्तिविशेषयोगो विविभक्तित्वम्। तस्मान्न द्रव्यादिशब्दानां फलसंबन्ध इति।

आह च—

साध्यसाधनसंबन्धः सर्वदा भावनाश्रयः।
तेन तस्य न सिद्धिः स्याद्भावनाप्रत्ययादृते ॥ १ ॥

न्या० सु०— 'प्रथमेऽध्याये इत्यादिना प्रसक्तानुप्रसक्तं चेत्य'नेन कृतस्य वृत्तवर्तिष्यमाणार्थकर्त्तनस्य प्रयोजनमाह—**सम्बन्धं तावदिति**। पाठक्रमेणोपक्रमभाष्यविषयत्वज्ञानात् भाष्यानुभाषणं तावच्छब्दाद्वापूर्वं तावत् सम्बन्धं करोति। पश्चात् व्याख्यामिति प्रतीतेरुपक्रमभाष्यविषयत्वज्ञानं सर्वेषां वा वृत्तवर्त्तिष्यमाणाध्यायार्थकीर्त्तननां लिङ्गेन क्रमं बाधित्वा साधारणप्रयोजनाभिधानायेदमिति न भाष्यविशेषोऽनुभाषणीयः। एकादशानामप्यध्यायानां प्रथमाध्यायोक्तप्रामाण्यापेक्षत्वान्न द्वितीयाध्यायार्थमात्रकीर्त्तनम-

साधारणसम्बन्धार्थमुक्तमित्याशङ्का लक्षणद्वयस्येत्यनेन निराकृता। भेदादिसापेक्षस्य प्रामाण्यस्य शेषादिहेतुत्वेऽप्यन्यनिरपेक्षस्य भेदमेव प्रति हेतुत्वादसाधारण्यम्, अन्यथा भेदादीनामप्युत्तराध्यायार्थान् प्रति असाधारण्यानुपपत्तेरित्याशयः।

यद्वा कर्मोत्पत्तिप्रतिपादनेनोत्पन्नस्योत्पत्तिविध्यानर्थक्यप्रसङ्गात् तत्परिहाराय शब्दान्तरादिभिर्भेदः प्रतिपाद्यते। सिद्धप्रामाण्यस्य ह्यानर्थक्यं परिहरणीयमिति प्रामाण्यापेक्षो भेदः। अवघातादीनां त्वाज्याद्यर्थत्वेऽप्यदृष्टार्थत्वेनाऽर्थवत्त्वोपपत्तेः। सर्वत्रापि चैवमेव वक्तुं शक्यत्वान्न प्रामाण्यबलेन शेषादिसिद्धिरिति असाधारण्यं स्पष्टम्। किं च को धर्मः, कथं लक्षणः, कान्यस्य साधनानि, कान्यस्य साधनाभासानि, किं परश्चेति चतुर्विधा धर्मजिज्ञासा प्रथमसूत्रेणोपक्षिप्ता। तत्राध्यायद्वयप्रतिपाद्यप्रमाणस्वरूपविषयं प्रतिज्ञाद्वयं श्रुत्यर्थाभ्यां द्वितीयसूत्रेण कृत्वा 'तस्य निमित्तपरीष्टिरि'त्यादिना प्रथमाध्यायेन वेदप्रामाण्ये साधिते, तद्बलेन चैत्यवन्दनादीनां धर्मत्वव्युदासेन ज्योतिष्टोमादीनामेव धर्मत्वमिति, धर्मस्वरूपे ज्ञातेऽपि, इयन्त्येव धर्मस्वरूपाणीति कार्त्स्न्येन धर्मस्वरूपं भेदनिरूपणाधीनज्ञानमिति, अध्यायद्वयस्य चोदनासूत्रपरिकरत्वात्स्पष्टतराऽसाधारणेह सङ्गतिरिति।

यथोक्तम्—

'अथ वा द्वयमेवेदं सर्वशास्त्रमुखं मतम्।
द्वयध्याय्याश्चोदनासूत्रं शेषाणां शेषलक्षणम्॥
चोदनासूत्रनिर्दिष्टो यः प्रामाण्यपरिग्रहः।
सप्रकारः स आद्येन लक्षणेन प्रपञ्चितः'॥ इति।

सम्प्रत्येतदेवभाष्यमवयवशो व्याख्यास्यन् वृत्तानुकीर्त्तनभाष्यावयवद्वयं प्रतीकेनानुभाष्याक्षिपति—**तत्रेति**। धर्मप्रमाणस्य विध्यात्मकस्य वेदस्य तत्र प्रामाण्यव्युत्पादनात्कथमयुक्तमिति मत्वा पृच्छति—**कुत इति**। अभिप्रायमाह—**नैव ह्रीति**। सजातीयविजातीयार्थान्तरव्यावृत्तासाधारणधर्मप्रतिपादको रूढया लक्षणशब्दस्तार्किकाणां प्रसिद्धः। तदभ्युपगमेनाप्येतत्समर्थयितुं शक्यमित्येतत्प्रतिपादनार्थोऽयमारम्भः। परमार्थतस्तु नानाकर्मलक्षणमित्यादिवत् व्युत्पादनमात्रार्थः प्रमाणलक्षणशब्दोऽपीति न चोद्यावकाशः। विध्यादावपि परिहारदर्शनात्। अदिशब्देन तद्ग्रहणं प्रत्यक्षाद्यभिप्राये प्रमाणशब्दे तल्लक्षणमुपसंह्रियेत, तस्य त्वसौत्रत्वेनाध्यायार्थत्वाभावादनुपसंहार्यत्वं वक्तुम् सूत्रकारेणेत्युक्तम्—**अभिप्रायं स्पष्टयति**। **तन्नामेति**। नामशब्देन रूढयर्थत्वं दर्शितम्। सूत्रकारेणेत्येतद्व्याचष्टे-**अनुमानादीनीति**। प्रत्यक्षलक्षणमपि न सूत्रितं, प्रत्यक्षसूत्रस्याप्यनिमित्तपरत्वादित्याह—**प्रत्यक्षमपीति**।

ननु चोदनासूत्रेण चोदनाया धर्मप्रामाण्याभिधानाद्धर्मप्रमाणस्य चोदनात्वं लक्षणमुक्तं भवत्यत आह—**न चेति**। धर्मानुवादेन प्रमाणविशेषविधिपरं तत् न प्रमाणस्य चोदनात्वलक्षणविधिपरम्। न चार्थात्तत्परत्वम् अन्यतः सिद्धत्वादित्याह—**अस्मिन्नेवेति**।

साध्यसाधनसम्बन्धरूपधर्मप्रमाणमूलस्याख्यातशब्दस्य । येषां तूत्पत्ताविस्यत्र वक्ष्यमाणत्वादित्यर्थः । नन्वसूत्रितस्यापि प्रत्यादिलक्षणस्य वृत्तिकारोक्तत्वादुपसंहारो भविष्यत्यत आह—**यद्यपीति** । हेतुमाह – **सूत्रेति** । अध्यायार्थो ह्युपसंहार्य्यः । सूत्राश्रितत्वाच्चाध्यायव्यवस्थायाः, सूत्रारूढस्यैवाध्यायार्थत्वमिति भावः । सूत्रारूढोऽध्यायार्थं इति शाकपार्थिवादित्वान्मध्यमपदलोपेन समासः । न च तद्व्याख्यात एवार्थे सूत्रतात्पर्यं कल्प्यम् । प्रतिज्ञातचोदनाप्रामाण्य-तत्सिद्धयर्थेतराप्रामाण्य-तदुभयोपपत्तिप्रतिपादनरूपसमस्तलक्षणार्थव्यतिरिक्तरूपत्वादित्याह —**कथं चेति** । प्रत्यक्षसूत्रावयवमात्रस्य लक्षणपरत्वोक्तावपि औचित्यकथनार्थम्—**सूत्राणीत्युक्तम्** । न च तेनापि लक्षणपरत्वमुक्तम् । उपक्रमोपसंहारपर्यालोचनेनापरीक्षापरत्वावसायादित्याह—**अपि चेति** । तद्विवृणोति--**लोकेति** । विध्याद्याक्षेपस्य विधेरिदं रूपमित्यादिना पतिहारे विवरिष्यमाणत्वादिहाप्रपञ्चः समाधातुमुपक्रमते—**तस्मादिति** । आद्यावयवस्य तावत्समाधानप्रकारमाह—**तत्रेति** । प्रमाणलक्षणमिति यदुक्तम्, तच्चोदनालक्षणसूत्रोक्तार्थानुवादार्थमित्यर्थः । द्वितीयावयवसमाधानप्रकारमाह – **विध्यादीति** । विध्यादीनां प्रमाण्येन या निर्णीतिः स्थिता, सैव तत्त्वनिर्णीतिरभिप्रेतेत्यर्थः ।

नन्वध्यायसङ्गत्यै समस्ताध्यायार्थानुवादो युक्तः, नैकसूत्रार्थानुवादः । अथ सर्वेण वृत्तानुकीर्त्तनभाष्येणावयवशः समस्तानुवादो नैतावतेत्युच्यते, तथापि विध्यर्थवादेत्यादिना त्रिपाद्यर्थानुवादात्समस्तप्रथमपादार्थः पूर्वावयवत्वेनानुवाद्यः अत आह—**समस्तो हीति** । अध्यायद्वयस्यापि तत्परिकरत्वे त्रिपाद्यर्थस्योत्तरावयवैरनुवादात्प्रथमपादार्थमात्रानुभाषणार्थत्वमस्य दर्शयितुम्, तस्य तावत्परिकरत्वमस्तीत्यभिप्रेत्य, प्रमाणान्तरनिरासेन वा सम्मुग्धवेदप्रामाण्यं तन्मात्रेण पर्यवस्यतीत्यभिप्रेत्य प्रथमपादोक्तिः ।

कथं चोदनासूत्रेण प्रमाणलक्षणाभिधानमित्यभिप्रेत्य स्वरूपवचनव्यक्तिपक्षे तावदुपपादयति—**तत्र चेति** । यश्चोदनाप्रमाणकः, स धर्म इत्युक्ते चोदितत्वं धर्मस्य लक्षणमुक्तं भवतीति भावः । चोदनाप्रमाणकत्वं वा धर्मस्य लक्षणत्वेनोक्तमित्यध्याहार्यम् । भाष्ये धर्मशब्दानुपादानात्कथमेतदर्थलाभ इत्याशङ्क्याह—**अत इति** । कर्मव्युत्पत्तावपि कथं विशेषलाभोऽत आह—**सत्यपि चेति** । इदानीं प्रमाणवचनव्यक्तिपक्षेऽप्युपपादयत्यथवेति । प्रत्यक्षादिविषयत्वाशङ्कां निराकर्त्तुमाह—**यद्यपि चेति** । प्रमाणविधिपरत्वात्, तस्य कथं तदनुवादेन लक्षणाविधिपरत्वमित्याशङ्क्यार्थादुक्तं भवतीति दर्शयितुम्—**एतावतैवेत्युक्तम्** । चोदनात्वस्य लोकवेदसाधारण्येनातिव्यापकत्वादलक्षणत्वमाशङ्क्याह—**न चेति** । विजातीयव्यावृत्त्या क्रियावत्, तस्यैवाद्रव्यव्यावृत्त्या कथं चिल्लक्षणत्वं सम्भवतीति भावः ।

औत्पत्तिकसूत्रेण वा नित्यत्वाद्यभिधाने वैदिकत्वलाभान्नातिव्याप्तिरित्याह—**अपि चेति** ।

एवं तार्किकाभिमतं लक्षणशब्दार्थमुपपाद्यत, स्वतन्त्रप्रक्रियया न्यायव्युत्पादनार्थत्वात्समञ्जसमेवानुभाषणमित्याह—**अथ वेति**। एवं त्रिप्रकाराद्यावयवव्याख्यानेन पूर्वार्द्धं, प्रपञ्चय, उत्तरार्द्धं व्याचष्टे—**तथेति**। विध्यादीनां प्रामाण्योपयोगीद्वारविशेषः प्रवर्त्तकत्व-स्तावकत्व-स्मारकत्वरूपस्तत्त्वशब्दार्थोऽभिमतः। किमित्यसौ द्वारविशेषो न स्पष्टमनुक्रान्तः? अत आह—**अवसराभावादिति**। भेदलक्षणासङ्गत्यै तद्धेतुमात्रानुभाषणस्योपयोगादिति भावः। स्मृतिप्रमाण्योपयोगिनं द्वारविशेषमाह—**श्रुतिमूलत्वमिति**। स्मृतिमूलस्येत्यध्याहारः एवमवयवद्वयमाक्षेपपूर्वकं व्याख्याय, इदानीं तृतीयावयवे वाक्यार्थविचाराभावाद् गुणविधिग्रहणानुपपत्तिमाशङ्क्याह—**नामधेयस्येति**। सत्यं नामधेयप्रमाण्यमेव सप्रपञ्चमुक्तम्। तस्य तु चोदनान्तर्गतत्वात्। आग्नेयादौ तदसम्भवेऽर्थवादत्वानुपपत्तेः परिशेषाद् गुणविधित्वमेव भवतीति दर्शयितुं तद्ग्रहणमित्यर्थः। चतुर्थावयवे सन्दिग्धे विशेषणस्य प्रयोजनमाह—**सन्दिग्धार्थेति**। प्रथमपादमात्रे चेत्प्रमाणलक्षणोक्तिः, कथमध्यायस्य प्रमाणलक्षणाख्येत्याशङ्क्याह—**एवमिति**। उक्तेन प्रकारेण सामान्यविशेषाभ्यां समस्तस्य प्रामाण्यव्युत्पादनार्थत्वादिति भावः। तन्न प्रस्मर्त्तव्यमिति भाष्यमध्याययोर्हेतुहेतुमद्भावप्रतिपादनार्थतया व्याचष्टे—**तन्नेति**।

वक्ष्यमाणार्थकीर्त्तनभाष्यमनन्तरमित्यादि। तत्र प्रधानाप्रधानानीत्यवयवं भेदलक्षणासङ्गतत्वेनाक्षिपति—**ननु प्रधानेति**। प्रधानाप्रधानचिन्ताविशेषशेषिरूपत्वात्साक्षात्तृतीये सङ्गच्छते। चतुर्थेऽपि फलक्रतुप्रयुक्तत्वविवेकार्थं यथोक्तम्। पुनः श्रुत्यादिषट्केन क्रत्वर्थपुरुषार्थयोः प्रयोज्यत्वाप्रयोज्यत्वशेषधर्मविचारणा। फलविध्यर्थवादत्वकालार्थाङ्गप्रधानता फलक्रतुप्रयुक्तत्वविवेकार्थं विचारितेति, अत्र तु कथं सङ्गतिरिति भावः। अत्राज्ञाताक्षेपाभिप्रायास्तानि द्रव्यमित्यादिगुणप्रधानविचारदर्शनेनोत्पन्नभ्रमाभेदस्यैव लक्षणार्थत्वं निर्द्धारयितुमशक्नुवन्तः शेषशेषिविचाररूपेण सामान्येन पौनरुक्त्यमनेनाशङ्कितमिति मन्यमानाः परिहारमाहुरित्याह—**के चिदिति**। दूषयति—**तदयुक्तमिति**। यद्यवघातसम्मार्गादीनां गुणकर्मत्वं, स्तोत्रशस्त्रयोश्च प्रधानकर्मत्वमधिकरणान्तरसिद्धं स्यात्। ततः पौनरुक्त्यशङ्कासम्भवात् तत्परिहाराभिधानं युज्येत। शेषशेषिरूपतासामान्येन तु पौनरुक्त्यमनेनाशङ्का परिहारं द्रव्यगुणसंस्कारेष्वित्यत्र संस्कारशब्देनावघातादेर्द्रव्यशेषत्वाभिधानात्, द्रव्यशब्देन द्रव्यस्य शेषत्वाभिधानेन, तत्प्रति कर्मणः प्राधान्याभिधानादित्यर्थः। तस्मादेवं समाधेयमित्याह—**तेनेति**। सत्यन्तत्वेन लक्षणार्थत्वेन लक्षणं प्रति प्राधान्येन भेद एव लक्षणप्रतिपाद्यः अपूर्वभेदोऽपि तु प्रतिपाद्य एव। न चैवं लक्षणभेदापत्तिरनुनिष्पादितत्वात्तस्येत्युक्तम्—**तमन्विति**। अतस्तत्प्रसिद्धया प्राधान्यं विचार्यमाणं नासङ्गतमिति भावः। तदयं भाष्यार्थः अनन्तरं भिन्नान्यभिन्नानि च कर्माणि परीक्षिष्यन्ते। तदनुनिष्पाद्यपूर्वभेदाभेदसिद्ध्यर्थं च द्रव्यं प्रति प्रधानान्यप्रधानानीति। ननु अभेदस्यापि परीक्षणे लक्षभेदः स्यात्। अत आह—**कर्मभेदस्तावदिति**। उत्सर्गापवादाभ्यां तस्यैव परीक्षेत्यर्थः। उत्तरार्द्धं व्याचष्टे—

तदनुनिष्पादिना त्विति । एतदेव प्रपञ्चयन् समस्ताध्यायाधिकरान्यनुक्रामति—तत्रेति । तत्रशब्देनापूर्वनिष्पादनपर्यन्तेन भावार्थाधिकरणेन कर्मशब्देभ्योऽपूर्वं प्रतीयत इति व्युत्पादयता कर्मभेदानुनिष्पादित्वेऽपूर्वस्य सिद्धे—सतीत्युक्तम् । तृतीयविषयत्वेन प्रसिद्ध इत्यर्थः ।

यत्पुनः तृतीयविषयः सन्नत्रारप्स्यते तदपवादत्वेनेत्यसङ्गतिनिरासार्थम्—पुनरित्युक्तम् । अपवाददर्शयति—सत्यपीति । ननु चतुर्थे संस्कारे च तत्प्रधानत्वादि यत्रावहन्त्यादीनां दृष्टार्थत्वेन प्राप्तत्वादविधेयत्वमाशङ्क्य, नियमादृष्टार्थत्वेन देशादिवद्विधानं भविष्यतीति वक्ष्यमाणत्वात् कथमपूर्वाभावाभिधानम् ? अत आह—यत्त्विति । पुरोडाशनिष्पत्त्यर्थस्य तण्डुलीभावस्यानेकानि स्वनिष्पत्तिसमर्थानि साधनान्यालोचयतो योऽवघातविधिना साधनविशेषसमर्पणेन तत्रोपसंहारः क्रियते, स एव नियमनिबन्धादिशब्देनोच्यते । अर्थाक्षेपणे हि प्राप्स्यन्नप्यवघातस्तण्डुलीभावजनकत्वेन नियम्यमानो जन्यजनकनियमस्यादृष्टं प्रयोजनमपेक्षते । ततश्चावघातेन तण्डुलीभावे कृते तज्जन्यत्वात्, तण्डुलेष्वतिशयो निष्पाद्यमानो नावघातक्रियाजन्यो वक्तुं शक्यते, तण्डुलोत्पादननिरपेक्षावघातस्वरूपजन्यत्वाभ्युपगमे कृष्णलेष्वप्यतिदेशप्राप्तोऽवघातो न वारयितुं शक्यते । तस्मान्नियमादृष्टस्य चतुर्थाधिकरणे क्रियाजन्यत्वानभ्युपगमान्न तद्विरोध इत्यर्थः ।

अन्ये त्वर्थाक्षेपस्य विधिकल्पननिरपेक्षस्याप्रापकत्वेन मन्थरत्वादप्राप्तावस्थस्य क्रियास्वरूपस्यैव विधेयत्वात्प्रयोजनकल्पनोचिता, न फलमात्रत्वेनावस्थितस्य नियमस्येति मन्वाना नियमादृष्टस्यापि क्रियाजन्यत्वमिच्छन्तस्तादर्थ्यमात्रनिराकरणपरतयेदं वार्त्तिकमेवं व्याचक्षते क्रियाजन्यक्रियाकृतशब्दाभ्यामीप्सितत्वमुद्देशत्वाद्यपरनामधेयमभिप्रेतम्, नोत्पाद्यत्वमात्रम् । न तया व्यपदिश्यतइति च क्रियोत्पाद्यत्वे सत्येवानुषङ्गिकत्वात्तद्व्यपदेशमात्रम् । निराकरणपरमिति आनुषङ्गिकत्वादेव च कृष्णलेष्ववघाताप्रयोजकत्वमिति भावः । अपवादसिद्धिमुपसंहरति—तेनेति । गुणकर्मस्वप्यदृष्टार्थेषु अपूर्वाङ्गीकरणादैकान्तिकीति पूरणीयम् । प्रोक्षणादिजन्यस्य वा व्रीह्याद्याश्रितस्यातिशयस्य फलस्थानीयत्वेनात्माश्रितावान्तरद्वाररूपापूर्वशब्दवाच्यत्वाभावात्, तस्य चानन्तरभावित्वेन तत्सिद्ध्यर्थापूर्वान्तिरकल्पने प्रमाणाभावात्, प्रोक्षणजन्येऽतिशये प्रमाणान्तरागोचरत्वसाम्येनौपचारिकोऽपूर्वशब्दप्रयोग इत्यविरोधः । अस्य चेत्यादिभेदलक्षणार्थं इत्येवमन्तं सुगमम्—तदपवादार्थमिति । गुणत्वलक्षणस्यापवादः प्रधानत्वलक्षणं तदपवादार्थं प्रधानत्वलक्षणस्यापवादो गुणत्वलक्षणं तदपवादार्थमुत्तरमित्यर्थः । प्रक्रियाशब्देन विरुद्धलक्षणया प्रकरणान्तरमुक्तम् ।

कैश्चित्तु प्रथमाध्यायप्रतिपादितप्रामाण्यस्य शास्त्रस्य साध्यानुबन्धभेदाभ्यां भेदोऽस्मिन्नध्याये प्रतिपाद्यतइत्युक्तम् । तत्र साध्यं संयवनस्य पिण्डोत्पत्तिः । गोदोहनस्य पयःप्राप्तिः । अवघातस्य व्रीहिविकारः । प्रोक्षणस्य संस्कार इति चतुर्विधमन्योन्यनिरपेक्षं भिन्नं सत्सामवायिकाङ्गशास्त्राणां भेदकम् । द्वितीयाश्रुत्या एषा साध्यनिष्ठत्वावसायात्

क्रियारूपानुबन्धनिष्ठत्वाभावेन तद्भेदनिमित्तभेदायोगात् तयारादुपकारकाङ्गसाध्यः करणोपकारः। प्रधानसाध्यानि करणावान्तरकार्याणीति तद्भेदेनाङ्गप्रधानशास्त्रभेदः। समस्ताङ्गप्रधानसाध्यश्चैश्वर्यलक्षणोऽधिकारः कामजीवनाधिकाररूपेण भिन्न इति तच्छास्त्रभेदाध्यवसानमिति। शब्दान्तरादिप्रमाणकविषयापरनामधेयानुबन्धभेदाच्च यागहोमादिशास्त्राणां भेद इति।

तन्निराकरणार्थमेष एवार्थो वर्णनीयो नान्य इति भाष्यं व्याचष्टे— **एष एवेति।** अयमाशयः अङ्गाङ्गित्वाद्यवधारणार्थत्वेनाऽनुष्ठानोपयोगित्वाच्छास्त्रार्थरूपकर्मभेद एव विचार्यः, अनानुपयोगी शास्त्रभेदः, अनुष्ठानपर्यवसायित्वान्मीमांसाशास्त्रस्येति।

किं च साध्यानुबन्धभेदयोः शास्त्रार्थभेदद्वारा वा शास्त्रभेदकत्वं, तन्निरपेक्षं वेति विकल्पनीयम्। न तावदाद्यः पक्षः। शास्त्रभेदावधारणात्प्रागेव शास्त्रार्थभेदेऽवधारिते, अनुष्ठानसिद्धेरनुनिष्पादिशास्त्रभेदावधारणानार्थक्यात्, नरपेक्ष्यं तु न सम्भवत्येव साध्यानुबन्धभेदयोः शास्त्रार्थेन भावनया, नियोगेन वा सम्बन्धं विना शास्त्रेणासम्बन्धाद्भेदकत्वानुपपत्तेः। अस्तु वाऽनुबन्धभेदेनाधिकारलक्षणसाध्यभेदेन च शास्त्रार्थभेदाध्यवसायात्तद्द्वारेण शास्त्रभेदः, साध्यान्तराणां तु शास्त्रार्थभेदकत्वात्कथं शास्त्रभेदकत्वमिति वाच्यम्। उत्पत्त्यादीनामशाब्दत्वेन शास्त्रार्थनियोगानवच्छेदकत्वात् तद्भेदकत्वानुपपत्तिः। तदेवं भाष्यकारेणैव शास्त्रभेदस्य लक्षणार्थत्वनिराकरणात्प्राभाकराणां प्रधानप्रधानानीति भाष्यस्य शास्त्रभेदलक्षणार्थप्रतिपादनपरतया व्याख्यानमतिमूढतामापादयतीति अलमनेन।

कर्मभेदस्य लक्षणार्थत्वे कथं प्रमाणलक्षणानन्तरसङ्गतिरित्याशङ्क्य, भाष्यकृतोक्तम्। एष एवाध्याय सम्बन्ध इति। तत्र तत्र प्रसमर्तव्यमित्यनेन च हेतुहेतुमद्भावलक्षणसम्बन्धप्रतिपादनेन भेदलक्षणस्य चावसरप्रतिपादनात् लक्षणान्तरावसरनिरासपरतया इदं भाष्यं व्याचष्टे— **न चान्यस्येति।**

एतदेव प्रश्नपूर्वकमुपपादयति— **कुत इति।** उपदेशे ज्ञात इत्यनुषङ्गः। सर्वेषामुत्तरोत्तराध्यायानां पूर्वपूर्वापेक्षत्वं दर्शयितुं श्लोकानुक्तमपि प्रमाणलक्षणापेक्षत्वं दर्शयति— **प्राक् तावदिति।** 'तत्रापीत्यादिनाऽपेक्षत इत्यन्तेन श्लोकव्याख्यानम्। तत्रावृत्तिप्रसङ्गानामुपदेशातिदेशसाधारण्येऽपि भूम्नोत्तरषट्कस्यातिदेशविषयत्वाभिधानं लक्षणान्तरावसरनिराकरणपरत्वे कथं प्रस्तुताशङ्कानिराकरणम् अत आह— **ततश्चेति।** तदिहेत्यादिभाष्ये भेदस्य स्वतो वैलक्षण्याभावात् षड्विधत्वानुपपत्तिमाशङ्क्य, व्याचष्टे— **षड्विधइति।** नामधेयक्रमस्त्वविवक्षित इत्याह— **वक्ष्यमाणेति।** शब्दान्तरादीनां भेदत्वाभावात्सामानाधिकरण्यानुपपत्तिमाशङ्क्य वैयधिकरण्येन व्याचष्टे— **इतिकरण इति।**

शङ्काद्वयमप्यन्यथा परिहरति— **अथ वेति।** संज्ञायाः शब्दान्तरवदभिधानान्तरत्वेनाभिधेयतान्तरोपस्थापकत्वात्संख्यायाश्च गुणत्वाविशेषाद्भेदोपादानमनर्थकमाशङ्क्याह—

संज्ञाशब्दान्तरयोरिति। धात्वन्तररूपं शब्दान्तरं भवनानुरञ्जकव्यापाररूपेण स्वार्थं वदत्स्वार्थानुरक्ताया भावनायाः धात्वर्थान्तरानुरक्तभावनातः स्पष्टं भेदं बोधयति। संज्ञा तु न स्वेन भावनानुरञ्जकव्यापाररूपेण धात्वर्थं वदति, नाम्नां निष्पन्नरूपाभिधानस्वभावत्वात् नासौ धात्वर्थमात्रभेदे व्याप्रियते, तद्भेदात्तु शब्दान्तरन्यायेन भावनाभेदसिद्धिः।

गुणश्च गुणान्तरावरुद्धे कर्मण्यसम्भवात्स्वविशिष्टकर्मोत्पत्तिमाक्षिपन्नुत्पन्नस्योत्पत्त्यसम्भवात्कर्मान्तरेभ्यो भेदं बोधयति। संख्या तु व्यासज्यवृत्तित्वेनैकनिष्ठत्वाभावात्संख्यान्तरावरुद्धेष्वपि कर्मसु उपजनापायेनोपपत्तेः स्वविशिष्टकर्मोत्पत्तिमाक्षेप्तुमशक्नुवन्ती प्रमाणान्तरेण कर्मोत्पत्ताववधारितायामनेकत्वमात्रं बोधयतीति।

स्वरूपानभिधायित्वात्सञ्ज्ञाशब्दान्तरात्पृथक्।
व्यासज्यसमवायाच्च संख्या भिन्ना गुणान्तरादिति॥

अस्मिन्वार्त्तिके वक्ष्यत इति।

भिन्नान्यभिन्नानि चेत्येतावतैव हेतुमत्तया वर्तिष्यमाणकथनसिद्धेः षड्विधकथनानर्थक्यमाशङ्क्य वक्ष्यमाणमित्यादिभाष्येण सङ्क्षेपप्रदर्शनपूर्वकस्य विस्तरवचनव्याख्यातुः प्रतिपादनसौकर्यं, श्रोतुश्च प्रतिपत्तिसौकर्यं प्रयोजनमुक्तम्।

तदिष्टं विदुषां लोके समासव्यासधारणमिति न्यायेन स्पष्टत्वात् तदेतदित्येदप्यनादिसमाख्याबलेन शास्त्रभेदलक्षणार्थत्वनिराकरणपरतयाऽतिस्पष्टत्वान्न व्याख्यातम्।

यद्वोपक्रमोपसंहारपर्यालोचनया सर्वमेवैतन्निराकरणपरं व्याख्येयम्। हेतुहेतुमल्लक्षणो ह्यध्यायानां सम्बन्धः प्रसिद्धः, न प्रासङ्गिकः प्राधान्यापत्तेः। षड्विधत्वेन साध्यानुबन्धभेदाभ्यां द्वैविध्यम्। अवान्तरविवक्षया त्रयोदशविधत्वं निराकृतम्। कर्मशब्देन शास्त्रविषयत्वम्, शब्दान्तरादिग्रहणेन साध्यादीनि। परोक्ताध्यार्थनिरासेन स्वाभिमतार्थकथनस्य व्याख्यानतो ज्ञास्यमानत्वादानर्थक्यमाशङ्क्योत्तरभाष्यमिति।

न चोक्रमोपसंहारभाष्ययोः सत्यमन्यथं पश्यामः। 'एतत्तात्पर्येणे'ति भाष्ये कात्वा भेदमात्रतात्पर्याभिधानम्। बलाबलस्यापि वक्तव्यत्वादयुक्तमाशङ्क्य व्याचष्टे—**सर्वदा चेति**। न यत्रैकेन भेदो बोध्यते, तत्रैवेतरेणेति भिन्नविषयत्वम्। उपोद्घातादिशब्दार्थं व्याचष्टे—**तत्रेति**। यत्प्रस्तुतादुपजायते, तत्प्रसक्तानुप्रसक्तादीति योज्यम्। किं पुनरुपोद्घाताधिकरणम्। अत आह—**यथेति**। अनुसरतीति कर्त्तरि घञं व्युत्पाद्य प्रकृतौ योऽनुनिष्पाद्यपूर्वभेदानुसारी कर्मभेदः, तत्सिद्ध्यर्थमिति योज्यम्। धात्वर्थस्य हि फलभावनाकरणत्वे तद्भेदानुनिष्पादी फलापूर्वभेदः सिध्यति, कारणभेदानुनिष्पादित्वात्कार्यभेदस्य। नामार्थस्य तु करणत्वे तद्भेद एवापूर्वभेदापादकः स्यादित्याशयः। प्रकृतानुनिष्पाद्यन्यथादरदर्शनान्नानुनिष्पादित्वमात्रेणापूर्वभेदस्यानादरणीयत्वम्। धर्मापेक्षाज्ञानार्थं चेह कर्मभेदस्य प्रतिपाद्यत्वात् फलसाधनत्वेन कर्मणां धर्मत्वात् तस्य चापूर्वद्वारत्वादनुनिष्पादिनोऽप्यपूर्वभेदस्य विवक्षोपपत्तेः प्रकृतकर्मभेदविशेषणत्वाविरोधः।

किं भावशब्देभ्योऽपूर्वं, किं द्रव्यगुणशब्देभ्य इति सन्देहभाष्यम्। अपूर्वस्य शब्दवाच्यत्वाभावादयुक्तमाशङ्क्य, फलपदसम्बन्धद्वारा भावशब्दानां, द्रव्यगुणशब्दानां चापूर्वगमकताऽभिप्रेतेति भावः। अनेन च नामार्थस्य फलभावनाकरणत्वम्, धात्वर्थस्य वेत्यधिकरणार्थः सूचितः। करणभेदाभेदयोरपूर्वभेदाभेदहेतुत्वसूचनायाऽनुगन्तव्यावित्युक्तम्। सर्वेषां फलपदसम्बन्धे कतरस्य सम्बन्ध इति चिन्तानुपपत्तेः तत्सिद्ध्यर्थं प्रथमं तावदित्यादिभाष्येणैकस्य फलसम्बन्धः, सर्वेषां वेति चिन्तान्तरं कुर्वताऽर्थस्याप्यस्य चिन्तान्तरस्य धर्मभेदाभेदफलत्वाल्लक्षणसङ्गतिरप्यस्तीति दर्शयितुम्, 'किं पदेन पदेन धर्म उच्यते उत सर्वैरेक इति प्रथमं चिन्त्यत इत्युक्तम्। भेदस्य च पदार्थस्वरूपत्वात् प्रमाणलक्षणवद्भेदलक्षणस्यापि चोदनासूत्रप्रतिज्ञातधर्मस्वरूपव्युत्पादनार्थत्वात्, तयैव प्रतिज्ञया सङ्गतिरिति सूचयितुम्—**प्रथमेऽध्यायइत्युक्तम्**। नन्वेवं सति चोदनाशब्दस्य विधिप्रत्ययमात्रवाचित्वात् तत् पदेन पदेनेति चिन्ता न युक्तेत्याशङ्क्य-**वाक्यमित्युक्तम्**। तदुपपादनार्थं विधेस्त्र्यंशभावनाविषयत्वं वक्तुम्—**क्रियाया इत्युक्तम्**। तत्चोदनासूत्रएव 'द्व्यध्याय्याश्चोदनासूत्रमि'त्यनेन प्रामाणलक्षणवद्भेदलक्षणस्यापि चोदनासूत्रपरिकरत्वाभिधानात्।

किमाद्यपेक्षितैः पूर्णः समर्थप्रत्ययो विधाविति।

इत्यनेन वाक्यस्य चोदनात्वाभिधानात् स्पष्टमित्युपेक्ष्य, वाक्ये चेति वाक्य[1]वाक्यार्थसावयवत्वाभिधानस्य प्रकृतोपयोगमाह—**यदेति**। भाष्यार्थमजानानः शङ्कते—**अत्रापीति**। वाक्यवाक्यार्थयोः सावयवत्वेऽपि चोद्यं भवतीत्यर्थः। धर्मस्य वाक्यरूपचोदनागम्यत्वेन वाक्यार्थत्वात्प्रतिपदमित्याशङ्का न युक्ता। वाक्यार्थस्य लक्ष्यमाणत्वात् वाच्यत्वाभिधानं न युक्तमिति चोद्यार्थः। एतदेव व्याचष्टे—**यदि हीति**।

किं वाक्यार्थस्य धर्मत्वमभिप्रेत्येयमाशङ्का, भाष्येण धर्मस्य पदार्थता उक्तेत्यभिमानाद्वा। तत्र पदार्थस्यैव श्रेयःसाधनत्वेन धर्मत्वात् तावद्वाक्यार्थस्य धर्मता युक्तेत्याह—**तदुच्यत इति**। धर्मस्य वाक्यार्थत्वेऽपि वाक्यार्थस्य धर्मत्वं नास्तीत्याशयः। न च भाष्येण धर्मस्य पदार्थतोक्तेत्याह—**न चात्रेति**। श्रेयःसाधनत्वस्य फलपदसमभिव्याहारलभ्यत्वाद्वा, अर्थात्मत्वे सति वाक्यार्थत्वप्रसिद्ध्युपपादनायोक्ते पदार्थस्य धर्मत्वे, सर्वपदानामेकवाच्याभावात्सर्वशब्दानर्थक्यमाङ्क्षेतरेत्युक्तम्। पदार्थान्तरानुपगृहीतस्यैकपदार्थस्यैव फलपदान्वयाधीना श्रेयःसाधनत्वावगतिरित्याशयः। अत्रैव भाष्यं योजयति—**तथा चेति**।

नन्वेवमपि पदद्वयमात्राधीनत्वाद्धर्मत्वावगतेर्बहुविषयसर्वशब्दानर्थक्यम्, द्रव्यादेरपि फलवदुपकारित्वेन धर्मत्वात्, तदभिधायिपदापेक्षत्वेन सर्वशब्दस्यार्थवत्त्वे सत्येकपदानर्थक्यं स्यादित्याशङ्क्याह—**साक्षादिति**। 'कान्यस्य साधनानीत्या'दौ अङ्गस्य धर्मसाधन-

---

१. वाक्येति २ पु० ना०।

त्वाभिधानेन धर्मत्वानभ्युपगमान्न धर्मानेकत्वापत्तिरित्याशयः। यथाश्रुतं त्वसमञ्जसमेव स्यादित्याह—**न त्विति**। नन्वत्र किं पदेनेति भाष्यात्सर्वेषां धर्मत्वम्, एकस्य वेति विचारः प्रतिभाति। यदैकस्मादपूर्वम् इत्यस्माच्च सर्वेषां वाऽपूर्वसाधनत्वम् एकस्य वेति। य आहुः किमपि भावयेदिति, ते स्वर्गकामपदसम्बन्धात्स्वर्गं भावयेदिति ब्रूयुरिति मुख्योपोद्घाताधिकरणभाष्याच्च एकस्य फलसम्बन्धः, सर्वेषां वेति। तत्र किं प्राधान्येन विचार्यमित्याशङ्क्याह—**यच्चेति**। फलपदसम्बन्धावगम्यधर्मत्वकल्प्यत्वादपूर्वसाधनत्वस्य फलपदसम्बन्धएव मूलत्वात्प्राधान्येन विचार्य इत्यर्थः। किं तावदिति पूर्वपक्षप्रतिज्ञा-मुपपादयितुं व्याचष्टे—**किं प्राप्तमिति**। प्रतिज्ञासूचितामुपपत्तिं प्रश्नपूर्वकमाह—**कुत इति**। सर्वेषामगृह्यमाणविशेषतया ऐकरूप्यात्फलपदसम्बन्ध इति हेतौ तृतीयामङ्गीकृत्य तावद्व्याचष्टे—**यदि हीति**। सर्वेषां फलपदसम्बन्धे सति, ऐकरूप्येण सम्बन्धः सिद्ध्य-तीति इत्थम्भावे तृतीयामङ्गीकृत्यान्यथा व्याचष्टे—**यदि चेति**। व्याख्याद्वयसमुच्च-यार्थश्चशब्दः। प्रधानेन चेत्युपपत्त्यन्तरं गुणसम्बन्धेऽप्यर्थवत्त्वोपपत्तेरयुक्तमाशङ्क्योपपा-दयति—**सर्वश्चेति**।

ननु सर्वेषां फलपदसम्बन्धस्य प्रतिज्ञार्थत्वे धर्मग्रहणमसङ्गतं स्यादित्याशङ्क्य, फलतः सङ्गतिं दर्शयन्नुत्तरार्द्धं व्याचष्टे—**तस्मादिति**। नन्वेवं सति धर्मभेदाभेदफलत्वाद्विचारस्य 'तस्मादेकपूर्वमि'ति सिद्धान्तोपसंहारवत्, पूर्वपक्षे भिन्नो धर्म इति वाच्यमित्याशङ्क्याह—**तत्र त्विति**। प्रत्येकं फलसाधनत्वे सति, भेदेन श्रेयःसाधनत्वाद्धर्मभेदः सिद्ध्येत्, न च सर्वेषामपि फलपदसम्बन्धे नियमेन प्रत्येकं फलसाधनतास्तीत्याशयः। पुरुषार्थैकसिद्धित्वा-त्तस्य तस्याधिकारः स्यादि'ति षष्ठाधिकरणन्यायेन यथा सत्रिणः प्रत्येकं कृत्स्नं फलं लभन्ते, तथा नामधात्वर्था अपि किं प्रत्येकं फलं साधय६-२-थ एकप्रयोजनाभिसम्बन्धा-त्पृथक्सतां 'ततः स्यादैककर्म्यमेकशब्दाभिसंयोगादि'त्येकादशाधिकरणन्यायेन यथा दर्श-पूर्णमासौ संहत्य साधयतः, तथैतेऽपि संहत्य साधयन्तीति यथेष्टं कल्पनोपपत्तेः, सर्वेषां फलसाधनत्वेऽपि पृथक्फलसाधनत्वनियमाभावान्नैकान्ततो धर्मभेदः सिद्ध्येदित्यर्थः। प्रत्येकमपि फलसानत्वेऽग्निहोत्रे दध्यादिवददृष्टार्थत्वेनैकार्थत्वादन्योन्यानैरपेक्ष्याद्विकल्पे सति, अथ वाऽग्निहोत्रदर्शपूर्णमासादिवदन्योन्यनैरपेक्ष्याभावात्समुच्चये सति नात्यन्तिको धर्मभेदः सिध्येत्। न चाग्निहोत्रदर्शपूर्णमासादिवदेकान्तत एकशब्दोपादानमप्यमस्तीति सूचयितुम् **यथेत्युक्तम्**। आदिशब्दनसूचितानवक्लृप्तिर्यथेष्टशब्देन स्वीकृता।

ननु ऋद्धिकामाः सत्रमासीरन्नित्याख्यातोक्तस्य बहुकर्तृत्वस्य संहतानां कर्तृत्वाद् द्रव्यभेदेऽपि कर्तृरूपैक्यादनुपपत्तेः प्रत्येकं कर्तृत्वावसायात्पुरुषार्थस्य फलस्यैकस्मात्कर्तुः सिद्धेः तस्य तस्य कर्त्तुः प्रत्येकमधिकारो युक्तः। 'श्येनेनाभिचरन्यजेत, चित्रया यजेत पशुकाम' इत्यादौ तु नामधात्वर्थानां फलभावनां प्रत्युपादेयत्वेन समुदाये वाक्यपरि-समाप्तेः संहत्यकारित्वावगमात्प्रत्येकसाधनशक्त्यवगमहेतोर्बहुवचनस्याभावात्कथं प्रत्येकं फलसाधनतेत्याशङ्क्याह—**यत्रेति**। नामधात्वर्थयोरस्मिन्पूर्वपक्षेऽरुणैकहायन्यादिवद्विशे-

षणविशेष्यभावानभ्युपगमत्, दर्शपूर्णमासादिवच्चैकशब्दोपादानाभावात्साहित्यानवगतेः, उपादेयत्वेऽपि समुदाये वाक्यसमाप्त्ययोगात् बहुवचनाभावेऽपि नामार्थस्य तृतीयया व्रीह्यादिवन्निरपेक्षसाधनत्वावगमात् धात्वर्थस्याप्यन्यसापेक्षस्य साधनत्वे सामर्थ्याभावात् समर्थः पदविधिरिति पदमात्रविधौ सामर्थ्याधीनत्वस्मृतेः प्रत्ययार्थान्वयानुपपत्तिप्रसङ्गान्नैरपेक्ष्यावगतेर्बहुवचनाभावेऽपि पृथक्फलसाधनत्वावगतिः सम्भवतीत्यर्थः। समुच्चयस्तर्हि न सम्भवेदित्याशङ्क्य, यथा सत्रिणां प्रत्येकं साधनत्वशक्त्यवगमेऽपि समुच्चयः, तथा-नामधात्वर्थानामपीत्येतावता दृष्टान्ताभिधानम्।

नन्वत्र सत्रिवत् बहुवचनाभावात्कथं समुच्चयावगतिरित्याशङ्क्य—**फलेत्युक्तम्**। दृष्टार्थव्रीह्यादेः साहित्येऽपि फलानतिशयादगत्या विकल्पोऽङ्गीकृतः। इह तु प्रत्येकं साधनत्वेऽपि समुच्चयेन फलभूयस्त्वस्य, सारतरत्वस्य वा कलयितुं शक्यत्वान्न विकल्पाङ्गीकरणं युक्तमिति भावः।

नन्वेवं सति दर्शपूर्णमासवदेकशब्दोपादानाभावात्कथं संहत्य साधनत्वपक्षसम्भावनेत्याशङ्क्याह—**अथ वेति**। अन्योन्यनैरपेक्ष्यात्संहत्य साधनत्वायोगेऽपि दर्शपूर्णमासवत्साधनानां साहित्यमेकशब्दोपादानाभावेऽप्येकवाक्योपादानात्सम्भवतीत्यर्थः। समुदाये वाक्यसमाप्तिसम्भावनार्थोऽरुणादिदृष्टान्तः। विकल्पपक्षमपि सम्भावयत्यथ वेति। दर्शपूर्णमासवदेकशब्दोपादानाभावेन शब्दसामर्थ्यादरुणादिवच्चान्योन्याकाङ्क्षाभावेन वस्तुसामर्थ्यादपि साहित्यानवगतेः। समुदाये प्रमाणाभावात्प्रत्येकं वाक्यसमाप्त्या विकल्पः प्रतिभातीत्यर्थः—**इति प्राप्तइति**।

'सिद्धान्तभाष्यं प्रतिपदं धर्म' इति सर्वेषां फलसाधनत्वे पूर्वपक्षिते तत्प्रतियोगित्वेनैकस्य फलसाधनत्वेऽभिधातव्ये अपूर्वसाधनत्वाभिधानादयुक्तमाशङ्क्योपपादयन्सिद्धान्तयति—**अत्रेति**। अदृष्टकल्पनागौरवापत्त्या सर्वेषां फलसाधनत्वं निराकर्त्तुमेवमुक्तमित्याशः। सर्वेषां हि फलसाधनत्वेऽभिहिते संहत्य पक्षेऽपि उत्पत्त्यपूर्वभेदोऽवश्याङ्गीकार्यः। विकल्पेऽपि प्रत्येकमपूर्वकल्पना प्रसज्येतैव। तत्र यद्येकस्य फलापूर्वसाधनत्वे नामार्थस्य, धात्वर्थस्यानर्थक्यं स्यात्, ततोऽगत्या बह्वदृष्टकल्पनापादकमपि सर्वेषां फलापूर्वसाधनत्वं कल्प्येत। न त्वेतदस्ति धात्वर्थस्य साधनत्वे नामार्थस्य धात्वर्थनिष्पादकत्वेन तादर्थ्योपपत्तेः। नामार्थस्य चासाधनत्वे निराश्रयस्य तस्य साधनत्वायोगेनाश्रयतया धात्वर्थस्य नामार्थोपकारित्वोपपत्तेः। ततश्चादृष्टानुमानस्य प्रसङ्गो यस्यां कल्पनायां साल्पीयसी भविष्यतीति भाष्यार्थोऽनेन सूचितः। श्लोकं व्याचष्टे—**यदि हीति**। 'तस्मादित्युपसंहारभाष्यं फलसम्बन्धद्वाराऽपूर्वसम्बन्धाभिधानात्पूर्वपक्षप्रतियोगित्वोपपत्तावप्युपक्रमानुरोधेन 'एकस्मादपूर्वमि'त्युपसंहर्त्तव्येऽपूर्वैक्योपसंहारादयुक्तमाशङ्क्यैवस्मादित्यनेनैकस्य फलापूर्वसाधनतया उक्तस्य तस्माच्छब्देन परामर्शमभिप्रेत्यैकस्मात्फलसम्बन्धिनोऽपूर्वमित्येवं व्याख्यां सूचयन् सिद्धान्तमुपसंहरति—**तस्मादिति**।

भाष्यकृता तु सर्वेषां फलसम्बन्धे फलांशस्याविधेयत्वेन नामधात्वर्थविशिष्टफलभावनाविध्यनुपपत्तेर्नामधात्वर्थानामेकविशिष्टविधिप्रसूतार्थविधिविधेयत्वायोगाच्छ्रौतव्यापारनानात्वेन वाक्यभेदापत्तेरेकस्यैव फलोद्देशेन विधेयत्वादेकमेवापूर्वं प्रमाणवदिति सूचनायापूर्वैक्यमुक्तम् । एवं च सर्वेषां फलसाधनत्वपक्षे प्रत्येकं विकल्पेनैव फलसाधनत्वापत्तेर्धर्मभेदात्, सिद्धान्ते चाभेदात्साक्षादप्यस्याश्चिन्ताया लक्षणसङ्गतिः सूचिता भवति । यस्त्वेकस्य फलवत्त्वे अन्यस्य तदुपकारित्वे वैरूप्याख्यो वाक्यभेदोऽभिहितः तं परिहरति—**न चेति ।** नामार्थस्य फलसम्बन्धे 'सोमेन यजेतेत्यादौ चैतत्परिहारायोगाद्भावार्थाधिकरणसिद्धान्ताच्च पूर्वं नामधेयत्वस्य वक्तुमशक्तेरपरितोषात्स्वमतेनान्यथा परिहरति—**अगत्या वेति ।** अदृष्टकल्पनातो लक्षणा ज्यायसीति सूचनायागत्येत्युक्तम् ।

इह नामार्थस्य फलसम्बन्धे यागवता श्येनेनेति मत्वर्थलक्षणाधात्वर्थपक्षे तु श्येनवता यागेनेति मत्वर्थलक्षणाप्यत्र नास्तीति प्रौढचा परिहारान्तरमाह—**अर्थाक्षिप्तेति ।** धात्वर्थस्य करणत्वे कर्तृव्यापारव्याप्यत्वात्करणस्य याऽर्थात्करणत्वेनाक्षिप्तः कर्तृव्यापारव्याप्यत्वरूपः साध्यांशस्तद्द्वारेण धात्वर्थेनात्मनो निष्पादकस्य नामार्थरूपकरणस्य ग्रहणसिद्धेः शब्दस्योपादेयत्वोद्देश्यत्वविधेयत्वानुवाद्यत्वगुणत्वप्रधानत्वरूपविरुद्धत्रिकद्वयपरत्वाभावान्न वैरूप्यलक्षणा विरोधो भविष्यतीत्यर्थः । नामार्थस्य करणत्वे निर्व्यापारस्य तस्य करणत्वायोगादात्मनः करणत्वसिद्धयेऽर्थाक्षिप्तो यः, कस्य चिद्व्यापारस्य साध्यत्वाख्यः सामान्यरूपोंऽशः, तद्द्वारेण नामार्थेनात्मीयस्ववाक्योपात्तयागादिविशेषरूपसाध्यग्रहणसिद्धेरित्यूहेन योज्यम् ।

सर्वेषां फलसाधनत्वे कतरस्य साधनतेति विचारायोगात्तत्सिद्धयर्थमेकस्य साधनत्वे साधिते मुख्योपोद्घातोपक्रमार्थं 'यदेति' भाष्यं तस्माच्छब्दपरामृष्टादेकस्मात्फलसम्बन्धिनोऽपूर्वमित्येवं व्याचष्टे—**एवमिति ।** अत्रापि भाष्यगतस्यैकशब्दस्य पूर्वोक्तमेव प्रयोजनद्वयमविशेषेणेति पूर्वपक्षभाष्यादनियमपक्षोऽप्यत्राभिप्रेत इति शङ्का स्यात् । तन्निवृत्तये निर्द्धारणार्थो डतरप्रत्ययः । ननु सर्वेषां फलसाधनत्वयोग्यतायामप्यनेकादृष्टकल्पनापरिहारायैकस्य साधनतोक्ता, तस्य च पक्षद्वयेऽप्युपपत्तेरनियमोऽपि प्राप्नोतीत्याशङ्कामुपन्यासपूर्वकं निरस्यति—**सर्वथेति ।**

नन्वनियमे विकल्पापत्तेस्तस्य च पूर्वाधिकरणपूर्वपक्षनिरासने निरस्तत्वान्नेहानियमाशङ्का युक्तेत्याशङ्कानिराससूचनार्थः प्राप्तिशब्दः । सर्वेषां फलसाधनत्वं वाक्यं बोधयतीति पूर्वाधिकरणपूर्वपक्षार्थः प्रयोगे तु विकल्पो योगसिद्धयधिकरणन्यायेन सिद्धः फलत्वेनोक्तः । इदानीं तु वाक्येनैवानियमः प्रतिपाद्यत इति शङ्कानीरसनीयेत्याशयः । विध्यधीनत्वात्फलसाधनत्वस्य, एकस्मिंश्च वाक्ये विधेयद्वयायोगेनैकविशिष्टस्यैतरस्य विधेयत्वात्, धात्वर्थस्य फलसम्बन्धे श्येनवता यागेनेति फलसम्बन्धिनो धात्वर्थस्य विशेष्यत्वरूपात्प्राधान्यात् । फलसम्बन्धिनश्च नामार्थस्य विशेषणत्वरूपादङ्गत्वात्, नामर्थस्य तु फलसम्बन्धे यागवता श्येनेनेति विपरीतविशेषणविशेष्यभावापत्तेरेकस्य

चैकत्र वाक्ये वचनव्यक्तिभेदप्रसङ्गेन विशेषणविशेष्यत्वाख्याङ्गप्रधानत्वायोगान्नियमः शङ्कितुं इत्याशयः। श्लोकं व्याचष्टे—**न हीति**। अतो निर्द्धारणार्थो डतरप्रत्ययो युक्त इत्युपसंहरति—**तस्मादिति**।

कः पुनरिति भाष्येणाऽऽख्यातशब्दानां भावनावाचित्वव्युत्पादनार्थं प्रश्नद्वयं कृतम्। तत् 'भावप्रधानमाख्यात(नि-१)मिति स्मृत्याऽऽख्यातस्य भावनावाचित्वप्रसिद्धेरयुक्तमाशङ्क्योपपादयति—**कः पुनरिति**। इह व्युत्पाद्यमानभावनावाचित्वबलेन भावनाक्षेपादेव कर्तृप्रतीतिसिद्धेराख्यातस्य कर्तृवाचित्वं कर्त्रधिकरणे निषेत्स्यमानमपि असिद्धभावनावाचित्वावस्थायामुच्यमानं न विरुद्धत्वेनाशङ्कनीयम्। विशेष्यत्वेन वा विशेषणत्वेन वा कर्त्ताख्यातेनोच्यते। न तु कथं चिद्भावनेति सूचयितुं कर्त्तुः प्रत्ययार्थत्वेना प्राधान्याद्विशेष्यत्वेऽभिहिते, प्रत्ययार्थत्वोपपादनार्थं 'लः कर्मणि चे'ति सूत्रे चकारेण 'कर्त्तरि कृदित्यतः' कर्त्तरीत्यनुकर्षणात्कर्त्तरि लकारोत्पत्तिरुक्ता। नन्वनेककारकानुरञ्जनसहत्वेन भावनायाः प्राधान्यदर्शनात्प्रत्ययार्थत्वं न्याय्यम्, न कर्त्तुरित्याशङ्क्य, फलभाक्त्वात्कर्त्तुः प्राधान्यं वक्तुम्—**फलेत्युक्तम्**।

ननु प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः तयोः प्रत्ययार्थः प्राधान्येनेति सामान्यस्मृतेर्भावप्रधानमाख्यातमिति विशेषस्मृत्या बाधाद्भावनाया एव प्राधान्यात्प्रत्ययार्थता युक्तेत्याशङ्क्य—**कथं चिद्वेत्युक्तम्**। धात्वर्थातिरिक्ताया: भावनाया: स्वरूपेणैव सिद्धायाः प्राधान्यप्रत्ययार्थत्वयोर्दूरोत्सारितत्वात् धात्वर्थः केवलः शुद्धो भाव इत्यभिधीयत-इति च भावशब्दस्य स्वतन्त्रधात्वर्थवाचित्वस्मृतेविशेषस्मृतिबलेन प्रकृतिप्रत्ययार्थप्राधान्यविपर्ययमभ्युपगम्य कर्तृविशिष्टयागाद्यभिधानं युक्तम्, न तु भावनाप्राधान्यपरेयं स्मृतिरित्याशयः।

ननु कः पुनर्भाव इति भावनाक्षेपेणैव तद्वाचिशब्दाक्षेपसिद्धेः 'के ते पुनर्भावशब्दा' इति पुनराक्षेपो अयुक्त इत्याशङ्क्याह—**सत्यामपीति**। यदि कश्चिद्भावोत्पन्नल्युडादिप्रत्ययान्तधातुवाच्यस्य भावत्वाभ्युपगमेनाऽर्थपर्यनुयोगं परिहरेत्, तं प्रति 'श्येनेन यजेतेत्यादिषु एतदधिकरणोदाहरणभूतेषु वाक्येषु तादृक्भावशब्दाभावादन्य एव भावः भावशब्दाश्चाऽभिमता इतिप्रत्युत्तरसूचनायोभयप्रश्न इत्यर्थः। अलौकिकशब्दो वैयाकरणाप्रसिद्धत्वाभिप्रायः। न केवलं भाव एवालौकिकः। किं तु भावशब्दा अपीत्यपिशब्दार्थः।

यजतीत्युत्तरभाष्ये शब्दमात्रकथनादव्यापकमाशङ्क्य, शब्दान्तरकथनेनाऽर्थान्तरस्यापि सूचनद्व्यापकत्वं दर्शयन् व्याचष्टे—**सिद्धान्तेति**। वैयाकरणाभिमतशुद्धधात्वर्थव्यतिरिक्तभावनारूपार्थवाचित्वोपपादनार्थं 'हेतुमति चे'ति णिचि कृते भावीतीकारान्तत्वादेरजित्यच्प्रत्यये सति, णेरनिटीति णिलोपे भावशब्दव्युत्पत्तिनिरूपणेन कः पुनर्भाव इति' प्रश्ने निरस्ते, के के ते पुनः भावशब्दा इति प्रश्ननिरासाय आख्यातस्य—**चेत्युक्तम्**। धात्वर्थातिरिक्तभावनाख्यभावाभ्युपगमेनोदाहृतानां तद्वाचित्वासम्भावाशङ्कार्थं नन्विति भाष्यं धातोर्यागादिधात्वर्थवाचित्वेऽपि, आख्यातस्य भावनावाचित्वो-

पपत्तेरयुक्तमाशङ्क्योपपादयति—**परः पुनरिति**। भावनाया णिजन्तभवतिधातुमात्रवाचित्वाच्छब्दान्तरवाच्यत्वायोगेऽभिहिते, ननु यजत्यादिधात्वन्तरवाच्यत्वाभावेऽप्याख्यातवाच्यत्वं भविष्यतीत्याशङ्क्या, आख्यातस्य धात्वर्थवाचित्वादर्शनाद्भावयतेश्च 'सनाद्यन्ता धावत' इति धातुसञ्ज्ञत्वेनाख्यातप्रकृतिभूतयजत्यादिधात्वर्थत्वाभावेऽपि भावनाया धात्वन्तरार्थत्वान्नाख्यातवाच्यत्वं सम्भवतीति दर्शयितुं—**न चेत्युक्तम्**।

नन्वेवमपि धातूनां भावनावाचित्वस्य सिद्धान्त्यनभिमतत्वात्तन्निषेधो न युक्त इत्याशङ्क्य—**काममित्युक्तम्**। धात्वर्थत्वेनाख्यातप्रत्ययार्थत्वे निषिद्धे, यदि कश्चिद्याति वाति गच्छतीत्यादिधातूनां तुल्यार्थत्वदर्शनाद्यजत्यादिधातूनां भावयतिधातुवाच्यभावनावाचित्वं शङ्केत तन्निरासायेदमुक्तमित्याशयः।

नैतदेवमिति। परिहारभाष्यं धात्वर्थाभिधानानर्थक्यमाशङ्क्य, भावनानुरञ्जकत्वेन धात्वर्थाभिधानं दर्शयन् व्याचष्टे—**अत्रेति**। धात्वर्थस्यापि प्रत्ययार्थताऽनन्यथासिद्धप्रतीतिबलादवगम्यमाना न विरुद्धेत्याशयः। श्लोकं व्याचष्टे—**यावानेव हीति**।

नन्वाख्यातप्रत्ययस्य भावनावाचित्वेऽपि इह धात्वर्थस्य फलभावनाकरणत्वाभिधानार्थं धातोः फलपदसम्बन्धेनापूर्वंगमकताया विवक्षितस्य भावनावाचित्वाभावेन भावशब्दत्वाभावात् 'किं भावशब्देभ्योऽपूर्वमिति सिद्धान्तवचनव्यक्तिरयुक्ता। प्रत्ययसम्बन्धानुग्रहात्तु भावनानुरञ्जकस्यार्थवाचितया भावशब्दत्वे द्रव्यगुणशब्दानामपि। पूर्वपक्षे प्रत्ययसम्बन्धस्य 'सर्वेषां भावार्थ इति चेदित्यत्र वक्ष्यमाणत्वाद्भावशब्दत्वापत्तिरित्याशङ्कानिरार्थं 'द्रव्यगुणशब्देभ्यो द्रव्यगुणप्रत्ययः न तु तेभ्यो भावना प्रतीयते, तदर्थस्य भावनानुरञ्जकत्वायोगादिति प्रत्ययशब्दस्य समासान्निष्कृष्य भावनाशब्देनान्वयं कर्मव्युत्पत्तिं चाङ्गीकृत्य भाष्यकृतोक्तम्। तत्र के द्रव्यगुणाः ? के वा तच्छब्दा इति प्रश्नपूर्वकं तत्स्वरूपमनुक्त्वैव भावशब्दत्वशङ्कानिरासो न युक्त इत्याशङ्क्याह—**तद्व्यतिरिक्तास्त्विति**। आख्यातानां भावशब्दत्वे कथिते तद्व्यतिरिक्तानां द्रव्यगुणशब्दत्वज्ञानसिद्धेः प्रश्नपूर्वकमनभिधानमित्यर्थः। उपलक्षणार्थः पृष्ठशब्दः। निपातोपसर्गाणामाख्यातव्यतिरेकेऽपि स्वतन्त्रार्थानभिधायित्वेनेहाविवक्षितत्वान्न द्रव्यगुणशब्दत्वापत्तिः। द्रव्यगुणशब्दत्वेन च निष्पन्नार्थाविधायित्वस्य विवक्षितत्वात् क्रियावाचिनां नाम्नां द्रव्यगुणशब्दत्वापत्तावप्यदोषः।

किं तावदिति पूर्वपक्षभाष्यमव्यवस्थितशास्त्रार्थानुपपत्तेरनियमपक्षायोगादयुक्तमाशङ्क्य यदि भावशब्देभ्य एवाकाङ्क्षोत्पद्यते, न द्रव्यगुणशब्देभ्य इति विशेषः स्यात्, ततो द्रव्यगुणशब्दानां नैराकाङ्क्ष्येणाकाङ्क्षानिबन्धनफलपदसम्बन्धायोगान्नापूर्वंगमकत्वं स्यात्। न त्वसावस्ति। द्रव्यगुणशब्देभ्योऽपि करणविभक्त्यन्तेभ्यः साध्याद्याकाङ्क्षोत्पत्तेरविशेषादित्येव व्याख्यां सूचयन् पूर्वपक्षमाह—**तत्रेति**। यथैव भावशब्देभ्योभावार्थत्वात्। भावनाकाङ्क्षोत्पत्तिः। तथैव द्रव्यगुणशब्देभ्योऽपि करणार्थत्वादित्यविशेषपदव्याख्यासूचनार्थं करणार्थत्वेन फलपदसङ्गतौ योग्यत्वादि-

त्युक्तम्। इतरथा निष्पन्नार्थाभिधायित्वेनैव योग्यत्वसिद्धेः, करणार्थत्वस्य च धातवपि तुल्यत्वात्करणार्थत्वशब्दोऽनर्थकः स्यादिति।

नन्वविशेषे सति कथं द्रव्यादिशब्दानामेव फलपदसङ्गतिरित्याशङ्क्य, निष्पन्नार्थाभिधायित्वलक्षणाभिधानमनेन च भाष्येणाकाङ्क्षोत्पादकत्वलक्षणविशेषसदसद्भावसन्देहएव नामार्थस्य फलभावनाकरणत्वं धात्वर्थस्य वेति सन्देहकारणमिति सूचितं भवति। अत एव 'सर्वेषां भावोऽर्थ इति चेदि'त्यनेन सर्वेषां साकाङ्क्षत्वाविशेषमाशङ्क्य येषामुत्पत्ताविति सूत्रद्वयेन विशेषो वक्ष्यते। श्लोकं व्याचष्टे—**सर्वत्र हीति**। न साध्यान्तरमित्यनेन धात्वर्थस्य विधिसामर्थ्यात्करणत्वावगतेः, साध्यापेक्षायामपि असिद्धत्वेन तस्यापि साध्यत्वात्, 'सम्बन्धः समत्वात्स्यादि(३-१)ति न्यायान्न साध्यान्वयो सूचितम्। 'उच्यत'इति सिद्धान्तभाष्यं व्याचष्टे—**इतीति**। सूत्रशब्देन प्रतिपदाधिकरणसिद्धान्तस्योत्सूत्रत्वं सूचितम्। कीदृशेन सूत्रेण भाष्यकृतोत्तरं दीयत-इत्यपेक्षिते, सूत्रं योजयति—**भावार्था इति**। यच्छब्देन भावप्रधानमाख्यातमित्याख्यातशब्दानां भावनावाचित्वप्रसिद्धेः तद्विषयोऽयं इति सूचितम्। 'फलस्येति भाष्यात् क्रियाशब्दस्य फलनिष्पादनविषयत्वप्रतीतावपि भावशब्दानां फलनिष्पादनप्रत्यायकत्वाभिधानस्य यदैकपूर्वं, तदा सन्देहः किं भावशब्देभ्य इति सन्देहभाष्याद्भावशब्देभ्योऽपूर्वमिति सिद्धान्तवचनव्यवत्यर्थत्वावगतेः, तद्धेतुत्वसूचनार्थमपूर्वक्रियागतिरित्युक्तम्। 'एष ह्यर्थो विधीयत'इत्युक्ते कोऽसावित्यपेक्षायाम्—**कुर्यादित्युक्तम्**। आख्यातपदानां फलपदान्वये धात्वर्थस्य फलभावनाकरणत्वं सिद्धान्त्यभिमतं सिद्ध्यतीति प्रदर्शनार्थम्—**यजिनेत्युक्तम्**। (फलसाधनविधिमात्रेण भावशब्दानामपूर्वगमकत्वासिद्धेस्तैरित्यध्याहृतम्। भावशब्दानामेव फलपदान्वयः न द्रव्यगुणशब्दानामित्याशयः[1])।

ननु भावशब्दानां फलसाधनविधायकत्वस्यापूर्वगमकत्वे कथं हेतुतेत्याशङ्क्याह—**फलेति**। ननु भावशब्दानामेव फलपदान्वयः न द्रव्यगुणशब्दानामित्येतदेव कथमवगम्यत इत्याशङ्क्याह- **सम्बन्धश्चेति**। द्रव्यगुणशब्देभ्यः करणार्थत्वेन क्रियामात्राकाङ्क्षोत्पत्तावपि कारकाणां क्रियान्वयनिरपेक्षान्योन्यान्वयायोगेन साध्यानाकाङ्क्षत्वात्, तदभावे चेतिकर्त्तव्यतान्तानुपपतेः भावशब्दवत् सर्वपदार्थान्वयः स्यादित्याकाङ्क्षा नोत्पद्यत इति सूचयितुम्—**प्रसर्पन्तीत्युक्तम्**। दृश्यतइत्यनेन प्रतीतिसाक्षिकतोक्ता। अतो भावशब्दानां फलपदान्वयेन फलसाधनविधायकत्वादपूर्वगमकतेति सूत्रयोजनामुपसंहरति—**तस्मादिति**।

क्रियाशब्दव्याख्यानार्थो भावनाशब्दः। न चात्र धात्वर्थस्य फलभावनाकरणत्वं तद्भेदानुनिष्पाद्यपूर्वभेदसिद्ध्यर्थं वाच्यम्। तच्च सिद्धत्वेन योग्यत्वात्पदान्तरोपात्तस्यापि नामार्थस्यैव करणत्वापत्तेर्न सिद्ध्यतीत्याशङ्क्याह—**तत्र चेति**। योग्यत्वं

---

१. अयं पा० २ पु० ना०।

नाम लिङ्गम्। तच्चैकपदोपादाननिमित्तप्रत्यासत्तिलक्षणया श्रुत्या बाध्यतइति भावः। स्वकारकनिष्पादितस्य धात्वर्थस्यापि योग्यतास्तीति सूचनार्थश्चकारः सिद्धे च धात्वर्थस्य करणत्वे तदन्यथानुपपत्तिकल्प्यत्वेनापूर्वस्य तद्भेदानुनिष्पादी भेदः सिद्धयतीति सूचयन्नाह—अत इति। भाष्यं चानेनैव व्याख्यातम्। भावशब्देभ्यः फलक्रियाप्रतीयतइति भावशब्दानां फलपदान्वयेऽभिहिते, कुतो भावशब्दानामन्वय इति पृष्टे अंशात्रयाकाङ्क्षाभावनावाचित्वा' देवेत्युक्त्वा, य आहुरित्यनेन किमपीति भाष्याकाङ्क्षाप्रदर्शनपूर्वकमेतदेवोपपादयन्नाख्यातस्य भावनावाचिनः फलप्रदान्वयेऽपि करणाकाङ्क्षायां नामर्थस्यापि करणत्वोपपत्तेः, कथं धात्वर्थस्य करणत्वसिद्धिरित्याशङ्क्य, ते चेत्यनेन धात्वर्थानुरक्तभावनावाचितया धात्वर्थसम्बद्धानां स्वर्गोत्पादनाभिधायित्वात्प्रत्यासत्तेर्धात्वर्थस्यैव करणत्वावगतिरिति कर्मशब्दा इति एतत्सूत्रावयवसूचितेऽर्थेऽभिहिते, नन्वेकप्रत्ययोपादानश्रुत्या धात्वर्थनिरपेक्षायाः भावनाया विध्यन्वयात्स्वर्गादिपुरुषार्थफलत्वेऽवगते, करणाकाङ्क्षायामपि निष्पन्नत्वेनायोग्यत्वात्प्रत्यासन्नपि धात्वर्थं भाव्यांशवत्करणांशादपि प्राच्याव्य नामार्थेनैवान्वयावगमात्कुतो धात्वर्थसम्बन्ध इति पृष्ट्वा 'एष हीति सूत्रावयवेन प्रकृतिप्रत्ययपौर्वापर्यनियमाच्छुद्धभावनानवगतेरनुष्ठानाशक्तेश्च धात्वर्थानुरक्ताया एव फलोद्देशेन विधीयमानत्वाद्विधिगम्यत्वाच्च करणत्वस्य, केन भावयेत्स्वर्गमित्यपेक्षायां यागादिनेत्येवान्वयो युक्त इत्युत्तरे दत्ते, धात्वर्थकरणत्वाभिधानफलं भावनाशब्दानामपूर्वंगमकत्वं 'यस्य चेत्यादिनोक्तमिति' अपूर्वभावनागम्यत इति भावनाशब्देन निष्पत्त्युत्पत्तिशब्दयोः प्रयोज्यव्यापारवाचिनोरपि प्रयोजकव्यापारलक्षणार्थत्वं सूचितम्। अन्यथानुपपत्तिशब्देन 'तेनापूर्वं कृत्वा नान्यथे'ति भाष्येणापूर्वस्यार्थापत्तिगम्यता पराभिमतलिङादिवाच्यत्वनिरासायोक्तेति सूचितम्। तथा च ननु कश्चिच्छब्दः साक्षादपूर्वस्य वाचकोऽस्तीत्युक्तम्। लिङादिव्यतिरिक्तशब्दाभिप्रायत्वे तु कश्चिच्छब्दोऽसमञ्जसः स्यात्। अपूर्वशब्दस्याप्यनुष्ठानात्पूर्वं न जायत इत्यवयवव्युत्पत्त्या प्रवृत्तेर्न वाचकतास्तीत्यविरोधः।

भवदेवेन तिलकेलिङादिवाच्यत्वमपूर्वस्य।
यदुक्तम्, तन्निरस्यति सुधाकारं इति बोध्यम्॥
अतो लिङादिवाच्यत्वमपूर्वस्य वदन्ति ये।
एतद्भाष्यविरोधस्तैः परिहर्तुं न शक्यते॥

एवं सूत्रयोजनापूर्वकं सङ्क्षेपेण भाष्यं व्याख्याय, आख्यातस्य भावनावाचित्वमाक्षिपति—कथं पुनरिति। यद्यपि प्रत्ययवाचित्ववद्यज्यादिवाच्यत्वमप्याक्षेप्तुरनिष्टम्। तथापि प्रत्ययमात्रवाच्यत्वसिद्धान्तसूचनार्थं यागादिना स्वर्गकाम इति करणांशवाचित्वेन यज्यादीन्धातून्पृथक्कृत्य प्रत्ययमात्रवाच्यो भावनारूपोऽर्थो योऽभ्युपगम्यते—स कथं लभ्यतइति। अनुवादपूर्वकमाक्षेपः कृतः। एवकारेण धातुवाच्यत्वनिराससिद्धावपि, धातुप्रत्ययसमुदायवाच्यत्वनिरासार्थः केवलशब्दः।

ये तु भावनारूपोऽर्थोऽङ्गीक्रियमाणो धातोः स्वार्थाभिधानोपक्षीणशक्तित्वात्प्रत्ययवाच्योऽङ्गीकार्यः। स च, न सम्भवतीति भावनासद्भावाक्षेपार्थत्वेनेमं ग्रन्थं व्याचक्षते, तेषामभिदध्युः—**स्वशक्त्या हीति**। वाच्यत्वाक्षेपोपादनार्थः सिद्धकर्तृक्रियावाचनीत्यादिः तस्मात्प्रत्ययार्थ एव भावनेत्युपपन्नमित्यन्तश्च वाच्यत्वसमर्थनार्थः। सर्वोऽयं ग्रन्थोऽन्यपरत्वापत्तेरसमञ्जस एव स्यात्। न चाख्यातवाच्यत्वासम्भवमात्रेण वस्त्वभावो भवति घटादिवन्नामवाच्यत्वोपपत्तेः। उत्पादनमेव च प्रयत्नानुष्ठानाद्यपरपर्यायं भावनाशब्देनाभिप्रेतम्। तच्च सर्वलोकप्रसिद्धत्वान्नापह्नोतुं शक्यम्। धात्वर्थमात्रातिरेके तु विप्रतिपत्तिः। तत्र चानतिरेकेऽपि धातुनां धात्वर्थस्वरूपमभिधाय, तस्यैवान्योत्पादानुकूलत्वरूपभावनाप्रत्ययेनोच्यत इति वक्तुं शक्यत्वान्न धात्वर्थातिरेकाक्षेपार्थत्वं वाच्यात्वाक्षेपस्य युक्तम्। भावनाया तु धात्वर्थस्य करणत्वसिद्ध्यर्थम्।

ननु च यदि प्रयोजकव्यापारो भावनेष्यते इत्यादिना शङ्कापूर्वकं धात्वर्थातिरेको वक्ष्यते।

अत एव—प्रत्ययार्थस्य भावस्य वाच्यता तत्र चिन्तिते (तं० वा० पृ० ३०६) त्याकृत्यधिकरणेऽभिहितम्। वाच्यत्वाक्षेपं प्रश्नपूर्वकमुपपादयति—**कुत इति**। आख्यातप्रत्ययमात्रस्य भावनावाचित्वाक्षेपेऽप्युदाहरणभूतविधिवाक्यगताख्याताभिप्रायेण—**विधिमात्रमित्युक्तम्**। कर्तृसंख्योपग्रहविशेषाभिधानेऽपि भावनाभिधाननिरासार्थो मात्रशब्दः। धातुप्रत्ययांशद्वययोगिन्याख्याते धात्वंशस्य करणांशवाचित्वाभ्युपगमात्प्रत्ययस्यापि भावनावाचित्वासम्भवेऽनाभवेयताक्षेसुरभिमता सिद्धयतीति सूचयितुम्—**केनेत्युक्तम्**। नन्वाख्यातप्रत्ययस्यानेकार्थत्वाद्विध्यभिधायित्वेऽप्यविरुद्धं भावनाभिधायित्वमित्याशङ्क्य—**स्वशक्त्येत्युक्तम्**। स्वप्रत्ययार्थमात्रे प्रत्ययस्य शक्तेर्भावयतिधातुवाच्यभावनाभिधायित्वं न सम्भवतीत्याशयः।

नन्वेवमपि धात्वंशेनाभिधानोपपत्तेः केनांशेनेत्यनभिधेयत्वाभिधानमयुक्तमित्याशङ्क्याह—**न चेति**। यजयादिधातूनामण्यन्तधात्वर्थाभिधानव्यापृतत्वात् ण्यन्तभावयतिधात्वर्थाभिधायिता न युक्तेत्यर्थः। नन्वाख्यातश्रवणान्तरं भावनाप्रतीत्यन्यथानुपपत्त्याअत्रापि शक्तिः कल्पनीयेत्याशङ्क्याह—**अत इति**। नास्माभिः प्रतीयमानाया अपि भावनाया युक्त्या वाच्यत्वं निरस्यते, किं त्वप्रतीयमानत्वादेव। स्वपक्षानुरागेण त्वप्रतीयमानायामपि प्रतीत्यारोपवादिनं प्रति युक्त्युपन्यास इत्याशयः। यतो लिङादयः धावतो वा न भावनां प्रतिपादयन्ति। न भावनाप्रतिपत्ति जनयन्ति। न तेभ्यो भावनाप्रतिपत्तिजायते। अतः शब्दजनितप्रतीतिरहितमेवेदमारोप्यत इत्यर्थः।

ननु लिङादीनां धात्वन्तरार्थवाचित्वायोगेऽपि करोतिभावयतिभ्यां विवरणदर्शनात्तत्पर्यायत्वावगतेस्तदर्थवाचिता युक्तेत्याशङ्क्याह—**किं चेति**। पिकादिशब्दान्तरस्य योऽर्थः कोकिलादिपर्यायैर्व्याख्यायते, तस्मिन्नर्थे न स पर्यायः। तेन शब्दान्तरेण सह

प्रयुज्यते, किं तु केवलः। ततश्च पर्यायत्वस्य सहाप्रयोज्यत्वेन व्याप्तेः, आख्याते करोतिभावयतिभ्यां सहाप्रयोज्यत्वव्यावृत्त्या तत्पर्यायत्वव्यावृत्तिरित्याशयः। श्लोकं व्याचष्टे—**तद्यथेति**। ननु करोतिभावयतिमात्रेणाख्यातार्थकथनसिद्धावपि केवलधातुप्रयोगायोगात्, तदनुग्रहार्थं प्रत्ययः प्रयुज्यमानो न दोषमावहतीत्याशङ्क्याह—**न हीति**। प्रत्ययसहितकरोतिभावयतिप्रयोगे सति या करोतिना, भावयतिना वा यजत्यादिपदप्रत्याय्या क्रिया व्याख्यायते, सा यथा धात्वर्थस्य यागेनेति पृथगुपादानात्, तद्वाच्या न सम्भवति। तथा पर्याययोः सहप्रयोगायोगेनाख्यातवाच्यत्वस्याप्यसम्भवो वा, विशेषाद्व्याख्यान्यथानुपपत्त्या चैकेनांशेन वाच्येत्यवगतावपि किं यजत्यादिधात्वंशेन प्रत्याय्य, आख्यातांशेन वेति विवेकज्ञानान्नार्थकथनं सिद्ध्येदिति भावः।

नन्वेवं सति प्रत्ययो न प्रयुज्यतामित्याशङ्क्याह—**अत्र त्विति**। केवलधातुप्रयोगादवश्यं प्रत्ययः प्रयोज्य इति भावः। करोतिभावयतिपरप्रत्ययप्रयोगे च सति तेनैव यजिपरप्रत्ययार्थोपादानात्करोतिभावयत्योस्तदर्थकथनार्थत्वानुपपत्तेरानर्थक्यं स्यादित्याह—**अतश्चेति**। अधिकस्यावापः प्रक्षेपोऽस्यास्तीति बहुव्रीह्यर्थः।

नन्वधिकावापोऽपि विश्वजिदादिवाक्ये स्वर्गकामादिपदावापवन्न दोषमावहतीत्याशङ्कानिरासं सूचयन्नुपसंहरति—**तस्मादिति**। आनर्थक्येन वेदाननुमतत्वान्नास्य तत्तुल्यतेत्याशयः। आख्यातस्य भावनावाचित्वं तावदुपपादयति—**अत्रेति**। किं करोति? पचतीति करोतिसामानाधिकरण्येनाख्यातप्रत्यये करोत्यर्थो वाच्योऽवगम्यत इत्युक्ते भवत्यादिपराख्यातप्रत्यये करोत्यर्थसामानाधिकरण्याभावात्करोत्यर्थवाचित्वं न सिद्ध्यतीत्याशङ्क्य—**सिद्धेत्युक्तम्**। आक्षेपवाद्यसिद्धमपि आख्यातप्रत्ययस्य क्रियावाचित्वं स्वसिद्धान्तसिक्तमङ्गीकृत्य नाख्यातमात्रस्य करोत्यर्थवाचित्वं ब्रूमः? किं तु करोतिसामानाधिकरण्यवतामेवाख्यातानामिति ख्यापनाय सिद्धकर्तृक्रियावाचित्वमुपलक्षणं कृतम्।

यद्वा ये धात्वर्थस्य स्वरूपेण धातुनाभिहितस्यापि निष्पाद्यत्वलक्षणक्रियारूपेण प्रमा प्रत्ययवाच्यत्वमङ्गीकृत्य मीमांसकाभिमतधात्वर्थातिरिक्तभाव्यनिष्ठभावनावाचित्वं प्रत्ययस्य नेच्छन्ति, तान्प्रति भावनावाचित्वं साधयितुं करोत्यर्थवाचिताऽनेन साध्यत इत्यदोषः।

नन्वसिद्धकर्तृविषयेष्वस्त्यादिपरेष्वाख्यातेषु करोतिसामानाधिकरण्याभावेन करोत्यर्थक्रियावाचित्वाभावात्तद्व्यावृत्त्यर्थं सिद्धविशेषणं व्यर्थमित्याशङ्क्य, भाव्यनिष्ठभावनारूपकरोतिवाच्यक्रियावाचित्वाभावेऽपि कर्त्रात्मलाभाख्यक्रियावाचीन्याख्यातानि विविनक्ति—**इहेति**। भवतेर्जन्माख्याद्यभावविकारवाचित्वात्, ततः परा तिङ्विभक्तिर्जायमानस्य कर्त्तुर्जन्मोत्पत्त्याद्यपरपर्यायात्मलाभमात्ररूपं व्यापारं प्रतिपादयति। अस्तिविद्यत्योस्तु द्वितीयभावविकारवाचित्वात्, ततः परां सत्तां प्रतिपद्यमानस्य कर्त्तुः

स्वसत्ताख्यात्मलाभमात्ररूपमित्यर्थः। अन्यात्मलाभविषयस्यैव व्यापारस्य करोत्यर्थत्वात्, तस्य चास्त्यादिपरया विभक्त्याऽनभिधानात्करोत्यर्थक्रियावाचित्वाभावेऽप्यात्मलाभस्यानिष्पन्नरूपत्वेन व्यापारशब्दवाच्यत्वाद्व्यापारस्य क्रियात्वप्रसिद्धेर्व्यापाराख्यक्रियावाचित्वस्य सर्वाख्यातेषु भावादर्थवद्विशेषणमित्यर्थः।

ननु द्रव्यव्यतिरेकेण व्यापारस्यानुपलब्धेरभावान्न वाच्यत्वं सम्भवतीत्याशङ्क्याह—**द्रव्यमेव चेति**। जातिगुणवत्क्रियाया अपि द्रव्यादत्यन्तव्यतिरेकाभावान्न व्यतिरेकानुलम्भमात्रेणाभावो भवतीति सूचयितुम्—**द्रव्यमेवेत्युक्तम्**। ननु द्रव्यस्य व्यापारशब्दवाच्यत्वे सर्वदा घटो भवति, देवदत्तः पचतीति प्रयोगः स्यादित्याशङ्क्य प्रचलितमपगतमात्मनस्तत्त्वमौदासीन्यस्वरूपं यस्येति द्रव्यगतस्यावस्थाविशेषस्य व्यापारशब्दवाच्यत्वं सूचितम्। नन्वेवं सति यौवनाद्यवस्थाविशेषस्यापि व्यापारत्वं स्यादित्याशङ्क्य, विप्रकीर्णो विक्षिप्तोऽनेकत्र व्यासक्तत्वादेकत्रानुपसंहृतः स्व आत्मीयो भावो धर्मो यस्येति अवस्थान्तरव्यावृत्त्यर्थं व्यापारावस्थाया विप्रकीर्णत्वं विशेषणम्। नन्वेवं सत्यवयविरूपस्याप्यनेकावयवव्यासक्तत्वेनैकत्रानुपसंहृतत्वाद्व्यापरत्वं स्यादित्याशङ्क्य, तद्व्यावृत्त्यर्थं क्रियावयवानां क्षणिकत्वेनानेकक्षणव्यासक्तत्वाभावेऽपि।

'यदा त्वाद्यपरिस्पन्दात्प्रभृत्या फललाभतः।
क्रिया पूर्वापरीभूता लक्ष्यते वर्त्तते तदा॥'

अनेकफलसाधनानेकक्रियावयवसमूहस्यैव क्रियात्वाभिधानात् तस्याः पूर्वापरानेकक्षणव्यासक्तत्वरूपं पूर्वापरीभूतत्वं विशेषणम्। अवयविनस्त्वनेकावयवव्यासक्तत्वेऽपि युगपद् बुद्धेर्नानेकक्षणव्यासक्ततास्तीति भावः।

नन्वेवं सत्यनेकक्षणवर्त्तित्वेन क्रियाया द्रव्यतुल्यत्वात्कथं द्रव्याद्भेदाध्यवसाय इत्याशङ्क्य, पूर्वौदासीन्यावस्थातः प्रच्युतं परमौदासान्यावस्थामप्राप्तमिति पूर्वापरावस्थयोरनुवृत्तान् द्रव्याद्व्यावृत्तरूपाभिधानेन भेदो दर्शितः। नन्वस्तु नाम द्रव्यस्यैवंविधावस्थाविशेषः, तस्य तु व्यापारशब्दवाच्यत्वे किं निमित्तमित्याशङ्क्य, फलोत्पादानुकूलत्वस्य निमित्तत्वसूचनार्थम्—**विशिष्टेत्युक्तम्**।

यद्वा ननु घटो भवतीत्यादौ घटस्य वा कर्तृत्वं विवक्षितम्, मृत्पिण्डस्य वा। तच्च घटस्यासिद्धसत्ताकत्वेन व्यापाराश्रयत्वायोगात्, मृत्पिण्डस्य च सिद्धत्वेन कर्त्रात्मलाभाख्यव्यापाराश्रयत्वायोगान्नोभयथापि सम्भवतीत्याशङ्क्य दमुक्तम्। घटोत्पत्तेः प्रागपि घटविषयायाः मृत्पिण्डाश्रितायाः शक्तेः कार्यकारणनियमान्यथानुपपत्तिकल्पितायाः सद्भावात्, स्वरूपेण चाविद्यमानस्यापि शक्तिसद्भावमात्रेणातीतानागतज्ञानादौ कारकत्वदर्शनात्कर्तृत्वोपपत्तेः। समवायिकारणाच्च कार्यस्यात्यन्तभेदाभावान्मृत्पिण्डात्मना व्यापाराश्रयत्वोपपत्तेः, घटात्मना चासिद्धत्वोपपत्तेरुभयथाप्यविरोध इत्याशयः।

नन्वस्य सिद्धासिद्धकर्त्राश्रितत्वे तस्यैव करोत्यर्थत्वात्, अस्त्यादावपि करोतिसामानाधिकरण्यापत्तिः सिद्धकर्तृमात्राश्रितत्वे त्वस्त्यादिपराया विभक्तेर्व्यापारप्रतिपादकत्वाभिधानम्, न युज्येतेत्याशङ्क्यासिद्धकर्त्राश्रितस्य व्यापारस्य करोत्यर्थत्वाभावं दर्शयितुमाश्रयं तावद्विविनक्ति—**तत्रेति**। अन्योत्पादानुकूलस्यैव व्यापारस्य कर्त्ता करोतीति व्यपदिश्यते। अस्त्या पराख्यातप्रयोगे च कर्त्तुरेवात्मलाभाख्यव्यापारावस्थात्वप्रतीतेरन्यात्मलाभफलकव्यापारायोगान्न करोतिव्यपदेशता युक्तेत्याशयः। एवं शब्दात्प्रकृतव्यापारमात्रपरामर्शावगमेऽपि सिद्धे कर्त्तर्यन्यस्यैवमवस्थात्वाभिधानेन तस्यासिद्धकर्त्तृविषयत्वावसायात्, तस्य चात्मलाभातिरिक्तव्यापाराभावात्तत्परत्वव्याख्यानमसिद्धे कर्त्तरि तस्यैव व्यापारत्वं प्रतीयते। सिद्धे त्वन्योऽपीत्यपिशब्दाध्याहारेण व्याख्याने व्यापारमात्रपरामर्शेऽप्यदोषः। अन्यस्यात्मलाभाख्यं व्यापारं प्रति कर्तृत्वेऽपि सिद्धकर्त्तृत्वस्य करोतिप्रयोगविषयत्वात् तत्र चासिद्धस्य कर्तृत्वाप्रतीतेः कर्त्तुरन्यत्वमविरुद्धम्। ततश्चासिद्धे कर्त्तर्यन्यात्मलाभफलाभावेन तद्व्यापारस्य करोत्यर्थत्वायोगात् सिद्धकर्त्तुर्व्यापारस्य त्वन्यात्मलाभफलत्वात्करोत्यर्थत्वोपपत्तेर्व्यवस्था युक्तेत्याह—**तदिति**। तस्मादित्यर्थे तदित्यव्ययम्। सिद्धकर्त्राश्रितस्यैव व्यापारस्य करोतिवाच्यत्वं, नासिकर्त्राश्रितस्येत्येतदेव करोतिसामानाधिकरण्यव्यवस्थयोपपादयति—**तथा चेति**। नन्वाख्यातकरोत्योर्द्वयोरप्याकृत्यधिकरणन्यायेन सामान्यवाचित्वात्पर्यायत्वापत्तेः सामानाधिकरण्यं न युक्तमित्याशङ्क्य—**सामान्येत्युक्तम्**। सामान्यवाचिनोऽप्याख्यातस्य प्रकृत्यर्थोपधानेन विशेषपरत्वात्को राजा यातीति शुद्धसामान्यवाचिनो राजशब्दस्येव पाञ्चालराजशब्देन पाञ्चालविशेषोपहितराजसामान्यवाचिना सामानाधिकरण्यं युक्तमित्याशयः।

यथाहुः मण्डनमिश्राः—भेदोपहितसामान्यवचनेऽप्यपृथक्श्रुतिरिति।

श्लोकार्थमुपसंहरति—**तस्मादिति**।

ननु लब्धात्मककर्त्तृव्यापारवाचिनामाख्यातानां करोतिसामानाधिकरण्यात्करोत्यर्थत्वेऽपि भावयत्यर्थभावनावाचित्वं कथमित्याशङ्क्य, भावनावाचित्वोपपादनार्थं करोतिभावयत्योस्तुल्यार्थत्वमुपपादयितुं भावयतिवत् करोतेरपि भवत्यर्थककर्तृकर्मनिष्ठत्वं दर्शयन्कर्मनिष्ठतामेव तावदाह—**तत्र चेति**। उपसर्जनत्वेनाप्यनन्तरनिर्दिष्टस्य करोत्यर्थस्य योग्यतया तत्शब्देन परामर्शात्तत्र करोत्यर्थ इत्यर्थः। एतदेव प्रश्नपूर्वकमुपपादयति—**कुत इति**। ननु कर्मनिष्ठत्वेऽपि ग्रामं गच्छतीतिवद्भवत्यर्थकर्मकर्तृनिष्ठत्वाभावात्कथं भावयतिना तुल्यार्थतेत्याशङ्क्य, करोत्यर्थं प्रति भवत्यर्थकर्त्तुरेव कर्मतेत्याह—**भवत्यर्थस्येति**। करोतेरर्थस्येत्यर्थव्यतिरेकजनिता षष्ठी। यजतिस्त्वित्यादिवद्धात्वर्थपरो वायं धातुनिर्देशः। श्लोकपूर्वार्द्धं व्याचष्टे—**करोतेरिति**। उत्तरार्द्धं व्याख्यातुं कर्मणः प्रधानक्रियातिरिक्तावान्तरक्रियाकर्तृत्वापेक्षां तावदाह—**सर्वेति**। नन्ववान्तरक्रियापेक्षायामपि भवनक्रियापेक्षायाः प्रधानक्रियान्तरेष्वदर्शनात्कथमत्र तदपेक्षेत्याशङ्क्याह—**प्रतिक्रियं चेति**। अन्वयव्यतिरेकौ दर्शयति—**तथा हीति**। व्यतिरेकाभिधानसूचितान्वय-

दर्शनपूर्वकं श्लोकं व्याचष्टे—**य एवेति**। स्वयं विशीर्णे बीजे अङ्कुरस्य प्रवृत्त्योत्पत्त्याख्य-भवनस्य जलावसेकारोपणादिनोत्पादनाख्यप्रयुक्तिदर्शनात्प्रवृत्तभवनः प्रयुज्यत इत्युक्तम्। ननु प्रवृत्त्यर्थत्वात्प्रयुक्तेः प्रवृत्तस्यानर्थक्यापत्तेः प्रयुक्तिरयुक्तेत्याशङ्क्य—**संभावितभवनो वेत्युक्तम्**। मृदादाविव घटादिस्सर्वः सम्भावितभवन एव प्रयुज्यते। स्वयं विशीर्णबीजाङ्कुरस्यापि वृक्षादिकरूपेणाप्रवृत्तोत्पत्तेरेव जलावसेकादिनोत्पादनादित्याशयः।

ननु सिद्धस्यापि पाकादेः करोत्यर्थकर्मत्वदर्शनाद्व्यतिरेको व्यभिचरतीत्याशङ्क्याह—**यत्र पीति**। ननूत्पूर्वस्य करोतेरुपकारप्रयुक्तहिंसात्मकसूचनाख्ये गन्धने, अपपूर्वस्य च भर्त्सनाख्येऽवक्षेपणे, प्रपूर्वस्य चानुवृत्त्याख्यसेवने, प्रकर्षकथनाख्यप्रकथने, धर्माद्यर्थविनियोगाख्योपयोगे, उपपूर्वस्य साहसिककर्माख्यसाहसिक्ये, उपपूर्वस्य सतो गुणान्तराधानाख्ये प्रतियत्ने, प्रयोगाद् गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञ (पा. धा. पा.) इतिस्मृतेश्चानेकार्थत्वेनोत्पादनार्थत्वनियमाभावात्कथमुत्पत्त्याख्यभवनकर्तृकर्मनिष्ठत्वनियम इत्याशङ्क्याह—**सत्यपि चेति**।

नियमाभावेऽपि यदोत्पादनार्थत्वम्, तदोत्पाद्यमानकर्मनिष्ठत्वं भविष्यतीत्याह—**अथ वेति**। करोत्यर्थकर्मणो भवनक्रियापेक्षामुपपादितामुपसंहरति—**तेनेति**। लब्धायां च भवनक्रियायां तत्कर्तृकर्मनिष्ठत्वं करोत्यर्थस्य सिद्धं भवतीति, तावच्छब्देन सूचितम्।

नन्वेवं करोतेर्भावयतिवद्भवत्यर्थकर्तृकर्मनिष्ठत्वेऽपि णिजन्तत्वाभावेन प्रयोजकव्यापारवाचित्वायोगात्कथं भावयतिना तुल्यार्थतेत्याशङ्क्याह—**ततश्चेति**। करोत्यर्थस्य भावयत्यर्थत्वोपपादनाय प्रयोजकव्यापारत्वप्रतिपादनार्थं तत्कर्तुः प्रयोजकत्वाभिधानम्। प्रयोज्यं विना प्रयोजकत्वायोगात्तत्सिद्ध्यर्थं प्रयोजकत्वाभिधानम्। ननु णिच्प्रत्ययरहितस्य धातोः प्रयोजकव्यापारवाचित्वे करोतिवद्भवतेरपि तद्वाचित्वापत्तेर्भावयतीति णिच्प्रत्ययोऽनर्थकः स्यात्। प्रयोज्यव्यापारवाचित्वे वा भवतिवत्करोतेरपि तद्वाचित्वापत्तेः प्रयोजकव्यापारवाचित्वं न स्यादित्याशङ्क्याह—**भवतीति**। णिच्प्रत्ययरहितत्वाविशेषेऽपि यथा विक्लिदेः प्रयोज्यतण्डुलव्यापारवाचित्वम्, पचतेस्तु प्रयोजकदेवदत्तव्यापारवाचित्वं वृद्धव्यवहारान्नियतम्, तथा तयोरपीत्यर्थः। ननु प्रयोज्यप्रयोजकव्यापारयोः परस्परापेक्षत्वात्कथमनयोः प्रयोज्यप्रयोजकव्यापारमात्रवाचितेत्याशङ्क्याह—**तत्र चेति**। प्रयोज्यव्यापारानपेक्षप्रयोजकव्यापारयोगादेवकारोक्तात्तन्मात्रे विवक्षा न युक्तेत्याशङ्क्य, प्रयोज्यव्यापारस्यान्यतोऽवगतिसिद्धेः पारिशेष्यात्प्रयोजकव्यापारमात्रविवक्षोपपन्नेति। केवलमित्यनेन तु पारिशेष्यवाचिना क्रियाविशेषणेनोक्ते कथं प्रयोज्यव्यापारस्याभिधाने विनावगतिरित्यपेक्षायां घटमिति द्वितीययाभिहितया कर्माख्यया शक्त्याऽऽक्षिप्तः प्रयोज्यस्य घटस्य भवनाख्यो व्यापारो यस्मिन्नित्युक्तम्। कथं वा कर्मणः प्रयोज्यव्यापाराक्षेप इत्याशङ्क्य—**कर्मणः शक्त्येत्युक्तम्**। निर्व्यापारस्य कर्मत्वायोगात्तद्बलेनाक्षेप इति भावः। करोतिमात्रप्रयोगे कथमाक्षेप इत्याशङ्क्य—**स्वयमाक्षिप्तप्रयोज्यव्यापारेत्युक्तम्**। घटो भवतीत्यत्र प्रथमाया अप्यभिहितकारकविभक्तित्वाभ्युपगमात्प्रथमाभिहितकर्तृशक्त्या-

क्षिप्तः प्रयोजकव्यापारो यस्मिन्, स्वयं वाऽऽक्षिप्तः प्रयोजकव्यापारो येनेति बहुव्रीहि-विग्रहेण व्याख्येयम्। पचतिविक्लिद्यतीतिदृष्टान्तार्थौ। उभयोस्तु व्यापारयोर्भिन्नपदो-पात्तयोः समुच्चयेन विवक्षायां करोतिभवत्योः समुच्चित्य प्रयोग इत्याह—**कदा चिदिति।** ननु करोतेः प्रयोजकव्यापारवाचित्वे, तदाक्षिप्तस्यापि भवनाख्यस्य प्रयोज्यस्य व्यापार-स्याशब्दत्वेन प्राधान्यानुपपत्तेः क्रियते घट इति प्रयोज्यवाचिना घटशब्देन सामानाधि-करण्यं न स्यादित्याशङ्क्याह—**कदा चिदिति।** तिङा घटस्य कर्मत्वोक्तेः, कर्मणश्च वस्तुतः प्राधान्यात् सव्यापारस्यैव च कर्मत्वात्, आक्षिप्तस्यापि प्रयोज्यव्यापारस्योप-सर्जनीभूतः प्रयोजकव्यापारो यस्य स विवक्ष्यत इत्युत्तरग्रन्थगतविवक्ष्यत इति पदानु-षङ्गेण व्याख्येयम्।

ननु प्रयोज्यव्यापारस्य प्राधान्यविवक्षायां करोतिप्रयोगोपपत्तावुपसर्जनत्वविवक्षायां सुतरामुपपत्तेर्न कदा चिद्भावयतिः प्रयुज्येतेत्याशङ्क्याह—**कदा चित्पुनरिति।** सामानस्य पदस्यैकदेशेनोपात्ता प्रयोज्यक्रियोपसर्जनीभूतायस्येति विग्रहः। तदा च समानपदैक-देशोपात्तत्वविवक्षायां करोतेरेवाशक्तत्वेन, भवतेरपि प्रयोज्यक्रियामात्रपर्यवसायित्वेन प्रयोजकव्यापारविवक्षायां णिच्प्रत्ययं विना प्रवृत्त्यशक्तेः, सोऽप्यधिकः प्रयुज्यत इत्यर्थः।

क्रियाया धातुवाच्यत्वप्रसिद्धेर्णिचश्च केवलस्य धातुत्वाभावान्न क्रियावाचितास्तीति ये वदन्ति। तन्मते न द्योतकत्वोक्तिः। स्वमते तु भूविक्लिद्योः प्रयोजकक्रियावाचित्वे केवलप्रयोज्यक्रियानिष्ठत्वोक्तिविरोधापत्तेर्णिच एव तद्वाचकत्वम्। प्रयोज्यक्रियावाचिना णिचा विना प्रयोजकक्रियायामशक्तिं वृद्धवचनेन द्रढयति—**तथा चाहेति।** प्रयोज्यकर्तृ-काणां भवनादीनां व्यापाराणां प्रतिपादका ये भूवादयो धातवः, तेषां प्रयोज्यानां घटादीनां,, ये प्रयोजकाः कुलालादयः तेषां व्यापारेषु ण्यन्ता एव प्रयुज्यन्तइत्यर्थः। भवनादीनामन्योत्पादानुकूलत्वाभावेनाव्यापारत्वमाशङ्क्य—**एकान्तेत्युक्तम्।** अन्योत्पा-दानुकूलत्वाभावेऽप्यनिष्पन्नरूपत्वादेकान्तेन व्यापारतास्तीत्याशयः। ननु भवत्यादीनां णिचं विना प्रयोजकक्रियाभिधानाशक्तौ करोत्यादीनामप्यशक्तिप्रसङ्गात्, तेषां वा शक्तावन्येषामपि शक्तिप्रसङ्गाद्व्यवस्था न युक्तेत्याशङ्क्याह—**न चेति।** शक्तीनां स्वभावत्वेनापर्यनुयोज्यत्वात्प्रकृतयः प्रत्ययास्तत्समुदायात्मकानि चादिशब्दोक्तानि पदानि नानारूपानर्थान्विदन्तीत्यर्थः। अतो भवत्यर्थकर्तृकर्मनिष्ठप्रयोजकव्यापारवाचित्वेन करोतिभावयत्योस्तुल्यार्थत्वात्सिद्धकर्तृक्रियावाचिषु चाख्यातेषु करोतिसामानाधिकर-ण्येन करोत्यर्थस्य वाच्यत्वावगमात्, तद्द्वारा, भावयत्यर्थस्यापि वाच्यत्वासिद्धेः यज्या-द्यर्थश्चातोऽवगम्यते भावयेदिति चेदित्यादिभाष्यं युक्तमेवेत्याह—**एवमिति।**

ननु भावनायाः प्रत्ययवाच्यत्वेऽपि धात्वर्थस्यैव निष्पाद्यत्वलक्षणक्रियारूपेण प्रत्ययेनाभिधानाद्भावनात्वोपपत्तेरन्योत्पादानुकूलत्वेऽपि वा भावनालक्षणे धात्वर्थस्यैव धातुना व्यापारात्मनोपादीयमानस्य प्रत्ययावगतानुष्ठेयत्वान्यथानुपपत्त्या फलोत्पादा-नुकूलतयावगमाद्भावनात्वोपपत्तेर्भावयेद्यागेनेति क्रियाकरणतया भेदेन निर्देशो न युक्त

इत्याशङ्क्य भवनक्रियाकर्तृकर्मनिष्ठप्रयोजकव्यापारत्वं धात्वर्थव्यावर्त्तकं लक्षणमाह—**तेनेति**। येन कारणेन करोतिभावयत्योरुक्तप्रकारेण तुल्यार्थत्वम्, तेन कारणेनेत्यर्थः।

यत्त्वाक्षेप्त्रा विधिमात्राभिधायित्वाल्लिङादीनां भावनाभिधायित्वं न सम्भवतीत्युक्तम् तदनुभाषणपूर्वकं निराकरोति—**यत्तूक्तमिति**। **अयमाशयः**। किं विधिमात्रशब्देन भावयतिधातुवाच्यत्वं भावनायाः प्रत्ययानभिधेयत्वे करणमभिप्रेतम्, विधिव्यतिरिक्तभावनाभावो वा। तत्र विधेरपि भावयतिधातुवाच्यत्वेन लिङाद्यवाच्यत्वापत्तेर्नाद्यः कल्प इत्यभिधाभावनाशब्देन सूचितम्। प्रयोजकव्यापारवाचित्वात् भावनाशब्दस्य विधेरपि प्रयोजकलिङादिव्यापारत्वात् भावनात्वमस्तीत्याशयः।

ननु विधेर्लिङादिवाच्यताभ्युपगमात्तदुच्चारणात्प्रागसिद्धत्वे सति अगृहीतसम्बन्धत्वेन वाच्यत्वायोगात् लिङाद्युच्चारणात्प्रागेव सिद्धेस्तत्परत्वं न युक्तमित्याशङ्क्य, शब्दश्रवणान्तरभाविप्रवृत्तिहेतुप्रेषणाध्येषणादव्यापारानुवृत्तप्रवर्त्तनासामान्याभिधानेन तद्विशेषापेक्षायामपौरुषेये वेदे पुरुषधर्मस्य प्रेषणादेरसम्भवात्तद्व्यतिरिक्तविध्याख्यस्य विशेषस्य पारिशेष्याल्लक्षणया गम्यमानस्य सम्बन्धग्रहणानपेक्षत्वेन प्राक् सिद्ध्यनपेक्षणादविरुद्धा शब्दव्यापारतेति सूचनायाभिधाशब्दः। कर्तृव्युत्पत्त्या, करणव्युत्पत्त्या वाऽभिधाशब्दस्य शब्दपरत्वमङ्गीकृत्य, अभिधायाः शब्दस्यात्मनो भावना व्यापारं प्रवर्त्तनासामान्यव्यक्तिभूतं लिङ्गादयः प्रवर्त्तनासामान्यमभिदधानां निर्विशेषसामान्यायोगात्प्रैषादौ च लोकदृष्टस्य विशेषस्य पुरुषधर्मत्वेनापौरुषेये वेदेऽसम्भवात्प्रवर्त्तनासामान्यस्य च प्रैषादिप्रवर्त्तकव्यापारवर्त्तित्वदर्शनाल्लिङादेरेव च वेदाप्रवर्त्तकत्वावधारणाल्लक्षणया गमयन्तीत्यर्थः।

अन्यामित्यपरत्ववाचिनाऽन्यशब्देन शब्दभावनायाः पाश्चात्यमभिदधतार्थभावनाविषयत्वेन तदपेक्षत्वसूचनाद्विध्यभिधायित्वं नार्थभावनाभिधायित्वस्य बाधकम्, प्रत्युत साधकमिति सूचितम्। न च विधिव्यतिरिक्तभावनापह्नवार्थो विधिमात्रशब्दार्थो युज्यते, विध्यभावेऽपि सर्वाख्यातेषु दर्शनेनाऽपह्नोतुमशक्यत्वादिति द्वितीयकल्पनिरासायोत्तरार्धं विधेयायाः भावनायाः पुरुषार्थरूपभाव्यनिष्ठत्वसूचनायेच्छायोनित्वं सूचयितुम्, इच्छार्थादर्थयतेर्णिजन्तादर्थयइति कर्तृविवक्षायामेरजित्यच्प्रत्ययोत्पादनेनार्थिनः पुरुषस्यार्थशब्देनाभिधानाद्भावनायाश्च पुरुषधर्मत्वाद्धर्मधर्मिणोश्चात्यन्तभेदाभावात्तादात्म्यं विवक्षितवऽर्थात्मा चासौ भावना चेति विग्रहः कार्यः। अन्यामित्यर्थभावनापेक्षित्वं शब्दभावनायाः सूचितमुपपादयति—**यदा हीति**। पुरुषव्यापाररूपेत्यनेनार्थशब्दस्यार्थयतइति व्युत्पत्त्यार्थिपुरुषपरतया व्याख्यानं सूचितम्। विध्यादीनां भावनाव्यक्तित्वाभावेऽपि विषयत्वेनावच्छेदकत्वात् विशेषतोक्ता। लिङ्गादिषु शब्दविशेषेषु अनुवृत्तं यत्सामान्यमाख्यातत्वं नाम, तद्व्यतिरिक्तैर्लिङादिशब्दविशेषैर्वाच्या इत्याख्यातत्वेति त्वप्रत्ययाध्याहारेण व्याख्येयम्। व्यक्तीनां सामान्यादत्यन्तव्यतिरेकाभावेऽपि आख्यातरूपवाच्यर्थभावनाव्यतिरिक्तविध्याद्यर्थान्तरवाचित्वोपपादनार्थं कथं चिद्व्यतिरेकविव-

क्षया व्यतिरेकशब्दः। लिङ्लोट्तव्यपञ्चमलकाराणां विधिर्वाच्यः तेषामेव नञ्युक्तानां निषेधः। लङ्लुङ्लिटां भूतकालः, लृट्लुटोर्भविष्यत्कालः, लटो वर्त्तमानकालः, आदिशब्दोपात्ता क्रियातिपत्तिर्लृङ्वाच्या। आशीरादीनामपि लिङादिशब्दवाच्यानामादिशब्देनोपादानम्। एतदेवोदाहरणैरुपपादयितुम्—**तथा चेत्युक्तम्**। ननु विध्यादेरर्थभावनापेक्षित्वेऽप्यभिधाभावनायाः किमायातम्? का वाभिधाभावनाकथं चास्याः सापेक्षतेत्याशङ्क्य—**तत्रेत्युक्तम्**। विधेरेवाभिधाख्यशब्दधर्मभावनात्वात्, तस्याश्च प्रयोजकशब्दव्यापारत्वेन प्रयोज्यपुरुषव्यापारात्मकार्थभावनाविषयत्वात्तदपेक्षितेत्याशयः। शब्दव्यतिरेकेण व्यापारस्यानुपलम्भेनाभावमाशङ्क्यात्यन्तभेदाभावेनानुपलम्भोपपादनायाभिधात्मिकेत्युक्तम्। ननु भावनायाः सर्वत्रांशत्रयोपेतत्वाद्विधेश्चांशत्रयानिरूपणान्न भावनात्वमस्तीत्याशङ्क्याह—**विशेषतश्चेति**। पुरुषप्रवृत्तिविधिज्ञानप्ररोचनाख्यसाध्यसाधनेतिकर्त्तव्यताविशिष्टरूपेण वर्णितेत्यर्थः।

यच्च करोतिभावयत्योः प्रत्ययेन सह प्रयोगात्सहाप्रयोज्यत्वलक्षणपर्यायस्थित्यतिलङ्घनेनापर्यायत्वमुक्तम्। तदप्यनुभाषणपूर्वकं त्रेधा परिहरति—**यत्त्विति**। पर्यायाणां सहाप्रयोज्यत्वस्यानर्थक्यापत्तिप्रयुक्तत्वात् पर्यायत्वस्वरूपस्याप्रयोजकत्वेन स्वरूपप्रयुक्तसाहित्यलक्षणव्याप्त्यभावात् इह च प्रकृत्यनुग्रहादिप्रयोजनत्रयसद्भावेनाऽनर्थक्यापत्त्यभावान्न सहाप्रयोज्यत्वनिवृत्त्या पर्यायत्वनिवृत्तिरित्याशयः। प्रकृत्यनुग्रहार्थत्वमुपपादयति—**यदि हीति**। ननु तृजादिप्रयोगेणापि प्रकृत्यनुग्रहसिद्धेराख्यातनियमोऽनर्थकः स्यादित्याशङ्क्याह—**तेनेति**। येन प्रत्ययं विनापभ्रंशत्वप्रसङ्गः **तेनावश्यं कस्मिंश्चित्प्रत्यये** प्रयोज्ये तृजादिप्रयोगे कर्त्राद्यर्थान्तरापपत्तेः तस्य च विवक्षितार्थाभ्यधिकत्वेनऽवाच्यत्वात्प्रकृत्यर्थानुवाद्याख्यातमेव नियम्यत इत्यर्थः।

नन्वधिकार्थापत्तिभयात् कर्त्ता भावयितेत्यादिकर्त्रादिवाचितृजादिप्रयोगायोगेऽपि, इकः श्तिपोवाभ्यधिकार्थानापादकत्वेन प्रयोगोपपत्तेः क्रिभाविः, करोतिर्भावयतिरिति वा कस्मान्न प्रयुज्यत इत्याशङ्कते—**ननु चेति**। तयोरधिकार्थत्वाभावेऽपि तद्युक्तयोः करोतिभावयत्योः स्वरूपवाचित्वेऽख्यातार्थवाचित्वहानापत्तेर्न युक्तः प्रयोग इति परिहरति—**नैतदिति**। नन्वर्थेऽपीङन्तस्य, श्तिबन्तस्य वा धातोः प्रयोगान्नार्थवाचित्वहानिरित्याशङ्क्याह—**यत्त्विति**। एतदेवोपसंहरति—**तस्मादिति**। कर्तृसंख्यादिसङ्ग्रहार्थत्वं विवृणोति—**यदि चेति**। पूर्वस्मिन्परिहारे सर्वप्रत्ययार्थाविवक्षापत्तेः परिहारान्तरमुक्तम्, भावनांशानुवादस्त्विहापि तुल्य इत्याह—**यस्त्विति**। ननु भावनायाः प्राधान्येनाख्यातार्थत्वाद गुणभूतकर्तृसंख्यादिसंग्रहायाऽनुवाद्यत्वानुपपत्तेः प्रकृत्यनुग्रहाय धातुनिर्देशार्थस्यैव प्रत्ययस्य लक्षणयार्थपरत्वोपपत्तेः प्रयोगो युक्त इत्याशङ्क्याह—**अन्यथा हीति**। आख्यातार्थकथनाय भावनामात्रवाचिनि क्रिभाव्यादिशब्दैः प्रयुज्यमाने भावनामात्रस्याख्यातार्थत्वभ्रान्तिं करोतिभावयत्योर्वा सर्वाख्यातार्थवाचित्वभ्रान्तिं व्यावर्त्तयितुं कर्तृसंख्याद्याख्यातेनावश्यं वाच्यमित्यर्थः। रूपाविनाशसिद्ध्यर्थत्वमुप-

पादयति—**नित्यं चेति**। एतच्च ननु कारो भाव इत्यादि भावोत्पन्नकृत्प्रयोगेऽभ्यधिकार्थान्तरानापत्तेः शब्दपदार्थकत्वानापत्तेश्च नाख्यातनियमः सम्भवतीत्याशङ्क्य—**परिहारान्तरमुक्तम्**। श्लोकार्थमुपसंहरति—**तस्मादिति**।

एवं पर्यायित्वेऽपि प्रत्ययस्य प्रयोजनान्तरार्थत्वेन पौनरुक्त्याभावात्सह प्रयोगो—**न विरुध्यत इत्युक्तम्**। इदानीं भावनाया वस्तुतः प्रत्ययमात्रवाच्यत्वेऽपि प्रतीतिमात्रव्यवहारिणा लोकेन विवेक्तुमशक्यत्वादाख्यातपदेन धात्वर्थवत् भावनाप्युच्यत इत्येतावदवगम्य पचतीत्यस्य कोऽर्थः इति पृष्टे, धातुमात्रवाच्यत्वेन निश्चितं धात्वर्थं पाकमिति व्याख्याय, सम्मुग्धाख्यातपदवाच्यत्वेन भावनां ख्यापयितुं करोतौ भावयतौ वा प्रयुज्यमाने प्रकृत्यनुग्रहार्थं प्रत्ययमात्रस्य भावनावाचित्वाभावेनाऽपौनरुक्त्यं मत्वा प्रयोगो न विरुध्यतइत्याह—**किं चेति**। पर्यायत्वाभावादपि तिङ्प्रयोगाविरोध इत्येवम्। किंचशब्दव्याख्यानपूर्वकम्। श्लोकं व्याचष्टे—**यदि हीति**। लोकानवगतं विवेकं कुर्वतां परीक्षकाणां लोकविरोधपरिहारसूचनार्थं लोकस्य विवेकज्ञानप्रयोजनाभावाभिधानम्। ननु धातोः व्यभिचारित्वेनावाचकत्वनिश्चयात्प्रत्ययमात्रवाच्यत्वं विवेक्तुं शक्यमित्याशङ्कते—**स्यादेतदिति**। प्रत्ययस्यापि व्यभिचारस्तुल्य इति तावत्परिहरति—**सदिति**। प्रौढ्या भावनावाचित्वेनाऽभिमतस्य सिद्धकर्तृक्रियावाचिनो धातोरव्यभिचारं वक्तुमुपक्रमते—**न वेति**। प्राधान्याप्रतीतावपि स्वरूपमात्रप्रतीतिदर्शनायऽत्यन्तमित्युक्तम्। अस्तिः प्रतीतिलक्षणार्थः। तत्र कृद्विशेषाणां कृत्यानां प्रैषातिसर्गप्राप्तकालेषु कृत्याश्चे (पा० सू० अ० ३ पा० सू० ३.१६७) ति प्रैषवाचित्वस्मृतेः, अप्राप्तविषयस्य च प्रैषस्य विधेत्वाद्विधेश्च भावनाविषयत्वादप्रधानभूतायाश्चांशत्रयोपसंहारासामर्थ्येन विधातुमशक्यत्वादीषत्प्राधान्यमप्यस्तीति सूचयितुम्, पूर्वं कृत्येषु किंचिदपकृष्यमाणभावनारूपप्रतीतिं दर्शयति—**कृत्येषु तावदिति**। कृत्यमध्येऽपि भोक्तव्यमित्यादेर्भावोत्पन्नात्कृत्याद्दन्तव्य इत्यादिषु कर्मोत्पन्नेषु न्यूनतरागम्यत इत्याह—**तत्रापीति**। द्रव्यप्राधान्येन धात्वर्थस्यापि प्राधान्याभावद्भावनायाः सुतरां नास्तीति सूचितम्। कथं न्यूनतरत्वं चेत्यपेक्षायामाह—**न हीति**। भोजनं कर्त्तव्यमित्यत्र प्रयोजकव्यापारस्य धात्वर्थप्रधानत्वात्, दन्तव्य इत्यत्र च प्रयोज्यद्रव्यपरत्वान्न प्राधान्यमित्यर्थः। द्रव्यस्वरूपस्य तव्यवाच्यत्वाभावेन प्राधान्यायोगात् कर्मस्वरूपेण प्राधान्यं वक्तुं प्रयोज्यशब्दः। निर्व्यापारस्य प्रयोज्यत्वायोगात्कर्मशक्त्याक्षिप्तप्रयोज्यव्यापारविशिष्टतोक्ता।

नन्वेवं सति तिङ्क्षु भावनावाचित्वस्य भावनाप्राधान्यव्याप्तेः कृत्येषु भावनाप्राधान्यनिवृत्त्या तद्वाचितापि निवर्त्तत इत्याशङ्क्य, तिङ्क्ष्वपि सर्वेषु भावनाप्राधान्याभावाद्व्याप्त्यभावं सूचयितुमाह—**एतेनेति**। भावोत्पन्नाः, कर्मोत्पन्ना वा स्थानिनो लकारा येषां भुज्यते देवदत्तेन, भुज्यतेऽन्नमित्यादीनामादेशानां तिङन्तेऽप्यनेन भावकर्मोत्पन्नकृत्यव्याख्यानेन व्याख्याता इत्यर्थः। एतदेव विवृणोति—**तेष्वपीति**। अतो भावनावाचिनामपि सर्वेषां तिङन्तानां तत्प्राधान्यलक्षणतुल्यत्वाभावाद्भावनावाचित्वस्य

तत्प्राधान्येनाभ्यासेनं कृत्येषु भावनाप्राधान्यनिवृत्त्या तद्वाचित्वनिवृत्तिरित्युपसंहरति—**अत इति**। अव्ययसंज्ञकेषु कृत्सु कृत्यसंज्ञकेभ्योऽपीषत्न्यूनभावनाज्ञानमित्याह—**तथेति**। ननु तेषामपि भोक्तव्यमिति कृत्संज्ञककृद्वद्भावोत्पन्नत्वस्मरणाविशेषात्कथं कृत्यवाच्यभावनातोऽव्ययकृद्वाच्यया भावनायाः न्यूनतेत्याशङ्क्य—**अव्ययेरधुक्तम्**। स्मृत्युपन्यासेनाऽव्ययकृत्सु इति ज्ञातुं शक्यत्वान्न कण्ठेनोक्तम्। ईषन्न्यूनभावनाज्ञानस्य स्वसंवेद्यत्वमुदाहरणैर्दर्शयति—**अभिक्राममिति**। धातुसम्बन्धे प्रत्ययाः (३-४-१) इति धातुसम्बन्धाधिकारविहितानामपि णमुलादीनां धात्वर्थसम्बन्धं विना धातुसम्बन्धायोगात् धात्वर्थनिष्पादलक्षणभावनायाः सम्बन्धं च विना धात्वर्थसम्बन्धायोगाद्भावनासम्बन्धवाचित्वप्रतीतेः 'समानकर्तृकयोः पूर्वकाल (३-४-२१) इत्यनेन समानकर्तृकयोः धात्वर्थयोः पूर्वकाले धात्वर्थे वर्त्तमानाद्धातोः क्त्वाप्रत्ययं विधाय, 'आभिक्ष्ण्ये णमुल्चे-(३-४-२२) ति तस्मिन्नेवार्थे पौनःपुन्याख्याभीक्ष्णाधिक्ये णमुल्विधानादभिक्रमणं कृत्वा होमं करोतीति णमुल्श्रुत्यैव होमभावनासापेक्षाभिक्रमणभावनाश्रीयते। 'करणे हन (३-४-३७) इति च करणवाचिन्युपपदे हन्तेर्णमुल्प्रत्ययविधानादुपहननं कृत्वा होमं करोतीति हननभावना होमभावनासापेक्षावगम्यते। होमं कृत्वा भक्षणं करोतीति भक्षणभावनासापेक्षा होमभावना क्त्वाश्रुत्यैवावगम्यते। भावलक्षणे स्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन् (३-४-१६) इत्यनेन च तुमर्थइत्यनुवर्त्य, भावं च तुमर्थत्वेन विवक्षित्वा भावो लक्ष्यतेऽनेनेति च भावलक्षणशब्दार्थं विवक्षित्वा तिष्ठतेरिणः कृञोवदेश्चरेर्जुहोतेस्तमिर्जनेश्च धातोर्भावलक्षणार्थे भावे वर्त्तमानात्तोसुन् विधानात् 'पुरावाचः प्रवदितोदनूच्य इत्यत्र प्रवदितोरित्यव्ययतोसुन्श्रुत्यैव पुरेति दिक्शब्दयोगात् लुप्तपञ्चमीकतया वाक्प्रवादक्रियातः पुरा' प्रातरनुवाकानुवचनं कार्यमित्यनुवाचनभावनासापेक्षा प्रवादभावना गम्यते। अतो भावनान्तरसापेक्षत्वात्स्वसम्वेद्या न्यूनतेत्याशयः।

निष्ठासञ्ज्ञयोस्तु क्तक्तवत्योः कृतो न्यूनतरभावनाज्ञानं स्वसम्वेद्यमित्याह—**पक्व इति**। पक्व पक्ववानित्यत्रोदनः कृतपाको, देवदत्तः पाकं कृतवानिति निष्पन्नरूपायाः भावनायाः यथासंख्यं कर्मकर्तृरूपद्रव्योपसर्जनत्वप्रतीतेर्निष्पाद्यत्वप्राधान्ययोर्द्वयोरप्यभावात्कृत्यसञ्ज्ञकेभ्यः कृद्भ्यो न्यूनतरेत्याशयः। एवं कृत्याव्ययनिष्ठासञ्ज्ञकेषु कृद्विशेषेषु अपकृष्यमाणभावनारूपप्रतीतिमुक्त्वा, कृदन्तेषु यथासम्भवमतिदिशति—**एवमिति**। पाचकः पक्तेत्यादिषु कर्त्रुत्पन्नेषु पाककारकः पाककर्त्तेत्यादिकर्तृप्राधान्यप्रतीतेः, आदिशब्दोपात्तेषु पाक इत्यादिषु भावोत्पन्नेषु, पाकः क्रियेत्यादिधात्वर्थप्राधान्यप्रतीतेर्विधेयत्वाभावेन च प्राधान्यानपेक्षणात् कृत्येभ्यो न्यूनतरेति भावः।

स्वसम्वेद्यमपि सर्वेषु सिद्धकर्तृक्रियावाचिषु धातुषु भावनाज्ञानं विप्रतिपन्नान्प्रत्यर्थापत्त्या साधयति—**तथा चेति**। भावोत्पन्नेषु कृत्येषु कस्य केनेति कर्मकर्तृकरणानां कर्मोत्पन्नेषु केनेति कर्तृकरणयोरभिक्राममित्यत्र कर्त्तुः, उपाघातमित्यत्र कस्य कः केनेति कर्मकर्तृकरणानां, प्रवदितोरित्यत्र कस्येति कर्मकर्त्रोः, पक्व इत्यत्र केनेति कर्तृकरणयोः,

पक्वानित्यत्र कस्य केनेति कर्मकरणयोः पाचक इत्यत्र कस्य केनेति कर्मकरणयोः, पाक इत्यत्र कस्येति कर्मकर्त्रोः, केनेति च करणस्याधिकराद्यपेक्षायाश्च यथायोगं दर्शनात्, तस्याश्च रुढ्यादिषु भावनानुपलब्धावदर्शनाद्भावनाज्ञानहेतुत्वावधारणात्तदन्यथानुपपत्त्या भावनाज्ञानं कल्प्यत इत्यर्थः। करोतेश्च ण्वुल्प्रत्यये कारकशब्दस्य, मनिन्प्रत्यये। कर्मशब्दस्य, तृच्प्रत्यये कर्तृशब्दस्य, ल्युट्प्रत्यये करणशब्दस्य व्युत्पत्तेः कारकव्यपदेशतद्विशेषकर्मादिव्यपदेशानां करोत्यर्थव्यापारसम्बन्धनिबन्धनत्वात्तदन्यथानुपपत्त्यापि भावनाज्ञानं कल्प्यत इत्याह—**न चेति**। ननु धात्वर्थस्यैव व्यापारत्वात्कारकापेक्षा, कर्मादिषु च कारककर्मादिव्यपदेशाश्चोपपत्स्यन्त इत्याशङ्क्याह—**न त्वस्तीति**। धात्वर्थस्य निष्पाद्यत्वे सत्यप्यन्योत्पादानुकूलत्वलक्षणकरोत्यर्थक्रियारूपव्यापारत्वाभावान्न क्रियासम्बन्धिरूपकारकापेक्षा, धात्वर्थसम्बन्धनिबन्धना वा कारकादिव्यपदेशाः सम्भवन्तीत्याशयः। यत्र धात्वर्थे किं चिदसन्न जायते। स व्यापारो न भवतीत्यर्थः। अतः करोतिभावयत्योर्योऽर्थः सर्वधातूनामर्थः सिद्ध इत्युपसंहरति—**ततश्चेति**।

नन्वाख्यातेषु भावनावाचित्वं करोतिसामानाधिकरण्येन व्याप्तं (कृत्सु करोतिसामानाधिकरण्ये व्यावृत्त्या न व्याप्तं[1]) कृत्सु करोतिसामानाधिकरण्ये व्यावर्त्तते इत्याशङ्क्याह—**शक्यते चेति**। ननु पूर्वापरानेकक्षणव्यासक्तरूपपूर्वापरीभूतत्वस्य व्यापारलक्षणस्य घञन्तादिष्वप्रतीतेः कथं भावनाख्यव्यापारवाचिताऽस्तीत्याशङ्क्य—**विनापीत्युक्तम्**। यथा शुक्लत्वमित्यत्र भावप्रत्ययाद् गुणस्य निष्कर्षप्रतीतेर्द्रव्योपसर्जनत्वरूपाप्रतीतावपि गुणस्वरूपवाचित्वं न विहन्यते, तथात्रापि घञादिप्रत्ययात् सिद्धरूपप्रतीतेः पूर्वापरीभूतत्वरूपनिष्पाद्यत्वाप्रतीतावपि भावनास्वरूपवाचित्वं न विहन्यत इति भावः। कथं शक्यमित्यपेक्षायामाह—**तद्यथेति**। णमुलन्तधातौ करोतिसमानाधिकरण्यं प्रदर्शयितुं प्रश्नार्थे किमिति प्रयोक्तव्ये अन्यथैवं कथमित्थम्स्विनियोगिनि, किम्युपपदे करोतेर्णमुल्प्रत्ययविधानात्—**कथङ्कारमित्युक्तम्**। किं कृत्वा भक्षयन्त्यभिषुत्य हुत्वेति वक्तव्यम्। होमाभिषवयोः पौर्वापर्यसन्देहनिवृत्त्यर्थं जुहोतीत्युक्तम्। किङ्कर्त्रोः 'पुरा प्रवदितोरिति' कृञ्वदिभ्यामेकसूत्रेण तोसुन्विधानात्सुज्ञातत्वान्न दर्शितम्। किं कर्त्तेत्युच्यमाने कर्मविशेषप्रश्नाशङ्कापत्तेः क्रियाविशेषविषयत्वज्ञापनार्थं का क्रियास्येति विवक्षितत्वात्—**किं क्रिय इत्युक्तम्**।

नन्वाख्यातेषु भावनायाः प्रधान्यप्रतीतेः प्रत्ययार्थत्वावधारणान्न धातुवाच्यतेत्याशङ्क्याह—**न चेति**। प्रत्ययार्थस्यापि कर्तृसंख्यादेर्गुणत्वदर्शनात्प्रत्ययार्थस्य प्राधान्यस्मृतिरप्रमाणमित्याशयः। अतो यथा धातवो धात्वर्थं न व्यभिचरन्ति, तथा भावनामपीत्युपसंहरति—**तस्मादिति**। भिन्नक्रमोऽपि शब्दः सर्वधातुनां करोत्यर्थवाचित्वेऽभियुक्तानां संमतिमाह—**तथा चाहुरिति**।

---

१. अयं पा० २ पु० ना०।

'विभज्य सेनां परमार्थकर्मा सेनापतींश्चापि पुरन्दरोत्थः ।
नियोजयामास स शत्रुसैन्ये करोतिरर्थेष्विव सर्वधातून् ॥' इति ।

नन्वाख्यातेषु सर्वधातुवाच्यत्वे भावनायाः प्राधान्यप्रतीतिः कथमित्याशङ्क्याह—**यत्त्विति ।** गुणप्रधानभावस्यार्थाद्गम्यमानत्वेन प्रत्ययार्थत्वपक्षेऽपि प्राधान्यस्य वाच्यत्वाभावात्प्रौढिमात्रेण वाच्यत्वाभिधानमिति सूचयितुम्—**काममित्युक्तम् ।** अस्मिन्नपक्षे 'यज्याद्यर्थश्चात' इत्यतःशब्देन धातुमात्रपरामर्शात् धात्वर्थश्च धातोरवगम्यते, भावयेदिति चेति भाष्यं व्याख्येयम् ।

नन्वेवं भावनायाः प्रत्ययवाच्यत्वाभावात्प्रत्ययस्य करोतिभावयतिभ्यां पौनरुक्त्याभावेऽपि योगेनेति घञन्तेन धातुना धात्वर्थे कथ्यमाने भावनाया अपि तेनैव धातुनोपात्तत्वाद्भावयेति पुनरुक्तं स्यादित्याशङ्कते—**नन्विति ।** ननु घञा धात्वर्थस्य निष्कृष्टत्वात्कथं भावनोपादानमित्याशङ्क्यैकशब्दोपात्तयोः शुद्धाभिधानलक्षणनिष्कर्षायोगात्सिद्धरूपाभिधानलक्षणो निष्कर्षो वाच्यः । भावनाया अपि सिद्धरूपेणाभिधानोपपत्तेरपरिहार्यं पौनरुक्त्यमिति सूचयितुं व्याख्यायमानं 'इति वक्तव्ये' निष्कृष्टमित्युक्तम् । तृतीयान्तेन करणात्मना धात्वर्थस्य निष्कृष्टत्वात् । भावनायाश्च क्रियात्वेन करणत्वायोगाद्धात्वर्थमात्रं धातुना विवक्षित्वा शब्दान्तरेण भावनारूपार्थव्याख्या युक्तेति परिहरति—**नैष दोष इति ।** सामान्यविशेषशब्दयोरवच्छेद्यावच्छेदकपरत्वं विशेषणभावाच्च यागादयो भावनाविशेषा इत्यत्र स्वयमेव वक्ष्यते ।

एवं प्रौढ्या धातुमात्रवाच्यत्वमुपपाद्य, केवलयोर्धातुप्रत्यययोर्व्यभिचाराद्धात्वनुगृहीतेन प्रत्ययेन, प्रत्ययानुगृहीतेन वा धातुना उभाभ्यां वा परस्परानुगृहीताभ्यां भावनोच्यत इत्यपि वक्तुं शक्यमिति, यदुपक्रमेऽभिहितम् । तदुपपादयति—**अथ वेति ।** करणांशस्य धात्वर्थस्य, कर्तृसंख्यादीनां चैकवाच्यत्वेऽपि, भावनायाः समुदायवाच्यत्वाविरोध इत्याशयः । अस्मिन्पक्षे 'यज्याद्यर्थश्चात' इत्यतःशब्देन धातुप्रत्ययसमुदायं परामृश्य, अतःसमुदायाद्यज्यादिधात्वंशस्य चार्थोऽवगम्यते, समुदायार्थश्च भावनेति भाष्यं व्याख्येयम् । प्रकृतसूत्रपर्यालोचनयाप्येतत्पक्षद्वयं प्रतिभातीत्याह—**तथा चेति ।** क्रियत इत्यस्मिन्नर्थे करोतेर्मनिन्प्रत्ययस्मृतेः कर्मशब्दस्यानुष्ठेयवाच्यत्वाद्धात्वर्थानवच्छिन्नायाश्च भावनाया अननुष्ठेयत्वाद्धात्वर्थस्यैवानुष्ठेयत्वेन कर्मशब्दवाच्यत्वात्कर्मशब्दशब्देन धातून् विवक्षित्वा, तत्सामानाधिकरण्याद्भावार्थता तेषामेवाश्रितेत्यर्थः । समुदायवाच्यत्वपक्षे भावार्थानां धातुप्रत्ययसमुदायानां धात्वंशेन कर्मशब्दत्वात्सामानाधिकरण्यम्, प्रत्ययस्य तु भावार्थत्वेन कथं चित् सामानाधिकरण्यमित्याशयः ।

नन्वेवं सति—सिद्धकर्तृक्रियावाचिन्याख्यातप्रत्यये सति ।

इत्यादिना कस्मात्प्रत्ययवाच्यतोक्तेत्याशङ्क्याह—**शास्त्रेत्त्विति ।** इहैव तावद्यज्याद्यर्थश्चातो यजेतेति पदादवगम्यते भावयेदिति चेति धातुवाच्यादर्थाद्भेदेन भावनावगमा-

भिधानाद्धातुमात्रस्य चानिर्दिष्टस्यातःशब्देन परामर्शानुपपत्तेस्तन्मात्रपरामर्शे च यागादिश्चातोऽवगम्यते इति वक्तव्यत्वात्प्रत्ययार्थत्वाभिप्रायागवतेः शब्दान्तराधिकरणे च यजेतेत्यस्य पूर्वो भागो यजत्यर्थं ब्रवीति, उत्तरो भागो भावयेदिति, इत्यादिभाष्ये परो भागो भावनावचन इत्यत्र च स्पष्टप्रत्ययवाच्यत्वाभिधानत्सामानाधिकरण्यस्य चाख्यातपदरूपाः शब्दाः प्रत्ययांशेन भावार्थाः धात्वंशेन कर्मशब्दा इत्येव धातव एव भावनाविशेषणभूतस्वार्थवाचित्वेन भावनाप्रयोजनत्वाद्भावार्था इत्येवं वोपपत्तेः। प्रत्ययमात्रार्थता शास्त्रकाराणामभिप्रेतेत्याशयः।

प्रत्ययार्थत्वमुपपादयितुमुपक्रमते—**तत्रेति**। 'भावप्रधानमाख्यातमिति नैरुक्तिकस्मृतेर्णिजन्ताद्भवतेरच्प्रत्यये कृते भावशब्दव्युत्पत्तेर्भावनाप्राधान्यविषयत्वावसायात्प्राधान्याभावे च कृदन्तवन्निरपेक्षस्य कारकान्वयायोगापत्तेः, आख्यातेभ्यश्च भावनाप्राधान्यावगतेः। सर्वस्य सम्वेद्यत्वान्न तावत्प्राधान्ये विप्रतिपत्तुं शक्यम्। प्रकृत्यर्थत्वे च सति विशेषणत्वापत्तेः प्राधान्याभावप्रसङ्गात् प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतस्तयोः प्रत्ययार्थः प्राधान्येनेति प्रत्ययार्थप्राधान्यस्मृतेश्च कर्तृसंख्यादेः प्रत्ययार्थस्य प्राधान्याभावात्प्रत्ययार्थः प्रधानमेवेति नियमायोगेऽपि प्रत्ययार्थ एव प्रधानमिति नियमोपपत्तेः, नामस्वपि च कृत्तद्धितान्तेषु कारकविभक्त्यन्तेषु च प्राधान्यस्य प्रत्ययार्थत्वाव्यभिचारात् 'सत्त्वप्रधानानि नामानि' इति स्मृतेश्च लिङ्गसंख्यासम्बन्धार्हत्वविषयतया व्याख्यानोपपत्तेः। प्रातिपदिकार्थप्राधान्यपरत्वेऽपि वा प्रतीत्यनुसारात्प्रथमान्तनामविषयता व्याख्यानोपपत्तेः। प्रातिपदिकार्थप्राधान्यस्य प्रत्ययार्थत्वव्यभिचारानापादकत्वात्प्राधान्येन भावनायाः प्रत्ययार्थतावसीयत इत्याशयः।

प्रकृत्यर्थस्य विशेषणत्वोपपादनार्थं पूर्वार्द्धं प्रत्ययार्थविशेषणीभूतस्यार्थाभिधानेन प्रकृतेः प्रत्ययार्थपरत्वस्य विवक्षितत्वात्। श्लोकतात्पर्यं व्याचष्टे—**यद्यपीति**। तदागमन्यायेनापि भावनायाः प्रत्ययार्थताऽवसीयत इत्याह—**तथेति**। नन्वन्वयव्यतिरेकाभ्यां निष्कृष्टेऽर्थे नियम्यत इत्यन्वयव्यतिरेकैकशरणत्वान्निष्कृष्टार्थविषयशक्तिनियमस्य धातुव्यतिरेकेण चाख्याताभावादिह तन्मात्रान्वयव्यतिरेकानुपपत्तेः कथं तन्मात्रवाच्यत्वनिर्णय इत्याशङ्क्याह—**न केवलमिति**। धात्वपरित्यागेऽपि प्रत्ययश्रवणकाले धातुश्रवणाभावेऽपि भावनाप्रतीतेर्धातुश्रवणकाले च प्रत्ययश्रवणाभावे, तदप्रतीतेः 'शब्दवत्तूपलभ्यते न तदागमे हि तद् दृश्यते तस्य ज्ञानं यथान्येषा(४·१)मि'ति चातुर्थन्यायेन निर्णयो भविष्यतीत्याशयः।

यत्तु कृदन्तधातुवदस्त्यादिपरस्य प्रत्ययस्यापि भावनाव्यभिचारात्तद्वाचित्वं न सम्भवतीत्युक्तम्, तदनुभाषणपूर्वकं परिहरति—**यत्त्विति**। अयमाशयः पचतीत्यादिषु प्रतीयमानायाः भावनायाः धात्वर्थेन स्वनिष्पादकतया लक्ष्यमाणत्वे गुणत्वापत्तेः, प्राधान्यप्रतीतिविरोधापाताद्वाच्यत्वं तावदवश्यमङ्गीकार्यम्। तच्च व्यभिचारात्प्रत्ययस्यावाचकत्वे धातुसमुदाययोरप्यवाचकत्वापत्तेर्विरुध्येत। समुदायार्थत्वपक्षेऽपि हि धातु-

मात्रस्याख्यातसाहित्यात्मकः समुदायो भावनावाची स्यात्, पच्यादिधातुविशेषस्य वा। तत्र धातुविशेषस्य शुद्धस्यापि अव्यभिचारोपपत्तेर्द्वयोर्वाचकत्वकल्पनस्याऽन्याय्यत्वाच्छुद्ध-धातुवाच्यत्वस्य प्राधान्यविरोधात्, अनभ्युपगमे प्राधान्यस्य शुद्धप्रत्ययार्थत्वेन कारक-विभक्तिवाच्येषु कारकेषु व्याप्तेः। शुद्धप्रत्ययार्थत्वस्यैव न्याय्यत्वापत्तेर्धातुमात्राख्यात-समुदायार्थताभ्युपगन्तव्या। सा च व्यभिचाराविशेषान्न युक्तेति। पक्षत्रयेऽपि यत्र पचतीत्यादौ भावना प्रतीयते, तत्रैव वाच्यताङ्गीकार्या। तत्र चोक्तरीत्या प्रत्ययार्थ-तैव निश्चीयत इति।

नन्वेवं सति भावनायाः सार्वत्रिकं प्रत्ययार्थत्वं न सिध्यतीत्याशङ्क्याह—**अन्यत्र त्विति**। प्रयोजकव्यापारस्य भावनात्वात् अस्त्याद्यर्थकर्त्तुश्चासिद्धत्वेन प्रयोजकत्वायोगात् भावनानुपपत्तेः, असत्याश्च कस्य वाच्येति विचाराविषयत्वात्, प्रत्ययस्य भावनावाचि-त्वाभावेऽपि प्रकृत्यनुग्रहार्थत्वेन कर्तृसंख्याद्यभिधानार्थत्वेन वा टाबादेरिव स्त्रीत्ववाचिनः खट्वादौ स्त्रीत्वाभावेन तद्वाचित्वाभावेऽत्यर्थवत्त्वोपपत्तेरानर्थक्यपरिहारायापि वाक्या-नाकाङ्क्षणाद्यत्र प्रतीयते, तत्रैव प्रत्ययार्थत्वं विचार्यते। तत्र च सार्वत्रिकतास्त्येवे-त्याशयः।

नन्वेवं सति व्यभिचारात्प्रत्ययस्य भावनाचिता न युक्तेत्याशङ्क्याह—**क्वचिदिति**।

नान्वयव्यतिरेकाभ्यां त्वपूर्वोऽर्थोऽवगम्यते।
सङ्कीर्णेऽवगते त्वर्थे ताभ्यां शक्तिर्नियम्यते॥

तेनानेकात्मकाच्छब्दादनेकार्थविबोधने सिद्धे यदागमे योऽर्थः, स तस्येत्य-वधार्यते इत्यनेनानेकशब्दोच्चारणादनेकार्थप्रतीतौ, कस्य शब्दस्य कोऽर्थ इति विवेक-मात्रस्य तदागमन्यायात्मकान्वयव्यतिरेकाधीनत्वात्, अस्त्यादौ च भावनाप्रतीत्यभावेन कस्यासावर्थ इति विवेकानाकाङ्क्षणात्कूपयूपसूपादिवद्व्यभिचारेऽपि यत्रानेकार्थप्रतीतिः, तत्र तदागमन्यायाविघातान्न कश्चिद्दोष इत्युत्तरमुक्तमित्यर्थः।

प्रौढ्याऽस्त्यादिना परस्परप्रत्ययस्य भावनावाचित्वं वक्तुमुपक्रमते—**अथ वेति**। एतदेव प्रश्नपूर्वकमुपपादयति—**कुत इति**। भाव्यं विना भावनानुपपत्तिमाशङ्क्य, भाव्यान्तराभावेऽपि कर्तैव भाव्यो भविष्यतीत्युक्ते, कथमेकस्यैव कर्तृकर्मतेत्याशङ्का-निरासायां शशब्दः। घटो भवतीत्युच्यमाने घटे प्रयोगात्तस्यां चावस्थायां पूर्वापरी-भूतस्य घटस्य केन चिदंशेन सिद्धत्वात्, केन चित्साध्यत्वात्, सिद्धेः कर्त्तुर्घटस्यांशे समवेता भाव्यकर्त्रंशविषया भावनास्त्येवेत्यंशशब्दात्परां सप्तमीमधिकरणकर्मरूपविषय-परतयाऽवत्र्य व्याख्येयम्। नन्वेवं सति तत्र करोतिसामानाधिकरण्यं कस्मान्न भवती-त्याशङ्क्य उत्तरार्द्धं सिद्धासिद्धानां घटावयवानामत्यन्तभेदाभावादन्यत्र कर्तृव्यतिरिक्ते भाव्ये शेषत्वाभावात्, व्यतिरिक्तभाव्यनिष्ठत्वाभावात्करोत्यर्थभावनारूपेण सा न प्रकाशते—न प्रतिभातीत्यर्थः। केन चिदंशेन सिद्धो घटो अंशान्तरं करोतीत्यपि

विवक्षितुं शक्यत्वात्प्रत्युक्तम्। कथं चित्करोप्यर्थरूपप्रतीतावपि प्रकर्षेण न प्रतीयत-इत्यर्थः। अनुपलब्धिविरोधाशङ्कानिरासार्थत्वेनोत्तरार्द्धव्याख्यानपूर्वकम् श्लोकं व्याचष्टे—**यद्यपीति**। प्रशब्दव्याख्यानाय—**अतीवेत्युक्तम्**। अंशांशिनोरत्यन्तभेदाभावात्—**आत्मानमित्युक्तम्**। अंशत्रयं विना भावनाया नैराकाङ्क्ष्याभावाद्भाव्यांशसूचितौ करणेतिकर्तव्यतांशौ दर्शयितुं निरन्तरपूर्वक्षणावयवोत्पत्तेः करणत्वम्, व्यवहितावयवोत्पत्तेश्चेतिकर्त्तव्यतात्वमुक्तम्।

ननु घटो भवतीति वाक्ये कथमंशत्रयप्रतीतिरित्याशङ्क्य तत्र प्रयोगे त्रयोऽप्यंशा धातूपात्तेन भवनेन—**पूर्यन्त इत्युक्तम्**। प्रत्ययोपात्ताया भावनाया भाव्यापेक्षायां घटस्य भवतिपदात् भवितृत्वावगतेर्भाव्यांशे निवेशार्हत्वाद्धातूपात्तस्य च भवनस्य धात्वर्थान्तरवत् करणेतिकर्त्तव्यतांशान्वयात् घटः स्वभवनेन करणेतिकर्त्तव्यतारूपेणात्मानं भवनं[1] भावयतीत्यर्थो भवतीत्याशयः।

ननु व्यापारान्तरासम्भवेऽप्येकस्य भवनस्यानेकांशपूरकत्वं न युक्तमित्याशङ्क्य भवनकर्तृभूतावयवभेदेन भवनभेदं सूचयितुं केचिदवयवाः प्रयुज्यन्ते केचित्प्रयोजका इति श्लोकगतांशशब्दार्थे व्याख्याते, के प्रयोज्याः, के प्रयोजका इति व्यवस्थापेक्षायां भवनं कुर्वतामुत्तरावयवानां प्रयोज्यत्वोक्त्या भवनस्य प्रयोज्यव्यापारत्वेन भाव्यांशपूरकता, सिद्धभवनानां च पूर्वावयवानां प्रयोजकत्वोक्त्या सिद्धत्वेन करणेतिकर्त्तव्यतांशपूरकतोपपादिता अवस्थाविशेषाभिप्रायौ चेमावंशावयवशब्दौ।

घटादिर्हि मृत्पिण्डादेरुत्पद्यमानो घटादिशब्दवाच्यपृथुबुध्नोदराद्याकारात्मकावस्थाविशेषात्प्रागवस्थान्तराणि अनुभूय, घटादिशब्दवाच्यावस्थाविशेषरूपेणोत्पत्तेः पूर्वावस्थाभिर्भाव्यः। पूर्वावस्थायाश्च तत्साधनत्वाद्यथार्हं करणेतिकर्त्तव्यतात्वेन विवक्षितुं शक्यन्ते। घटशब्दवाच्यस्य त्वस्यैवैकस्यावस्थाविशेषस्य प्रयोज्यत्वे वाच्ये, ततः प्राचीनानामप्युत्तरोत्तरावस्थानां पूर्वपूर्वावस्थाहेतुकत्वं दृष्टान्तार्थं सूचयितुम् 'अवयवा' इति बहुवचनम्। ननु सिद्धभवनानां पूर्वावयवानां प्रयोजकत्वेनाभिमतानामसिद्धभवनोत्तरावयवोत्पत्तौ हेतुभूतः कोऽसौ व्यापारः, यो भावनेत्युच्यत इत्याशङ्क्य—**सिद्धेत्युक्तम्**। सिद्धभवनानां नियतपूर्वक्षणवर्त्तित्वेनाऽसिद्धभवनोत्पादकत्वावगमात् व्यापारं च विनोत्पादकत्वायोगाद्भवनाख्यस्यानन्यनिष्ठत्वेनान्योत्पत्त्यननुकूलत्वादवश्यं सिद्धभवनप्रयोजकावयवव्यापारत्वात्, तद्वृत्त्यसिद्धभवनप्रयोज्यावयवनिष्ठत्वाच्च तद्वृत्तिसर्वधात्वर्थानुरञ्जनसहत्वरूपं व्यापरसामान्यभ्युपगन्तव्यम्। तच्च भाव्यनिष्ठभावकव्यापारत्वेन भाव्यभावकोभयसम्पर्काद्भावनेत्युच्यत इत्यर्थः।

भवतिपराख्यातस्य भावनावाचित्वोपपादनेन तत्पर्यायजन्यादिपरस्य सिद्धमपि भावनावाचित्वं 'भूसत्तायामि'ति स्मृतेः सत्ताख्यद्वितीयभावविकावाचित्वेन भवतेराद्य-

---

१. भवन्तमिति २ पु० पा०।

भावविकारवाचिजन्यादिपर्यायत्वं नास्तीति भ्रमप्रसङ्गात्, तद्व्यावृत्त्यर्थं लोकप्रयोगानुसारात् भवतेराद्यभावविकारवाचित्वेन जन्यादिपर्यायत्वं सूचयितुमतिदिशति—**एतेनेति**। आदिशब्देनोत्पद्यतिपराख्यातोपादानम्। ननु भवतेरुत्पत्त्याख्यप्रथमभावविकारवाचित्वेन निष्पन्ने वस्तुनि प्रयोगात्, भाव्यान्तरायोगेऽपि आत्मनो[1] भाव्यत्वोपपत्तेर्भावनासम्भवेऽपि अस्तेः सत्ताख्यद्वितीयभावविकारवाचित्वेन निष्पन्ने वस्तुनि प्रयोगादात्मनो भाव्यत्वानुपपत्तेः। स्वनिष्ठत्वेन च भाव्यान्तरायोगात्कथं तत्र भावनावाचित्वं स्यादित्याशङ्क्याय—**अस्तिः पुनरिति**। लभ्यमानसत्ताकत्वावस्थैवास्तेर्वाच्या, न लब्धसत्ताकत्वावस्था तस्य विपरिणामादिभावविकारान्तरेष्वप्यनुवृत्तेर्द्वितीयभावविकारवाचित्वाभावापत्तेस्तस्यां चावस्थायामलब्धसत्ताकत्वाद्युक्तैवात्मनो भाव्यतेत्याशयसूचनाय—**उपरितनीमित्युक्तम्**। भवनानन्तरं भवितृत्वायोगात्कथं भाव्यतेत्याशङ्क्य—**सत्तयेत्युक्तम्**। सिद्धभवनस्य सद्रूपेणापि कथं भवितृतेत्याशङ्क्य, करणाधिकरणयोश्चे(३.३.११७)त्याधिकरणे ल्युडुत्पत्तेः। भवनाश्रयवाचिना भवनशब्देन भवनविशिष्टत्वाभिधानादात्मना स्वरूपेण सिद्धभवनस्यापि सत्तारूपेण भवनकर्तृता—**युक्तेत्युक्तम्**।

आत्मना भवनं यस्येति बहुव्रीहिणा वा भवनविशिष्टत्वाभिधानं करणेतिकर्त्तव्यताकाङ्क्षाया धातूपात्तायाः सत्ताया एव करणेतिकर्त्तव्यतांशपूरकत्वं वक्तुं सत्तयेत्येवावर्त्तनीयम्। सत्तया भवदित्यनुपात्तभवनविशेषणत्वं सत्ताया न युक्तमित्याशङ्क्य भवनानन्तर्यात्सत्ताया एव भवनलक्षणार्थत्वसूचनायाऽर्थलक्षणार्थो भवति प्रयुक्तः। कथं भवतिवाच्यावस्थानन्तर्यमस्तिवाच्यायाः अवस्थाया इत्याशङ्क्यातिदेशसूचितं जन्यादिपर्यायत्वं विवृतम्।

ननु घटाकारावस्थाविशेषोत्पत्तेरतदाकारावस्थान्तरोत्पत्तिसापेक्षत्वात्प्रयोज्यप्रयोजकव्यापारभेदकल्पना युक्ता। सत्तायास्त्ववस्थान्तरानपेक्षत्वेन एवंविधभेदकल्पना न युक्तेत्याशङ्क्याह—**तत्रापि त्विति**। उत्पत्त्याख्याद्यभावविकारानन्तरभावित्वाद्द्वितीयभावविकाररूपायाः सत्तायास्तस्याश्चावस्थाकालभेदेन भेदात्, तदनुनिष्पादिसत्ताभेदस्यावश्यम्भावात्सिद्धसत्ताकाः पूर्वेऽवयवाः प्रयोजकाः, सत्ताभवनव्यावृत्ताश्चासिद्धसत्ताका उत्तरेऽवयवाः प्रयोज्याः। सिद्धसत्ताकासिद्धसत्ताकवर्त्तित्वसामान्यं भावनाख्यो व्यापार इति कल्पनाऽनुसर्त्तव्येत्यर्थः।

ननु वस्तुत्वसामान्यरूपायाः सत्तायाः स्वरूपेणैकत्वेऽपि कालकृतो भेदोऽनेनोक्त इति शङ्कनीयम्। तस्या धातुवाच्यत्वाभावात्, निष्पन्ने वस्तुनि इदानीमस्तीति प्रयोगस्य कालसंसर्गविषयत्वेन वस्तुस्वरूपविषयत्वाभावात् पूर्वकालसत्तासम्बन्धस्य चोत्तरकालसत्तासम्बन्धं प्रति हेतुत्वाभावेन प्रयोजकत्वव्यवस्थानुपयोगिता इह कालसंसर्गस्यावक्तव्यत्वात्, कालकृतो भेदो येषां पूर्वोत्तरावयवानां, तेषां या सत्ता, या चोभय-

---

१. भावनाभाव्यत्वैति २ पु० पा०।

वर्तिनी सामान्यसत्ता, तद्रूपेणेति विग्रहः । नन्वेवं सत्याग्नेयोऽष्टाकपालो भवतीत्यादौ भवत्यर्थावच्छिन्नायाः पुरोडाशभावनाया विधेयत्वोपपत्तेः पुरुषव्यापारकल्पनानर्थिका स्यादित्याशङ्क्याह—**सत्यामपि त्विति** । निष्पन्नकर्तृविषयत्वोपपादनार्थं चेतनग्रहणम् ।

ननु भवत्याद्यर्थेऽपि विधिदर्शनात्कथं तत्र विधिप्रतिषेधयोरसम्भव इत्याशङ्क्ते—**स्यादिति** । तत्रप्रयोजकसिद्धकर्तृव्यापारलक्षणार्थत्वेनात्र भवत्याद्यर्थस्य विधिविषयत्वं युक्तमिति परिहरति—**सत्यामिति** । भवतिनाऽस्तिरप्युपलक्षितः । नन्वृत्विक्त्वस्यासिद्धत्वेन तद्भवनस्य सिद्धपुरुषव्यापारलक्षणार्थतास्तु, रथन्तरादेस्तु सिद्धत्वात्तद्भवनस्य विधिविषयत्वोपपत्तेः पुरुषव्यापारलक्षणार्थत्वं न सम्भवतीत्याशङ्क्याह - **तथेति** । भवतीति श्रुत्या भवनस्य विधिसम्बन्धे प्रतीयमानेऽप्यचेतनव्यापारे विध्यसम्भवाद्विधेये भावना लक्षणेत्याशयः ।

ननु चेतनगतस्य तर्हि भवनस्य विधिविषयत्वं भविष्यतीत्याशङ्क्याह—**यत्र त्विति** । तिष्ठत्यर्थवाचित्वात्स्मृतावपि इह भवेदिति देशविशेषाश्रितसत्ताभिधानेन गतिनिवृत्त्याख्यतिष्ठत्यर्थवाचित्वसम्पत्तेरेवमुक्तम् । इहामुकः स्यादिति प्रयोगेऽस्तेरपि तिष्ठत्यर्थवाचितैवमूहितव्या । नन्वृत्विजा भवितव्यमित्यादावृत्विक्त्वादिभवितृव्यतिरिक्तभावयितृपुरुषव्यापाररूपभावनासद्भावे भवितृव्यापारस्य भावनाभ्युपगमो व्यर्थः स्यादित्याशङ्क्याह—**तेनेति** । विध्यादिशब्दोपात्ते च प्रैषादौ, निषेधे च भवितृव्यापारव्यतिरिक्ताख्यातवाच्यभावनासद्भावेऽपि भूताद्युपदेशेष्वभावान्न भवितृव्यापारस्य भावनात्वाभ्युपगमस्य वैयर्थ्यापत्तिरित्याशयः ।

ननु श्रुताद्युपदेशेऽपि आत्मानमभावयन्, भावयति, भावयिष्यतीति वा व्यवहारादर्शनाद्व्यर्थो भवितृव्यापारस्य भावनात्वाभ्युपगमः स्यादित्याशङ्क्य - **अपारमार्थिकमित्युक्तम्** । व्यवहाराननुपात्यपि भवितृव्यापारस्य भावनात्माख्यातार्थवत्त्वाय तत्राभ्युपगतमित्याशयः । एतच्च सिद्धभवनानामवयवानां भावनाख्यो व्यापारो भवतिपदेन भवनं करोतीत्यभिधानादुच्यते । असिद्धभवनावयवव्यापारस्तु धातुमात्रेणोच्यत इत्यङ्गीकृत्य प्रयोज्यनिष्ठप्रयोजकव्यापाररूपभावनावाचित्वमाख्यातस्योक्तम् । यदा प्रतीत्यनुसारात्समस्तस्य भ्रमच्चक्रोपस्थानप्रभृतेर्घटाकारनिष्पत्तिपर्यन्तस्य व्यापारस्य वाचको धातुरिष्यते, तदा प्रयोज्यप्रयोजकव्यापारभेदाभावाद्धातुमात्रोक्तव्यापारस्य च कर्त्तुरेकत्वेन प्रयोज्यप्रयोजकत्वभेदायोगात् । असिद्धत्वेन च घटस्य प्रयोजकत्वायोगादवयवलक्षणायां च कारणाभावात्प्रयोजकव्यापाररूपभावनानुपपत्तेर्भूताद्युपदेशेऽपि कर्तृसंख्यादिमात्रमाख्यातेनोच्यते न भावनेत्याह—**भूतावीति** । अस्तेर्लभ्यमानसत्ताकत्वावस्थावाचित्वात्, तस्याश्चोत्पत्तिवदतदाकारावस्थान्तरानपेक्षत्वेनावयवशब्दाभिलप्यावस्थाभेदायोगेऽप्युत्पत्त्यनन्तरकालत्वेनोत्पत्त्यवस्थाकालभेदेन भेदावश्यम्भावापत्तिसूचनार्थे कालग्रहणम् । यथा प्रतीत्यनारूढत्वादवयवकालव्यतिरिक्तार्थान्तरकृतस्य

भेदस्यानश्रयणम्, तथावयवकालकृतस्यापीत्यादिशब्देन न सूचितम्। भेदाभावेचैकस्यैव प्रयोज्यव्यापारता प्रयोजकव्यापारता च विरुद्धेत्यर्थः।

एवं तर्हि व्यभिचारो दुर्वारः स्यादित्याशङ्क्याह—**न चेति**। यत्तु धातूनां भावनावाचित्वमुक्तम्, तदनुभाषणपूर्वकं दूषयति—**यस्त्विति**। धात्वश्रवणेऽप्योदने पच्यमाने दृष्टे पक्तृव्यापाररूपभावनाप्रतीतेर्धातुश्रवणेऽपि च मानसादपचाराद्धात्वर्थाप्रतीतावप्रतीतेः धात्वर्थाव्यभिचारद्वारा धातूनामव्यभिचारः न स्वत इत्यर्थः। धात्वर्थाव्यभिचारे च सति, तत एव प्रतीत्युपपत्तेः। सत्यपि धात्वव्यभिचारे तद्वाच्यत्वकल्पना न युक्तेत्याह—**तैरेव त्विति**। चशब्दार्थे अशब्दः। यदि चाख्यातवत् स्वप्रधानत्वेन कृदन्तेषु भावनावगम्येत, ततो धात्वर्थप्रतीतिनिरपेक्षभावनाप्रतीत्युपपत्तेर्वाच्यत्वं कल्प्येत। धात्वर्थनिष्पादकत्वेन तु तद्गुणत्वप्रतीतेर्धात्वर्थप्रतीतिसापेक्षत्वान्न साक्षाद्वाच्यत्वकल्पना युक्तेत्याह—**तथा हीति**। देवदत्तेनेत्यादिकारकविभक्तिश्रवणे यथाकारकसिद्ध्यर्थत्वेन तद्गुणतयाऽप्यवगम्यमानायाभावनाया न कारकविभक्तिवाच्यत्वं कल्पितम्, तथा धात्वर्थसिद्ध्यर्थत्वेनाप्यवगम्यमानाया न धातुवाच्यत्वं कल्पनीयमिति। दृष्टान्तार्थे कारकग्रहणम्। एतदेव कर्त्रधिकरणसिद्धदृष्टान्तपूर्वकं विवृणोति—**यथैवेति**।

नन्वर्थादवगम्यमानाया भावनाया अशाब्दत्वात्। करोतिसामानाधिकरण्यं पदान्तरोपात्तकारकान्वयश्च न स्यादित्याशङ्क्याह—**गम्यमानेति**। पक्तव्यमित्यादेर्भावनानपेक्षत्वे किं कर्त्तव्यमित्यादिप्रश्नानुरूप्यायोगात् उत्त्वरायामोदनस्य काष्ठैर्देवदत्तेन पाक इत्यादौ च क्रियतइत्याद्याख्यातानपेक्षत्वे पाकभावनेत्यप्युक्तेऽन्वयाप्रतीतेः। निष्पाद्यरूपभावनावगतिसापेक्षत्वादन्वयस्य भावनायां तात्पर्यावगतेरवाच्यत्वेऽपि, भावनायास्तात्पर्यवृत्त्या शाब्दत्वाद्युक्तं सामानाधिकरण्यादीत्याशयः।

गम्यमानाया अपि भावनायास्तद्वाचिनश्चाख्यातस्यापेक्षया तात्पर्यावगतिरिति तात्पर्यसूचनायापेक्षोक्ता। **गम्यमानस्यापि** तात्पर्यवृत्त्या शाब्दत्वात्सामानाधिकरण्योपपत्तौ कर्त्रधिकरणसिद्धदृष्टान्ताभिधानं तथाभूतयेत्यपेक्ष्यमाणत्वेन तात्पर्यवृत्त्या शाब्दीभूतयेत्यर्थः। भावनया कारकाणामन्वयायोगेऽपि धात्वर्थेनैव गम्यमानभावनान्वयापादितसाध्यभावेनान्वयो भविष्यतीति प्रौढ्या परिहारान्तरमाह—**अथ वेति**। धात्वर्थस्य साध्यत्वसिद्ध्यर्थभावनायास्तन्निष्पादकत्वेनोपसर्जनतोक्ता। ननु धात्वर्थस्याक्रियारूपत्वात्कथं कारकान्वयः अत आह—**स एव हीति**। क्रियाया अपि निष्पन्नायाः कारकानपेक्षत्वात् साध्यत्वप्रयुक्तकारकापेक्षावगतेरक्रियारूपस्यापि च धात्वर्थस्य क्रियान्वयेन साध्यत्वापत्तेर्युक्तः कारकान्वय इत्याशयः।

नन्वाख्यातश्रवणे तर्हि कथं भावनान्वयाभ्युपगमो, अत आह—**भावनापि चेति**। गुणस्येव द्रव्यपरिच्छेदं विना कारकाणां धात्वर्थनिष्पादनं विना भावनान्वयायोगाद्धात्वर्थसिद्ध्यर्थत्वेनैव भावनया ग्रहणादाख्याताश्रवणे भावनान्वयाभावेऽपि धात्वर्थान्वयो

गौररुणेत्यत्र गुणस्य द्रव्यवदविरुद्ध इत्याशयः। कारकान्वयान्यथानुपपत्त्या कृदन्तानां भावनानभिधायित्वेऽपि सर्वेषां भावनापरतोक्ता। तद्विशेषाणां तु कृत्यानां प्रैषवाचित्वान्यथानुपपत्त्यापि भावनापरताऽवगम्यतइत्याह—**कृत्यानां त्विति**।

एतदेव प्रश्नपूर्वकमुपपादयति—**कुत इति**। प्रैषाणां पुंव्यापारविषयत्वेऽपि धात्वर्थस्यैव पुंव्यापारत्वोपपत्तेः किं भावनयेत्याशङ्क्य—**तस्य चेत्युक्तम्**। पुंसः को व्यापार इत्यपेक्षायां भावनेति वाच्यमित्यर्थः। एवमपि प्राधान्याप्रतीतेः साध्यसाधनेतिकर्त्तव्यतांशत्रयवशीकारासामर्थ्यात्कथमंशत्रयपरिपूर्णतेत्याशङ्क्यांशत्रयात्मिकेत्युक्तम्। अंशत्रयावच्छेदं विनाऽनुष्ठेयत्वाभावादेतादृश्या एवाक्षेपात्, तद्बलेनैव प्राधान्यमपि कथंचिद्भविष्यतीत्याशयः।

प्रैषाणां पुंव्यापारविषयत्वोपपादनपूर्वकं श्लोकं व्याचष्टे—**न हीति**। प्रैषाणां भावनाविषयत्वोपपादनस्य प्रकृतभावनातात्पर्योपयोगितामाह—**ते यदीति**। ननु वैदिकानां कृत्यानां पुरुषाशयविशेषप्रैषवाचित्वायोगाद्विधौ चाऽस्मृतेरनुष्ठापकत्वाभावात् कथं भावनापेक्षेत्याशङ्क्याह—**यावांश्चेति**। प्राप्तविषयत्वप्रवर्त्तकत्वसमुदायात्मकप्रैषवाचिनां कृत्यानां ब्राह्मणे प्राप्तविषयत्वाभावात् समुदायासम्भवेऽपि प्रवर्त्तनात्मकत्वे तदेकदेशेऽपि लक्षणया प्रयोगोपपत्तेरप्राप्तविषयप्रवर्त्तनस्य च विधित्वादस्मृतमपि विधायकत्वं सेत्स्यतीत्याशयः। मन्त्रगतेषु कृत्येषु प्राप्तविषयत्वोपपत्तेर्ब्राह्मणग्रहणम्। ननु प्रणतं नीचं प्रत्येषणं स्वाभिमतसाधने प्रवर्त्तनार्थे गमनं प्रैषणमधिकं वोच्चं प्रत्येषणं अध्येषणम् गत्यर्थेष्यतिधात्वनुसारात्प्रसिद्धम्। तयोश्च मदभिमतसाधनमनेनानुष्ठेयमित्येवं विधोच्चनीचपुरुषाशयविशेषात्मकत्वेनाऽपौरुषेये वेदे क्वचिदप्ययोगात् ब्राह्मणविशेषणं व्यर्थमित्याशङ्क्याह—**अयमेव चेति**। अग्नीदग्नीन्विहरेत्यादिमन्त्रेष्वध्वर्युणा प्रैषसमाख्यानात् भृत्यादिवच्चाग्नीधोऽप्यग्नीत्कर्त्तृकपदार्थानुष्ठानार्थे वृतत्वेन पदार्थानुष्ठाने प्रणतत्वात्तं प्रति प्रवर्त्तनार्थंगमनोपलक्षितस्य प्रवर्त्तनस्य प्रैषशब्दवाच्यत्वोपपत्तेर्नाव्यापकं पुरुषाशयत्वं प्रैषलक्षणान्तःपातीतिभावः। प्रेषणं प्रवर्त्तनम्। भावनायाः प्रत्ययार्थत्वमुपपादितमुपसंहरति—**तस्मादिति**।

ननु भावनाया धात्वर्थाद्भेदे सत्युक्तेन न्यायेनाऽस्तु प्रत्ययवाच्यत्वम्। न त्वसौ धात्वर्थाद्भिन्नास्तीति शङ्कते—**ननु चेति**। अयमाशयः प्रयोजकव्यापारत्वविशेषणेन प्रयोज्यव्यापाररूपाद्विक्लेदनादिधात्वर्थाद्भेदे सत्यप्यधिश्रयणादेः प्रयोजकव्यापाररूपाद्भेदो नोपलभ्यते। स्थाल्यधिश्रयणोदकासेचनतण्डुलावापादिप्रयोजकव्यापारसमूहो हि विक्लेदनफलावधिः पचिनोच्यते। कः पच्यर्थो? येयं तण्डुलानां विक्लित्तिरिति तु महाभाष्यकारीयं विक्लित्त्यर्थत्वाभिधानं फलाभिप्रायम्। विक्लेदनाख्यप्रयोज्यव्यापारवाचित्वे देवदत्तः पचतीति सामानाधिकरण्यायोगापत्तेः यागेनापि देवतोद्देशपूर्वकं द्रव्यत्यागाख्यसङ्कल्पः प्रयोजकव्यापार एवोच्यते। अतो धात्वर्थादभिन्नत्वान्न प्रत्ययार्थो

भावनेति। पचौ प्रतीयमानान्यधिश्रयणादीनि यजौ च प्रतीयमानः सङ्कल्पः प्रयोजकव्यापार इति, कृत्वैव, एवमादीनां भावनात्वमित्यर्थः।

ननु स्थाल्यादीनां चुल्ल्यादिसंयोगस्याधिश्रयणादिशब्दवाच्यस्याव्यापारत्वान्न भावनात्वापत्तिरित्याशङ्क्य—**अत एव चेत्युक्तम्**। अधिश्रयणादीनां पचिवाच्यस्य पचावधिश्रयणादीनीत्यनेनैव सिद्धत्वात् प्रयोजकव्यापारत्वावधारणायैवकारः। प्रयोजकव्यापाररूपा एवाधिश्रयणादयः पच्यादिधात्वर्था, न संयोगरूपा इत्यर्थः—**अयमाशयः**। संयोगमात्रं वाधिश्रयणशब्दवाच्यं स्यात्? स्थालीचुल्लीसंयोगो वा। तत्राद्ये कल्पे सर्वधातूनां पर्यायत्वम्। द्वितीये स्थालीचुल्ल्योरप्यभिधानापत्तेर्गौरवं दोषः। संयोगवाचित्वे चाधिश्रयतेरुदासीनेऽपि पक्तरि संयोगसद्भावः, अधिश्रयणं वर्त्ततइति प्रत्ययापत्तिः। क्रियमाणसंयोगवाचित्वे वा प्रत्ययवाच्यायाः क्रियायाः प्रागप्रतीतेर्विशेषणत्वायोगाद्धातुनैव क्रियाविशिष्टसंयोगाभिधानापत्तेदुर्वारं प्रयोजकक्रियाधातुवाच्यत्वम्। अनेनैव न्यायेन गम्यादेः संयोगविभागावाचित्वं निरसनीयम्। संयोगविभागविशेषलाभाय च संयोगिनोर्विभागिनोश्चाभिधानापत्तेरतिगौरवम्। यज्यादेश्च संयोगविभागावाचित्वायोगात् संयोगविभागात्मकधात्वर्थवचनमव्यापकं स्यात्। त्वद्वियोगात्मकस्वस्वामिविभागयज्यर्थाभ्युपगमेऽपि जानात्यादौ कथंचित्संयोगविभागानिरूपणादव्याप्त्यपरिहारः। भवति स्व करोत्योः शक्तिभेदात्तु विक्लिदिपचत्योरिव नियतं प्रयोज्यप्रयोजकव्यापारवचनत्वमिति वार्तिकाद्व्यापारस्यैव धात्वर्थताऽवसीयते। धातुमात्रनिर्देशाच्च न प्रत्ययविषयतया तद्वार्त्तिकं व्याख्यातुं शक्यम्। प्रत्ययस्य च ण्यन्तत्वाभावात् प्रयोज्यकर्तृकैकान्तव्यापारप्रतिपादकाः ण्यन्ता एवेति न युज्येत। संयोगविभागात्मकत्वे च धात्वर्थस्याव्यापाररूपत्वाद् गोदोहनादिभिराश्रयत्वेन ग्रहणं न युज्यते। धात्वर्थावच्छिन्नाया भावनाया एवाश्रयत्वाभ्युपगमे गुणफलसम्बन्धविधौ वाक्यभेदभयेन प्रकृताश्रयापेक्षणाद्भावनाभेदमुपपत्तेर्गुणकामेष्वाश्रयैः सह सामानासामानविध्यविचारः संस्थाधिकरणे करिष्यमाणो न युज्यते। व्यापाररूपत्वेऽपि करोत्यर्थक्रियारूपत्वाभावात्क्रियारूपायां भावनायां कारकत्वाविरोधः।

धात्वर्थ एव भावना, ननु तदाभिरिक्तेति पूर्वपक्षः

व्यापाररूपधात्वर्थादतो भेदमपश्यताम्।
संयोगरूपधात्वर्थवर्णनं भेदतृष्णया॥ १॥
व्यापाररूपधात्वर्थात् सान्या स्पन्दात्मिका हि किम्।
प्रयत्नात्मा द्विरूपा वा सर्वथापि न युज्यते॥ २॥
प्रयत्नो भावना चेत् स्यान्न रथो गच्छतीति हि।
प्रयोगः स्यात्प्रयत्नो हि चेतनेष्वेव सम्भवेत्॥ ३॥

स्पन्दस्य भावनात्वे तु यजेतेति न चेतने ।
द्विःसाधारणरूपत्वे शब्दो वक्तीत्यसम्भवः ॥ ४ ॥
न शब्दे स्पन्दयत्नौ हि विभुत्वाच्चेतनत्वतः ।
एवं च सतिधात्वर्थसामान्यं भावना पतेत् ॥ ५ ॥
अथानयोर्हेतुभूतमन्यत्तन्नोपलभ्यते ।
अभूतोत्पादनं चान्यद्धात्वर्थान्नैव दृश्यते ॥ ६ ॥
अन्योत्पादानुकूलत्वे भावनैकं च तद्यदा ।
तदा न भावनाभेदो भवेद्धात्वर्थभेदतः ॥ ७ ॥
प्रतिधात्वर्थमन्यत्वं न च तस्यावधार्यते ।
धात्वर्थभेदमात्रेण फलभेदप्रसिद्धितः ॥ ८ ॥
अथ धर्मेण येन स्याद्धात्वर्थः फलसाधनम् ।
स धर्मो भावनाख्यश्च प्रतिधात्वर्थमिष्यते ॥ ९ ॥
तस्य धात्वर्थधर्मत्वे पुम्धर्मत्वं विरुध्यते ।
पुम्धर्मस्तु प्रयत्नः स्यात् स च पूर्वे निराकृतः ॥ १० ॥
किं च धात्वर्थानिवृत्तिपर्यन्तत्वात् स भावना ।
कथं धात्वर्थसाध्या हि सेष्यते फलसाधनम् ॥ ११ ॥
अथ धात्वर्थजन्योऽपि शक्त्यात्मा पुरुषाश्रितः ।
प्रतिधात्वर्थमन्योऽसौ नापूर्वादतिरिच्यते ॥ १२ ॥
तस्याव्यापाररूपत्वाद्भावनात्वं न चेष्यते ।
व्यापारत्वेऽपि कारणव्यापारत्वान्न भावना ॥ १३ ॥
तत्कर्तृव्यापृतिः सा हि प्रत्ययार्थश्च नत्वदः ।

अतो धात्वर्थातिरिक्तभावनानुपपत्तेः प्रत्ययार्थता न युक्तेति तात्पर्यार्थः ।

परिहरति—**नैष इति** । व्यापारत्वाविशेषाद्धात्वर्थभावनयोर्भेदानवभासेऽपि, पाकं करोति यागं करोतीति भिन्नेषु धात्वर्थेषु करोत्यर्थनुवृत्तेर्धात्वर्थाद्भेदोऽध्यवसीयत इत्यर्थः । श्लोकं व्याचष्टे—**सर्वत्र हीति** । सर्वधात्वर्थसाधारणस्य व्यापाररूपस्य करोत्यर्थस्याख्यातपदांशप्रत्ययवेलायां प्रतीतिसूचनायांशशब्दः । विक्लेदनोद्देशेन क्रियमाणस्याधिश्रयणादेः पचिवाच्यत्वं ववतुं विक्लित्तिग्रहणे समासस्थायाः षष्ठ्याः सम्बन्धमात्रोत्पन्नाया अपि तादर्थ्यलक्षणसम्बन्धविशेषनिष्ठत्वाद्विक्लित्त्यर्था अधिश्रयणादय इति समासार्थः । आदिशब्दोपात्तस्य वा विक्लिदेर्विक्लित्तिर्वाच्या । धात्वर्थानां नियतकर्तृस्थभावनातो वैलक्ष्ण्यं

वक्तुम्, केषां चित्कर्मस्थत्वप्रदर्शनायोक्ता। कोऽसावधिश्रयणादिकर्तृस्थव्यापारातिरिक्त-सामान्यरूपो व्यापार इत्यपेक्षायामाह—**तत्रेति**। औदासीन्यम्, अकुर्वत्रूपत्वावस्था। ततः प्रच्युतिः कुर्वद्रूपत्वं करोतिप्रत्ययवेद्यमन्योत्पादानुकूलत्वम्। तेन रूपेण यन्निरूप्यते, सा भावना इत्यर्थः। संयोगविभागादिहेतोः स्पन्दादेर्धात्वर्थाद्वैलक्षण्यप्रदर्शनार्थो मात्र-शब्दः। अकर्मकधातुवाच्यध्वननादिधात्वर्थानन्तरं नियमेनान्योत्पादादर्शनात्सकर्मक-धातुवाच्येभ्यश्च गमनादिभ्योऽनन्तरमेव संयोगविभागाद्युत्पत्तेरुत्पाद्यानाकाङ्क्षणाद्धा-व्याकाङ्क्षालक्षणभाव्यनिष्ठत्वापरपर्यायान्योत्पादानुकूलत्वरहिताद्धात्वर्थादकुर्वद्रूपत्वलक्षणौ-दासीन्यप्रच्युत्यात्मकत्वेनान्योत्पादनरूपत्वादनन्तरं च फलानुत्पत्तेर्भाव्यनिष्ठत्वापरपर्याय-न्योत्पादाकाङ्क्षालक्षणान्योत्पादानुकूलत्वात् भावनाया वैलक्षण्यमित्याशयः। ततश्च यथा प्रयोज्यापरपर्यायकर्मस्थस्य विक्लेदनादेर्व्यापारत्वे सत्यपि, प्रयोजकापरपर्याय-कर्तृव्यापारत्वाभावात् न भावनात्वम्, तथाधिश्रयणादेः प्रयोजकव्यापारत्वे सत्यपि भाव्यनिष्ठत्वाभावान्न भावनामित्याशङ्कापरिहारः सूचितो भवति। नन्वधिश्रयणादेः परिस्पन्दात्मकात्प्रयोजकव्यापारादन्यो भाव्यनिष्ठः प्रयोजकव्यापारश्चेदस्ति, किमिति तद्व्यतिरेकेण नोपलभ्यत इत्याशङ्क्य—**परिस्पन्दरूपमित्युक्तम्**। भावनाया धात्वर्थेन विषयभूतेन ज्ञानस्येव ज्ञेयेन, निरूपिताया अवच्छिन्नायाः कार्यभूतेन वा धात्वर्थेन करणतया निरूपितायाः कल्पितायाः निरूप्यत्वाद्धात्वर्थं विनानुपलब्धिर्युक्तेति भावः।

प्रयत्नो भावनेति स्वमतस्य निरूपणम्

भावनावच्छेदकधात्वर्थमात्रोपलक्षणार्थः परिस्पन्दशब्दः। रूपशब्दस्य करणव्युत्पत्तौ परिस्पन्दो रूपमस्येति विग्रहः। कर्मव्युत्पत्तौ वा परिस्पन्देन निरूप्यमाणमिति विग्रहः। स्वशरीरस्य स्पन्दस्य ह्यात्मप्रयत्नहेतुकत्वव्याप्तेः। परशरीरे स्पन्ददर्शनात्प्रयत्नोऽ-नुमीयते। स्वप्रयत्नश्च मानसप्रत्यक्षवेद्योऽपि गमनेऽहम्प्रयते, पाकेऽहम्प्रयते इति गमनादिना स्पन्देन यागेऽम्प्रयते ध्यानेऽहम्प्रयतइति वा चलनात्मकेन यागादिना धात्वर्थेनावच्छिन्न एव च भाव्यनिष्ठप्रयोजकव्यापारत्वात्मकभावनालक्षणयोगादर्थि-पुरुषव्यापारत्वाच्चार्थयतइति कर्तृव्युत्पत्तिद्वाराऽर्थयितृपुरुषव्यापारवाच्यर्थभावना-शब्दव्याच्यः सर्वेषु लङाद्याख्यातेषु गम्यते।

यत्त्वस्मिन्पक्षे रथो गच्छतीत्यचेतने नाख्यातं प्रयुज्यते इत्युक्तम्। तत्रैवं वाच्यं किमाख्यतप्रयोगान्यथानुपपत्त्या रथादौ भावना कल्प्यते, प्रतीतिबलाद्वाभ्युपगम्यते। न तावत् स्पन्दातिरिक्ता भावना प्रत्यक्षेण प्रतीयते। नापि कदाचित्कत्वं स्पन्दाख्यकार्य-दर्शनात्कल्प्यते इति रथवोढ्स्वादिप्रयत्नात् स्पन्दमानाश्वादिशरीरसंयोगात्, तदभावेऽपि वा पतनप्रतिबन्धकाधारसंयोगाभावसहकृताद् गुरुत्वाद्रथस्पन्दोपपत्तेः वायुसंयोगादि-सद्भावभावितया च दृष्टस्य पर्णादिपतनस्य न कारणत्वकल्पना युक्ता। वायोस्तु स्वाभाविकस्पन्दो न शक्नोत्येव स्वकारणत्वेन व्यापारन्तरं कल्पयितुम्। स्पन्दस्य च

वायुरथादेः स्पन्दनं चलनं वर्त्तत इति आख्याताश्रवणेऽपि धातुमात्रात्प्रतीतेराख्यातार्थत्वम्, भाव्यनिष्ठत्वाभावाच्च भावनात्वं नाभ्युपगन्तुं युक्तम् । स्पन्दतिचलत्योश्चाकर्मत्वात्, तद्वाच्यस्य स्पन्दस्य भावनिष्ठत्वमनाशङ्क्यमेव । ततश्च वायुरथादौ स्पन्दस्य भावनात्वायोगात्तदतिरिक्तव्यापारानुपलब्धेश्च प्रयत्नात्मकभावनानभ्युपगमे भावनाव्यभिचारो दुष्परिहरः । स्पन्दस्य भावनात्वाभ्युपगमेऽपि स्पन्दत्यादिधातुनैव तदभिधानसिद्धेस्तत्परस्याख्यातस्य व्यभिचारस्तदवस्थ एव । स्पन्दत्यादिपराख्यातवच्च पचत्यादिपराख्यातस्यापि स्पन्दवाचित्वं न युक्तम् । न हि पचतीत्यस्य पाके स्पन्दतइत्यर्थं केचिद्व्यचक्षते ।

तथा 'यज्याद्यर्थश्चातोऽवगम्यते, भावयेदिति चे'त्युक्ते कीदृशी पुनराख्याताद्भावनावगम्यते इत्यपेक्षायां 'तथा यतेत यथा किं चिद्भवतीति प्रयत्नवाचिताख्यातस्या भाष्यकृता विवृता, दध्नेन्द्रियकामाधिकरणे च जुहुयादिति शब्दस्यैतत्सामर्थ्यं यद्धोमविशिष्टं प्रयत्नमाहेत्यभिधानात् । जुहुयादित्यस्य होमे यतेतेत्यर्थः सूचितो भवति । प्रयत्नस्य चेच्छायोनित्वान्निष्फले चेच्छायोगाद्भाव्यनिष्ठत्वावगतेर्धात्वर्थनिष्पत्तिमात्रेण च फलवत्त्वासिद्धेस्तन्निष्पत्तिमात्रेण पर्यवसानायोगेन धात्वर्थकरणकस्य प्रयत्नस्य फलसाधनत्वाविघातात्प्रयत्नस्य भावनात्वे न कश्चिद्दोषः । प्रयत्नाभावे च वातरोगादिना देवदत्ते स्पन्दमाने नायं स्पन्दं करोति, किं तु वातादिवशादस्य स्पन्दो भवतीति व्यवहारदर्शनात्प्रयत्न एव करोत्यर्थोऽवगम्यते । रथादावपि न रथः स्वयं गमनं करोति, किं त्वश्वादिनाऽस्य गमनं क्रियते इति व्यवहारदर्शनाद्धातुवाच्यस्पन्दातिरिक्तकरोत्यर्थभावनाप्रतीत्यभावः सिद्धः । आख्यातप्रयोगान्यथानुपपत्त्या तु रथादौ भावनाकल्पने रथो भवतीत्यत्रापि सर्वदा भावनाकल्पनापत्तेः । भूतादिकथनेऽप्यवयवादिकृतभेदानाश्रयेण धात्वर्थमात्रम्, कर्तृसंख्यादयश्चाख्यातपदार्थत्वेनावधार्यन्ते, न भावना । न च भावनाव्यभिचारेण दोष इति वार्त्तिकं विरुध्यते अवयवादिकृतभेदविवक्षायामस्त्यादौ भावनाभ्युपगमः पूर्वोत्तरवार्त्तिकपर्यालोचनया प्रौढिमात्रेणेत्युक्तम् ।

अथ वा सोऽपि प्रयत्नाभिप्रायेण व्याख्यातुं शक्यते । नित्यस्यात्मनः शरीरशरीरिणोरभेदविवक्षया शरीरानिष्पत्तावनिष्पत्तिव्यपदेशोपपत्तेः ।

'पञ्चधातून् स्वयं षष्ठ आदत्ते युगपत्प्रभुरि'त्यादिस्मृतिपर्यालोचनया चात्मनः शरीरोत्पादनप्रयत्नावगमात् सिद्धभवनशरीरावयवाधिष्ठानेनासिद्धभवनान् शरीरावयवान्प्रति प्रयोजकस्य प्रयत्नात्मिका भावना न विरुध्यते । एवं च सिद्धकर्तृक्रियावाचिनीत्यपि चेतनाभिप्रायं व्याख्यातुं शक्यम् ।

यद्वा अर्थभावनायाश्चेतनमात्राश्रयत्वेऽपि शब्दभावनायाश्चेतनायत्वायोगादुभयव्याप्त्यर्थं सिद्धमात्रग्रहणम् । नित्यस्यापि शब्दस्याभिव्यक्तिः–सिद्धिरभिप्रेता । भाव्यनिष्ठप्रयोजकव्यापारस्वलक्षणयोगाच्च शब्दव्यापारस्वलक्षणयोगाच्च शब्दव्यारस्याप्यविरुद्धं भावनात्वम् । यथैव हि इच्छायोनित्वात्प्रयत्नस्येष्यमाणभाव्यं विनात्मलाभायोगाद्भा-

व्यनिष्ठत्वम्, तथा लिङादिव्यापारस्यापि प्रेरणाख्यस्य प्रवृत्त्याख्यभाव्यकल्पत्वेन तन्निष्ठतावसीयते। न च यथा स्पन्दानन्तरमेव संयोगविभागोत्पत्तेराकाङ्क्षातः प्रागेवाकाङ्क्षणीयलाभे लब्धव्यालाभनिमित्ताकाङ्क्षानुपपत्तेः, अन्यथा च कदाचिन्नैराकाङ्क्ष्यानुपपत्तिप्रसङ्गात् स्पन्दस्य भाव्याकाङ्क्षालक्षणं भाव्यनिष्ठत्वं नास्ति। तथा प्रेषणाया भाव्यनिष्ठत्वाभावः पुरुषप्रवृत्तेः साध्यसाधनेतिकर्त्तव्यतापर्यालोचना सापेक्षत्वेन प्रेरणानन्तरमनुत्पत्तेः अनेनैव न्यायेन सर्वशब्दगतस्याभिधानलक्षणस्यापि व्यापारस्यार्थप्रतिपत्त्याख्य भाव्यकल्पितस्य भावनात्वमनुसन्धेयम्। तस्या अनभिहिताया एव कार्योपयोगित्वात्, लिङादियुक्तेषु वाक्येषु द्वे भावने प्रतीयते। इत्यादौ भावनाद्वयोपन्यासाविरोधः॥

स्पन्दप्रयत्नयोरेव भावनात्वमिति भ्रमम्।
अपनेतुं प्रसक्तानुप्रसक्त्यैतदुदीरितम्॥ १॥
प्रयत्नव्यतिरिक्तार्थभावना तु न शक्यते।
वक्तुमाख्यातवाच्येह प्रस्तुतेत्युपरम्यते॥ २॥
स्त्रीत्वाभावेऽपि खट्वादौ टाबादिप्रत्ययो यथा।
प्रयुज्यते तथाख्यातं यत्नाभावेऽप्यचेतने॥ ३॥
स्त्रीत्वादेः प्रत्ययार्थत्वं चतुर्थे वक्ष्यते स्फुटम्।
तथा च लिङ्गमित्यत्र प्रयत्नस्य तथा भवेत्॥ ४॥
धातोरनुग्रहार्थं वा वाच्यन्तरधियेथ वा।
प्रत्ययोऽवश्यवक्तव्यस्तावता न त्ववाच्यता॥ ५॥
वोढृश्वादिगतं यत्नं रथदावुपचर्य वा।
उपपाद्यः प्रयोगोऽत्र मुख्यार्थानुपपत्तितः॥ ६॥
लिङ्वाच्यो हि करोत्यर्थः सामानाधिकरण्यतः।
प्रयत्नश्च करोत्यर्थस्तदन्यानुपलम्भनात्॥ ७॥
न चौलूक्यैः प्रयत्नस्य गुणत्वपरिभाषणात्।
अकरोत्यर्थता शङ्क्या सिद्धरूपा प्रतीतितः॥ ८॥
बुद्धीच्छाद्वेषयत्नानां शब्दज्ञैः कर्मतेष्यते।
इत्याचार्यैश्च यत्नस्य व्यापारत्वाभिधानतः॥ ९॥
चेतनप्रेरकत्वं च विधेस्तद्विषयत्वतः।
काष्ठाद्यप्यन्यथाकस्मान्न प्रेरयति वायुवत्॥ १०॥

विध्यर्थज्ञानतो प्रेर्यं चेत्काष्ठादि ततः कथम् ।
सौधन्वननिषादादेरप्रेर्यस्याधिकारिताम् ॥ ११ ॥
विधिस्त्वाप्रेरयत्यत्रेत्यप्रेर्यो ज्ञाप्यते कथम् ।
विद्वद्भिर्ज्ञापनादेव प्रेर्यत्वेऽन्योन्यसंश्रयम् ॥ १२ ॥
धात्वर्थव्यतिरिक्तातः प्रयत्नाख्यार्थभावना ।
यजत्यादिपराख्यातवाच्यतेत्यसमञ्जसम् ॥ १३ ॥

ननु धात्वर्थभावनयोर्द्वयोर्व्यापाररूपत्वे समत्वेनान्योन्यसमन्वयो न स्यादित्याशङ्क्याह— **ये त्विति** । व्यापारत्वसाम्येऽपि, भावनाया एव भाव्यनिष्ठत्वेन करोत्यर्थरूपक्रियात्वात्, धात्वर्थस्य च भाव्यनिष्ठत्वाभावेन क्रियारूपत्वाद्यथायोग्यं सन्निकर्षविप्रकर्षापेक्षया करणत्वेन, इतिकर्त्तव्यतात्वेन वा भावनान्वयः सम्भवतीत्याशयः । यथा कर्मगतस्य विक्लेदनादेः प्रयोज्यव्यापारस्य विक्लिद्यतस्तण्डुलान् पचतीत्यादिप्रयोगदर्शनात् व्यापारत्वसाम्येऽपि भावनान्वयो न विरुध्यते, तथा कर्तृगतस्य पाकादेः प्रयोजकव्यापारत्वसाम्येऽपीत्यर्थः । एवं च तर्हि यस्य कस्य चिद्धात्वर्थस्य यया कया चिद्भावनयान्वयः कस्मान्न स्यादित्याशङ्कानिरासायानुरञ्जकत्वविशेषणम् ।

ननु धात्वर्थविशेषाणां भावनानुरञ्जकत्वाभ्युपगमे गौः शाबलेय इतिवत् सामान्यविशेषात्मकैकवस्तुत्वापत्तेः क्रियाकरणविभागो न स्यात् इत्याशङ्कते—**एवं तर्हीति** । भावनायाः प्रयत्नात्मकत्वात्, धात्वर्थस्य च स्पन्दात्मकत्वावेकवस्त्वात्मकत्वाभावेऽपि भावनाया भाव्यनिष्ठत्वात्, धात्वर्थं च विना भाव्यासिद्धेः स्वरूपेण धात्वर्थसाधनत्वेऽपि भाव्यावच्छिन्नरूपेण धात्वर्थविशेषसाध्यत्वात् सामान्यरूपतोपपन्नेति परिहरति— **सत्यमिति** ।

एतदेव प्रश्नपूर्वकमुपपादयति—**कथमिति** । अयमाशयः द्वैधीभावाद्युद्देशप्रवृत्तोद्यमनादिकर्तृव्यापारव्याप्यस्य परश्वादेः करणत्वदर्शनात् भाव्योद्देशप्रवृत्तभावनाव्याप्यत्वेनाख्याते धात्वर्थः करणतयावसीयते । णिजन्ताद्धि भवतेरचो यदि(३-१-९७)ति कर्मणि कृत्प्रत्यये कृते भाव्यशब्दव्युत्पत्तेः । ईप्सिततमस्य च कर्मत्वाद्भावयितुमिष्टतमं यदुद्दिश्य भावना प्रवर्त्तते, तद्भाव्यम् । ततश्च यथा गामानयायं दण्ड इत्युक्तेः तृतीयां विनापि दण्डस्यान्यथान्वयायोगात्करणत्वं प्रतीयते, तथा किञ्चिदीप्सितं भाव्यं भावयतीत्युक्ते भाव्यान्तरोद्देशेन प्रवृत्तया भावनया धात्वर्थस्य भाव्यत्वेनान्वयायोगात्करणत्वं प्रतीयते । तस्माद्यागादौ साध्यात्मकभावनासामान्यविरुद्धकरणात्मकधात्वर्थसामान्यसद्भावात् भावनासामान्यं न समवेतमिति, करणत्वस्य भावनासामान्यविरोधप्रदर्शनायोत्तरार्द्धम् ।

ननु निर्विशेषभावनासामान्यायोगाद् बलाद्धात्वर्थेषु विशेषेषु समवायापत्तिरित्याशङ्क्याह— **भावनायां हीति** । ज्ञेयैक्येऽपि ज्ञानस्येव धात्वर्थैक्येऽपीषत्प्रयते, अहम्

अतिशयेन प्रयतेऽहमिति सातिशयानतिशयादिभेदेन प्रयत्नरूपभावनाभेदावगतेरनौपाधिकभेदद्योतनार्यैवकारः। भावना चेन्न धात्वर्थसामान्यम्, किं तदित्यपेक्षायामाह—**तथेति**। यथा यद्भावनासामान्यम्, तद्धात्वर्थेन समवैति। तथा यद्धात्वर्थसमवेतं तद्भावनासामान्यं न भवतीति सूचनार्थस्तथाशब्दः। कथं यागादेर्भावनाकरणतेत्याशङ्क्य भावनायाः केनेति करणांशेनापेक्षाहेतुत्वेनोक्ता। धात्वर्थभावनयोर्भेदस्य सूत्रकृत्सूचितत्वं द्योतयितुं 'यद्भावार्थाः कर्मशब्दा' इत्यनेन कर्मशब्देनाभिधीयत इत्युक्तम्।

नन्वेवं सति कृभ्वस्तयः क्रियासामान्यवचनाः। क्रियाविशेषवचनाः पचत्यादय इत्यादियागादिधात्वर्थानां क्रियाख्यभावनाविशेषस्मरणं न युज्यते इत्याशङ्क्याह—**विशेषणेति**। भुवो णिजन्तस्य क्रियासामान्यवचनताभिप्रेता अस्तेरप्यार्द्धधातुके णिचि कृतेऽस्तेर्भूरिति भ्वादेशस्मृतेर्भावनाख्यक्रियासामान्यवाचित्वोपपत्तिः। ननु क्रियाशब्दो यथा 'तद्भूतानां क्रियार्थेन सामाम्नायः। आम्नायस्य क्रियार्थत्वात्, तेभ्यः क्रिया प्रतीयते, क्रियायां पुरुषश्रुतिः। प्रतिषेधेषु कर्मत्वात् क्रिया स्यात् क्रिया स्याद्धर्ममाणामाश्रितत्वात्क्रियाया ह्यस्तिसम्बन्धः क्रियातो व्यपदिश्येरन्, तस्य क्रियाग्रहणार्थोक्तं क्रियाभिधानमित्यत्र। धात्वर्थेऽपि तथा तुल्यत्वाक्रिययोर्न क्रियार्थानां संस्कारे तु क्रियान्तरमित्यत्रोभयो।।

कर्मशब्दश्च यथा फलस्य कर्मनिष्पत्तेः, भावार्थाः कर्मशब्दाः, तद्भेदात्कर्मणोऽभ्यासः, संख्यया कर्मभेदः स्यात्, फलश्रुतेस्तु कर्म स्यात्, फलस्य कर्मयोगित्वात्, समेषु कर्मयुक्तं स्यात्, संस्कारश्चाप्रकरणे, कर्मशब्दत्वात्कर्मणः श्रुतिमूलत्वात् एतेषां कर्मसम्बन्धात्केवले कर्मशेषः स्यात्कर्माण्यपि जैमिनिः, कर्तृगुणेषु कर्मसमवायात्, अचोदितं कर्म भेदात् कर्मणो चोदितत्वात्, कर्मणो व्यवस्था स्यात्, द्रव्याणां कर्मसंयोगे कर्मतो ह्यभिसम्बन्धः तस्मात्कर्मोपदेशः स्यात्। अपि तु कर्मशब्दः स्यात्। कर्मणः पृष्ठशब्दः स्याद्धविर्भेदात्कर्मणोऽभ्यास इत्यत्र धात्वर्थेषु प्रयुज्यते। तथा कर्मैके तत्र दर्शनादित्यत्र तच्छब्दपरामृष्टः कर्मविषयः कर्मशब्द। कर्मणः सम्बन्धात् शब्दान्तरे कर्मभेदस्तदुत्सर्गे कर्माणीत्यत्र भावनायामपि एकस्यैवमित्यत्र चैवं शब्देनानुकृष्टः कर्मशब्दः। फलं वा कर्मसन्निधावविभागात्तु कर्मणः, कर्मधर्मः प्रकरणादित्यत्र चोभयोस्तेनैव व्यतिकरदर्शनाद्धात्वर्थभावनयोरभेदोऽध्यवसीयते इत्याशङ्क्याह—**शास्त्रेति**। भावनावाचिनः क्रियाशब्दस्य, धात्वर्थवाचिनश्च कर्मशब्दस्य, लक्षणयेतरत्र प्रयोगोपपत्तिरित्याशयः। भावनाधात्वर्थस्वरूपवाचिनामपदाभावाच्च लाक्षणिकोऽपि प्रयोगो न दोषायेति, न स्वरूपाभिधानेनेत्यनेन सूचितम्।

एतदेव प्रश्नपूर्वकमुपपादयति-- **कुत इति**। श्लोकं व्याचष्टे—**भावनाशब्दो हीति**। एकस्मिन् क्षणे भावनायाः समस्तोपसंहृतरूपाप्रतीतेः। कथं निष्पन्नरूपतेत्याशङ्क्य, वस्तुतो निष्पन्नरूपत्वेऽपि नामपदसामर्थ्यात् सत्त्वस्य द्रव्यस्य यदेकत्रोपसंहृतत्वं रूपम्,

तदापन्नाम्—आरोपितसिद्धरूपामित्युक्तम्। कथं नामपदसामर्थ्याद् द्रव्यरूपत्वारोप इत्याशङ्क्य, नामपदोक्तो लिङ्गादियोगः कारणत्वेनोक्तः। द्रव्यधर्मलिङ्गादियोगात् भास्वरत्वादिनेव शुक्तौ रजतत्वारोपो युक्त इत्याशयः। न केवलं नामपदेनाख्यातसदृशी भावना नोच्यते, किं तु करोत्यादिधातुनापीत्याह—**तथेति**। अनन्यशब्दवाच्यत्वोपपादनस्यासाधारण्येनाख्यातस्य भावनार्थत्वसिद्धिप्रयोजनत्वं सूचयितुम्। उपसंहरति—**इतीति**।

नन्वाख्यातप्रत्ययस्य भावनार्थत्वेऽपि स्वर्गस्य द्वितीयाभावेन भाव्यत्वाप्रतीतेः स्वर्गकामपदरूपसम्बन्धात् स्वर्गं भावयेदिति ब्रूयुरिति भाष्यमयुक्तमित्याशङ्क्य, स्वर्गस्य भाव्यांशनिवेशमुपपादयितुमुपक्रमते—**सा त्विति**। साध्यत्वान्वयात् प्रागंशान्तरान्वये भावनास्वरूपस्य सङ्कल्पाख्येच्छाविशेषसाध्यत्वेन यागादेस्तत्साधनत्वायोगात्तत्सिद्ध्यर्थं साध्यनिष्ठत्वाभावे भावनात्वस्यैव बाधापत्तेः साध्यांशस्य प्राधान्यात् साधनेतिकर्त्तव्यतांशवच्चापेक्षान्तराधीनत्वाभावात्प्राथम्यमुक्तम्। नन्वेकप्रत्ययोपादानात् भावनामात्रस्य विधेयत्वावगतेः साध्याद्यन्वयः प्रतीतोऽपि विध्यसंस्पर्शादविवक्षितः स्यादित्याशङ्क्याह—**तत्रेति**। 'उपसर्गे घोः किरि'ति विपूर्वस्य दधातेः किप्रत्यये कृते विधिशब्दव्युत्पत्तेः कृदन्तत्वाद्भावप्रत्ययेन विधिसम्बन्धाभिधानम्। नन्वेवमप्येकपदोपादानेन प्रत्यासत्तेर्धात्वर्थस्यैव भाव्यत्वं कस्मान्न भवतीत्याशङ्क्याह—**विधित्वेति**। कमियोगादपि स्वर्गस्य साध्यत्वावगतिः न च पुरुषार्थ इत्यनेनोक्ता।

> यस्य येनार्थसम्बन्धो दूरस्थस्यापि तेन सः।
> अर्थतो ह्यसमर्थानामानन्तर्यमकारणम्॥

इति श्लोकोऽपि चाम्नानसामर्थ्याच्चोदनार्थेन गम्येतार्थानाम् ह्यर्थवत्त्वेन वचनानि प्रतीयन्तेऽर्थतो ह्यसमर्थानामानन्तर्येऽप्यसम्बन्धः तस्माच्छ्रुत्येकदेशः स इति विश्वजिदधिकरणसिद्धान्तसूत्रगतस्यार्थानां ह्यर्थवत्त्वेनेत्याद्यवयवस्य योन्यतानुरोधेन व्यवहितान्वयप्रतिपादनपरतया व्याख्यानात्तत्रैव पूर्वाचार्यैर्वक्ष्यतइत्यौचित्यालोचनया प्रतिभाति। पदश्रुत्या धात्वर्थस्य साध्यत्वावगमेऽप्येकाभिधानश्रुत्या पुरुषार्थसाध्यत्वावगमाद् बाध इति सकलस्य तात्पर्यम्।

यद्वा विरोध एव नास्तीत्याह—**किं चेति**। श्लोकं व्याचष्टे—**सम्बन्धेति**। एवं भावनाया भाव्यापेक्षायां धात्वर्थस्य भाव्यत्वसम्भवेऽपि विध्यन्वयबलात् पुरुषार्थस्य भाव्यतोक्ता। अधुना इच्छायोनित्वेन भावनायाः समीहितभाव्यनिष्ठत्वावधारणात् भावनास्वरूपालोचनयैव पुरुषार्थस्य भाव्यतामाह-**किं चेति**। श्लोकं व्याचष्टे-**यत्र हीति**। ननु भावनास्वरूपालोचनयैव समीहितसाध्यत्वावगमे स्वर्गकामादिपदं व्यर्थं स्यादित्याशङ्क्याह- **तत्रेति**। नन्वेवमपि स्वर्गादिपुरुषार्थविशेषलाभस्य शास्त्राधीनत्वात् सर्वथा साध्यांशनिवेशस्य विधिविषयत्वनिरासो न युक्त इत्याशङ्क्याह—**तदपि चेति**। साध्यशब्दस्य इष्टतमत्वलक्षणकर्मवाचिकृत्यप्रत्ययान्तत्वेन साधयितुमिष्टमित्येवमर्थत्वात्

स्वर्गादिश्चेष्टतमत्वस्य स्वसम्वेद्यत्वेन शास्त्रानधीनत्वान्न साध्यत्वेन विशेषः शास्त्रादपेक्ष्यते । अपि तु स्वर्गादीनां साध्यानां मध्येऽस्या भावनायाः को विषय इत्येवं विधेयभावनाविषयत्वेनेत्यर्थः । साध्यांशस्य विधेयत्वनिरासप्रयोजनमुपसंहरति—ततश्चेति । एवकारो धात्वर्थनिवृत्त्यर्थः । अश्रुतपश्वादिनिवृत्त्यर्थः कृतास्पदशब्दः । कृतं कमिपदेनास्पदं साध्यांशनिवेशार्हत्वरूपं यस्येत्यर्थः ।

ननु स्वर्गादेः साध्यस्याशास्त्रीयत्वेन सन्निकर्षविप्रकर्षानपेक्षत्वेऽपि भावनाविशेषान्वयस्य शास्त्रीयत्वेन तदपेक्षत्वात्सन्निकृष्टेन धात्वर्थस्य भावनान्वयेन बाधः स्यादित्याशङ्क्याह – धात्वर्थेति । धात्वर्थस्यायोग्यत्वेन साध्यांशनिवेशितयानपेक्षितत्वान्नान्वयः सम्भवतीत्याशयः । न केवलमनपेक्षितत्वाद्धात्वर्थस्य साध्यांशेन नान्वयः, किं तु विधिश्रुतिबाधापत्तेरपीत्याह—विधीति । धातुश्रुतेः प्रत्यासत्तिमात्रबाधात्तरामित्युक्तम् । न केवलं स्वर्गादेरिष्टतमत्वाद्भाव्यत्वम्, किं तु भवितृतयोपादानादपीत्याह—किं चेति । ननु धात्वर्थस्यापि निष्पाद्यत्वाद्भवितृतास्तीत्याशङ्क्याह – न चेति । अशाब्दं भवितृत्वं शाब्दे व्यवहारेऽनुपयोगीति भावः । स्वर्गादेः कथं भवितृतयोपादानमित्याशङ्क्याह—स्वर्गादीनां त्विति । एतदेव प्रश्नपूर्वकमुपपादयति—कुत इति । भवेदेतदित्येवंरूपस्यैवाशस्येच्छात्वादिच्छाविषयत्वोपपादनादेवान्यथानुपपत्त्या भवितृत्वावगतिरिति भावः । स्वर्गाख्यदेशविशेषस्य सिद्धत्वात् भवितृत्वाभावमाशङ्क्य, स्वसम्बन्धित्वेन भवितृत्वं भेदशब्देनोक्तम् । भवितृतयोपादानस्य भाव्यंशान्वयोपयोगित्वे भावनापेक्षाकरणमाह – तेनेति । नन्वेवमप्येकशब्दोपात्तस्य धात्वर्थस्य यागादिनेति भाष्येण पश्चादन्वयाभिधानं न युक्तमित्याशङ्क्याह—तत इति । धात्वर्थस्य करणांशे निवेशाभिधानाद्भावनास्वरूपस्य च निर्ज्ञातसङ्कल्पाख्येच्छाविशेषकरणकत्वेन करणानाकाङ्क्षात्वात्फलान्वितरूपस्य करणाकाङ्क्षयाः फलान्वयोत्तरकालं प्रवृत्तेर्युक्तं पश्चाद्धात्वर्थान्वयाभिधानम् इत्याशयः ।

नन्वेवमपि नामार्थस्य सिद्धत्वेन योग्यत्वात्करणांशान्वये वाच्ये धात्वर्थस्यासिद्धत्वेनायोग्यत्वात्करणांशान्वयाभिधानमयुक्तमित्याशङ्क्याह – तत्रेति । आदिशब्देन नामार्थस्य करणांशानिवेशहेतुर्विप्रकर्षोऽभिप्रेतः । ननु सन्निधिर्योग्यत्वस्याप्यन्वयहेतुत्वान्नामार्थस्य सिद्धत्वेन योग्यत्वात् करणांशनिवेशो युक्तो न धात्वर्थस्यासिद्धत्वेनायोग्यत्वादित्याशङ्क्य प्रामाणान्तराच्चेत्युक्तम् । सिद्धस्यापि मृदादेः पटाद्यवयोग्यत्वेन सिद्धत्वमात्राद्योग्यतानवगतेरदृष्टार्थेषु च कार्यगम्यविशेषयोग्यत्वस्य प्रामाणान्तरेण ज्ञातुमशक्यत्वात्, सामान्यतश्च धात्वर्थस्यापि भोजनादेस्तृप्त्यादिफलसाधनत्वदर्शनेन ज्ञातुं शक्यत्वान्नायोग्यत्वेन धात्वर्थस्य करणांशात्प्रच्युतिर्युक्तेत्याशयः । न च साध्यांशवत्करणांशनिवेशे विधिविरोधोऽस्तीति विध्यविरोधाच्चेत्यनेनोक्तम् । ततश्चायोग्यत्वविरोधलक्षणस्य साध्यांशे धात्वर्थातिक्रमकारणद्वयस्यात्राभावात् यागेनेत्येवमन्वयो विज्ञायतइत्यर्थः । प्रत्युतः नामार्थस्यैव धात्वर्थनिरपेक्षस्य क्वचित्करणत्वानुपलब्धेरयोग्यतातिक्रमणकारणमस्तीति सर्वेत्यनेनोक्तम् ।

यस्त्वनिष्पन्नत्वेनायोग्यत्वं पूर्वपक्षिणोक्तम्। तन्निरस्यति— **यद्यपि चेति।** **नन्वेवं** सति स्वनिष्पत्त्यपेक्षणाद्विलम्बः स्यादित्याशङ्क्य, नामार्थस्यापि नित्यसिद्ध्यभावात् साम्यमाह—**सर्वमेव चेति।** न च प्राक्सिद्धस्यैव शास्त्रेण करणत्वं वाच्यमिति नियमे हेतुरस्तीत्याह **न चेति।** किं चातीतस्यापि ग्रहोपसर्गादिः शुभाशुभोत्पत्तौ वर्तमानस्य च ज्ञानस्यार्थप्रकाशे भविष्यन्त्याश्च वृष्टेर्मत्स्यविकारहेतुत्वदर्शनान्न प्रागसिद्धिमात्रेण साधनांशनिवेशायोग्यतेत्याह—**प्रमाणेति।** उपसंहरति—**तस्मादिति।**

यस्य चेति भाष्यं सङ्क्षेपेण व्याचष्टे—**तच्चेति।** यदा च यागादिधात्वर्थरूपकर्मवाचिभ्यो धातुशब्देभ्योऽपूर्वप्रतीतिः। तदा प्रयोजनवाच्यर्थशब्दाभ्युपगमेन प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूत इति स्मृत्यनुसाराद्धातोरपि भावार्थत्वोपपत्तेः सामानाधिकरण्येन व्याख्यासम्भवात् नावश्यं प्रत्ययांशेन भावार्थाः, धात्वंशेन च कर्मशब्दाः पदरूपाः शब्दा इत्येवं व्याख्येयमित्याह—**ततश्चेति।**

ननु यदि भावनाया भाव्यनिष्ठत्वादीप्सिततमस्य तु कर्मणो भाव्यत्वादनीप्सितधात्वर्थातिक्रमेणेप्सिततमस्य स्वर्गादेर्भावनाकर्मत्वम्, धात्वर्थस्य च भाव्यान्वितभावनारूपे करणत्वम्, ततोऽकर्मकेषु धातुषु कर्माभावाद्भावना न स्यात्, भावनाभ्युपगमे वा तेषामपि सकर्मकत्वापत्तिरित्याशङ्कते—**ननु चेति।** भावनावगतिहेतुत्वाद्वा सकर्मकधातुयुक्तमेवसर्वमाख्यातं प्राप्नोतीत्यर्थादुक्तं शङ्काभिप्राये व्याचष्टे-**तथा हीति।** येन कारणेनेप्सिततमैः स्वर्गादिभिः पदार्थैर्भावनायाः किमित्यंशोऽवरुध्यते। धात्वर्थश्चेप्सिततमभावावरुद्धकिमित्यंशभावनायोगी, तेन कारणेन न कश्चिद्धातुः अकर्मकः स्यादकर्मको वा। यः कश्चिद्धातुः स सर्वो न भावनायोगी स्यादिति द्वेधा योज्यम्। द्वेधा श्लोकं व्याचष्टे— **यदि चेति।** भावनाकर्मणैव धातो सकर्मकत्वे स्यादय दोषः। न त्वेतदस्ति धात्वर्थसाध्यकर्मनिबन्धनत्वाद्धातोः सकर्मकत्वस्येति परिहरति—**नैष दोष इति।**

धात्वर्थसाध्यस्य कर्मणोऽकर्मकेष्वभावान्न सर्वेषां सकर्मकत्वापत्तिरिति पूर्वार्द्धेनाद्यशङ्कापरिहारः। भावनानिबन्धनस्य कर्मणः सर्वत्र भावान्नाकर्मकेभ्य भावनानुपपत्तिरित्युत्तरार्द्धेन द्वितीयशङ्काभिप्रायपरिहारः। धात्वर्थभावनाकर्मणोरभेदे भावाभावव्यवस्थानुपपत्तेः, तत्सिद्धयेऽन्यत्वाभिधानम्। धात्वर्थसाध्यमिति वाच्ये भावनाकर्मणो व्यवहितसिद्धेर्धात्वर्थकर्मणोऽनन्तरसिद्धत्वेनान्यत्वोपपादनार्थम्— **प्राप्यमित्युक्तम्।** कर्मद्वयस्याधिष्ठानान्यत्वनियमाभावेऽपि यदेव धात्वर्थं प्रति कर्मत्वं, तदेव भावनां प्रति न भवतीति। कर्मत्वरूपान्यतोक्ता। यद्धि यथाकथञ्चिदपि धात्वर्थसिद्धौ सत्यामनन्तरं नियमेनोत्पद्यते, तद्धात्वर्थस्वरूपप्रयुक्तत्वाद्धात्वर्थकर्म। यत्त्वन्यप्रेरितेन पुंसानुष्ठितकर्मणि कदाचिदुत्पद्यते कुतश्चिद्वाकारणान्न कदा चिदुत्पद्यते, तन्नियोगप्रयुक्तत्वान्नियोगस्य च भावनाविषयत्वात् भावनाकर्म।

उदाहरणनिष्ठं श्लोकं व्याचष्टे—**ओदनमिति**। पाकसमाप्त्यनन्तरमेवौदनाख्यं कर्मोत्पद्यते, गमनसमाप्त्यनन्तरं च ग्रामप्राप्त्याख्यं, नान्यत्किंचिदपेक्षितमिति द्योतनायापवर्गशब्दः। अधिष्ठानान्यत्वनियमोऽनेनोक्त इति शङ्कानिवृत्त्यर्थं तत्रेत्याद्युक्तम्। धात्वर्थसमाप्त्यनन्तरं नियमेनोत्पद्यमानत्वादोदनस्य धात्वर्थकर्मत्वेऽप्युद्देश्यत्वलक्षणेप्सिततमत्वस्य प्रयत्नाख्यभावनैकगोचरत्वादोदनमात्रोद्देशेन यदा प्रवर्त्तते, तदैकस्यैवोभे प्रति कर्मता। यदा त्वोदनादिकर्मविशिष्टेन धात्वर्थेनावच्छिन्ना भावनाऽन्यद्वेतनलाभादीप्सितममुद्दिश्य प्रवर्त्तेत, तदा कर्माधिष्ठानमपि भिद्यतइत्याशयः।

ननूभयनिष्पत्त्युत्तरकालभाविना वेतनलाभादेः कथं निष्कृष्य भावनाकर्मत्वावधारणेत्याशङ्क्याह—**ततश्चेति**। विप्रकर्षार्थः परशब्दः। धात्वर्थाद्विप्रकृष्टकालत्वेन धात्वर्थान्तरैश्च व्यवधानेन पाकादिधात्वर्थकर्मत्वावधारणाप्यस्मादेव हेतुद्वयादशक्येत्याशङ्क्य, तदवाप्य—**मात्रत्वेनेत्युक्तम्**। धात्वर्थफलस्य स्वरूपप्रयुक्तत्वात् स्वरूपव्यवधाने न शक्यो जन्यजनकभावोऽवसातुम्। भावनाफलस्य तु नियोगप्रयुक्तत्वात्, तस्य च लोके नियोक्तू राजादेः सन्तोषादिपूर्वकफलदानप्रवृत्त्या व्यवधानदर्शनात्। वेदेऽपि योगसिद्ध्यधिकरणन्यायेनानन्तर्यनियमाभावादनन्तरजन्यत्वानपेक्षभावनाव्याप्यमात्रत्वेन नियोगवशाद् गम्यमानत्वात् भावनाकर्मत्वावधारणेत्याशयः। तस्य चाकर्मकधातुयुक्तेष्वप्याख्यातेषु भावाद्भावनावगतिः सम्भवतीति सर्वत्रेत्यनेन सूचितम्।

नन्वकर्मकेषु धात्वर्थकर्मभावेऽपि भावनाकर्माभ्युपगमे स्वास्थ्यम्, शयीतेति द्वितीया कस्मान्न प्रयुज्यत इत्याशङ्क्याह— **तच्चेति**। भावनाया भाव्यनिष्ठत्वाद्भवितुरेव भाव्यत्वात् द्वितीयायाश्च प्राधान्यापरपर्यायेप्सिततमत्वमानवाचित्वेन भवितृत्वानभिधायित्वात्। एदेवं कामशब्दात्विदं भवेदिति भवितृत्वप्रतीतेस्तेनैव भावनाकर्मत्वप्रतीतिः। अग्निमादधीतेत्यादौ तु भावनाकर्मत्वान्यथानुपपत्त्या भवितृत्वकल्पनया क्लेशेन भावनाकर्मत्वनिर्वाह इत्यर्थः।

धात्वर्थभावनाकर्मणोरन्यत्वाभिधानस्याशङ्कानिरासप्रयोजनत्वं पूर्वसूचितं प्रकटयितुमाह—**सत्यपीति**। प्रकटयति—**तेनेति**। नन्वग्निमादधीतेत्यादौ द्वितीयानिर्दिष्टस्यैव प्रायेण भावनाकर्मत्वदर्शनादेशं कामशब्दहेतुकत्वस्य प्रायिकत्वाभिधानमयुक्तं स्यादित्याशङ्क्याह—**यजेरपि त्विति**। विष्णुं यजतीत्यादौ द्वितीयानिर्दिष्टामपि देवतां कामशब्दोपबन्धाभावाद्भावनाकर्मत्वेन त्यक्त्वा, कामशब्दोपबद्धस्य स्वर्गादेरेव भावनाकर्मत्वाश्रयणाद्युक्ता कामशब्दोपबन्धहेतुकत्वस्य प्रायिकतेत्याशयः। द्वितीयोक्तस्य कर्मत्वस्य निर्विशेषत्वाशङ्कानिरासार्थं यजिधात्वर्थकर्मतोक्ता। यागेऽपि देवताया स्वरूपेणासमवायात् कर्मत्वायोगमाशङ्क्यानभिमतमपि पूज्यत्वं त्यज्यमानद्रव्योद्देश्यत्वलक्षणत्वाद्देवतात्वस्य त्यज्यमानद्रव्योद्देश्यस्य च गुर्वादेर्लोके पूज्यत्वदर्शनादुपचारेणोक्तं शङ्कानिरासमुपसंहरति—**तस्मादिति**।

नन्वेवमपि भावनाकर्मणैव तद्विशेषणभूतस्यासनशयनादेरपि धात्वर्थस्य सकर्मकत्वे सकर्मकाकर्मकविभागो न युज्यत इत्याशङ्कते—**कस्तर्हीति**। भावनाविशेषणत्वसाम्येऽपि विभागहेतुमाह—**उच्यत इति**। व्यवहितस्याप्यङ्कुरादिरूपतया बीजादिपरिणतस्य बीजावापादिधात्वर्थकर्मत्वदर्शनात् साक्षाच्छब्देन क्वचिन्नैरन्तर्यं, क्वचिन्नियतरूपत्वमभिप्रेतम्। यदुप्तं बीजं तदेवाङ्कुररूपेण परिणतमिति नियतरूपेण प्रतीतेः। पारम्पर्यशब्देन साक्षात् शब्दोक्तनैरन्तर्याभाववाचिना तदुक्तस्यैव नियतरूपत्वस्याव्यभिचारशब्दोक्तस्य च नियममस्याभाव उपलक्षितः। भावनाकर्माभिधानस्य धात्वर्थाकर्मकत्वोपपादने तात्पर्यं सूचयितुं व्युत्क्रमेण श्लोकं व्याचष्टे—**आसनेति**। श्रान्तस्यासीनस्य सुखीभावात्, शयानस्य स्वास्थ्याभावाद्व्यभिचारोपलब्धेः, कदाचित्प्रबुद्धस्य चिरेणान्नपचनादिना धातुसाम्यलक्षणस्वास्थ्यासद्भावेऽप्यानन्तर्याभावाच्छयानस्यासीनस्य चैतत्फलमिति नियतरूपानिरूपणाद्वा साक्षादनुपपत्तेर्धात्वर्थकर्मत्वायोगादास्यादेरकर्मत्वम्। पच्यादीनां तु धात्वर्थानां विक्लिद्यता तण्डुलादिना, तच्छब्देन परामृष्टगमिधात्वर्थलक्षितं गन्तृसंयुज्यमानेन च ग्रामादिना साक्षादानन्तर्येणेदं तदिति वा नियतरूपतया धात्वर्थसम्बन्धिनौदनरूपापत्त्या प्राप्यमाणत्वेन वा कर्मत्वेन कर्मणा व्यभिचाराभावात्पच्यादीनां धातूनां सकर्मकत्वमिति पचिगम्यादीनामिति धात्वर्थपरतया, स्वरूपपरतया चावर्त्यं योज्यम्।

साध्यसाधनान्वययाभिधानमात्रेण सूत्रव्याख्यानसिद्धेः। किं केन कथमित्याकाङ्क्षात्रयाभिधानमनर्थकमित्याशङ्क्याह—**सेयमिति**। कथं यथा सन्निकर्षं शास्त्रानुसारेण कल्प्यते। कथं वा तदभावाद्यथा कथंचिदुपस्थाप्यमानेत्यपेक्षायां—**श्रुत्यादीत्युक्तम्**। अतिदेशस्योपकारद्वारत्वाद्—**अत्यन्तेत्युक्तम्**। भावनायास्त्र्यंशापेक्षत्वेऽपि स्ववाक्योपात्तसाधनमात्रान्वये विधिपर्यवसानभ्रान्तिं निवर्त्तयितुमाह—**तत इति**।

ननु विशेषणविधिं विना विशिष्टविधिर्न सम्भवतीत्याह—**तद्विधानाच्चेति**। तस्मादित्युपसंहारभाष्यमधिकरणार्थोपसंहारार्थमिति शङ्कां निवर्त्तयितुं सूत्रार्थमात्रोपसंहारार्थत्वेन व्याचष्टे—**इतीति**। कर्मशब्दत्वभावार्थत्वयोरेकैकेनाख्यातोपलक्षणसिद्धेरुभयोपादानानर्थक्यमथेति भाष्येणाशङ्कतोच्यतइत्यनेन भावार्थत्वविशेषणप्रयोजनमुक्तम्। तत्र श्येनादिशब्दानां कर्मनामधेयत्वस्य यजिसामानाधिकरण्याधीनत्वाद्यागादिस्वतन्त्रकर्मशब्दत्यागेनोदाहरणमयुक्तमित्याशङ्क्याह—**भवन्तीति**। ननु श्येनादिशब्दवद्यागादिशब्दानामपि धात्वर्थाख्यकर्मवाचित्वाद्भावार्थता नास्तीत्याशङ्क्याह—**यागादयो हीति**। धातोराख्यातप्रत्ययोपात्तभावनोपश्लिष्टस्वार्थवाचित्वोपलम्भादिहापि भावनोपश्लिष्टस्वार्थवाचित्वं कथं नानुमीयत इत्याशयः। कर्मशब्दत्वविशेषणप्रयोजनाभिधानार्थं केचिदिति भाष्यम्। तत्रोदाहरणमाक्षिपति—**केचिदिति**। ननु णिजन्ताद्भवतेरच्प्रत्ययोत्पादने भावनावाचितया भावशब्दस्य व्युत्पादितत्वात्कथमनुदाहरणतेत्याशङ्क्याह—**तत्रेति**। भवनाख्यप्रयो-

ज्यव्यापारविशिष्टप्रयोजकव्यापारवाचिभावशब्दार्थैकदेशप्रयोज्यव्यापारवाचित्वात् लक्षणयेतरयोरपि भावार्थतोपपत्स्यतइति परिहरति—**तावपि रिवति**। यदा तु भावनाप्रयोजनत्वाभिप्रायो भावार्थशब्दो व्याख्यायते, यदा तु भावनैकदेशभूतभवनवाचित्वेनैषां भावनाप्रयोजनत्वाद्युक्तैव भावार्थतेति परिहारान्तरमाह—**अथ वेति**।

ननु भावादिशब्दानां लक्षणया भावनाप्रयोजनत्वाद्वा भावार्थत्वे कर्माख्यानुष्ठेयव्यापारवाचित्वेन कर्मशब्दत्वान्नानेन विशेषणेन व्यावृत्तिरित्याशङ्कते—**कथं पुनिरिति**। क्रियत इत्यस्मिन्नर्थे करोतेरौणादिके मनिन्प्रत्ययस्मृतेः। कर्मशब्दस्यानुष्ठेयव्यापारवाचित्वाद्भावनादेश्चासिद्धकर्तृव्यापारत्वेनानुष्ठेयत्वात्तद्वाचिनो भवत्यादेर्धातोः कर्मशब्दत्वायोगादुत्तरवार्तिकानुसाराच्चानुष्ठेयव्यापारवाचिसर्वधात्वभिप्रायो धातुमात्रशब्दः। धात्वर्थविशेषानवच्छिन्नायाः भावनाया अनुष्ठातुमशक्यत्वात्तद्वाचिनो धातोरपि कर्मशब्दत्वं नास्तीति परिहरति—**निर्विशेषस्येति**। ननु भवनाख्यधात्वर्थविशेषावच्छिन्नाया भावनायास्तर्ह्यनुष्ठेयत्वात् भावादिशब्दानां कर्मशब्दतोपपत्स्यतइत्याशङ्क्याह—**अत इति**। भवनस्यासिद्धकर्तृव्यापारत्वात् भावनाविशेषणत्वं नास्तीत्याशयः।

किं पुनरित्यादिभाष्येणोदाहरणं प्रश्नपूर्वकं विचारस्वरूपं स्पष्टयित्वा स्थित इत्युक्तम्। तच्छङ्कोत्तरत्वेनावतारयति—**यदीति**। नन्वेवं सति नामधेयचिन्तोपोद्घातत्वेन ततः प्रागवेदं कार्यमिति शङ्कते—**कस्मादिति**। सत्यप्युपोद्घातत्वेन भेदचिन्तयेव नामधेयचिन्तयापि सम्बन्धेऽर्थचिन्तात्मकत्वात्प्रमाणलक्षणासङ्गतेस्तत्र न कृतमित। परिहृति—**प्रमाणेति**। एवं तर्ह्याख्यातपदस्य फलपदान्वयान्नामपदस्य तदन्वयेऽस्मिन्नधिकरणे निरस्ते तदेतरत्तदर्थमित्याख्यातान्वयप्राप्तौ गुणविधित्वेनाख्यातान्वयः नामधेयत्वेन वेति इहापि प्रसङ्गात् सङ्गत्युपपत्तेः। कस्मान्नामधेयचिन्तापीहैव न कृतेति शङ्कते—**अथेति**। प्रासङ्गिकत्वेनानन्तरसङ्गतौ सम्भवन्त्यामपि लक्षणासङ्गतेर्नेह कृतेति परिहरति—**भेदेति**। शङ्काद्वयनिरासमुपसंहरति—**तस्मादिति**।

तथेत्यादिभाष्यं स्पष्टत्वादव्याख्याय, न चेति भाष्यं स्वर्गं भावयेदिति फलान्वयस्य प्रागुक्तत्वात्किं केन कथमिति भाव्याद्याकाङ्क्षाया एवोपायस्योक्तत्वात्तद्विरुद्धपुरुषान्वयाभिधानादयुक्तमाशङ्क्य व्याचष्टे—**न चेति**। अर्थवाचिनः कमिपदस्य लक्षणयाऽर्थिशब्देनाभिधानात्, तस्य चैकादशाद्यभाष्ये फलपरत्वस्य वक्ष्यमाणत्वादविरोध इति भावः। श्येनेनाभिचरन्निति व्यधिकरणविभक्तित्वलक्षणस्य। विविभक्तित्वस्य साध्यसाधनान्वयापादकत्वेन विपरीतसाधनत्वादहेतुत्वमाशङ्क्य, वीत्युपसर्गो विगमार्थो विशेषार्थो वेति द्वेधा व्याचष्टे—**विभक्तित्वाविति**। तस्मादित्युपसंहारभाष्यं फलस्य क्रियेति फलभावनान्वयोपक्रमात्र द्रव्यगुणशब्दाः फलान्वयद्वारापूर्वस्याक्षेपका इत्येवमर्थमिति सूचयन्व्याचष्टे—**तस्मादिति**। एनमेव सिद्धान्तं वृद्धवचनेन द्रढयति—**आह चेति**॥ १ ॥

भा० प्र०—पूर्व अध्याय में धर्म में प्रमाण का निरूपण किया गया है। इस प्रसङ्ग में कहा गया है कि चोदना, अर्थवाद, मन्त्र, नामधेय, स्मृति, आचार वाक्यशेष और सामर्थ्य इन धर्मों के निरूपण के कारण, अर्थात् इनकी सहायता से ही धर्म का स्वरूप अवगत होता है। इस अध्याय में धर्म का स्वरूप, उसका भेद निरूपित किया जा रहा है। शब्दान्तर, अभ्यास, संख्या, नामधेय, गुण एवं प्रकरण इन कारणों से ही धर्म के स्वरूप का ज्ञान होता है—इसका प्रतिपादन कर धर्म का स्वरूप वर्णित होता है। पूर्व में यह प्रतिपादन किया गया है कि धर्म में एक मात्र शब्द ही प्रमाण है। ये शब्द वाक्यात्मक है। पदों की समष्टि ही वाक्य है; अतः पद ही स्वतन्त्र रूप में धर्म का प्रतिपादन करता है, या कोई एक विशेष पद ही धर्म (अपूर्व) का प्रतिपादन करता है-यही संशय है। इस प्रसङ्ग में पूर्वपक्षियों का कहना है कि कोई एक विशेष पद ही अपूर्व का प्रतिपादन करता है—इसका विनिगमन कोई हेतु न होने से "विनिगमना" विरह रूप कारण से सभी पद अपूर्व के प्रतिपादक हैं। अपूर्व को फल मानने से फल के साथ सभी पदों का अन्वय अर्थात् सम्बन्ध रहने से—सभी पदों को अपूर्व का प्रतिपादक मानना उचित है।

इस प्रदर्शित पूर्वपक्ष के उत्तर में सिद्धान्ती का कहना है कि अपूर्व प्रत्यक्ष सिद्ध पदार्थ नहीं है। अपूर्व अर्थापत्ति प्रमाण से कल्पनीय है और कल्पनीय वस्तु के स्थल में यदि फलाधिक्य न रहे तो वहाँ लाघव की कल्पना ही अवलम्बनीय है। यदि विधि-वाक्यस्थ प्रत्येक पद को अपूर्व प्रतिपादक स्वीकार किया जाय तो अनेक पद में एक से अधिक अनेक अदृष्ट अपूर्व की कल्पना करनी पड़ेगी। अनेक अदृष्ट या अपूर्व की कल्पना करने पर किसी अधिक प्रयोजन की सिद्धि नहीं होगी। इसलिए अनेक पदों को अदृष्ट का प्रतिपादक मानने पर **गौरव** दोष का प्रसङ्ग होगा, इसलिए एक पद को ही अपूर्व का प्रतिपादक मानना अर्थात् अपूर्व नामक फल के साथ साक्षात् सम्बन्ध से अन्वित मानना उचित है। उस वाक्य के अन्य पद उसके अपूर्व के साथ ही साक्षात् सम्बद्ध हैं अर्थात् एक ही पद अङ्ग या सहायक होता है। एक पद को अपूर्व का प्रतिपादक मानने पर **'विनिगमनाविरह'** दोष होता है—यह कथन भी सङ्गत नहीं है। क्योंकि, इस स्थल में कल्पनालाघव ही विनिगमक है। अत एव विधिवाक्य का एक पद ही अपूर्व का प्रतिपादक है।

इस प्रसङ्ग में यदि यह कहा जाय कि धर्मविचार के प्रसङ्ग में अपूर्व के विचार की क्या आवश्यकता है? इस आशङ्का में यह कहना है कि यागादिरूप धर्म अपूर्व के द्वारा ही फल का जनक होता है। अतः, यागादिरूप धर्म की फलसाधनता की सिद्धि के लिए धर्म के स्वरूप भेद का विचार करना सफल है।

न्यायमाला में आचार्य माधव ने कहा है कि—'अपूर्वस्यैव धर्मत्वात्' अपूर्व ही धर्म होने से अपूर्व का विचार अप्रासङ्गिक नहीं है। इस स्थल में आगे के अधिकरणों

की सङ्गति रखने के लिए भाष्यकार ने इस उत्सूत्र=सूत्रार्थ से बहिर्भूत अधिकरण की रचना की है।

विधिवाक्य के अन्तर्गत एक ही पद अपूर्व का प्रतिपादक है, यह मानने पर, यह आशङ्का होगी कि विधिवाक्यस्थ द्रव्यवाचक, गुणवाचक एवं कर्मवाचक शब्द होते हैं, क्या उन्हीं से अपूर्व की प्रतीति होती है या भावार्थक=भावना प्रतिपादक शब्द से ही अपूर्व का बोध होगा, जैसे 'सोमेन यजेत', 'हिरण्यमात्रेयाय ददाति'—इन स्थलों में सोम एवं हिरण्य ये दो शब्द द्रव्य के वाचक हैं। 'तस्मात् सुवर्णं हिरण्यं धार्यम्' इस स्थल में हिरण्य शब्द गुण का वाचक है। 'श्येनेनाभिचरन् यजेत', 'चित्रया यजेत' इत्यादि स्थलों में 'श्येन', एवं चित्रा आदि शब्द कर्म के वाचक हैं। पूर्वपक्षी के मत में इन द्रव्यादिवाचक सभी पदों से ही अपूर्व की प्रतीति होती है और यही उचित है। क्योंकि, अपूर्व फल या साध्य है। सिद्ध पदार्थों से साध्य साधित होता है, अतः सिद्ध पदार्थों की कारणता सम्भव है, द्रव्यादि वाचक शब्द ही अपूर्व का प्रतिपादक है। अन्य पक्ष में 'यजति', ददाति आदि शब्द क्रिया के वाचक हैं, क्रिया साध्य है स्वयं सिद्ध नहीं है, क्रिया न होने से वह दूसरे का साधन नहीं हो सकती है, क्योंकि, जिसकी अपने स्वरूप की सिद्धि अन्य के अधीन है, वह कभी भी दूसरे का साधन नहीं हो सकता है, इसलिए द्रव्यादि से ही अपूर्व सिद्धि हो सकती है।

इसके समाधान प्रसङ्ग में सिद्धान्ती का कहना है कि 'भावार्थाः कर्मशब्दान्तेभ्यः क्रिया प्रतीयेत' ये कर्मशब्द अर्थात् कर्म के प्रतिपादक शब्द भावार्थ अर्थात् 'भावना' का प्रतिपादन करते हैं, उसी से क्रिया अर्थात् अपूर्व प्रतीत होता है। 'श्येन' आदि शब्द भावार्थक हैं, किन्तु वे भावार्थ नहीं हैं, अर्थात् 'भावना' का प्रतिपादन नहीं करते हैं, भवन, भाव, भूति आदि कतिपय शब्द भावार्थक हैं, वे कर्म शब्द नहीं है, इसलिए सूत्र में कहा—'भावार्थाः कर्मशब्दाः' इस प्रकार कहकर भावना या कर्मवाचक शब्द का निर्देश किया गया है। अतः यजति, जुहोति, ददाति आदि शब्द ही भावार्थक कर्म शब्द हैं। क्योंकि ये शब्द भावना और कर्म इन दोनों का प्रतिपादन करते हैं, क्योंकि यजेत कहने से अवगत होता है कि याग से भावना=फल का उत्पादन करें, अर्थात् उसी भाव रूप में याग करें, जिससे फल उत्पन्न हो।

यजेत इस पद के मध्य में दो अंश है, 'यज्' धातु और 'इत' प्रत्यय। इत में दो अंश है लिङ्त्व और आख्यातत्व। इत प्रत्यय लिङ्लकार की विभक्ति है, अतः इसमें लिङ्त्व है। दश लकारों में सभी क्रियावाचक होने से लिङ्लकार भी क्रियावाचक है। क्रिया को ही दूसरे शब्दों में आख्यात कहा जाता है। अतः लिङ्लकार में दश लकार साधारण आख्यातत्व है। इस स्थल में इत प्रत्यय का आख्यात अंश भावना कहा जाता है। भावना, व्यापार, उत्पादना एवं क्रिया ये समानार्थक हैं।

'व्यापारो भावना सैवोत्पादना सैव च क्रिया' यह कहा जाता है। णिजन्त भू धातु से युच् (अन) प्रत्यय कर भावना शब्द निष्पन्न होता है उसका अर्थ प्रयोजक व्यापार होता है। यागादि से स्वर्गादि फल उत्पन्न होता है और यागकर्ता यागक्रिया कर स्वर्गादि फल की उत्पत्ति के अनुकूल व्यापार को करता है। क्योंकि कर्ता याग के द्वारा उसके अनुकूल व्यापार न करे तो फल की उत्पत्ति नहीं हो सकती है। इसलिए 'यजेत' का अर्थ 'यागेन भावयेत्' याग के द्वारा वैसा करना होगा जिससे फल उत्पन्न हो। अतः 'यजेत' इस स्थल में जो आख्यात है, उसके द्वारा अर्थ का अर्थात् स्वर्गादि रूप फल की भावना उत्पत्ति के अनुकूल व्यापार प्रयोजक कर्ता का व्यापार ही अभिहित होता है। अतः, इसको अर्थभावना कहा जाता है। आख्यात के द्वारा आर्थी भावना=अर्थभावना अभिहित होती है। लिङ् लोट् आदि विधिवाचक लकारों से शब्द भावना कही जाती है। जैसे—करो यह कहने से क्रियाविशेष में लोक की प्रवृत्ति होती है, वैसे ही 'यजेत' इत्यादि लिङ्लकार आदि श्रवण में भी यागादि में पुरुष की प्रवृत्ति होती है। अतः, क्रियाविशेष में पुरुष की प्रवृत्ति के उत्पादन करने के लिए 'करो' इत्यादि रूप में नियोग का फल है। लौकिक स्थल में नियोग कर्ता जो वक्ता उसके अभिप्राय के अनुसार ही पुरुष की प्रवृत्ति उत्पन्न होने से लौकिक नियोग में शाब्दशक्ति नियोग का हेतु नहीं है। किन्तु, वक्ता का अभिप्राय या वक्ता का व्यापार ही उसका कारण है। क्योंकि, वक्ता का आदेश सुनने पर नियोज्य व्यक्ति अवगत करता है कि—'मत्प्रवृत्त्यनुकूलव्यापारवानयम्' अर्थात् इन व्यक्तियों में मेरे कार्य की प्रवृत्ति के अनुकूल व्यापार है। अर्थात् कार्य में जिससे मेरी प्रवृत्ति उत्पन्न होती है। इस व्यक्ति का वैसा व्यापार हो। किन्तु वैदिक विधिस्थल में ऐसा नहीं कहा जाता है, क्योंकि वेद अपौरुषेय है, वेद का रचयिता कोई पुरुष नहीं है, वेद विधि के स्थल में शब्द की ही एक शक्ति-विशेष अर्थात् व्यापार स्वीकार करना होगा। लौकिक नियोग-स्थल में करो यह कहने से जैसे कार्य की प्रवृत्ति होती है, वैदिक 'यजेत' इत्यादि विधि सुनने पर भी पुरुष की प्रवृत्ति होती है। अतः इस स्थल में शब्द के ही माहात्म्य से पुरुष की प्रवृत्ति होती है। शाब्दीभावना=शब्दभावना कही जाती है। यह भी भावना है, क्योंकि यह भी यागादि क्रिया में पुरुष की प्रवृत्ति की उत्पत्ति की अनुकूलता करती है। अतः, अर्थभावना के स्थल में जैसे कर्ता के व्यापार की भावना कही जाती है वैसे ही इस स्थल में अर्थात शब्द भावना में भी शब्द को भावना कही जाती है। अर्थ-भावना के स्थल में स्वर्गरूप फल उत्पद्यमान है और कर्ता उसका प्रयोजक होता है, इसलिए कर्ता का व्यापार या प्रयोजक व्यापार ही भावना है। शब्दभावना स्थल में भी उसी प्रकार शब्द का व्यापार पुरुष की प्रवृत्ति की उत्पत्ति का हेतु होने से शब्द उसका प्रयोजक है, अतः, शब्द-भावना भी प्रयोजक व्यापार है।

शब्दभावना एवं अर्थभावना इन दोनों का ही 'भाव्य' 'करण' एवं इतिकर्त्तव्यता ये

तीन अंश हैं। कारण पचेत् अर्थात् 'पाक करो' यह कहने पर कैसे और क्या पाक करे, किसके द्वारा पाक करें, ये तीन प्रकार से आकाङ्क्षा या जिज्ञासा होती है। वे यथाक्रम में अन्न का पाक करे अग्नि के द्वारा पाक करे, एवं अग्नि के द्वारा पाक करे अग्निप्रज्वालन अग्नि के ऊपर स्थाली (पाकपात्र) स्थापन, जल प्रयोग, कलछी के द्वारा चलाना आदि इतिकर्तव्यता के द्वारा पाक करे इन तीनों के द्वारा आकांक्षा निवृत्त होती है, वैसे ही 'भावयेत्' अर्थात् उत्पादन करे यह कहने पर किम्, अर्थात् क्या उत्पादन करे, केन, अर्थात् किसके द्वारा उत्पादन करे, कथम्, कैसे उत्पादन करे तीन प्रकार की आकाङ्क्षा जिज्ञासा होती है। इन्हीं को यथाक्रम में भाव्य, करण एवं इतिकर्त्तव्यता कहा जाता है। इनमें समग्र अर्थभावना शब्दभावना का भाव्य अर्थात् उत्पाद्य है, क्योंकि शब्दभावना से अर्थभावना=यागादि में पुरुष की प्रवृत्ति उत्पादित होती है। लिङादिज्ञान उसका कारण है, क्योंकि लिङ् आदि का ज्ञान होने पर ही पुरुष की प्रवृत्ति होती है और अर्थवाद ज्ञाप्य प्रशस्तता ही उसकी इतिकर्त्तव्यता है। इस प्रकार आर्थी भावना के स्थल में स्वर्गादिफल भाव्य या साध्य है, यागादिक्रिया उसका कारण प्रयाज अनुयाज आदि अङ्गकलाप उसकी इतिकर्तव्यता है। अतः, अर्थभावनावाचक आख्यात से ही अपूर्व की प्रतीति होती है। धात्वर्थ उसका करण होता है। 'यजेत' इस स्थल में 'यज्' धातु एवं इत प्रत्यय है, ये दो मिलकर एक पद होने से इत प्रत्यय के आख्यातांश के द्वारा जो भावना कही जाती है, यज् धातु का अर्थ जो याग वही उसकी भावना का प्रत्यासन्न है। इसलिए उसकी प्रथम आकाङ्क्षा होती है, उसकी प्राप्ति होने पर भी प्रयोजन साधन के अयोग्य होता है, ऐसी स्थिति में उसको छोड़कर अन्य के प्रति भी आकाङ्क्षा होती है। किन्तु धात्वर्थ याग स्वर्गादि फल का साधन होने के योग्य होने से आख्यातवाच्यभावना प्रथमप्राप्त एकपदोपात्त यज् धातु एवं इत प्रत्यय दोनों में मिलकर एकपद होने से यज् धातु आख्यात का एकपदोपात्त याग को ही अपने फल के कारण रूप में स्वीकार किया जायगा। यदि कहा जाय क्रियात्मक होने पर याग साध्य होने से करण के अयोग्य है। इसलिए द्रव्यादि को ही करण मानना उचित है। ऐसी स्थिति में द्रव्यादि भी क्रिया का आश्रय न होने पर करण नहीं हो सकता है। अतः, क्रिया अवश्य अपेक्षित है। द्रव्यादि से यागादि का ही उपकार होता है अर्थात् याग क्रिया निष्पन्न होती है—यह प्रत्यक्षदृष्ट है। अतः, द्रव्यादि से जो अपूर्व होगा—यह नहीं कहा जा सकता है। याग साध्यस्वरूप होने पर भी द्रव्यादि से निष्पादित होने से फल का साधन हो सकता है। समान पद से उपात्त धात्वर्थयाग यदि भावना का कारण हो सकता है तो अन्यपद से बोधित द्रव्यादि के प्रति भावना को कारण की आकाङ्क्षा नहीं हो सकती है, क्योंकि याग अन्तरङ्ग होता है, वही प्रथमतः अपेक्षित है। इसलिए धात्वर्थ ही अर्थभावना का करण है। इसीलिए माधवाचार्य ने कहा है—

'धात्वर्थः करणं तस्याः समानपदवर्जितः'

चित्रया यजेत, दर्शपूर्णमासाभ्यां यजेत, इत्यादि स्थल में तृतीय विभक्ति के श्रवण से प्रकृत्यर्थ = धात्वर्थ यागादि की ही कारणता सूचित होती है, इसीलिए आख्यात प्रत्यय प्रयुक्त भावना करे वाचक शब्द से ही अपूर्व की प्रतीति होती है, वही विधि का विषय होता है, अर्थात् फल के साधन रूप में वेद विधि के द्वारा विहित होता है। इसीलिए सूत्रकार ने कहा है—'एष ह्यर्थो विधीयते'। यजेत आदि भावार्थ कर्म वाचक पद राशि साकाङ्क्ष है। कारण, 'यजेत' कहने पर किम्, केन, कथम्, तीन प्रकार की आकाङ्क्षा होती है, इनमें 'काव्य' = साध्य, 'करण' एवं इतिकर्तव्यता को पूर्ण करने लिए प्रकरण पठित सम्पूर्ण शब्द सन्दर्भ का ही भावना से फल के (अपूर्व के) साथ अन्वय हो सकता है। किन्तु, द्रव्यादि शब्द से अपूर्व की प्रतीति होने से प्रकरण पठित सम्पूर्ण शब्द सन्दर्भ का अपूर्व के साथ अन्वय होना दुर्घट है। कारण द्रव्य, गुण आदि सिद्ध स्वरूप है, उनके सुनने पर किम्, केन, कथम् ये तीन आकाङ्क्षाओं का उदय नहीं होता है। इसलिए भावार्थ कर्म शब्द से ही से अपूर्व की प्रतीति होती है। वह भी अपूर्व का वाचक नहीं है, अपितु बोधक या ज्ञापक है, कारण अपूर्व अर्थापत्ति सिद्ध शब्द वाच्य नहीं है। इस प्रस्तुत विचार का फल यह है कि, पूर्वपक्षी का मत स्वीकार पर यज्ञीय द्रव्यादि का नाश होने पर प्रतिनिधि नहीं दिया जा सकता है, किन्तु सिद्धान्ती के मत के अनुसार प्रतिनिधि के द्वारा भी निर्वाह हो सकता है।

'भावार्थः' = भावना प्रतिपादक, = जो प्रत्यय रूप अंश के द्वारा भावना रूप अर्थ का प्रतिपादन करता है। या भाव अर्थात् भावना प्रतिपादन करना जिसका प्रयोजन है। 'कर्मशब्दाः' = कर्मप्रतिपादकशब्दसमूह, = जो प्रकृत्यंश में कर्म का प्रतिपादन करता है ऐसा जो शब्दसमूह। 'तेभ्यः' उनसे, 'क्रिया' = कार्य अर्थात् अपूर्व, 'प्रतीयते' = प्रतीत होता है, एष अर्थः एषः हि अर्थः, हि' = जो साधन, 'एषः अर्थः' = यह अर्थ ही अर्थात् धात्वर्थ ही, 'विधीयते = विहित होता है, अर्थात् फल भावना में कारण रूप से विहित होता है। सभी पद (शब्द) अपने प्रत्ययांश के द्वारा भावना का प्रदिपादन करता है एवं प्रकृत्यंश के द्वारा कर्म का प्रतिपादन करता है, उनसे ही क्रिया अर्थात् अपूर्व की प्रतीति होती है, क्योंकि, धात्वर्थ ही विहित होता है।

इस प्रसङ्ग में युधिष्ठिर मीमांसक ने कहा है :—

यथा भवनं भावो भूतिः—इस पर भट्ट कुमारिल ने लिखा है कि —केचिद् भावार्था कर्मशब्दाः का उदाहरण भावयेत् कुर्यात् देना चाहिये। क्योंकि भूति आदि शब्द प्रयोज्य व्यापारमत के कहने वाले होने से यथावर्णित भावार्थक (= जैसा भावार्थकों का पूर्व वर्णन किया है, वैसे) नहीं होने से ठीक उदाहरण नहीं है। इनमें एवं भाव' शब्द किसी प्रकार से णिजन्त से व्युपत्ति करने पर भाव शब्द हो सकता है, अन्य दो नहीं। वे [दोनों] भी प्रयोज्य व्यापाररूप अंश से किसी प्रकार भावार्थक हो सकते हैं, इसलिए उनको उदाहृत किया है।' स्थिते एतस्मिन्नधिकरणे श्येनेनाभि-

चरन् यजेत, चित्रया यजेत पशुकामः वचनों में श्येन शब्द द्रव्यवाचक और शब्द गुणवाचक होने से गुणविधि है, अर्थवाचक कर्मविशेष का नाम है ? यह विचार प्रथमाध्याय के चतुर्थपाद के क्रमशः पाँचवें सूत्र = चौथे अधिकरण में हो जाने पर ही सम्भव किया गया है, गुणविधि और कर्मनाम का विचार प्रस्तुत अधिकरण के कर्मशब्द भावार्थक है इस विचार में स्थित है। अतः भाष्यकार ने दोनों अधिकरणों के पौर्वापर्य विचार का निर्देश करने के लिये कहा है—स्थिते एतस्मिन्नधिकरणे। विविभक्तिकत्वात्—दर्शपूर्णमासाभ्यां स्वर्गकामः, श्येनेन अभिचरन्, चित्रया पशुकामः इनमें दर्शपूर्णमासाभ्यां श्येनेन, चित्रया तृतीयाविभक्त्यन्त है और स्वर्गकामः, अभिचरन्, पशुकामः प्रथमाविभक्त्यन्त होने से इनका परस्पर सम्बन्ध सम्भव नहीं है। अथवा—स्वर्गकामो यजेत, अभिचरन् यजेत पशुकामो यजेत, पदों का भी परस्पर सम्बन्ध नहीं हो सकता, क्योंकि सम्बन्ध-विभक्ति आख्यात-विभक्ति से भिन्नपदान्तरविषयक होती है ॥ १ ॥

सर्वेषां भावोऽर्थ इति चेत् ॥ २ ॥

शा० भा०—एवं चेद् भावान् पश्यति, अभावशब्दत्वान्न द्रव्यगुणशब्दा अपूर्वस्य विधायका[1] इति। सर्वेषां भावोऽर्थः। स्वर्गकामो दर्शपूर्णमासाभ्यामित्येतयोः संबन्धं यजेतेति वक्ष्यति, श्येनेनाभिचरन्नित्येतयोश्च। तथा, चित्रया पशुकाम इति। तस्मादेतेऽपि साकाङ्क्षत्वाद् भाववचनाः। सर्वेषु भाववचनेषु नास्ति विनिगमनायां हेतुः। कर्मशब्दा एवापूर्वस्य विधायकाः। न द्रव्य-गुणशब्दा इति ॥ २ ॥ आ० ॥

भा० वि०—पूर्वपक्षबीजमनुभाषते—**सर्वेषामिति**। इति चेदिति सूत्रावयवं व्याचष्टे—**एवं चेदिति। अभावशब्दत्वादिति**। भावार्थत्वाभावादित्यर्थः। अभावशब्दत्वासिद्धेरयुक्तमेतदिति सूत्रावशेषं व्याचष्टे-**सर्वेषामिति**। भावनावाचिनोऽपि प्रत्ययस्य करणवाचित्वेन फलपदावगतस्यानिष्टत्वाद्धातोरिति (रपि) प्रत्ययनिरपेक्षस्य भावनावाचित्वाभावेन फलपदान्वयायोगात् प्रत्ययान्वयद्वारा भावनानुरञ्जकस्वार्थत्वलक्षणं भावार्थत्वं वाच्यं तच्च नाम्नोऽपि श्येनेन कुर्यादिति प्रत्ययान्वयोपपत्तेः सममिति भावः। नामपदेनापि प्रत्ययान्वयोपगमे सम्बन्धनिमित्तविभक्तिविगमोऽप्यसिद्ध इत्याह—**स्वर्गकाम इति**। तस्माद्धातुवद्द्रव्यादिशब्दा अपि भावार्थाः प्रत्ययसाकाङ्क्षत्वाविशेषादिति उपसंहरति—**तस्मादिति**।

ननु सर्वेषां भावार्थत्वेऽपि कर्मशब्दत्वाभावात् कथमपूर्वाक्षेपकत्वमत आह—**सर्वेष्विति**। कर्मशब्दस्यापि हि भावनानुरञ्जकस्वार्थवाचित्वादपूर्वाभिधायित्वम्, तच्च नाम्नामपि समानमित्यर्थः ॥ २ ॥

---

१. ब: आभ।

त० वा०— न तावत्प्रत्ययस्येष्टमपूर्वप्रतिपादनम् ।
न च धातोः स्वतस्तत्स्यान्नाम्नो वा परतः समम् ॥

यदि हि भावनावचनस्यैवापूर्वप्रतिपादकत्वमिष्यते, धातोर्वा प्रत्ययनिरपेक्षस्य, ततो नामपक्षो दुर्बलः स्यात्, इह तु तथैव धातोः प्रत्ययसम्बन्धानुगृहीतस्य भावनानुरञ्जननिमित्तं करणवाचित्वं भवत्येवं नामपदस्यापीत्यविशेषः ॥ २ ॥

न्या० सु०—नन्वाख्यातपदादेव भावनाप्रतीतेः । सर्वेषां भावनार्थत्वाभिधानमयुक्तमित्याशंक्याह— **न तावदिति** । अयमाशयः धात्वर्थस्य करणत्वं वक्तुं धातोः फलपदान्वयद्वारेणापूर्वाक्षेपकत्वं यदुक्तम्, तदाक्षेपायेदं सूत्रम्। न च भावनावाचिनः प्रत्ययस्य फलपदान्वयद्वारापूर्वाक्षेपकत्वं सिद्धान्तिनोऽपीष्टम् । धातोरपि स्वतः प्रत्ययनिरपेक्षस्य भावनावाचित्वाभावेन फलपदान्वयायोगान्नापूर्वाक्षेपकत्वमिष्टम् किं तु परतः प्रत्ययान्वयद्वाराभावनानुरञ्जकत्वलक्षणया भावार्थत्ववशात्, तच्च नाम्नोऽपि श्येनेन कुर्यादिति प्रत्ययान्वयेन भावार्थत्वोपपत्तेः समानमिति श्लोकं व्याचष्टे—**यदीति** । भावनावचनस्यैवेत्येवकारेण कारणवाचिशब्दानपेक्षोक्ता । भावनावाचित्वेन तु फलपदद्वारा प्रत्ययस्यापूर्वाक्षेपकतोभयवादिसमानत्वान्न विचार्यत्वेनेष्टेत्याशयः । नामपदस्यापीत्यपिशब्देन श्लोकस्थो वाशब्दार्थोऽप्यर्थे व्याख्यातः ॥ २ ॥

भा० प्र०—भावार्थ कर्म शब्द से ही अपूर्व की प्रतीति हो जाती है, इस कथन पर पूर्वपक्षी का यह आक्षेप है कि भावनायुक्त धात्वर्थ से ही जिस प्रकार अपूर्व प्रतीत होता है वैसे 'स्वर्गकामः दर्शपूर्णमासाभ्यां यजेत' इत्यादि वाक्यों में स्वर्गकामः दर्शपूर्णमासः आदि पद समूह से भी अपूर्व की प्रतीति होगी, क्योंकि, धात्वर्थ के समान ये पद समूह भी भावना के साथ अन्वित होता है और भावना के साथ अन्वित होने पर धात्वर्थ के समान अन्य पदराशि भी अपूर्व का प्रतिपादन करेगी और सभी जब भावना के साथ अन्वित होकर अपूर्व का प्रतिपादन कर सकती है तब विनिगमन का साधन न होने से भावार्थ कर्म शब्द ही अर्थात् भावना के साथ सम्बन्धयुक्त धातु ही अपूर्व का प्रतिपादक है, द्रव्यादि शब्द अपूर्व का प्रतिपादक नहीं है—यह कथन सङ्गत नहीं है ।

'सर्वेषाम्' = विधिवाक्यस्थ सभी पदों का, 'भावः अर्थः' = भावना ही अर्थात् प्रयोजन या प्रतिपाद्य है, 'इति चेत्' = यदि इस प्रकार कहा जाय तो ।

पूर्वपक्षी कह सकते हैं कि सभी पद भावना का प्रतिपादन करते है अतः, भावार्थ कर्म शब्द से ही अपूर्व की प्रतीति होती है यह बात नहीं है ॥ २ ॥

येषामुत्पत्तौ स्वे प्रयोगे रूपोपलब्धिः तानि नामानि । तस्मात्तेभ्यः पराकाङ्क्षा भूतत्वात् स्वे प्रयोगे ॥ ३ ॥

शा० भा०—येषां शब्दानामुच्चारणोत्पत्तौ स्वेऽर्थे प्रयुज्यमानानां रूपमुपलभ्यते । यत् सकृदुत्पन्नं कालान्तरं तिष्ठति, न क्रियेवोत्पन्नमात्रं विनश्यतीत्यर्थः । तानि नामानि । ते द्रव्यगुणशब्दाः । ईदृशो[1] द्रव्यगुणशब्दानामर्थः[2] । ते द्रव्यगुणशब्दा इति वक्तव्ये, तानि नामानीति सूत्रितम् । अतो[3] नामानीत्येषां[4] पर्यायशब्दः । कथं गम्यते ? यत एषां[5] विभक्तयो नामिक्य उच्यन्ते । कतमास्ताः ? वृक्षः, वृक्षौ, वृक्षाः । शुक्लः, शुक्लौ, शुक्लाः—इत्येवमादयः । तस्मात् सम्यक् सूत्रितम् । यत एषां न क्षणिकोऽर्थः ततस्तेभ्यः पराकाङ्क्षा—प्रधानाकाङ्क्षा न विद्यत इति । नैषामुत्पत्तिः[6] कर्तव्या । भूतत्वात् स्वे प्रयोगे स्वप्रयोगकाले विद्यमानत्वादित्यर्थः ॥ ३ ॥

भा० वि—धातुनाम्नोर्वैषम्यप्रदर्शनेन परिहरति—**येषामुत्पत्ताविति** । अनेन नामस्वरूपकथनमुखेन नाम्नः फलपदसम्बन्धे नामार्थस्य सिद्धत्वेन साधनानपेक्षत्वात्तत्र धात्वर्थस्य दृष्टेनोपकारकत्वासम्भवादनेकादृष्टकल्पनाप्रसङ्गः प्रदर्श्यत इति दर्शयन् सूत्रं व्याचष्टे—**येषां शब्दानामिति** । उत्पत्ताविति व्याचष्टे—**उच्चारणोत्पत्ताविति** । स्वे प्रयोगे इति व्याचष्टे—**स्वेऽर्थ इति** । प्रयुज्यतेऽस्मिन्निति प्रयोगः प्रयुज्यमानशब्दविषयीभूते स्वेऽर्थ इति अनेन व्याख्यातं रूपोपलब्धिमन्वयव्यतिरेकाभ्यां विवृणोति—**यत्सकृदिति** । अनेन स्थायित्वं रूपमुक्तम्, इह न नामत्वोपाधौ फलपदसम्बन्धनिरासः किन्तु द्रव्यगुणशब्दत्वोपाधौ, अन्यथा कर्मनाम्नोऽप्यनन्वयप्रसङ्गादिति सूचयन्नाह—**ते द्रव्यगुणशब्दा इति** । नामस्वरूपकथनस्य तदर्थस्वरूपे पर्यवसानं दर्शयन्नाह—**ईदृश इति** । यदि द्रव्यगुणशब्दाः विवक्षिताः किमर्थं तर्हि नामानीत्युक्तमत आह—**ते द्रव्येति** । 'सत्त्वप्रधानानि नामानी'ति नाम्नां सिद्धार्थत्वस्मृतेः तत्पर्यायत्वेन द्रव्यादिशब्दानां सिद्धार्थत्वं दर्शयितुं नामग्रहणमित्यर्थः । नामानीत्यनेन द्रव्यादिशब्दानां पर्यायत्वं प्रश्नपूर्वकमुपपादयति—**कथमिति** । नामिकिरेव विभक्तीः द्रव्यगुणाभिधायिषु यथाक्रमं प्रश्नपूर्वकमुदाहरति—**कतमा इति** । अत उपपन्नं नामग्रहणमित्याह—**तस्मादिति** । तस्मादित्यादिसूत्रावयवं व्याचष्टे—**यत इति** । परा दूरे आकाङ्क्षेत्यनेन लब्धस्य नञर्थस्य विवरणं न विद्यत इति निष्पाद्यत्वेन प्रधानस्य सतो या साधनाकाङ्क्षा, सा न विद्यते अर्थानां निष्पाद्यत्वाभावादि-

---

१. ब. ईदृशा । २. ब. अर्था । ३. ब. यतो ।
४. ब. इत्येष । ५. ब. एतेषां । ६. ब. न तेषां ।

त्यर्थः । कुत इत्यत आह—**न तेषामिति** । नामार्थानामनिष्पाद्यत्वमुपपादयितुं सूत्रशेषं व्याचष्टे—**भूतत्वादित्यादिना** ॥ ३ ॥

त० वा०—यदुक्तं 'यदैकस्मादपूर्वम्, तदेतरत्तदर्थं भविष्यतीति तद्गतं तावद्वस्तुधर्मेण विशेषं दर्शयति ।

कथम्—

बह्वदृष्टप्रसङ्गाद्धि धर्मो नेष्टः पदे पदे ।
नाम्नः फलेन संबन्धे परिहारो न तस्य च ॥

एकस्माददृष्टे कल्पिते, यदीतरद् दृष्टार्थत्वेन तादर्थ्यं भजते, ततो लाघवं लभ्यते । अस्य तु तादर्थ्यसिद्धये ततोऽपि पुनरदृष्टं कल्प्यत एव । ततो वरं फलेनैव सर्वाणि संबद्धानि । न च संबन्धवैरूप्यक्लेशाश्रयणम् । नाम्नश्च फलसम्बन्धेऽवश्यं धात्वर्थस्तदनुग्रहार्थोऽभ्युपगन्तव्यः । स च स्वयं निष्पाद्यः सिद्धरूपस्य नामार्थस्य न शक्नोति दृष्टेनोपकर्तुम् । न हि नामार्थस्तमपेक्षते, शब्दप्रयोगवेलायामेव निष्पन्नतया गम्यमानत्वात् अपेक्षणीयस्य वा सिद्धत्वेनायोग्यत्वात्प्रयुज्यतेऽस्मिन्निति चाभिधेय एव प्रयोगः । तदाधारैव हि निष्पन्नरूपोपलब्धिरनुत्पन्नत्वे क्रियारूपस्य वक्तव्ये, विनाशित्वप्रदर्शनं निष्पन्नस्यापि क्षणिकत्वेन पुनः पुनर्निष्पत्त्यपेक्षोपपत्तेः । तेभ्यः पराकाङ्क्षा—अन्याकाङ्क्षा, निष्पाद्यत्वेन वा प्रधानाकाङ्क्षा न विद्यत इत्यध्याहारः ।

अथ वा तेभ्यः परा—दूरे, आकाङ्क्षेत्यर्थः । कुतः ? भूतत्वादेवेति । स्वरूपकथनार्थमुपन्यस्तं निष्पन्नत्वादेवेति । पुनरन्ते तदेव हेतुत्वेनोद्दिष्टं सूत्रकारेण ॥ ३ ॥

न्या० सु०—ननु भावार्थत्वाविशेषाद्धातुवन्नाम्नोऽपि फलपदान्वयसम्भवान्नियमानुपपत्तौ शङ्कितायां नामाख्यातयोः स्वरूपकथनमसम्बद्धमित्याशङ्क्याह—**यदुक्तमिति** । अयमर्थः धात्वर्थानपेक्षस्य नामार्थस्य भावनानुरञ्जनाशक्तेर्न तावद्धातुतुल्यं भावार्थत्वं नाम्नोऽस्ति तदभावेऽपि दध्नेन्द्रियकामस्येत्यादौ नाम्नः फलपदान्वयदर्शनाद्यथाकथंचित्तु भावार्थत्वमात्रस्य फलपदान्वयोपयोगित्वमाशङ्कावाद्यभिमतमभ्युपगम्य धातुनाम्नोर्विशेषं वक्तुमेतत् सूत्रद्वयम् ।

तत्र यदैकस्मादिति भाष्येण सर्वेषां फलपदान्वये बह्वदृष्टकल्पनापत्तिः, रेफस्य तु तदन्वयेऽल्पकल्पनेति यदुक्तं तत्रैकान्वयेऽपि नाम्नोऽन्वयबहुकल्पना धातोस्त्वन्वयेऽल्पकल्पनेति विशेषः । सार्द्धेन सूत्रेणोक्तः 'आश्रितत्वात्प्रयोगस्येति सूत्रावयवेन । श्रुतिवाक्यकृतइति । अयं च सिद्धसाध्यत्वकृतो विशेषो न श्रुतिवाक्यकृतविशेषवच्छब्दमात्रनिमित्तः । किं तु वास्तवोऽपीति वस्तुधर्मेणेत्यनेनोक्तम् । कीदृशोऽसौ विशेष इति प्रश्नपूर्वं विवरीतुमाह—**कथमिति** । प्रतिपदपक्षादिष्टत्वोपपादनस्यानिष्ठापत्त्यभिधानार्थत्वेन प्रस्तुतो-

पयोगं वक्तुमाह—**कस्मादिति**। कथं नाम्नः फलपदान्वये बह्वदृष्टप्रसङ्गापरिहार इत्याशङ्क्याह—**नाम्नश्चेति**।

ननु सिद्धरूपस्यापि नामार्थस्याश्रयत्वेन निष्पाद्यो धात्वर्थो दृष्टेनोपकरिष्यतीत्याशङ्क्याह—**नहीति**। विधीयमानस्य धात्वर्थस्य किंचित् समीहितं प्रति साधनत्वं विना विधेरपर्यवसानान्नामार्थं प्रति साधनत्वायोगात्, तादर्थ्येन विध्यनुपपत्तेरन्यार्थत्वेनैव विहितस्याश्रयत्वेन ग्रहणात् सत्यप्याश्रयत्वे कश्चिददृष्टो नामार्थस्योपकारो धात्वर्थसाध्योऽस्मिन्पक्षे कल्प्यः स्यादित्याशयः।

आश्रयत्वेन धात्वर्थं गृह्णन्नपि नामार्थः साधनत्वेन नापेक्षते, येन नामार्थस्य फलान्वये धात्वर्थस्तस्य दृष्टेनोपकुर्यादित्यर्थः। **उच्चारणोत्पत्ताविति** भाष्यावयवेनोत्पत्तिशब्दमुच्चारणार्थत्वेन व्याख्याय, स्वेऽर्थ इत्यनेन प्रयोगशब्दो वाच्यार्थत्वेन व्याख्यातः। तत्र प्रयुज्यमानशब्दात्कर्मव्युत्पत्तिरुक्तेत्याभाति। तत्स्वार्थस्योच्चार्यत्वाख्यप्रयोज्यत्वाभावादयुक्तमाशङ्क्याधिकरणव्युत्पत्तिमाह—**प्रयुज्यत इति**। प्रयुज्यमानशब्दविषयभूतेऽर्थे रूपोपलब्धिरिति व्याख्यानेन सूचिता प्रयुज्यमानशब्दविषयत्वाल्लक्षणयार्थस्य प्रयुज्यमानतोक्तेत्याशयः। सूत्रान्त्यप्रयोगशब्दवत् अयमप्युच्चारणार्थतया प्रसिद्धः प्रयोगशब्दो वाच्यार्थतया कस्माद्व्याख्यायत इत्याशङ्क्य प्रयोगस्य सप्तम्या रूपोपलब्ध्याऽऽधारत्वोक्तेर्वाच्याश्रितत्वाच्च तस्या इत्याह—**तदाधारैव हीति**। उच्चारणेऽपि निष्पाद्यरूपोपलब्धेर्निष्पन्नरूपतेह विवक्षितेति निष्पन्नशब्देनोक्तम्। **यत्सकृदिति** भाष्येण रूपोपलब्धिपदं स्थायिरूपाभिप्रायेणान्वयमुखेन व्याख्याय क्रियावैधर्म्याभिधानेन व्यतिरेकमुखेन व्याख्यातम्। तदुभयमपि नामार्थस्य साधनानपेक्षत्वाय निष्पन्नत्वस्य वक्तव्यत्वाद्धात्वर्थस्य साधनापेक्षत्वायानिष्पन्नत्वस्य वक्तव्यत्वादयुक्तमाशङ्क्याह—**अनुत्पन्नत्व इति**। निष्पन्नत्वे नामार्थस्य वक्तव्ये स्थायित्वप्रदर्शनमित्यर्थादुक्तं कर्मनामधेयत्वेन नाम्नः फलपदान्वयस्यानाशङ्क्यत्वात्तन्निरासार्थसिद्धरूपार्थत्वाभिधानानर्थक्यापत्तेः द्रव्यगुणशब्दत्वाभ्युपगमेऽनाशङ्केति सूचयितुम्।

द्रव्यगुणशब्दा इति। व्याख्याते किमर्थं तर्हि नामानीत्युक्तम् इत्याशङ्क्य, सत्वप्रधानानि नामानीति स्मृत्या सिद्धार्थत्वोपपादनार्थत्वं पर्यायत्वाभिधानेन सूचितम्। तत्स्पष्टत्वादव्याख्याय, तस्मात्तेभ्यः पराकाङ्क्षेति सूत्रावयवव्याख्यानार्थं 'यत एषामि'ति भाष्यम्। सूत्रे नञभावादयुक्तमाशङ्क्याध्याहारार्थत्वेन व्याचष्टे—**तेभ्य इति**। स्वयमन्यवाचित्वेन परशब्दं व्याख्याय प्रधानवाचित्वं भाष्योक्तं व्याख्यातुम्—**निष्पाद्यत्वेन वेत्युक्तम्**। निष्पाद्यत्वेन प्रधानस्य सतो या साधनाकाङ्क्षा, सा न विद्यते निष्पाद्यत्वाभावादित्यर्थः।

दूरवाचिना वा परशब्देनैव नञर्थो लभ्यत इत्यन्यथा व्याचष्टे—**अथ वेति**। भूतत्वादित्यादिसूत्रावयवं नैराकाङ्क्षयोपपादनार्थत्वेन व्याचष्टे—**कुत इति**। पौनरुक्त्यं परिहरति—**स्वरूपेति**॥ ३॥

भा० प्र०—पूर्वपक्षी की आपत्ति के निवारण के लिए कहा गया है नाम एवं आख्यात का लक्षण लिखते हुए इनका वैषम्य प्रदर्शित किया जा रहा है। नाम का लक्षण निर्देश करते हुए कहा गया है कि उनकी अपनी उत्पत्ति के लिए क्रिया की अपेक्षा नहीं है। अतः क्रियापद के द्वारा नामपद का कोई दृष्ट उपकार साधित नहीं हो सकता है, इसलिए, नामपद क्रियापद के साथ अन्वित होकर अदृष्ट का प्रतिपादन करता है। ऐसी स्थिति में जब तक नामपद रहेगा तबतक ही अदृष्ट की कल्पना की जायेगी, कारण जब सभी समान बल है, तब एक से अदृष्ट उत्पन्न होगा और अन्य से उत्पन्न नहीं होगा—यह कथन युक्ति विरुद्ध है। इस तरह अनेक अदृष्टों की कल्पना से कोई अधिक फल भी नहीं है। अतः नाम पद भी 'अपूर्व' का प्रतिपादन करता है—यह कहने पर विना किसी कारण के अनेक अदृष्टों की कल्पना करनी पड़ेगी, किन्तु अन्य प्रकार से इस अनेक अदृष्ट कल्पनारूप दोष का परिहार होता है एवं प्रयोजन भी सिद्ध होता है तो इस अनेक अदृष्ट कल्पना का पक्ष स्वीकार करना उचित नहीं है। इसीलिए भट्टपाद ने लिखा है—

'बह्वदृष्टप्रसङ्गाद्धि धर्मो नेष्टः पदे-पदे'

(अनेक अदृष्ट की कल्पना का प्रसङ्ग होने से विधिवाक्यस्थ प्रत्येक पद अपूर्व का प्रतिपादक नहीं है।)

प्रथमाध्याय के चतुर्थपाद के पञ्चम सूत्र में 'श्येनेनाभिचरन् यजेत, चित्रया यजेत पशुकामः' इस वाक्य में श्येन और चित्रा के सम्बन्ध में विचार किया गया है कि गुणविधि है या नामधेय है। सिद्धान्त में इसे नामधेय माना है। नामधेय मानने पर चित्रा और श्येन साध्य होंगे। धातु तुल्य होने पर श्येन और द्रव्य गुणवाचक शब्द भी भावार्थक होंगे इस आशंका के समाधान में भट्ट ने कहा है—अभिचार और पशुकामरूप फल के सम्बन्ध में गुणविधिरूप में सिद्धार्थ है। इसके साथ यह भी ज्ञातव्य है कि साध्य को धात्वर्थ भाव शब्द से कहने पर भी द्रव्य के समान निष्पन्न रूप में ही वह प्रतीत होता है 'कृदभिहितो भावो द्रव्यवत् प्रकाशते=कृत् प्रत्यय से कहा गया भाव द्रव्य के समान प्रतीत होता है। (महाभा० २।२।१९) पाकं करोति, त्यागं करोति। निरुक्तकार ने भी मूर्तं सत्त्वभूतं सत्त्वनामभिः। सत्त्व द्रव्य से कथित भाव मूर्ततत्त्व के रूपमें प्रतीत होते हैं।

'उत्पत्तौ'=सोमेन यजेत इत्यादि कर्मोत्पत्ति वाक्य में 'स्वे प्रयोगे'=अपने प्रयोग के समय अर्थात् सोमेन यजेत इत्यादि शब्द के प्रयोग के=उच्चारण के समय में 'येषाम्' = जिनका अर्थात् जिन पदों के वाच्य सोमादि द्रव्यों की, 'रूपोपलब्धिः' = रूप की उपलब्धि अर्थात् स्वरूप की प्रतीति होती है। 'तानि नामानि' = वे नाम पद; अर्थात् स्वरूप की प्रतीति होती है, 'तानि नामानि' = ये नाम = नामपद अर्थात् उनको नाम कहा जाता है, 'तस्मात्' = इस कारण से, अर्थात् द्रव्य सब सिद्ध स्वरूप

होने से उनके वाचक शब्दों के उच्चारण काल में उनके स्वरूप की उपलब्धि होती है, इसलिए 'तेभ्यः' = उन द्रव्यादि वाचक पदों से 'पराकाङ्क्षा' (न) पर की = अन्य की अर्थात् प्रधान की = भावना की आकांक्षा नहीं होती है। इस स्थल में 'न' इस पद का अध्याहार अथवा परवर्ती सूत्र से अपकर्षण कर व्याख्या करनी होगी। 'भूतत्वात्' = क्योंकि वे भूत अर्थात् सिद्ध स्वरूप होते हैं ॥ ३ ॥

येषां तूत्पत्तावर्थे स्वे प्रयोगो न विद्यते, तान्याख्यातानि । तस्मात्तेभ्यः प्रतीयेताऽऽश्रितत्वात् प्रयोगस्य ॥ ४ ॥

शा० भा०—येषां तु शब्दानामुच्चारणोत्पत्तौ स्वेऽर्थे प्रयोगो न विद्यते—प्रयोगकाले येषामर्थो नोपलभ्यत इत्यर्थः। तान्याख्यातानीति भावशब्दान् पर्यायशब्देनोपदिशति। कथं पर्यायशब्दता[1] भावशब्दानाम्। यत एषां विभक्तय आख्यातिक्य इत्युच्यन्ते। कतमास्ताः? पचति, पचतः, पचन्तीत्येवमादयः। तस्मात्तेभ्योऽपूर्वं प्रतीयेत। भव्यार्थास्ते भूतार्थैः समुच्चरिताः। भूतस्य भव्यार्थतायां दृष्टार्थता। भव्यार्थस्य[2] प्रयोजनवत उत्पत्तिरर्थवती। सा च भूतेन क्रियत इति दृष्टोऽर्थः। भव्यस्य पुनर्भूतार्थतायां न किंचिद् दृश्यते, कल्प्यते[3] चादृष्टम्। तस्मान्न यागो द्रव्यार्थः॥

किंच आश्रितत्वात् प्रयोगस्य। एतेषां प्रयोगः पुरुषेणाऽऽश्रितो भवति। पुरुषसंबद्धा भावनोच्यते। पुरुषं हि वदति भावयेति। तेन स्वर्गकामो यजेतेति पुरुषोऽपि प्रतीयते, यागोऽपि। स्वर्गकामो द्रव्येणेति द्रव्यं प्रतीयते, पुरुषश्च, न तु संबन्धः।

नन्वेतदुक्तं भवति। अर्थिनश्च द्रव्यस्य च संबन्धं यजेतेति वक्ष्यति द्रव्येण भावयेदिति। अतो द्रव्येणाऽर्थस्य[4] भावना गम्येत, आकाङ्क्षा चेति[5]। सत्यं गम्यते। द्रव्येण भावयेदिति तु वाक्येन, यागेन भावयेदिति तु[6] श्रुत्या। यदा[7] तु, यागेन भावयेदिति यागसंबन्धो विधीयते, न तदा द्रव्येण भावयेदिति द्रव्यसंबन्धः। न[8] च द्रव्यासंबन्धे विधीयमाने यजेतेत्यनेन संबन्धः। अनूद्यमाने तु संभवति। न च यौगपद्येन विध्यनुवादौ संभवतः। तस्माच्छ्रुतिवाक्ययोर्विरोधः। विरोधे च श्रुतिर्बलीयसी। तेनार्थिना[9] न द्रव्यसंबन्धः[10]। तत्र द्रव्य-

---

१. ब. पर्यायशब्दो। २. ब. भव्यस्य। ३. कल्प्यमदृष्टं।
४. ब. अर्थभावना। ५. ब. वेति। ६. ब. च। ७. ब. यदायागेन।
८. ब. द्रव्यसंबन्धे विधीयमाने न यागसंबंधः विधीयमाने यज्यर्थेन द्रव्येण संबंधः।
९. ब. तेनार्थिनो। १०. ब. द्रव्येण।

मसति स्वर्गकामसंबन्धे स्वर्गार्थं भविष्यतीत्यनुपपन्नम्। एव विनिगमनायां हेतुर्येन[1] भावशब्दा एवापूर्वस्य चोदकाः। न द्रव्यगुणशब्दा इति। यदा यागेन कुर्यादिति, तदा यागवचनमेव भवति दर्शपूर्णमासाभ्यामिति लक्षणया। दर्शे च पूर्णमासे च यागो विहित इति ॥ ४ ॥

इति प्रथमं भावर्थाधिकरणम्

भा० वि०—एवं नाम्नः फलपदान्वये तदर्थस्य धात्वर्थानपेक्षामुक्त्वा धातोः फलपदान्वये तदर्थस्य नामार्थेऽपेक्षां दर्शयितुमाह—**येषां त्विति**। सूत्रं व्याचष्टे—**येषां त्विति**। उच्चारणोत्पत्तौ प्रयोगो न विद्यत इति व्याहतिमाशङ्क्य व्याचष्टे—**प्रयोगकाल इति**। निषेधस्य विशेषणविषयत्वादविरोध इत्यर्थः।

नन्वन्योत्पादानुकूलार्थाभिधेयित्वेनांशत्रयाकाङ्क्षोत्थापनासूचनार्थं ते भावशब्दा इति वक्तव्यम्, तत्राह—**तानीति**। आख्यातपर्यायत्वं प्रश्नपूर्वकमाह—**कथमिति**। तस्मादित्यादि सूत्रावयवं सोपस्कारं व्याचष्टे—**तस्मादिति**।

ननु धातुभ्यः फलपदान्वयिभ्योऽपूर्वप्रतीतावपि कथं नामार्थोपयोगः तत्राह—**भाव्यार्था इति**। ततः किमत आह—भूतस्येति। उपपादितसाध्यत्वस्य धात्वर्थस्य साधनापेक्षायां नामार्थस्य धात्वर्थान्वये युक्तं दृष्टार्थत्वमित्यर्थः। ननु भाष्योत्पत्तेरप्रयोजनत्वात् कथं तदर्थस्य भूतस्य दृष्टार्थत्वमत आह—**भाव्यस्येति**।

ननु भाव्यस्यापि व्यापारवत्त्वसम्पादनेन भूतार्थता होमस्येव दध्यर्थता तत्राह—**भाव्यस्य पुनरिति**। व्यापारवत्त्वस्य व्यापारसम्बन्धातिरेकिणो भावात्सम्बन्धाय च धात्वर्थविधानादर्शनाद्धोमादेश्च स्वर्गाद्यर्थतया विहितस्येह प्रकरणप्राप्तस्य दध्यादिसम्बन्धोपादानात् प्रकृतस्य च भावस्य प्रयोजनान्तराभावात् भूतार्थतायां दृष्टं प्रयोजनं वाच्यम्, न च तद्दृश्यते अतः कल्प्यमदृष्टमित्यनेकादृष्टकल्पनापत्तिरित्यर्थः, अतो न धात्वर्थस्य नामार्थशेषतेत्युपसंहरति—**तस्मादिति**। प्रयुज्यतेऽनुष्ठीयत इति प्रयोगो धात्वर्थः, बह्वदृष्टकल्पनाभावेन विशेषेण धात्वर्थस्य फलवत्त्वसिद्धावाश्रितत्वादिति हेत्वानर्थक्यमाशङ्क्य हेत्वन्तरार्थत्वेन व्याचष्टे—**किं चेति**। तदेव दर्शयन् सूत्रांशं व्याचष्टे—**एतेषामिति**। **प्रयुज्यतेऽस्मिन्निति** प्रतिपाद्योऽर्थः प्रयोगः, एतेषामाख्यातानामर्थो धात्वर्थोपरक्तभावनाख्या पुरुषेणाश्रितो भवति तेनैकपदोपादानाद्धात्वर्थस्य श्रुत्या भावनान्वयेऽपि, कथं फलान्वय इत्याशङ्क्य प्रकर्षेणाश्रित इत्युक्तम्।

ननु धात्वर्थोपरक्तापि भावना कथं पुरुषेणाश्रिता? तत्राह-**पुरुषसम्बद्धेति**[2]। कथं पुरुषान्विताख्यातैरुच्यते आख्यातेषु पुरुषानुपादानादत आह—**पुरुषं हीति**। पुरुषस्यैवाख्यातैर्भावनायां नियोगयोग्यत्वादाक्षेपलभ्यः पुरुष इत्यर्थः।

---

१. ब, तेन। २. सम्बन्धेति व्याख्यायां पाठः।

नन्वेवं धात्वर्थोपरक्ताया भावनायाः पुरुषाश्रितत्वेऽपि किं भवतीत्यत आह—**तेनेति**। अर्थाक्षिप्तस्य पुरुषस्य फलपदाद्विशेषप्रतीतेराख्यातोपात्तस्य धात्वर्थस्य भावनाद्वारा पुरुषान्वयप्रतीतेश्च धात्वर्थस्य फलान्वयस्सिद्धो भवतीत्यर्थः। द्रव्यादेस्तु भावनाद्वारा पुरुषसम्बन्धाभावान्न तद्विशेषणेन फलेन सम्बन्ध इत्याह—**स्वर्गकाम इति**। द्रव्यादेरपि भावनाद्वारा अन्वयो भविष्यतीति सर्वेषां भावोऽर्थ इत्यत्रोक्तमाशङ्कते—**नन्विति**। यजिसम्बन्धिनोऽपि प्रत्ययस्य निष्कृष्य द्रव्येण भावयेदिति सम्बन्धाद् द्रव्यादिपदस्य फलपदसम्बन्धः प्रतीयते, अतः पुरुषविशेषणस्य फलस्यापि द्रव्येण भावनाद्वारान्वयः सिद्धो भवतीत्यर्थः। प्रत्ययस्य द्रव्यादिसम्बन्धे साकाङ्क्षत्वे हेतुमाह—**आकाङ्क्षा चेति**। चो हेतौ प्रत्ययस्य द्रव्यादिपदसम्बन्धसम्भवेऽपि प्रत्यासत्त्या धातुसम्बन्ध एव युक्त इति दूषयति—**सत्यमिति**।

ननु श्रुतिवाक्याभ्यामुभयोरिपि भावनाद्वारा फलान्वयः प्रतीयतामत आह—**यदेति**। यदा च द्रव्येण भावयेदिति द्रव्यसम्बन्धो विधीयते न तदा यागेन भावयेदिति यागसम्बन्धो विधेयः अनपेक्षितत्वादित्यर्थः। इतश्च नोभयं विधीयत इत्याह—**विधीयमाने चेति**। न द्रव्यसम्बन्धो विधातुं शक्य इति शेषः। उभयविधाने वाक्यभेदप्रसङ्गादिति भावः। अस्तु तर्ह्यनूद्यमाने यागे द्रव्यविधानमत आह—**अनूद्यमाने त्विति**। अन्यतः प्राप्ते यागे तदनुवादेन द्रव्यविधानं भवेत्, यथा होमानुवादेन दधिविधानम्। न चेह यागस्यान्यतः प्राप्तिः तस्माद्यागस्य विध्यनुवादौ युगपदाश्रयितव्यौ न च तौ संभवत इत्यर्थः। अतश्चोभाभ्यामुभयप्रत्यायनमशक्यमित्युपसंहरति—**तस्मादिति**। विरोधेऽपि वाक्याद् द्रव्यान्वयः कस्मान्न गम्यते? तत्राह—**विरोधे चेति**। तेन श्रुतिबलाद्धात्वर्थेनैव पुरुषविशेषणस्य फलस्य भावनाद्वारान्वयः न द्रव्येणेत्याह—**तेनेति**। एवं च यदुक्तं सर्वेषु भाववचनेषु नास्ति विनिगमनायां हेतुः कर्मशब्दा एवापूर्वस्य विधायकाः न द्रव्यगुणशब्दा इतीति। तदनुपपन्नमित्याह—**तत्रेति**। यस्य हि पदस्य फलपदे न सम्बन्धः तदर्थः फलसम्बन्धे सति तत्साधनतयापूर्वहेतुः द्रव्यस्य च फलसम्बन्धासम्भवेन तत्साधनत्वाभावान्नापूर्वसाधनतेत्येष एव कर्मशब्दस्यैवापूर्वाक्षेपकत्वविनिगमनायां हेतुरित्यर्थः। विनिगमनाहेतुसम्भवफलमाह—**तेनेति**।

ननु धात्वर्थस्य फलान्वयेऽपि दर्शपूर्णमासशब्दयोः गुणविधित्वमेव दर्शः कालः पूर्णमासश्चेति कालवाचिताया उक्तत्वान्नामधेयपादे तन्नामत्वस्याविचारितत्वाच्चेत्यत आह—**यदा यागेनेति**। मुख्यार्थसम्बन्धं लक्षणाबीजमाह—**दर्श इति**॥ ४॥

त० वा०—आख्यातवर्ती धात्वर्थः साध्यरूपः प्रतीयते।
तस्मिन्फलवतीष्टे तु नाम्नो दृष्टार्थतेष्यते॥

धात्वर्थस्तावत्प्रकृत्यैव साध्यात्मको विशेषतस्त्वाख्यातगतेन धातुनोच्यमानः। स यदि फलसाधनत्वेन चोद्यते, ततोऽसिद्धरूपत्वात्तस्य साधनाकाङ्क्षायां सत्यां नामपदं गुणविधित्वेन, नामधेयत्वेन वोभयथाऽपि दृष्टेनैव तादर्थ्यं लभते। ननु नामधेयपक्षे नामपदमपि साध्यार्थं भविष्यतीति न धातुतुल्यं स्यात्। न। तस्य फलसम्बन्धे गुणविधित्वेन सिद्धार्थत्वात्।

अपि च—

साध्यात्मकोऽपि धात्वर्थो यदा नाम्नाऽभिधीयते।
तदा द्रव्यवदेवासौ निष्पन्नात्मा प्रतीयते॥

यद्यपि वस्तुस्वरूपेण धात्वर्थः साध्यः तथाऽपि नामपदेनोच्यमानो लिङ्गसंख्यायोगित्वात्सिद्धरूपोऽभिधीयते। अभिधानकृता चाऽऽकाङ्क्षोत्पत्तिर्न वस्तुकृता। तस्माद्युक्ता धातोरेवाऽऽकाङ्क्षा। न नाम्न इति।

किंचाऽऽश्रितत्वात्प्रयोगस्य इति। अधुना शब्दप्रत्यासत्तिकृतो विशेषोऽभिधीयते। पुरुषव्यापारात्मिकायां भावनायां धात्वर्थोपश्लेषोऽपि पुरुषेणाऽऽश्रितः तदतिक्रमहेत्वभावाच्च न नामपदग्रहणम्। तस्मादस्ति विशेषः॥ ४॥

(इति प्रथमं भावार्थाधिकरणम्॥ १॥)

न्या० सु०—आख्यातस्वरूपकथनस्य प्रयोजनमाह—**आख्यातेति**। श्लोकं व्याचष्टे—**धात्वर्थस्तावदिति**। व्यापारात्मकत्वाद्धात्वर्थस्य व्यापारस्य चानुपसंहृतरूपत्वाख्यानिष्पन्नरूपत्वात्स्वभावेनैव साध्यात्मकतेत्याशयः।

ननु नामधेयत्वे नाम्नोऽपि साध्यार्थत्वान्निष्पन्नस्य चानुष्ठेयत्वाख्यसाध्यत्वायोगात्फलपदान्वयः प्रसज्येतेत्याशङ्कते **नन्विति**। नामधेयत्वस्य धातुसामानाधिकरणाभिधानत्वात्फलपदान्वये[1] च समानाधिकरण्याभावान्नामधेयत्वं न स्यादिति परिहरति—**नेति**। अन्योत्पादानुकूलार्थाभिधायित्वेन साध्यसाधनेतिकर्त्तव्यताकाङ्क्षोत्थानसूचनार्थं ते भावशब्दा इति वक्तव्ये तान्याख्यातानीत्यभिधानात् सूचितम्।

परिहारान्तरमाह—**अपि चेति**। श्लोकं व्याचष्टे—**यद्यपीति**। ननु सिद्धत्वरूपतयाभिधानेऽपि वस्तुतः साध्यत्वात् साधनाकाङ्क्षानुष्ठेयत्वनिर्वाहार्थं च फलाकाङ्क्षा भविष्यतीत्याशङ्क्याह—**अभिधानेति**। यागादिशब्दोच्चारणेऽपि साध्यत्वानुरक्तावाकाङ्क्षानुपलब्धेरभिधानकृतैवाकाङ्क्षेत्याशयः। 'तस्मात्तेभ्यः प्रतीयेते'ति तस्माच्छब्देन साध्यत्वोपपादितसाधनाकाङ्क्षावशान्नामार्थस्य धात्वर्थान्वये दृष्टार्थत्वं हेतुत्वेन परामृष्टमिति सूचयितुम्। उपसंहरति—**तस्मादिति**। अनेन च भव्यार्थास्त इति भाष्यमपि तात्पर्यतो व्याख्यातम्। उच्चारणाख्यप्रयोगकाले स्वार्थे प्रयोगो न विद्यत इत्युक्ते **प्रयोगकाले**

---

१. समानाधिकरण्याधीनत्वादिति २ पु० पा०।

प्रयोगनिषेधायोगाद्विशेषणभूतेऽर्थे निषेधावताराद्प्रयोगकालेऽर्थो न विद्यत इत्यर्थप्रतीतेः। स्पष्टत्वात्तद्व्याख्यानार्थं भाष्यं न व्याख्यातम् ।

अदृष्टकल्पनाल्पत्वबहुत्वकृतेन विशेषेण धात्वर्थफलवत्त्वसिद्धेराश्रितत्वादिति हेत्वानर्थक्यमाशङ्क्य किं चेति भाष्येण हेत्वन्तरसमुच्चयार्थत्वेन व्याख्यातम् । पूर्वोक्ताद्विशेषादेतदुक्तस्य विशेषस्य विवेकमाह—**किं चेति** । एकपदोपादानाद्धात्वर्थस्य प्रत्यासत्तिलक्षणया श्रुत्या भावनान्वयः । नामार्थस्य वाक्येनेत्यर्थः । धात्वर्थानपेक्षस्य नामार्थस्य भावनानुरञ्जकत्वाद्वस्तुतोऽपि धात्वर्थस्यैव प्रत्यासत्तेर्न शब्दग्रहणाद्वास्तवत्वनिवृत्तिः ।

अत्र भाष्यकृतौ तेषामाख्यातानां प्रयुज्यतेऽस्मिन्निति व्युत्पत्त्या प्रयोगशब्दवाच्यः प्रतिपाद्योऽर्थो धात्वर्थानुरक्तभावनाख्यः पुरुषेणाश्रित इति सूत्रावयवस्वरूपं व्याख्याय तदुपपादनार्थं पुरुषान्वितभावनाऽख्यातैरुच्यत इत्युक्तेन व्याख्यातेषु पुरुषानुपादानात्कथं तदन्वयावगतिरित्याशङ्क्य पुरुषस्याख्यातैर्भावनायां नियोगादर्थाक्षेपलभ्यत्वमुक्त्वा, तथापि धात्वर्थस्य फलपदान्वयः कथमित्याशङ्क्यार्थाक्षिप्तस्य पुरुषस्य फलपदाद्विशेषप्रतीतेराख्यातोपात्तस्य धात्वर्थस्य भावनाद्वारा पुरुषान्वयः प्रतीयते, न तु द्रव्यादेर्नामार्थस्येत्युक्ते तस्यापि भावनाद्वारान्वयो भविष्यतीति, सर्वेषां भावोऽर्थ इति सूत्रोक्तं चोद्यमनुभाष्य श्रुतिवाक्यविशेषाभिधानेन परिहृतम् । तत्सङ्क्षेपतो व्याचष्टे—**पुरुषेति** । भावनायां पुरुषस्य नियोज्यत्वोपपादनार्थं तद्व्यापारतोक्ता । धात्वर्थानवच्छिन्नभावनानुष्ठानाशक्तेस्तदुपश्लेषो भावनायाः पुरुषेणापेक्षित इत्युक्तम् । दर्शपूर्णमासाभ्यामिति नाम्नः फलपदान्वये दर्शकालः पौर्णमासकालश्चेति भाष्ये कालवाचित्वाभिधानान्नामधेयविचारेऽनुदाहृतत्त्वाद्धात्वर्थस्यापि फलान्वये गुणविधित्वाशङ्काप्रसक्तेस्तन्निरासार्थं दर्शपूर्णमासकालान्वितस्यैवाग्नेयादियागस्य विहितत्वात्, तत्प्रख्यन्याये लक्षणया यागनामधेयत्वाभिधायकम् । यदा यागेनेति भाष्यं स्पष्टत्वान्न व्याख्यातम् ॥ ४ ॥

॥ इति प्रथमभावार्थाधिकरणम् ॥

भा० प्र०—क्रियापद ही अपूर्व का प्रतिपादक होता है, इसके प्रतिपादन करने के लिए क्रियापद का लक्षण लिखते हुए यह सूत्र कहा है ।

यदि क्रियापद को अपूर्व का प्रतिपादक कहा जाय तो कल्पना लाघव होगा, क्योंकि क्रिया साध्य है और द्रव्य आदि क्रिया का ही साधन करते हैं—यह कल्पना नहीं है, वरन् दृष्ट अर्थात् प्रत्यक्ष सिद्ध है । माधवाचार्य ने कहा है—

'द्रव्याद्युपकृतिर्दृष्टा धात्वर्थोत्पादनात्मिका ।'

धात्वर्थ याग आदि क्रिया का उत्पादन करना ही द्रव्यादि का उपकारक है—यह प्रत्यक्ष सिद्ध है । इसीलिए नामपद से अपूर्व की प्रतीति स्वीकार नहीं की जाती है । ऐसी स्थिति में एकमात्र आख्यात ही अवशिष्ट रहने से वही अपूर्व का प्रतिपादक

है। इस दृष्टि से विनिगमनाविरह का प्रसङ्ग ही नहीं रहता है, क्योंकि, विवादास्पदीभूत अनेक पक्षों का प्रसङ्ग रहने पर यदि एक ही पक्ष का जिससे समर्थन होता है वैसी युक्ति के न रहने पर ही विनिगमना विरह दोष होता है। किन्तु, इस स्थल में अनेक पक्षों का प्रसङ्ग ही नहीं है तब विनिगमनाविरह का प्रसङ्ग ही कहाँ है। यदि विवादास्पदीभूत अनेक पक्ष रहें, तब भी धात्वर्थ को भावना का करण मानने पर बलवत्तर एकपद श्रुति का प्राधान्यरक्षित होता है। पक्षान्तर में द्रव्यादि को भावना का करण मानने पर वाक्यार्थ की विधायकता स्वीकार की गयी है। किन्तु वाक्य की अपेक्षा श्रुति का प्राबल्य अधिक होने से एकपदश्रुतिलभ्य धात्वर्थ को ही भावना का करण मानना होगा। इसीलिए आचार्य माधव ने कहा है—

'धात्वर्थः करणं तस्यां समानपदवर्णितः'

समान पद से वर्णित एक पद से लभ्य धात्वर्थ ही उस भावना का करण होता है। इसलिए कल्पनालाघव रूप युक्ति एवं एक पद श्रुति ही इस स्थल में विनिगमक है।

'येषाम्' = जिन पदों का 'तु' = किन्तु 'उत्पत्तौ' = उत्पत्ति विधियों में अर्थात् उत्पत्ति विधियों के सभी पदों के प्रयोग में 'स्वे अर्थे' = अपने अर्थ में 'प्रयोगः' = प्रयोग अर्थात् सत्ता, 'न विद्यते' = नहीं रहती है, 'तानि आख्यातानि'= वे ही आख्यात अर्थात् क्रिया है, 'तस्मात्' = इस कारण से, = शब्द प्रयोग काल में उनका स्वरूप असिद्ध होने से, 'तेभ्यः' = उन आख्यात अर्थात् क्रियापदों से, 'प्रतीयेत' = अपूर्व प्रतीत होता है, 'आश्रितत्वात् प्रयोगस्य' = क्योंकि प्रयोग अर्थात् उनकी उत्पत्ति आश्रित अर्थात् पुरुषाश्रित है। जिस समय क्रियावाचक पद का उच्चारण किया जाता है, उस समय क्रिया का स्वरूप नहीं रहने से वह पुरुष का उपाश्रयण कर द्रव्यादि से सिद्ध होती है, इसलिए क्रियावाचक पद ही अपूर्व का प्रतिपादक होता है ॥ ४ ॥

अथ द्वितीयमपूर्वाधिकरणम्

कथं पुनरिदमवगम्यते, अस्ति तदपूर्वमिति ? उच्यते—

[२] चोदना पुनरारम्भः ॥ ५ ॥ सि० ॥

शा० भा०—चोदनेत्यपूर्वं ब्रूमः। अपूर्वं पुनरस्ति, यत आरम्भः शिष्यते स्वर्गकामो यजेतेति। इतरथा हि विधानमनर्थकं स्यात्। भङ्गित्वाद्यागस्य। यद्यन्यदनुत्पाद्य यागो विनश्येत्, फलमसति निमित्ते न स्यात्। तस्मादुत्पादयतीति[1]। यदि पुनः फलवचनसामर्थ्यात्तदेव न विनश्यतीति कल्प्यते। नैवं शक्यम्। न हि कर्मणोऽन्यद्रूपमुपलभामहे। यदाश्रयं देशान्तरं प्रापयति, यत्कर्मेत्युच्यते[2]। न तदात्मनि समवेतम्। सर्वगतत्वादात्मनः। सर्वत्र कार्यो-

१. ब. तस्मादुत्पादनीयमिति। २. ब. क. तत्कम।

पलम्भः सर्वत्र भावे लिङ्गम् । ननु तदेव देशान्तरादागमनस्य । न ह्यसत्यागमने किंचिद्विरुद्धं दृश्यते ।

यत्र समवेतमासीत्, तद्विनष्टं द्रव्यम् । तस्य विनाशात् तदपि विनष्टमित्यवगम्यते । आश्रयोऽप्यविनष्ट इति चेत् न ? भस्मोपलम्भनात् । सत्यपि भस्मन्यस्तीति चेत् ? न । विद्यमानोपलम्भनेऽप्यदर्शनात् । फलक्रिया लिङ्गमिति चेत् ? एवं सत्यदर्शने समाधिर्वक्तव्यः । सौक्ष्म्यादीनामन्यतमद्भविष्यतीति यदि[1] चिन्त्यते, कल्पितमेवं सति किंचिद्भवति[2] । तत्रापूर्वं वा कल्प्येत, तद्वेत्यविशेषकल्पनायामस्ति हेतु[3]:, न विशिष्टकल्पनायाम् ।

अनाश्रितं कर्म भविष्यतीति चेत्[4] ? तदपि तादृशमेव । स्वभावान्तरकल्पनेन देशान्तरं न प्रापयिष्यतीति[5] तादृशमेव । तस्माद्भङ्गी यजिः । तस्य भङ्गित्वादपूर्वमस्तीति ।

किं चिन्तायाः प्रयोजनम् । यदि द्रव्यगुणशब्दा अप्यपूर्वं चोदयन्ति । द्रव्यगुणापचारे न प्रतिनिधिरुपादातव्यो यथा पूर्वः पक्षः । यथा तर्हि सिद्धान्तो द्रव्यं गुणं वा प्रतिनिधाय प्रयोगोऽनुष्ठातव्य इति ॥ ५ ॥

भा० वि०—नन्वस्मिन्नध्याये भेदप्रतिपादनं तात्पर्येणान्यदुपोद्घातादिनेत्युक्तम्, तदा पूर्वसद्भावप्रतिपादनस्यातथाभूतस्य कथं सङ्गतिः ? इत्याशंक्य—तान् दर्शयति—**कथं पुनरिति** । प्रमाणाभावेनापूर्वस्यैवाभावात् केभ्योऽपूर्वं प्रतीयत इत्युपायविशेषविचारोऽनुपपन्न इत्याशङ्कायां पूर्वाधिकरणार्थस्थापनायापूर्वसद्भावं प्रमाणोपन्यासेन सूत्रकृदाहेत्यर्थः । तत्र स्वर्गकामो यजेतेत्येवमादिषु अपूर्वं नाम स्वर्गयागातिरिक्तमस्ति न वेतिवाक्यावगतसाध्यसाधनसम्बन्धस्यान्यथानुपपत्त्युपपत्तिभ्यां सन्देहे सूत्रं व्याकुर्वन् सिद्धान्तमाह **चोदनेत्यादिना** । न च प्रथमं पूर्वपक्षमुक्त्वा सिद्धान्तो वक्तुमुचितः स कस्मान्न प्रथममेवोच्यत इति वाच्यम्, अपूर्वप्रमाणदूषणात्मकत्वात् पूर्वपक्षस्य प्रदर्शिते प्रमाणे तदवसरादित्यभिसन्धिः, चोद्यत इति चोदनेति कर्मव्युत्पत्तिरपूर्वमित्यनेनोक्त-चोदनासूत्रोक्तां चोदनामनूद्यारम्भकवाक्यत्वं प्रवर्तकवाक्यत्वं तस्या लक्षणं दर्शयितुं सूत्रमिति वृत्त्यन्तरोक्तं दूषयितुं ब्रूम इत्युक्तम्, तत्र प्रकृतासङ्गतिरेव दोष इति भावः । पुनश्शब्दस्य शङ्कानिरासार्थत्वं अस्तिर्भवतिपरः इत्यस्तिशब्दं च सिद्धं कृत्वा प्रतिज्ञा-वाक्यार्थमाह—**अपूर्वमिति** । हेतुभागं पूरयन् व्याचष्टे—**यत इति** । आरभ्यते फलमनेनेति आरम्भः यागः यतो यागेन स्वर्गं भावयेदिति यागस्य

---

१. ब. यद्युच्येत । २. ब. भवतीति । ३. ब. प्रमाणम् ।
४. ब भविष्यतीति तादृश । ५. ब. तदपि तादृश ।

फलकरणत्वप्रतिपादकं वाक्यमेवापूर्वान्तर-व्यापारवतेति वाक्यैकदेशेनान्यथानुपपत्तिकल्पितेन सहितमपूर्वं गमयति ततोऽस्त्येवेत्यर्थः।

नन्वपूर्वाभावे यागस्य फलकरणत्वविधेः का अनुपपत्तिरत आह—**इतरथेति**। यागस्येति व्यवहितफलकरणत्वानुपपत्तेरिति शेषः। ननु चिरविनष्टेऽपि पूर्वभावित्वस्य कारणत्वलक्षणस्य भावात्कानुपपत्तिः? तत्राह—**यद्यन्यदिति**। शक्तिरूपं व्यापाररूपं वा अपूर्वमित्यर्थः। अनन्तरपूर्वभाविन एव निमित्तत्वादित्यभिसन्धिः यस्माच्छ्रुतं साधनत्वं अन्योत्पादनं विनानुपपन्नं तस्मादित्युपसंहरति—**तस्मादिति**। एवं सिद्धान्तमुक्त्वा पूर्वपक्षमाह—**यदि पुनरिति**। तदेव यागरूपम्।

अयं भावः—अर्थापत्तिर्हि अन्यथानुपपद्यमानदर्शनादुपपादके बुद्धिः, न चेहानुपपद्यमानं किंचित्, न च चिरविनष्टस्य साधनत्वमनुपपन्नं शास्त्रप्रामाण्यादुपपत्तेः, अथ दृष्टविरुद्धेऽर्थे शास्त्रस्यापि न प्रामाण्यम्, तर्हि फलवचनसामर्थ्यात् तस्यैव स्थायित्वं कल्प्यताम्, न च तत्रापि दृष्टविरोधः तदानुपलब्धिहेतोरपि प्रतिबन्धस्य कल्प्यमानत्वात्, न चापूर्वस्य कल्पितस्योपपादकत्वसम्भवः, स्वर्गसाधनतया यागसाध्यतया वा तत्कल्पनेऽपि श्रुतस्वर्गयागसम्बन्धानिर्वाहात्। न चापूर्वस्य यागशक्तितया व्यापारतया वा तदभेदात्तन्निर्वाहः शक्तिव्यापारयोराश्रयपरतन्त्रतया तन्नाशेनानुत्पादकत्वप्रसङ्गात्, अतोऽर्थापत्तेरेवाभावात् नापूर्वसिद्धिरिति तदेतत्सिद्धान्ती दूषयति—**नैवं शक्यमिति**। कल्पयितुमिति विपरिणतस्यानुषङ्गः प्रतिक्षणविनाशिपूर्वापरीभूतावयवत्वेनोत्पत्तिसमये सिद्धरूपाप्रतीतेः उत्पत्त्युत्तरकालं स्वरूपस्यैवाप्रतीतेः स्थायिरूपानुपलम्भादिति हेत्वर्थः। किञ्च किमनाश्रितस्य कर्मणः स्थायित्वमुताश्रितस्य नाद्य इत्याह—**यदाश्रयमिति**। तस्यानाश्रितत्वोपगमे स्वभावविरोध इति भावः। यद्यपि भङ्गित्वाद्यागस्येति यागः प्रकृतः तथापि त्याज्यमानद्रव्यगतस्यापि प्रक्षेपांशस्य त्यागात्मकयागेऽन्तर्भावाच्चलनात्मककर्मोदाहरणमिति मन्तव्यम्, द्वितीयेऽपि किमात्माश्रितं उत प्रदेयद्रव्याश्रितं नाद्य इत्याह—**न तदिति**। आत्मनः सर्वगतत्वेन पूर्वोत्तरदेशविभागसंयोगयोरभावान्न तत्फलस्य कर्मणः तत्र समवाय इत्यर्थः। कथं सर्वगतत्वमस्येति तत्राह—**सर्वत्रेति**। यत्र यत्र गम्यते तत्र सर्वत्र सुखादिकार्योपलब्धेः तत्कारणस्यात्मनः सर्वत्र भावोऽनुमीयत इत्यर्थः।

ननु साध्यविपरीतव्यापृतया विरुद्धोऽयं हेतुरिति देहपरिमाणात्मवादी चोदयति—**नन्विति**। लिङ्गमित्यनुषङ्गः, आगमनस्यैवेति सम्बन्धः न ह्याकाशवद्युगपदेव सर्वत्र दृष्टकार्यत्वमभिमतम्, किन्तु क्रमेण ततश्च क्रमकार्यकारित्वस्यासार्वत्रिकत्वेन देहादौ व्याप्तेः देहादिवत्तत्र तत्रागमनमेवानुमीयते न सार्वत्रिकत्वमित्यर्थः। परिहरति—**नहीति**। यद्यसत्यागमने कार्यदर्शनं विरुध्येत तर्ह्यागमनमनुमीयेत तच्चागमनरहितस्यापि तत्र नित्यं सत उपपद्यते, न च क्रमकारिता-

सम्भवः देहावच्छिन्नस्यैव कार्यकरितया तत्क्रमादेव क्रमकारित्वोपपत्तेरिति भावः। एवमात्मनस्सर्वगतत्वोपपादनेनात्माश्रितं कर्मेति पक्षं दूषयित्वा **प्रदेय**-द्रव्याश्रयमिति द्वितीयं दूषयति—**यत्रेति**। **भस्मेति**। द्वचवदानविरोधि-द्रव्यान्त-रोपलम्भान्न तस्या विनाशश्शङ्कनीय इत्यर्थः। द्वचवदानावस्थाविशेषरूपत्वात् भस्मनो न विरोधि द्रव्यत्वमिति शङ्कते—**सत्यपीति**। उपलभ्यमानेऽपि भस्मनि द्वचवदानरूपाप्रत्यभिज्ञानान्नावस्थाविशेषत्वमिति परिहरति— **नेति**।

नन्वदृश्यमानमपि व्यवहितफलसिद्ध्यन्यथानुपपत्तिकल्पितस्थायित्वस्य कर्मणो निराश्रयत्वानुपपत्तेः आश्रयतयानुमास्यत इत्याशङ्क्यते—**फलक्रियेति**। फलार्था क्रिया फलक्रियेति विग्रहः। अदर्शनोपपादकहेत्वभावेन योग्यानुपलब्धिविरोधा-न्नानुमानं संम्भवतीति परिहरति—**एवं सतीति**। दर्शनप्रतिबन्धकमपि कल्प्यत इति शङ्क्यते—**सौक्ष्म्यादीनामिति**। तर्ह्यपूर्वकल्पनायामपि न दोष इति परि-हरति—**कल्पितमिति**। अविशेषकल्पनायामिति। अनिर्धारितविशेषस्य कल्प-नायामित्यर्थः। मृदूक्तिश्चेयं वस्तुतस्तु अपूर्वकल्पनैव लाघवाद्युक्ता इतरत्र द्रव्याविनाशः। तददर्शनं तद्धेतुः तस्य चादर्शनं कर्मणश्चाविनाशः तददर्शनं तद्धेतुश्चेति बह्वदृष्टकल्पनया गौरवादित्यवधेयम्।

ननु तर्ह्यनाश्रितमेव कर्म स्थास्यति न च स्वभावविरोधः अस्यैवं स्वभाव-त्वादिति शङ्कते—**अनाश्रितमिति**। अनाश्रितत्वमपि स्वातन्त्र्यस्थायित्वादि-बह्वदृष्टकल्पनापत्तेरेवायुक्तमिति परिहरति— **तदपीति**। तादृशत्वमयुक्तत्वम्। अथोक्तदोषपरिहारायात्माश्रितमेव स्वभावभेदेन संयोगविभागावकुर्वदास्ते इति कल्प्यते तत्राह—**स्वभावान्तरेति**। एतदपि दृष्टिविपर्ययाददृष्टकल्पनाप्रसङ्गाद-युक्तमित्यर्थः। कर्मणः स्थायित्वासंभवफलमाह—**तस्मादिति**।

यत् पुनरुक्तं यागस्य भङ्गितया भाविफलसाधनत्वासंभवेऽपि नापूर्वकल्पनः कल्पितस्यापि तस्य यागशक्तितया व्यापारतया वा तन्नाशे नाशादनुपपादकत्वा-दिति तत्राह—**तस्येति**। यागस्य भङ्गित्वादवश्यकल्पनीयेऽपूर्वे यत्र कल्पितं फलायोपयुज्यते, तत्रैव कल्प्यते। आत्मनि च कल्पितं फलाय, न च यागशक्तित्व-विरोधः, यागक्रियाया आत्मनोत्पन्नाभेदाभावेन यागशक्तेरप्यात्मशक्तित्वाविरोधा-दिति भावः। एवमपूर्वसद्भावप्रतिपादनेन भावेऽर्थेभ्योऽपूर्वमिति पूर्वाधिकरणार्थं प्रतिष्ठाय सर्वत्रानुष्ठानार्थत्वात् विचारस्यानुष्ठानोपयुक्तत्वमपि प्रयोजनं **तस्य** प्रश्नपूर्वकं दर्शयति— **किं चिन्तायां इति**। पूर्वपक्षे द्रव्यादीनामदृष्टार्थत्वात्तथा-भूतस्य च कर्मणः प्रतिनिध्यनुपादानाद् द्रव्याद्युपचारेऽपि न प्रतिनिधिरुपादातव्यः। यदा भावशब्दा अपूर्वं प्रतिपादयन्ति इति सिद्धान्तः, तदा कर्मणोऽदृष्टार्थस्य निष्पादकतया द्रव्यादीनां दृष्टार्थत्वाद् द्रव्यं गुणं वा प्रतिनिधाय कर्मानुष्ठातव्य-मिति प्रयोजनमित्यर्थः॥ ५ ॥

अथ द्वितीयमपूर्वाधिकरणम्

त० वा०—सिद्धं कृत्वाऽपूर्वम्, तत्प्रतिपत्त्युपायशब्दविशेषविचारः कृतः। तस्य सिद्धत्वमेवाप्रसिद्धम्। अतस्तदेव तावत्प्रतिपादनीयमित्यत आह—

फलाय विहितं कर्म क्षणिकं चिरभाविने।
तत्सिद्धिर्नान्यथेत्येवमपूर्वं प्रति गम्यते॥

वेदवाक्योपात्तस्वर्गयागादिसम्बन्धान्यथानुपपत्त्या चोदनयैवापूर्वमपि चोदितं भविष्यतीति प्रमाणवत्। तस्मादस्त्यपूर्वमिति।

वृत्तिकारमतेन शंका

अत्रापरे निपुणं मन्यास्तन्निराकरणमाहुः—

प्रमाणपञ्चकाज्ञानादपूर्वं षष्ठगोचरः।
तस्मादन्वर्थनामैतन्न वस्तुत्वेन गम्यते॥

वस्त्ववबोधनार्थानि प्रत्यक्षादीनि पञ्च प्रमाणानि। तद्यत्र तानि न प्रवर्तन्ते, तदभावेनाऽभावात्मनैवावगम्यते। न चापूर्वे तानि प्रवर्तन्ते। तस्मात्सर्वप्रमाणापूर्वत्वादन्वर्थनामेवासद्रूपमपूर्वं प्रतिपत्तव्यम्।

अपूर्वे प्रत्यक्षादीनां प्रामाण्यनिरासः

तत्र प्रत्यक्षेण तावन्नावगम्यते, रूपाद्यनात्मकत्वेन चक्षुरादिभिरसम्बन्धात्। नाप्यनुमानेन, केनचिल्लिङ्गेन सहादृष्टसंगतित्वात्। न हि विशेषतः सामान्यतो वाऽस्य केनचित्सम्बन्धोऽनुभूतपूर्वः। सर्वत्रैव च वस्तुसत्ताबोधायानुमानमपर्याप्तमित्युक्तं प्राक्।

शब्दप्रामाण्यनिरासः

पदवाक्ये न चैतस्य वाचके श्रृणुमः क्वचित्।
शब्दगम्यत्वमप्यस्य तेन नैवोपपद्यते॥

आगमिकत्वमप्यस्य पदेन वोच्यमानस्य स्यात्, वाक्यगम्यस्य वा। तत्र पदं न तावत्किंचित्साक्षादेतस्य वाचकमस्ति। यत्त्वपूर्वमिति तदन्वर्थत्वात्सुतरामस्तित्वं बाधते। न च प्रमाणान्तरानवगतेऽर्थे पदं प्रवर्तते। न च स्वातन्त्र्येण प्रमाणमिति स्थितम्। तथा च वाक्यस्यावाचकत्वादेवाप्रामाण्यम्। न च केचित्पदार्थाः श्रूयन्ते, येषां भेदः, संसर्गो वाऽपूर्वं भवेत्। येऽपि शब्दान्तरादयः, श्रुतिलिङ्गादयश्च शब्दप्रकाराः तेऽपि च स्वभावसिद्धे वस्तुनि भेदे, विनियोगे वा कारणम्, न सद्भावे कस्यचिदित्यपूर्वं प्रत्यप्रमाणम्। उपदेशानवगते चातिदेशोऽपि न प्रवर्तते, विधिप्रतिषेधविषयत्वाच्च समस्तस्य वेदस्य। न क्वचिद्वस्तुस्वरूपप्रतिपादनार्थत्वं भवतीति, नाऽऽगमगम्यमपूर्वम्।

न चादृष्टपूर्वस्यादृष्टसदृशस्य चोपमानविषयत्वम्। कामं वाऽनुपलभ्यमान-शशविषाणादिसारूप्यादभावात्मकत्वोपमानप्रसङ्गः। तस्मादसद्रूपेणोपमेयम्।

अर्थापत्तिप्रमाणनिरासः

अर्थापत्त्याऽपि नैवैतदस्तीत्येवं प्रतीयते।
अन्यथाऽप्युपपन्नत्वात्फलयागादिसंगतेः॥

दृष्टार्थापत्तिस्तावद्धर्मास्तित्ववदेवात्रापि निराकर्तव्या। स्वभावादेर्नाऽपि ईश्वरदरिद्रादिवैचित्र्योपपत्तेः। श्रुतार्थापत्तिरपि कीदृशी भवति? यत्र प्रत्यक्षेणैवानुपपत्तिर्दृश्यते। न च कल्प्यमानोऽर्थः केनचिद्विरुध्यते, तद्यथा 'स्रुवेणावद्यति' इत्युक्ते न च कथंचिदपि मांसपुरोडाशादीनि तेनाऽवदातुं शक्यन्त इति। प्रत्यक्ष-गम्यत्वात्। अपि च तत्रापि प्रसक्तेरेवं कल्प्यते द्रवाणामिति। न चैषा कल्पना केनचिद्विरुध्यते, श्रुतहान्यश्रुतपरिकल्पनाभावात्।

अपूर्वं तु न कदाचित्फलसाधनत्वेन संभाव्यते। यतोऽन्यकारणनिषेधे सति तद्विषया परिशेषसिद्धिः स्यात्।

यदि त्वन्यनिवृत्त्यैव परिशेषः प्रकल्प्यते।
शशशृङ्गनिमित्तत्वं फलानां किं न गम्यते॥

न हि कारणान्तरप्रतिषेधमात्रेणाऽपूर्वनिमित्तता गम्यते, शशविषाणादिभिर-नैकान्तात्। अपि च यदि तावदपूर्वं यागस्य साध्यमिष्यते, ततः श्रुतं स्वर्गं परित्यज्य, अश्रुतं परिकल्पितं भवेत्। अथ फलं प्रति साधनभूतम्, ततः श्रुतयाग-परित्यागात्सैव गतिः। न चाऽऽकारान्तरेण[1] तन्निरूपयितुं शक्यते। तेनाऽऽगम-प्रामाण्याद्यागादेव फलेन भवितव्यम्।

कथं नष्टः साधयतीति चेत्? यदि शास्त्रादेवं गम्यते, किं भवतो विरुध्यते। ध्रियमाणेन वा फलं साधनीयमित्यत्र किं प्रमाणम्। अपि चाऽऽकाशादीनि नित्यावस्थितानि कस्मात्फलं न साधयन्ति। यदि च श्रूयमाणातिरेकेणावस्था-यित्वसंभवादपूर्वेण फलं साध्यत इति कल्प्येत, ततो वरमाकाशादेरेव कल्पितम्, तस्य हि स्थान-सद्भावावपि तावत्प्रसिद्धौ। केवलं फलनिमित्तत्वमाश्रयणीयम्। अपूर्वे तु सद्भावप्रभृति सर्वं निष्प्रमाणकं कल्पनीयम्।

अथ यागसम्बन्धिना केनचिदवस्थितेन फलं दातव्यमित्याभिप्रायः। तथा सत्यपि—

यष्टुरेवाऽऽत्मनो यागैः संगतस्य स्थितस्य च।
निमित्तत्वं वरं क्लृप्तं लाघवं हि तथा सति॥

---

१ क. (टिप्पण्यां) प्रकारान्तरेणेति।

यदि यागस्य विनाशित्वादन्येन तत्सम्बन्धिना फलं साध्यमानं यागेन साधितं भवति, ततो लाघवादतिक्रान्तयागेनाऽऽत्मनैव वरं साधयितव्यम् ।

यद्वा कर्मविनाशोऽयं फलं नः साधयिष्यति ।
भङ्गियागविधानाद्धि तदयत्नेन कल्प्यते ॥

विनाशिनि हि कर्मणि चोदिते किं दृश्यते, कर्म च विनष्टं शास्त्रप्रत्ययाच्च कालान्तरे फलं भविष्यतीति निश्चीयते । यच्च यत् प्रतीत्योपजायते तत्र तस्य निमित्तत्वमित्यवधार्यते । तस्मादभावनिमित्तमेव फलमस्तु ।

स्यादेतत् । न क्वचिदवस्तुनः साधकत्वं दृष्टमिति । तदुच्यते । अपूर्वस्य वा क्व दृष्टम्, येनावाऽऽश्रीयते । तदवश्यकर्तव्ये लौकिकनिमित्तधर्मातिक्रमे किमपूर्वनिमित्तत्वं कल्प्यताम्, उताभावनिमित्तत्वमिति, क्लृप्ताभावनिमित्तत्वातिलङ्घनेन काल्पनिकापूर्वनिमित्तत्वपरिग्रहो न युज्यते ।

किं च—

यदि चैकान्ततो ब्रूयुः शब्दाः कालान्तरे फलम् ।
ततस्तेनैव[1] कल्प्येत निमित्तं वस्तु किंचन ॥

क्रियाफलसम्बन्धप्रतिपत्तिमात्रचरितार्थासु चोदनास्वनुपात्ते कालान्तरे कर्मस्वभावादानन्तर्ये गम्यमाने कुत एतत्कालान्तरभावि फलं तत्सिद्ध्यर्थं चापूर्वं कल्प्यत इति । तत्रैतत्स्यात् । कृते कर्मण्यनन्तरं फलमनुपलभ्य[2] कालान्तरफलोत्पादद्वारमपूर्वकल्पनमिति ।

तदयुक्तम् । कुतः ?

पूर्वं निश्चित्य शास्त्रार्थं[3] प्रयोगे हि प्रवर्तते ।
प्रयोगोत्तरकालं तु न शास्त्रार्थोऽवधार्यते ॥

'न ह्यविद्वान्विहितोऽस्ति' इति तावदवश्यं यावच्छास्त्रगम्यम्, तत्सर्वं प्रागनुष्ठानादवगन्तव्यम् । न च तत्काले कर्मफलकालवियोगज्ञानकारणमस्ति । यच्च शास्त्रप्रवृत्तिवेलायां तदन्तर्गतत्वेन नावधारितम्, तदुत्तरकालमेवावधार्यत इति कुत एतत् ।

अपि च—

सर्वकर्तृष्वशक्तत्वाद्वैगुण्यं संप्रतीयते ।
तेन च प्रतिबद्धत्वान्नार्थापत्तिरपूर्वभाक् ॥

---

१ क. तैरेवेति (टिप्पण्यां)
२ क. (टिप्पण्यां) अनुपलक्ष्येति । ३ क. (टिप्पण्यां) निश्चितशास्त्रार्थ इति ।

दृश्यत एवानन्तरफलानुत्पत्तिकारणवैगुण्यमिति, न कालान्तरफलसिद्ध्यर्थमपूर्वं कल्पनीयम्। अनैकान्तिकी हि तदाऽर्थापत्तिः, वैगुण्यमेव वरमननुभूतमपि कल्पयेत्। न च जन्मान्तरफलोत्पत्त्यर्थमपूर्वकल्पना[1]। कुतः—

सुखदुःखात्मकत्वेन समानेष्वेव जन्मसु।
क्रियानन्तरमेवेह स्तः स्वर्गनरकावपि॥

न हि स्वर्गनरकौ नाम निरतिशयसुखदुःखस्वभावौ, देशविशेषात्मकौ वा याविहैव जन्मनि नानुभूयेयाताम्। अलौकिकानां जिहासोपादित्सानुपपत्तेः। ये तु लौकिके प्रकृष्टे सुखदुःखे, ते कर्मानन्तरमेव सम्भाव्येते इत्यविशेषः।

किं च—

प्रतिषेधेषु चापूर्वं न शास्त्रार्थेन जन्यते।
तदतिक्रमजन्यं तु न भवेच्छास्त्रपूर्वकम्॥

'ब्राह्मणो न हन्तव्यः' इति हि निवृत्तिः शास्त्रार्थः। न च तया कालान्तरे किंचिज्जनयितव्यमिति, नापूर्वकल्पनामपेक्षते। हननस्य तु नरकपातः फलम्, यद्यपि तेनापूर्वं जन्येत, ततो हननस्याचोदितत्वाल्लौकिकक्रियाजन्यं सदपूर्वं न वेदमूलं स्यात्। कल्पितमपि च तन्निष्क्रियत्वान्नैव देशान्तरे शरीरादिप्रापणसमर्थमित्यनर्थकम्। न चास्याऽऽश्रयः संभवति, क्रियाश्रयस्य पुरोडाशादेर्विनष्टत्वात्, तद्व्यतिरिक्ते चाऽऽरम्भानुपपत्तेः। एवमङ्गापूर्वाण्यपि निराकर्तव्यानि।

किं च—

अङ्गानि यदि वाऽपूर्वं कुर्वन्त्याराादवस्थितम्।
असम्बन्धात्प्रधानानां न स्यात्तेनोपकार्यता॥

न हि कल्पितमप्यङ्गापूर्वं प्रधानैरसंबध्यमानमुपकर्तुं समर्थम्। न चामूर्ते प्रधाने, तदपूर्वे वा निपातितुं समर्थम्। यदपि च प्रोक्षणादिनिमित्तं द्रव्यसमवायि, तदपि तन्मात्रोपक्षीणत्वादन्यत्रासंचरन्नैव फलसाधनस्यापूर्वस्योपकुर्यात्।

अथ त्वङ्गापूर्वाण्यपि यजमानात्मन्येवावतिष्ठेरन्, एवं सति पुरुषार्थत्वापत्तेः कर्माङ्गत्वहानिः स्यात्। अपि च युगपत्प्रयोगवचनेन ग्रहणादङ्गापूर्वैर्युगपदेवोपकर्तव्यम्। न च परस्परेणासंबद्धानां यौगपद्यं संभवति। न चैषां कश्चित्सम्बन्धे हेतुरस्ति। एतेन प्रधानापूर्वाणां फले यौगपद्यं प्रत्युक्तम्।

तस्मात्कृतत्वमात्रेण प्रधानं पुरुषे फलम्।
अङ्गानि च प्रधानेषु जनयन्तीति गम्यते॥

---

१ क. (टिप्पण्यां) उत्पत्तिसिद्ध्यर्थमिति।

न चापूर्वस्योत्पत्तिरभिव्यक्तिर्वोपपद्यते ।

कुतः—

न तावद्युगपज्जन्यं कर्मभिः क्रमवर्तिभिः ।
न चानवयत्वात्तत्क्रमशोऽपि प्रतीयते ॥

एवं तावन्नोत्पद्यते । न चाभिव्यज्यते । कथम् ?

इन्द्रियार्थोभयेषां नः संस्काराद् व्यक्तिरिष्यते ।
न च यागादिभिः किंचित्संस्कृतं संप्रतीयते ॥

सर्वाभिव्यक्तीनां त्रयान्यतमसंस्कारद्वारत्वात्संस्कारान्तरमवश्यं कल्पनीयम् । ततः पुनः स एव क्लेश इत्यप्रमाणता । यदि च क्रियानन्तरमपूर्वमुपलभ्येत, ततोऽभिव्यज्यत इति ब्रूयाम्, यदि चास्य प्रागस्तित्वे प्रमाणं भवेत् । न तु तदुभयमप्यस्तीति सर्वथा नास्त्यपूर्वम् ।

न चैतत्सूत्रं तत्प्रतिपादने विस्पष्टमित्यव्याख्यानमेतत् । अत्रोच्यते । यदिदं स्वमतिपरिकल्पितं विग्रहवदिवापूर्वं भवद्भिर्निराक्रियते, न तेनास्माकं किंचिद्विरुध्यते । यतो नैतत्तादृशं[1] कस्यचिदिष्टम्, किं तर्हि—

कर्मभ्यः प्रागयोग्यस्य कर्मणः पुरुषस्य वा ।
योग्यता शास्त्रगम्या या परा साऽपूर्वमिष्यते ॥

प्रधानकर्मणामङ्गकर्मणां वा प्राक्करणात्स्वर्गादिप्राप्त्ययोग्याः पुरुषाः, क्रतवश्च स्वर्गकार्यायोग्याः । तामुभयीमप्ययोग्यतां व्युदस्य, प्रधानैरङ्गैश्च योग्यतोपजन्यत इत्यवश्यं सर्वेणाभ्युपगन्तव्यम् । असत्यां तस्यामकृतसमत्वप्रसङ्गात् । सैव च पुरुषगता, क्रतुगता वा योग्यता शास्त्रेऽस्मिन्नपूर्वमित्यपदिश्यते । यत्तु प्रत्यक्षादिगम्यत्वमस्य नास्तीति । सत्यम्, श्रुतार्थापत्तिव्यतिरिक्तैर्न गम्यते । स त्वदोषः । किं कारणम् ?

श्रुतार्थापत्तिरेवैका प्रमाणं तस्य वेष्यते ।
शब्दैकदेशभावाच्च स्वार्थेष्वागम एव नः ॥

येन वाक्येन यागात्स्वर्गो भवति प्रयाजादिभिश्च प्रधानोपकारो भवतीत्येतच्चोद्यते । तेनावश्यं विनष्टानामविनष्टानामपि चैषां काऽपि स्वकार्योत्पादनशक्तिरस्तीत्यभ्युपगन्तव्यम् । सर्वभावानामशक्तानां कार्यारम्भाभावात् । नियोगतश्चात्रातीतानामेव शक्तिरेष्टव्या । कुतः ?

क्षणिकत्वेन[2] सर्वत्र नैकस्यापि हि कर्मणः ।
कथंचिद्युगपदं वृत्तिः फले किमुत भूयसाम् ॥

---

१ क. नैव तत्तादृशमिति (टिप्पण्यां) । २ क. (टिप्पण्यां) क्षणिकावयवत्वेनेति ।

यदेव हि कर्म गृहीतम्, तदेव हि क्षणिकसूक्ष्मावयवत्वात्फलं प्रति युगपद्भवितुमसमर्थम्, किमुत यान्यनेकात्मकानि दर्शपूर्णमासप्रभृतीनि। यदा हि पूर्णमासो भवति, न तदा दर्शः, यदा दर्शः तदा पूर्णमासश्चिरविनष्टस्तथैकस्मिन्नेव समुदाये यदाऽऽग्नेयः, तदाऽग्नीषोमीयोपांशुयाजौ न स्तः यदा तयोरेकः तदेतरौ न विद्येते इति, यौगपद्यासंभवः। तद्यदा दर्शपूर्णमासः, तदवयवो वा कांचित्पुरुषे शक्तिमनाधायैव विनश्येत्, ततः प्रागवस्थातुल्यत्वादुत्तरकर्मणां पूर्वैः सह रूपतः शक्तितो वा साहित्याभावान्न केवलकरणात्कश्चिद्विशेष इति सहितसाध्यत्वेन श्रुतं फलं साहित्यासंपत्त्या नोपपद्येत। न हि केवलो दर्शस्तत्साधनत्वेन श्रूयते। तदन्त्यं वा कर्म। नियोगतश्च कर्मानन्तरफलोत्पत्तिवादिनाऽपि सर्वकर्मान्ते साऽभ्युपगन्तव्या। ततश्च यस्यैवाऽऽनन्तर्यम्, तदेवैकं साधनं प्राप्नोति, नेतराणि, चिरविनष्टत्वात्। अथ तु सर्वेषामपूर्वाख्याः शक्तयस्तिष्ठन्ति; ततः स्वरूपाणामतन्त्रत्वात्तेष्वसत्स्वपि शक्तिगतमेव यौगपद्यं व्यवहाराङ्गत्वाद् व्यापरिष्यते।

तथा चाऽऽह—

शक्तिभिः सर्वभावनां व्यवहारानुपातिता।
तेन न्यदेशकालेऽपि रूपे ताभिः स सिध्यति॥
लौकिकं चापि यत्कर्म फले कालान्तरोद्गतौ।
तत्रापि शक्तिरेवाऽऽस्ते न त्वपूर्वमिहेष्यते[1]॥' इति।

यान्यपि च लौकिकानि कृषि-घृतपानाध्ययनप्रभृतीनि कर्माणि कालान्तरफलत्वेनेष्यन्ते, तेषामपि स्वरूपावस्थानासंभवात्संस्कारैरेव तिष्ठद्भिर्व्यवहारसिद्धिः। ते त्ववैदिकत्वात्संस्कारा नापूर्वशब्दाभिधेयत्वेन प्रसिद्धाः। तेन प्रागेवानुष्ठानाच्छास्त्रश्रवणवेलायामेव क्षणिकानेकाङ्गप्रधानप्रयोगसाध्यं फलं विदित्वा शास्त्रप्रत्ययादेषा बुद्धिर्भवति नूनं केनाप्यात्मना समस्तान्यङ्गप्रधानानि फलकालं यावत्तिष्ठन्तीति। प्रत्यक्षं च स्वरूपभङ्गदर्शनान्न शक्तिव्यतिरिक्तात्मावस्थानोपपत्तिः।

यत्तु श्रुतहान्यश्रुतकल्पनाप्रसङ्ग इति।

तन्न—

यागादेव फलं तद्धि शक्तिद्वारेण सिध्यति।
सूक्ष्मशक्त्यात्मकं वा तत्फलमेवोपजायते॥

यदि ह्यसम्बन्धिना केनचित्फलं साध्येत, ततो दोषः स्यात्। यागाहितया तु शक्त्या साध्यमानं यागेनैव साधितं भवति, सर्वसाधनानामिष्टफलप्रवृत्तावान्तरालिकव्यापारावश्यंभावित्वात्।

---

१ क. (टिप्पण्यां) न त्वपूर्वंगिरोच्यत इति।

अथ वा सर्वमेव कार्यं दध्यादि क्षीरादेरुत्पद्यमानं न सहसैव स्थूलेनैवाऽऽत्मनोत्पद्यते। किं तर्हि, सूक्ष्माणि तावद्रूपान्तराण्यनुभवति। एवं स्वर्गादयोऽप्यङ्कुरादिस्थानीयां तावदपूर्वावस्थां प्रतिपद्यन्ते। तया चोत्पद्यमानया त एवोत्पन्ना भवन्तीति। एतावानेव चात्र वर्तमानः कालो यदच्युतिः कर्मसंकल्पात्प्रभृत्यासर्वान्त्यफलावयवोपभोगात्।

आह च—

काष्ठैः पक्तव्यमित्युक्ते निर्दिष्टा ज्वलनक्रिया।
अङ्कुरे जायमाने च वृक्षोऽप्युत्पन्न इष्यते॥

यत्तु संभावनापदमपूर्वं नाऽऽरूढमिति। तदयुक्तम्। कुतः—

विनाशित्वेन विज्ञातं साधनं लोकवेदयोः।
असंभावितसामर्थ्यस्थायित्वं चोद्यते कथम्॥

नूनं विनष्टस्थाप्येतस्य सामर्थ्यं फलनिर्वृत्तिकालावधि यावदास्त इति हि यावन्नावधार्यते तावद्विनाशिनी क्रिया चोदयितुमेवाशक्या। तस्मात्संभावनाऽवधारणा च प्रथममेव सिद्धेति।

न वाऽतिक्रान्तयागेभ्यः पुरुषेभ्यः फलोद्गतिः।
अतिक्रान्तानतिक्रान्तविशेषस्तव नास्ति हि॥

यदि ह्यनाहितसंस्कारा एव यागा नश्येयुस्ततः प्रागवस्थातुल्यत्वादतिक्रान्तानतिक्रान्तयागयोः को विशेषः स्यात्। आत्मत्वं तावदविशिष्टमुभयोः। यागत्वमपि हि विनष्टाकृतयागयोस्तुल्यम्। न च क्रियारहितस्यावस्थान्तरगतस्य[1] वा कर्तृत्वमवतिष्ठते कर्तृशक्तिस्तिष्ठतीति चेत्। न। तस्याः प्रागपि यागकरणाद्विद्यमानत्वेनाकरणत्वात्। अपि च यदि पुरुषः फलसाधनं सर्वकर्मणां शुभाशुभानामविशिष्ट इत्येकरूपफलप्रसङ्गः। तथैकेन यागेन बहुभिश्च तदतिक्रमलक्षणलक्षितत्वाविशेषाद् बहुयाजिनः फलविशेषो न स्यात्। एतेनैव बहुप्रयोगानुष्ठायिनः प्रत्युक्ताः। कर्त्रनभिधायिनि वाऽऽख्याते कथमयमर्थो विज्ञायते। यस्य त्वपूर्वाणि। क्रियन्ते तस्य प्रतिकर्म प्रतिप्रयोगं च तद्भेदादुपपन्ने फलनानात्ववैचित्र्ये किं च।

अङ्गमध्येऽपि कर्तैव भवेच्चेदुपकारकः।
प्रसङ्गसिद्धेरङ्गानामप्राप्तिर्विकृतौ भवेत्॥

प्रयाजादीनामपि क्षणिकत्वात्स्वरूपसंनिध्य[2]भावे भवत्पक्षे कर्त्रैव प्रधानोपकारः कर्तव्य इति सोऽपि चापूर्वाभावात्कर्त्रात्मन एवोपकारकस्तत्र येन प्रकृतौ प्रयाजादयः कृतास्तस्य विकृतिषु तद्गतोपकारसद्भावाद्विनाऽपि तन्त्रमध्यविधा-

---

१ क. अवस्थान्तरसमवेतस्य। २. क. सांनिध्याभावे।

नेन तत्फलवाप्तेः प्रसङ्गलक्षणमस्तीति न पुनरङ्गान्यनुष्ठातव्यानि। तत्र 'प्रयाजे प्रयाजे कृष्णलं जुहोति' इत्यादीनि नोपपद्येरन्। नन्वत्यन्तकालभेदान्नैतत्प्रसज्यते। वक्ष्यत्यस्योत्तरम्। 'अर्थस्याविकृतत्वात्' इति। यदेव हि प्रत्या[1]सन्नानि प्रति कर्त्रात्मकं तदुपकाररूपमिष्यते तदेव दूरस्थायामपि विकृताविल्यविशेषः। एते कर्मविनाशपक्षेऽपि दोषाः प्रसक्तव्या। यस्यापि च कर्मविनाशादेव फलं भविष्यतीत्यभिप्रायस्तस्यापि शुभाशुभैकानेककर्मतत्प्रयोगविनाशानां प्रागभावप्रध्वंसाभावानां वाऽवस्तुत्वेनाविशेषात्फलभेदवैचित्र्यानुपपत्तिः। तथा हि—

एको रोगो हृतो यस्य यस्य वाऽपहृता दश।
अरोगित्वे तयोर्भेदो न कश्चिदपि दृश्यते॥

यदि तु प्रतिकर्म विनाशानां वैचित्र्यमिष्यते यथा सति वस्तुत्वापत्तेर्वस्त्वन्तराभावाच्चापूर्ववस्त्वेव विनाशशब्देनाभिधीयत।

न च कर्मविनाशेभ्यः स्वर्गादि श्रूयते फलम्।
विपर्ययाच्च नैतेभ्यो जातं यागस्य तद्भवेत्॥

'यजेत स्वर्गकाम' इति हि श्रूयते न यागाभावं प्रतिपद्येतेति। तत्र भावांशसाध्यसाधनसम्बन्धनिष्ठे वाक्ये यस्तत्राभावांशसाध्यसाधनसम्बन्धं कल्पयति तेन वेदस्तावदप्रमाणीकृतः। कुतः। कर्मविनाशप्रभवं हि सदेतन्न कथंचित्कर्मसम्बन्धीति शक्यं वदितुम्। अत्यन्तविपरीतत्वात्। न ह्यग्न्यातपप्रभवो दाहः शैत्यसम्बन्धीत्युच्यते। अथ वा यथैव यागाच्छ्रुतं तदभावात्कल्प्यते तथैव स्वर्गे श्रुते तदभावः फलमित्यपि कल्प्येत[2]। अपूर्वपक्षोऽपि तुल्यमिति चेत्। न। तस्य कर्मफलशक्त्यात्मकत्वेनात्यन्ताभेदात्। उक्तं ह्येतत्पुरस्तात्। अपूर्वेण क्रियमाणं यागेनैव क्रियते, अपूर्वे वा कृते फलमेव कृतं भवतीति। न च लोकेऽपि कश्चिदभावः कारणत्वेन दृष्टः। यदि तु क्वचिदुदाह्रियेत, शक्यं तत्र भावान्तरं दर्शयितुं न त्वत्रापूर्वादृते तादृक्किंचिदस्ति। यत्त्वपूर्वस्यापि नैव कारणत्वं दृष्टमिति तदयुक्तम्। सर्वत्र शक्तिसामान्योपलम्भात्तद्विशेषमात्रत्वाच्चापूर्वस्य। यत्तु शास्त्रेण कालान्तरफलं नाऽऽश्रितं प्रयोगोत्तरकालकल्पना च शास्त्रेऽन्तर्भवति। तस्मादानन्तर्यमेव चोदितमिति। तत्र यथाश्रुतक्षणिकानेककर्मानन्तर्यं न सम्भवतीत्युक्तं प्राक्। स्वर्गनरकौ च निरतिशयसुखदुःखात्मकत्वाद् देशान्तरजन्मान्तरानुभवनीयं न कर्मानन्तरं सम्भवत इति षष्ठाद्ये वक्ष्यामः।

ऐहिकं चापि पुत्रादि क्रमजन्मस्वभावकम्।
न कर्मानन्तरं कश्चित्फलं लब्धुं व्यवस्यति॥
न च ग्रामादि सम्प्राप्तिः केवला फलमिष्यते।
उपयोगश्चिरेणैषां न निमित्ताद्विना भवेत्॥

---

१. क. (टिप्पण्यां) प्रधानानीत्यधिकम्। २. क. (टिप्पण्यां) कल्प्यताम्।

चिरकालोपभोगफलात्मकत्वाद् ग्रामादीनां क्रियानन्तरं तादात्म्यासम्भवे सति यत्रैवान्तराले निमित्तं क्षीणं तत्रैवापहारः प्रसज्येतेत्यवश्यं समस्तोपभोगं यावदवस्थितेन केनचिद्भवितव्यम्। ततश्च प्रागेव प्रयोगादित्थमवधारणात्कर्तृवैगुण्याशङ्कयाऽर्थापत्तेरनैकान्तिकत्वमित्ययुक्तमेतत्। यत्तु प्रतिषेधेषु न शास्त्रगम्यपूर्वमित्युच्यते[1]।

विधेयेभ्यो यथाऽपूर्वं विधिशास्त्रेषु गम्यते।
तथैव प्रतिषेध्येभ्यः प्रतिषेधैस्तदुच्यते॥

यथा हि लौकिकानामेव द्रव्यादीनां फलविध्युत्तरकालं वैदिकत्वाद्वेदगम्याऽपूर्वसिद्धिः, एवं ब्रह्महत्यादीनामनवगतनरकफलानां प्रतिषेधोत्तरकालभाविना वैदिकत्वेनैव नरकाप्तिसमर्थाऽपूर्वकल्पनोपपत्तिः। सत्यपि चास्य चलनादिक्रियारहितत्वे कर्तृसम्बन्धमात्रेण तद्देशान्तरप्रापणादिक्रियासम्बन्धाभ्युपगमान्निष्क्रियताऽनुपालम्भः।

आत्मैव[2] चाऽऽश्रयस्तस्य क्रियाऽप्यत्रैव च स्थिता।
आत्मवादे स्थितं ह्येतत्कर्तृत्वं सर्वकर्मसु॥

द्व्यवदानप्रक्षेपादीनां हि सर्वेषां संकल्पादिद्वारेणाऽऽत्मैव कर्तेत्यवधारितम्। अतश्च ते प्रलीयमानास्तत्र स्वर्गाद्युपभोगशक्तिमाधाय प्रलीयन्त इत्यविरोधः।

कथं विनष्टस्य कर्मणः शक्तिस्तिष्ठतीति चेत्? अत्राभिधीयते—

यदि स्वसमवेतैव शक्तिरिष्येत कर्मणाम्।
तद्विनाशे ततो न स्यात्कर्तृस्था तु न नश्यति॥

कथमन्यशक्तिरन्यत्र समवैतीति चेत्? न। क्रियात्मनोरत्यन्तभेदाभावात्।

अपि च—

शक्तिः कार्यानुमेयत्वाद् यद्गतैवोपयुज्यते।
तद्गतैवाभ्युपेतव्या स्वाश्रयाऽन्याश्रयाऽपि वा॥

यदा कर्मविनाशात् तद्गता शक्तिरपि निष्प्रयोजना भवति, अवश्यं च सा कल्पयितव्या, तदाऽस्या स्वरूपवदेव, आश्रयविशेषोऽपि कार्यक्षम एव प्रमातव्यः। तथाऽङ्गापूर्वाणामप्यात्माश्रितानामेवैकार्थसमवायेन प्रधानैः संबद्धानामप्युपकुर्वतामाश्रयशेषत्वाभावादारादुपकारकत्वप्रसिद्धिः।

यत्तु पुरुषार्थत्वं प्रसज्यत इति। नैष दोषः—

तादर्थ्येन हि शेषत्वं नाऽऽश्रयाश्रयिभावतः।
राजार्थौपयिकं नित्यमुष्ट्रो वहति कुङ्कुमम्॥

---

१. क. (टिप्पण्यां)–इत्यत्रोच्यत इति। २. क. कर्तैव।

न चामूर्त्तानामाश्रयाश्रयिभावेन न भवितव्यम्। आत्मसुखादिवत्तदुपपत्तेः। यत्तु व्रीह्यादिसमवायिप्रोक्षणादिनिमित्तं तण्डुलादिद्रव्यावस्थासंचरणपरम्परया द्व्यवदानं यावद्गतम्, तत्रापि प्रधानस्यापि केनचिदंशेन समवायात् तदीयापूर्वनिष्पत्तावेव व्यापृत्य निवर्तते। तेनैव चैषां नाऽऽरादुपकारकवदशेषप्रधानार्थत्वमभ्युपगम्यते। यथैव[1] चैकार्थसमवायादङ्गप्रधानापूर्वाणां सम्बन्धः, एवमङ्गापूर्वाणामन्योन्यं प्रधानापूर्वाणां च वक्तव्यः। ततश्च युगपत्कार्यारम्भसिद्धिः।

कथं पुनः क्रमोत्पत्तीनां प्रधानापूर्वाणां क्रमवर्त्तिभिरेवाङ्गापूर्वैः प्रागूर्ध्वं चोत्पद्यमानैर्युगपदुपकर्तुं शक्यम्?

केषाञ्चिन्मतेन समाधानम्

केचित्तावदाहुः—अङ्गमध्यवर्तिषु प्रधानेषु पूर्वाङ्गापूर्वैर्निष्पन्नैरागादिभिश्च प्रक्रमवशात्प्रचलितावस्थैरेकैकं प्रधानं स्वापूर्वं साधयति। आतिथ्याबर्हिर्वच्च साधारण्यान्नैकप्रधानापूर्वनिष्पत्तौ तान्यपवृज्यन्ते। कथं पुनरनागतानामुपकारकत्वं भवति। एकान्तावधारणाद्भोजनप्रत्यासत्तौ स्थालीपरिमार्जननिष्पत्तिवदिति द्रष्टव्यम्। ननु च यद्यनागतावस्थेष्वेतेषु प्रधानापूर्वाणि निष्पद्यन्ते, ततो नैवोत्तराङ्गाणि कर्तव्यानि। कथं न कर्तव्यानि, यदा तत्करिष्यमाणतासंभावनया तानि निष्पन्नान्यपि तदकरणान्नापवृज्यन्ते।

स्वमतेन समाधानम्

अन्ये पुनराहुः। एकैकमङ्गमितरेतरनिरपेक्षमात्मीयमात्मीयं तावदपूर्वं करोति, तथा प्रधानमप्याग्नेयादि यथाश्रुतसमस्ताङ्गापूर्वालाभात्तन्निरपेक्षं तदाऽनुत्पन्नप्रधानान्तरनिरपेक्षं च प्रथमकृतसामवायिकाङ्गापूर्वमात्रानुगृहीतं स्वापूर्वमेव तावत्साधयति। एवं यदा दर्शापूर्वाणि तदङ्गापूर्वाण्यपि समस्तानि निष्पन्नानि, तदा तदीयब्राह्मणतर्पणानन्तरमपर्यायविधानाद्युगपत्प्रयोगवचनोपसंहारकल्पितमङ्गानि प्रधानानि च प्रतितन्त्रभूतं समस्तान्यङ्गापूर्वाण्यपूर्वात्मकमेकं युगपन्निरवयवं प्रधानोपकारं कृत्वा निवर्तन्ते। ततश्च तद्वशेन प्रधानापूर्वाण्यप्येकफलोत्पत्तिशक्तिभूतं संहत्य सर्वाण्येकमपूर्वान्तरं जनयित्वाऽपवृज्यन्ते। तत्त्वाफललाभादजरं तिष्ठति। यदि पुनः प्रतिबन्धकरहितं तदानीं फलमेवोत्पद्यते, ततोऽपि किं कल्पनीयमेवापूर्वम्। बाढम्। न हि तस्मादृते समस्तफलोपभोगसिद्धिरित्युक्तम्। अथ कस्मात्प्रात्यात्मिकान्येवाङ्गापूर्वाणि प्रधानोपकारकत्वम्, भिन्नानि च प्रधानापूर्वाणि फलबीजत्वं न प्रतिपद्यन्ते। सत्यं, नहि कश्चिदत्र दोषः।

---

१ क. तथैव।

किन्तु—

अर्थापत्तेरिहापूर्वं पूर्वमेकं प्रतीयते ।
ततस्यत्तिसिद्धये भूयः स्यादपूर्वान्तरप्रमा ॥

प्रधानानां फलं प्रति, अङ्गनां च प्रधानानि प्रति युगपदुपादानादपेक्षावशेनैकापूर्वकल्पनया च सत्संबन्धोपपत्तेर्नेतरकल्पनाप्रमाणमस्तीत्येकमेव तावदवधार्यते । ततः पुनः क्रमवर्तिभिः[1] कर्मभिस्तदशक्यं युगपत्कर्तुमिति, तत्सिद्धयर्थं प्रात्यात्मिकापूर्वान्तरकल्पना भवति ।

सर्वत्र च—

प्रमाणवन्त्यदृष्टानि कल्प्यन्ते सुबहून्यपि ।
अदृष्टशतभागोऽपि न कल्प्यो ह्यप्रमाणकः ॥

केचित्त्वत्र चोदयन्ति । यदि पौर्णमास्यां कृतान्यङ्गापूर्वाण्यमावास्यां यावत्तिष्ठेयुस्ततस्तैरेव कृतार्थत्वान्नैवाङ्गानि पुनः प्रसज्येरन् । एवं च सति 'त्रयोदशामावास्याम्' इत्याहुतिसंख्या बाध्येत ।

अन्ये तु परिहरन्ति । साङ्गयोः पौर्णमास्यमावास्ययोः कालान्तरसंबन्धात्सर्वैरङ्गैर्द्विः प्रयुक्तैः समुदायद्वयस्योपकर्तव्यमित्यवधारणात्पुनः प्रयोगः सेत्स्यतीति । अथ वा, एवं वक्तव्यं साङ्गपौर्णमास्यमावास्याऽसहिता स्वार्थं करोतीति करणविभक्तिश्रुतेरवगमात्पूर्वोक्तेनैव न्यायेन प्रधानापूर्वत्रयं स्वाङ्गापूर्वानुगृहीतमेकमपूर्वं कृत्वाऽपवृज्यते । तत्पुनरेवं निष्पन्नेनैवामावास्यापूर्वेण सहापरमपूर्वमारभेत । ततश्च निवृत्तेष्वङ्गापूर्वेष्वमावास्यायां क्रियमाणान्यङ्गानि न निराकरिष्यन्त इत्यदोषः ।

एतयैव च दिशोत्पत्तिविरोधः परिहर्तव्यः ।

आह च—

आवृत्तिभिर्यथाध्याये संस्कारो भवति क्रमात् ।
वाक्यावयवरूपेण अथाऽपूर्वं भविष्यति ॥' इति ।

न चामूर्तस्यावश्यमवयवैर्न भवितव्यम् । अनयैव ह्यर्थापत्त्या शक्यते वक्तुम्, सूक्ष्मावयवरूपेण तत्प्रतीयत इति । यदाप्यत्यन्तासतामनुत्पत्तेः प्रागवधृतास्तित्वमभिव्यज्यते तदाऽपि प्रतिपुरुष-कर्मभिः स्वीकरणात्फलाभिमुखकरणं शब्दादिविलक्षणाऽस्याभिव्यक्तिर्भविष्यति । तथा हि—

नैकरूपैव भावानामभिव्यक्तिः प्रतीयते ।
आत्मस्थोन्मीलनं तेन व्यक्तिरस्य भविष्यति ॥
सर्वावाप्तिसमर्थो वा प्रकृत्यात्मा सदेष्यते ।
कश्चित्तु प्रतिबन्धोऽस्य कर्मभिः सोऽपनीयते ॥

१. क. (टिप्पण्यां) बहुभिरित्यधिकम् ।

तस्मादस्त्यपूर्वम्। सूत्रस्यापि च न प्रकृतौपयिकमन्यमर्थं पश्यामः। तेनाऽऽरम्भचोदनैवापूर्वस्यापि चोदनेत्ययमेवार्थः। **यदि पुनः फलवचनसामर्थ्यात्तदेव**[1] न विनष्टमिति, अपूर्वकल्पनानिष्प्रमाणकत्वं मन्वानो वरमेतदित्याह। **न हि कर्मणोऽन्यद्** रूपमुपलभामह इत्ययुक्तम्, 'रूपशब्दाविभागाच्च' इत्यत्र प्रत्यक्षोपलब्ध्यभिधानात्। यागप्रस्तावे च सति तस्याचलनात्मकत्वात्, **यदाश्रयं देशान्तरं प्रापयतीत्य**संबद्धम्।

अत्रोच्यते—

कालान्तरक्षमं रूपं कर्मणो नोपलभ्यते।
भङ्गिरूपोपलब्धिस्तु न फलायोपयुज्यते॥

यद्यपि कर्मस्वरूपमुपलभ्यते, तथाऽपि कालान्तरावस्थानाभावान्न तदुपयुज्यत इति, नोपलभामह इत्युच्यते।

यागेऽपि प्रस्तुते चात्र चलनं यदुदाहृतम्।
तत्प्रक्षेपांशरूपेण यागेऽप्यस्तीति निश्चयात्॥

न हि संकल्पमात्रेण फलनिष्पत्तिः। समस्तात्समस्तेतिकर्तव्यताकाच्च कर्मणः फलश्रवणात्, तत्र द्रव्यवदानप्रक्षेपादीनां ग्रहणासादनादीनां च संयोगविभागफलत्वात्स्थायित्वे तदाश्रयेणावश्यं भवितव्यम्। न चासावस्ति। न चाभिव्यक्तं रूपमुपलभ्यते। संकल्पादीनामपि संकल्पान्तरादितिरोधानान्नावगत स्वरूपावस्थानोपपत्तिः। अवस्थानं चाऽऽत्मसमवेतस्य वा स्यात्, प्रदेयद्रव्यसमवेतस्य वा? न तावदात्मनि चलनं समवैति, सर्वव्यापिनः संयुज्यमानवियुज्यमानदेशासम्भवे चलितुमसामर्थ्यात्। कथं सर्वव्यापित्वमस्येति चेत्? सर्वत्रोपलभ्यमानकार्यत्वात्। अहंप्रत्ययेन हि चैतन्यस्वभावस्याऽऽत्मनोऽस्तित्वमात्रमवगम्यते, न तु देशतः कालतो वा विशेष्यते।

ततश्च —

अनवच्छिन्नसद्भावं वस्तु यद्देशकालतः।
तन्नित्यं विभु चेच्छन्तीत्यात्मनो विभुतेष्यते॥

सर्वत्र कार्योपलम्भ इति—अहंप्रत्ययमेवाविशेषितं वदति। **सुखदुःखा**द्युपलब्धिर्वा। न हि क्वचिद्गतैस्ते नोपलभ्यन्ते। न चैते शरीरधर्मा इति स्थितमात्मवादे। तत्र यद्यसर्वगत आत्मा भवेत्, ततो यदेव तद्गता देशेन शरीरं युज्यते, तदेव सुखाद्युपलब्धिः स्यात्, नान्यत्र। शरीरमात्रान्तर्गतात्मवादी त्वाह—**ननु तदेव देशान्तरादागमनस्य लिङ्गम्**। अतश्च विरुद्धहेतुत्वमस्येति।

---

१. क. तदपिनष्टमित्यपूर्वं।

कुतः—

युगपद्यदि सर्वत्र कार्यमात्मगतं भवेत् ।
ततः सर्वगतत्वं स्यात्पर्याये तु शरीरवत् ॥

यदि हि शरीराद् बहिरपि किंचिदात्मकार्यमुपलभेमहि, शरीरान्तरे सुखदुःखादीन्वा ततः सर्वगतत्वमध्यवस्येम । यतस्तु स्वशरीरान्तर्वर्त्येव कार्यम्, यत्र यत्र च तद्गतिः । तत्र तत्र पर्यायेणोपलभ्यते, तच्छरीरकार्यवदेव तत्सहितगतस्योपपत्स्यते । अन्यथा हि शरीरमपि सर्वगतं स्यात् । तस्माच्छरीरवदेवास्य तत्र तत्र गमनापत्तेः सुतरां सक्रियत्वप्रसङ्गः । संदेहो वाऽस्तु साधारणानैकान्तिकत्वात् ।

आह च—

आत्मा शरीरसंमिश्रस्तेनैव सह संगमात् ।
तत्र तत्र सुखादीनि कार्याणि प्रतिपद्यते ॥ इति ।

तत्रोत्तरं **न ह्यसत्यागमने किंचिद्विरुद्धमिति** । येषां तु **न तु तदेवेति** पाठः । तेषां सिद्धान्तवाद्येव पर्यायेण सर्वत्राऽऽत्मकार्योपलम्भनमागमनलिङ्गत्वेऽप्यविशिष्टमाशङ्क्योत्तरं वदतीति ग्रन्थयोजना । कथं पुनरिदमुत्तरं **नह्यसत्यागमन इति** ।

तथा हि—

नैवाविरोधमात्रेण स्वपक्षः सिध्यति क्वचित् ।
परस्याप्यविरोधित्वमविशिष्टं हि दृश्यते ॥

परेणापि हि शक्यं वदितुं न हि सति गमने किंचिद्विरुद्धमिति ।

अत्राभिधीयते ।

उभयत्राविरोधित्वं प्राप्तं न ह्यसतीति यत् ।
पुनर्ब्रवीति तन्नूनं विरोध्यागमनं मतम् ॥

परिसंख्यारूपेणाऽसत्येवाऽऽगमने न किंचिद्विरुद्धम्, सति तु बहुविरुद्धमित्याह ।

आत्मनो मूर्तत्वे अन्योन्याश्रयदूषणम्

तदुपवर्ण्यते—

स्वतस्तावदमूर्त्तत्वान्न भूतैर्मिश्रताऽऽत्मनः ।
ततश्च तैरसंश्लिष्टो न नेतुं शक्यते क्वचित् ॥

यदा मूर्तानामपि सूक्ष्माणां चन्द्रादित्यप्रकाशादीनां न मृत्पिण्डादिभिः सह मिश्रत्वमुपपद्यते, तन्नयनेन वा नयनम्, तदाऽऽत्मनः स्वभावेनात्यन्तामूर्तस्य ज्ञान-

संतानस्य वा भूर्तैर्मिश्रत्वं भवेदिति कुत एतत् ? योऽपि स्याद्वादी बद्धात्मनां शरीरादत्यन्तव्यतिरेकालाभादस्त्येव मूर्तत्वं जीवस्येति ब्रूयात्, तस्यापीतरेतराश्रयप्रसक्तिर्मिश्रत्वान्मूर्तत्वं मूर्तत्वाच्च मिश्रभाव इति। तस्मान्मुक्तावस्थानिदर्शनेन लक्षणतोऽस्यामूर्तत्वान्न शरीरसंपर्कनिमित्तमूर्तत्वसिद्धिः। ततश्च शरीरादन्यः। तेनाऽसंपृक्तश्च। अस्पर्शत्वाच्चानाकृष्यमाणः शरीरे गच्छति, तद्गताकाशप्रदेशवदात्मा पश्चान्निःसृतस्तत्रैव तिष्ठेत्। न हि तस्य वायुना, पृथिव्यादिभिर्वा प्रेरणम्, येन स्वतन्त्रः परप्रेरितो वा गच्छेत्। ज्वालाप्रभृतीनां तु स्पर्शवत्त्वाद्वायुना प्रेर्यमाणानामुल्मुकादिना वा नीयमानानां युक्तं गमनम्। तेन केवलं शरीरं गच्छदचेतनं स्यात्। सर्वगतत्वे तु यत्र यत्र गम्यते, तत्र तत्राऽऽत्मानुस्यूतिरस्तीति युक्ता चैतन्यानुवृत्तिः। यथा पूर्वाकाशप्रदेशत्यागे सर्वगतत्वादेव परेणावकाशदानसिद्धिः।

किं च—

असर्वगतपक्षे स्याज्जीवो देहादनिर्गतः।
अणुः शरीरमात्रो वा सर्वथाऽपि न युज्यते॥

अणुवादनिरासः

ज्ञानसंततिपक्षस्तावन्निराकृतः।

तत्र नित्यः सन्नात्मा शरीराभ्यन्तरवर्ती यद्यणुः कल्प्यते तत्र देहं न व्याप्नुयादसौ।

ततश्च सर्वगात्रस्थसुखपुष्ट्याद्यसंभवः।

यदा ह्यणुमात्र आत्मा भवति, तदा यावानेव प्रदेशविशेषस्तेनाधिष्ठितः। तन्मात्रगतानामेव सुखदुःखादीनामुपलब्धिः प्राप्नोति। ततश्चैकस्मिन्क्षणे शिरःपादवेदनानुभवो न स्यात्। अथ लघुसंचारित्वात्तत्र तत्रोपलभ्यत इत्युच्यते, न तत्र प्रमाणमस्ति। न च कालभेदो लक्ष्यते, अनवस्थितस्योपलब्धिकालासंभवान्नैकत्राप्युपलभ्येत। तस्मादकल्पनेयम्। शरीरावयवानां चापरिशोषणं पुष्ट्यादि चाऽऽत्माधिष्ठितानां भवति, मृतावस्थायां विपर्ययदर्शनात्। तत्र य एवावयवस्तेनोत्सृष्टः, स एव मृतवच्छुष्येत्।

आर्हताभिमतशरीरपरिमाणवादनिरासः

अथ शरीरपरिमित आर्हतपक्षेणाभ्युपगम्यते। तत्रापि बह्वदृष्टं कल्पनीयम्॥

सद्भावोऽवयवानां च तथा तेषामनन्तता।
संश्लेषश्च विनाऽन्येन तद्भावेऽपि च नित्यता॥
अतिसंकोचविस्तारौ पुत्तिकाहस्तदेहयोः।
अन्तराभवसंचारस्तद्भावाज्ञानकारणे॥

सर्वे ह्यवयवसद्भावादयः प्रत्यक्षाद्यविषयाः सन्त उत्प्रेक्षामात्रेण कल्प्यन्ते[1], ते शब्दवच्चेहापि प्रत्याख्येयाः।

शरीरमात्रावधिकानां चैषामुत्प्रेक्षिततुमप्यानन्त्यादशक्यम्, न चैषां द्रवत्वादिना विना कश्चित्संश्लेषहेतुर्विद्यते। न चासंश्लिष्टानामेकजीवारम्भसामर्थ्यम्। सर्वसंयोगानां च वियोगाविनाभूतत्वाद् घटादितुल्यः कदाचिज्जीवस्य प्रध्वंसो भवेत्। गात्रच्छेदे च तद्वर्तिनां जीवावयवानां ततो निःसृत्याऽवशिष्टे शरीरभागे पुनः प्रवेश इत्येतदप्रमाणकम्।

यत्तु वियोजितमात्राणां हस्तादीनां स्फुरणं दृष्टम्, तदभिवातप्रेरितवायुनिमित्तमिति न तावता जीवावयवानुगतिर्विज्ञायते। तथा सति संकोचविकासावेतेषां भवत इत्यत्र न किंचित्प्रमाणं पश्यामः। दीपप्रभाप्रभृतीनां तु कथंचित्प्रत्यक्षत्वादुपपद्येते। न च प्रदीपप्रभायाः संकोचो भवति, शरावादिच्छादने शेषप्रभाविनाशादनावृता हि ज्वालाऽऽत्मसमीपे प्रभामण्डलमारब्धुं समर्था, नाऽऽच्छादिता।

एतेनैव च विकासोऽपि प्रत्युक्तः। अन्य एव ह्यवयवास्तत्र प्रचीयमाना विस्तारं जनयन्ति, न तावतामेव विकासः। स्पर्शवतां च परस्परदेशप्रतिबन्धाद्देशान्तरव्याप्त्या विकासो घटते। जीवावयवानां त्वमूर्तत्वात्सर्वेषां समानदेशत्वाविघातान्नित्यमणुमात्रत्वप्रसङ्गः स्यात्। कथं चैकस्य जीवस्य पुत्तिकाहस्तिशरीरपरिमितौ संकोचविकासौ युज्येते। मरणकाले चान्तराभवशरीरसंचरणं तच्चास्ति, केनचित्प्रतिबन्धेन सदपि न गृह्यते, तेन च शरीरान्तरे जीवनिक्षेपे इत्यादि निष्प्रमाणकम्। तस्मात्सर्वगतत्वम्।

उपनिषत्सु अणुत्ववादो दुर्ज्ञानत्वाभिप्रायेण

यत्तु श्यामाकतण्डुलगात्रादिप्रदर्शनमुपनिषत्सु तद्वाक्यान्तरप्रदर्शितविभुत्वस्यैव सतः सूक्ष्मग्रहणगोचरत्वात्। यदपि द्वैपायनेनोक्तम्। अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष बलाद्यम इति, तदपि काव्यशोभार्थं विस्पष्टमृत्युव्यवहारप्रशंसनार्थं च, पतिव्रताप्रशंसापरे वाक्ये प्रजापतिवपोत्खेदनादिवद् द्रष्टव्यम्। तथा हि तेनैव गीतादिष्वनेकप्रकारं सर्वगतत्वं वर्णितम्।

एकात्मवादे दूषणानि

ननु च सर्वगतत्वे व्योमवत्सर्वशरीरेष्वेक एवाऽऽत्मा प्राप्नोति। नैष दोषः। शरीभूयस्त्वात्प्रतिशरीरं च सुखदुःखोपलब्धिव्यवस्थादर्शनात्। इतरथा ह्येकशरीरेणैव चरितार्थत्वादनेकशरीरवैयर्थ्यं स्यात्। जन्मान्तरशरीरवददोष इति चेत् न। तत्र कर्मान्तरवशेनोपभोगान्तरार्थं पुनः पुनरारम्भात्सर्वशरीरगत-

---

१. क. (टिप्पण्यां) कल्प्याः।

सुखाद्युपलब्धिश्च प्रतिशरीरं स्यात् । अन्यदीयैश्चेन्द्रियैः शरीरान्तरगतस्याऽऽत्मीयत्वादुपलब्धेरन्धबधिरादीनामभावः स्यात् । वर्णविशेषव्यवस्थया च कर्मचोदनाभेदो न स्यात् । एकस्यैवाऽऽत्मनस्तेन तेन शरीरेण संबध्यमानस्य सर्ववर्णोपपत्तेः[1] । आत्मनानात्वे त्वदोषः । सर्वेषामपि च सर्वगतत्वे मूर्तिरहितत्वात्समानदेशवृत्त्यविरोधः । तदपेक्षयैव च चैतन्यात्मकत्वाद्यविभागाच्चोपनिषत्स्वैकात्म्यव्यवहारः । कथं पुनर्नानात्वेऽपि सर्वेषां सर्वशरीरैः संबन्धादन्यदीयसुखदुःखाद्यनुपलब्धिः ।

केचित्तावदाहुः—

यथा शरीरमात्रेऽपि मातृगर्भात्मवर्तिनाम् ।
सुखादीनां व्यवस्थैवं सर्वत्रैषा भविष्यति ॥

शरीरपरिमाणात्मवादिनोऽपि किलायं तुल्यो दोषः तस्यापि गर्भात्मसमानदशत्वान्मातृक्षेत्रज्ञस्तद्गतानि सुखादीन्युपलभेत । तत्र यस्तस्य परिहारः, स सर्वात्मनां सर्वशरीरेषु भविष्यतीत्यविशेषः[2] । यद्यत्रोपपत्तिरुच्येत, न तु परपक्षसाम्यापत्तिरेवोपपत्तिः तस्य च तव चोभयोरप्यन्येन पर्यनुयोगात् । अपि च तस्य त्वगिन्द्रियपरिमाणत्वादन्तःशरीराकाशे बाह्यवदेवाऽऽत्मनोऽनभ्युपगमान्नैव गर्भशरीरेण मातृक्षेत्रज्ञस्य प्राप्तिरस्ति, येन तुल्यदोषता स्यात् । तस्मादेवं परिहर्तव्यम् ॥

देशप्राप्त्या यदीष्येत सुखादेरुपभोग्यता ।
ततो दोषः प्रसज्येत योग्यभोगे त्वदुष्टता ॥

यदि ह्यात्मनः सुखादीनां च समानदेशलक्षण एव सम्बन्ध उपभोगकारणमिष्येत, ततोऽयं दोषः स्यात् । इह तु चक्षुरादीनामिव क्षेत्रज्ञयोग्यतालक्षणः सम्बन्धः । तत्र यथैव त्वगिन्द्रियेण स्पर्शसमानदेशानामपि रूपादीनामग्रहणम्, एवमन्येनाऽऽत्मनाऽन्यदीयधर्माधर्मोपात्तसुखदुःखाद्यग्रहणम् । तस्मादात्मवादोक्तस्वस्वामिभावव्यवस्थानाददोषः । एवं सर्वगतत्वात्सिद्धमात्मनो निश्चलत्वम् ।

अथ द्व्यवदानसमवेतमासीत्तत[3] आह—**तद्विनष्टमिति** । न च तस्याविनाशः, तद्विपरीतद्रव्यान्तरोपलम्भात् । न चास्य ग्रहणप्रतिबन्धहेतुः कश्चिदस्ति, येन न गृह्येत । अथाऽर्थापत्त्या ग्रहणप्रतिबन्धादि कल्प्येत, तथाऽपि सत्यपूर्वाद्बहुतरमदृष्टं दृष्टविपरीतं च कल्पयितव्यम् । तावदविनष्टमास्ते, तथा न दृश्यते, तथा प्रतिबन्धहेतुः, तस्याप्यदर्शननिमित्तं चेत्येवं तस्य तस्यान्यदित्यनवस्था[4] । तथा क्षणिकस्य कर्मणः स्थानमनुपलब्धिकारणं च कल्प्यमित्यतिगौरवम् । एवमना-

---

१ क. वर्णत्वोपपत्तेरिति (टिप्पणियां) । २ क. भविष्यतीत्यदोषः ।
३ क. (टिप्पण्यां) अत आहेति । ४ क. दित्यव्यवस्था ।

श्रितकर्मावस्थानकल्पनायाम्। अथाऽऽत्माश्रितमेव संयोगविभागावकुर्वदासीत्। तत्रापि दृष्टविपर्ययादृष्टकल्पने स्याताम्। तस्माद्वरमपूर्वकल्पनमेवेति सिद्धं मूलाधिकरणप्रयोजनम्।

द्रव्यादीनां फलसम्बन्धे तेषामदृष्टार्थत्वात्कर्मणामिव प्रतिनिध्यभावः। कर्मफलसम्बन्धे तु द्रव्यादेः कर्मोत्पत्त्या दृष्टार्थत्वात्समानकार्यत्वज्ञानादस्ति प्रतिनिधिः। कथं तर्हि पूर्वपक्षवादिनः प्रक्रान्तापरिसमाप्तिदोषाभावः। समापनीयमेव कर्म येन केनचिद् द्रव्येण। सदृशोपादाने तु न यतितव्यं सदृशादपि फलाप्राप्तेः, कर्मणश्चाविहितसाधनविशेषस्यानपेक्षितसदृशत्वाद्येन केनचित्सिद्धेः। न च तत्पूर्वद्रव्यस्य प्रतिनिधिरित्युच्यते। अन्यार्थत्वादसादृश्याच्च। पूर्वद्रव्यं हि फलाय प्रवृत्तमासीत् इदानीमानीयमानं तु प्रत्यवायपरिहाराय, नैमित्तिकफलाय वा प्रवृत्तस्य कर्मणः सिद्ध्यर्थमिति। नामधेयसिद्धिरपि प्रयोजनमेव[1]। सा तु पूर्वोक्तत्वान्न प्रदर्शिता ॥ ५ ॥

(इति द्वितीयमपूर्वाधिकरणम् ॥ २ ॥

॥ अथ द्वितीयम् अपूर्वस्याधिकरणम् ॥ २ ॥

न्या० सु०—कथं पुनरित्यादिभाष्येण शङ्कानिरासार्थत्वेनेतत्सूत्रमवतारितमिति दर्शयितुमाह—**सूत्रसिद्धमिति**। अपूर्वाभावे केभ्योऽपूर्वं प्रतीयते इति प्रतिपत्त्युपायविशेषविचारायोगात्तत्प्रतिपादनापेक्षायां सूत्रकृदाहेति भाष्यतात्पर्यमित्यर्थः। चोदनेनेत्यपूर्वं ब्रूम इत्यादिभाष्योक्तं सूत्रार्थं तात्पर्यतो व्याचष्टे—**फलायेति**। चतुर्थ्युक्तफलार्थत्वं तच्छब्देन परामृष्टं श्लोकं व्याचष्टे—**वेदवाक्येति**।

वृत्त्यन्तरकारैरपूर्वाभावेऽपि कर्मफलसम्बन्धोपपत्तेरपूर्वस्य निष्प्रमाणकत्वाद्भावार्थाधिकरणस्य च केभ्यः फलोत्पादावगतिरित्येतावति पर्यवसानोपपत्तेः सूत्रस्य चारम्भकं प्रवर्त्तकं वाक्यं चोदनेति चोदनास्वरूपकथनार्थतयापि व्याख्यातुं शक्यत्वान्नेदं सूत्रमपूर्वसद्भावाभिधानार्थमित्युक्तम्।

तद् दूषयितुमुपन्यस्यति—**अत्रेति**। केनचित्प्रमाणेनानवगतपूर्वकत्वादवयवार्थमनुगतमस्य नामेति बहुव्रीहिरुपहासार्थः। श्लोकं व्याचष्टे—**वस्त्विति**। प्रत्यक्षाप्रवृत्तिं तावदुपपादयति—**तत्रेति**। आदिशब्देन लोकसिद्धेन्द्रियविषयमात्रग्रहणम्। अनुमानाप्रवृत्तिमुपपादयति—**नापीति**। प्रत्यक्षसूत्रे सत्ता च नानुमानेन कस्यचित्सम्प्रतीयत इत्यत्रोक्तम्।

शब्दाप्रवृत्तिमुपपादयति—**पदेति**। श्लोकं व्याचष्टे—**आगमिकत्वमिति**। उपमानाप्रवृत्तिमुपपादयति—**न चेति**। प्रत्युतासत्त्व एवोपमानं प्रवर्त्तते इत्युपहासार्थमाह—

---

१ क. (टिप्पण्यां) प्रयोजनम् इति।

काममिति । अर्थापत्त्यप्रवृत्तिमुपपादयति—**अर्थापत्त्यापीति** । सिद्धान्ताभिमतश्रुतार्थापत्ति-निरासार्थम्—**फलेत्युक्तम्** । श्लोकं व्याचष्टे—**दृष्टार्थापत्तिरिति** । शब्दप्रामाण्यानादरेण दृष्टार्थापत्त्यवतारात् तथा चेश्वरेच्छादेरपि वैचित्र्यहेतोः पराभिमतस्यापि शब्देनोपादानम् ।

ननु श्रुतायाः फलयागादिसङ्गतेरपूर्वं विनाऽनुपपत्तेः श्रुतार्थापत्तिर्निराकर्त्तुमशक्येत्याशङ्क्याह—**श्रुतार्थापत्तिरिति** । अपूर्वं तु न कदाचित्फलसाधनत्वेन सम्भाव्यत इति व्यतिरिक्ताभिधानात्[1] सम्भवित्वाभिधानायान्यथानुपपत्तेः कथंचित्परिहारासम्भवः दार्ढ्यवाचिना प्रत्यक्षशब्देनोक्तमिति न कथंचिदपीत्यनेन व्याख्यातम् न केवलमन्यथानुपपत्तेः कथंचित्परिहारासम्भवादेव द्रवविषयत्वस्य सम्भवित्वं किं तु सामान्यतः प्राप्तत्वादपीत्यपि चेत्यनेनोक्तम् । द्रवेष्वप्यवदानप्रसक्तेरित्यर्थः । द्रवाख्यविशेषेऽप्यवदेयसामान्यवृत्तेः श्रुतहान्यभावः । सामान्येन च विशेषाक्षेपादश्रुतापत्त्यभावः । सम्भाव्यमानस्याविरोधिनश्च श्रुतार्थापत्तिविषयत्वात् श्रुतार्थापत्तेरप्यपूर्वो न प्रवर्त्तत इति भावः । तत्रापूर्वाभावेऽपि श्रुतसाध्यसाधनसम्बन्धानुपपत्तिपरिहारं कथं विनष्टं साधयतीत्यादिनाशङ्कापूर्वमुपपादयिष्यमाणमभिप्रेत्यापूर्वस्यासम्भवित्वं तावदाह—**अपूर्वं त्विति** । अनेनैव ग्रन्थेन पाक्षिकप्रसक्तेरपि निरस्तस्तात्परिशेषसिद्धिरूपा तावदर्थापत्तिरनाशङ्क्यैवेति । यतोऽन्येत्यनेनोक्तम् ।

ननु प्रसवत्यभावेऽप्यन्यनिवृत्तिमात्रेण परिशेषः तस्मान्न सिद्ध्येदित्याशङ्क्याह—**यदीति श्लोकं व्याचष्टे न हीति** । श्रुतसाधनसम्बन्धविरोधि चापूर्वमित्याह—**अपि चेति** । न च साध्यसाधनत्वाकाररहितं तत्कल्पयितुं शक्यं प्रमाणाभावादित्याह—**न चेति** । कथं तर्हि श्रुतसाध्यसाधनसम्बन्धसिद्धिरित्याशङ्क्याह—**तेनेति** । एतदेवाशङ्कापूर्वकमुपपादयति—**कथमिति** । न च स्थायित्वं फलसाधकत्वे प्रयोजकम् । अकाशादिष्वपि प्रसङ्गादित्याह—**अपि चेति** । एतदेव विवृणोति—**यदि चेति** । ननु शास्त्रेण यागादेः फलसाधनत्वावसायाद्विनष्टत्वेन च तस्य साक्षात् साधनत्वायोगात् स्थायिसम्बन्धिद्वारा साधनत्वसिद्धयेऽपूर्वकल्पनेति । स्वयमेवाशङ्क्य निरस्यति—**अथेति** । तदेव व्याचष्टे—**यदीति** । अतिक्रान्तोऽतीतो विनष्टो यागो यस्येति विग्रहः ।

नन्वात्मनः स्वरूपेणाऽवैचित्र्याद्यागादेश्चातिक्रान्तस्याऽसत्त्वेनाऽवच्छेदकत्वायोगात् फलवैचित्र्यहेतुत्वं न स्यादित्याशङ्क्य, यागादिविनाशस्य तर्हि प्रतियोगियागादिनिरूपणाधीननिरूपणत्वादसत एव घटादेर्विनाशप्रतियोगित्वदर्शनात्तद्भेदापादितवैचित्र्यस्य फलेऽपि वैचित्र्यहेतुत्वोपपत्तेः । स्थायिनः सम्बन्धिनश्च साधनत्वं भविष्यतीति पक्षान्तरमाह—**यद्वेति** । श्लोकं व्याचष्टे—**विनाशिनीति** । ननु विनाशोत्तरकालीनस्यापि फलस्य कथं तज्जन्यत्वावधारणेत्याशङ्क्य, यच्च यत् प्रतीत्यप्रतिगम्य प्राप्य

---

१. व्यतिरेकाभिधानादिति २ पु० पा० ।

यस्मिन्सतीत्युक्तम् । ननु कर्मविनाशान्वितस्यात्मनः साधनत्वस्य न चातिक्रान्तयागेभ्यः पुरुषेभ्यः फलोद्गतिरित्यादिना निवेश्यमानत्वात् स्वतन्त्रस्याभावस्य क्वचित्साधनत्वादर्शनान्नेह साधनत्वकल्पनेति स्वयमेवाशङ्क्य निरस्यति—**स्यादेतदिति।** श्लोके यत् सृष्ट्यादिफलोत्पत्तिनिमित्तस्य भोजनादेः क्रियात्वं धर्मो दृष्टः तदतिक्रमस्योभयपक्षसाम्यात् तत्क्लृप्तत्वाविशेषेणाभावस्यैव तन्निमित्तत्वकल्पनोचितेत्यर्थः । विनष्टस्य कर्मणः साधनत्वायोगे कालान्तरभाविफलसाधनत्वस्यापूर्वकल्पकस्य शास्त्रार्थत्वानवधारणात्कथमपूर्वकल्पनेत्याह—**किं चेति।** श्लोकं व्याचष्टे—**क्रियेति।** नन्वन्तरफलानुपलब्धेः शास्त्रप्रामाण्याच्चावश्यं फलोत्पत्त्यवसायात्, कालान्तरभाविफलसाधनत्वं भविष्यतीत्याशङ्कते—**तत्रेति।** अनुष्ठानात्प्रागनन्तरानुत्पत्तेर्ज्ञातुमशक्यत्वादुत्तरकालं च शास्त्राव्यापाराच्छास्त्रान्तर्गतिर्नापूर्वस्य सम्भवतीति परिहरति **तदिति।** श्लोकं व्याचष्टे **न हीति।** ननु योग्यत्वावधारणाधीनत्वाद्वाक्यार्थप्रतीतेरननुष्ठितस्य च योग्यतायाः प्रमातुमशक्यत्वात्कस्मान्नानुष्ठानोत्तरकालं शास्त्रार्थावधारणेत्याशङ्क्य, ज्ञाते वाचनं न ह्यविद्वान्विहितोऽस्तीति तार्त्तीयसूत्रावयवेनानुष्ठानोत्तरकालं शास्त्रार्थावधारणे सत्यन्योन्याश्रयापत्तिः सूचिता । कर्मफलकालयोर्वियोगो विप्रकर्षः । प्राक्चापूर्वानपेक्षस्य कर्मणः साधनत्वे निश्चिते पश्चात्तदन्तर्भावना शास्त्रविरुद्धेति सूचयितुम्—**यच्चेत्युक्तम्।**

वैगुण्यकल्पनयापि वानन्तरानुत्पत्तिसम्भवान्न शास्त्रविरुद्धार्थापूर्वकल्पना युक्तेत्याह—**अति चेति।** सर्वाङ्गप्रधानसाध्यत्वात्फलस्य कस्मिंश्चित् विगुणे सति इतरसाद्गुण्येऽप्यनुत्पत्तिसम्भवं वक्तुं सर्वशब्दः । बहुपुरुषसाध्यत्वाच्चैकाशक्तावपि वैगुण्यापत्तिः कर्तृष्वितिबहुवचनेनोक्ता । सर्वेषु पदार्थेषु बहवः कर्त्तारः । तेषु मध्ये क्वचित्पदार्थे क्वचित्कर्त्तर्यशक्तेरपरिहार्यत्वादित्यर्थः । श्लोकं व्याचष्टे—**दृश्यत इति।** प्रायेण तावद्वैगुण्यं दृश्यते । यत्रापि न दृश्यते तत्रापि शास्त्राविरोधात्तदेव कल्पनीयमित्यर्थः ।

ननु स्वर्गनरकयोरामुष्मिकत्वेनानन्तर्यायोगात्प्रागप्यनुष्ठानादपूर्वद्वारैव तदुत्पत्त्यवधारणं भविष्यतीत्याशङ्क्याह—**न चेति।** एतदेव प्रश्नपूर्वकमुपपादयति—**कुत इति।** निरतिशयसुखदुःखात्मकयोस्तादृशसुखदुःखोपभोगयोग्ययोर्देशविशेषयोर्वा स्वर्गनरकवाच्यत्वात्तयोश्चानेन शरीरेण प्राप्त्यसम्भवान्नानन्तर्यापत्तिरित्याशङ्क्यालौकिकयोः सम्बन्धग्रहणासम्भवेन वाच्यत्वायोगात् सूक्ष्माणि वासांसि स्वर्गः, चन्दनं स्वर्ग इति च सुखहेतौ द्रव्ये स्वर्गशब्दप्रयोगेणाकृतिन्यायाद्विशेषणभूतस्य लौकिकस्य सुखस्य स्वर्गशब्दवाच्यत्वावगतेर्दुःखहेतौ च दारिद्र्ये नरकापरपर्यायदुर्गतिशब्दप्रयोगाद्विष्ठायां च दुःखहेतौ नरकशब्दप्रयोगदर्शनादाकृतिन्यायेनैव लौकिकदुःखवाचित्वावगतेरानन्तर्योपपत्तिरिति सुखदुःखात्मकत्वेनेत्यनेनैन सूचितम् ।

श्लोकं व्याचष्टे—**न हीति।** ततश्च स्वर्गनरकयोरप्यानन्तर्योपपत्तेर्न ग्रामादिभ्यो विशेषोऽस्तीत्युपसंहरति—**इतीति।**

शास्त्रीयक्रियाजन्यत्वेनापूर्वस्य चेष्टत्वात् निषेधाधिकारे च निषेध्यस्य हननादेर्लोकसिद्धत्वेनाशास्त्रीयत्वात् शास्त्रीयायाश्च तन्निवृत्तेः फलाभावेनापूर्वानपेक्षत्वान्न तत्कल्पना युक्तेत्याह—**किं चेति**। श्लोकं व्याचष्टे—**ब्राह्मण इति**। एवं चापूर्वस्य श्रुतसाध्यसाधनसम्बन्धविरोधित्वाद्विनष्टस्यापि च कर्मणस्तत्सम्बन्धिनः पुरुषस्य वा विनाशस्यैव वा साधनत्वोपपत्तेः कालान्तरभाविफलत्वानवसायाद्वाऽपूर्वस्यासम्भवित्वात्कल्पनानुपपत्तिमुक्त्वा, इदानीं श्रुतसाध्यसाधनसम्बन्धानुपपादकत्वादपि कल्पनानुपपत्तिमाह—**कल्पितमिति**। यागादेर्हि व्यापारात्मकत्वात् जन्मनैव कार्यारम्भकत्वं युक्तम्। अपूर्वस्य त्वव्यापारात्मकत्वान्निर्व्यापारस्य कार्यारम्भकत्वानुपपत्तेः। श्रुतसाध्यसाधनसम्बन्धानुपपादकत्वाद्वचर्था कल्पनेत्याशयः। स्वर्गनरकोपभोगाय देशान्तरे शरीरस्य प्राप्तिर्लभोत्पत्त्यपरपर्यायापेक्षिताय चादिशब्दात्पुत्रादेः प्राप्तिरपेक्षिता। तत्साधेननापूर्वं समर्थमित्यर्थः। स्थाय्याश्रयाभावेन चापूर्वस्य स्थायित्वायोच्छ्रुतसाध्यसाधनसम्बन्धोपपादकत्वं नास्तीत्याह—**न चेति**। प्रक्षेपान्तस्य यागस्यापूर्वारम्भकत्वेनेष्टत्वात्प्रक्षेपस्य च द्व्यवदानाश्रितत्वाद् द्व्यवदानव्यतिरिक्ते यजमानेऽपूर्वारम्भकत्वानुपपत्तेर्द्व्यवदानस्य च विनष्टत्वान्नापूर्वाश्रयः स्थायी सम्भवतीत्याशयः।

वार्तिककृन्मते यागस्य पुरोडाशसाध्यत्वेऽपि सङ्कल्पात्मकत्वेनात्माश्रितत्वाद् द्व्यवदानप्रक्षेपादीनां हि सर्वेषामिति सिद्धान्तवार्त्तिकदर्शनाच्च पुरोडाशाददीयमानत्वात्पुरोडाशादिशब्देन द्व्यवदानमेवोक्तम्। अङ्गापूर्वाणामप्येवं न स्थाय्याश्रयः सम्भवतीत्यतिदिशति **एवमिति**। अङ्गापूर्वं च प्रधानापूर्वेण सम्बन्धम्, न वा। असम्बद्धत्वे तावन्नोपकारित्वं सम्भवतीत्याह—**किं चेति**। आराच्छब्देन क्रियासाधनासमवायोऽभिप्रेतः। प्रधानाश्रयात्माश्रितत्वात्प्रधानाश्रयत्वे त्वारादुपकारित्वं विरुध्येतेत्याशयः। श्लोकार्थमुपपादयति—**न हीति**। सम्बन्धस्तु संयोगाद्यभावादाश्रयाश्रयिभावो वाच्यः।

अङ्गानां च प्रधानपूर्वसम्बन्धाभावेन तत्समवेतापूर्वोत्पादकत्वायोगात्पारिशेष्यात्पतनप्रबन्धलक्षण एवाश्रयाश्रयिभावः परिशिष्यते। न चामूर्त्तस्य पतनप्रतिबन्धकतास्तीत्याह—**न चेति**।

नन्वारादुपकार्यङ्गानां प्रधानापूर्वसम्बन्धाभावेन तत्समवेतापूर्वोत्पादकतायोगेऽपि सन्निपत्योपकार्यङ्गानां प्रधानापूर्वसाधनाश्रयत्वेन तत्सम्बन्धसद्भावात्। तत्समवेतापूर्वोत्पादकत्वं भविष्यतीत्याशङ्क्याह—**यद्यपि चेति**। लक्षणार्थत्वेनोपशब्दस्य व्रीह्यादिद्रव्यमात्रक्षये तत्समवायिनोऽपूर्वस्य क्षयादित्यर्थलाभः। व्रीह्याश्रितस्याप्यपूर्वस्यावघातेन व्रीहिनाशेऽन्यत्र तण्डुलादावसञ्चारान्न तद्द्वारा प्रधानापूर्वोपकारित्वं स्यादित्यर्थः। सन्निपात्यङ्गानां प्रात्यात्मिकापूर्वमात्रपर्यवसायित्वस्य वक्ष्यमाणत्वात्, फलसाधनस्य प्रधानस्य साध्यं यदपूर्वं, तस्येति व्यधिकरणे षष्ठ्यौ व्याख्येये। नन्वङ्गापूर्वाणां प्रधानापूर्वसमवायेऽपि प्रधानापूर्वाश्रयात्माश्रितत्वेनैकार्थसमवायात्प्रधानापूर्वोपकारकत्वं भवि-

ष्यति । फलसाधनत्वयोग्यतासाधनार्थत्वेन च क्रियासाधनांशनिवेशाभावात् सन्निपत्त्योपकारित्वानापत्तेराराादुपकारकत्वाविरोध इत्याशयेनाशङ्कते—**अथ त्विति ।** प्रधानापूर्वाणामप्यात्माश्रितत्वसूचनायाऽपिशब्दः आत्माश्रितत्वे सत्यपूर्वस्य योग्यतालक्षणत्वात्फलभोगयोग्यत्वस्यैवात्मनापेक्षणात्पुरुषार्थतापद्येतेति दूषणमाह - **एवं सतीति ।** विधिस्थैकश्रुतित्वादित्यत्र चान्योन्यसापेक्षाणामङ्गापूर्वाणामुपकारकत्वस्य वक्ष्यमाणत्वादसम्बन्धानां चान्योन्यसापेक्षैककार्यारम्भकत्वलक्षणयौगपद्यायोगान्नोपकारकत्वं सम्भवतीत्याह—**अपि चेति ।** एकोखासंयोगादिलक्षणान्योन्यसम्बन्धसम्बद्धानामेव । ग्रावादीनामेकोखाधारणाच्च एककार्यारम्भदर्शनात् सम्बन्धं विनान्योन्यस्वापेक्षैककार्यारम्भकत्वलक्षणं यौगपद्यं न सम्भवतीत्याशयः ।

प्रधानापूर्वाणामप्यन्योन्यापेक्षाणामेकफलसाधनत्वलक्षणं फले यौगपद्यमेकादशाद्ये वक्ष्यमाणमन्योन्यसम्बन्धाभावादेवायुक्तमित्यतिदिशति—**एतेनेति ।** अतोऽपूर्वस्यासम्भवित्वाद्विरोधित्वादनुपपादकत्वाच्च कल्पनानुपपत्तेः, तन्निरपेक्षाणामेव प्रधानानां पुरुषार्थसाधनत्वम् । अङ्गानां च प्रधानोपकारसाधनत्वमित्युपसंहरति—**तस्मादिति ।** कृतत्वमात्रशब्देन विनष्टस्य कर्मणाऽतिक्रान्तयागस्य वा पुरुषस्य कर्मविनाशस्यैव वा फलसाधनतेति पक्षत्रयमपि संगृहीतम्, किं चापूर्वं यागादिभिरुत्पाद्यते, अभिव्यज्यते वेति । नोभयथापि सम्भवतीत्याह—**न चेति ।** उत्पत्त्यसम्भवे तावत्प्रश्नपूर्वकं विकल्प्य हेतुमाह-- **कुत इति ।** अङ्गकर्मजन्यस्योपकारापूर्वस्य, प्रधानकर्मजन्यस्य च फलापूर्वस्यानवयवत्वात्क्रमशोऽपि तज्जन्मसम्भवित्वं न प्रतीयत इत्यर्थः । एतदेवोपसंहरति—**एवं तावदिति ।**

ननु यथा स्फोटवादिभिर्निरवयवस्यापि स्फोटस्य क्रमवर्तिभिर्नादैरस्फुटस्फुटस्फुटतरत्वेनाभिव्यक्तिरिष्यते, तथापूर्वस्य निरवयवस्याप्याग्नेयादिभिः क्रमप्रवर्तिभिरस्फुटस्फुटस्फुटतरत्वेनाभिव्यक्तिर्भविष्यतीति द्वितीयकल्पमाशङ्क्य दूषयति—न **चेति ।** एतदेव प्रश्नपूर्वकमुपपादयति—**कथमिति ।** प्रत्यक्षग्राह्यस्यैवार्थस्य लोके अभिव्यक्त्यपेक्षादर्शनात्तस्याश्चेन्द्रियविषयद्वयान्यतमसंस्कारद्वारदर्शनादप्रत्यक्षत्वाच्चापूर्वे तदनुपपत्तेर्नाभिव्यक्तिः सम्भवतीत्याशयः । ननु कुलालादिव्यापारैर्णैतत्विलक्षणाण्यभिव्यक्तिः घटादेः सांख्यैरिष्टेत्याशङ्क्य नो लौकिकानां—**दर्शन इत्युक्तम् ।** श्लोकं व्याचष्टे—**सर्वेति ।** अपूर्वापेक्षयाऽन्तरशब्दः घटादेश्चालोकानन्तरमुपलम्भात् प्रत्यभिज्ञया च प्राक् सत्त्वावयसायात्तदभिव्यङ्क्तेष्यते, अपूर्वस्य तु यागाद्यनन्तरमप्यनुपलम्भात्प्राक्सत्त्वे च प्रमाणासत्त्वान्न द्वयमप्यभिव्यङ्ग्यत्वकारणमस्तीत्याह—**यदि चेति ।** अपरेषां निपुणं मन्यानां मतमुपन्यस्तमुपसंहरति—**इतीति ।** असम्भाव्यमानत्वाद्विरोधित्वादनुपपादकत्वादुत्पत्त्यभिव्यक्त्योश्चाभावादिति सर्वथाशब्देनोक्तम् । न केवलमपूर्वासम्भवादस्य सूत्रस्यापूर्वसद्भावप्रतिपादनार्थत्वं ते नेच्छन्ति, किं त्ववाचकत्वादपीत्याह—**न चेति ।** भाष्यकृद्व्याख्यादूषणमुपसंहरति—**इतीति ।**

प्राभाकरवत्कार्यं नियोगापरपर्यायस्वतन्त्रापूर्वाभ्युपगमे परोक्ता दोषाः स्युः नास्मदभिमतशक्तिरूपाभ्युपगम इति भाष्यकृद्व्याख्यानमभिधातुमुपक्रमते—**अत्रेति**। विग्रहवदिवेति शरीरगतं स्वातन्त्र्येण कार्यारम्भकत्वमुपमानेनोपलक्षितम्। अङ्गकर्मभ्यः प्राक् फलोत्पादनायोग्यस्य प्रधानकर्मणः फलोत्पादनयोग्यता, प्रधानकर्मभ्यः प्राक् फलोपभोक्तृत्वायोग्यस्य पुरुषस्य फलभोक्तृत्वयोग्यतेत्यर्थः। कर्मजन्यत्वं वक्तुं कर्मभ्यः परेत्युक्तम्। लौकिककर्मजन्याया योग्यताया अपूर्वत्वनिवृत्त्यर्थम्—**शास्त्रेत्युक्तम्**। श्लोकं व्याचष्टे—**प्रधानेति**।

सदुपलम्भकप्रमाणाभावेनापूर्वस्यासत्त्वं यदुक्तम्, तदनुभाषणपूर्वकं निरस्यति—**यत्त्विति**। सर्वप्रमाणाभावे सत्यभावः स्यात्, न कतिपयप्रमाणाभावमात्रेणेत्याशयः। न तु प्रत्यक्षाद्यप्रवृत्तौ शशशृङ्गवदभावनिश्चयात्तद्विरोधेन श्रुतार्थापत्तेरप्यप्रवृत्त्युपपत्तेः कथमन्याप्रवृत्तिरदोष इति स्वयमेवाशङ्कयाह—**किमिति**। प्रमाणान्तरायोग्यत्वादप्रवृत्त्या नाभावनिश्चय इत्याशयः। नन्वेवं सत्यपूर्वस्यानागमिकत्वात्तद्द्वारस्य श्रेयःसाधनत्वस्यागमिकत्वं न स्यादित्याशङ्कयाह—**शब्देति**। श्रुतशब्दैकदेशभूतशब्दकल्पकत्वेन शब्दैकदेशभावाच्छ्रुतार्थापत्तिरप्यागम इवेत्यर्थः। विवक्षितविशिष्टवाक्यार्थप्रतिपादनाशक्तेः श्रुतशब्दमात्रस्यापरिपूर्णत्वसूचनार्थः स्वार्थशब्दः।

शब्दैकदेशत्वमेवोपपादयितुमुपक्रमते—**येनेति**। ननु विनष्टाविनष्टकारणसाधारणी शक्तिः कार्यकारणनियमसिद्धयर्थं कल्प्यमानापि क्रियाजन्यत्वाभावान्नापूर्वशब्दाभिधेयेत्याशङ्कयाह—**नियोगतश्चेति**। शक्तिकल्पनावश्यकत्वं वक्तुमेतदुक्तम्। वस्तुतस्त्वत्र कर्मफलसम्बन्धचोदनायामतीतानागतानामेव कर्मणां जन्या शक्तिरेष्टव्येत्यर्थः। अनन्तरफलोत्पत्तावप्यावश्यकत्वं नियोगतश्चेत्यनेनोक्तम्। एतदेव प्रश्नपूर्वकमुपपादयति—**कुत इति**। श्लोकं व्याचष्टे—**यदेव हीति**। केवलस्यापि दर्शस्यानेककर्मात्मकत्वाच्छक्तिं विना साहित्यासम्भवात्तेः—**तदन्त्यं वेत्युक्तम्**। यदा च शक्तिं विना भूयसां यौगपद्यं न सम्भवति, तदान्तरफलोत्पत्तावपि सर्वकर्मान्ते फलोत्पत्तेरभ्युपगन्तव्यत्वाच्छक्त्यनङ्गीकरणे चानन्तर्यविशेषेणैकस्यैव साधनत्वापत्तेः शक्तिद्वारा यौगपद्यं सर्वकर्मणां साधनत्वव्यवहारायाङ्गीकार्यमित्याह **नियोगतश्चेति**। सर्वमेतद्वृद्धवाक्येन—**तथा चाहेति**। सर्वपदार्थानां कार्यारम्भाख्यव्यवहाराङ्गतत्त्वस्य शक्तिद्वारत्वात्प्रोक्षणादिपदार्थस्वरूपे द्रव्याश्रितत्वादन्यदेशे विनष्टत्वाच्चान्यकालेऽपि सञ्चारिस्थायिशक्तिद्वारा व्यवहारः सिद्धयतीत्यर्थः। नन्वविनष्टस्य कर्मणः शक्तिरलौकिकीत्याह—**लौकिकं चापीति**। कालान्तरे यस्योद्गतिरिति विग्रहः। श्लोकं व्याचष्टे—**यान्यपि चेति**। क्रियाजन्यकार्योत्पत्त्यनुकूलादृष्टातिशयात्मकत्वात् संस्काररूपताऽपूर्वस्य संस्कारशब्देन सूचिता।

ननु लोके प्रमाणान्तरानुसारात्संस्कारात्मकशक्तिकल्पनं युक्तम्। वेदे तु शास्त्रैकसमधिगम्यत्वात्, तस्य चानुष्ठानात्प्रागेव प्रवृत्तेः, तदा च फलस्य कालान्तरीयत्वानिश्चयान्नापूर्वाख्यसंस्कारात्मकशक्तिकल्पना युक्तेत्याशङ्कां निरस्यन् श्रुतार्थापत्ति-

प्रमाणकत्वमपूर्वस्योपसंहरति—**तेनेति**। फलस्यानेकाङ्गप्रधानसाध्यत्वात्, तेषां च क्षणिकत्वेन स्वरूपसाहित्यायोगात्फलस्यानन्तरोत्पत्तावपि साहित्यसिद्ध्यर्थं शक्तिकल्पनाऽनुष्ठानात्प्रागप्युपपन्नेत्याशयः।

एवं स्वपक्षसाधनमुक्त्वा, इदानीं परोक्तानि दूषणानि परिहरिष्यन्नपि च यदि तावदित्यनेनोक्तं श्रुतसाध्यसाधनसम्बन्धविरोधं तावदनुभाषणपूर्वकं परिहरति—**यत्त्विति**। श्लोकं व्याचष्टे—**यदि हीति**। ननूदकाहरणसाधनघटसाधनस्यापि कुलालस्योदकाहरणसाधनत्वाप्रसिद्धेः। कथं यागोत्पादितया शक्त्या सधितस्य फलस्य यागसाधनमित्याशङ्कानिरासार्थत्वेन द्वारशब्दं व्याख्यातुम् - **सर्वत्युक्तम्**। यथा काष्ठादेर्ज्वलनाद्यवान्तरव्यापाररूपद्वारापेक्षत्वेऽपि पाकादौ साधनत्वाविघातः तथा संस्कारात्मकद्वारापेक्षत्वेऽपि साधनत्वाविघात इति सूचयितुं व्यापारशब्दः। नन्वपूर्वस्य व्यापारात्मकताऽनेनोक्ता व्यापारत्वेऽस्य स्थायित्वानुपपत्तेः। शक्तिसंस्कारत्वोक्तिविरोधापत्तेश्च कार्योत्पत्त्यनुकूलो ह्यदृष्टोऽतिशयः सिद्धरूपः शक्तिशब्दवाच्यः सामान्यतः प्रसिद्धः तद्विशेषत्वागन्तुकः संस्कारशब्दवाच्यः प्रसिद्धो न व्यापारात्मकः। साध्योद्देशप्रवृत्तकर्तृव्यापारव्याप्यत्वाद्व्यवहितस्यापि यागस्य साधनत्वाविघात इत्याशयः।

अथ वेत्यनेन सर्वस्य दध्यादेरवस्थान्तरापत्त्यपेक्षत्वेऽपि साध्यत्वाविघातदर्शनात् स्वर्गादेः शक्त्याख्यापूर्वात्मकावस्थान्तरापत्त्यपेक्षित्वेऽपि साध्यत्वाविघाताभिधानार्थत्वेनोत्तरार्द्धं व्याख्यातम्। उपभोग्यानुपभोग्यावस्थे स्थूलसूक्ष्मशब्दाभ्यामभिप्रेते। यदा च स्थाय्यपूर्वं शक्त्यात्मकत्वात्कर्मफलाभ्यामनत्यन्तभिन्नम्, तदा फलं भवद्भावयेदनेनेत्थमिति। त्रयाणामपि भावनांशानां यौगपद्याभिधानमपि कर्मफलकालयोरविच्छेदादुपपन्नं भवतीति सूचयितुमाह—**एतावानिति**। परिहारद्वयेऽपि वृद्धसम्मतिमाह—**आह चेति**। ज्वलनक्रियाद्वारा पक्तव्यमिति द्वारनिर्देशोक्तिः सर्वसाधनानां द्वारापेक्षाप्रदर्शनार्था साध्यस्यावस्थान्तरापेक्षायामुत्तरार्द्धेन दृष्टान्तोऽभिहितः।

यत्त्वपूर्वं विनापि कर्मफलयोः साध्यसाधनसम्बन्धानुपपत्तिपरिहारोपपत्तेर्नापूर्वं कदाचित्फलसाधनत्वेन सम्भाव्यत इत्युक्तम्, तदनुभाषणपूर्वकं निरसितुमुपक्रमते—**यत्त्विति**। यदि शास्त्रादेवावगम्यते, किं भवतो विरुध्यत इत्यनेन विनष्टस्यापि कर्मणस्साधनत्वोपपादनेनानुपपत्तिपरिहारमुक्तम् तावत्प्रश्नपूर्वं निरस्यति—**कुत इति**। न सम्भावितं सामर्थ्यरूपेण स्थायित्वं यस्येति विग्रहः। श्लोकं व्याचष्टे—**नूनमिति**। एतदेवोपसंहरति—**तस्मादिति**। अवधारणाप्यपूर्वस्यानुष्ठानात्प्रागेव सिद्धा किमुत सम्भावनेत्यर्थः।

यदपि यष्टुरेवात्मनो यागैः सङ्गतस्येत्यनेनातिक्रान्तयागस्य साधनत्वोपपत्तेरपूर्वस्यासम्भवित्वमुपपादितं तदपि निरस्यति—**न वेति**। श्लोकं व्याचष्टे—**यदि हीति**। अतिक्रान्तानतिक्रान्तयागयोरिति बहुव्रीहिणा अतिक्रान्तानतिक्रान्तयागपुरुषविशेष इति मध्यमपदलोपीसमासो व्याख्यातः। अविशेषमेवोपपादयति—**आत्मत्वमिति**।

नन्वात्मत्वाविशेषेऽपि विनष्टयागे पुरुष 'स एष' यज्ञायुधी यजमान इत्यादि-प्रयोगदर्शनेन यजमानत्वस्य भावादकृतयागे चाभावाद्विशेषोऽस्तीत्याशङ्क्याह— **अयं भावः।** यागान्वितं वा रूपं यजमानत्वेनाभिमतम्, यागविषयं कर्तृत्वमात्रं वा। तत्राद्ये कल्पे **यागरूपस्य** विनष्टानुत्पन्नत्वेनोभयत्रासत्त्वतया तुल्यत्वादविशेष इति, स्वरूपनिष्कर्षार्थभावप्रत्ययान्तेन यागशब्देनोक्तम्। यजमानशब्दप्रयोगस्तु भूतगत्या भविष्यतीति द्वितीयं कल्पं निरस्यति—**न चेति।** यथा क्रियारहितस्यानुत्पन्नक्रियस्य निर्व्यापारत्वात्कर्तृत्वं नास्ति, तथौदासीन्याख्यमवस्थानन्तरं प्राप्तस्य विनष्टक्रियस्यापीत्यर्थः। कर्तृशक्तिस्तु सर्वदा सद्भावान्न विशेषादिकेति स्वयमेवाशङ्क्याह— **कर्त्रिति।** उक्तेन च प्रकारेणातिक्रान्तानतिक्रान्तयागयोः पुरुषयोर्विशेषाभावे शुद्धस्य पुरुषस्य साधनत्वापत्तेः, तस्य चावैलक्षण्यात्फलवैलक्षण्यं न स्यादित्याह—**अपि चेति।**

ननु विशेषान्तराभावेऽप्यतिक्रान्तयागत्वमेव विशेषो भविष्यतीत्याशङ्क्याह— **तथेति।** अतिक्रमस्य-विनाशस्य कार्यानुपयोगित्वेनोपलक्षणमात्रार्थत्वाद्यागान्तरातिक्रमे चोपलक्ष्ये पुरुषे विशेषाप्रतीतेः फलविशेषासिद्धिरित्याशयः। एकयागगतप्रयोगाल्पत्वबहुत्वेऽप्येतं दोषमतिदिशति—**एतेनैवेति।** फलविशेषाभावत्वेन निरस्ता इत्यर्थः। कर्त्तुश्चाख्यातवाच्यत्वे सति, प्रकृत्यर्थस्य यागस्य तद्विशेषणत्वप्रतीतेर्विनष्टस्य च कार्यानुपयोगित्वात्प्रमेयान्तर्भूतव्यावर्त्तकत्वे लक्षणविशेषणत्वानुपपत्तेरुपलक्षणत्वमात्रकल्पनयातिक्रान्तयागस्य पुरुषस्य साधनत्वं सम्भाव्येत तस्य कर्त्रधिकरणे निषेत्स्यमानत्वात्, यागस्य पुरुषोपलक्षणत्वानुपपत्तेः शुद्धस्यैव पुरुषस्य साधनतापत्तेः फलनानात्ववैचित्र्ये न युज्येते एवेत्याह—**कर्त्रिति।**

ननु विनष्टस्य यागस्य वैलक्षण्यानापादकत्वे तज्जन्यस्यापूर्वस्यापि वैलक्षण्यानुपकृतेनावैलक्षण्यापत्तेस्त्वत्पक्षेऽप्येतौ[1] दोषौ तुल्यावित्याशङ्क्याह—**यस्य त्विति।** कार्यकल्प्यत्वाद्यथाकार्यं विलक्षणमेव तत्कल्प्यत इत्याशयः। **यथा च** सत्तातिक्रान्तयागस्य कर्त्तुः फलसाधनस्य फलान्तरोत्पादनकालेऽपि भावाद् बहुप्रयोगानुष्ठानानर्थक्यम्, तथातिक्रान्ताङ्गस्यापि कर्त्तुः कर्मोपकारित्वाभ्युपगमे सकृत्कृतेष्वङ्गेषु श्रुतिक्रान्ताङ्गस्य कर्त्तुः कर्मान्तरकालेऽपि भावात्कर्मान्तराणामप्युपकारसिद्धेः पुनरनुष्ठानानर्थक्यमित्याह—**किं चेति।** कूसूलमध्यगतस्य धान्यस्य धान्यान्तराद्यवच्छेद्यत्वदर्शनादङ्गमध्यगतत्वेनाङ्गावच्छिन्नतोक्ता। यथा प्रधानावच्छिन्नः कर्त्ता फलसाधनम्, तथोपकारकोऽप्यङ्गावच्छिन्नः कर्त्तैव चेदिष्यते, ततः प्रकृतौ कृतैरङ्गैर्विकृतावपि प्रसङ्गेनोपकारसिद्धेर्विकृतावङ्गानां प्राप्तिर्न स्यादित्यर्थः। श्लोकं व्याचष्टे— **प्रयाजादीनामिति।** उपकार्यभेदेऽपि तावदन्यार्थसिद्धोपकारसद्भावेऽप्यन्यो नापेक्ष्यते। इह तूपकार्यमप्यभिन्नमिति सोऽपि चेत्यनेन सूचितम्।

---

१. तत्तन्त्रासवनीयवत् इति सू० पा०।

नन्वङ्गानामपूर्वार्थत्वस्य वक्ष्यमाणत्वान्न कर्त्तुरुपकार्यतेत्याशङ्क्याह—**अपूर्वाभावादित्युक्तम्**। प्रयाजादिगतस्यातिक्रान्तप्रयाजादिकर्तृजन्यस्योपकारस्य सद्भावेनान्यार्थाङ्गकृतस्योपकारस्येतरत्रापि सन्निधानाविशेषरूपप्रसङ्गलक्षणसद्भावात्। तस्य कृतप्रयाजादेः पुरुषस्य न पुनरङ्गान्यनुष्ठातव्यानीति कर्तृषष्ठ्यङ्गीकरणात्तेन नानुष्ठातव्यानीत्यर्थः। ननु 'तन्त्रमध्ये विधानाद्वा मुख्यतन्त्रेण सिद्धिः स्यात्तन्त्रार्थस्याविशिष्टत्वादि(१२-२-१७)ति द्वादशाध्यायाधिकरणसिद्धान्तसूत्रे तन्त्रमध्यविधाननिबन्धनत्वेन प्रसङ्गस्य वक्ष्यमाणत्वात्कथमिह तदभावे प्रसङ्गः स्यादित्याशङ्क्य—**विनापीत्युक्तम्**। अन्यार्थाङ्गकृतस्योपकारस्यान्यत्रापि सन्निधानाविशेषस्तन्त्रार्थस्याविशिष्टत्वादित्येनेनोक्तः। तन्त्रमध्यविधानस्य फलम्। तच्चेह न तन्त्रमध्यविधानं विनाप्युपकारस्यात्मनो विततत्वाल्लभ्यत इत्यर्थः। कोऽननुष्ठाने दोष इत्याशङ्क्याह—**तत्रेति**।

ननु पश्वर्थमनुष्ठितैर्विद्युदादिभिर्ब्राह्मणतर्पणान्तैः सर्वैरङ्गैः सम्पाद्यस्योपकारस्याद्याङ्गानुष्ठानेनोपक्रान्तस्यान्त्याङ्गानुष्ठानात्प्रागसमाप्तेस्तन्मध्येऽनुष्ठीयमानेन पशुपुरोडाशेनैकदेशकालकर्तृकत्वात्प्रसङ्गेन तादर्थ्यमपि युक्तम्। विकृतेस्तु प्रकृतिप्रयोगबहिर्भावात्प्रकृतौ कृतस्योपकारस्य विकृत्या सहैकदेशकालकर्तृत्वानुपपत्तेस्तादर्थ्यमयुक्तमित्याशङ्कते—**नन्विति**। प्रकृतौ कृतानां प्रयाजादीनां विकृत्या सह कालभेदादेतत्प्रयाजाद्युपकृतमात्मरूपं न विकृतौ प्रसङ्गेनोपकरोतीत्यर्थः। पश्वर्थस्यापि प्रयाजानुयाजादेः पुरोडाशप्रयोगेऽनुपक्रान्ते, समाप्ते वाऽनुष्ठानाद्भिन्नकालस्यापि प्रासङ्गिकत्वोपकारकत्वं दृष्टमित्याशङ्क्य—**अत्यन्तेत्युक्तम्**। पश्वर्थप्रयाजादिप्रयोगस्य पुरोडाशप्रयोगात् बहिर्भावेऽपि पुरोडाशप्रयोगस्य तदन्तर्भावेन नात्यन्तं कालभेदोऽस्तीत्याशयः।

विकाराच्च न भेदः स्यादर्थस्याविकृतत्वादि(१२-१-४)ति द्वादशाधिकरणसूत्रे पशुकानां प्रयाजानुयाजानामेकादशसंख्यत्वेन पौरोडाशिकेभ्यः पञ्चत्रिसंख्येभ्योऽनुयाजानां च पृषदाज्यद्रव्यकत्वेन शुद्धाज्यद्रव्यकेभ्यः पौरोडाशिकेभ्यो गुणतो विकृतत्वात्तिष्ठत्पशुकालत्वेन च पाशुकानां प्रयाजानां पौरोडाशिकेभ्यः सन्नहविष्कालेभ्यः कालतो विकृतत्वादनुष्ठानभेदः स्यादित्याशङ्कानिरासार्थं गुणकालविकारे सत्यप्यर्थस्योपकारस्याविकृतत्वान्नानुष्ठानभेद इत्यभिधानेनास्यापि चोद्यस्योत्तरमुक्तं भवतीत्याह—**वक्ष्यतीति**।

नन्वेतदेककालोपकारविषयत्वात्कथं कालभेदचोद्यस्योत्तरमित्याशङ्क्य आह—**यदेव हीति**। कर्तृव्यतिरिक्तापूर्वानभ्युपगमेनास्मिन्पक्षे कर्त्तुरेवोपकारकत्वात्, तस्य च स्थायित्वेनाविकृतत्वात्कालभेदेऽप्यन्यथात्वाभावात्प्रसङ्गसिद्धिरविरुद्धेत्याशयः। अतिक्रान्तयागकर्तृपक्षोक्तदोषाः कर्मविनाशस्यापि साधनत्वपक्षेऽतिदेष्टव्या इत्याह **एत इति**। कथमित्यपेक्षायामनुभाषणपूर्वकमतिदिशति—**यस्यापि चेति**। हिशब्दार्थे चशब्दः। एतदेव दृष्टान्तेनोपपादयति—**तथा हीति**। महारोगापेक्षया रोगान्तराणां शुभत्वं विवक्षित्वा शुभाशुभकर्मविनाशाविशेषदृष्टान्तत्वम्। वाशब्देन रोगानुत्पत्तेरप्युपलक्षणात्प्राक् प्रध्वंसाभावाविशेषदृष्टान्तत्वम्, विनाशानां तु वैचित्र्याभ्युपगमे वस्तुन्येव वैचित्र्य-

दर्शनात् वस्तुत्वापत्तेः । कर्मानन्तरभावितत्सम्बन्धिवस्त्वन्तराभावान्नामान्तरेणापूर्वमेव स्यादित्याह—**यदि त्विति** । श्रुतहानाश्रुतकल्पनाप्रसङ्गश्चास्मिन्पक्षे स्यादित्याह—**न चेति** । श्लोकं व्याचष्टे—**यजेतेति** ।

यद्वा यथाश्रुतस्वर्गत्यागेनानुश्रुतस्य यागाभावस्य साधनत्वकल्पनमपीति वक्रोक्त्या दर्शयन् पूर्वार्द्धं व्याचष्टे **अथ वेति** । ननु यथापूर्वसाधनत्वकल्पनेऽपि न यागसाधनत्वाहानिः, तथा यागाभावस्यापि साधनत्वेन तद्धानिरित्याशङ्कानिरासार्थत्वेनोत्तरार्द्धं व्याख्यातुं पूर्वोक्तमेवापूर्वपक्षे श्रुतहानाश्रुतकल्पनाप्रसङ्गाभावमाशङ्कापूर्वकं समारयति—**अपूर्वेति** । भावनिरपेक्षस्याभावस्य साधनत्वादर्शनान्न विनाशस्य साधनत्वं सम्भवतीत्याह **न चेति** ।

ननु विहिताकरणस्याभावरूपस्यापि प्रत्यवायसाधनत्वस्मृतेस्तत्कालान्यकरणापेक्षत्वे च तस्यौदासीन्यमात्रेणापि प्रत्यवायपरिहारसिद्धेरनुष्ठानानर्थक्यप्रसङ्गादवर्जनीयस्य निमिषितादेः प्रत्यवायसाधनत्वे विहितानुष्ठानेऽपि प्रत्यवायापत्तेर्विहिताकरणापेक्षत्वे[1] च तस्यौदासीन्यमात्रस्य निमिषितादेः साधनत्वेऽन्वयव्यतिरेकाभ्यामकरणस्यैव साधनत्वापत्तेर्भावनिरपेक्षस्याभावस्य साधनत्वं दृष्टमित्याशङ्क्याह- **यदि त्विति** । गुर्वाज्ञप्तानुष्ठानेनाहमवज्ञातोऽस्मीत्यवज्ञानिमित्तगुरुकोपदर्शनाद्विहितावज्ञाख्यभावसहकृतस्यैव विहिताननुष्ठानस्त साधनत्वकल्पना युक्तेत्याशयः—**अत एवाचार्यैः** ।

'स्वकाले यदकुर्वंस्तत्करोत्यन्यदचेतनः ।
प्रत्यवायोऽस्य तेनैव नाभावेन स जन्यते ॥'

इति विहितमकुर्वन्यदन्यत्करोतीति वदद्भिर्विहिताकरणनिमित्तस्यान्यकरणस्य प्रत्यवायनिमित्तत्वाभिधानादवज्ञायामेव वाकरणस्य निमित्तत्वोपपत्तेर्विहितावज्ञानमेव प्रत्यवायहेतुत्वेनोक्तम् । नाभावेनैव जन्यत इत्येवशब्दोत्कर्षेण केवलस्य हेतुत्वं निरस्तम् । एवं च विहितस्याननुष्ठानान्नरः पतनमृच्छतीति स्मृतिरनुगृहीता भवति । निमिषितादेस्तु हेतुत्वे विहिताकरणस्य किंचित्करणत्वाभावात् स्मृतिबाधापत्तिः । एतां वाव स देवतामपरुणद्धि योऽलमग्निहोत्राय सन्नाग्निहोत्रं जुहोतीति वापरोधशब्देनावज्ञाभिधानात्सैव प्रत्यवायहेतुर्वेदादवसीयते । निमिषितादेस्तु हेतुत्वं निष्प्रमाणकमेव । तस्मादवज्ञाख्याशयविशेषरूपस्य भावान्तरस्य तत्सम्भवान्न शुद्धस्य क्वचिद्धेतुता दृष्टेति ग्रन्थार्थः ।

याप्यपूर्वेऽस्य दोषस्य तुल्यतोक्ता । तामनुभाषणपूर्वं परिहरति—**यत्त्विति** । यत्त्वपूर्वस्य शास्त्रान्तर्गतिरुक्ता । तामप्यनुभाषणपूर्वं परिहर्त्तुमाह—**यत्त्विति** । अनन्तरफलत्वेऽप्यनेकाङ्गप्रधानसाहित्यमपूर्वं विना न सम्भवतीत्याशयः । स्वर्गस्य ज्वरादिदुःखाननुविद्धकेवलसुखात्मकत्वेन परलोकानुभवनीयत्वेन च षष्ठाद्ये भाष्यकृता वक्ष्यमाणत्वात्, तत्प्रतियोगित्वेन नरकस्य सुखाननुविद्धकेवलदुःखात्मकत्वेन परलोकानुभवनीयत्वेन च

---

१. पेक्षस्येति २ पु० पा० । तत्र तस्यौदासीन्यमात्रस्येति नास्ति ।

सूचयिष्यमाणत्वप्रतीतेरानन्तर्यासम्भवाच्छास्त्रार्थावधारणवेलायामेव कर्मफलकालयोर्विप्रकर्षावगतेरपूर्वस्य शास्त्रान्तर्गतिरस्तीत्याह—**स्वर्गेति**। निरतिशयत्वस्यालौकिकत्वेऽपि शब्दे सुखदुःखात्मकत्वात् सम्बन्धग्रहणसम्भवाच्चन्दनविष्ठादावुपचारेण स्वर्गनरकशब्दप्रयोगोपपत्तेर्वाक्यशेषेऽप्यस्य सुखनिरतिशयावगतेर्निरतिशयसुखदुःखयोर्वाच्यत्वं सम्भवतीत्याशयः। ऐहिकस्यापि पुत्रादेरानन्तर्यं न सम्भवतीत्याह—**ऐहिकमिति**। ग्रामादिप्राप्तेष्वानन्तर्यसम्भवेऽपि चिरकालोपभोगयोग्यत्वेन ग्रामादेः पुरुषापेक्षावशात्फलत्वावगमात्तस्य चापूर्वं विनानुपपत्तेः सूत्रादप्यपूर्वस्य शास्त्रान्तर्गतिरस्तीत्याह - **न चेति**। श्लोकं व्याचष्टे—**चिरेति**। एवं चानुष्ठानात्प्रागेव पूर्वान्तर्गतत्यवधारणाद्वैगुण्यकल्पनयाऽर्थापत्तेः प्रतिबन्धो योऽभिहितः सोऽप्ययुक्त इत्याह—**अतश्चेति**। यापि निषेधेष्वपूर्वानन्तर्गतिरुक्ता। तामप्यनुभाषणपूर्वकं परिहरति—**यत्त्विति**। विधिवन्निषेधस्यापि शास्त्रत्वात्, तद्विषयस्य हननादेरपि शास्त्रीयताऽस्तीत्याशयः। हननादेर्लौकिकत्वाद्वैदिकापूर्वजनकत्वानुपपत्तिशङ्कां निरस्यन् श्लोकं व्याचष्टे—**यथा हीति**। एवमपूर्वस्य विरोधित्वासम्भवित्वे निरस्य, इदानीमनुपपादकत्वं निरसितुं कल्पितमपि चेत्यनेनोक्तम्। निष्क्रियत्वं तावत् साध्यसाधनसम्बन्धानुपपादकत्वे हेतुं निरस्यति—**सत्यपीति**। निश्चलस्याप्ययस्कान्तादेर्देशान्तरे कार्यारम्भकत्वदर्शनाच्चलनाख्यक्रियाराहित्यनिमित्तो यः कार्यारम्भासामर्थ्यरूप उपालम्भो दोष उक्तः, सोऽप्ययुक्त इत्याशयः। निश्चलस्याप्यात्मनः प्रयत्नाख्यक्रियावत्त्वेन देशान्तरे शरीरप्रापणसामर्थ्यदर्शनाच्च गमनादीत्यादिशब्देन यत्रोपादानं प्रापणादीत्यादिशब्देन शरीरोत्पादनमुपभोग्यविषयोपनयनं चोपात्तम्। यापि स्थाय्याश्रयासम्भवेनानुपपादकतोक्ता। तामपि निरस्यति—**आत्मैव चेति**। यत्वपूर्वजनिकायाः प्रक्षेपादिक्रियाया द्रव्याश्रितत्वात्तद्व्यतिरिक्ते यजमानात्मन्यपूर्वारम्भकत्वं न सम्भवतीत्युक्तम् तत्परिहरति—**क्रियापीति**।

ननु प्रक्षेपादिक्रियायाश्चलनात्मकत्वात्सर्वगतात्माश्रितत्वं न युक्तमित्याशङ्क्याह—**आत्मवाद इति**। द्व्यवदानचलनहेतुभूतशरीरचलनात्मकस्य प्रक्षेपादेः प्रयोजकव्यापारत्वात्प्रयोज्यव्यापारद्व्यवदानवत्कर्मभूतद्रव्याश्रितत्वानुपपत्तेः कर्त्राश्रितत्वस्यैव न्याय्यत्वाच्छरीरचलनेऽपि चात्मन एव कर्तृत्वस्यात्मवादे सूचितत्वाच्चलनस्य शरीराश्रितत्वेऽपि तदवच्छिन्नस्य शरीरचलनात्मकस्य प्रयत्नस्य भावनात्मकस्यापूर्वजनकस्यात्मन्यपूर्वारम्भकत्वं युक्तमित्याशयः। एतदेव व्याचष्टे—**द्व्यवदानेति**। नन्वात्माश्रितत्वेऽपि क्रियायाः क्षणिकत्वेनोत्पन्नमात्रविनाशिन्यास्तेनोत्पद्यविनष्टत्वान्नास्यारम्भक्षणोऽपि हीत्यनेन न्यायेनापूर्वारम्भकत्वं न सम्भवतीत्याशङ्क्याह—**अतश्चेति**। आशुतरविनाशः—क्षणिकत्वम्, नोत्पन्नविनाशितेत्याशयः।

नन्वात्माश्रितत्वेऽपि क्रियायाः स्वसमवेतापूर्वाख्यशक्तिजनकत्वानभ्युपगमे क्रियापूर्वयोः काष्ठज्वलनवद्धर्मधर्मिभावाभावेनात्यन्तभेदापत्तेः श्रुतक्रियासाधनत्वानिर्वाहप्रसङ्गात् स्वसमवेतापूर्वजनकत्वस्य बलादभ्युपगमनीयत्वापत्तेः क्रियाविनाशे तदाश्रित-

स्यापूर्वस्यापि काष्ठविनाश इव ज्वलनस्य विनाशे फलोत्पत्तिकालं यावदनवस्थानाच्छ्रुत-साध्यसाधनसम्बन्धोपपादकत्वं न सम्भवतीत्याशयेनाशङ्कते - **कथमिति** ।

द्रव्यमेव विशिष्टशक्त्यपेतं व्यापारशब्दवाच्यं भवतीत्यनेन न्यायेन क्रियात्मनोरत्यन्त-भेदाभावेनात्मसमवेतस्यापूर्वस्य क्रियातोऽत्यन्तभेदाभावात् साध्यसाधनसम्बन्धोपपाकत्वं सम्भवतीत्याशयेन परिहरति—**अत्रेति** । शङ्कापरिहाराशयौ प्रकटयति—**कथमिति** । आत्मसमवाये कर्मशक्तित्वं विरुध्यत इत्याशङ्कार्थः । किं चाग्न्यादेरप्यदृष्टेऽस्यातिशयस्य दाहादिकार्यसाधकत्वोपपादकत्वमेवाग्न्यादिशक्तित्वम्, नाग्न्यादिसमवेतत्वं भास्वरत्वादे-रग्न्यादिसमवेतत्वेनापि तच्छक्तित्वाप्रसिद्धेः । स्मृतिहेतौ च संस्कारे स्मर्त्रात्मसमवेतेऽपि संवित्सामर्थ्यभाविनः स्मरणादित्यादिप्रयोगादनुभवशक्तित्वप्रसिद्धिः । अतोऽन्यसम-वायेऽपि कर्मशक्तित्वाविरोध इत्याह—**अपि चेति** । श्लोकं व्याचष्टे—**यदेति** । नैतावता कर्मशक्तित्वहानिरिति शेषः ।

यच्चारादुपकार्यङ्गापूर्वाणां प्रधानसम्बन्धाभावे तदुपकारित्वं न सम्भवति, प्रधान-साधनशब्दसमवायात्तु प्रधानसम्बन्धाभ्युपगमे वपनादिवत् सन्निपत्योपकारित्वापत्तेः, अरादुपकारित्वं विरुध्येतेत्युक्तम् । तदपि निरस्यति—**तथेति** । वपनादेरात्मनेपदेन लिङ्गेन वा वपनाद्याश्रयभूतप्रधानसम्बन्धियजमानशेषत्वात् सन्निपत्योपकारित्वं ज्ञातम् । तेषां त्वाश्रयशेषत्वाभावात् सन्निपत्योपकारित्वापत्तेर्नारादुपकारकत्वविरोध इत्याशयः । यत्त्वङ्गानां यजमानशेषत्वाभावात् सन्निपत्योपकारित्वाभावेऽपि अङ्गापूर्वाणां यजमा-नाश्रितत्वाभ्युपगमेऽपूर्वस्य योग्यतालक्षणत्वाद्यजमानेन च फलभोक्तृत्व एव योग्यता-पेक्षणात्फलभोक्तृत्वयोग्यतापादकत्वात् प्रधानवत्पुरुषार्थत्वापत्तेः कर्माङ्गत्वम्—**हीये-तेत्युक्तम्** ।

तदप्यनुभाषणपूर्वकं निरस्यति - **यत्त्विति** । तदुद्देशविधिविषयत्वलक्षणतादर्थ्य-हेतुकत्वाच्छेषत्वस्याङ्गानां च पुरुषोद्देशेनाविधानात्प्रधानस्य च फलसाधनत्वयोग्यताधा-नेन योग्यत्वलक्षणाविरोधात्पुरुषाश्रितत्वमात्रेण तच्छेषत्वं वाच्यं न च तत्सम्भवती-त्याशयः । आश्रितत्वस्य शेषत्वाहेतुत्वं दृष्टान्तेनोपपादयति—**राजार्थेति** । राजशेष-भूतस्याङ्गानुलेपस्यौपयिकमित्यर्थः । न च पतनप्रतिबन्धलक्षण एवाश्रयाश्रयिभावो विवक्षितः, येनामूर्त्तानां न स्यादित्याह—**न चेति** । नन्वारादुपकार्यङ्गापूर्वाणामात्मा-श्रितत्वात् स्थायित्वेनोपकारित्वोपपत्तावपि सन्निपत्योपकार्यङ्गापूर्वाणां संस्कार्यव्रीह्यादि-नाशे नाशात् स्थायित्वाभावेनोपकारित्वं न सम्भवतीत्युक्तम् । अत आह—**यत्त्विति** । व्रीहिसमवायिनोऽप्यपूर्वस्य तन्नाशे नाशात् । तण्डुलादौ सञ्चारासम्भवमाशङ्क्य व्रीह्या-दिद्रव्यस्यैवावस्थाविशेषस्तण्डुलादिरूप इत्युक्तम् । न व्रीह्यादिरूपं संस्कार्यम्, किं तु तदुपलक्षितं प्रधानापूर्वसाधनीभूतं द्रव्यम् । तच्चावस्थाभेदेऽप्याहवनीयप्रक्षेपात्प्राङ् न विनश्यतीत्याशयः । यत् व्रीहिसमवाय्यपूर्वम्, तत्तण्डुलादिषु व्रीह्यादिद्रव्यावस्थासु सञ्च-रणपरम्परया ह्यवदानपर्यन्तं गतमिति तच्छब्दाध्याहारेण योज्यम् । ननु ह्यवदानपर्यन्तं

गमनेऽपि तस्याहवनीयप्रक्षेपान्नाशे सति तद्गतस्यापूर्वस्यापि नाशान्न प्रधानापूर्वोपकारित्वं सम्भवतीत्याशङ्क्याह—**तत्रापीति**। प्रोक्षणादिजनितापूर्वशिष्टद्व्यवदानसाधितस्यैव प्रधानस्य स्वापूर्वानिष्पादकत्वात्प्रधानीयापूर्वनिष्पत्तौ व्यापृत्य प्रोक्षणादिजनितमपूर्वं विवर्तते नश्यति।

ननु प्रधानापूर्वमनिष्पाद्येत्युक्तम्। ननु क्रियाप्यत्रैव च स्थितेति, यागादेः प्रधानस्यात्मनि समवायाभिधानात् प्रक्षेपादेश्च द्व्यवदानचलनहेतुभूतशरीरचलनात्मकत्वादात्मन्यसमवायेऽपि प्रयोजकव्यापारत्वात् शरीरसमवेतत्वेन द्व्यवदानसमवायाभावात्तद्गतस्य प्रोक्षणादिजन्यस्यापूर्वस्य प्रधानसम्बन्धानुपपत्तेः कथं तदीयापूर्वनिष्पत्तौ तद्व्यापार इत्याशङ्क्य—**तत्रापीत्युक्तम्**। देवतोद्देशद्रव्यत्यागात्मकप्रयोजकव्यापाररूपांशद्वययुक्तस्य यागाख्यप्रधानस्य यावंशावुद्देश्यदेवता-त्याज्यद्रव्ययोः प्रयोज्ययोर्व्यापारौ प्रयोजकव्यापारान्यथानुपपत्तिकल्पितौ, तयोर्मध्ये यस्त्याज्यस्य द्रव्यस्य त्यागांशं-प्रयोजकव्यापारं प्रति प्रयोज्यस्य व्यापारः, त्यागद्वारा प्रधानस्यांशः। तेन द्व्यवदाने प्रधानस्य समवायाद्धोमाख्यस्य च प्रधानस्य देवतोद्देश-द्रव्यत्याग-प्रक्षेपात्मकप्रयोजकव्यापार-रूपांशत्रययुक्तस्य त्यागप्रक्षेपौ प्रयोजकव्यापाररूपावंशौ प्रति प्रयोज्यस्य त्याज्यस्य प्रक्षेपस्य द्रव्यस्य यौ व्यापारौ त्यागप्रक्षेपद्वारेणांशौ, ताभ्यां तद्द्व्यवदाने प्रधानस्य समवायादित्यर्थः। स्वमते च कृतस्य पुरोडाशस्य यागसाधनत्वाद् द्व्यवदाने यागस्य समवायो भाष्यकारमतेनोक्तः।

ननु सर्वाङ्गानुष्ठानोत्तरकालं समस्ताङ्गापूर्वाणां युगपत्प्रधानोपकारसाधनत्वस्य वक्ष्यमाणत्वात्प्रधानापूर्वनिष्पत्तौ व्यावृत्त्यनिवृत्तिरयुक्तेत्याशङ्कानिरासायैवकारः। आरादुपकार्यङ्गविषयोऽसौ समस्तशब्द इत्याशयः। सन्निपत्योपकार्यङ्गापूर्वाणां प्रधानापूर्वनिष्पादनमात्रेण पर्यवसानं तेषामर्थाधिकरणे वक्ष्यमाणया व्यवस्थयोपपादयति—**तेनैव चेति**। यच्च युगपत्प्रयोगवचनग्रहणावगतमङ्गापूर्वाणां प्रधानोपकारे, प्रधानापूर्वाणां च फले, यौगपद्यमन्योन्यसम्बन्धाभावान्न सम्भवतीत्युक्तम्। तदपि निरस्यति—**यथैव चेति**। यथाङ्गापूर्वाणां, प्रधानापूर्वाणां चान्योन्यसम्बन्धः, तथाऽऽरादुपकार्यङ्गापूर्वाणामेकात्माश्रितत्वेनान्योन्यसम्बन्धाद्युगपत्प्रधानोपकारलक्षणकार्यारम्भसिद्धिः। प्रधानापूर्वाणामप्येवमेवान्योन्यसम्बन्धात्फलाख्यकार्यारम्भसिद्धिरित्यर्थः।

ननूक्तेन न्यायेनाङ्गप्रधानापूर्वाणां स्थायित्वे, सम्बन्धे च सम्भवत्यपि प्रधानापूर्वनिष्पादनमात्रेणाङ्गापूर्वाणां विनाशस्योक्तत्वात्, प्रधानापूर्वाणां क्रमोत्पत्तित्वेन, अङ्गापूर्वाणां प्रधानसमकालानां क्रमवर्तित्वापत्तेः। प्रागूर्ध्वं चोत्पद्यमानानामत्यन्तविप्रकर्षात्साहित्यानुपपत्तेर्न युगपदुपकारः सम्भवतीति शङ्कते—**कथं पुनरिति**।

सन्निपत्यारादुपकारिणां सर्वेषां प्रधानापूर्वनिष्पत्तौ व्यापारमाशङ्कावाद्यभिमतमभ्युपगम्यैव, तावन्निष्पन्नामङ्गापूर्वाणां स्वरूपेणाऽनागतानां च कर्तव्यत्वावधारणेन

यौगपद्यमुपपादयति– **केचित्तावदाहुरिति ।** समस्ताङ्गोपेतप्रधानप्रयोगप्रक्रमादागामिनामपि ताटस्थ्यावस्थायाः प्रचलितत्वात्प्रधानसहायतोपपन्नेत्यर्थः ।

नन्वेवं सर्वाङ्गापूर्वाणां यौगपद्योपपत्तावपि एकप्रधानापूर्वनिष्पत्तौ विनष्टत्वात्प्रधानान्तरसहकारित्वानुपपत्तेरेकैकमिति वीप्सा न युक्तेत्याशङ्क्याह– **आतिथ्येति ।** 'यदातिथ्यायां बर्हिः तदुपसदाम्, तदग्नीषोमीयस्येति श्रुतेः साधारणार्थतया चतुर्थे वक्ष्यमाणत्वाद्यथातिथ्यायामुपात्तस्य बर्हिषस्तत्समाप्तावपि नापवर्ग इति चतुर्थसिद्धो दृष्टान्तः । अनागतानामसत्त्वान्नोपकारित्वं सम्भवतीति शङ्कते—**कथं पुनरिति ।** स्वरूपासत्त्वेऽपि कर्त्तव्यत्वावधारणमात्रेण हेतुताऽन्यत्रापि दृष्टत्वादुपपन्नेति परिहरति— **एकान्तेति ।** नन्वेवं सत्युत्पत्त्युत्तराङ्गानुष्ठानवैयर्थ्यं स्यादिति शङ्कते— **ननु चेति ।** समस्ताङ्गोपेतप्रधानानुष्ठानोपदेशान्यथानुपपत्त्योत्तराङ्गानुष्ठानसहकृतानां प्रधानापूर्वाणां फलापूर्वनिष्पादकत्वावगतस्तदकरणे सहकार्यभावे निष्पन्नान्यपि प्रधानापूर्वाणि स्वकार्यं फलापूर्वं न निष्पादयन्तीत्याशयेन परिहरति— **कथमिति ।** कार्यापवर्गित्वादपूर्वाणामपवर्गेण कार्यानिष्पादकत्वं लक्षितम् । कर्त्तव्यत्वावधारणस्याविहितत्वात्प्रधानोपकारित्वकल्पनानुपपत्तेरुत्तराङ्गविधीनां कर्त्तव्यत्वावधारणपरत्वाभ्युपगमे वाऽनुष्ठानस्याविहितत्वात्प्रधानापूर्वसहकारित्वकल्पनानुपपत्तेर्वैधे चार्थे प्रमाणान्तरानवतारादनेन प्रकारेण यौगपद्यानुपपत्तेरपरितोषात्स्वमतेन सन्निपत्योपकार्यङ्गापूर्वाणां प्रधानापूर्वनिष्पत्तौ सहकारित्वात्, तेषां चात्मीयप्रधानापूर्वनिष्पत्तावपवर्गेऽपि फलापूर्वनिष्पत्तौ सहकारिणामारादुपकार्यङ्गापूर्वाणां फलापूर्वनिष्पत्तेः प्रागनपवर्गाद्यौगपद्यं सम्भवतीति दर्शयितुमपूर्वोत्पत्तिप्रक्रियामाह—**अन्ये पुनरिति ।** प्रधानानामन्योन्याङ्गत्वाभावेऽपि तत्क्रमस्याङ्गत्वात्पूर्वं प्रधानमकृत्वोत्तरप्रधानानुष्ठानेऽप्यपूर्वानिष्पत्तेस्तदानुत्पन्नेत्युक्तम् । पाश्चात्यानां सामवायिकानां प्रतिपत्तित्वात्तस्याश्च क्रत्वर्थोपात्तद्रव्यनाशदोषपरिहारनिमित्तक्रतुवैगुण्यापत्त्याकदाचिन्निष्पन्नस्याप्यपूर्वस्य नाशापत्तेस्तत्परिहारार्थं प्रक्रान्तद्रव्यक्रतुसम्बन्धसमापनार्थत्वेनापूर्वनिष्पत्त्यर्थत्वाभावात्प्रथमकृतेत्युक्तम् । आरादुपकार्यङ्गापूर्वाणां प्रधानापूर्वनिष्पादकत्वनिरासार्थो मात्रशब्दः ।

ननु सामवायिकाङ्गापूर्वाणां प्रधानापूर्वनिष्पत्तौ व्यापारे सति तन्मात्रेणापवर्गात्फलापूर्वोत्पादकरूपप्रधानोपकारनिष्पत्तौ व्यापाराभावे सर्वेषां युगपत् प्रधानोपकारजनकत्वमेकदेशे वक्ष्यमाणं विरुध्यते इत्याशङ्क्यैवमित्याद्युक्तम् । सामवायिकाङ्गापूर्वानुगृहीतप्रधानजन्यत्वं सर्वेषां प्रधानापूर्वाणामेवंशब्देनोक्तम् । यद्यप्यारादुपकार्यङ्गापूर्वाणामेव प्रधानोपकारनिष्पत्तौ व्यापारः तथापि प्रधानापूर्वेष्वनिष्पन्नेषूपकारानिष्पादनात्, तन्निष्पत्तेश्च सामवायिकाङ्गाधीनत्वात्सर्वेषां युगपत् प्रधानोपकारजनकत्वाभिधानमिति दर्शयितुम्—**यदेत्युक्तम् ।** परमार्थतः पौर्णमास्यमावास्याख्यस्यैकैकस्य प्रधानत्रिकस्य स्वाङ्गापूर्वानुगृहीतस्यैकैकस्य समुदायापूर्वजनकत्वेऽप्येकदेशिमतेन समुदायापूर्वाभावमभिप्रेत्य दर्शापूर्वाणां तदीयारादुपकार्यङ्गापूर्वाणां च प्रतीक्षणमुक्तम् । सामवायि-

काङ्गापूर्वसाध्यात् प्रधानापूर्वनिष्पादनात्मकात्प्रत्यात्मिकात्। प्रधानोपकाराक्रमवत्प्रधानानुसारितया क्रमेणोत्पद्यमानात्प्रधानवैचित्र्यतो विचित्रादारादुपकार्यङ्गापूर्वे साध्यस्यस्योपकारस्य आरादुपकारीण्यङ्गानि प्रतिसाध्यतया प्रधानानि च प्रत्यनुग्राहकतया साधारणरूपत्वेनादृष्टोपयोगित्वाद्यापूर्वात्मकत्वेन युगपदुत्पत्त्यैकरूपत्वेन वैलक्षण्यं दर्शयितुमङ्गानीत्याद्युक्तम्। तदुपपदानार्थं विधिस्त्वेकश्रुतित्वादपर्यायविधानादि(११-१)त्येकादशाधिकरणसूत्रावयवोक्तमपर्यायविधानमनुकीर्तितं व्याख्यातुम्—**युगपदित्युक्तम्**। आरादुपकार्यङ्गापूर्वाणामखण्डोपकारनिष्पत्तेः प्रागविनाशाद्यौगपद्यं सम्भवतीति, सकलस्य तात्पर्यम्। कः पुनर्निष्पादनातिरिक्तः प्रधानापूर्वाणामारादुपकार्यङ्गापूर्वैरुपकारः क्रियतइत्यपेक्षायां फलापूर्वोत्पादनयोग्यताधानात्मकमुपकारं दर्शयितुमाह—**तत इति**। ननु फलापूर्वस्यापि संस्काररूपत्वाभ्युपगमात्संस्कारस्यानुभवादिजन्यस्य कालविप्रकर्षेण क्षीणत्वस्य चात्यन्तं नाशस्य चोपलम्भादपूर्वान्तरवत्फललाभात्प्रागपि नाशापत्तेः साध्यासाधनसम्बन्धोपपादकत्वं न स्यादित्याशङ्क्याह—**तत्त्विति**। फललाभार्थत्वेनैव तस्य कल्पितत्वात् तत्पर्यन्तं तस्य स्थायित्वमक्षीणत्वं च कल्पितमित्याशयः।

ननु यत्र प्रतिबन्धकादिवशादनन्तरं फलं नोत्पद्यते, तत्रास्तु नाम फलापूर्वकल्पनम्। यत्र त्वैहिकत्वात् पुत्रादिवददृष्टकारणानपेक्षत्वादनन्तरमप्युत्पत्तुं शक्तम्, प्रतिबन्धकाभावादनन्तरमप्युत्पद्यते, तत्र तत्कल्पनं विनापि साध्यसाधनसम्बन्धोपपत्तेरवान्तरापूर्वद्वारा चाङ्गप्रधानसाहित्योपपत्तेर्यस्य च शब्दस्यार्थेन फलं साध्यते, तेनापूर्वं कृत्वा नान्यथेति फलापूर्वस्य सार्वत्रिकत्वाभिधानमयुक्तमिति कोमलोक्त्या शङ्कते—**यदि पुनरिति**। तथापीत्यर्थे ततोऽपीत्युक्तम्। अनन्तरं फलोत्पत्तावप्यपूर्वं विना चिरकालोपभोगासम्भवस्योपभोगश्चिरेणैषां न निमित्ताद्विना भवेदित्यत्रोक्तत्वात्कल्पनीयं फलापूर्वमिति परिहरति—**बाढमिति**।

नन्वपूर्वस्य चिरकालस्थायित्वाभ्युपगमे अङ्गापूर्वाणामेव साक्षात्प्रधानोपकारकत्वोपपत्तेरखण्डोपकारापूर्वकल्पनं व्यर्थं प्रधानापूर्वाणां च साक्षात्फलजनकत्वोपपत्तेः फलापूर्वकल्पनं व्यर्थमित्याशङ्कते—**अथेति**। प्रात्यात्मिकशब्देन प्रत्येकमेकैकाङ्गजन्यतोक्ता, साक्षात्तेषां जनकत्वसम्भवेऽपि कल्पकक्रमानुरोधेनैवक्लृप्तमिति परिहरति—**सत्यमिति**। निषेधार्थं न हीत्यखण्डं पदम्। श्लोकं व्याचष्टे—**प्रधानानामिति**। उत्पत्तिवाक्यावगतभेदानामपि प्रधानानां फलान्वयात्प्रागङ्गानां च प्रधानोपकारान्वयात्प्रागपूर्वानपेक्षत्वात्तदन्वयकाले च यौगपद्यप्रतीतेर्भिन्नापूर्वकल्पनाहेत्वभावादेकमेव फलापूर्वमुपकारापूर्वं च प्रतीयते। प्रयोगकाले तु क्रमप्रतीतेः स्वरूपतः साहित्यायोगात्साहित्यसम्पत्त्यर्थं प्रात्यात्मिकानेकापूर्वकल्पनेत्यर्थः।

नन्ववश्यकल्प्यैः प्रात्यात्मिकापूर्वैरेव साहित्यवत्फलसाधनोपकारान्वययोरप्युपपत्तेर्गौरवापादिका प्रागेकापूर्वकल्पना न युक्तेत्याशङ्क्याह—**सर्वत्र चेति**। प्रत्यात्मिकापूर्वाणां साहित्यसिद्ध्यर्थं कल्पितत्वात्कार्यान्तरोपयोगित्वं न सम्भवतीत्याशयः। प्रौढ्या तु तेषां

कार्यान्तरोपयोगित्वेऽप्यदोष इति प्रागुक्तम्। तस्मात्फलापूर्वमेव समस्तफलोपभोगपर्यन्तं स्थायि कल्प्यते। तदुत्पादनमात्रेण तु प्रधानापूर्वाणां नाशः। आरादुपकार्यङ्गापूर्वाणां प्रधानोपकारोत्पादनेन, सामवायिकाङ्गापूर्वाणां प्रात्यात्मिकप्रधानापूर्वोत्पादनेनेति व्यवस्था सिद्धेति तात्पर्यार्थः।

यत्त्वस्मिन्पक्षे पौर्णमास्यां निष्पन्नानामङ्गापूर्वाणां दार्शब्राह्मणतर्पणानन्तरमुपकारोत्पादनेनापवर्गाभिधानात् तावत्कालं स्थायित्वमुक्तम्। तदमावास्यायां पुनरननुष्ठेयत्वापत्त्या दूषयति—**के चित्त्विति**। कोऽननुष्ठेयत्वापत्तौ विरोध इत्याशङ्क्य—**आह एवञ्चेति**। प्रधानाहुत्योर्द्वसङ्ख्यत्वादङ्गाहुतीर्विना न त्रयोदशसङ्ख्या सम्पद्येतेत्याशयः। 'पौर्णमास्यां पौर्णमास्या यजेतामावास्यायाममावास्ययेति पौर्णमास्यमावास्याख्ययोस्त्रिकयोः करणत्वप्रतीतेः तस्य च साधकतमत्वलक्षणत्वात् तमवर्थस्यातिशयस्यापेक्षिकत्वेनाङ्गसाहित्यं विनानुपपत्तेरङ्गसाहित्यावगमात्तस्य चानुपादेयकालं प्रत्युपादेयत्वेन विवक्षितत्वादेकैकस्य त्रिकस्य फलसाधनत्वाभावेनानुपकार्यत्वात् त्रिकद्वयस्यैकस्मिन्कालेऽनुत्पन्नस्योपकर्त्तुमशक्यत्वादुपकारानिष्पत्तौ चाकृतकार्यत्वेनाङ्गापूर्वाणामपवर्गाभावेऽपि वचनबलाद्विः प्रयुक्तानामुपकारकत्वाकल्पनया द्विरनुष्ठानं सेत्स्यतीत्येकदेशिना दूषणपरिहाराभिप्रायमाशङ्कते **अन्ये त्विति**।

यैः प्रयोगद्वयान्तेऽङ्गापूर्वाणामपवर्गः प्रागुक्तः त एवान्यशब्देन परामृष्टाः। त्रिः सम्मार्ष्टीत्यादिवदावृत्त्यविधानात्। सकृत्प्रयुक्तानामेवोपकारकत्वोपपत्तेरपवर्गाभावे पुनः प्रयोगानर्थक्यापत्तेरपरिहार्यत्वात् स्वमतेन पौर्णमास्यान्निष्पन्नानामङ्गापूर्वाणां पौर्णमास्याख्यप्रधानत्रयसमुदायापूर्वनिर्वृत्तावपवर्गं दर्शयितुमाह—**अथ वेति**। कथं प्रधानापूर्वत्रयस्यैकसमुदायापूर्वजनकत्वावगतिरित्यपेक्षायां पौर्णमास्येति तृतीयाश्रुत्या करणत्वावगमादित्युक्ते. ननु फलापूर्वमेव प्रति करणत्वं भविष्यतीत्याशङ्क्य, समर्थः पदविधिरिति पदमात्रविधेः सामर्थ्याधीनत्वस्मरणात्, सापेक्षत्वे च सामर्थ्यविघातापत्तेर्विभक्तिश्रुत्यामावास्यानैरपेक्ष्यावगमात्पौर्णमास्यसहितामावास्यया स्वार्थं समुदायापूर्वं करोतीत्यकारप्रश्लेषेणोक्तम्। अङ्गापेक्षा तु करणश्रुत्याक्षिप्तत्वान्न सामर्थ्यविघातिकेति साङ्गेत्यनेन सूचितम्।

यद्वा साङ्गा पौर्णमासी स्वार्थं समुदायापूर्वं करोति अमावास्याप्यमावास्ययेति करणविभक्तिश्रुतेरङ्गसहिता स्वार्थं समुदायापूर्वान्तरं करोतीति योज्यम्। यदि त्वमावास्याख्यसमुदायसहितस्य पौर्णमास्याख्यसमुदायस्य 'दर्शपूर्णमासाभ्यामि'ति करणविभक्तिश्रुतेः स्वार्थफलापूर्वसाधनत्वावगमात्समुदायद्वयस्य चापूर्वं विना साहित्यानुपपत्तेः। समुदायापूर्वजनकत्वावगतिरित्येवं व्याख्यायते, ततः साहित्यस्य द्वन्द्वावगम्यत्वाद्विभक्तिगम्यत्वाभिधानं तावदयुक्तम्। समुदाययोश्च फलसाधनत्वाभ्युपगमे पौर्णमास्यधिकरणे तन्निरासादरोऽपि विरुध्येत्। अङ्गापूर्वाणां प्रधानोपकारापूर्वोत्पादनमात्रेण विवृत्तिसूचनार्थम्—**पूर्वोक्तेनैवेत्युक्तम्**।

पौर्णमासीकालीनेष्वङ्गापूर्वेषु पौर्णमास्याख्यप्रधानत्रयोपकारं कृत्वा निवृत्तेष्वङ्गापूर्वजनितानुग्रहविशिष्टं पौर्णमास्याख्यप्रधानापूर्वत्रयम् एकं समुदायापूर्वं कृत्वा अपवृज्यत इत्यर्थः। फलापूर्वस्य तर्हि कथं निवृत्तिरित्याशङ्क्याह—**तत्पुनरिति**। स्वाङ्गापूर्वजनितानुग्रहविशिष्टामावास्याख्यप्रधानापूर्वत्रयजन्यतामावास्याख्यसमुदायापूर्वस्यैवंशब्देनोक्ता। समुदायापूर्वद्वयाभ्युपगमे प्रकृतोपयोगमाह—**अतश्चेति**। समुदायापूर्वद्वयाभ्युपगमे पौर्णमासाख्यसमुदायापूर्वजननार्थं पौर्णमासाख्यप्रधानापूर्वत्रयेण स्वाङ्गापूर्वजनितोपकारापेक्षणादुपकारनिवृत्तौ च कृतार्थतया पौर्णमासीनिष्पन्नाङ्गापूर्वनाशात्, अमावास्यायां पुनः प्रयोगानर्थक्यदोषाभावः। तदनभ्युपगमे त्वकृतार्थत्वात्पौर्णमास्यां निष्पन्नानामङ्गापूर्वाणां नाशायोगात्पुनः प्रयोगानर्थक्यदोषो दुःपरिहर इत्यर्थः।

यदप्यपूर्वस्य कर्मभिरुत्पत्तिरभिव्यक्तिर्वेति विकल्पोत्पत्तिरपि युगपत्तावन्न सम्भवति क्रमवर्त्तित्वात्कर्मणामित्युक्तम्। तदप्यपूर्वद्वारा कर्मणां यौगपद्योपपादनात्सुपरिहरमित्याह—**एतयैवेति**। कर्मवर्त्तिनामपि कर्मणामवान्तरकार्ययौगपद्यद्वार। युगपत्परमकार्यारम्भकत्वं वृद्धोदाहृतेन दृष्टान्तेनोपपादयितुमाह—**आह चेति**। वाक्य-तदवयवाध्ययनरूपेण क्रमवर्त्तिनीभिरावृत्तिभिरभ्यासकर्मभिर्यथावान्तरसंस्कारयौगपद्यद्वारा वाक्यसमुदायात्मकाध्यायग्रहणसामर्थ्यरूपः परमसंस्कारो युगपद्भवति। तथेदमपीति श्लोकार्थः।

यच्चानवयवत्वात् क्रमशोऽप्युत्पत्तिर्न सम्भवतीत्युक्तम्, तदपि प्रौढ्या सावयवत्वाभ्युपगमेन निराकर्त्तुमाह—**न चेति**। आत्मादावमूर्त्ते निरवयवत्वदर्शनात्, अपूर्वस्यामूर्त्तत्वेन निरवयवत्वं वाच्यम्। न चामूर्त्तत्वं निरवयवत्वे प्रयोजकम्। मूर्त्तेष्वपि परमाणुषु निरवयवत्वदर्शनादनेकप्रयोजककल्पनापत्तेः। किं त्ववयवसन्निवेशानात्मकतेत्याशयः। नन्वपूर्वस्यावयवसन्निवेशानुपपत्तेर्निरवयवत्वं भविष्यतीत्याशङ्क्याह—**अनयैव हीति**। कारणायोगपद्याद्युगपदुत्पत्त्ययोगात्क्रमोत्पत्तिप्रतीतेस्तस्याश्च निरवयवत्वेऽनुपपत्तेः। सूक्ष्मदर्शनायोग्यावयवसन्निवेशरूपेणापूर्वं प्रतीयते-उत्पद्यत इत्यर्थः।

अस्मिंस्तु पक्षे सर्वेषामेकफलसाधनानां प्रधानानां साक्षादेकफलापूर्वसाधनत्वाभ्युपगमात्सर्वेषां चाङ्गानां साक्षादेककरणोपकारापूर्वसाधनत्वाभ्युपगमात्कर्मभेदानुनिष्पाद्यपूर्वभेदाभ्युपमो विरुध्येत। तदभावे चाज्योषधमांससान्नाय्यादिधर्मव्यवस्था तार्त्तीया, वाङ्नियमादेश्चावान्तरापूर्वप्रयुक्तत्वं नावमिकं न सिद्ध्येदिति, अवश्यं प्रतिकर्मापूर्वभेदस्य कल्प्यत्वात्, तद्द्वारा च क्रमवर्त्तिनामपि कर्मणा युगपदपूर्वोत्पादकत्वोपपत्तेर्नार्थापत्तिरवयवकल्पनायै प्रभवति। कल्पितानामपि चावयवानाममूर्त्तत्वेनान्योन्यानवष्टम्भकत्वान्नावयवारम्भकत्वसम्भवः। मूर्त्तत्वकल्पने तदारब्धस्यापूर्वस्यापि मूर्त्तत्वापत्तेर्विग्रहवदिव स्वतन्त्रमपूर्वं कल्प्यमानं श्रुतकर्मफलसम्बन्धबोधकमेव स्यादिति प्रौढिमात्रमिदम्। प्राक् सत्त्वे प्रमाणाभावाच्छक्तिनियमाच्च कार्यकारणनियमसिद्धेरभिव्यक्तेरप्यत्यन्तासत्या एवोत्पत्तेरवश्याभ्युपगन्तव्यत्वात्, सांख्योक्तसत्कार्यवादानुपपत्तेरनभिमतमप्यभिव्यक्तिपक्षं

प्रौढ्या दर्शयति—**यद्यपीति** । फलदानाभिमुख्यकरणरूपाऽस्यापूर्वस्याभिव्यक्तिर्विषयेन्द्रियोभयसंस्काररूपत्वात्शब्दादिविलक्षणा कर्मभिर्भविष्यतीत्युक्ते, कथं कर्मभिरपूर्वस्य फलदानाभिमुख्यं क्रियत इत्यपेक्षायां प्रतिपुरुषं स्वीकारादित्युक्तम् । प्रतिग्रहेणेव कर्मभिः कर्त्तारं प्रत्यपूर्वस्य स्वत्वापादनादित्यर्थः ।

नन्विन्द्रियसंस्कारेण, विषयसंस्कारेण, उभयसंस्कारेण वा लोके शब्दाद्यभिव्यक्तिदर्शनात्कथं तद्विलक्षणास्याभिव्यक्तिः कल्प्यत इत्याशङ्क्याह—**तथा हीति** । कुलालादिव्यापारेणापि घटाद्यभिव्यक्तेः सांख्यैरिष्टत्वादिति भावः । तस्मादात्मनाधिष्ठितस्यापूर्वस्य फलदानोन्मुखत्वलक्षणाभिव्यक्तिर्युक्तेति परिहरति—**आत्मस्थेति** । आत्मकामादिश्रुतिवोवात्मनः स्वभावेन सर्वफलावाप्तिसामर्थ्यावगमात्फलानुभोगस्य प्रतिबन्धनिमित्तत्वावगतेस्तदपनयनरूपाभिव्यक्तिः सामर्थ्यात्मकस्यापूर्वस्य कर्मभिः क्रियते नादैरिव शब्दस्य श्रवणप्रतिबन्धकास्तिमितवाताद्यपनयरूपेति प्रौढ्या शब्दतुल्यामेवाऽभिव्यक्तिमाह—**सर्वेति** । आप्तकामादिश्रुतेरनुपलब्धिविरोधेनार्थवादत्वादयमपि प्रौढिवादः अतोऽपूर्वस्य श्रुतार्थापत्तिप्रमाणकत्वात्, तत्प्रतिपादनार्थत्वेन भाष्यकारीयं सूत्रव्याख्यानं युक्तमित्युपसंहरति—**तस्मादिति** । यच्च वृत्त्यन्तरकारैरारभतेर्णिजन्तादच्प्रत्ययमुत्पाद्यारम्भयति प्रवर्त्तयतीत्यारम्भकं प्रवर्त्तकं वाक्यं चोदनेति चोदनास्वरूपकथनार्थतया एतत्सूत्रं व्याख्यातम् । तत् प्रकृतापूर्वप्रतिपत्त्युपायशब्दचिन्तानौपयिकत्वात्, चोदनास्वरूपकथनार्थत्वे चास्य सूत्रस्य चोदनासूत्रानन्तरं कर्त्तव्यत्वापत्तेरयुक्तमित्याह – **सूत्रस्यापीति** ।

यदपि न चैतत्सूत्रं तत्प्रतिपादने स्पष्टमित्युक्तम्, तन्निरासायाऽपूर्वप्रतिपादने सूत्रं यथाभाष्यं योजयति —**तेनेति** । आरम्भः शिष्यतइति भाष्येणारम्भप्रातिपदिकात्फलोत्पादनवाचिनस्तत्करोति तदाचष्टइति स्मृतेरारम्भमाचष्टे इत्यस्मिन्नर्थे णिचमुत्पाद्याच्प्रत्ययकरणेनारम्भ फलोत्पादनमाचष्टे इत्यारम्भशब्दव्याख्यानादारम्भश्चोदनेत्यारम्भशब्दार्थो लभ्यते । 'चोदनेत्यपूर्वामि'त्यनेन च 'भावशब्दा अपूर्वस्य बोधका' इति भाष्यदर्शनात् चोद्यत-आक्षिप्यते इति कर्मव्युत्पत्त्याऽपूर्वस्य चोदनात्वमुक्तमिति प्रतीतेश्चोद्यतेऽनेनेति करणव्युत्पत्तौ चोदनमिति, भावव्युत्पत्तौ वाऽपूर्वस्य चोदनेत्यर्थः । 'तेभ्यः क्रिया प्रतीयेतेति क्रियाशब्दस्य तेभ्योऽपूर्वक्रियावगतिरित्यनेन अपूर्वविषयत्वेन व्याख्यानात् । तस्याश्च 'तस्मात्तेभ्यः क्रिया प्रतीयेतेत्यनन्तरसूत्रोपपत्त्याऽयुक्तमाशङ्क्य व्याचष्टे—**यदि पुनरिति** । कल्प्यस्य पूर्वस्थस्यानुवृत्तेर्विनैवाध्याहारेण लभ्यते । कथमाख्यातेभ्योऽपूर्वं प्रतीयतइत्यपेक्षायां चोद्यते-पुनराक्षिप्यते आख्यातेनापूर्वम् । अपूर्वस्य वा चोदकमाख्यातम् । आरम्भकत्वात्फलोत्पादनख्यापकत्वादित्यभिधानाच्च प्रकृतोपयोगी विस्पष्टश्चायमेव सूत्रार्थं इत्याशयेन यो भाष्यकृतोक्तः सूत्रार्थः, सएव युक्तः, न वृत्त्यन्तरकारोक्त इत्येवकारेणाभिधानात् तद्व्याख्यानार्थं भाष्यमपि व्याकृतं भवति ।

यदि पुनरित्याशङ्काभाष्यं नश्वरस्य कर्मणः स्थायित्वकल्पनानुपपत्तेरयुक्तमाशङ्क्य व्याचष्टे—**यदि पुनरिति** । कल्प्यस्यापूर्वस्य स्थायित्वकल्पनायाः सिद्धस्य कर्मणः

स्थायित्वकल्पना लाघवाद्युक्तेत्याशयः । नैवमित्यादिपरिहारभाष्यमाक्षिपति—**न हीति** । गन्तापि प्रत्यक्षो देशान्तरं च तेन गत इति विजानात्यागत इति चेति गन्तृगम्यप्रत्यक्षत्वाभिधानेन गमनस्य प्रत्यक्षत्वाभिधानम् । 'अपि वा व्यतिरेकादुपशब्दाविभागाच्च गोत्ववदैककर्म्यं स्यान्नामधेयं च सत्त्ववदि(६-३-१२)ति षष्ठाधिकरणसिद्धान्तसूत्रस्य 'रूपंशब्दाविभागाच्चे'त्यवयवं व्याख्यातुं यद्भाष्यकृता करिष्यते, तद्विरोधो भङ्गीत्वाद्यागस्येति' च विनाशित्वेन यागस्य प्रस्तुतत्वात्तस्य च देवतोद्देशपूर्वकद्रव्यस्य त्यागात्मकसङ्कल्परूपत्वेनाचलनात्मकत्वाद्देशान्तरप्रापकत्वं नास्तीत्यर्थः । नानेन प्रत्यक्षानुपलब्धिरुक्ता । किं तु प्रतिक्षणविनाशिपूर्वापरीभूतावयवत्वात्सद्रूपाप्रतीतेः स्थायित्वरूपानुपलब्धिरित्येवं व्याख्यानेनाद्यं तावदाक्षेपं परिहरति—**अत्रेति** । श्लोकं व्याचष्टे—**यद्यपीति** । स्वरूपेणाचलनात्मकत्वेऽपि यागस्य चलनात्मकप्रक्षेपादिविशिष्टस्य फलसाधनत्वात्तेनांशेन चलनात्मकत्वमभिप्रेत्य देशान्तरप्रापकत्वाभिधानमिति द्वितीयमाक्षेपं परिहरति—**यागेऽपीति** । श्लोकं व्याचष्टे—**न हीति** । यागग्रहणेन होमस्याप्युपलक्षणमभिप्रेत्य तस्य प्रक्षेपाधिकयागात्मकत्वात्समस्तादित्युक्तम् । कथं देशान्तरप्रापकत्वस्य स्थायित्वनिरासहेतुतेत्यपेक्षायामाह—**तत्रेति** । देशान्तरप्रापकत्वव्याख्यानार्थं संयोगविभागफलत्वं धात्वर्थानां वदता संयोगविभागयोर्धातुवाच्यत्वं निरस्तम् ।

> त्यक्तं प्रतीतियुक्तिभ्यां भाष्यवार्तिकवारितम् ।
> तयोर्धात्वभिधेयत्वं वदन्न व्रीडते कथम् ॥

निराश्रयस्य प्रक्षेपादेरवस्थानायोगात्, तस्य स्थायित्वसिद्ध्यर्थं तदाश्रयेणाऽपि स्थायिना भवितव्यम् । न चासावाश्रयः स्थाय्यस्ति । संयोगविभागफलत्वेन प्रक्षेपादेः संयोगविभागयोग्यप्रादेशिकाश्रयापेक्षत्वात् तस्य स्थायिनोऽनुपपत्तेः । स्थाय्याश्रयाभावात्कर्मणः स्थायिता न युक्तेत्याशयः ।

ननु चलनात्मककर्माश्रयस्य शरीरस्य कं चित्कालस्थायित्वोपपत्तेरैहिकफलानां तावत्कर्मणां फलोत्पत्तिं यावत् स्थायित्वं सम्भवतीत्याशङ्क्याह—**न चेति** । अनुष्ठानोत्तरकालं योग्यानुपलब्ध्या कर्मणो सत्त्वावधारणान्नाश्रयस्थायित्वेऽपि स्थायिता युक्तेत्याशयः । न चाभिव्यञ्जकाभावेनानुपलब्धिरभिव्यक्तस्याप्यनुलम्भादित्यभिव्यक्तिशब्देनोक्तम् । अयं भावः अनभिव्यक्तस्य फलसाधनत्वाभावात्, अनुष्ठानेनाभिव्यक्तिर्वक्तव्या । तस्याश्च क्षणिकत्वे संस्कारजनकत्वानभ्युपगमात्फलासिद्धेः स्थायिताङ्गीकार्येति । अनेन चानुष्ठानोत्तरकालानुपलम्भाभिप्रायेणान्यथाभाष्यं व्याख्यातम् ।

ननु चलनात्मकस्य कर्मणः स्थाय्याश्रयाभावेनास्थायित्वेऽपि सङ्कल्पादेः स्थाय्यात्माश्रयत्वात् स्थायित्वं भविष्यतीत्याशङ्क्याह—**सङ्कल्पेति** । सङ्कल्पादेरपि क्षणान्तरानुपलम्भादेव नावस्थायित्वं विशेषतोऽन्योन्यविरोधेन सङ्कल्पान्तरोत्पत्तौ पूर्वसङ्कल्पनाशादित्यर्थः । समुद्रव्यानादिशब्दाभ्यामुपात्तं न तदित्यादि भाष्यं विकल्पस्थाय्याश्रयनिरा-

सार्थत्वेन व्याख्यातुं विकल्पं तावदाह—**अवस्थानं चेति**। तत्राद्यनिरासार्थं न तदित्यादि भाष्यं व्याचष्टे—**न तावदिति**। गमनफलप्राप्तिलक्षणार्थत्वं गमेर्दर्शयितुं व्यापिन इत्युक्तम्। विभागविशिष्टसंयोगफलत्वाच्चलनस्यात्मनि विभागरहितेऽनुपलब्धिरित्याशयः।

सर्वत्रेति भाष्यं हेतुप्रश्नोत्तरत्वेनावतारयति—**कथमिति**। तद्व्याख्यातुमाह—**अहम्प्रत्ययेन हीति**। यथाऽस्मिन्कालेऽहमस्मीति न विशिष्यते, तथाऽस्मिन्देशे इत्यपीति मात्रशब्दव्यावर्त्त्यं दर्शिते नन्वस्मिन्देशे वसाम्यहमित्यादिदेशतः, कालतो वाऽवच्छेदः प्रतीयतएवेत्याशङ्क्य, चैतन्येत्युक्तम्। प्रत्यक्षेण शरीरस्य देशकालवच्छेददर्शनाच्छरीराभेदोपचारेणासावहंप्रत्ययः, परमार्थतः स्वात्मनश्चैतन्यस्वभावत्वेनातत्स्वभावाच्छरीरादभेदाच्चैतन्यस्य च देशकालावच्छेदाप्रतीतेर्नात्मनोऽवच्छेदोऽस्तीत्याशयः। कथमेतावता सर्वव्यापितेत्याशङ्क्याह—**ततश्चेति**।

नन्वहम्प्रत्ययस्यात्मग्राहकत्वात्तत्कार्यत्वव्यपदेशो न युक्त इत्याशङ्क्याह—**सर्वत्रेति**। आग्रहकत्ववत्कार्यत्वस्यापि सद्भावाद्यथेष्टं व्यपदेशोपपत्तिरित्याशयः। सुखादि वा कार्यशब्देनाभिमतमित्यन्यथा व्याचष्टे—**सुखेति**। सुखादेः सार्वत्रिकत्वमुपपादयति—**न हीति**। ननु शरीरएवसुखाद्युपलम्भात् कार्यत्वं भविष्यतीत्याशङ्क्याह—**न चेति**। सुखादयश्च स्वयमुपालभ्यन्ते, न रूपादय इव शरीरगुणाः परेणापीति भाष्ये पठितेऽपि शरीरे परेण प्रत्यक्षेणानुपलम्भादित्यनेन हेतुना सुखादेः शरीरधर्मता निषिद्धेत्यर्थः। कार्यस्य कारणासमानदेशत्वानियमात्समवायिकारणे कार्यसमवायात्कार्यशब्देनात्मधर्मत्वविवक्षा धर्मशब्देन सूचिता।

सार्वत्रिकसुखाद्युपलब्धेरात्मसार्वत्रिकत्वे हेतुतामुपपादयति—**तत्रेति**। शरीरात्मसंयोगहेतुकत्वात्सर्वस्यात्मकार्यस्य प्रादेशिकत्वे चात्मनस्तद्देशातिरिक्तदेशान्तरगमनेऽपि शरीरस्यात्मसंयोगायोगात्तद्वत्तेत्युक्तम्।

नन्वित्याशङ्काभाष्यमवतारयति—**शरीरमात्रेति**। शरीरपरिमितात्मवाद्यार्हतः, शरीरान्तर्गतात्मवाद्योपनिषदः, लिङ्गपदानुषङ्गः पूरणार्थः। किमनेन हेतोर्दूषणमित्यपेक्षायामाह—**अतश्चेति**। आगमनस्यासर्वगतत्वाक्षेपकत्वादित्याशयः। ननु सर्वगते व्योम्नि सर्वत्रावकाशदानाख्यकार्योपलम्भदर्शनात्कथं विरुद्धतेति प्रश्नपूर्वकमुपपादयति—**कुत इति**। अयं भावः- युगपत्सर्वत्र कार्योपलम्भो व्योमवत्सर्वगतत्वं साधयेन्न चासावात्मन्यस्ति पर्यायेण सर्वत्र कार्योपलम्भस्त्वसर्वगतेष्वेव दर्शनाद्विरुद्ध इति।

श्लोकं व्याचष्टे—**यदि हीति**। सुखादेः शरीरात्मसंयोगहेतुकत्वेन बहिरसम्भवात्किञ्चिदन्यदित्युक्तम्। सुखादेरपि शरीरान्तरगतस्योपलम्भे युगपत्सर्वत्रात्मकार्योपलम्भः स्यात्। **न चासावस्तीति** शरीरान्तरइत्यनेनोक्तम्। यदि गमनं विना कार्यक्रमो घटते, ततः शरीरेऽपि तथा स्यादित्यन्यथा हीत्यनेनोक्तम्। सत्क्रियात्वप्रसङ्ग इत्यनेन सर्वगतत्वसाध्यनिश्चलत्वविरोधित्वं हेतोरुक्तम्। निर्विशेषणस्तर्हि सर्वत्र कार्योपलम्भो हेतुर्भविष्य-

तीत्याशङ्क्याह—**सन्देहे वेति**। सम्प्रति साधनस्यानिर्णायकत्वात्साधारणत्वं विशेषणं शरीरसहितगमनात्सर्वत्र कार्योपपत्तेः पराभिमतत्वं वृद्धवाक्येनाह—**आह चेति**। शरीरेणैव सह गमनादिति वक्तव्ये श्लोकपूरणार्थमनुवादभूतः शब्दप्रयोगः तदुपपादनाय संमिश्रत्वाभिधानम्। न हीति परिहारभाष्यमवतारयति—**तत्रेति**। नत्विति पूर्वभाष्यपाठे तु हिताशङ्कानिरासे तेन प्रतिज्ञातेन नोपपत्तिरुच्यते इति योज्यमित्याह—**येषां त्विति**। पूर्वपाठे तु न हीत्यखण्डं पदम्। शङ्कानिरासाक्षमत्वेनोत्तरभाष्यमाक्षिपति—**कथम्। पुनरिति**।

श्लोकं व्याचष्टे—**परेणापि हीति**। पर्यायेण हि सर्वत्र कार्योपलम्भस्यासर्वगतेष्वेव दर्शनाद्विरुद्धत्वम्, निर्विशेषणस्य चानैकान्तिकत्वं यदुक्तम्। तन्निरासोऽस्मान्नावगम्यत इत्याशयः। यमनाभावे सति सर्वत्रोपलभ्यमानकार्यत्वादित्येवंविधस्य हेतोर्व्योम्नि सद्भावेन विरुद्धत्वाभावाच्छरीरे वा वृत्तेरनैकान्तिकत्वाभावादपुष्टत्वं मत्वा गमनाभावोपपादनेनाशङ्कानिरासार्यैतद्भाष्यमिति परिहृत्य परिसंख्यार्थत्वेनाशङ्कानिराससामर्थ्यमाह—**तत्रेति**।

श्लोकं व्याचष्टे—**परिसंख्यारूपेणेति**। तद्बहुविरुद्धमित्यपेक्षायामाह—**तदिति**। अमूर्तस्य कात्स्न्‍र्यायोगेन क्षीरोदकवत् कृत्स्नसंयोगासम्भवात् शरीराख्यभूतमिश्रत्वासम्भवान्न भूतैः सहात्मनो गतिर्युक्तेत्युक्ते नन्वसर्वगतद्रव्यपरिमाणक्षणत्वामूर्त्तेरसर्वगतात्मवादिनं प्रत्यसिद्धममूर्त्तत्वमित्याशङ्क्य—**स्वतस्तावदित्युक्तम्**। मुक्तावस्थायां सर्वैः सर्वगतत्वाभ्युपगमात्संसारावस्थायां शरीरसंबन्धोपाधिकमेव मूर्त्तत्वं परैरिष्यते, न चौपाधिकेन मूर्त्तत्वेनाकाशस्येव घटादिनास्य मिश्रत्वं सम्भवतीत्याशयः।

श्लोकं व्याचष्टे—**यदेति**। सूक्ष्मत्वेन कृत्स्नसंयोगासम्भवकारणं सर्वतो विसारित्वं सूचितम्। चन्द्रप्रकाशादेरप्यनियतपरिमाणत्वेन कथं चिदमूर्त्तत्वव्यपदेशोपपत्तेस्तद्वैषम्यायाऽत्यन्तशब्दः। दृष्टान्तत्वेन ज्ञानसन्तानोपादानं स्वतः शब्दाव्यावर्त्यं दर्शयितुम्—**योऽपीत्युक्तम्**। स्यादस्ति स्यान्नास्ति स्यादस्ति च नास्ति च स्यादवक्तव्यः स्यादस्ति चावक्तव्यश्च स्यान्नास्ति चावक्तव्यश्च स्यादस्ति च नास्ति चावक्तव्यश्चेति सप्तभङ्गिनयवाद्यार्हतः स्याद्वादी स्याच्छब्दस्याख्यातप्रतिरूपकाव्ययस्य कथं चिच्छब्दार्थवाचित्वाभ्युपगमादनैकान्तवादी बद्धानां संसारिणामात्मनां शरीरादत्यन्तव्यतिरेकाभावेन तन्मिश्रत्वान् मूर्त्तत्वं वदति। अपिशब्दादौपनिषदोऽपि यावत्संसारभाव्यणुपरिमाणलिङ्गशरीरमिश्रत्वान्मूर्त्तत्वं वदतीति सूचितम्। स्वस्वामिभावमात्रेण सम्बन्धस्योपपत्तेर्मिश्रत्वानाक्षेपकत्वादितरेतराश्रयाभिधानम्। नान्यस्य कदा चिदमूर्त्तत्वानवगमान्मूर्त्तैव स्वाभाविकी भविष्यतीत्याशङ्क्य—**मुक्तेत्युक्तम्**। मुक्तावस्थायां मूर्त्तत्वे सति वाय्वाद्यभिघातदुःखापरिहार्यत्वेन मुक्तित्वेऽप्यर्थापत्तेरमूर्त्तत्वेन[1] लक्षितस्य स्वभावानपायित्वात्, संसारावस्थायामपि न स्वभावान्यता युक्तेत्याशयः।

---

१. मुक्तिवैयर्थोपपत्तेरिति २ पु० पा०।

ननु मिश्रणसंसर्गापरपर्यायसम्पर्काभावेऽपि शरीराश्रितत्वाद्रव्येनेव रथी शरीरेणात्मा नेष्यते इत्याशङ्क्यास्पर्शवत्त्वाच्चेत्युक्तम् । एकदेशसंयुक्तस्याकर्षणं दृष्टम् । न चास्पर्शस्यैक-देशेनापि संयोगः सम्भवतीत्याशयः । ननु माभूच्छरीरेणात्मनो नयनम्, वाय्वादिभिस्तु ज्वालादिवत्प्रेरणं भविष्यतीत्याशङ्क्याह—**न हीति** । परप्रेरितस्य गमनासम्भवेऽभिहिते स्वतन्त्रस्य तर्हीच्छापूर्वकात्प्रयत्नाद् गमनं भविष्यतीत्याशङ्कानिराससूचनार्थम्—**स्वतन्त्र इत्युक्तम्** । शरीराद् बहिः कदा चिदिच्छया गमनादर्शनाच्छरीरगमनेनात्म-गमनासिद्धेः शरीरगतावेव प्रयत्नो हेतुर्नात्मगताविल्याशयः ।

नन्वेवं सति देशान्तरादागमनस्यैवासम्भवात्तद्भावाभ्युपगमे बहुविरोधाभिधानमयुक्त-मित्याशङ्क्याह —**तेनेति** । गमननिमित्तसार्वत्रिककार्याभ्युपगमे गमनासम्भवात्केवलस्य शरीरस्याचेतनत्वेन कार्याक्षमत्वात्सर्वकार्योच्छेदाभिप्रायं बहुविरोधाभिधानमित्याशयः । अस्मत्पक्षे गमनाभावेऽपि तत्फललाभादविरोध इत्याह—**सर्वासर्वगतत्वे त्विति** । यथेत्यनेन सर्वत्रोपलभ्यमानकार्यत्वात्सर्वगतत्वे साध्ये व्योम्नो दृष्टान्तत्वं सूचितम् । गमनाक्षिप्तस्य वा सर्वगतत्वस्य बहुविरोधास्पदत्वाद् गमनस्य बहुविरोधास्पदत्वाभि-धानमिति सूचयितुं सर्वगतपक्षो न कथं चित्सम्भवतीत्याह—**किं चेति** । शरीरपरिमित-पक्षेऽपि बहिर्निर्गतस्य केशादेरात्माधिष्ठाननिरासायानिर्गत इत्युक्तम् । देहादनिर्गत इत्यनेन च श्यामाकतण्डुलबालाग्राङ्गुष्ठाणुमात्रपक्षात्सामान्यतो निर्दिश्याणुमात्रपक्षस्य बलीयस्त्वसूचनार्थं पुनर्विशेषतो निर्देशः ।

ननु बौद्धैर्ज्ञानसन्तानस्यात्मत्वाभ्युपगमात्, तस्य चाऽद्रव्यत्वेनापरिणामपक्षोऽपि सम्भवात् कस्मान्न निरस्यत इत्याशङ्क्यात्मवादे तन्निरासादित्याह **ज्ञानेति** । अणुमात्र-पक्षे तावद्दोषानाह —**तत्रेति** । मध्यमपरिमाणत्वे घटादिवद्विनाशापत्तेः सर्वाभ्युपगत-नित्यत्वाविरोधित्वे नाणुमात्रपक्षस्य बलीयस्त्वसूचनार्थम्—**नित्यः सन्नित्युक्तम्** । श्लोकं व्याचष्टे—**यदा हीति** । तन्मात्रेत्यनेन मात्रान्तरसञ्चारानभ्युपगमे सर्वमात्रस्थ-सुखाद्यसम्भव इति यथाश्रुतं व्याख्याय तदभ्युपगमेऽपि युगपत्पदाध्याहारेण व्याख्यातुम्—**ततश्चेत्युक्तम्** । अथेत्यनेन गात्रान्तरसञ्चारात्सर्वत्रोपलम्भो लघुत्वाच्च सूक्ष्मकालभेदानुपलब्धिरिति शङ्कासञ्चरणप्रमाणाभावान्निपुणतोऽपि लक्ष्यमाणे काल-भेदाऽनुपलम्भादतिसौक्ष्म्ये च वेदानां तदनुभवोत्पत्तिकालं यावदेकत्रानऽवस्थानेनैकगात्रेऽप्यु-पलम्भापत्तेरुपन्यासपूर्वकं निरस्तो । क्रमेण वाणुमात्रेषु शरीरावयवेषु सञ्चरतोऽनन्त-परमाण्वारब्धे शरीरे बहुकालं पूर्वसम्बद्धपरमाणुवियोगापत्तेः पुष्टिः, आदिशब्दोपात्तौ च वृद्ध्यशोषौ न स्यातामित्येवं पुष्ट्यादीत्यवयवं व्याख्यातुम्—**शरीरेत्याद्युक्तम्** । शरीर-मात्रपक्षोऽप्यनेकादृष्टकल्पनापत्तेरयुक्त इत्याह—**अथेति** । एतदेवोपपादयति—**सद्भाव इति** ।

श्लोकं व्याचष्टे—**सर्वे हीति** । यथा सकलप्रतीत्यप्रतीतिव्यतिरेकेण विकलप्रतीत्य-भावाच्छब्दस्य सावयवत्वमार्हतोक्तं स्फोटवादे प्रत्याख्यातम् । शब्दाधिकरणे च द्रवत्वा-भावेनावयवानामसंश्लेषो विश्लेषावश्यम्भावाच्च नित्यत्वं प्रत्याख्यातम् । तथात्मनोऽपी-

त्यर्थः । अवयवेयत्ताया मुपचयापचयतारतम्यायोगादयवानन्त्यमार्हतोक्तं शरीरमात्रपक्षविरोधीत्यवधिशब्देनोक्तम् । संश्लेषाभावे को दोष इत्याशङ्क्य **न चासंश्लिष्टानामित्युक्तम्** । गात्रच्छेदे चेत्यनेन तत्सद्भावे चेति चकारेण सूचितमर्थं व्याख्याय ।

आर्हतोक्तप्रमाणनिरासार्थं—**यत्त्वित्युक्तम्** । आत्मनः सङ्कोचविकासोपपत्तार्हतोक्तदृष्टान्तनिरासार्थम् – **दीपप्रभेत्याद्युक्तम्** । अतिशब्दं व्याख्यातुं कथं चिदित्युक्तम् । श्लोकद्वयोक्तातिरिक्ताप्यदृष्टकल्पनास्मिन्पक्षे स्यादित्याह—**तेन चेति** ।

सहसा जायते तच्च सहसैव विनश्यतीत्यादिशब्देनोक्तमुपसंहरति— **तस्मादिति** ।

ननु सर्वगतत्वे सत्युपनिषत्सु श्यामाकतण्डुलादिपरिमाणं विरुध्येतेत्याशङ्क्याह—**यत्त्विति** । बालाग्रमात्रत्वाद्यादिशब्देनोक्तम् । वाक्यान्तरेत्यनेनौपचारिकत्वेऽनन्यार्थविभुत्वश्रुतिविरोधो हेतुरुक्तः । सावित्र्युपाख्यानेऽङ्गुष्ठमात्रत्वाभिधानमङ्गुष्ठपरिमाणे हृदये नीयमानत्वात्कथंचिच्छ्रुतिसामान्यमात्रेण वपादिवाक्यवद्व्याख्येयमित्याह—**यदपीति** । गौणार्थत्वोपपादनार्थं पतिव्रताप्रशंसापरमेतद्वाक्यमित्युक्ते ननु स्वमहिम्ना सावित्र्या पतिव्रतया मृत्योस्त्रातः पतिरित्येतावता पतिव्रतात्वप्रशंसासिद्धेरङ्गुष्ठमात्रत्वाभिधानं किमर्थमित्याशङ्क्य—**काव्येत्युक्तम्** । भारतस्येतिहासत्वेऽप्यङ्गुष्ठमात्रत्वस्योत्प्रेक्षामात्रत्वसूचनार्थः काव्यशब्दः ।

‘अन्यथैव स्थिता वृत्तिश्चेतनस्येतरस्य वा ।
अन्यथोत्प्रेक्षते यत्र तामुत्प्रेक्षां विदुर्बुधाः ॥’

इत्येवंलक्षणे उत्प्रेक्षाख्यकाव्यालङ्कारार्थं यमवशगमनं मृत्युरिति च विस्पष्टस्य प्रसिद्धस्य व्यवहारस्य प्रकर्षेण शंसनार्थं कीर्त्तनार्थमित्यर्थः । एतच्च द्वैपायनेनैव नित्यः सर्वगतः स्थाणुरचलोऽयं सनातन इत्यादौ सर्वगतत्वाभिधानादवसीयत इत्याह—**तथा हीति** ।

नन्वेवं सत्येकेनैवात्मना सर्वशरीरादिष्वोपपत्तेः ते सर्वे स्वेन स्वेनात्मनोपलभ्यमानाः सन्त्येवेत्यात्मवादभाष्ये प्रतिशरीरात्मभेदाभिधानमयुक्तमित्याशङ्कते—**ननु चेति** । ऐकात्म्ये पशुमनुष्यादिभिन्नजातीयदेहोपभोग्यानां फलानाम् एकजातीयेन देहेन भोगासम्भवेऽप्येकजातीयदेहोपभोग्यानां फलानामेकेन देहेनोपभोगसम्भवादनेकशरीरवैयर्थ्यापत्तेः सुखदुःखादिव्यवस्थानुपपत्तेरेकशरीरस्थेन चात्मना दृष्टार्थे शरीरान्तरस्थस्यात्मनः प्रत्यभिज्ञापत्तेर्भेद एव युक्त इति परिहरति—**नैष दोष इति** । आद्यं हेतुं व्याचष्टे—**इतरथा हीति** । ननु यथापूर्वकृतकर्मफलोपभोगायोपात्ते देहे तदुपभोगान्नष्टे कर्मान्तरफलोपभोगार्थं देहान्तरार्थवत्त्वम्, तथैकस्मिन्नपि जन्मनि यत्कर्मफलोपभोगार्थं यो देहोऽर्जितः, तेन कर्मान्तरफलोपभोगस्याशक्यत्वात्तदर्थं देहान्तरार्थवत्त्वं भविष्यतीत्याशङ्कते—**जन्मान्तरेति** । परिहरति—**नेति** । यावन्ति कर्माणि फलदानाय प्रवृत्तानि, तावद्भिरुपात्तेनैकेनैव देहेन सर्वफलोपभोगसिद्धेर्देहान्तरानर्थक्यम्, जन्मान्तरे तु पूर्वदेहनाशाद्देहा-

न्तरार्थवत्तेत्यर्थः। द्वितीयं हेतुं व्याचष्टे—**सर्वेति प्रतिशरीरं चेति**। चकारसूचितानि हेत्वन्तराण्याह—**अन्यदीयैश्चेति**। प्रत्यभिज्ञापत्तिरप्यनेन सूचिता। वसन्ते ब्राह्मणोऽग्नीनादधीत, ग्रीष्मे राजन्य इत्यादिवर्णविशेषव्यवस्थया यः कर्मचोदनानां व्यवस्थाख्यो भेदः, स न स्यादित्युक्तम्। ननु ब्राह्मणत्वादेर्देहाश्रितत्वेनात्मैक्येऽपि देहभेदाद्व्यवस्थोपपद्यते इत्याशङ्क्य—**एकस्यैवेत्युक्तम्**। चेतनप्रवर्त्तकत्वाच्चोदनानामात्मनोऽपि च देहसम्बन्धोपाधिकब्राह्मणत्वाद्यभिमानेन ब्राह्मणत्वादिव्यपदेशोपपत्तेः सर्वदेहेष्वैक्ये सति व्यवस्थानुपपत्तिरिति भावः।

नानात्वे तु नैते दोषाः सन्तीत्याह—**आत्मेति**। ननु नानात्वे सति सर्वगतत्वाभ्युपगमात्सर्वेषामेकदेशत्वं स्यात्, तच्च द्रव्याणां भिन्नदेशवृत्तित्वनियमाद्विरुद्धमित्याशङ्क्याह—**सर्वेषामिति**। मूर्त्तत्वप्रयुक्तोऽसौ नियमः न द्रव्यप्रयुक्त इति भावः।

ननु यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छ-
न्नुपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मेति॥

इत्याद्युपनिषत्स्वैकात्म्यव्यवहारो नानात्वे विरुध्येतेत्याशङ्क्याह—**तदपेक्षयैव चेति**। समानदेशवृत्तिस्तच्छब्देन परामृष्टा। चैतन्यं बोधरूपत्वमात्ममहङ्कारास्पदत्वं सुखाद्याश्रयतादिशब्देनोक्ता। रागद्वेषनिवृत्तये स चौपचारिको व्यवहार इत्याशयः।

ननु नानात्वेऽपि सर्वगतत्वाभ्युपगमेन सर्वदेहसम्बन्धात्सुखाद्युपलब्धिव्यवस्था न स्यादित्याशङ्कते—**कथं पुनरिति**। देहान्तरगतस्य सुखादेः स्वसमवायाभावान्नोपलम्भापत्तिरित्याशङ्क्य—**अन्यदीयेत्युक्तम्**। स्वासमवेतस्यापि देहादेरुपलम्भात्समानदेशत्वमात्रनुपलम्भहेतुरित्याशयः।

परपक्षसाम्यापत्त्याऽन्येषां परिहारं दुषयितुमुपन्यस्यति—**के चित्तावदिति**। गर्भस्य मातुश्च यावात्मानौ तद्वर्त्तिनामिति समासार्थः। श्लोकं व्याचष्टे—**शरीरेति**। **स्वसमवेतस्यैव** दुःखादेरुपलब्धिरिति परिहारसाम्यमभिप्रेत्य - **तत्रेत्युक्तम्**। स्वासमवेतस्यापि देहादेरुपलम्भदर्शनादेनं परिहारं दूषयति—**स्यादिति**। अत्र सुखाद्युपलम्भव्यवस्थायामित्यर्थः। ननूभयपक्षतुल्यस्य दोषस्यैकं प्रत्युद्भावनायोगाददोषो भविष्यतीत्याशङ्क्याह—**न त्विति**। न च साम्यस्तीत्याह—**अपि चेति**।

स्वकर्मोपात्तस्यैव सुखादेर्भोगयोग्यत्वाद्व्यवस्थेति स्वमतेन परिहरति- **तस्मादिति**। श्लोकं व्याचष्टे—**यदि हीति**। न त्वन्यस्यात्मकोऽन्यदीये देहे भावात् त्वत्कृतयोरपि धर्माधर्मयोरात्मीयत्वापत्तेरव्यवस्था स्यादित्याशङ्कां निरस्यन्नुपसंहरति—**तस्मादिति**।

तत्कर्मोपार्जितैस्त्वेतैः क्रियमाणेषु कर्मसु।
कर्तृता यजमानानामृत्विक्परशुकर्मवत्॥

इत्यात्मवादोक्तन्यायवार्त्तिकाद् शरीरात्मनोः स्वस्वामिभावव्यवस्थानाद्व्यवस्थेत्यर्थः। सर्वगतत्वसाधनस्य प्रकृतोपयोगमाह—**एवमिति**।

एवमात्मसमवेतस्य **कर्मणोऽत्रस्थान**मित्याद्यकल्पनिरासार्थं नेत्यादिभाष्यं व्याख्याय, प्रदेयद्रव्यसमवेतस्यावस्थानमिति द्वितीयकल्पनिरासार्थं यत्रेति भाष्यं व्याचष्टे— **अथेति** । आश्रयोऽपीति भाष्यं व्याचष्टे — **न चेति** । सत्यपीत्यादिभाष्येण द्व्यवदानस्यैवावस्थाविशेषत्वाद्भस्मनोऽप्यवदानविरोधित्वमाशङ्क्य, भस्मावस्थायां द्व्यवदानरूपाप्रत्यभिज्ञानात् भस्मनस्तदवस्थात्वायोगाद्विरोधितोच्यत इति, तद्विपरीतशब्देन सूचितम् ।

नन्वदृश्यमानमपि द्व्यवदानं कालान्तरभाविफलसिद्ध्यन्यथानुपपत्त्यावधारितस्थायित्वस्य कर्मणो निराश्रयस्यानुपपत्तेराश्रयत्वेनानुमास्यत इत्याशङ्क्यादर्शनहेत्वभावाद्योग्यानुपलब्धिविरोधेनानुमानासम्भवाभिधानार्थं 'फलक्रिये'त्यादिभाष्यं व्याचष्टे- **न चास्येति** । सौक्ष्म्यादीनामित्याशङ्काभाष्यं व्याचष्टे— **अर्थापत्त्येति** । कल्पितमिति परिहारार्थं भाष्यं निश्चितानभिधानादयुक्तमाशङ्क्य, मृदुवत्या परपक्षेऽप्यतिगौरवाभिधानार्थत्वेन व्याचष्टे— **तथा सतीति** ।

ननु स्वतन्त्रस्यैव कर्मणः स्थितिर्भविष्यतीत्याशङ्कानिरासार्थमनाश्रितमिति भाष्यं व्याचष्टे— **एवमिति** । क्षणिकत्वेनान्यत्रावगतस्य कर्मणोऽत्र स्थितिरनुपलब्धिकारणं च स्वातन्त्र्यादिकं कल्प्यमित्यतिगौरवमेवंशब्देन वदता तादृशशब्दस्यायुक्तार्थत्वं सूचितम् । देशान्तरप्रापणस्वभावत्वेनान्यत्रावगतस्य कर्मण औदासीन्यस्वभावकल्पनेऽप्यतिगौरवाभिधानार्थं स्वभावान्तरेति भाष्यं आद्यकल्पविषयत्वेन व्याचष्टे— **अथेति** । तस्मादित्युपसंहारभाष्यं व्याचष्टे— **तस्मादिति** । एवकारेण स्थायित्वकल्पनस्यायुक्तत्वाभिधानाद्भङ्गीत्यवयवो व्याख्यातः ।

पूर्वोत्तरपक्षयोः प्रयोजननिरूपणम्

प्रयोजनभाष्ये चिन्ताशब्दं तावद्व्याचष्टे— **मूलेति** । अनन्तरसूत्राभिहिताऽपूर्वसद्भावप्रयोजनत्वशङ्कानिवृत्त्यर्थत्वे चिन्ताशब्दस्याधिकरणशब्देनोक्ते ननु द्रव्यगुणशब्दा अपीत्यपिशब्दात्प्रतिपदाधिकरणप्रयोजनमेतदित्यभावे तत्रैकस्मादपूर्वमित्येतावन्मात्रस्य सिद्धान्तार्थत्वेन द्रव्यादेरपूर्वार्थत्वोपपत्तेः प्रतिनिधिर्न युक्त इत्याशङ्क्य, मूलशब्देन प्राधान्याद्भावार्थाधिकरणमुक्तम् । एवंशब्दार्थेऽपिशब्द इत्यर्थः ।

प्रयोजनमुपपादयति— **द्रव्यादीनामिति** । 'न देवताग्निशब्दक्रियमन्यार्थसंयोगादि-६-३-१८ति षष्ठाधिकरणे कर्मणामदृष्टार्थत्वात्, तस्य प्रतिनिधिना सिद्धौ प्रमाणाभावात्प्रतिनिध्यभावो वक्ष्यतइत्यर्थः । ननु प्रक्रान्तापरिसमाप्तिनिमित्तदोषपरिहारार्थं कर्मणोऽवश्यं समापनाय द्रव्यान्तरस्यावश्योपादेयत्वात् पूर्वपक्षप्रयोजनं न युक्तमित्याशङ्कते— **कथं तर्हीति** । द्रव्यान्तरोपादाने सदृशानादरः पूर्वपक्षप्रयोजनमिति परिहरति— **समापनीयमेवेति** । ननु पूर्वपक्षेऽप्याश्रयत्वेन कर्मणोऽन्वयात्, तत्सिद्धये सदृशादरो भविष्यतीत्याशङ्क्य, कर्मणश्चेत्युक्तम् । नन्वेवमपि प्रतिनिधिरुपात्तः स्यादित्याशङ्क्याह— **न चेति** । अन्यार्थत्वमुपपादयति— **पूर्वंद्रव्यमिति** । प्रक्रान्तासमाप्तिनिमित्तो दोषः प्रत्य-

वायशब्देनोक्तः । काम्यवन्नैमित्तिकस्यापि कर्मणः प्रतिनिधिना समापनं प्रक्रान्तासमापन-दोषपरिहारमात्रार्थम्, न फलसिद्ध्यर्थमिति शङ्कानिरासार्थम्—**नैमित्तिकेत्युक्तम्** । प्रतिनिधिनाऽप्यनुष्ठितं नैमित्तिकं कर्माकरणनिमित्तप्रत्यवायपरिहाराख्यं फलं साधयतीत्याशयः ।

धातोश्च फलभावनाकरणवाचित्वे श्येनादिशब्दानां तत्सामानाधिकरण्यान्नामधेयतापि सिद्धान्तप्रयोजनमित्याह— **नामधेयेति** । कस्मात्तर्हि भाष्यकृताऽसौ नोक्तेत्याशङ्क्याह—**सेति** । स्थितएतस्मिन्नधिकरणइत्यत्रोक्तत्वादित्यर्थः । गुणविधित्वे त्वनुष्ठेयार्थम् । अत्वन्नाधेयत्वे तदभावादनुष्ठानोपयोगित्वेन प्रयोजनत्वोपपत्तिः ॥ ५ ॥

॥ इति न्यायसुधायां द्वितीयपूर्वाधिकरणम् ॥

भा० प्र०—पूर्व के अधिकरण से यह निश्चित है कि 'भावार्थ कर्मशब्द' से ही अपूर्व की प्रतीति होती है, क्योंकि द्रव्य, गुण आदि के वाचक पदों को अपूर्व का प्रतिपादक मानने पर अनेक अदृष्टों की कल्पना करनी होगी, ऐसी स्थिति में यह आपत्ति हो सकती है कि जब अपूर्व नामक कोई पदार्थ ही प्रमाण से सिद्ध नहीं है तब उसकी कल्पना का लाघव या कल्पना के गौरव की क्या चिन्ता, व्यर्थ है ।

इस प्रकार की आपत्ति के परिहार के लिए सूत्रकार ने यह सूत्र कहा है ।

शास्त्र में कहा गया है कि 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत्' इति विधिवाक्य में 'दर्शपूर्णमासाभ्यां' यहाँ तृतीया विभक्ति है, अतः, दर्शपूर्णमासनामकयाग, स्वर्गरूप फल का साधन है—यह अवगत होता है, क्योंकि करण में तृतीया विभक्ति होती है, जो साधकतम अर्थात् क्रिया की निष्पत्ति का प्रधान साधन होता है वही करण होता है, याग क्रियाविशेष है, क्रिया क्षणिक होती है, उत्पत्ति के उत्तर क्षण में क्रिया का ध्वंस हो जाता है, यागक्रिया का फल स्वर्ग है, वह क्रिया होने के साथ ही साथ उत्पन्न नहीं होता है, अपि तु क्रिया होने के बहुत काल के बाद ही वह उत्पन्न होता है, याग करने वाले का देहान्त होने के बाद स्वर्गरूप फल की प्राप्ति होती है । किस प्रकार याग के द्वारा स्वर्ग आदि फल उत्पन्न हो सकता है ? क्योंकि, जो फल का उत्पादन करता है वह साधन फल से अव्यवहित पूर्वकाल में वर्तमान रहता है, श्रुति से विज्ञापित यागादि में फल साधनता नहीं है—यह नहीं माना जा सकता है, क्योंकि, ऐसा मानने पर श्रुति का अप्रमाण्य होगा । अतः क्षणिक यागादिरूप कर्म से फल की उत्पत्ति उत्पन्न हो सके ऐसी कल्पना करनी पड़ेगी । इसीलिए, अपूर्व नामक एक पदार्थ को माना गया है । 'श्रुत्यर्थापत्ति' ही अपूर्व नामक पदार्थ के अस्तित्व में प्रमाण है । अतः, अर्थापत्तिरूप प्रमाण के आधार पर 'अपूर्व' नामक पदार्थ को माना जाता है । इस प्रसङ्ग में यह ज्ञातव्य है कि 'अपूर्व' कोई अपूर्व पदार्थ नहीं है । किन्तु प्रधानकर्म और अङ्गकर्म के अनुष्ठान के पूर्व में यथाक्रम में अनुष्ठाता पुरुष स्वर्ग प्राप्ति के आयोग्य

है एवं यज्ञ भी स्वर्गरूप कार्य अर्थात् फल के उत्पादन के अयोग्य है, प्रधान कर्म एवं अङ्गकर्म का अनुष्ठान करने पर अनुष्ठातापुरुष में रहनेवाली एवं अनुष्ठेय कर्म में रहने वाली दोनों प्रकार अयोग्यता ही हटाई जाती है एवं उनमें योग्यता का सम्पादन होता है—यह सभी लोगों को मानना होगा, क्योंकि, ऐसा न होने पर वेदविधि ही व्यर्थ हो जायेगी, कारण, योग्यता न रहने पर अयोग्य पुरुष एवं अयोग्य कर्म ये दोनों ही व्यर्थ हैं, इसीलिए सूत्रकार ने कहा है—'चोदनापुनरारम्भः' अनुष्ठातापुरुष में रहनेवाली एवं अनुष्ठेय पुरुष में रहनेवाली जो योग्यता है, उसी को शास्त्र में अपूर्व शब्द से कहा जाता है। इसीलिए आचार्य कुमारिल ने कहा है:—

कर्मभ्यः प्रागयोग्यस्य कर्मणः पुरुषस्य वा।
योग्यता शास्त्रगम्या या परासाऽपूर्वमिष्यते ॥

अङ्गकर्मों के सान्निध्य में अनुष्ठान के पूर्व में प्रधानकर्म फल देने में अयोग्य हैं एवं अनुष्ठातापुरुष भी फल की प्राप्ति के अयोग्य है, बाद में दोनों में जो योग्यता का आधान है—वही अपूर्व है और यह योग्यता शास्त्रगम्य है।

अपूर्व को साक्षात् सम्बन्ध से फल का जनक मानने पर याग की फलसाधनता नहीं रह जायेगी, ऐसी स्थिति में याग को फल का साधन नहीं माना जायगा। इसके समाधान में यह कहा जा सकता है कि याग आदि का विशेष व्यापार ही अपूर्व है। व्यापार व्यापारीय अर्थात् जिसका व्यापार रहता है, उसका अर्थात् करण का व्यवधायक नहीं हो सकता है, कारण, ऐसा मानने पर करणत्व का उच्छेद हो जायगा। क्योंकि, करण सभी स्थल में व्यापारविशिष्ट रहता है, कारण, करण के क्रियाविशेष का ही व्यापार कहा जाता है। यदि यह कहा जाय कि करण का नाश हो जाने से निराश्रय व्यापार कैसे रह सकता है। इसके समाधान में यह कहा गया है कि अपूर्व को स्वर्गादि फल का साधन जो यागादि उसका व्यापार न मान कर शक्तिविशेष माना जायगा। शक्ति अर्थापत्ति प्रमाण के द्वारा ही कल्पित होने से अपूर्व भी अर्थापत्ति से सिद्ध होता है, जैसे अग्नि के बुझने पर भी उस अग्नि के द्वारा गर्म किया गया जल उसमें उसकी दाहिका शक्ति अनेक क्षणों तक अनुवर्तन करती है उसी प्रकार यागादि क्रिया के विनष्ट होने पर भी 'अपूर्व' नामक यागजन्यशक्ति यागकर्ता की आत्मा का आश्रयण कर फल के अव्यवहित पूर्वक्षण पर्यन्त रहती है, अतः अपूर्व नामक पदार्थ अप्रामाणिक नहीं है। यह अपूर्व अङ्गापूर्व, उत्पत्ति अपूर्व, समुदायपूर्व, परमापूर्व या फलापूर्व आदि के भेद से अनेक प्रकार का है। दर्शपूर्णमास नामक याग अमावस्या में एवं पूर्णिमा में अनुष्ठित होता है, अमावस्या में जो अनुष्ठित होता है, उनमें तीन याग (भाग) है एवं पूर्णिमा में जो अंश अनुष्ठित होता है उसका भी तीन भाग (याग) है, ये जो तीन-तीन भाग हैं, इनमें प्रत्येक कतिपय अङ्गक्रियाओं के द्वारा निष्पन्न होती हैं, ये सभी क्रियायें दूसरे क्षणों में विनष्ट हो जाती हैं, प्रत्येक

अङ्ग क्रियाओं से जन्य अपूर्व अङ्गापूर्व कहा जाता है, दर्श के तीन याग और पूर्णमास के तीन यागों से तीन-तीन कर छै अपूर्व उत्पन्न होते हैं, इन अपूर्वों को उत्पत्त्यपूर्व कहा जाता है। दर्श के तीन याग से जो तीन अपूर्व उत्पन्न होते हैं उनसे अन्य एक अपूर्व उत्पन्न होता है एवं पूर्णमास से तीन याग से जो तीन अपूर्व उत्पन्न होते हैं, उससे भी एक अन्य अपूर्व उत्पन्न होता है, इन दोनों को 'समुदायापूर्व' कहा जाता है, इन दो समुदायापूर्व को छोड़ कर एक अन्य अपूर्व की कल्पना की जाती है, जिसे परमापूर्व या फलापूर्व कहा जाता है। यह फलोत्पत्ति के पूर्व क्षणपर्यन्त वर्तमान रहने से फल की उत्पत्ति क्षण में विनष्ट हो जाता है। परमापूर्व = फलापूर्व के बिना याग की फलजनकता साधन नहीं है। इसलिए परमापूर्व की कल्पना करनी चाहिए। अवान्तर—अपूर्व के बिना परमापूर्व उपपन्न नहीं हो सकता है, इसलिए उसकी भी कल्पना करनी चाहिए। फलतः परमापूर्व, समुदायापूर्व, उत्पत्त्यपूर्व एवं अङ्गापूर्व इनकी पूर्व पूर्व के उत्पादन के लिए अन्य अन्य आवश्यक है, इसलिए कल्पना-गौरव नहीं है क्योंकि फलमुखगौरव दोषावहा नहीं है। आचार्य कुमारिल ने कहा है—

प्रमाणवन्त्यदृष्टानि कल्प्यानि सुबहून्यपि।
अदृष्टशतभागोऽपि न कल्प्यो निष्प्रमाणकः॥

'चोदनः' = अपूर्व, जो चोदित अर्थात् कल्पित होता है, इस प्रकार की व्युत्पत्ति के अनुसार चोदना शब्द का अर्थ अपूर्व होता है। 'पुनः' = कारण से 'नारम्भः = उत्पत्ति अर्थात् फल की उत्पत्ति (श्रुत होती है) अपूर्व है, क्योंकि, कर्म की उत्पत्ति श्रुत = श्रुति में उपदिष्ट है॥ ५॥

इति अपूर्वाधिकरणम्।

अथ तृतीयं तानि द्वैधाधिकरणम्

[३] तानि द्वैधं गुणप्रधानभूतानि॥ ६॥ सि०॥

शा० भा० —अवगतमेतद्—भावशब्दाः कर्मणो वाचका इति। बहुप्रकाराश्च भावशब्दाः। यजति, जुहोति, ददातीत्येवंप्रकाराः। दोग्धि, पिनष्टि-विलापयतीत्येवमादयश्च। तेषु[1] संदेहः—किं सर्वे प्रधानकर्मणो विधायकाः, उत केचित् संस्कारकर्मण इति। भावार्थत्वाविशेषात् सर्वे प्रधानकर्मणो वाचका इति प्राप्तम्।

ततो ब्रूमः। तानि द्वैधं भवितुमर्हन्तीति द्विप्रकाराणि, कानिचित्प्रधान-कर्मणो वाचकानि, कानिचित्संस्कारकर्मणः। एवमपि सर्वाण्यर्थवन्ति। अर्थवत्त्वे सति सर्वेभ्यो न शक्यमपूर्वं कल्पयितुम्। अतो न सर्वाणि प्रधानकर्मणो वाचकानि॥ ६॥

---

१. ब. तत्र।

भा० वि०—विषयसङ्गतिसंशयान् वक्तुं वृत्तमनुवदति—अवगतमिति। भावार्थस्य कर्मणोऽपूर्वसाधनत्वे तदितरस्तदर्थमिति न्यायेन तस्यैव प्राधान्यापत्तेः प्रधानकर्मण इत्युक्तं तथापि किमित्यत आह—द्विप्रकारा इति। गां दोग्धि, तण्डुलान् पिनष्टि, आज्यं विलापयति इत्येवं प्रकाराश्चेत्यर्थः, तदनेनाख्यातस्य प्रधानकर्मवाचितया तद्भेदानुसार्यपूर्वभेदानुसरणं कर्तव्यमिति यत्स्थितं तस्य क्वचिदपवादोऽनेन क्रियते इति सङ्गतिः सूचिता—तेषु संदेह इति। किं सर्वेभ्यो भावशब्देभ्योऽपूर्वमुत केभ्यश्चिदेवेति शेषः। कुतस्संशय इति, तत्राह—किं सर्व इति। संस्कारकर्मण इत्यनवधारणादिति शेषः, भावार्थत्वाविशेषादिति भाव्यनिष्ठभावनानुरञ्जकक्रियाविषत्वेन फलकरणत्वाभिधायित्वादित्यर्थः। यद्वा भाव्यते साध्यते इति भावः, साध्यार्थत्वाविशेषात् भूतभव्यसमुच्चारणन्यायेन सर्वे भावशब्दा प्रधानकर्मणो वाचका इत्यपूर्वार्था इत्यर्थः। तानीति भावाख्यान्याख्यातानि द्वैधमित्यस्य व्याख्याद्विप्रकाराणीति प्रकाराद्द्वित्वं दर्शयति—**कानिचिदिति**।

ननु केवलसंस्कारकर्मवाचित्वे भावार्थत्वं न स्यात्, अत आह—एवमपीति। सिद्धस्यापि द्रव्यस्य संस्कार्यतया भावत्वात्तन्निष्ठभावनोपरञ्जकक्रियाविषयत्वेन भावार्थत्वं संभवतीत्यर्थः।

ननु सर्वेषां भावार्थत्वसंभवेऽपि केषांचित्फलभावनाकरणद्वारेणापूर्ववाचकत्वं केषांचिन्नेत्येकार्थत्वप्रसङ्ग इत्याशङ्क्याह—**अर्थवत्त्वे चेति**। कुत इत्याशङ्क्य प्रतिपदाधिकरणोक्तन्यायं स्मारयति—**एवमिति**। यतो न सर्वेभ्योऽपूर्वकल्पना अत इत्युपसंहरति—अत इति ॥ ६ ॥

अथ तृतीयं तानि द्वैधाधिकरणम्

त० वा०—एवमाख्यातभेदानुसारेणापूर्वभेदानुगमे सर्वत्र प्राप्ते, तदपवादार्थं गुणप्रधानविवेकारम्भः। तत्र तावत्—

आख्यातत्वाविशेषेण भूतैर्भव्यार्थजन्मनः।
सिद्धे च साध्यताशक्तेः सर्वाख्यातप्रधानता ॥

यावद्धि प्रयोजनकल्पनम्, तत्सर्वं धात्वर्थान्न्याय्यम्, प्रयोजनवच्च प्रधानम्, अपूर्वसाधनं च। तेन यज्यादिवदेवावहन्त्यादीनामपि व्रीह्यादिभिर्निष्पाद्योऽर्थः। अतश्च तेऽप्यपूर्वसाधनमिति।

अत्रोच्यते—

नामाख्यातार्थसम्बन्धे यदक्लृप्तप्रयोजनम्।
तस्यादृष्टार्थता युक्ता नेतरस्याप्रमाणिका ॥

सर्वत्रैव द्रव्यकर्मसम्बन्धे कर्मणां द्रव्येण विनाऽनुत्पत्तेः प्रथमं तावद् द्रव्यं कर्मोत्पादयत् दृष्टोपकारित्वात् तदर्थमाभासते। तत्र क्वचिद्भूयः कर्म परावृत्त्य द्रव्यस्योपकरोति, क्वचिदात्मलाभमात्रमनुभवति। तद्यदाऽऽत्मलाभमात्रं तस्य दृश्यते, तदा साकाङ्क्षत्वाददृष्टं कल्पयितुं शक्यते। यदा तु कार्यान्तरोपयिकेन दृष्टेनैव तण्डुलनिर्वृत्त्यादिना द्रव्योपकारेण[1] निराकाङ्क्षीभवति, तदानीमदृष्टकल्पनावसराभावादन्यथैव विधानार्थवत्त्वोपपत्तेर्नादृष्टसाधनत्वं प्रतीयते ॥ ६ ॥

॥ अथ तृतीयं तानि द्वैधाधिकरणम् ॥ ३ ॥

न्या० सु०—'अवगतमेतदि'त्यादिभाष्येण भावशब्दानामपूर्वगमकत्वोक्त्या 'तदेतरत्तदर्थमि'ति न्यायान्नामशब्दार्थस्य भावशब्दार्थं कर्मप्रति, अङ्गत्वावगतेः कर्मणां नामार्थं प्रति प्राधान्याभिधानात्प्रधानकर्मवाचित्वस्यार्थादुक्तस्यापवादायेदमधिकरणं युक्तम्। तत्र गुणप्रधानचिन्ताया भेदलक्षणासङ्गतिमाशङ्क्योपक्रमोक्तामेव सङ्गतिं स्मारयत्येवमिति। द्रव्यं प्रति कर्मणो गुणत्वे दृष्टार्थत्वात्, कर्मभेदेऽप्यपूर्वभेदो नास्तीत्याशयः। विवेकशब्देन च न किंचिद् गुणकर्मास्तीत्याशङ्क्य गुणकर्मव्युत्पादनार्थताऽस्याधिकरणस्य सूचिता। भावार्थत्वेति पूर्वपक्षभाष्यं व्याचष्टे—**तत्रैतावदिति।**

आद्यपादेनावहन्त्यादेरपि यज्यादिद्धाव्याद्याकाङ्क्षोत्थापनहेतुभावना वाच्याख्यातप्रत्यययोगेन भावार्थत्वात्प्रसक्तिलक्षणया श्रुत्या तदर्थस्य भावनया भाव्यसाधनत्वेन ग्रहणात्प्राधान्यमित्येवमाश्रितत्वात् प्रयोगस्येति सूत्रावयवोक्तश्रुतिकृतधात्वर्थप्राधान्याभिधानार्थत्वेन भाष्यं व्याख्याय, भाव्यत इति व्युत्पत्त्या भावशब्देन साध्याभिधात्साध्यार्थत्वाविशेषादित्येवं भूतभव्यसमुच्चारणन्यायार्थतया द्वितीयेन व्याख्याये ननु व्रीह्यादेर्नामार्थस्य द्वितीयया भाव्यत्वेनान्वयान्नेह भूतभव्यसमुच्चारणन्यायोऽस्तीत्याशङ्क्य, भवनकर्तृभावनावाचित्वरूपभावार्थत्वाविशेषात्सिद्धे व्रीह्यादौ भावनां प्रति भाव्यत्वमशक्यं द्वितीयया वक्तुमित्येवं तृतीयेन व्याख्यातम्। प्रधानभूतकर्मवाचिताख्यातस्य प्राधान्योक्त्योक्ता।

ननु व्रीह्यादेर्भाव्यत्वानभ्युपगमे तृतीयानिर्देशाभावे च साधनत्वस्याप्ययोगादनन्वयः स्यादित्याशङ्क्य धात्वर्थस्य प्रधानत्वेनाङ्गपेक्षत्वात्फलवत्सन्निधावफलं तदङ्गमिति न्यायेनापूर्वप्रयुक्तत्वाद्धर्माणां धात्वर्थस्य चापूर्वसाधनत्वाद् तृतीयानिर्दिष्टस्यापि व्रीह्यादेर्धात्वर्थसाधनताऽवसीत इति सूचयितुमाह—**यावद्धीति।** न्याय्यशब्देन धात्वर्थफलवत्त्वस्य पूर्वाधिकरणन्यायसिद्धतोक्ता। यथा यज्यादीनामर्थो व्रीह्यादिभिर्निष्पाद्यः तथाऽवहत्यादीनामपीति वदता सक्तुवत् द्वितीयाभङ्गः सूचितः। प्रधानकर्मत्वपूर्वपक्षस्यापूर्वभेदोपयोगित्वमाह—**अतश्चेति।** ततो ब्रूम इत्यादिसिद्धान्तभाष्यं तात्पर्यतो व्याचष्टे—**अत्रेति।** यद्यपि द्रव्यस्य चाख्यातपदार्थस्य चान्वये धात्वर्थस्याख्यातपदश्रुत्या फलवत्त्वा-

---

१. क. (टिप्पण्यां) द्रव्योपकारद्वारेणेति।

वगमादभूतभव्यसमुच्चारणन्यायाच्च सर्वत्र धात्वर्थनिष्पादकत्वं द्रव्यायावसीयते, तथापि द्रव्यनिष्पादितस्य धात्वर्थस्य कैमर्थ्यापेक्षायामक्लृप्तप्रयोजनस्यैव यागादेरदृष्टापूर्वसाधनत्वं युक्तम्, अवघातादेस्तत्कृतेनैव द्रव्योपकारेण नैराकाङ्क्ष्येणाप्रामाणिकत्वाच्च अदृष्टार्थता युक्तेत्यर्थः। अनेन च सर्वेभ्य इति भाष्योक्तगुणकर्मत्वव्युत्पादनस्य अपूर्वभेदापवादार्थत्वं विवृतम्।

श्लोकं व्याचष्टे—**सर्वत्रैवेति**। अनेन चाख्यातत्वाविशेषणभूतैर्भाव्यार्थजन्मन इति-द्वयमपि प्रागवस्थायामभ्युपगमेन परिहृतम्। व्रीह्यादेर्द्रव्यस्य सिद्धत्वात् स्वरूपेण भाव्यत्वायोगेऽप्यसिद्धेन तण्डुलीभावादिरूपेण साध्यत्वसम्भवात्, सिद्धे च साध्यत्वाशक्ते-रित्येतत्परिहृतं भवतीति सूचनायोपकरोतीत्युक्तम्॥ ६॥

भा० प्र०—पूर्व अधिकरण में कहा गया है कि भावनावाची आख्यात से ही अपूर्व की प्रतीति होती है, इस प्रसङ्ग में आशङ्का की जा सकती है कि आख्यात ही यदि अपूर्व का प्रतिपादक है तब 'अग्निहोत्रं जुहोति' 'सोमेन यजेत' इत्यादि के समान 'व्रीहीन् अवहन्ति' 'तण्डुलान् पिनष्टि' इत्यादि से भी अपूर्व की प्रतीति होनी चाहिए, क्योंकि, इस स्थल में भी 'अवहन्ति' 'पिनष्टि' आदि पद भी भावार्थक कर्म पद ही है, इसे भी यदि अपूर्व की प्रतीति होगी तो ये भी प्रधान कर्म ही होंगे, गुणकर्म या संस्कार कर्म ये नहीं होंगे, इसमें सिद्धान्ती का कहना है कि 'तानि द्वैधं गुणप्रधान-भूतानि' आख्यात से ही अपूर्व की प्रतीति भले ही हो, किन्तु, वह आख्यात गुणकर्म एवं मुख्य कर्म है अर्थात् प्रधान कर्म के बोधक के रूप में दो प्रकार के हैं। मुख्य अर्थात् प्रधान कर्म का बोधक आख्यात ही अपूर्व का प्रतिपादक होता है, गौण अर्थात् गुणकर्म का बोधक आख्यात अपूर्व का बोधक नहीं है। अतः जो प्रधान आख्यात है, उन्हीं से फल रूप में अपूर्व की प्रतीति होगी।

'तानि' = वे आख्यात, गुणप्रधान 'भूतानि' = गुण भूत अर्थात् गुण कर्म के बोधक एवं प्रधानभूत अर्थात् मुख्य = प्रधान कर्म के बोधक हैं, 'द्वैधम्' = द्विधा या दो भागों में विभक्त, आख्यात गौण और मुख्य भेद से दो प्रकार के कर्मों के बोधक होने से दो भागों में विभक्त है।

भाष्य में कहा गया है कि 'सर्वेभ्यो न शक्यम् पूर्वं कल्पयितुम्' प्रधान के बोधक यजति आदि यहाँ से ही अपूर्व की कल्पना होती है, गुणकर्म = संस्कार कर्म के बोधक भावशब्दों से फलरूप प्रधानापूर्व की उत्पत्ति नहीं होती है। संस्कार कर्मों से भी अङ्गा-पूर्व ही उत्पन्न होते हैं, अपूर्व स्वर्गादि फलों के दायक नहीं हैं॥ ६॥

यैर्द्रव्यं न चिकीर्ष्यते तानि प्रधानभूतानि द्रव्यस्य गुणभूतत्वात्॥ ७॥

शा० भा०—एवं सत्यल्पीयस्यदृष्टकल्पना न्याय्या। ननु न विनिगमनायां हेतुमवगच्छामः कुतोऽपूर्वम्, कुतो नेति। तदुच्यते। यैर्भावकर्मभिर्न द्रव्यं

संस्कर्तुमिष्यते, उत्पादयितुं वा। तानि प्रधानभूतानि—प्रधानकर्मणो वाचकानि। द्रव्यस्य गुणभूतत्वात्। द्रव्यं हि गुणभूतम्, कर्मनिर्वृत्तेरीप्सितत[1]मत्वात् ॥ ७ ॥ प्रधानकर्मलक्षणम् ॥

भा० वि०—नन्वपवादस्य पूर्वसूत्रेणैव दर्शितत्वात् किमवशिष्टेन सूत्रद्वयेनेत्याशङ्क्य तद्व्यावर्त्याशङ्कामाह—**सत्यमित्यादिना**। यद्यपि न संस्कारकर्मभ्योऽपूर्वकल्पना किन्तु प्रधानकर्मभ्य एव तथापि किमपूर्वसाधनं प्रधानकर्म किंवा तदसाधनं गुणकर्मेति विनिगमनहेत्वभिधानार्थं सूत्रद्वयमित्याह—**तदुच्यत इति**। तत्र प्रधानकर्मतया अपूर्वार्थत्वं वक्तुं प्रधानकर्मलक्षणासूत्रं व्याचष्टे—**यैरिति**। आख्यातापरपर्यायभावशब्दवाच्यैः यैः कर्मभिर्न द्रव्यं संस्कर्तुम्, उत्पादयितुं वेष्यते तानि कर्माणि प्रधानभूतानि अतश्च तद्वाचकान्याख्यातान्यपि प्रधानकर्मणो वाचकानि प्रधानानि भवन्तीति योज्यम्। अत्र संस्कर्तुमुत्पादयितुं वेत्याभ्यां चिकीर्ष्यत इति सूत्रपदं धर्मतः स्वरूपतो वेति व्याख्यातं—**कर्मनिवृत्तेरिति**। व्रीहिभिर्यजेतेत्यादौ व्रीहीणां साधनत्वेन यागस्य च साध्यत्वेनावगमादित्यर्थः ॥ ७ ॥

त० वा०—यैः कर्मभिर्द्रव्यं स्वरूपतो, धर्मतो वा न कर्तुमिष्यते। यथा प्रयाजादिभिस्तानि स्वसाधनानि प्रति प्रधानभूतत्वाददृष्टार्थानि भवन्ति ॥ ७ ॥

॥ प्रधानकर्मलक्षणम् ॥

न्या० सु०—यद्यपि यदक्लृप्तप्रयोजनम्, तस्यैवापूर्वसाधनत्वं युक्तम्। न सर्वस्य। तथापि किमक्लृप्तप्रयोजनमिति व्यवस्थाहेत्वभावाद्विविकलात् सर्वेषामपूर्वसाधनताऽवश्यमापद्येतेत्याशङ्क्य तद्विवेकार्थत्वं गुणप्रधानलक्षणस्यैवं सतीति भाष्योक्तमध्यायोपक्रमएवास्य च विवेकार्थं यद्गुणप्रधानलक्षणमिति वार्त्तिकेन विवृतत्वादव्याख्यानार्थं यैरिति भाष्यं व्याचष्टे—**यैरिति**। यद्यप्याख्यातानां भावशब्दत्वेनाभिप्रेतानां पूर्वनिर्दिष्टानां तानि द्वैधमिति तच्छब्देन परामर्शात्तद्वाच्यानां कर्मणां गुणप्रधानद्वारा तेषां गुणप्रधानवाचितोक्तेति, यद्भावशब्दावाच्यैर्यैः कर्मभिर्न द्रव्यमुपक्रियते, तेषां कर्मणां प्रधानत्वात्तद्वाचीनि भावशब्दाख्यान्याख्यातानि प्रधानकर्मवाचीनीति व्याचक्षाणेन भाष्यकृतोक्तम्। तथाऽप्याख्यातार्थस्यापि बुद्धिस्थत्वात्तच्छब्देन परामर्शोपपत्तेः क्लिष्टव्याख्या न युक्तेति मत्वा, भाष्यस्थं भावशब्दमुपेक्ष्य कर्मभिरित्येतावन्मात्रमुक्तम्। संस्कर्तुमित्यस्य सूत्रोक्तं च प्राप्तिविकारार्थत्वं च दर्शयितुम्—**धर्मतो** वेत्युक्तम्। प्रधानत्वाभिधानस्यापूर्वभेदोपयोगित्वमदृष्टार्थानीत्यनेनोक्तम् ॥ ७ ॥

भा० व०—'व्रीहीन् अवहन्ति', 'तण्डुलान् विनष्टि' इत्यादि वाक्यों से विहित कर्म प्रधान कर्म नहीं हैं, क्योंकि इस स्थल में गौण है, क्योंकि, उसके द्वारा अन्य कर्मों की

---

१. ब. रीप्सितत्वातनमत्वात्।

पूर्णता साश्रित होती है, व्रीहि आदि के द्वारा जो कर्मों की पूर्णता का साधन होता है। उसकी समाप्ति ही ईप्सिततम अर्थात् सभी की अपेक्षा अधिक अभीष्ट है या अभिप्रेत है वही प्रधान है, अतः, व्रीहि आदि अप्रधान या गौण है। इसीलिए 'सोमेन यजेत', 'अग्निहोत्रं जुहोति' 'वह्निर्यजति'।

'पञ्च प्रयाजा इज्यन्ते' इत्यादि वाक्यों से विहित कर्म ही प्रधानकर्म हैं, इन स्थलों में 'यजेत' इत्यादि आख्यात अपूर्व के प्रतिपादक हैं, आशय यह है कि प्रधान कर्म दृष्टार्थक नहीं हैं अदृष्टार्थक हैं अर्थात् अपूर्व के जनक हैं।

'यैः' = जिन आख्यातयुक्त कर्मों से, 'तु' = किन्तु, 'द्रव्यं' = द्रव्य, न चिकीर्ष्यते'= उत्पादन या संस्कार करने के लिए अभिप्रेत नहीं हैं, 'तानि प्रधानानि' = वे सभी आख्यात अर्थात् आख्यातयुक्त कर्म प्रधानकर्म हैं, 'द्रव्यस्य गुणभूतत्वात्' = क्योंकि द्रव्य गुणभूत अर्थात् गौण होते हैं, जिस स्थल में आख्यातयुक्त कर्म वाचक पद द्रव्य का उत्पादन अथवा संस्कार के लिए अनुष्ठित नहीं होते हैं, उनमें आख्यात प्रधान अर्थात् आख्यातयुक्त कर्म प्रधान कर्म हैं, क्योंकि, वहाँ द्रव्य गौण अर्थात् गुणभूत होता है। जिनसे भाव कर्मों से द्रव्य का संस्कार या उत्पत्ति नहीं करना अभिप्रेत रहता है, वे भावशब्द प्रधान कर्म के वाचक होते हैं। द्रव्य गुणभूत होता है, क्योंकि वह कर्म के निष्पादन करने के लिए अतिशय अभिप्रेत होता है ॥ ७ ॥

यैस्तु द्रव्यं चिकीर्ष्यते गुणस्तत्र प्रतीयेत तस्य द्रव्यप्रधानत्वात् ॥ ८ ॥

शा० भा०—यैस्तु द्रव्यं चिकीर्ष्यते, गुणस्तत्र प्रतीयेत कर्म। कुतः ? तस्य द्रव्यप्रधानत्वात्। प्रत्यक्षं यजेतेत्येवमादिभिर्द्रव्यं न चिकीर्ष्यते। तस्मात्तानि प्रधानकर्मणो वाचकानि। द्रव्यस्य गुणभूतत्वात्। पिनष्टीत्येवमादिभिर्द्रव्यं संस्क्रियते। तस्मात्तानि गुणकर्मवचनानि[1]। एष[2] एव विनिगमनायां हेतुः।

प्रयोजनं तु पूर्वस्मिन्पक्षे प्रैयङ्गवेऽपि चरौ व्रीहय उत्पाद्या अवघातार्थत्वेन, सिद्धान्ते नोत्पाद्याः ॥ ८ ॥ गुणकर्मलक्षणम्।

कर्मणां गुणप्रधानभावविभागाधिकरणम्।

इति तृतीयं तानि द्वैधाधिकरणम् ॥ ३ ॥

भा० वि०—इदानीं गुणकर्मत्वेन दृष्टार्थत्वं वक्तुं गुणकर्मलक्षणपरं सूत्रं व्याचष्टे—**यैस्त्विति**। गुण इति भावप्रधानो निर्देशः, तेषु गुणकर्मत्वं प्रतीयेते-त्यर्थः, द्रव्यप्रधानत्वादिति व्रीहीनवहन्तीति द्वितीयाश्रुत्या द्रव्यस्य प्राधान्या-वगमादित्यर्थः। सूत्रद्वयार्थं संक्षिप्योपसंहरति—**प्रत्यक्षमिति**। यागादिभिर्द्रव्यं

---

१. ब. गुणवचनानि। २. ब. एषविनिगमनायां।

प्रत्यक्षं न चिकीर्ष्यते, प्रेषणादिभिस्तु प्रत्यक्षमेव संस्क्रियत इत्यर्थः। ततश्च विनिगमनहेत्वभावोऽसिद्ध इत्याह—**एष इति**। विचारप्रयोजनमाह—**प्रयोजनमिति**। उत्पाद्या उपस्थापनीयाः पूर्वपक्षे प्रैयङ्गवेचरावतिदेशप्राप्तोऽवघातः स्वसाधनत्वेन व्रीहीनेव स्वीकरोति। न च वैकृतैः प्रियङ्गुभिः बाधः तेषां प्रधानद्रव्यत्वेनाङ्गद्रव्यबाधकत्वाभावादित्यर्थः। सिद्धान्तेत्ववघातस्य संस्कारकर्मतया प्रधानौपयिकानां प्रियङ्गूणामेव संस्कार्यत्वान्न व्रीहिय उत्पाद्या इत्यर्थः॥ ८॥

तं० वा०—यैः पुनर्द्रव्यमुत्पाद्यते। यथाऽऽधानेनाग्नयोऽवाप्यन्ते, क्रियन्ते वा। यथा वरणैर्ऋत्विजः संस्क्रियन्ते। यथाऽवहन्तिना व्रीहयः। पेषणेन तण्डुलाः तानि गुणभूतानि, प्रयोजनवद्द्रव्यसंस्कृतेरीप्सितत्वात्।

यदा दृष्टार्थमदृष्टार्थं चोभयथाऽपि तुल्यवदनुष्ठीयेत तदा किं प्रयोजनं चिन्तायाः। तदुच्यते। प्रैयङ्गवेऽपि चरावतिदेशप्राप्तो व्रीहिसाधनक एवावहन्तिः कर्तव्यः पूर्वपक्षे।

कुतः—?

प्रधाने हि श्रुतं द्रव्यं नाङ्गद्रव्यस्य बाधकम्।
प्रयाजेज्याज्यवत्तेन[1] हन्तौ स्याद् व्रीह्यबाधनम्॥

सिद्धान्ते तु बाध्यन्ते। कुतः—?

प्रधानौपयिकं द्रव्यं संस्कारैरपि युज्यते।
तेन हन्त्यादिभिः सर्वैः संस्कर्तव्याः प्रियङ्गवः॥

ननु च पूर्वपक्षेऽपि प्रधानप्रयुक्तव्रीह्याश्रयत्वेन प्रकृतावप्रयोजकत्वात्प्रैयङ्गवे चरौ प्रधानेनागृह्यमाणान्व्रीहीनवघातो न लभते। नैतदेवम्—

तुल्यो हि व्रीहिसंबन्धः शास्त्राद्यागावघातयोः।
वाजिनेज्यादि तुल्यं च नाप्रयोजकलक्षणम्॥

'व्रीहिभिर्यजेत' 'व्रीहीनवहन्ति' इति तुल्ये चोदने, तत्रेयं प्रयोजका, इयं नेति नास्ति विशेषहेतुः। न च वाजिनादिवदवहन्तेरनुनिष्पादित्वम्। न च पदकर्मवत्परप्रयुक्तप्रकृतैकहायन्यधीननिराकाङ्क्षत्वम्। न चैकदेशद्रव्यत्वमुत्तरार्धादिवत्। नापि 'पुरोडाशकपालेन' इतिवदर्थाभिधानकर्मत्वम्। तस्मादवहन्तिरपि प्रयोजकः। न[2] चास्मिन्पक्षे नियोगतो यागार्था एव व्रीहयोऽवहन्तव्याः। लौकिकैरपि कर्मसिद्ध्यविशेषात्। न चात्र प्रकृतग्रहणे प्रमाणे, प्रकरणस्याविशेषकत्वात्। न चाधिकाराद्विशेषः 'तुल्येषु नाधिकारः स्यात्' इति न्यायात्।

---

१. क. प्रयाजेज्याज्य। २. क. तवास्मिन्पक्षे।

संस्कारपक्षे तु लौकिकानामानर्थक्येनासंस्कार्यत्वादपूर्वसाधनविशेषणत्वेन कथंचित्प्रकृतग्रहणं क्लेशेन भविष्यति। न चाऽऽरादुपकारकत्वेऽवहन्तेर्यागस्येव लौकिकैः साध्यमानस्य किंचिदानर्थक्यमिति श्रौतत्वाद् व्रीहिमात्रग्रहणमेव युक्तम्। धर्ममात्रं च तदाऽवहन्तिः सर्वौषधावहन्तिवत्सकृदेव च कर्तव्यो नाऽऽतण्डुलनिर्वृत्तेः। प्रधानव्रीहीणां च दलनादिभिरपि तण्डुलीभावः स्यात्। सान्नाय्योपांशुयाजाङ्गत्वमपि चास्य प्रकरणाविशेषात्तथा भवतीति तद्विकारेष्वपि प्रयोक्तव्य इत्यादीनि प्रयोजनानि ॥ ८ ॥

(इति तृतीयं तानि द्वैधाधिकरणम् ॥ ३ ॥)

॥ गुणकर्मलक्षणम् ॥

न्या० सु०—सूत्रं व्याचष्टे—**यैः पुनरिति**। 'अग्निमादधीते'त्यग्निशब्दस्य भाव्यत्वार्हकर्माङ्गभूताहवनीयादिरूपवाचित्वात्, तस्य च यूपादिवत् शास्त्रीयकर्मोत्पाद्यत्वाद्यथाधानेनाग्नयइत्युक्तम्। स्वमतेनर्त्विजां प्राप्यत्वाद्भाष्यकृन्मतेन चोत्पाद्यत्वात्, अवाप्यन्ते क्रियन्ते वेत्युक्तम्। वैतुष्यादिलक्षणं विकारमेव पुरोडाशोत्पादनयोग्यत्वाधानार्थत्वात् संस्कारत्वेनाभिप्रेत्य संस्क्रियन्ते वेत्युक्तम्। द्रव्यप्राधान्योपपादनार्थः प्रयोजनवच्छब्दः।

सूत्रद्वयोक्तव्यवस्थाहेतूपसंहारार्थं प्रत्यक्षमित्यादिभाष्यं स्पष्टत्वान्न व्याख्यातम्। गुणप्रधानविचारस्यापूर्वसदसद्भावविवेकप्रयोजनतया न सर्वेभ्यः शक्यमपूर्वं कल्पयितुमिति भाष्यात् 'कुतोऽपूर्वमित्य'स्माच्च ज्ञातत्वेन प्रयोजनान्तरानपेक्षत्वात्प्रतिपादकं प्रयोजनमिति। भाष्यमयुक्तमाशङ्क्योपपादयति—**यदेति**। यथैव भावार्थाधिकरणस्य लक्षणसङ्गत्यै धात्वर्थभेदानुनिष्पाद्यपूर्वभेदानुसारसिद्धिप्रयोजनत्वे, अन्यदुपोद्घातेनेत्युपोद्घातशब्देनोक्तेऽप्यनुष्ठानार्थत्वाच्चिन्तायास्तदुपयोगिप्रयोजनान्तराभिधानं तथेहापीत्याशयः।

प्रयोजनविचारः

पूर्वपक्षप्रयोजनभाष्यं प्रैयङ्गवे चरौ व्रीह्यनुपदेशादयुक्तमाशङ्क्य व्याचष्टे—**तदुच्यत इति**। नन्वतिदेशप्राप्तानामपि व्रीहीणां प्रियङ्गुभिर्बाधात् कथमुत्पाद्यत इति प्रश्नपूर्वकमुपपादयति—**कुत इति**। प्रयाजेज्याङ्गभूतमाज्यं यथा प्रधानाङ्गतया श्रुतेन प्रियङ्गुद्रव्येण न बाध्यते, तथाऽवघाताङ्गभूता व्रीहयोऽपीत्यर्थः। नन्वेवं सति सिद्धान्तेऽप्युत्पाद्या इत्याशङ्क्याह—**सिद्धान्ते त्विति**। एतदेव प्रश्नपूर्वकमुपपादयति—**कुत इति**। व्रीहिस्वरूपानानादरेणापूर्वसाधनांशनिवेशं संस्काराणां वक्तुं प्रधानौपयिकशब्दः।

नन्ववघातस्य निर्वापोत्तरकालं विधानात्तथा निरुप्तानामेवावघातोपपत्तेः व्रीह्यन्तरोत्पादनानाक्षेपात्, तेषां च यागप्रयुक्त्यैव लाभेनाऽवघातस्याप्रयोजकत्वान्नेह पूर्वपक्षेऽपि व्रीहिप्राप्तिरित्याशङ्कते—**ननु चेति**। सत्यं पदप्रयुक्तोपजीवित्वेनाप्रयोजकत्वं

भवति। गुणाधिकारे गुणफलसम्बन्धविधिपरस्य शास्त्रस्य वाच्यभेदापत्तेराश्रयाश्रयिसम्बन्धपरत्वायोगान्निराश्रयस्य च गुणस्य फलसाधनत्वानुपपत्तेराश्रयाक्षेपकशास्त्रान्तरापेक्षत्वाद्भवति वाजिनेज्यादौ च शास्त्रस्य नैरपेक्ष्येऽपि वाजिनादेः प्रयुक्त्यशक्तेः, इह त्ववघातशास्त्रस्य यागशास्त्रानपेक्षत्वादवघातस्य च प्रयुक्तिशक्त्यविघातान्नान्यप्रयुक्तोपजीवने हेतुरस्तीत्याशयेन परिहरति—**नैतदिति**। तुल्यशब्देनान्योन्यानपेक्षतोक्ता। श्लोकं व्याचष्टे—**व्रीहिभिरिति**। यागार्थव्रीहिनियमाभावं वक्ष्यमाणमभिप्रेत्य विशेषहेत्वभावोक्तिः। न च यथा सा वैश्वदेव्यामिक्षा, वजिभ्यो वाजिनमिति शास्त्रयोरन्योन्यापेक्षत्वेऽपि 'तप्ते पयसि' दध्यानयतीत्यानयतेर्द्विकर्मकत्वात्पयसश्चाधिकरणत्वेनाद्यदध्याख्यकर्मव्याप्यता द्वितीयकर्मत्वात्समासिः। शब्दार्थ इतिन्यायेनागारे गावो वास्यन्तामित्यगारस्येव गोवासनं प्रति दध्यानयनं प्रति प्राधान्यावसायादामिक्षायाश्च पयोरसप्रत्यभिज्ञानेन पयोऽवस्थाविशेषमात्रत्वेन ततोऽर्थान्तरत्वाभावादामिक्षार्थत्वेन दध्यानयनस्य तत्प्रयुक्तत्वावगतेरामिक्षानुनिष्पादित्वे दध्यानयनान्निष्पत्तिरस्ति, न वाजिनस्यामिक्षाप्रयुक्तादपि दध्यानयनान्निष्पत्तिसिद्धेः, दध्यानयनस्य च वाजिनार्थत्वेन प्रमाणाभावान्न दध्यानयनं प्रति वाजिनस्य प्रयोजकत्वेऽर्थापत्तिः प्रभवति। तथावघातस्य यागानुनिष्पादित्वाभावाद्यागवच्च तस्यापि पूर्वपक्षे व्रीहिन्प्रति प्रधान्याविशेषात्, न च यथा च 'सप्तमं पदमध्वर्युरञ्जलिना गृह्णाती'ति। सप्तपदपांसुग्रहणकर्म्मणोऽनुनिष्पादित्वाभावेऽपि क्रयवच्च नयनस्य स्ववाक्यश्रुतेः। सन्निधानात्त्वषड्पदान्यनुनिष्क्रामतीति विहितनयनसाध्यत्वाविशेषेऽपि नयनस्य प्रकृतैकहायनीसंस्कारर्थत्वेन तद्द्वारा क्रयार्थत्वावसायात्, तत्प्रयुक्तत्वावगतेस्तत्प्रयुक्तनयनस्य लाभेनैव पदपांसुग्रहणकर्मणोऽपि नैराकाङ्क्षयात्प्रयोजकत्वाभावः तथावघातस्य यागार्थैर्व्रीहिभिर्नैराकाङ्क्षयस्ववाक्यश्रुतव्रीहिसंयोगेन वाक्यान्तरस्थव्रीह्यनपेक्षत्वादेकदेशद्रव्यत्वं चाप्रयोजकत्वकारणम्, तदुपलक्षितं च निनयनादिवत्प्रतिपत्तित्वमनाशङ्क्यमेव उत्तरार्द्धादादिरादानमिति भावव्युत्पत्त्यादिशब्देनावदानमुक्तम्।

ननु निर्वापोत्तरकालमवघातविधानाद्यागार्थं निरुप्तानामेव व्रीहीणामवघातसाधनत्वावगतेर्यथा पुरोडाशार्थकपालसाधनत्वात्तुषोपवापस्य कपालं प्रत्यप्रयोजकत्वम्, तथावघातस्यापि यागार्थव्रीहिसाध्यत्वाद् व्रीहीन्प्रत्यप्रयोजकत्वं भविष्यतीत्यभिप्रायेणाप्रयोजकत्वं चोद्यमिति सूचयितुं पदकर्मानन्तरमर्थाभिधानकर्मोदाहार्यमपि चरममुदाहृतम्। यागव्रीहीनवहन्तीत्यन्यार्थत्वेनाभिधानाभावान्न तुषोपवापतुल्यतेत्यर्थः। श्लोकार्थमुसंहरति—**तस्मादिति**। ननु यागार्थत्वाभिधानाभावेऽप्युपादानगौरवपरिहाराय यागार्थानामेव व्रीहीणामवघातसाधनत्वावगतेरन्यार्थत्वाभिधानफललाभादप्रयोजकत्वं भविष्यतीत्याशङ्क्याह—**न चास्मिन्निति**। निर्वापस्यापि पूर्वपक्षे यागार्थव्रीहिविषयत्वे प्रमाणाभावान्निर्वापावशिष्टानामपि च व्रीहीणां सन्निधेरुपादानगौरवाभावान्न यागार्थव्रीहिनियमः सम्भवतीत्याशयः।

नन्वाग्नेय्याग्नीध्रमुपतिष्ठत इतिवदप्रकृतोपादाने प्रकृतक्रत्वन्वयलक्षणसामान्यसम्बन्धस्यापि कल्प्यत्वाद्गौरवापत्तेस्तत्परिहारार्थं प्रकृतानामेव व्रीहीणां ग्रहणं युक्तमित्याशङ्कयाह—**चात्रेति**। विशेषाश्रुतेरिमे व्रीहयः क्लृप्तसामान्यसम्बन्धा, नेमइति विशेषाज्ञानादाग्नेयीन्यायानुपपत्तेः, प्रकरणस्यैव विशेषकत्वं वाच्यम्। न च तत्सम्भवति। विनियोगमात्रे तस्य व्यापारादित्याशयः। ननु विनियोगे प्रमाणभूतस्येतिकर्त्तव्यताकाङ्क्षालक्षणस्य प्रकरणस्याविशेषकत्वेऽपि सन्निध्यपरपर्यायाधिकारलक्षणस्य प्रकरणस्य सप्तमपदपांसुग्रहणादौ प्रकृतैकहायन्यादिसम्बन्धित्वाभ्युपगमेन दर्शनात्, तद्वशेन विशेषो भविष्यतीत्याशङ्कयाह—**न चेति**। पदवघातव्रीहिणां साकाङ्क्षात्वाभावान्नैराकङ्क्ष्ये चाधिकारस्य नवमाधिकरणसूत्रे विशेषकत्वनिरासान्नात्र प्रकृतग्रहणे प्रमाणमित्यर्थः। सिद्धान्ते तर्हि कथं प्रकृतग्रहणमित्याशङ्कयाह—**संस्कारेति**। आनर्थक्यपरिहारायाऽपूर्वसाधनविशेषाकाङ्क्षायामधिकादिरादिशेषलाभो युक्त इत्याशयः। तत्रापि व्रीह्यादिशब्दस्यापूर्वसाधनत्वानभिधानत्वानभिधायित्वात् स्ववाच्यलक्षितकर्मलक्षितापूर्वसाधनत्वस्य लक्षणापरम्परयाऽवगतेः क्लेशाभिधानम्। पूर्वपक्षे तु नासौ न्यायोऽस्तीत्याह—**न चेति**।

तथोक्तं प्रयोजनमुपपाद्य, स्वयं प्रयोजनान्तराण्याह—**धर्मेति**। यथौन्दुबरमुलूखलं सर्वौषधस्य पूरयित्वावहन्त्यथैनमुपदधातीत्यवघातस्य तण्डुलसाध्यपुरोडाशादिप्रयोजनाभावात्तण्डुलनिवृत्त्यर्थत्वाभावेनादृष्टार्थत्वात् सकृदनुष्ठानं 'धर्ममात्रे त्वदर्शनात् शब्दार्थेनापवर्गः[1] स्यादि ११-१त्येकादशाधिकरणे वक्ष्यते, तथात्रापि पूर्वपक्षे स्यादित्येवं प्रयोजनम्। यागव्रीहीणां चावघातनियमाभावो द्वितीयम्। सान्नाय्योपांशुयाजाङ्गत्वाविशेषात्तद्विकारेष्वपि प्रयोगस्तृतीयम्। आदिशब्दाद्यवपक्षेऽपि व्रीहीणामेवावघातस्त्रयाणामेव चेति प्रयोजनद्वयम्॥ ८॥

इति तृतीयं तानि द्वैधाधिकरणम्॥

भा० प्र०—पूर्व सूत्रों से प्रधान कर्मों के विषय का निरूपण किया गया है, इस सूत्र से गुणकर्म के विषय का प्रतिपादन किया जा रहा है। 'व्रीहीन् अवहन्ति' 'तण्डुलान् पिनष्टि', इत्यादि स्थलों में व्रीहि एवं तण्डुल का संस्कार करने के लिए ही अवघात एवं पेषण किया जाता है। इसी प्रकार 'यूपम् तक्षति', आह्वनीयमुपदधाति, इत्यादि स्थलों में यूप एवं आह्वनीय द्रव्य के उत्पादन करने के लिए ही अभिलाषा की जाती है। अतः, इन स्थलों में द्रव्य ही प्रधान है और कर्म अप्रधान है—वह द्रव्य का गुणभूत है, इसीलिए प्रकृत में आख्यात अपूर्व का प्रतिपादक नहीं है। आशय यह है कि जो दृष्टार्थक होता है, जिससे फल के रूप में अपूर्व उत्पन्न नहीं होता है—वे गुणकर्म ही होते हैं। इसीलिए 'व्रीहीन् अवहन्ति' 'तण्डुलान् पिनष्टि'. इत्यादि विधिविहित कर्म आदि गुणकर्म है, कारण व्रीहि का अवघात तण्डुल का पेषण आदि करने पर

---

१. शास्त्रार्थेनेति २ पु० पा०।

स्वतन्त्र अपूर्व नहीं होगा, क्योंकि, फल के लिए ही अपूर्व की कल्पना की जाती है, अतः अवघात आदि से तुष विमोचन आदि दृष्ट फल जब प्राप्त हो जाता है तब अपूर्व को इसके फल के रूप में कल्पना करना उचित नहीं है, इसीलिए कहा गया है—

'लभ्यमाने फले दृष्टे नादृष्टपरिकल्पना' दृष्ट फल प्राप्त होने पर न दृष्ट की फल रूप में कल्पना करना उचित नहीं है। किन्तु ऐसा मानकर अववात, पेषण आदि कर्मों का परित्याग करना भी ठीक नहीं है। क्योंकि, अवघातरहित व्रीहिया पेषण-रहित तण्डुल यज्ञीय नहीं होगा, इसलिए इस स्थल में नियम विधि मानी जाती है, यदि अवघात से निष्पन्न व्रीहि के द्वारा एवं पेषण संस्कृत तण्डुल के द्वारा यज्ञ सम्पादित होता है, तब उसके द्वारा यज्ञीय अपूर्व उत्पन्न होने से ही उसके द्वारा यज्ञ सम्पन्न होने पर यज्ञीय अपूर्व उत्पन्न होता है। इसीलिए अवघात या पेषण द्रव्य परतन्त्र होने से व्रीहि आदि द्रव्यों में तुषविमोचनादि दृष्ट फल सम्पादन करने से वह स्वयं स्वतन्त्र अपूर्व का जनक न होने पर भी इस स्थल में 'अवघातेनैव कुर्यात्' अर्थात् अवघात के द्वारा ही तुष विमोचन करे, इस प्रकार नियमविधि स्वीकार करने पर उससे अवान्तर अपूर्व उत्पन्न होता है, इसको नियमापूर्व कहा जाता है, न्यायमाला में कहा गया है 'नियमापूर्वकद्वचः' अर्थात् विधि नियमविधि नियमापूर्वकृत है।

अवघात आदि से अपूर्व उत्पन्न नहीं होता है, तो नियमापूर्व उत्पन्न नहीं होता है—यह विरुद्ध कथन है, ऐसी स्थिति में यह कहा जा सकता है कि नियमापूर्व अवघातादि क्रिया का फल जो तुषविमोचन आदि है।

उनका निष्पादन प्रसङ्ग सिद्ध है। प्रसङ्ग से सिद्ध होने से फल रूप से इनका व्यवहार नहीं हो सकता है, फल के रूप में व्यवहृत न होने से दृष्टिफल के साथ इसका कोई विरोध नहीं है। यदि यह कहा जाय कि इस प्रकार के अपूर्व को नियमापूर्व को न मानने पर भी कार्य चल सकता है। नियमापूर्व नहीं मानने पर अवघातादि में स्वीकृत नियम विधि व्यर्थ हो जायगी, क्योंकि, अवघात करने पर यदि किसी अतिरिक्त अतिशय का उत्पादन नहीं होता है तो अवघात से ही तुषविमोचन करना होगा इसका कौन नियामक होगा? इसलिए, अवघात का फल अपूर्व को मानने पर अवघातजन्य अपूर्व एवं नियमविधिजन्य अपूर्व को मानना होगा, फलतः दो अपूर्वों की कल्पना करनी पड़ेगी। किन्तु मेरे मत में दृष्ट तुषविमोचन आदि ही अवघात का फल होने से अवघातजन्य अपूर्व को नहीं मानना पड़ता है, केवल 'नियमापूर्व ही मानना पड़ता है, यह नियमापूर्व फल नहीं होने से कल्पना-गौरव आदि दोष भी नहीं होता है।

'यैः' = जिन कर्मों से, 'तु' = किन्तु, 'द्रव्यं चिकीर्ष्यते' = द्रव्य का उत्पादन या संस्कार करना अभिप्रेत रहता है, 'तत्र' = उस स्थल में, 'गुणः प्रतीयते' = गुण की प्रतीति होती है, अर्थात् वह गुणकर्म रहता है, 'तस्य द्रव्य प्रधानत्वात्' = क्योंकि वप्र

कर्म द्रव्य प्रधान अर्थात् द्रव्य है प्रधान जिसका होता है, और जिस स्थल में आख्यातयुक्त कर्म द्रव्य का उत्पादन या संस्कार करने के लिए अनुष्ठित होता है, वह गुणकर्म है, क्योंकि, द्रव्य ही उसमें प्रधान है ॥ ८ ॥

तृतीय तानि द्वैधाधिकरणकर्मों का गुणप्रधानभावविभागाधिकरण ।

अथ चतुर्थं सम्मार्गाधिकरणम्

[४] धर्ममात्रे तु कर्म स्यादनिर्वृत्तेः प्रयाजवत् ॥ ९ ॥ पू० ॥

शा० भा०—'स्रुचः संमार्ष्टि, अग्निं संमार्ष्टि, परिधिं संमार्ष्टि, पुरोडाशं पर्यग्निकरोति' इति श्रूयते । तत्र संदेहः किं पर्यग्निकरणं संमार्जनं च प्रधानकर्म, उत गुणकर्मेति । किं तावत्प्राप्तम्? तदुच्यते । कर्ममात्रमेवंजातीयकमपर्याप्तं यत्प्रयोजनस्य दृष्टस्य, तत् धर्ममात्रमिति ब्रूमः । तत्र प्रधानकर्मत्वं स्यात् । कस्मात्? अनिवृत्तेरुपकारस्य । न ह्येवंजातीयकं द्रव्यस्योपकारकम् । द्रव्यं त्वेवंजातीयकमभिनिर्वर्तयद् गुणभूतम् । तस्य गुणभूतत्वात् । इदं प्रधानभूतम् पूर्वं० ॥ ९ ॥

भा० वि०—पूर्वाधिकरणे तानि द्वैधमित्यभिधाय प्रधानगुणकर्मलक्षणद्वयं सूत्रद्वयेनोक्तं तत्र प्रधानकर्मलक्षणस्य सम्मार्गादिविषयेऽति व्याप्तिं गुणकर्मलक्षणस्याव्याप्तिं चाशङ्‍क्यानेन निराक्रियत इति सङ्गतिः । विषयमाह—**स्रुच इत्यादिना** । तत्र द्वितीयास्साध्यवाचित्यमेवाथ साधनवाचित्वमपीत्यनवधारणात्संशयमाह—**तत्रेति** । अर्थं कर्मेति । अदृष्टरूपार्थकर्मेत्यर्थः । सूत्रं व्याकुर्वन् प्रश्नपूर्वकं पूर्वपक्षमाह—**किमित्यादिना** । एवं जातीयके सम्मार्गादिरूपे धर्ममात्रे प्रधानकर्मस्यादिति सम्बन्धः । मात्रशब्दार्थमाह—**अपर्याप्तमिति** । अनिर्वृत्तेरितिभागं प्रधानकर्मत्वे हेतुत्वेन व्याचष्टे—**अनिर्वृत्तेरिति** । उपकारकमिति । दृष्टोपकारजनकमित्यर्थः । द्रव्यस्य तु कर्मनिर्वृत्तिलक्षणोपकारजनकत्वादस्ति तद्गुणत्वमिति । तुशब्दार्थमाह—**द्रव्यं त्विति** । तत किमित्याह—**तस्येति** । इदमिति संमार्ज्जनादिकर्म, एवं च दृष्टोपकारजनकत्वस्य गुणकर्मलक्षणस्य सम्मार्गादावव्याप्तिः । तदजनकत्वस्य प्रधानकर्मलक्षणस्यातिव्याप्तिश्च स्फुटैवेतिभावः ॥ ९ ॥

त० वा०—स्रुक्परिध्यग्निपुरोडाशसंमार्गाणामुत्तरोत्तरप्रधानप्रत्यासत्तिभेदेनोदाहरणपृथक्त्वम् । एतदुक्तं भवति—

दूरेणापि प्रधानानां यद् द्रव्यमुपकारकम् ।
तेनापि कर्मसम्बन्धान्न प्राधान्यं प्रपद्यते ॥

तत्र पूर्वपक्षवादी पूर्वोक्तेनैव 'यैर्द्रव्यं न चिकीर्ष्यते' इत्यनेन प्रधानकर्मलक्षणेनाऽऽह—द्रव्येण निष्पादितं कर्म न किंचित्तस्य प्रत्युपकुर्वद् दृश्यते। तस्मात्प्रधानकर्म संसार्गप्रोक्षणादीति ॥ ९ ॥

॥ अथ चतुर्थं संमार्गाधिकरणम् ॥ ४ ॥

न्या० सु०—उदाहरणबहुत्वस्य प्रयोजनमाह—स्रुगिति। संमार्ग-पर्यग्निकरण-समुदायभूम्ना संमार्गशब्दः। अग्निजुह्वोर्द्व्यवदानद्वारप्रधानान्वयतुल्यत्वेऽपि स्रुगन्तरविषयो विप्रकर्षोऽभिमतः। द्व्यवदानस्याग्निसम्बन्धापादनद्वारा च प्रधानसाधनत्वात् जुह्वा अप्यग्न्यपेक्षया विप्रकर्षः सम्भवति। उपभृतः प्रयाजानुयाजार्थाज्याधारत्वेऽपि प्रधानहविराधारत्वाभावात् ध्रुवायाश्चोपांशुयाजार्थाज्याधारत्वेऽप्यसाधारण्याभावात्प्रधानकालविप्रकर्षाच्च प्रधानविप्रकर्षः। परिधीनां जुहूतुल्याग्निपरिधानार्थत्वेऽपि प्रक्षिप्यमाणहविर्बहिःपतनप्रतिबन्धकत्वेन प्रधानकालोपयोगित्वात् हविरग्न्यन्वयान्तरितप्रधानकालजुह्वपेक्षया प्रधानप्रत्यासत्तिः। स्रुगन्तरापेक्षया तु स्पष्टैव पुरोडाशस्य त्याज्यत्वात् त्याज्यद्व्यवदानसमवायित्वाद्वान्यतः प्रत्यासत्तिः। ननु प्रत्यासत्तिविशेषसूचनस्य किं प्रयोजनमित्याशङ्क्य प्रातिलोम्येन सिद्धान्तोपयोगमाह—**एतदिति**। किं तावत्प्रासमित्यादिपूर्वपक्षभाष्यमुपकारलक्षणशेषत्वाभावेन तदभावमात्रस्य प्रधानकर्मत्वानापादकत्वादयुक्तमाशङ्क्योपपादयति—**तत्रेति**।

यद्यप्युपकारलक्षणशेषत्वाभावात्कुतोऽपूर्वं नेति भाष्याच्चादृष्टार्थकर्मलक्षणमिदम्, न प्रधानलक्षणमिति वस्तुतोऽवसीयते। तथापि यथाश्रुतात् सूत्रात्प्रधानकर्मलक्षणं मत्वा पूर्वपक्ष इत्यर्थः। अनेन च प्रधानकर्मलक्षणापवादार्थताऽस्याधिकरणस्योक्ता। एवं चापवादत्वेन सङ्गतिसिद्धयर्थमेव तान्यदृष्टार्थानीति वक्तव्ये तानि प्रधानभूतानीत्यभिधानात् सूत्रानुपालम्भः। सिद्धान्ते वा संमार्गादेरप्यदृष्टद्रव्योपकारजनकत्वाभ्युपगमाद्यथाश्रुतमपि लक्षणसूत्रद्वयमविरुद्धम्। तदा त्वेतदधिकरणस्य गुणकर्मत्वाभिधानप्रयोजनापूर्वाभावापवादाद् गुणकर्मलक्षणस्यैवापवादार्थत्वम्। उत्तरेण तु गुणकर्मतैवस्यैवापवदिष्यते। अत एव तदपवादापवादार्थमेतदधिकरणद्वयमेतदिति तच्छब्देनानन्तर्यविशेषात्प्रधानत्वलक्षणं परामृश्य, तदपवादस्य गुणत्वलक्षणस्यापवादार्थमित्येवं व्याख्यातम्। वक्ष्यमाणगुणकर्मत्वापवादादुपचारतो लक्षणापवादाभिधानम्।

यदा तु सम्मार्गादिसाध्यस्यादृष्टोपकारस्यावान्तरद्वारत्वाभावान्नापूर्वशब्दवाच्यतेष्यते तदा गुणकर्मस्वदृष्टार्थेष्वप्यपूर्वाभावाद् गुणकर्मलक्षणद्रव्योपकारत्वस्य सम्मार्गादावपवादमभावमव्यापकत्वमाशङ्क्य व्यापकत्वसिद्धये तदपवादार्थमेतदधिकरणम्। उत्तरं तु स्तुतशस्त्रयोर्गुणकर्मत्वाभावेऽप्युपकारकत्वसद्भावादतिव्यापकत्वाभिधानेनापवादार्थमित्यध्यायार्थानुक्रमणवार्तिकं व्याख्येयम्। अस्मिंस्तु व्याख्याद्वये[1] नास्याधि-

---

१. व्याख्याके इति २ पु० पा०।

करणस्य प्रधानकर्मलक्षणापवादार्थत्वाभिधानार्थं यैर्द्रव्यं न चिकीर्ष्यत इत्यनेन प्रधान-कर्मलक्षणेनाहेत्युक्तम्, किं तु पूर्वपक्षबीजप्रदर्शनार्थं किमाहेत्यपेक्षायां सङ्क्षेपतः पूर्व-पक्षार्थमाह—**द्रव्येणेति**। कर्मणोऽनुपकारित्वाद् गुणत्वाभावेऽप्युपकार्यत्वस्याप्यभावा-त्प्राधान्यमपि न स्यादित्याशङ्कानिरासार्थत्वेन, द्रव्यं त्वेवंजातीयकमदृष्टार्थं कर्माभि-र्निर्वर्त्तयत्तत्प्रतिगुणभूतमित्येवं भाष्यावयवं व्याख्यातुम्—**द्रव्येणेत्युक्तम्**। द्वितीयाया गुणकर्मत्वप्रामाण्यासम्भवमभिप्रेत्य तदन्यथानुपपत्तिकल्प्यादृष्टोपकारायोगाद् दृष्ट एवोपकारो वाच्यो। न चासावस्तीति न—**दृश्यत इत्युक्तम्**॥ ९॥

भा० प्र०—पूर्व अधिकरणों में 'यैस्तु द्रव्यं चिकीर्ष्यते' इत्यादि सूत्रों में कहा गया है कि 'अवघात' आदि गुणकर्म हैं क्योंकि, उससे अपूर्व नहीं होता है, इस प्रसङ्ग में उसी का व्यतिक्रम दिखाकर पूर्वपक्ष किया जा रहा है, श्रुति में कहा गया है कि 'स्रुचः समार्ष्टि', पुरोडाशं पार्यग्नी करोति' (तै० ब्रा० ३–३–१) अर्थात् स्रुक् का होम करने के लिए पात्र विशेष का, सम्मार्ग = कुश के द्वारा झाड़ू करें, पुरोडाश का पर्य्यग्निकरण = अग्नि के द्वारा संस्कार विशेष करें, इत्यादि वाक्य में जो सम्मार्ग आदि कर्म विहित होते हैं, वे प्रधान कर्म हैं, क्योंकि, उनको गुणकर्म मानने पर व्रीहि के अवघात के समान इसका भी कोई दृष्ट फल रहता, क्योंकि, जिसका दृष्ट फल नहीं रहता है, वह अदृष्टार्थक अर्थात् जिससे अपूर्व उत्पन्न होता है, वह प्रधान कर्म है यहाँ पूर्व अधिकरण के द्वारा निश्चित है, अतः, तुष विमोचन जैसे अवघात का दृष्ट फल है, वैसे ही इस स्थल में सम्मार्ग आदि कोई दृष्ट फल नहीं है, इसलिए, यह प्रधान कर्म है।

अग्नि के चारो ओर प्रदक्षिणा रूप में अङ्गार का परिभ्रमण पर्यग्नीकरण है, पुरोडाश का पर्यग्नीकरण = पुरोडाश के चारो ओर अंगारे को प्रदक्षिणा के समान दाहिनी ओर से चारो ओर घुमाना है।

जुहू उपभृत् और ध्रुवा नामक तीन स्रुचो का सम्मार्जन अर्थात् कुश की मुट्ठी को मध्य से मोड़कर, दोनों भागों को बराबर करने के लिए कुशमुष्टि का लम्बित तृण अंश को काट दिया जाता है, आगे के भाग को समान करने पर अलग हुआ तृणों से स्रुचों के मूल से अग्रभाग पर्यन्त ऊपर का भाग और मुख भाग से मूलपर्यन्त नीचे के भाग का सम्मार्जन किया जाता है। दृष्ट प्रयोजन के लिए अपर्याप्त का केवल अदृष्ट प्रयोजन माना जाता है। इसी दृष्टि से यहाँ शङ्का की जाती है।

'धर्ममात्रे' = जो कर्म केवल अदृष्टार्थक है उनमें, अर्थात् जो धर्म सम्मार्ग आदि संस्कार दृष्टार्थशून्य है उनमें 'तु' = आशङ्का अर्थ में, 'कर्मस्यात्' = कर्म अर्थात् प्रधान कर्म होगा, 'अनिर्वृत्तेः' = क्योंकि उनसे दृष्ट फल निष्पन्न नहीं होता है, 'प्रयाजवत्' = प्रयाज के समान, जैसे प्रयाज आदि दृष्ट उपकारक न होने से इसको प्रधान कर्म माना

जाता है, वैसे ही सम्मार्ग आदि कर्म भी दृष्ट उपकारक नहीं है, अतः ये भी प्रधान कर्म होंगे ॥ ९ ॥

तुल्यश्रुतित्वाद्वेतरैः सधर्म स्यात् ॥ १० सि० ॥

शा० भा०—वाशब्दः पक्षं व्यावर्तयति। इतरैर्गुणकर्मभिः सधर्म। स्यादेवंजातीयकः[1]। यथा व्रीहीनवहन्ति[2] तथा। कुतः? तुल्यश्रुतित्वात्। तुल्या हि द्वितीयाश्रुतिरेषां द्रव्येषु। यथा व्रीहीनवहन्ति इति। एवम्, अग्निं संमार्ष्टि, पुरोडाशं पर्यग्निकरोति इति। किं गुणकर्मणि[3] द्रव्ये द्वितीया दृष्टेति। यतो[4] द्वितीयादर्शनादिहापि सामान्यतो दृष्टेन गुणकर्मता। नेति ब्रूमः। द्वितीया विभक्तिः कर्तुरीप्सिततमे स्मर्यते। सा चेह द्वितीया विभक्तिः। तत[5] एव तदप्सिततममिति गम्यते तच्चेदीप्सिततमम्, कर्म गुणभूतम्। यद्यपि प्रत्यक्षादिभिर्गुणभावो न गम्यते, प्रमाणान्तरेण शब्देन[6] गम्यते। तस्माद् गुणभूतमेवंजातीयकमिति ॥ १० ॥ क सिद्धान्तः ॥ ३ ॥

भा० वि०—सिद्धान्तसूत्रमादाय व्याचष्टे—**वाशब्द इति**। समानो धर्मो यस्य तत्सधर्मेति विग्रहः। एतद्विवृणोति—**यथेति**। यथा अवहन्तीति गुणकर्म तथैवंजातीयकमपीत्यर्थः। दृष्टोपकाराभावे कथं गुणकर्मत्वमिति पृच्छति—**कुत इति**। उत्तरत्वेन सूत्रावयवं व्याचष्टे—**तुल्येति**। एषामिति। कर्मणां सम्बन्धिषु द्रव्येष्विति यावत्। तुल्यत्वं दर्शयति—**यथेति**।

ननु क्वचिद्गुणकर्माणि विवक्षिते व्रीह्यादिद्रव्ये द्वितीया दृष्टेत्येतावन्मात्रेण न गुणकर्मता द्वितीयास्सवतूनित्यादौ गुणकर्मव्यभिचारादिति **चोदयति**—**किमिति**। न सामान्यतो दृष्टमात्रेणेति परिहरति—**नेति**। कुतस्तर्हीत्यत आह—**द्वितीयेति**। इहेति। संमार्गादिसम्बन्धिन्यग्न्यादिद्रव्य इत्यर्थः। भवतु द्रव्यमीप्सिततमं कर्मणस्तत्किमायातमत आह—**तच्चेदिति**। ईप्सिततमत्वेन द्रव्यस्य प्राधान्ये कर्मणो गुणकर्मभावनियमादित्यर्थः।

ननु दृष्टोपकारजनकस्यैव गुणकर्मत्वदर्शनात् कथमतथाभूतस्य सम्मार्गादेस्तथात्वमत आह—**यद्यपीति**। गुणभावशब्देनाङ्गत्ववाचिना तद्धेतुमुपकारं लक्षयति—दृष्टोपकाराभावेऽपि अग्नीनसम्मार्ष्टीत्यादि द्वितीयाश्रुत्यवगतकर्मत्वानुपपत्तेरदृष्टोपकारः कल्प्यत इत्यर्थः सूत्रार्थमुपसंहरति—**तस्मादिति** ॥ १० ॥

---

१. ब. जातीयकं। २. ब.हंतीति तथा।
३. ब. गुणकर्मणि द्वितीया।
४. ब. अतो। ५. ब. तेनैददीप्सित ?
६. ब. शब्देनावगम्यते।

त० वा०—नैव ह्येतद् गुणकर्मलक्षणं यद् द्रव्यचिकीर्षा नाम, उपकारलक्षण-शेषत्वप्रतिषेधात्। तादर्थ्यलक्षणं हि श्रुत्यादिप्रमाणकं तत्, न प्रत्यक्षाद्युपकार-निमित्तमिति वक्ष्यामः। किमर्थं तर्हि द्रव्यचिकीर्षोपन्यस्ता। तदुच्यते—

अन्यतः सिद्धशेषाणां येषां दृष्टोपकारिता।
तेषां नापूर्वमस्तीति हन्त्यादीनामुदाहृतिः॥

यत्र द्रव्यचिकीर्षया गुणभावस्तत्र नापूर्वभेदः प्रतिपत्तव्य इति यावत्। पूर्व-पक्षवादी त्वेतदेव गुणकर्मलक्षणं मत्वा संमार्गादिषु तदपश्यन्प्रत्यवस्थितवान्। सिद्धान्ताभिप्रायस्तु सर्वत्र श्रुत्यादिभिरवधृते तादर्थ्ये पश्चादुपकारकदर्शनं तद-भावे[1]ऽदृष्टकल्पनं वा। तत्रेप्सिततमत्ववाचिन्या द्वितीयया द्रव्यप्राधान्यद्वारेण क्रियाशेषत्वे प्रतिपादिते हन्त्यादीनां दृष्टार्थत्वान्नैराकाङ्क्ष्यं जातं न तु संमार्गादी-नामित्यदृष्टार्थता, न च तावता पूर्वावगतशेषत्वहानिः॥ १०॥

न्या० सु०—नन्ववघातादिषूक्तस्य गुणकर्मलक्षणस्येहाभावात्तत्साधर्म्याभिधानम-युक्तमित्याशङ्क्याह—**नैव हीति**। यस्मान्नैतल्लक्षणम्, तस्माद् गुणकर्मत्वप्रमाण-द्वितीयातुल्यत्वात्साधर्म्याभिधानं युक्तमिति हिशब्दार्थः। पूर्वोक्तलक्षणत्यागे हेतुमाह—**उपकारेति**। तथा सति को विरोध इत्याशङ्क्याह—**तादर्थ्येति**। प्रत्यक्षं यजतइत्यादि-भिर्द्रव्यं न चिकीर्ष्यत इति भाष्यात्प्रत्यक्षगम्यस्योपकारस्य लक्षणतोक्ता भाति। सा च तृतीये निषेत्स्यमानत्वाद्विरुद्ध्येतेति—**श्रुत्यादीत्यनेनोक्तम्**। न प्रत्यक्षाद्देर्ज्ञापकत्वेन निमित्तत्वम्, नाप्युपकारस्य कारकत्वेनेत्यर्थः। लक्षणत्वाभावे किमुपन्यासप्रयोजनमिति प्रश्नपूर्वकमाह—**किमर्थं तर्हीति**। अपूर्वाभावोपयोगि तल्लक्षणं न स्वातन्त्र्येणेत्याशयः।

श्लोकं व्याचष्टे—**यत्रेति**। पूर्वपक्षस्तर्हि न सम्भवतीत्याशङ्क्याह—**पूर्वपक्षेति**। द्वितीयाप्रमाणकगुणकर्मत्वायोगादेतल्लक्षणाधीनत्वमापाद्य पूर्वपक्ष इति भावः। अव-घातादौ द्रव्ये द्वितीयाया गुणकर्मत्वेन व्याप्तिः सधर्मशब्देनोक्तेति भ्रान्त्या अनैकान्ति-कत्वादिदोषदुष्टत्वान्नेह सामान्यतोदृष्टं सम्भवतीति, किं गुणकर्मणीति प्रश्नद्वाराशङ्कि-तेनेति। ब्रूम इति भाष्येणेप्सिततमाख्यप्राधान्यवाचित्वस्मृतेः। प्रतियोगिनः कर्मणो गुणत्वावगतिरिति परिहृत्य—**यद्यपीत्युक्तम्**। तदुक्तार्थत्वात्प्रत्यक्षाद्यगृहीतेऽर्थे शब्द-प्रामाण्यशङ्कायाश्च प्रागेव निरस्तत्वेनासम्भवादनर्थकमाशङ्क्योपकारं विना विहितस्य कर्मणोऽङ्गत्वापरपर्यायगुणत्वानुपपत्तिशङ्कानिरार्थत्वेनोपकारं लक्षणया गुणभावशब्देनोक्ता प्रत्यक्षगम्योपकाराभावेऽपि शब्दावगताङ्गत्वान्यथानुपपत्त्योपकारकत्वकल्पनं भविष्यतीति प्रतिपादनार्थत्वेनार्थवदिति सूचयितुमाह—**सिद्धान्तेति**। पश्चादुपकारापेक्षायां दर्शनं कल्पनं वा भविष्यतीत्यर्थः। एवं चोपकारकत्वस्याप्यव्याप्तिः परिहृता एतदेव व्याचष्टे—**तत्रेति**॥ १०॥

---

१. क. तदभावादृष्ट।

भा० प्र०—इस सूत्र में शब्द का प्रयोग है इसके द्वारा पूर्वपक्ष की व्यावृत्ति होती है। पूर्व सूत्र के द्वारा सम्मार्ग आदि की दृष्ट उपकारता न होने से इसको अदृष्टार्थक मानना चाहिए—यह आशङ्का की गई है। इसके उत्तर में कहा जा रहा है 'इतरैः सधर्मः स्यात्' दूसरे का समान धर्मा अर्थात् व्रीहिगत अवघात के समान ही यह भी गुणभूत ही होगा। 'व्रीहीन् अवहन्ति' इस स्थल में जिस प्रकार अवघात प्रधान नहीं है, किन्तु व्रीहि ही प्रधान है, वैसे ही 'स्रुचः संमर्ष्टि' इस स्थल में सम्मार्ग प्रधान नहीं है, अपितु स्रुक् ही प्रधान है। क्योंकि तुल्य श्रुति होने से ('तुल्यश्रुतित्वात्') क्योंकि व्रीहीन् इसमें जैसे द्वितीया विभक्ति है, वैसे ही 'स्रुचः' इस पद में भी द्वितीया विभक्ति है। द्वितीया विभक्ति कर्मकारक होती है, कर्ता का जो ईप्सिततम होता है, अर्थात् सबकी अपेक्षा अधिक अभिप्रेत होता है, वही कर्म होता है, कर्म ईप्सिततम् होने से ही प्रधान है, इसलिए इस स्थल में 'स्रुक्' ही प्रधान है और सम्मार्ग उसका गुण है। फलतः सम्मार्ग गुणकर्म है।

'तुल्यश्रुतित्वात्' = क्योंकि तुल्यश्रुति अर्थात् अवघातीय व्रीहि के समान ही यहाँ समान विभक्ति है, 'वा' = पूर्वपक्ष का निवारक है, 'इतरैः सधर्मः' = दूसरे के अर्थात् अवघात आदि का सधर्म अर्थात् समान 'स्यात्' = होगा। 'व्रीहीन् अवहन्ति' इत्यादि के समान 'स्रुचः सम्मार्ष्टि' = इत्यादि की विभक्ति के समान विभक्ति होने से उसी के समान होगा अर्थात् गुणकर्म होगा ॥ १०॥

द्रव्योपदेश इति चेत् ॥ ११ ॥

शा० भा०—इति चेत्पश्यसि द्वितीयादर्शनात्प्रधानभूतमत्र द्रव्यमिति। नैतदेवम्। गुणभूतेऽपि द्वितीया भवति। तथा हि दृश्यते सक्तूञ्जुहोति, मारुतं[1] जुहोति, एककपालं जुहोति इति ॥ ११ ॥ आशङ्का ॥ १ ॥

भा० वि०—पूर्वपक्षाभिप्रायप्रदर्शनार्थत्वेन सूत्रं व्याचष्टे—**इति चेदित्यादिना**। इतिशब्दार्थमाह—**द्वितीयेति**। एतद्दूषयति—**नैतदिति**। हेतुत्वेन द्रव्योपदेश इति भागं व्याचष्टे—**गुणभूतेऽपीति**। यदीप्सिततमार्थत्वमेव द्वितीयायाः भवेत् भवेदेवं नत्वेतदस्ति गुणभूतेष्वपि सक्तुषु प्रयोगात्, न च स्मृतिवशान्नियमः प्रयोगविरोधे तन्मूलायास्तस्या दुर्बलत्वादित्यभिसन्धिः ॥ ११ ॥

त० वा०—परस्त्वाह—

अन्वयव्यतिरेकाभ्यामुपकारानुसारिता।
शेषत्वस्य द्वितीया तु प्राधान्यव्यभिचारिणी ॥

तन्नाम प्रमाणं युक्तं यदैकान्तिकी[2] च प्राधान्ये द्वितीया, गुणभूतद्रव्योपदेशेऽपि दृष्टत्वात् 'सक्तून् जुहोति' इति। तथा 'प्रयाजशेषेण हवींष्यभिघारयति'

१. ब. मारुतान्। २. क. यदैकान्तिकम् इत्यधिकम्।

इत्यन्तरेणापि द्वितीयामाज्यप्राधान्यं दृष्टम्। अतो 'व्रीहीनवहन्ति' इत्यत्रोभयसम्भवेऽप्युपकारदर्शनकृतमेव द्रव्यप्राधान्यं न द्वितीयाकृतम्। न च तत्संमार्गप्रोषणादिष्वस्तीतीहापि द्वितीयया द्रव्यमेवोपदिश्यतामिति ॥ ११ ॥

न्या० सु०—पूर्वपक्षाभिप्रायविवरणार्थत्वेन सूत्रं व्याचष्टे—**परस्त्विति**। श्लोकं व्याचष्टे—**तन्नामेति**। उपदेशान्यथानुपपत्तिलभ्यगुणभूतत्वविशेषणं गुणभूतेऽपीति भाष्योक्तं दर्शयितु—**गुणभूतेत्युक्तम्**। भाष्योक्तमन्वयव्यभिचारोदाहरणं दर्शयित्वा, स्वयं व्यतिरेकव्यभिचारोदाहरणम्—**तथेत्यनेनोक्तम्**। हविषामभिधारणाधारत्वेऽपि आधारनियमजन्यसंस्कारभाक्त्वेन प्राधान्यस्यापि विवक्षितत्वादन्वयाव्यभिचारादनुदाहरणत्वम्। व्यभिचाराभिधानस्य प्रकृतोपयोगमाह—**अत इति**। सत्यामपि द्वितीयायामित्यर्थः ॥ ११ ॥

भा० प्र०—द्वितीया विभक्ति होने से स्रुक् ही प्रधान है, पूर्वपक्षी इसका व्यतिक्रम प्रदर्शित करते हैं। शास्त्रों में उपदिष्ट है कि शक्तून् जुहोति सत्तु को अग्नि में छोड़ता है, 'मारुतान् जुहोति' = मरुत देवता सम्बन्धी पुरोडाश को अग्नि में छोड़ता है आदि स्थलों में शक्तु में द्वितीया विभक्ति होने पर भी वह प्रधान नहीं है वरन् होम ही प्रधान है, 'स्रुचः सम्मार्ष्टि' इस स्थल में भी वैसा ही होगा।

'द्रव्योपदेशः' = गुण रूप में भी 'कर्मकारक में द्रव्य का उपदेश इष्ट होता है, 'इति चेत्' = यदि यह कहा जाय। पूर्वपक्षी ने आशङ्का की है कि यदि यह कहें कि किसी-किसी स्थल में कर्मकारक में प्रयुक्त द्रव्य का भी तो उपदेश = विधि है और वह प्रधान नहीं है ॥ ११ ॥

न तदर्थत्वाल्लोकवत्तस्य च शेषभूतत्वात् ॥ १२ ॥

शा० भा०—न गुणभूतेऽपि द्वितीया। एवं ह्यभियुक्ता उपदिशन्ति-कर्मणि-द्वितीया, कर्तुरीप्सिततमं कर्म इति। न च लोके गुणभूते क्वचिद् द्वितीयां पश्यामः। यदपि च तण्डुलानोदनं पचेति, ओदनार्थं तण्डुलान् संस्कुर्वितीप्सिता एव तण्डुलाः। बल्वजान् शिखण्डकान् कुर्विति। बल्वजा एव तेनाऽऽकारेण संबद्धा ईप्सिता इति तत्राभिप्रायः। लौकिकश्च प्रयोगः शब्दार्थपरिच्छेदे हेतुः न वैदिकः। या लौकिके जुहोतीति प्रयोगे द्वितीया, शक्यते तत्र वक्तुमीप्सिततम एव स प्रयोग इति तण्डुलानद्य जुहुधि, तण्डुलानद्य[1] होमेन संबन्धयेति। लोके भवति हि बहुप्रकारा विवक्षा। अन्यायश्चाऽनेकार्थत्वम्। तेन प्रधानभावेन सिद्धा सती द्वितीया गुणभावेन कल्प्येत[2]। वेदे तु कथं द्वितीयानिर्दिष्टे गुणभाव इति ?

---

१. ब. तंडुलान्होमेन। २. ब. कल्पते।

द्वितीयानिर्देशात्प्राधान्यमेवावगच्छामः । एवमवगते प्राधान्ये बलीयसा हेतुना नास्ति प्राधान्यमित्यवगम्यते । कुतः ? न होमस्य केनचित्प्रकारेण सक्त्वर्थताऽवकल्पते । कुतः ? सक्तूनां निष्प्रयोजनत्वात् । न सक्तूनामन्यत्प्रयोजनं दृश्यते[1] श्रूयते वा । यदि[2] वा होमस्तदर्थो होमोऽपि निष्प्रयोजनः । अथाऽऽरादुपकारको होमस्ततः प्रयोजनवान् । ज्योतिष्टोमप्रकरणे पाठाद् गम्यते प्रयोजनवत्ता[4], नाप्रयोजन इति शक्यते वक्तुम् । प्रयोगवचनेन हि स आकाङ्क्ष्यते । ननु सक्तूनामपि प्रकरणपाठात्प्रयोजनत्वं भविष्यति । को वा ब्रूते–नेति प्रयोजनवत्त्वं[5] । प्रयोजनवत्त्वन्तु होमसभिनिर्वर्तयतां नान्येन प्रकारेण । ननु तेऽपि प्रयोगवचनेनाऽऽकाङ्क्ष्यन्ते । तदुच्यते । न द्रव्यं तेनाऽऽकाङ्क्ष्यते । इतिकर्तव्यतां हि स[6] आकाङ्क्षति । होमश्चेतिकर्तव्यता, न द्रव्यम् । ननु होमे कृते सक्तुभ्योऽदृष्टं निष्पत्स्यते । नास्त्यत्र प्रमाणम् ।

ननु द्वितीया विभक्तिः प्रमाणम् । न हि । द्वितीयाविभक्तिर्होमस्य सक्त्वर्थतां ज्ञापयति । न सक्तवः प्रयोजनवन्त इति । भवेद्धोमः सक्त्वर्थः होमसंबद्धाः सक्तवः स्युरिति । भवन्ति होमे कृते सक्तवो होमसंबद्धा । न होमस्य सक्त्वर्थता निष्प्रयोजनेषु सक्तुषु घटते । सक्त्वर्थतावचनं तु न पुरुषस्योपकारकम् न क्रतोः । तदनर्थकमेव स्यात् । न[7] च तद्वचनाच्छक्यमन्यत्कल्पयितुम्[8] । स एव[9] द्वितीयान्तः सक्तूनां होमस्य च संबन्धं करोति । संबन्धे च सति 'द्रव्याणां कर्मसंयोगे गुणत्वेनाभिसंबन्ध' इति[10] भूतत्वाद्, गुणभावे च तृतीया । तेनोच्यते 'तृतीयायाः स्थाने द्वितीयेत्यवगम्यते । तेन तदर्थत्वाद्धोमार्थत्वात् सक्तूनां न प्राधान्यं द्वितीयासंयोगेऽपि । एवं सत्यर्थवद्वचनम् । न चार्थवत्त्वे सत्यानर्थक्यामित्युच्यते । तस्य पुरोडाशादेर्यागादिषु शेषभावाः, तेन प्रयोजनवन्तः । तत्र संस्कारो नानर्थकः । न स दृष्टोपकारायेति चेत् । अदृष्टार्थो[11] भविष्यति । अदृष्टोऽपि संस्कारोऽस्तीत्यवगम्यते लोके, यथा ग्रामान्तरादागतानां पुरुषाणां पर्यग्निकरणेनादृष्ट उपकारः क्रियत इत्यवगम्यते । लोके च नानुपपत्तिः ।

प्रयोजनविचारः

प्रयोजनं च । वरुणप्रघासेषु श्रूयते 'शमीमय्यः स्रुचो भवन्ति, हिरण्मय्यो वा' इति । प्रकृतौ नानावृक्षस्रुक्संमार्गसाध्यमपूर्वमिति नानवृक्षस्रुच उत्पादयि-

---

१. ब. क. श्रूयत नास्ति ।
२. ब. याद होमः ।
३. ब. स्यात् इत्यधिकम् ।
४. ब. तेन इत्यधिकम् ।
५. ब. प्रयोजनवंत एव ।
६. ब. तदाकांक्षति ।
७. ब. संबंधोद्रव्यस्यगुण ।
८. ब. अदृष्टो ।
९. क. यतोनतद्वचना ।
१०. क, मन्यतरत् ।
११. क. एष ।

तव्याः संमार्गार्थत्वेन यथा पूर्वपक्षः। यथा तर्हि सिद्धान्तः, शमीमय्य एव हि हिरण्मय्यो वा संमार्ष्टव्याः। तथा यत्र बाणवन्तः परिधयः तत्रापि पालाशा उत्पादयितव्याः पूर्वपक्षे। सिद्धान्ते बाणवन्त एव संमार्ष्टव्याः। अवभृथे च पूर्वपक्षे उत्पादयितव्योऽग्निः, संमार्गाय, सिद्धान्ते चाऽऽपः संमार्जनीयाः। यथा षट्त्रिंशत्संवत्सरे शाक्त्यानामयने तरसमयाः[1] पुरोडाशाः सवनीया[2] इति श्रूयते। तत्रापि पिष्टमयः पुरोडाश उत्पादयितव्यः पर्यग्निकरणार्थत्वेन पूर्वपक्षे। सिद्धान्ते मांसमया एव पर्यग्निकर्तव्या इति ॥ १२ ॥

इति चतुर्थं संमार्जनाधिकरणम् ॥ ४ ॥

भा० वि०—सिद्धान्ताभिप्रायदर्शनार्थं न तदर्थत्वादित्यादिसूत्रम्, तत्र नञर्थमाह—**न गुणभूत इति**।

ननु तत्रापि प्रयोगदर्शनात् कथमियं प्रतिज्ञेति, तत्राह—**एवं हीति**। प्रयोगस्याचाररूपस्य स्मृतिविरोधे दौर्बल्यस्य पूर्वमेव स्थितत्वान्न प्रयोगबलादर्थनिश्चयः न निर्मूलतया स्मृत्यप्रामाण्यम्। पटंकरोति व्रीहीनवहन्ति इत्यादि दृढप्रयोगमूलत्वादित्याशयः। गुणभूते प्रयोगमभ्युपगम्य स्मृतिविरोधादप्रामाण्यमुक्तम् इदानीं प्रयोग एवासिद्ध इत्याह—**नचेति**।

ननु लोकेऽपि क्वचिद्दृश्यत एव गुणभूते द्वितीया तत्राह—**यदपि चेति**। इतिशब्दादूर्ध्वं तत्रापीति पूरणीयम्, करणभूतेष्वपि तण्डुलादिषु ओदनादिगतमीप्सितत्वं विवक्षित्वा द्वितीयाप्रयोग इत्यर्थः।—**बल्वजानिति**। यदपि च बल्वजानिति पठितव्यम्। अभिप्राय इति। प्रयोक्तुः।

ननु गुणभूते लौकिकः प्रयोगः प्राधान्यविवक्षया भवतु, वैदिकस्तु गुणभावविवक्षयैव स्यान्नेत्याह—**लौकिक इति**। ननु तर्हि लौकिक एव तण्डुलैर्जुहुधीति वक्तव्ये तण्डुलान् जुहुधीति प्रयोगाद्गुणभावार्थत्वं द्वितीयाया अत आह—**यत्रेति**। कथमीप्सितविषयत्वं तत्राह—**तण्डुलानिति**। तत्र हि वीर्यकामस्तण्डुलैर्जुहोतीति वचनाद् या पत्युरात्मनो वा वीर्यं कामयते तस्यास्तण्डुलप्राधान्यविवक्षा युक्तैवेत्याशयः। एवं प्राधान्यांशविवक्षया गुणभूते प्रयोगोपपत्तेर्गुणभावो द्वितीयार्थः इत्युक्तं माभूत् प्राधान्यांशः गुणभूतेऽपि लक्षणया प्रयोगोपपत्तेर्न शक्तिकल्पनायुक्तेत्याह—**भवति हीति**। बहुप्रकारा गौणलाक्षणिकादिविषयत्वेन बहुप्रकारेत्यर्थः।

ननु किमिति प्राधान्यांशविवक्षया लक्षणया वा गुणभूते प्रयोगः कल्प्यते गुणभावाभिधायित्वमेव द्वितीयायाः किं न स्यादत आह—**अन्यायश्चेति**।

---

१. ब. तरसाः। २. ब. सवनीयाभवेतीति।

अस्तु तर्ह्यनेकार्थत्वपरिहाराय गुणभाव एव द्वितीयार्थ इत्याशङ्क्य दृढप्रयोगानुगृहीत स्मृतिविरोधात् मैवमित्याह – **तेनेति** ।

ननु लोकवद्वेदे वक्त्रभावेन वैवक्षिकप्राधान्यायोगात् सक्त्वादेश्च वास्तवप्राधान्याभावाद्गुणवाचित्वस्याप्यभावे द्वितीयैव न स्यादिति शङ्कते—**वेदेत्विति** । तत्राप्युत्सर्गतः प्राधान्यमेव द्वितीया वदति न गुणभावमिति परिहरति—**द्वितीयेति** । कथं तर्हि सक्तूनां गुणभावोपगमस्तत्राह—**एवमिति** । कोऽसौ बलीयान् हेतुः यतः प्राधान्याभावावगतिरिति पृच्छति—**कुत इति** । हेतुं वदन्नुत्तरमाह—**न होमस्येति** । कुतो होमस्य सक्त्वर्थता न स्यादिति पृच्छति—**कुत इति** । भूतभाव्युपयोगं हि द्रव्यं संस्कार्यं ते चामी सक्तवो न होमात्प्रागुपयुज्यन्ते नोर्ध्वं भस्मसद्भावात्, तेन निष्प्रयोजनत्वात् सक्तूनां न होमस्य तदर्थतेति परिहरति—**सक्तूनामिति** । निष्प्रयोजनत्वं प्रमाणाभावेन विवृणोति—**न सक्तूनामिति** ।

ननु भूतभाव्युपयोगरहितमपि होमसंस्कार्यं किं न स्यादत आह—**यदिति** । ततश्च तद्विधेरप्रामाण्यप्रसङ्ग इति भावः । अस्मत्पक्षे तु नायं दोष इत्याह—**अथेति** । ननु तत्रापि प्रयोजनमन्यन्न दृश्यते श्रूयते वेति समानमत आह—**ज्योतिष्टोमेति** । कथं प्रकरणपाठात् प्रयोजनवत्ता गम्यते तत्राह—**प्रयोगेति** । होमः स्वत एव प्रयोजनमाकाङ्क्षमाणः प्रधानकथम्भावाकाङ्क्षायामित्थमित्यनुग्राहकत्वेन प्रयोगवचनेन गृह्यते यस्मात् तस्मात् प्रधानोपकारलक्षणप्रयोजनवत्ता गम्यत इत्यर्थः ।

ननु सक्तूनां हुतानां भस्मसाद्भावापत्तावपि हूयमानावस्थानां प्रकरणपाठादेव प्रधानोपकारकत्वं भविष्यतीति शङ्कते—**नन्विति** । सिद्धान्ती तु प्रयोजनवत्तामभ्युपगम्य द्रव्यस्य क्रियानिवर्तनेन । सा न साक्षात् क्रतूपकारत्वेनेति परिहरति—**को वेति** ।

ननु प्रकरणग्रहणाविशेषात् सक्तूनामपि साक्षादुपकारकत्वं भविष्यतीति शङ्कते—**ननु तेऽपीति** । द्रव्यस्य क्रियात्मकत्वान्न प्रकरणेन ग्रहणमिति समाधत्ते—**तदुच्यत इति** । अक्रियात्मनोऽपि द्रव्यस्य ग्रहणं किं न स्यादत आह—**इति कर्तव्यतेति** । होमशब्देन क्रिया लक्ष्यते ।

ननु सक्तूनां साक्षात्करणोपकारकत्वाभावेऽपि होमद्वारा भविष्यतीति शङ्कते—**ननु होम इति** । न ह्यपूर्वसाधनत्वेन सक्तवः श्रूयन्ते न च कल्पना प्रमाणमस्ति, क्रिया निर्वर्तनेन चरितार्थानामपूर्वसाधनत्वकल्पनानुपपत्तेरिति परिहरति—**नास्तीति** ।

ननु द्वितीयाविभक्तिरीप्सितत्वं सक्तूनामवगमयन्त्यपूर्वसाधनत्वे प्रमाणमिति शङ्कते—**नन्विति** । प्रमाणमित्यनुषङ्गः । दूषयति—**नहीति** । हेतुमाह—

द्वितीयेति। द्वितीया हि सक्तूनां प्रामाण्यं वदन्ती होमंतदर्थं ज्ञापयति, न तु सक्तूनामपूर्वप्रयोजनत्वं तेन न द्वितीया विभक्तिः प्रमाणमित्यर्थः।

ननु सक्तूनां प्रयोजनवत्त्वाभावे होमस्य तादर्थ्यायोगात्तदन्यथानुपपत्त्या प्रयोजनवत्त्वकल्पना भविष्यतीत्याशङ्क्याह—**भवेदिति।** कुत इत्यत आह—**होमसम्बन्धा इति।** इति हेतौ। यतो होमव्याप्ताःसक्तवः स्युरित्येतावतापि भवेद्धोमः सक्त्वर्थः इत्यर्थः। होमव्याप्यत्वेन सक्तूनामौपचारिकत्वं यद्धोमस्य सक्त्वर्थत्वं न तत्प्रयोजनवत्त्वकल्पनायालमिति अभिसन्धिः।

ननु होमजन्यफलाश्रयत्वलक्षणं तद्व्याप्यत्वमपि होमविनाश्यानां सक्तूनां न युक्तमित्याशङ्क्याह—**ते चामी इति।** होमविनाश्यानामप्याहवनीयप्राप्त्याख्य-क्रियाफलाश्रयत्वाविरोध इति भावः। ननु किमित्येवमौपचारिकमेव होमस्य सक्त्वर्थत्वं व्याख्यायते तत्राह—**न होमस्येति।** सक्त्वर्थता मुख्येत्यर्थः। ननु होमस्य सक्त्वर्थत्वेन विधानान्मुख्यैव सक्त्वर्थता, नेत्याह—**सक्त्वर्थतेति।** निष्प्रयो-जनसक्तुहोमविधानस्यापि निष्प्रयोजनत्वात् अप्रमाण्यप्रसङ्ग इत्यर्थः।

ननु सक्त्वर्थत्ववचनस्यानर्थक्यपरिहाराय सक्तूनामदृष्टार्थत्वमेव कल्प्यतामत आह—**नचेति।** सक्तुप्राधान्याविवक्षायामप्यानर्थक्यपरिहारोपपत्तेः नादृष्टकल्पना युक्तेति भावः। एवं तावन्न होमस्येत्यादिनान्यत्कल्पयितुमित्यन्तेन नास्ति प्राधान्यमित्यवगम्यत इत्यस्मिन्नुपपादिते, ननु प्राधान्याभावेऽपि कथं द्वितीया-निर्दिष्टे गुणभाव इत्यत आह—**स एष इति।** कर्मभावमभिवदन्ती द्वितीया विभक्तिरानर्थक्यपरिहाराय कारकमात्रं लक्षयित्वा क्रियाकारकसम्बन्धं पदान्त-रान्विता बोधयतीत्यर्थः। तथापि कथं गुणभावस्तत्राह—**सम्बन्धे च सतीति।** भूतत्वाद्गुणभाव इत्यध्याहृत्यान्वयः। तत्र षष्ठायं न्यायं हेतुत्वेनाह—**द्रव्याणा-मिति।** भवतु गुणभावस्ततः किमित्याशङ्क्य गुणभावस्य तृतीयार्थत्वस्मरणान्न तत्र द्वितीया मुख्येत्याह—**गुणभावेति।** अत्रैवोपवर्षाचार्यसम्मतिमाह—**तेनेति।** स्थानशब्देन गुणभावस्य द्वितीयार्थता निरस्तेत्याशयः। एवं प्राधान्यमेव द्वितीयार्थो न गुणभाव इति नञर्थमुक्त्वेदानीं होमसम्मार्गवैषम्यप्रदर्शनार्थं तदर्थत्वात्तस्य च शेषभूतत्वादिति सूत्रावयवद्वयं व्याकुर्वन् प्रथमं तदर्थत्वादिति भागं सोपस्कारं व्याचष्टे—**तेनेति।** निष्प्रयोजनत्वेनेत्यर्थः। तच्छब्देन धर्ममात्रे तु कर्मेति व्यव-हितनिर्दिष्टस्यापि कर्मणः परामर्श इति व्याचष्टे—**होमार्थत्वादिति।**

नन्वेवं द्वितीयाश्रुतिविरोधस्तत्राह—**एवं सतीति।** वाक्यानर्थक्यपरिहाराय पदमात्रस्य स्वार्थत्यागो युक्त इत्यर्थः। नन्वेवं सति वाक्यस्यापि श्रुतार्थत्वमत आह—**न चेति।** आनर्थक्यादर्थमात्रपरत्वं वरमित्यर्थः। इदानीं तस्य चेत्यादि-भागं व्याचष्टे—**तस्य चेति।** अत्र तच्छब्देनाधिकरणविषयगतस्य पुरोडाशादेः

परामर्शः इति व्याचष्टे--**पुरोडाशादेरिति**। पुरोडाशादेर्यागशेषत्वेन प्रयोजनवत्त्वात्तत्संस्कारो नानर्थक इति तद्विधानोपपत्तिरित्यर्थः। लोकवदिति सूत्रावयवस्य पातनिकामाह--**न स इति**। पर्यग्निकरणादेर्दृष्टोपकारजनकत्वाभावात् संस्कारत्वासंभव इत्यर्थः। अदृष्टोपकारजनकोऽपि संस्कारः संभवतीति परिहरति--**अदृष्टार्थं इति**। एतदेव लौकिकदृष्टान्तेनोपपादयितुं सूत्रावयवं व्याचष्टे--**अदृष्टोऽपीति**। अदृष्टार्थोऽपीत्यर्थः। पर्यग्निकरणेनेति। अग्न्यादेः शिरस उपरि भ्रामणेनेत्यर्थः।

ननु लोकसिद्धमपि पर्यग्निकरणस्यादृष्टार्थत्वं प्रमाणाभावादयुक्तमित्याशङ्क्याह--**लोके चेति**। आचारकल्प्यस्य वाक्यस्यादृष्टार्थसंस्कारप्रतिपादकस्यैव कल्पनीयत्वादित्यर्थः। तेन सम्मार्गादीनामदृष्टार्थत्वेऽपि तुल्यश्रुतित्वाद्गुणकर्मतैवेत्यभिसन्धिः। उदाहरणभेदेषु यथाक्रमं पूर्वपक्षसिद्धान्तभेदेन विचारप्रयोजनमाह--**प्रयोजनमित्यादिना** ॥ १२ ॥

त० वा०—तिष्ठतु तावत्प्रयोगः। किं कारणम् ?

आचारत्वात्प्रयोगो हि स्मृत्या सर्वत्र बाध्यते।
विवक्षाऽनैकधा चात्र स्मरणे त्वेकरूपता॥

यदि ह्याचारस्यैकरूप्यं भवेन्नैव स्मृतयः प्रयत्नेन धार्येरन्। स एव त संकीर्णत्वादस्फुटः स्मरणेन प्रतिपाल्यते। स्मर्यंते च द्वितीयायाः प्राधान्यमर्थः। 'कर्मणि द्वितीया, 'कर्तुरीप्सिततमं कर्मेति'। तथा लोकवेदयोः प्रयुज्यते घटं करोति 'व्रीहीनवहन्ति' इति। यानि च लोके व्यभिचाराशङ्कास्थानानि, तान्युदाहरति **तण्डुलानोदनं पच, बल्वजान् शिखण्डकान् कुरु तण्डुलानग्न जुहुधीति।** तण्डुलैर्बल्वजैरिति च प्रयोक्तव्ये या द्वितीया प्रयुज्यते, तन्नूनं तृतीयासमानार्था सेति गम्यते।

तत्रोच्यते—

सर्वे पाकादिसम्बन्धे द्व्याकारास्तण्डुलादयः।
प्राधान्यांशमुपादाय द्वितीया तत्र वर्त्स्यति॥

यदा पदार्थान्तरभूतौदनशिखण्डकसाधनत्वेन तण्डुलबल्वजा विवक्ष्यन्ते तदा तृतीयान्तपदभाजो भवन्ति। यदा तु भोजनयोग्यौदनावस्थापरिणतिरूपेग तण्डुला, मार्दवोत्पत्त्यर्थं च शिखण्डकाकारेण बल्वजा दृश्यन्ते।

तथा वेदवाक्यावगतगुणभावाश्च ते द्रव्यसाधनकेऽग्निहोत्रे सुखण्डितास्तिष्ठन्तो रमणीयत्वात्कस्याश्चिद् ब्राह्मण्याः स्वकर्मशोभादर्शनार्थं तण्डुला होमसम्बन्धित्वेनाभिप्रेताः। सैवं प्रेष्यति गुणकामा वा यजमान तण्डुलानग्न जुहुधीति, तदा द्वितीयार्थभावत्वं भवति। **भवति हि लोके बहुप्रकारा विवक्षेति।** गुणभूतेऽप्यर्थे

केनचित्कारणेन कश्चित्प्राधान्यांशो विवक्ष्यते तथा प्रधानभूतेषु गुणांशः। कदाचिदुभौ कदाचिन्नोभौ।

न च यद्विवक्ष्यते तच्छब्देनाभिधातव्यमित्यस्ति प्रमाणम्, विवक्षासंपत्त्यर्थं तु लक्षणाद्युपायान्तराश्रयणं न स्वार्थत्यागः। तस्मात्प्राधान्यमेव द्वितीयार्थः। कथं तु सक्त्वादिषु गुणत्वमिति। तदुच्यते—

प्राधान्यमेव तत्रापि द्वितीया वदति स्वतः।
विरोधात्तेन सम्बन्धो गुणभावस्तु लक्ष्यते।

द्वितीया तावत्कर्मत्वं प्रधानरूपमात्मशक्त्या वदति, तत्त्विह बलवता कारणान्तरेण विरुध्यमानत्वान्नाऽऽश्रीयते। तेन तु कारकविशेषात्मकत्वाद्यत्कारकसामान्यमविनाभूतं लक्ष्यते तदविरुद्धत्वाद्विवक्ष्यते। तत्रैतावानर्थो विज्ञायते होमस्य कारकं सक्तव इति। न च सामान्यं निर्विशेषं व्यवहारक्षममिति विशेषापेक्षायां करणत्वं भविष्यति। द्रव्याणां 'कर्मसंयोगे' इति भूतभव्यसमुच्चारणन्यायात्। कथं पुनः सक्तुप्राधान्यविवक्षा विरुध्यते। तत्राऽऽह—

भूतभाव्युपयोगं हि संस्कार्यं द्रव्यमिष्यते।
सक्तवो नोपयोक्ष्यन्ते नोपयुक्ताश्च ते क्वचित्॥

यस्य हि द्रव्य क्वचिदुपयोगो निर्वृत्तः, भविष्यतीति वाऽवधार्यते, तत् संस्कारार्हत्वात्कर्म प्रति प्राधान्यं प्रतिपद्यते। यत्पुनर्नोपयुक्तम्, नोपयोक्ष्यते वा, तस्य संस्कारो निष्प्रयोजन इति तद्विधानवाक्यानर्थक्यप्रसङ्गः। ते चामी सक्तवो न होमात्प्रागुपयुज्यन्ते, नोर्ध्वम्, भस्मसाद्भावात्, भस्मविनियोगवचनाभावाच्च। तत्र समस्तं वाक्यमनर्थकं भवतु, द्वितीया वा लक्षणावृत्तेति। स्थितत्वाद्वेदप्रामाण्यस्य लक्षणा ग्रहीतव्या। मुख्यार्थप्रयोगो ह्यौत्सर्गिकत्वादपवाददर्शनेन भ्रान्तित्वं प्रतिपद्यते। सर्वत्रैव लक्षणाश्रयणमानर्थक्यप्रसङ्गनिमित्तम्। अन्यथा मुख्यार्थोपपत्तेः।

तेन विरोधात्सक्तुसाधनकहोमविधानं प्रकरणसम्बन्धि गृह्यते। **ननु सक्तूनामपीति।** होमवन्तः सक्तवोऽपि ज्योतिष्टोमस्योपकृत्याऽर्थवन्तो भविष्यन्तीत्याह। सिद्धान्तवादो तु च्छलेन होमसाधनीभूतानामेवार्यवत्त्वमभ्युपगच्छति, **को वा ब्रूते नेति।** सर्वत्रैव च।

द्रव्याणां वाक्यसंयुक्तक्रियानिर्वर्तनाद्विना।
न प्रयोजनमस्त्यन्यत्कथंभावाद्यसंगते।

यथा होमः क्रियात्मकत्वात्किमित्यपेक्षमाणः प्रधानकथंभावेनेत्थमनुग्राहकत्वेन गृह्यते, नैवं द्रव्यम्। न च तस्माददृष्टकल्पना, क्रियानिर्वर्त्यत्वादपूर्वाणाम्।

यत्रापि तावद्द्रव्यं साक्षात्फलाय चोद्यते। यथा 'गोदोहनेन पशुकामस्य' इति। तत्राप्यन्यप्रयोजनक्रियाद्वारमन्तरेण नापूर्वं भविष्यति। किमुत यदा न कस्य चिदङ्गत्वेन सक्तवः श्रूयन्ते। न च किं चित्कल्पनाप्रमाणमस्ति। द्वितीयेति चेत्। न हीत्युत्तरम्। द्वितीया हि सक्तूनां प्राधान्यं वदन्ती होमं तदर्थं कुर्यान्न सक्तुभ्योऽपूर्वमिति प्रतिपत्तिम्। तेन द्वितीयाप्रसादाद्भवेद्धोमः सक्त्वर्थः। कथं नाम होमव्याप्ताः सक्तवः स्युरिति। नान्यस्मै प्रयोजनाश्रवणात्। ते चामी **भवन्ति होमे कृते सक्तवो होमसंबद्धा** इति प्रागेव प्रयोजनलाभात्पर्यवसिता द्वितीया निष्प्रयोजनेष्वपि, होमं प्रति प्राधान्यमात्रेण कर्मत्वसिद्धेः। तत्र सिद्धे वाक्यार्थे पश्चान्न पुरुषस्य क्रतोर्वोपयुज्यन्त इति ज्ञात्वा तद्वचनाद्वाऽदृष्टं कल्पयेत्, प्राधान्यज्ञानं वा भ्रान्तिरिति। तत्राऽऽह—**न च तद्वचनाच्छक्यमन्यत्कल्पयितुमिति।**

प्राधान्याविवक्षैव न्याय्या। ततश्च तृतीयार्थसिद्धिरिति मत्वा, अत्र महाभाष्यकारेणेत्यनेनोपवर्णं स्यग्रहवृणमिति न्यायसुधा महाभाष्यकारेणोक्तं **तृतीयायाः स्थाने द्वितीयेति**। तेन वैषम्यं होमसंमार्गयोः, सक्तूनां निष्प्रयोजनत्वेन तदर्थत्वात् पुरोडाशादेश्चान्यशेषभावेन पर्यग्निकरणादिसंस्कारार्हत्वात्। दृढे च शास्त्रार्थेऽवस्थिते दृष्टोपकाराभावेऽप्यदृष्टकल्पना भविष्यति। लोकेऽप्यदृष्टार्थाः संस्कारा आचाराद्गम्यन्ते। यथा ग्रामान्तरादागतानां शान्त्यर्थमग्निलवणदध्यक्षतप्रभृतेः शिरस उपरि भ्रामणम्, शुचिदेशप्रतिष्ठापनं च।

न चास्यानुपपत्तिराचारप्रामाण्यात्। तेनादृष्टार्थानामपि तुल्यश्रुतित्वात्सिद्धो गुणभावः।

नन्वेवं सति सर्वत्र प्रयोजनवत्ताकृतमेव द्रव्यप्राधान्यमिति न वक्तव्यम्, 'तुल्यश्रुतित्वात्' इति, दर्शयितव्यं वा यत्र प्रयोजनवत्तानिरपेक्षं द्वितीयाकृतमेव, प्राधान्यम्, केवलतृतीयाकृयो वा गुणभाव इति।

तदुच्यते। प्राधान्ये तावत् 'ऐन्द्र्या गार्हपत्यमुपतिष्ठत' इत्यत्र लिङ्गादिन्द्रार्थत्वावगतेर्गार्हपत्यैकवाक्यत्वाच्च तत्साधनकेन्द्रोपस्थानप्रसङ्गे केवलद्वितीयाकृतमेव गार्हपत्यप्राधान्यम्।

तथा 'सूक्तवाकेन प्रस्तरम्' इत्युभयोः प्रयोजनवत्त्वाविशेषे केवलतृतीयाकृतमेव सूक्तवाकस्य प्रस्तरप्रहरणाङ्गत्वम्। तेन विभक्तिभिरेवाङ्गाङ्गिभावेभिधीयमाने निष्प्रयोजनत्वमपवादो। न तु प्रयोजनसद-सद्भावेनाङ्गाङ्गित्वामिति विवेकः।

प्रयोजनविषये शंका समाधाने

प्रयोजनं त्वधिकरणस्य न सम्यगनुमन्यन्ते। तथा हि—

स्रुङ्मात्राद्यनुवादेन शमीमय्यादि चोदितम्।
ज्ञायतेऽङ्गप्रधानार्थं पूर्वसिद्धान्तपक्षयोः॥

प्रियङ्गवो ह्युत्पत्तिवाक्यात्केवलप्राधानार्थत्वेन ज्ञायमाना युक्तं यदङ्गेषु न भवन्तीति। शमीमयत्वादि तु स्रुगादिमात्रानुवादेन विधीयमानं 'सर्वेषां वा शेषत्वस्यातत्प्रयुक्तत्वात्' इत्यनेन वाक्यसंयोगबलीयस्त्वात्प्रकरणगम्यप्रधानार्थत्वबाधेनाङ्गप्रधानार्थं विज्ञायते। न चात्र विशेषणं किंचिदुपात्तम्, येन प्रधानगतस्रुगादिमात्रप्रतीतिः स्यात्। सदपि वोद्दिश्यमानविशेषणत्वान्न विवक्ष्येत। तस्मात्पूर्वपक्षेऽपि यानि च प्रधानसम्बन्धीनि स्रुगादीनि, यानि चाऽऽरादुपकारकसंमार्गादिसम्बन्धीनि, तानि सर्वाणि शमीमयीत्वादियुक्तानीत्ययुक्तो नानावृक्षस्रुवसंमार्गः।

स्यादेतत्। 'मुख्यार्थो वाऽङ्गस्याचोदितत्वात्' इति वैकृतविशेषाणां केवलप्रधानार्थत्वान्नेहाङ्गप्रधानार्थता भविष्यतीति। तदयुक्तम्[1]।

वाक्योपात्तप्रधानार्थसम्बन्धो यत्र गम्यते।
तत्रैतद्वक्ष्यते नात्र तादृशश्च प्रतीयते॥

'यज्ञाथर्वणं वै काम्या इष्टयः, ता उपांसु कर्तव्या' इति हि प्रधानैरेव काम्यशब्दोपात्तैरुपांशुत्वं सम्बध्यमानमङ्गस्याचोदितमिति वक्ष्यते, न चात्र तादृशः प्रधानसंयोग इति वैषम्यम्।

ननु चाऽऽतिदेशिकत्वादप्राप्तावस्थेष्वङ्गेषु शमीमयीत्वाद्युपदिश्यमानं प्रधानमात्रार्थं भवेत्। नार्हत्येवं भवितुम्। एवं हि स्थास्यति।

क्लृप्तोपकारसाकाङ्क्षाः प्रथमं प्राकृतैः सह।
सम्बध्यन्ते समीपस्थं विकाराः प्रोज्झ्य चोदितम्।

अवश्यं चानेकार्थविध्यनुपपत्तेः स्रुगादीन्यनुवदितव्यानि। तेन प्रत्यक्षोऽपि सन्नुपदेशोऽतिदेशं तावत्प्रतीक्षते। तत्र यावता कालेन प्रधानस्रुगादीनि प्राप्नुवन्ति, तावतैवाङ्गस्रुगादीन्यपीत्यविशेषः।

किं च।

यदि प्रधानमात्रेण शमीमय्यादिसंगतिः।
प्राकृत्यस्तु प्रसज्यन्ते प्रयाजादिस्रुचस्ततः॥

य एव हि संमार्गस्रुचां वर्जनोपायः, तेनैव प्रयाजादिस्रुग्वर्जनमपि प्राप्नोति। न चैतदिष्टम्, युक्त्यभावात्। यद्यपि च किंचित्प्रधानमात्रसम्बन्धकारणं भवेत्, तथाऽपि सौमिकवेदिदक्षिणान्यायेन प्रसङ्गसिद्धेर्न प्राकृतजात्युपसंग्रहो युज्यते।

परिध्युदाहरणाक्षेपः

किं च—

परिध्यादेश्च कार्येण स्वरूपमुपलक्षितम्।
अतत्कार्यस्य संमार्गः परिधेर्न कृतो भवेत्॥

---

१. क. कुतः इत्यधिकम्।

परिधिरित्यग्निपरिधानार्थं द्रवमुच्यते। तथा होमाद्यर्था जुह्वादयः। तत्र संमार्गस्य 'अर्थाभिधानकर्म च' इत्यप्रयोजकत्वमपि शक्यं वक्तुम्। ततश्च बाणवत्परिधिश्रवणे यदि तावदपरिहितानेव पलाशानांमार्ष्टि, अपरिधय एव समृष्टा भवेयुः। अथ तानपि परिदधीत, ततः कृते परिधाने प्राकृतार्थता न स्यात्। न च तुल्यार्थानां समुच्चयो दृष्टः। तस्मान्न परिध्यन्तरमुत्पादनीयम्। अवभृथस्य त्वपूर्वत्वाद्यावदुक्तमात्रपर्यवसायिनः साङ्गस्य चाप्सु चोदितस्य केन संमार्गोऽग्निर्वा प्राप्नोति येनोत्पाद्येत। तस्मादप्रयोजनान्येतानि।

तस्योदाहरणं त्वेकं सत्यम्। तत्र हि 'मांसं तु सवनीयानाम्' इति सिद्धान्तात्पुरोडाशमात्रेणासंबध्यमानं तरसमयत्वमसनीयत्वान्न पर्यग्निकरणपुरोडाशेन संबध्यते। न हि सवनीयाङ्गे सवनीयशब्दप्रयोगः, सवनसंबन्धिविषयत्वात्। सवनीयाङ्गस्य चाऽसवनार्थत्वार्थत्वात्, तत्रापि तु व्रीहिमयत्वं दुर्लभम्, 'व्रीहिभिर्यजेत' इति प्रधानपुरोडाशमात्रेण तेषां संबन्धात्। एवं तर्ह्यनियतद्रव्यकता पर्यग्निकरणपुरोडाशस्येति प्रयोजनम्।

तदप्ययुक्तम्। तथा सति कांस्यभोजिन्यायेन तरसमयपर्यग्निकरणेनैव शास्त्रार्थोपपत्तेः सिद्धान्तार्थसदृशकर्मप्रसङ्गः। तस्मात्कथंचित्प्रकृतौ व्रीहिमयपुरोडाशग्रहणात्तत्साधनत्वं शास्त्रकृतत्वात्प्राप्नोतीति वक्तव्यम्। तत्रापि त्वेकहायनीन्यायेनाप्रयोजकत्वात् तदभावे लोपप्रसङ्गः। तेनैतदेव प्रयोजनमित्याश्रयणीयम्। अनियतद्रव्यकत्वं वा।

न चात्र कांस्यभोजिन्यायः संभवति। मांसेन पुरोडाशत्वानभिव्यक्तेः। सवनीयपुरोडाशे कथमिति चेत्? नैवम्। तत्र पुरोडाशत्वमिष्टम्, वचनादपुरोडाशात्मकमेव मांसं पुरोडाशस्य स्थाने विधीयते यथा धानादीनाम्। न हि कथंचिदपि मांसेन धानादयो भवन्ति। अतश्च प्रैयङ्गवन्यायेन प्रधानमात्रे मांसेन पुरोडाशो निर्वर्तितः। पर्यग्निकरणं तु पुरोडाशसाधनकमेव। सत्त्वनियतद्रव्यको[1] वा कथंचिद्वा प्रकृतिदर्शनेन व्रीहियवद्रव्यक इति स्थितम्। एतानि च प्रयोजनानि स्रुक्संमार्गस्य प्रकृतौ बहुसाधनत्वात्कपिञ्जलन्यायेन त्रित्वस्य शास्त्रीयत्वात्पात्रविवृद्धावपि पशुचातुर्मास्येषु तिस्र एव संमार्ष्टव्याः पूर्वपक्षे। सिद्धान्ते तु सर्वाः, संस्कारस्य प्रतिप्रधानावर्तित्वात्।

तथा पशुन्यायेन विवक्षितैकसंख्यत्वादेक एव संमार्ष्टव्यः परिधिः पूर्वपक्षे। सिद्धान्ते तु सर्वे। यत्र च परिधिविवृद्धिः तत्र विशेषः। एवमेकपुरोडाशे पर्यग्निकरणं सर्वपुरोडाशे च वक्तव्यम्।

---

१. क. सत्वानियत।

तथाऽपि 'विशये[1] लौकिकः स्यात्' इत्येवम् 'अग्निमुपनिधाय स्तुवते' इतिवल्लौकिकाग्निसंमार्गकरणं पूर्वपक्षे। सिद्धान्ते तु तस्याप्रयोजनत्वेनासंस्कार्यत्वात्सर्वेषामाहवनीयादिनामिति विशेषः ॥ १२ ॥

चतुर्थं संमार्गाधिकरणम् ॥ ४ ॥

न्या० सु०—'न गुणभूत' इति भाष्येण व्यभिचारनिरासार्थत्वेन सौत्रं तन्त्रं व्याख्याय तदुपपादनाय एवं हीत्यनेन स्मृतिरुपन्यस्ता। तत्र पूर्वपक्षिणा प्रयोगव्यभिचारस्योक्तत्वात्तन्निरासार्थं घटं करोतीत्यादौ प्राधान्येऽपि प्रयोगादनेकार्थत्वस्य वाऽन्याय्यत्वाद्व्याप्यत्वेष्टतमत्वसमुदायात्मकेप्सिततमत्ववाचिन्याश्च द्वितीयायास्तदेकदेशव्याप्यत्वमात्रेण लक्षणया विषं भक्षयतीत्यादौ प्रयोगदर्शनाद्व्याप्यत्वमात्रवाचित्वेष्टतमत्वाधिक्यप्रतीत्ययोगाद् गुणत्वे तु क्व चिदप्रयोगात् प्राधान्यमेव वाच्यमिति प्रयोग एवोपन्यसनीयः। तमुपेक्ष्य स्मृत्युपन्यासस्याभिप्रायमाह—**तिष्ठत्विति**। स्मृतौ सत्यां प्रयोगो नादर्त्तव्य इत्याशयः। प्रयोगाविरोधोऽपि न चेति भाष्येण वक्ष्यत इति तावच्छब्दार्थः।

एतदेव प्रश्नपूर्वकमुपपादयति—**किमिति**। विशेषतोऽत्रेत्याह—**विवक्षेति**। एतदेव व्याचष्टे—**यदि हीति**। 'तथा युक्तं चानीप्सितमिति स्मृतिस्तु लाक्षणिकप्रयोगसाधुत्वाव्याख्यानार्थं, अन्यथालाघवाद्व्याप्यं कर्मेति स्मरणापत्तिरित्याशयः। न चेति भाष्यं प्राधान्येऽपि प्रयोगानुपन्यासात्परोक्तवैदिकप्रयोगप्रतियोगिप्राधान्यप्रयोगानुपन्यासाच्चापूर्णे[2]माशङ्क्य पूरयितुमाह—**तथा चेति**। यदपि चेत्यादिभाष्यं सङ्कलय्य तात्पर्यतो व्याचष्टे—**यानि त्विति**। ओदनशिखण्डाख्यकर्मान्तरोपादानात् पचतिकरोत्योश्च द्विकर्मकत्वाभावात्तण्डुलबल्बजयोस्तदन्वयार्हतया करणत्वावगतेर्होमान्वये च होमस्याग्न्यधिकरणत्वप्रसिद्धेः, अग्नौ प्रक्षेपेण भस्मसाद्भावापत्तेः प्राधान्यायोगात्तृतीयार्थे द्वितीयेति शङ्काभिप्रायः।

परिहाराभिप्रायमाह—**तत्रेति**। ओदनाद्यवस्थायास्तण्डुलाद्यवस्थया सह भिन्नाभिन्नत्वाद्भेदविवक्षायां तण्डुलादेर्गुणकारत्वम्, अभेदविवक्षायां प्रधानाकारतेत्यर्थः। प्राधान्यांशमुपादायेति विशेषणसामर्थ्यसूचितं तादर्थ्यं व्याचष्टे—**यदेति**। श्रुत्युक्तं व्याचष्टे—**यदात्विति**। यदा तण्डुला बल्बजाश्चाप्तुमिष्यन्ते। यदा च तण्डुलान्होमसम्बन्धित्वेनाभिप्रेत्यैवम्प्रेष्यति, तदा प्राधान्यभावं भजन्तीत्यर्थः। तण्डुलानां होमाङ्गत्वाभावे होमसम्बन्धित्वेनेप्सितत्वायोगात्तण्डुलैर्जुहोतीति वेदवाक्येन गुणाभावावगतिरुक्ता। होमसम्बन्धिनो भस्मीभावादीप्सितत्वानुपपत्तिमाशङ्क्य, स्वस्य कण्डनाख्यस्य कर्मणः शोभादर्शनार्थमित्युक्तम्। पुंसः कण्डने शोभाबुद्ध्यभावात्। ब्राह्मण्या इति स्त्रीविषयतोक्ता। एतावता तण्डुलानामीप्सितत्वायोगेनापरितोषात् गुणकामो वेत्युक्तम्।

---

१. क. विषये। २. अपूर्णति २ पु० पा०।

वीर्यकामस्तण्डुलैर्जुहोतीति तण्डुलानां वीर्यसाधनत्वश्रुतेर्या पत्युरात्मनो वा वीर्यं कामयते, सा तेषां प्राधान्यं विवक्षतीत्यर्थः।

ईप्सितत्वाभिप्रायस्य सम्भवित्वाभिधानार्थं 'भवति ही'ति भाष्यं व्याचष्टे—**भवति हीति**। तण्डुलालानोदनं पचेत्यादौ केन चिदभेदविवक्षादिना कारणेन कश्चिदोदनावस्थापरिणतिरूपः प्रान्यांशो विवक्ष्यते। अगारे गावो वास्यन्तामिति प्रधानभूतेऽप्यगारे, गुणांशः, तण्डुलान्पच तैरोदनं कुर्वित्युभौ सन्ति तण्डुला इत्यंशद्वयस्याप्यविवक्षादीप्सितत्वाभिप्रायासम्भवेऽपि लक्षणया प्रयोगोपपत्तेर्न गुणत्वस्यापि द्वितीयावाच्यत्वकल्पनोचितेत्यभिधानार्थमन्यायश्चेति भाष्यं व्याचष्टे—**न चेति**। तेनेत्युपसंहारभाष्यं व्याचष्टे—**तस्मादिति**।

ननु वेदे वक्त्रभावेन वैवक्षिकप्राधान्यायोगात्सक्त्वादेश्च वास्तवप्राधान्याभावाद् गुणत्ववाचित्वाभावे द्वितीया न स्यादित्याशङ्कार्थं वेदे त्विति भाष्यं व्याचष्टे—**कथं त्विति**। द्वितीयेत्यादिपरिहारभाष्यं व्याचष्टे—**तदुच्यत इति**। सक्तुषु विद्यमानं प्राधान्यं कथं वदतीत्याशङ्क्य—**स्वत इत्युक्तम्**। गुणभावोपपत्तिप्रश्नापाकरणार्थं प्राधान्याभावाभिधानस्य गुणत्वलक्षणापर्यवसायित्वमुत्तरार्द्धेन दर्शयता स एव द्वितीयान्त इत्यादिवक्ष्यमाणं भाष्यमनागतावेक्षणेन व्याख्यातम्।

श्लोकं व्याचष्टे—**द्वितीया तावदिति**। कुतो हेतोः प्राधान्याभाव इति पृष्टे होमस्य सक्त्वर्थत्वं च कल्पते इति सम्भवलक्षणहेत्वभिधानार्थं 'न होमस्येति' भाष्यं स्पष्टत्वादव्याख्याय कुतो होमस्य सक्त्वर्थत्वं नावकल्पत इति प्रश्नार्थं कुत इति भाष्यं व्याचष्टे—**कथं पुनरिति**। सक्तूनामित्युत्तरभाष्यं व्याचष्टे—**अत आहेति**। श्लोकं व्याचष्टे—**यस्य हीति**। यत्पुनरिति पूर्वार्द्धार्थोपपादनेन यदीति भाष्यमपि प्रसङ्गाद्व्याख्यातम्। नन्वेवं प्राधान्यासम्भवेऽप्यश्रुतगुणत्वाङ्गीकरणं कथमित्याशङ्क्याह—**तत्रेति**। नन्वेवं सति प्राधान्यप्रतीतेर्भ्रान्तित्वं स्यादित्याशङ्क्याह—**मुख्यार्थेति**। अपवादे सत्युत्सर्गस्य भ्रान्तिता युक्तेत्याशयः।

ननु लोके प्रमाणान्तरेण गौणलाक्षणिकार्थपरत्वावसायान्मुख्यार्थत्यागो युक्तः न तु वेदे। प्रमाणान्तराभावादित्याशङ्क्याह—**सर्वत्रैव चेति**। लोकेऽप्यानर्थक्यप्रसङ्ग एव लक्षणादिनिमित्तम्, तदभावेऽर्थान्तरे तात्पर्यस्याशक्यज्ञानत्वान्मुख्यस्यैवार्थस्योपपत्तेरित्यर्थः। अथेत्यादिभाष्यं सङ्क्षेपतो व्याचष्टे—**तेनेति**। नन्वित्याशङ्काभाष्यं निर्व्यापारस्य क्रतूपकाराख्यप्रयोजनसाधनत्वायोगाद्धोमातिरिक्तस्य च व्यापारस्याश्रुतेर्होमे च सति भस्मसाद्भावापत्तेरयुक्तमाशङ्क्य—**नन्विति**। हूयमानावस्थानामुपकारसाधनत्वं भविष्यतीत्याशयः। को वेति परिहारभाष्यं पूर्वोक्तनिष्प्रयोजनत्वविरोधित्वादयुक्तमाशङ्क्य व्याचष्टे—**सिद्धान्तेति**।

नन्विति भाष्येण सक्तूनामपि प्रकरणग्रहणात्साक्षादुपकारसाधनत्वं भविष्यतीत्याशङ्क्य, द्रव्यस्याक्रियात्मकत्वात्प्रकरणाग्रहणाभिधानार्थं तदुच्यत इति भाष्यं

व्याचष्टे—**सर्वत्रेति**। आदिशब्देनेत्थं भावे नैवोपादानम्। ननु द्रव्यस्यापि विधीयमानस्य किं भाव्यमित्यपेक्षायामनीप्सितत्वेन वाक्यसंयुक्तायाः क्रियाया भाव्यत्वायोगात्साक्षात्पुरुषार्थस्य ज्योतिष्टोमेनावरोधात्तदुपकारस्यैव भाव्यत्वावगतेः कथंभावादिना सङ्गतिर्भविष्यतीत्याशङ्कां निरस्यन् श्लोकं व्याचष्टे—किमित्यपेक्षायामप्यक्रियात्मकत्वात् कथंभावेनाग्रहणमित्यर्थः। ननु सक्तूनां साक्षात्करणोपकारसाधनत्वासम्भवेऽपि होमद्वारा भविष्यतीति नन्विति भाष्येणाशङ्क्य, नास्तीत्यनेन निरस्तम्। तदभिप्रायतस्तावद्व्याचष्टे—**न चेति**। कथं तर्हि गोदोहनादेरदृष्टसाधनतेत्याशङ्क्याह—**यत्रापीति**। स्वस्वरूपतो व्याचष्टे—**न चेति**। नन्विति शङ्काभाष्यं व्याचष्टे—**द्वितीयेति**। न हीति परिहारभाष्यं प्रतीतिविपरीताभिधानादयुक्तमाशङ्क्य छित्वा व्याचष्टे—**न हीति**। हेतुत्वेनोत्तरावयवं व्याचष्टे—**द्वितीया हीति**। कथं द्वितीयायास्तादर्थ्यज्ञापकतेत्याशङ्क्य—**प्राधान्यमित्युक्तम्**। कुर्याच्छब्देनावास्तवत्वं सूचितम्। ननु सक्तूनां प्रयोजनवत्वाभावे होमस्य तादर्थ्यायोगात्तदन्यथानुपपत्त्या प्रयोजनवत्त्वकल्पनाऽवसीयत इत्याशङ्क्य, होमव्याप्यत्वेन, सक्तूनामौपचारिकं होमस्य सक्त्वर्थत्वम्, न प्रयोजनवत्त्वकल्पनायाऽलमित्यभिधानार्थं 'भवेदिति' भाष्यं व्याचष्टे—**तेनेति**। येन कारणेन सक्तूनां प्रयोजनवत्त्वं द्वितीया न ज्ञापयति, तेन मुख्यतादर्थ्यायोगादौपचारिकी सक्त्वर्थतेति प्रसादशब्देन सूचितम्। सक्तूनां त्यागप्रक्षेपांशमात्रव्याप्यत्वेऽपि देवतोद्देशद्रव्यत्यागप्रक्षेपसमुदायात्मकहोमव्याप्यत्वाभावसूचनार्थं कथं नानेत्युक्तम्। व्याप्यत्वमात्रस्य प्रयोजनवत्त्वकल्पनाशक्तिर्नेत्यनेनोक्ता। ननु क्रियाजन्यफलाश्रयत्वलक्षणं व्याप्यत्वमपि होमविनाश्यानां सक्तूनामयुक्तमित्याशङ्क्याहवनीयप्राप्त्युत्तरकालं विनाशेऽप्याहवनीयप्राप्त्याख्यक्रियाफलाश्रयत्वाविरोधसूचनार्थं भवन्तीति भाष्यं व्याचष्टे—**तत्रेति**। उद्देशत्यागप्रक्षेपसमुदायं प्रति कस्य चित्कर्मत्वायोगात्तद्वाचिनो जुहोतेरकर्मकत्वेऽप्यंशकल्पनया त्यागप्रक्षेपांशविषयौपचारिकव्याप्यत्वाभिधानाख्यकर्मवाचित्वेऽपि द्वितीयायाः प्रयोगजनकत्वकल्पनासामर्थ्यप्रदर्शनार्थतां[1] दर्शयितुमाहेतीति व्याप्यत्वे प्राधान्योपचारः।

ननु प्रयोजनवत्त्वकल्पनासामर्थ्योऽपि द्वितीयाय होमस्य सक्त्वर्थत्वज्ञापकत्वाभ्युपगमेन होमस्य केन चित्प्रकारेण सक्त्वर्थतेति पूर्वोक्तं विरुध्येतेत्याशङ्क्य, सक्त्वर्थत्वाभिधानसम्बन्धशब्दसूचितौपचारिकत्वप्रदर्शनार्थं होमस्य सक्त्वर्थतेत्यादिभाष्यं व्याचष्टे—**तत्रेति**। सक्तूनामदृष्टार्थत्वकल्पनेन सक्त्वर्थत्ववचनस्यानर्थक्यपरिहारशङ्कानिरासार्थं न च तद्वचनादिति भाष्यावमानर्थक्यस्यावश्यपरिहर्त्तव्यत्वात्प्रकारानभिधानाच्चायुक्तमाशङ्क्यौपचारिकत्वाख्यप्रकारान्तराभिप्रायत्वेन जिज्ञासापूर्वकं व्याख्यातम्—**तद्वचनाद्वेत्याद्युक्तम्**। पुरुषदोषकृतत्वाच्छाब्दज्ञानभ्रान्तत्वस्य वेदेऽनुपपत्तेर्भ्रान्तिशब्देनौपचारिकतोक्ता। श्रोतृदोषाद्वा मुख्यार्थत्वज्ञानस्य भ्रान्तित्वम्। एतदन्तेन च न होमस्य केन

१. प्रयोजवत्त्वेति २ पु० पा०।

चित्प्रकारेणेत्यादिभाष्येणैवमवगते प्राधान्ये, बलीयसा हेतुना नास्ति प्राधान्यमित्यवगम्यत इत्येतदेवोपपादितमिति सूचयितुं प्राधान्योक्तिः ।

नन्वेवं द्वितीयावगतप्राधान्याभावावगमेऽपि कथं द्वितीयानिर्दिष्टे गुणभाव इति प्रश्नो नापाकृतः स्यादित्याशङ्कानिरासार्थं स एव इत्यादिभाष्यं विरोधात् तेन सम्बन्धीगुणाभावस्तु लक्ष्यत इत्यनेन प्रागेव व्याख्यातत्वादुपेक्ष्यास्मिन्नेवार्थे भगवदुपवर्षसम्मतिप्रदर्शनार्थं गुणभावे चेति भाष्यं व्याचष्टे—**ततश्चेति** । स्थानशब्देन गुणभावस्य द्वितीयार्थता निरस्तेत्याशयः । देवतोद्देशद्रव्यत्यागप्रक्षेपाख्यधात्वर्थत्रयसमुदायरूपं जुहोत्यर्थं प्रति देवताया द्रव्यस्य वा कर्मत्वायोगात् जुहोतियोगे कर्मणि द्वितीयानुपपत्तेस्तृतीयार्थवाचितोपवर्षेणोक्ता । व्याकरणे द्वितीयायास्तृतीयार्थवाचित्वानभिधानाद्या परीष्टिर्निमित्तानां कर्त्तव्येत्युपपादिता । सा महाभाष्यकारेण न कर्त्तव्येति वर्णितेत्युपवर्षे महाभाष्यकारशब्दप्रयोगाच्चैवं व्याख्यातः । द्वितीयोक्तस्यापि सक्तुप्राधान्यस्यासम्भवाद् बाध इति सकलस्य तात्पर्यं तेनेत्यादिभाष्येण 'तदर्थत्वादि'ति तच्छब्दः, धर्ममात्रे तु कर्मेति व्यवहितनिर्दिष्टस्यापि कर्मणो योग्यत्वात्परामर्शकः । कस्य तदर्थता विवक्षितेत्यपेक्षायां च 'द्रव्योपदेश' इति द्रव्यशब्दस्त्वधिकरणविषयभूतः संमार्गादिसंस्कार्यत्वेनाभिमतस्य स्रुगादेः परामर्शक इत्यङ्गीकृत्य, सूत्रावयवद्वयं व्याख्यातम् ।

तत्र लोकवदिति सूत्रावयवमव्याख्याय, प्राक् तस्य चेति सूत्रावयवव्याख्यानं किमर्थमित्याशङ्क्य होमसंमार्गवैषम्याभिधानार्थत्वं दर्शयितुमाह—**तेनेति** । कथं सक्तूनां होमार्थतेत्यपेक्षायां तेनेति भाष्यगतेन तच्छब्देन निष्प्रयोजनत्वं हेतुत्वेन परामृष्टमिति निष्प्रयोजनशब्देन सूचितम् । तत्रेति भाष्यावयवव्याख्यानार्थम्—**पर्यग्निकरणादीत्युक्तम्** । लोकवदिति सूत्रावयवपातनिकार्थं पर्यग्निकरणादेर्दृष्टोपकारजनकत्वाभावात् संस्कारत्वासम्भवमाशङ्क्य दृष्टोपकारजनकोऽपि संस्कारः सम्भवतीत्यभिप्रायकथनार्थं न स इत्यादिभाष्यं व्याचष्टे—**दृष्टे चेति** । तदुपपादनाय लौकिकदृष्टान्याभिधानार्थं लोकवदिति सूत्रावयवं व्याख्यातुम् अदृष्टोऽपीति भाष्यं व्याचष्टे—**लोकेऽपीति** । शान्त्यर्थत्वेनादृष्टार्थतोक्ता । ननु लोकप्रसिद्धमपि पर्यग्निकरणस्यादृष्टसंस्कारार्थत्वं प्रमाणवादयुक्तमित्याशङ्कानिरासार्थं लोके चेति भाष्यं व्याचष्टे—**न चेति** । मूलश्रुतिकल्पनेनाचारस्यापि प्रामाण्यादित्यर्थः सिद्धान्तमुपसंहरति—**तेनेति** ।

ननु पुरोडाशादेः प्रयोजनवत्त्वेन पर्यग्निकरणादिप्रतिप्राधान्ये, तस्यैव सक्त्वादिष्वभावेनाव्यभिचारित्वात्प्राधान्ये हेतुत्वोपपत्तेः । द्वितीयोपन्यासोऽनर्थक इत्याशङ्क्ते—**नन्विति** । केवलतृतीयाकृतो वेत्यनेन निष्प्रयोजनत्वस्यैव सक्त्वादिष्वव्यभिचारित्वाद् गुणभावहेतुत्वोपपत्तेर्गुणभावे च तृतीयेतिभाष्यसूचितस्तृतीयाहेतुकगुणभावोपन्यासोऽप्यनर्थक इति सूचितम् । द्वयोः प्रयोजनवत्त्वाविशेषेऽन्यतरप्राधान्यस्य प्रयोजनवत्त्वेनाशक्यज्ञानत्वात्प्रयोजनवत्त्वानपेक्षद्वितीयाकृतमेव प्राधान्यमित्यत्र तावद् दृष्टान्तमाह—**तदुच्यत**

इति । इन्द्रस्यापि गार्हपत्यवत् क्रत्वङ्गत्वेन प्रयोजनवत्त्वाविशेषात्तन्निरपेक्षद्वितीयाकृतमेव प्राधान्यमित्युक्तम् । ननु तत्र कतरस्य प्राधान्यमिति सन्देहे निर्णायकान्तराभावात् निर्णयमात्रे द्वितीयोपयोगः, न विनियोगे इत्याशङ्क्य—**लिङ्गादित्युक्तम्** ।

न च वाक्याद् गार्हपत्यप्राधान्यम् । गार्हपत्यसमीपे स्थित्वेन्द्रमुपतिष्ठेतेत्येवमपि तदेकवाक्यत्वोपपत्तेरिति, गार्हपत्येत्यनेनोक्तं निष्प्रयोजनत्वनिरपेक्षकेवलतृतीयाकृतमेव गुणत्वमित्यत्रापि दृष्टान्तमाह—**तथेति** । सूक्तवाकस्येष्टदेवताप्रकाशनार्थत्वात्, प्रहरणस्य च स्रुगासादनोपयुक्तप्रस्तरप्रतिपत्त्यर्थत्वात्प्रयोजनत्वाविशेषान्नैकस्यापि निष्प्रयोजनतेत्यर्थः । सक्तूनामपि तर्हि द्वितीयया प्राधान्यं स्यादित्याशङ्क्याह—**तेनेति** ।

भाष्योक्तं विचारप्रयोजनं दूषयति—**प्रयोजनं त्विति** । आद्येनादिशब्देन परिदृध्युपादानम् । द्वितीयेन हिरण्मयीत्वबाणवत्त्वयोः । सिद्धान्तवत्पूर्वपक्षेऽप्यङ्गप्रधानार्थत्वात् प्रयोजनाविशेष इत्यर्थः । ननु प्रियङ्गुवत्प्रकरणात्प्रधानमात्रार्थतावगतेर्नाङ्गप्रधानार्थतेत्याशङ्कां निरस्यन् श्लोकं व्याचष्टे—**प्रियङ्गवो हीति** । प्रैयङ्गवश्चरुरिति वाक्यात् प्रधानयागसाधनचरुप्रकृतित्वप्रतीतेः प्रियङ्गूणां प्रधानमात्रार्थत्वं न प्रकरणादित्याशयः । यथा च बर्हिरादेस्तृतीये वाक्यसंयोगबलीयस्त्वेनाङ्गप्रधानहविरासादनार्थत्वं वक्ष्यते, तथा शमीमयीत्वादेरङ्गप्रधानस्रुगाद्यर्थतेत्यर्थः ।

ननु यथा 'यज्ञाथर्वणं वै काम्या इष्टयस्ता उपांशु कर्त्तव्या' इत्युपांशुत्वं विकृतावातिदेशिकत्वेनाप्राप्तावस्थेष्वङ्गेषु विधीयमानत्वात्प्रधानमात्रार्थम्, तथैतदपीत्याशङ्क्ते—**स्यादेतदिति** । वैकृताङ्गविधिकाले प्राकृतस्याङ्गस्य विकृतावचोदितत्वादित्येकेषां व्याख्यानमुपजीव्यैतत्सूत्रं पठितम् । काम्यशब्दोपात्तस्य प्रधानमात्रस्य तच्छब्दपरामृष्टस्योपांशुत्वविधेरङ्गसम्बन्धित्वेनोपांशुत्वस्याचोदितत्वादिति तार्त्तीयसूत्रार्थमभिप्रेत्य परिहरति—**तदिति** ।

श्लोकं व्याचष्टे—**यज्ञाथर्वणेति** । शङ्किताभिप्रायं विवृणोति—**ननु चेति** । परिहर्त्ता निरस्यति—**नार्हतीति** । परव्याख्यानुपपत्तौ हेतुम्—**आहैवं हीति** । तृतीये 'निर्देशात्तु विकृतावपूर्वस्यानधिकारः'-इत्यत्र बर्हिर्यूपावटमवस्तृणातीत्यप्राकृतयूपावटस्तरणाख्यकार्यार्थबर्हिरर्थत्वं प्राकृतानां बर्हिर्धर्माणामस्ति नास्तीति चिन्तायाः प्राकृतवैकृताङ्गप्राप्तिपौर्वापर्यचिन्ताधीनत्वाद्धर्मसाधारण्यशास्त्रातिदेशयोश्च सप्तमदशमाद्ये निषेत्स्यमानत्वेन तदभिप्रायपूर्वपक्षायोगात्प्रत्यक्षत्वेन प्राग्वैकृताङ्गप्राप्तेः पश्चादतिदिश्यमानेन बर्हिर्लुनातीत्यादिशास्त्रेण सर्वप्राकृतवैकृतबर्हिरनुवादेन लवनादिधर्मविधिसम्भवाद्यूपावटस्तरणबर्हिषोऽपि धर्मवत्तेति पूर्वपक्षिते क्लृप्तोपकाराङ्गसम्भवे कल्पनागौरवापादकाक्लृप्तोपकाराङ्गानाकाङ्क्षणाद्विकृतौ प्राकृतधर्मविधावधिकार इति सिद्धान्तस्य वक्ष्यमाणत्वात् प्राकृतानामङ्गानां वैकृतेभ्यः प्राक्प्राप्तिः स्थास्यतीत्यर्थः ।

किं चोपदेशेनानुवाद्यस्रुक्परिधिप्राप्तयेऽतिदेशः प्रागेवेष्टव्य इत्याह—**अवश्यं चेति** । अनिष्टापत्तेरपि प्रधानमात्रार्थता न युक्तेत्याह—**किं चेति** । नन्वस्मिन्पक्षे पर्णतादेरपि

प्रधानमात्रसम्बन्धापत्तेः, प्रकृतौ प्रयाजादिस्रुक्षुप्राप्त्यभावात् कथं विकृतौ प्रसक्तिरित्याशङ्कयत इत्युक्तं प्रकृतौ कार्यस्यावक्लृप्तत्वात्पदार्थोद्देशेन विधीयमानेषु धर्मेषु पर्णमयादिवाक्यैर्जुह्वादिमात्रोद्देशेन पर्णतादिविधानादङ्गप्रधानस्रुगर्थत्वं युक्तम्। विकृतौ तु प्राकृतकार्यपृष्ठेन पदार्थप्राप्तेः स्रुक्शब्दलक्षितकार्योद्देशेन शम्यादिविधीयमानं जुह्वा जुहोति, स्रुवः सम्मार्ष्टीति प्राकृतकार्यद्वयसद्भावेऽप्येकत्रैव प्राकृतधर्मबाधेन चरितार्थस्य वैकृतधर्मविधेरन्यत्रापि बाधकत्वायोगात्कस्मिन्नेकस्मिविधीयतामित्यपेक्षायां प्रकरणात् प्रधानभूतहोमाख्यकार्यार्थत्वप्रतीतेः, प्रधानमात्रार्थत्वमिति यस्य ते प्रकृतौ नानावृक्षस्रुक्सम्मार्गसाध्यमपूर्वमिति वदतः पक्षः। तन्मतेऽनिष्टापत्तिरेषेत्याशयः।

ननु प्रयाजानामपि होमाख्यकार्यसद्भावाच्छाम्यादिविधानोपपत्तेः कथं प्राकृतजातिप्रसक्तिरित्याशङ्कयाह—**य एव हीति**। होमत्वाविशेषेऽपि प्रधानहोमेभ्यः प्रयाजादिहोमानां भेदात्सम्मार्गवत्प्राकृतविरुद्धवैकृतधर्माप्राप्तिरित्याशयः। नन्वेवं सत्येवमेवयुक्तत्वात्कानिष्टापत्तिरित्याशङ्कयाह—**न चेति**। अयं भावः—स्रुवकार्यस्य शमीजात्या कर्त्तुमशक्यत्वात्स्रुवकार्ये च शमीविधौ स्रुवां बाधापत्तेः; कार्ये विधीयमाना शमी पर्णतादिकार्ये स्रुक्प्रकृतिद्रव्यपरिच्छेदलक्षणे स्रुक्शब्दोपस्थापिते विभीयेत। तस्य च 'पर्णमयी जुहूर्भवती'त्याद्युपदेशविध्यैवयेनैकत्वात्, तदुद्देशेनापि विधीयमानायाः शम्याः सर्वार्थतैव युक्ता।

अथ स्रुक्प्रकृतिपरिच्छेदत्वेनैकरूपत्वेऽपि प्रधानस्रुक्प्रकृतिपरिच्छेदलक्षणात्कार्यादङ्गस्रुक्प्रकृतिपरिच्छेकलक्षणस्य कार्यस्यान्यत्वाद्विकृतौ प्रयाजादिस्रुग्वर्जनम्, ततः प्रकृतावप्यपूर्वसाधनांशे धर्मविध्यभ्युपगमात्प्रधानापूर्वसाधनस्रुगर्थतैव पर्णतादेर्बर्हिषश्च प्रधानहविर्मात्रसादनार्थता स्यादिति सर्वेषां वेति न्यायो बाध्येत। अथ प्राकृताङ्गबाधेन वैकृताङ्गनिवेशादेकत्र च बाधेन चरितार्थस्य वैकृताङ्गविधेः सर्वत्र बाधकत्वायोगान्न विकृतावसौ न्यायः। ततोऽङ्गगुणविरोधन्याये[1]नाङ्गस्रुक्ष्वेव प्राकृतजातिबाधस्य युक्तत्वाद्वैपरीत्यापत्तिरुपदेशेनातिदेशबाधस्यानुग्रहपक्षवृत्तित्वात्प्रधानगुणबाधाभ्युपगमेऽङ्गानामप्यनुग्राह्यत्वासर्वार्थतैव पुनरापन्नेति, अभ्युपगम्यापि किं चिच्छमीमयीत्वादेः प्रधानमात्रसम्बन्धकारणं प्रधानस्रुचामेव विकृतावपि प्रसङ्गेनाङ्गसाधनत्वोपपत्तेः पर्णमयीत्वादेश्च स्रुक्प्रयोजकत्वाभावात्तद्वशेनापि स्रुगन्तरोपादानायोगात्सम्मार्गः स्रुक्षुः पर्णतादिप्राप्तिः पूर्वपक्षे नास्तीत्याह—**यद्यपि चेति**।

ननु पशुयागस्य वपाप्रचारेणोपक्रमात्, अङ्गप्रचारेण चोपसंहारात्तन्मध्यपातिनः पुरोडाशस्य पाशुकैरङ्गैः प्रसङ्गोपकारदर्शनात् सम्मार्गादेः प्रधानप्रम्मवित्वात्तदर्बर्हिभूतस्य कथं प्रधानार्थाभिः स्रुग्भिः प्रसङ्गेनोपकार इत्याशङ्कय—**सौमिकेत्युक्तम्**। षड्त्रिंशत्प्रक्रमा प्राचीत्यादिवाक्यविहिताया वेदेस्तद्युक्ते तु फलश्रुतिस्तस्मात्सर्वचिकीर्षा स्यादि-

---

१. अङ्गगुणविरोधे च तादर्थ्यादिति न्यायः ।

(३-७-८)त्यत्र तृतीये साङ्गसोमयागार्थत्वेनोक्तायाः अप्यौपवसथ्याहे क्रियमाणत्वेन तत्प्राचीनाङ्गार्थत्वाभावाद्वेदिकरणोत्तरकालभाव्यग्नीषोमीयपशुयागार्थत्वे च सत्यपि तत्प्रक्रमात्प्रागेव सौमिकाग्निप्रणयनप्रक्रमेऽनुष्ठानेन सोमार्थानुष्ठानावधारणात् सौमिकत्वाभिधानम्। तथा च प्रधानार्थयाप्यग्नीषोमीयादिष्वतिदेशप्राप्तदार्शपौर्णमासिकवेदिकार्यस्य हविरासादनस्यापि प्रसङ्गात्सिद्धेर्दार्शिकपौर्णमासिकी यजमानसम्मिता वेदिर्निवर्त्ततइति द्वादशे वक्ष्यते। अतस्तन्त्रमध्यपाताभावेऽपि तन्त्रमध्यपातनामात्रेण प्रसङ्गो भवतीत्याशयः। ननु महावेदेः सोमार्थत्वेऽप्यग्नीषोमीयार्थत्वस्यापि भावात्तदङ्गकार्यान्तरसाधकतापि प्रसङ्गाद्युक्ता। शमीमयीत्वस्य तु प्रधानमात्रसम्बन्धेऽङ्गार्हत्वाभावात्कथं प्रसङ्गेनाङ्गोपकारितेत्याशङ्क्य 'दक्षिणाः सोमस्ये'ति वाक्यात्प्रधानमात्रार्थाया अपि दक्षिणायाः प्रसङ्गेनाङ्गोपकारित्वाद्दीक्षणीयादिष्वतिदेशप्राप्तान्वाहार्यनिवर्त्तकत्वात् द्वादशसिद्धमेव दृष्टान्तितम्।

अर्थाभिधानकर्म चेति चतुर्थन्यायेनाप्रयोजकत्वाभ्युपगमेऽपि वा यथाश्रुतसम्मार्गानिष्पत्तेः प्राकृतजात्युपसंग्रहो न युक्त इत्याह—**किं चेति**। अग्निपरिधानाख्येन कार्येण परिधेः स्वरूपं लक्षितम्। स्रुचां चादिशब्दोपात्तानां द्रव्यवृत्त्याख्येनेत्यर्थः। न विद्यते तत्परिधानादिकार्यं यस्य पलाशादेः तस्य सम्मार्गः क्रियमाणः परिधेरकृतः स्यात्परिधीकृतस्य वा पलाशादेः सम्मार्गः क्रियमाणः परिहितपरिधानस्य प्रकृतावभावादप्राकृतकार्यस्य स्यादित्युत्तरार्द्धं द्विधा योज्यम्। श्लोकं व्याचष्टे—**परिधिरिति**। स्रुक्शब्दस्य जुह्वादिपरत्वाद्धोमार्थायाश्च स्रुचो जुहूत्वात् जुहूधारणार्थायाश्चोपभृत्त्वादाज्यावदानापादानभूतायाश्च ध्रुवात्वादादिशब्दोपात्तानां स्रुचामपि कार्येणैव स्वरूपोपलक्षणम्। तच्चेत्यनेनोक्तम्। नन्वर्थाभिधानकर्मत्वस्याप्रयोजकत्वमात्रहेतुत्वात्किमर्थोऽपि शब्द इत्याशङ्कानिरासार्थस्ततश्चशब्दः। न केवलं ततोऽर्थाभिधानकर्मत्वादप्रयोजकत्वम्, किं तु वक्ष्यमाणयथाश्रुतसम्मार्गानिष्पत्तेश्चेत्यर्थः। ननूभयेषां समुच्चयेन परिधानार्थत्वात्पौर्वापर्याभावेनाप्रकृतार्थत्वानापत्तिरित्याशङ्क्य—**न चेत्युक्तम्**। अग्न्यर्थत्वाभावे च सम्मार्गस्याङ्गप्रधानहोमार्थाग्निद्वाराङ्गप्रधानहोमार्थत्वाभावेनर्पबर्हिषः प्रयाजान्यजति, अपबर्हिषावनूयाजौ यजतीति विहितप्रयाजानुयाजाङ्गत्वेन प्राप्त्ययोगादवभृथस्य च दशमे वक्ष्यमाणेनापूर्वत्वेन[1], अतिदेशतोऽपि प्राप्त्ययोगात्कथं चित्प्राप्तावप्यप्स्ववभृथेन चरन्तीति तृतीयोक्तकरणत्वाक्षिप्ताङ्गसाहित्यस्य विवक्षितत्वात्, चरत्युक्तस्य च प्रयोगस्य साङ्गप्रधानविषयत्वादपां च देशत्वात्प्रयोगाङ्गत्वावगतेरेकादशे[2] साङ्गप्रधानार्थाग्निविकारत्वस्य वक्ष्यमाणत्वादग्न्यप्राप्तेरग्न्युदाहरणेऽपि न सम्यक् प्रयोजनमित्याह—**अवभृथस्य त्विति**।

---

१. विकृतित्वेनेत्यर्थः।

२. अवभृथे प्रधानेऽग्निविकारः स्यान्न हितद्धेतुरग्निसयोग इत्यत्र।

पुरोडाशोदाहरणप्रयोजनमनुजानाति—**तरसेति**। तरसा उदाहरणं विषयो यस्य प्रयोजनस्येति विग्रहः। ननु तरसोदाहरणेऽपि पुरोडाशमात्रानुवादेन मांसविधानात्पूर्वपक्षेऽपि सवनीयपुरोडाशवत्तदङ्गपर्यग्निकरणपुरोडाशेऽपि मांसप्राप्तेर्न प्रयोजनसत्यतेत्याशङ्क्याह—**तत्र हीति**। 'मांसं तु सवनीयानां चोदनाविशेषादि(३-८-४४)ति तृतीयान्त्याधिकरणे पुरोडाशानादरेण सवनीयमात्रे मांसविधर्वक्ष्यमाणत्वान्न पर्यग्निकरणपुरोडाशे मांसप्राप्तिरित्यर्थः। ननु सवनीयाङ्गभूतस्य पर्यग्निकरणस्यापि सवनाधारत्वे सवनीयशब्दवाच्यत्वात्तदीयेऽपि पुरोडाशे मांसं स्यादित्याशङ्क्याह—**न हीति**। तादर्थ्याभिप्रायः सम्बन्धिशब्दः। मन्द्रं प्रातःसवन इत्यादौ तु सप्तमीनिर्देशात्सवनाधारमात्रे स्वरविधिरित्याशयः।

ननु पर्यग्निकरणस्यारादुपकारित्वे प्रकृतौ प्रकृतपुरोडाशग्रहणस्याशास्त्रीयत्वेन विकृतौ व्रीहिमयत्वस्य, यवमयत्वस्य वातिदेशायोगादुपादानलाघवाय सवनीयस्य मांसमयस्यैव पुरोडाशस्य पर्यग्निकरणसाधनत्वापत्तिर्न पूर्वसिद्धान्तपक्षयोः प्रयोजनभेदः स्यादित्याशयेनाशङ्कते—**तत्रापि त्विति**। व्रीहिशब्दो यवनामप्युपलक्षणम्। ननु व्रीहियवनियमाभावेऽप्यनियतधान्यमांसादिप्रकृतिद्रव्यकतैव पूर्वपक्षे प्रयोजनं भविष्यतीत्येकदेशी शङ्कते—**एवं तर्हीति**। पर्यग्निकरणपुरोडाशस्यानियतद्रव्यकत्वे प्राप्ते, यथैकपात्रभोजिनोर्गुरुशिष्ययोः शिष्यस्य कांस्यपात्रभोजित्वनियमे गुरोश्चानियतपात्रभोजित्वे शिष्यानुरोधेनापि गुरोर्नियमदर्शनादाग्रयणे द्यावापृथिवी यस्यैककपालस्य वैश्वदेवैककपालप्रकृतिकत्वेन प्रसूनबर्हिर्नियमादनियतबर्हिषो मुख्यस्याप्यैन्द्राग्न्यादेरमुख्यानुरोधेनाप्यधिकश्च गुणः साधारणेऽविरोधात्कांस्यभोजिवदमुख्येऽपी(१२-२)त्यत्र द्वादशे प्रसूनबर्हिर्नियमो वक्ष्यते। तथा सवनीयपुरोडाशस्य मांसप्रकृतिकत्वनियमात्पर्यग्निकरणपुरोडाशस्यापि मांसप्रकृतिकत्वनियमापत्तेरेकदेश्युक्तम्। प्रयोजनमाशङ्किता निरस्यति—**तदपीति**। पूर्वपक्षप्रयोजनमाक्षिप्तं परमतेन तावत्समाधत्ते—**तस्मादिति**। प्रकृतौ शास्त्रसहकारित्वेनोपादानगौरवभयं कथंचिच्छब्देनोक्तम्। प्रकृतपुरोडाशग्रहणस्य प्रकृतौ शास्त्रीयत्वाद्विकृतावतिदेशसम्भवोऽपि व्रीहिमयस्य, यवमस्य वा पुरोडाशस्याभावात्पर्यग्निकरणलोपापत्त्या परेषां समाधानं दूषयति—**तत्रापि त्विति**।

तुल्यो हि व्रीहिसम्बन्धः शास्त्राद्यागावघातयोरिति वार्त्तिकोक्तन्यायेनारादुपकारिणाऽङ्गेन प्रधानप्रयुक्तद्रव्यग्रहणस्य निरस्तत्वादयुक्तता अपि शब्देन सूचिता।

लोप एव तर्ह्यस्तु पूर्वपक्षप्रयोजनमिति मतान्तरमाह—**तेनेति**।

नन्वेकहायन्यानयनस्य सप्तमपदपांसुग्रहणाप्रयुक्तत्वात्तदर्थमननुष्ठानेऽप्यक्षाभ्यञ्जनस्य 'तेनाक्षमञ्ज्यादि'ति तृतीयोक्ताक्षाभ्यञ्जनशेषत्वात्पांसून्प्रति प्रयोजकत्वात्पदपांस्वभावेऽपि यान्कांश्चित्पांसूनुपादायाक्षाभ्यञ्जनस्यानुष्ठानसिद्धेर्लोपाभावात्, इहाप्युक्तेन न्यायेन पर्यग्निकरणस्य पुरोडाशं प्रत्यप्रयोजकत्वलक्षणाभावादेकहायनीन्यायेन पुरोडाशोक्ता

प्रकृतिव्रीहियवाप्रयोजकत्वेऽपि यत्किंचिद् द्रव्योपादानेन पुरोडाशसिद्धेः पर्यग्निकरणलोपस्यायुक्तत्वेनैतत्प्रयोजनापरितोषात्स्वमतेनानियतधान्यप्रकृतिकपुरोडाशसिद्धेर्व्रीहिमयत्वस्य यवमयत्वस्य चातिदेशाभावेऽपि मांसमयस्य पुरोडाशस्य पूर्वपक्षे पर्यग्निकरणानापत्तेर्युक्तं पूर्वपक्षप्रयोजनमिति समाधत्ते—**अनियतेति**। यत्वनियमे सति मांसस्यापि पक्षे प्राप्तेः कांस्यभोजिन्यायेन मांसनियमात् सिद्धान्तसदृशकर्मापत्तिरित्युक्तं तन्निरस्यति—**न चात्रेति**। विशिष्टाकारस्य पिण्डस्य पुरोडाशशब्दवाच्यस्य मांसेनानिष्पत्तेः पक्षेऽप्यप्राप्तिरित्याशयः।

ननु सवनीयस्य तर्हि पुरोडाशस्य कथं मांसप्रकृतिकतेत्याशङ्कते—**सवनीयेति**। सवनीयपुरोडाशप्रकृतित्वेन न प्राप्तं विधीयते, किं तु तत्कार्यसाधनत्वेनेति परिहरति—**नैवेति**। 'तरसपुरोडाशमन्नसंरोधादि'ति छान्दोग्यसूत्रकृताऽन्नमिश्रणेन मांसस्य पुरोडाशनिष्पादने सामर्थ्यस्योक्तत्वात् अनिष्पादने च चराविव पेषणनिवृत्त्या तदर्थाधिवापनिवर्त्तनेन। धान्यमसीत्यधिवापमन्त्रनिवृत्त्यापत्तेर्धान्यशब्दोहानूहचिन्तायाः शाक्यानामयनप्राप्तैतन्मन्त्रस्थधान्यशब्दोहानूहप्रयोजनत्वोक्त्ययोगप्रसङ्गात्पुरोडाशस्थाने मांसविध्युक्त्ययोगमाशङ्क्य, सवनीयशब्देन धाना-करम्भ-परिवाप-पुरोडाश-पयस्याख्यानां पञ्चानामपि हविषामभिधानात्पुरोडाशशब्दस्य च लिङ्गसमवायाद्धानादिष्वपि प्रवृत्तेः, भ्रष्टयवानां च धानाख्यानां धानाचूर्णस्य दध्यक्तस्य करम्भाख्यस्य, परिवापाख्यानां च लाजानामामिक्षाख्यायाश्च पयस्याया मांसेनान्नमिश्रितेनापि निष्पादनाशक्तेः, एकेन च वाक्येन धानादौ तत्कार्यकरत्वेन पुरोडाशे च तत्प्रकृतित्वेन मांसविधानस्य वैरूप्यापादकत्वेनायोगान्मुख्यभूयोधानाद्यनुरोधेन पुरोडाशेऽपि तत्कार्यकारित्वेनैव मांसविधिर्युक्तः। छान्दोग्यशाखायां 'त्वेतेन वै गौरवीति' शाक्यस्तरसपुरोडाशोपव्यावृत्त्या सर्वामृद्धिमाघ्नोदिति परकृतिसरूपार्थवादकल्पे विधौ सवनीयशब्दाभावात्पुरोडाशमात्रोद्देशेन मांसविध्यवगतेऽसहायोपादानेनापि च मांसस्य पुरोडाशनिष्पादकत्वसम्भवे पुरोडाशश्रुतेः कार्यलक्षणार्थत्वकल्पनायोगाद् व्रीह्योदनीं देवदत्त इतिवच्च तरसमयः पुरोडाशोऽस्येति मध्यमपदलोपिबहुव्रीह्यर्थाश्रयनेन पदद्वयस्यापि श्रुतिसंस्थितेऽहनि गृहपतिर्मृगयांतिशयान् मृगान्हन्ति, तेषां तरसाः सवनीयाः पुरोडाशा भवन्तीति पुरोडाशमात्रोद्देशेन मांसविध्य गतेः सहायोपादानेनापि च मांसस्य पुरोडाशनिष्पादकत्वसम्भवे पुरोडाशश्रुतेः कार्यलक्षणार्थत्ववृत्तित्वोपपत्तेः, सूत्रकृताऽन्नमिश्रेण मांसस्य पुरोडाशशक्ततोक्ता। तद्विषयमेव च धान्यशब्दोहानूहचिन्ताप्रयोजनत्वम्। धान्याधिकरणप्रयोजनभाष्ये तु सवनीयशब्दवद्वाक्योदाहरणमनादृत्यमिति परिहारसूचनार्थम्—**यथेत्याद्युक्तम्**। कथं चिच्छब्देनान्नमिश्रिततोक्ता। समाहितं पूर्वपक्षप्रयोजनमुपसंहरति—**अतश्चेति**।

यथा प्रैयङ्गवे चरौ प्रधानमात्रे प्रियङ्गुभिर्व्रीहिनिवृत्तेर्व्रीहिसाधनक एवावघात इति[1] दृष्टान्तार्थः। एवशब्दो मांसशङ्कानिवृत्त्यर्थः। एवं तर्ह्यनियतद्रव्यकतेत्यनियमस्य

१. संस्थिते संस्थिते अहनि गृहपतिर्मृगयां याति स यान् यान् मृगान् हन्ति स तेषां तरसाः सवनीयाः पुरोडाशा भवन्तीति।

मांसनियमेन निरासान्मांसविषयत्वप्रतीतेरनियतद्रव्यकत्वं वेत्यस्यापि तद्विषयत्वशङ्कापत्तेः, तन्निरासेन धान्यमात्रविषयत्वसूचनायैघशब्देन मांसं निरस्य पुनः—**स त्वित्युक्तम्।** न चास्मिन्पक्षे नियोगतो यागार्था एवेति न्यायेन प्रकृतपुरोडाशग्रहणस्य निरस्तत्वात्प्रकृतावपि व्रीहियवद्रव्यकत्वासिद्धेः पूर्वपक्षप्रयोजनत्वेनानादराद् कथंचिद्वेत्युक्तम् ।

स्वयं प्रयोजनान्तराण्याह—**एतानि चेति।** पुरोडाशोदाहरणे भाष्योक्तप्रयोजनानुज्ञासूचनार्थश्चकारः । पशौ 'पृषदाज्येनानुयाजान्यजतीत्याम्नानात्पृषदाज्यधारणायोपभृदन्तरकरणः, चतस्रः, स्रुचश्चातुर्मास्येषु वरुणप्रघासाख्ये द्वितीये पर्वणि 'पृथगग्निं प्रणयत'इति विहारद्वयाम्नानेन जह्वुपभृतध्रुवाद्वयकरणात्वषट् । यत्र च वरुणप्रघासेषु विहारद्वित्वेन षट्संख्यत्वात्प्ररिधिवृद्धिः । तत्रैकवर्जं पञ्चानामसंम्मार्गापत्तेर्महान्प्रयोजनविशेष इत्यर्थः । 'अग्निमुपधाय स्तुवतइति स्तुत्यङ्गत्वेनारादुपकारकेऽग्न्युपनिधाने विहिते यथा लौकिकस्याग्नेरुपनिधानं विषये 'लौकिकं स्यात्सवार्थत्वान्न वैदिकमर्थनिर्देशादि(७-३)त्यत्र ससमाधिकरणे वक्ष्यतइति दृष्टान्तार्थः । अग्निसम्मार्गस्याग्नीन्परिधीश्चाग्निं च त्रिस्त्रिः सम्मृड्ढीतिं प्रयाजकालीनसम्मार्गप्रैषादग्नीत्परिधींरुचाग्निं च सकृत्सकृत्समृड्ढीति चानुयाजकालीनसम्मार्गप्रैषात्परिधिसम्मार्गसाहित्यावगतेराहवनीयस्यैव परिध्यन्वयेन सम्मार्गावगमात्सर्वैश्च याज्ञिकैराहवनीयस्यैव सम्मार्गानुष्ठानादाहवनीयादीनामित्यादिशब्दो वैदिकत्वसादृश्योपस्थापितपुरोडाशाद्युपसंग्रहार्थः । सर्वशब्दश्च विहारपृथक्त्वेनैकाहवनीयसम्मार्गार्थो । कृतकार्याणां चाहवनीयस्रुक्परिधिपुरोडाशानां कृतसंस्काराणामपि नाशदोषापहारेष्वन्येषामुत्पादितानां संस्कारावृत्त्यर्थो व्याख्येयः ॥ १२ ॥

इति चतुर्थं सम्मार्गाधिकरणम् ॥

भा० प्र०—होम करने पर सत्तु भस्म हो जाता है और उस भस्मीभूत सत्तु से किसी प्रयोज्य की सिद्धि नहीं होती है । अतः सत्तु के लिए होम मानने पर होम प्रयोज्यशून्य हो जायगा । इसलिए, इस स्थल में लक्षणा मानकर तृतीया विभक्ति के अर्थ में द्वितीया विभक्ति का प्रयोग है—यह मानना चाहिए । वस्तुतः, इस स्थल में भी द्वितीया प्राधान्यरूप अर्थ का ही प्रकाश करती है । प्राधान्यरूप अर्थ मानने पर विरोध होता है, अतः लक्षणा के आधार पर तृतीया विभक्ति के अर्थ में द्वितीया मानी जाती है । 'तण्डुलान् ओदनं पचति' इत्यादि स्थल में भी तण्डुलगत प्राधान्य विवक्षित होने से वही कर्ता का ईप्सिततम है इसलिए उसमें द्वितीया है । ऐसा मानने पर 'तण्डुलैः ओदनं पचति' यह तृतीयान्त प्रयोग होता है । घटं करोति, व्रीहीन् अवहन्ति, इत्यादि लौकिक प्रयोग से यही निश्चित होता है कि कर्म में द्वितीया है और कर्म इप्सिततम होने से प्रधान है । यह 'तदर्थत्वात् लोकवत्' इस सूत्रांश से अभिहित होता है, इसीलिए 'स्रुचः सम्मर्ष्टि' इस स्थल में स्रुक् ही प्रधान है वह सत्तु के समान

अप्रधान नहीं है क्योंकि, स्रुक् का पात्रार्जन संस्कार साधित होने पर उसका प्रयोजन समाप्त नहीं होता है। क्योंकि, उसके बाद होम सम्बन्धी हविः को धारण कर्म में उसका व्यवहार होता है, यही सूत्र का 'तस्य तु शेषभूतत्वात्' इस अंश से कहा गया है। इस स्थल में स्रुक् के सम्मार्जन कहा गया है, उसका कोई भी दृष्ट प्रयोजन नहीं है, अतः अदृष्ट संस्कार ही उसका प्रयोजन है। सम्मार्जन के द्वारा संस्कृत स्रुक् ही यज्ञीय अपूर्व का साधक है, सभी स्रुक् साधक नहीं है। अतः, यह कथन ठीक नहीं है कि गुणकर्म होने से ही अदृष्ट या अपूर्व नहीं होगा, किन्तु जहाँ दृष्ट फल नहीं है वहाँ गुणकर्म भी अपूर्व का जनक होता है।

इस स्थल में ज्ञातव्य है कि गुणकर्म चार प्रकार के हैं—उत्पाद्य, विकार्य, संस्कार्य, और प्राप्य। इनमें पूर्व अधिकरण के उत्पाद्य एवं विकार्य कर्म को लेकर विचार किया गया है और इस अधिकरण में संस्कार्य और प्राप्य कर्म के विषय में विचार किया जा रहा है। उत्पाद्य एवं विकार्य का साधारणतया दृष्ट फल है, अतः उससे अपूर्व नहीं माना जाता है, संस्कार्य और प्राप्य कर्मों का यदि दृष्ट फल नहीं रहता है तो उससे अपूर्व माना जाता है, अन्यथा, वह विफल होने से उसका सम्पादन करना और न करना दोनों ही विफल होगा।

दो अधिकरणों का आशय यह है कि गुणकर्म एवं प्रधान कर्म दो प्रकार का है। इनको दूसरे शब्दों में सान्निपत्योपकारक और आरादुपकार कहा जाता है। प्रधान कर्मों का अङ्ग स्वरूप द्रव्य देवता आदि के उद्देश्य में विहित कर्म गुणकर्म है, यह उत्पाद्य, विकार्य, संस्कार्य एवं प्राप्य के भेद से चार प्रकार का है। दृष्टार्थ और अदृष्टार्थ एवं दृष्टादृष्टार्थ भेद से पुनः तीन प्रकार का है। इनका प्रयोजन=फल प्रत्यक्ष-सिद्ध है, यह दृष्टार्थ गुणकर्म है, जैसे 'व्रीहीन् अवहन्ति' इत्यादि। व्रीहि के अवघात से तुष विमोचन आदि फल होता है—यह प्रत्यक्ष सिद्ध है, जिनका प्रयोजन दृष्ट अर्थात् प्रत्यक्षसिद्ध नहीं होता है—वह अदृष्टार्थक होता है। जैसे—'व्रीहीन् प्रोक्षति' 'स्रुचः संमार्ष्टि' इत्यादि। इस स्थल में व्रीहि का प्रोक्षण वा स्रुक् सम्मार्ग (सम्मार्जन) करने का प्रयोजन फल प्रत्यक्ष नहीं है। पशु, पुरोडाश आदि दृष्टादृष्टार्थक हैं, कारण, इसका देवता स्मरणरूप दृष्ट प्रयोजन है। द्रव्य त्याग करने से अदृष्ट होता है। इस गुणकर्म का ही आश्रयिकर्म या समवायि कर्म आदि संज्ञा से कहे जाते हैं। जो कर्म, द्रव्य देवता आदि के उद्देश्य के विना ही विहित होते हैं उनको आरादुपकारक कहते हैं जैसे प्रयाज आदि। इसी का दूसरा नाम अर्थकर्म या प्रधानकर्म है।

इस स्थल में यह द्रष्टव्य यह है 'यैस्तु द्रव्यं न चिकीर्ष्यते 'इत्यादि' षष्ठ सूत्र' एवं 'यैस्तु द्रव्यं चिकीर्ष्यते' इत्यादि सप्तम सूत्र के आपातलभ्य अर्थ के अनुसार पूर्वपक्षी ने यह स्थिर कर पूर्वपक्ष किया है कि जो दृष्टार्थक नहीं होता है वरन् अदृष्टार्थक अर्थात्

अपूर्वजनक होता है—वही प्रधान कर्म है और दृष्टार्थक ही गुणकर्म होता है, उससे कहीं भी अपूर्व की उत्पत्ति नहीं होती है। यदि ऐसा माना जाय तो स्रुक् से विहित सम्मार्जन गुणकर्म नहीं होगा, क्योंकि, वह दृष्टार्थक नहीं है, दृष्टार्थक न होने पर उससे अपूर्व होता है। सिद्धान्ती के मत में यह गुणकर्म है, इसलिए, इस स्थल में गुणकर्म का लक्षण अव्याप्ति दोष दुष्ट है। इसी प्रकार प्रधान कर्म का लक्षण भी अतिव्याप्ति-दोषदुष्ट है, क्योंकि, जो अदृष्टार्थक होता है, वही प्रधान होता है, सिद्धान्ती के मत में सम्मार्जन अदृष्टार्थक है, किन्तु प्रधानकर्म नहीं है वरन् गुणकर्म है, इसके उत्तर में सिद्धान्ती का कहना है कि सूत्र में गुणकर्म या प्रधानकर्म का लक्षण निर्दिष्ट नहीं है कि अव्याप्ति और अतिव्याप्ति दोष से सावधान होना पड़ेगा, अपूर्वाधिकरण में भावार्थ कर्म शब्द से अपूर्व प्रतीत होता है—यह कहा गया है, उसी का 'तानि द्वैधाधिकरणे' यह अपवाद अर्थात् व्यतिक्रम ही दीखाता है। किसी किसी स्थल में भावार्थ कर्मशब्द से भी अपूर्व की प्रतीति नहीं होती है, इसी के लिए गुणकर्म के विषय का उत्थापन किया गया है। किन्तु, इस स्थल में सूत्र में उसका लक्षण नहीं कहा गया है। जहाँ दृष्ट उपकार रहता है, वहाँ 'भावर्थकर्मशब्द' से अपूर्व की प्रतीति नहीं होगी और जहाँ दृष्ट उपकार नहीं रहता है वहाँ भावार्थकर्म शब्द से अपूर्व की प्रतीति होगी—यही तानि द्वैधाधिकरण में कहा गया है। जो आत्मसमवेत अदृष्ट का जनक होता है वही प्रधानकर्म होता है और कर्म का अङ्ग जो द्रव्यादि उसको उद्देश्य कर विहित कर्म गुणकर्म है—यही प्रधानकर्म और गुणकर्म से कहा गया है—इसमें किसी प्रकार का दोष नहीं है।

'न'=नहीं, 'तदर्थत्वात्'=होमार्थता होने से, 'लोकवत्' लौकिक प्रयोग के समान, 'तस्य'=उसका अर्थात् स्रुक् आदि द्रव्यों का 'च'=किन्तु, 'शेषभूतत्वात्'=यज्ञ के शेषभूतत्व अर्थात् अङ्गस्वरूपता होने से। इस स्थल में गौणभाव में द्रव्य का उपदेश नहीं हो सकता है, ऐसी स्थिति सत्तु स्थल में लौकिक प्रयोग के अनुसार द्वितीया विभक्ति होने पर भी होम ही प्रधान है। इस स्थल में स्रुक् आदि द्रव्य भी क्रिया सम्पादक होने से सत्तु के समान नहीं है।

अथवा 'न'=नहीं, अर्थात् गुणीभूत=अप्रधान के विषय में द्वितीया नहीं है, 'तदर्थत्वात्'=यतः द्वितीया तदर्थ अर्थात् कर्मार्थ=कर्म में ही द्वितीया है, 'लोकवत्'=लौकिक प्रयोग के समान, 'तस्य'=उसका अर्थात् स्रुक् द्रव्य का। 'च'=और, 'शेषभूतत्वात्' शेषभूतता अर्थात् कर्माङ्गता होने से अप्रधान विषय में द्वितीया नहीं होती है, क्योंकि, कर्म में ही द्वितीया होती है, और जो ईप्सिततम=प्रधान होता है, वही कर्म है, इस स्थल में स्रुक् आदि द्रव्य शेषभूत अर्थात् कर्माङ्ग होने से, उसके द्वारा बाद में कर्म की साङ्गता साधित होने से वह भी ईप्सिततम अर्थात् प्रधान होता है॥ १२॥

॥ इति सम्मार्गाधिकरण ॥

अथ पञ्चमस्तुतशस्त्राधिकरणम्

[५] स्तुतशस्त्रयोस्तु संस्कारो याज्यावद्देवता-भिधानत्वात् ॥ १३ ॥ पू०

शा० भा०—प्रउगं शंसति, निष्कैवल्यं शंसति, आज्यैः स्तुवते, पृष्ठैः स्तुवते इति गुणवचनं स्तवनं शंसनं च। यथा इन्द्रस्य नु वीर्याणि प्रवोचम् इति। यदेतद् गुणवचनं श्रूयते[1], किमेतत् गुणभूतं देवतां प्रति, उत प्रधानमिति। तत्रोच्यते। स्तुतशस्त्रे संस्कारकर्मणी इति। कुतः? देवताभिधानत्वात्। गुणवचने निर्वर्त्यमाने गुणिनी[2] देवता संकीर्त्यते, नान्यथा तद् गुणवचनं भवति। तत्र प्रत्यक्षं देवताभिधानं गम्यते, देवताप्रकाशेन च प्रत्यक्ष उपकारो यागसिद्धिः। तस्मात् संस्कारकर्मणी याज्यावत्। यथा याज्यामन्वाह, पुरोऽनुवाक्यामन्वाह इति स्तुतिवचनं देवताप्रकाशनेनार्थवत्,[3] तद्वदेतदपीति ॥ १३ ॥ पूर्व० ॥

भा० वि०—पूर्वाधिकरणे यैस्तु द्रव्यं चिकीर्ष्यत इत्यादि गुणकर्मलक्षणस्य सम्मार्गादावव्याप्तिमाशङ्क्यादृष्टसंस्काराङ्गीकरणेन परिहार उक्तः। इदानीं तस्यैव स्तुतशस्त्रयोः अतिव्याप्तिशङ्का निराक्रियत इति सङ्गतिः। विषयमाह—**प्रउगमित्यादिना**। इति श्रूयत इति शेषः। संशयकथनोपयोगितया सूत्रगतस्तुतशस्त्रशब्दौ व्याचष्टे—**गुणेति**। गुणानां गुणिसम्बन्धितया वचनमित्यर्थः। स्तवनमित्यनेन भावे निष्ठेति दर्शितम्। शंसनमिति च भावेष्ठन्निति च। अत्र च प्रगीतमन्त्रसाध्यम्, देवतागुणसम्बन्धाभिधानं स्तोत्रम् अप्रगीतमन्त्रसाध्यं शस्त्रमिति विवेकः। देवतागुणसम्बन्धाभिधानं तदभिधायकं मन्त्रोदाहरणेनोदाहरति—**यथेति**। एवं सौत्रपदव्याख्यानेन विषयं परिशोध्य स्तुतेर्माहेन्द्रग्रहयागादुत्कर्षसंभवासंभवाभ्यां संशयमाह—**यदेतदिति**। इति संशय इति शेषः। यद्यपि गुणगुणिनौ द्वावपि स्तुतिनिर्वर्तकतया तद्विषयौ तथापि गुणानामकर्माङ्गतया निष्प्रयोजनत्वात् गुणिनश्च तदङ्गतया सप्रयोजनत्वात् तं प्रत्येव गुणप्राधान्यविचार इत्यवधेयं पूर्वपक्षसूत्रमवतार्य व्याचष्टे—**तत्रोच्य इत्यादि**। सूत्रे संस्कारशब्दो भावप्रधान इतिभावः।

ननु पूर्वाधिकरणोक्तसंस्कारकर्मत्वहेतुद्वितीयाश्रुत्यभावे कुतस्संस्कारकर्मतेति पृच्छति—**कुत इति**। यैस्तु द्रव्यमित्यादिनोक्तस्य दृष्टोपकारित्वरूपगुणकर्मलक्षणस्य भावादिति परिहरति—**देवतेति**।

ननु गुणगुणिसम्बन्धाभिधानरूपायाः स्तुतेः कथं देवताभिधानत्वमत आह—**गुण इति**। इतिर्हेतौ। अस्तु देवतासङ्कीर्तनं तथापि कथं दृष्टोपकारकत्वं तत्राह—

---

१ ब. क्रियते। २ क. गुणिनो। ३ ब. प्रकाशनार्थं।

तत्रेति। ननु तत्प्रकाशनस्यापि भूतभाव्युपयोगरहितस्य कथं संस्कारत्वमत आह—**देवताप्रकाशनेन चेति**। अभिधानरूपशब्दव्यापाराद्देवतायाः प्रकाश उपकारः ततश्च यागसिद्धिः प्रत्यक्षेत्यर्थः दृष्टोपकारसंभवफलमाह—**तस्मादिति**। दृष्टान्तमादाय व्याचष्टे—**याज्यावदित्यादिना** ॥ १३ ॥

अथ पञ्चमं स्तुतशस्त्राधिकरणम्

तं० वा०—'यैस्तु द्रव्यं चिकीर्ष्यते' इत्यस्यापवादत्वेन स्त्रोत्रशस्त्रोपन्यासः। स्तुतिरेव स्तोत्रम्। शस्त्रमपि सैवाप्रगीतमन्त्रसाध्या। गुणगुणिसंबन्धकीर्तनं च स्तुतिः—शिष्यते। सा च प्रथमं गुणगुणिभ्यां निर्वर्त्यते, तदभावे शब्दोच्चारणमात्रस्य स्तुतित्वाव्यपदेशात्। तत्र गुणानां तावदकर्माङ्गतया निष्प्रयोजत्वादेकान्तेन स्तुत्यर्थता। तन्निर्वर्तिता स्तुतिः किं स्तुत्यस्य स्मारकत्वेन शेषीभवति उत् स्वप्राधान्येनाऽदृष्टार्था भवतीति ? किं प्राप्तम् ॥

दृष्टेन क्रतुसिद्ध्यर्था साधयन्ति यतः स्मृतिम्।
स्तोत्रशस्त्राणि तेन स्युः संस्कारा देवताः प्रति ॥ १३ ॥

॥ अथ पञ्चमं स्तोत्रादिप्राधान्याधिकरणम् ॥ ५ ॥

न्या० सु०—ननु स्तोत्रशस्त्रयोः पूर्वाधिकरणोक्तगुणकर्मत्वहेतुद्वितीयाश्रुत्यभावात्कथं गुणकर्मत्वशङ्केत्याशङ्क्याह—**यैस्त्विति**। दृष्टोपकारित्वस्य स्वातन्त्र्येण गुणकर्मलक्षणत्वानभ्युपगमेऽप्यपूर्वाभावोपयोगिलक्षणत्वस्याऽन्यतस्सिद्धशेषाणामित्यत्रोक्तत्वादिहापूर्वाभावः प्राप्तोऽपोद्यत इत्याशयः। सूत्रगतस्तुतशस्त्रशब्दव्याख्यानार्थं गुणवचनमिति भाष्यं व्याचष्टे—**स्तुतिरिति**। गुणमात्राभिधानस्य स्तुतित्वं भाष्यकृतोक्तमिति शङ्कां निराकर्त्तुमाह—**गुणेति**। गुणानां गुणिसम्बन्तितया वचनमिति भाष्यार्थोऽनेनोक्तः। नन्वभिधानस्य स्तुतित्वे तस्यैकान्तेनाभिधेयशेषत्वात्प्राधान्यसिद्धान्तायोगात् सन्देहो न स्यादित्याशङ्क्याह—**सा चेति**। अभिधेयं विनाऽभिधानानिष्पत्तेरभिधेयाभिधानारहितशब्दोच्चारणापातात् स्तुतित्वं हीयेतेत्यर्थः। नन्वेवं सति गुणगुणिनावुभावपि प्रतिस्तुतेः शेषिशेषिभावोपपत्तेर्गुणिनीं देवतामेव प्रतिगुणप्रधानभावचिन्ता न युज्येतेत्याशङ्क्याह—**तत्रेति**। मण्डूकाक्षादेरदेवतात्वेऽप्यग्निराजसूयादौ विनियुक्तत्वेन स्तुतेस्तच्छेषत्वस्य पूर्वपक्षाभिमतत्वात्सन्देहभाष्यगतस्य देवताशब्दस्य स्तुत्यमात्रौपलक्षणार्थत्वसूचनाय—**स्तुत्यस्येत्युक्तम्**। स्तुत्यं प्रति स्तुतेः साध्यत्वात्स्वभावतो शेषत्वेऽपि कैमर्थ्याकाङ्क्षायां शेषत्वं भवतीति सूचनार्थः शेषीति च्विप्रत्ययः। पूर्वपक्षसूत्रव्याख्यानार्थं तत्रेति भाष्यं सङ्क्षेपतो व्याचष्टे—**किमिति** ॥ १३ ॥

भा० प्र०—श्रुतियों में कहा गया है कि 'प्रउगं शंसति', निष्कैवल्यं शंसति, आज्यैः स्तवते, पृष्ठैः स्तवते, अर्थात् प्रउगनामक मन्त्र निष्कैवल्य नामक मन्त्र शस्त्र,

आज्य नामक मन्त्र एवं पृष्ठ नामक मन्त्र स्तोत्र है—इनका पाठ करना चाहिए। स्तोत्र एवं शस्त्र इन दोनों से स्तव करना चाहिए। प्रगीत (गेय) मन्त्र साध्य स्तव का नाम स्तोत्र है। अप्रगीत मन्त्रसाध्य स्तव का नाम शस्त्र है। 'प्रउगं शंसति आज्यैः स्तवते' इत्यादि वचनों में स्तोत्र और शस्त्र पाठ्य के रूप में जो निर्दिष्ट हैं, वे स्तोत्र, शस्त्रपाठ गुणकर्म हैं कि प्रधान कर्म हैं—यह संशय होता है। इस संशय में पूर्वपक्षी का कहना है कि 'स्तुतशस्त्रयोस्तु संकारो याज्यवत् देवताभिधानत्वात्' याज्य आदि मन्त्रों के पाठ से जैसे देवता की स्मृति होती है, इस स्थल में भी स्तोत्र शस्त्र के पाठ से भी वैसे ही देवता का स्मरण होंगे। स्मरण के द्वारा देवता का संस्कार होता है, इसीलिए 'यैस्तु द्रव्यं चिकीर्ष्यते' इत्यादि नियमों के अनुसार—यह गुण कर्म है।

'स्तुत शस्त्रयोः' = स्तोत्र एवं शस्त्र में 'तु' = संशय में, 'संस्कारः' = देवता के स्मरण से देवता का संस्कार अर्थात् गुणकर्म है, 'याज्यवत्' = याज्य के समान अर्थात् याज्य मन्त्र के समान, 'देवताभिधानत्वात्' = क्योंकि देवता का अधिान अर्थात् प्रकाश होता है। याज्य मन्त्र के द्वारा जैसे देवता का संस्कार अर्थात् स्मृति से संस्कार अर्थात् स्तोत्र एवं शस्त्र ये दोनों गुण कर्म होंगे। क्योंकि, उनसे देवता का अभिधान, अर्थात् प्रकाश या स्मरण होता है ॥ १३ ॥ पूर्वपक्षी।

अर्थेन त्वपकृष्येत देवतानामचोदनार्थस्य गुणभूतत्वात् ॥ १४ ॥ सि० ॥

शा० भा०—यदि संस्कारकर्मणी एव[1] स्तोत्रशस्त्रे, अर्थेनापकृष्येत, देवतानाम्नश्चोदनार्थस्य[2] गुणभूतत्वाद्, देवतार्थस्य गुणभूतो मन्त्र इति तत्प्रधान भावे, यत्र प्रधानं, तत्र नीयेत। तत्र क्रमसंनिधी उपरुध्येयाताम्। तस्मादेष दुष्टः पक्ष इति पर्युदसितव्यः कतमः पुनरसौ मन्त्रः? अभि त्वा शूरेत्यैन्द्रः प्रगाथो माहेन्द्रस्य ग्रहयजेः संनिधावाम्नातो यत्रेन्द्रः तत्रापकृष्येत ॥ १४ ॥ सिद्धान्तः।

भा० वि०—सिद्धान्तसूत्रमवतार्य व्याचष्टे—**यदीति**। चोद्यत इति चोदना स्तुतिः देवतानामसंयुक्ता चोदना देवतानामचोदना सा अर्थेन प्रकाश्यतया प्रयोजनभूतेनेन्द्रादिना अपकृष्येतेत्यर्थः। कुत इत्यपेक्षायां हेतुमादाय व्याचष्टे—**अर्थस्येति**। देवतार्थस्येति देवतारूपमर्थं प्रतीत्यर्थः। स्तुतिविशेषस्य मन्त्रविशेषसाध्यत्वान्मन्त्रशब्देन स्तुतिरभिप्रेता ततः किमत आह—**तत्प्रधानभाव इति**। तस्यार्थस्य प्रधानत्व इत्यर्थः। नन्वपकर्षेऽपि को दोषस्तत्राह—**तत्रेति**। सन्निधिशब्देनात्र रथन्तरं पृष्ठं भवतीति पृष्ठाख्यस्तोत्रसाधनरथन्तरसामविधिना तद्यो-

---

१ ब. एवपदंनास्ति। २ ब. नामचोदनार्थस्य।

नित्वेनैन्द्र्या बृहत्या ऋचि उपस्थापनमुच्यते। क्रमशब्देन च यद्योन्यां तदुत्तरयोर्गायतीति वचनादृगन्तरापेक्षायामुत्तरार्थपाठक्रमानुरोधेन पङ्क्तिच्छन्दस्काया उपनयनमुच्यते। एताभ्यां च ग्रहेज्याप्रकरणसहिताभ्यां तदङ्गत्वावगम उत्कर्षाभ्युपगमे बाध्यतेत्यर्थः। प्रमाणविरोधेनोत्कर्षासंभवफलमाह—**तस्मादिति**। एषा इति संस्कारकर्मत्वपक्ष इत्यर्थः।

ननु के ते स्तोत्रशस्त्रे? ययोरर्थवशादुत्कर्ष आपाद्यत इति शङ्कापूर्वकं ते दर्शयति—**कतमः पुनरिति**। प्रगाथ इत्यावृत्तिगुणकस्य ऋग्द्वयस्य संज्ञा आवृतिश्च तयोः पूर्वा बृहती ककुभा क उत्तरे इति वचनात् प्रथमाया बृहत्याश्चतुर्थपादेन द्वितीयायाश्चार्धर्चेनैकां ककुभं कृत्वा द्वितीयादि पादत्रयेणापरस्या अपि करणाद्भविष्यतीत्यवधेयम्॥ १४॥

त० वा०—प्रमाणान्तरविरोधेन दूषणं तावदुच्यते। तथा हि—

यद्यत्राविद्यमानार्थो मन्त्रः स्तोतुं प्रयुज्यते।
तस्यार्थेनापकृष्टत्वात्प्राप्तबाधः प्रसज्यते॥

या यद्देवतानामसंयुक्ता—स्तुतिचोदना भावनेति यावत्, चोद्यमानत्वात्। सा तदर्थपरत्वात्, तस्मिन्नसति न स्वार्थं करोतीति, तद्वशेनैन्द्रीस्तुतिर्माहेन्द्रग्रहयजिसंनिधिमुल्लङ्घ्य, यत्रेन्द्रस्तत्र गच्छेत्। ततश्च क्रमसंनिधिबाधः। क्रमश्चात्र यथासंख्येनोत्तरासु पाठः। संनिधिस्तु रथन्तरचोदनयोपस्थानम्, प्रकरणपरामर्शो वा॥ १४॥

न्या० सु०—ननु यत्रेति वार्थवत्त्वात्स्यादिति सूत्रे पूर्वपक्षिणोत्कर्षस्याभ्युपेष्यमाणत्वादनिष्टापत्तिर्दोषाभिधानमयुक्तमित्याशङ्क्याह—**प्रमाणेति**। क्रमसन्निधाख्यप्रमाणद्वयविरोधोऽनेन सूत्रेण पूर्वपक्षेऽभिधीयते, नानिष्टापत्तिरित्यर्थः। नान्वाम्नातेष्विति वक्ष्यमाणानर्थक्यापत्तिदोषान्तरसूचनार्थस्तावच्छब्दः। कीदृग्दूषणमित्यपेक्षायामाह—**तथा हीति**। यस्मात् संस्कारकर्मत्वे यत्र स्तोत्रे अविद्यमानार्थो मन्त्रः प्रयुज्यते, तस्य स्तोत्रस्य मन्त्रप्रकाश्येन देवतारूपेणाऽर्थेन स्तोत्रप्रयोजनेनाऽपकृष्टत्वात् क्रमसन्निधिप्राप्तस्याविद्यमानार्थमन्त्रसाध्यस्य स्तोत्रस्य बाधः प्रसज्यतइति। यस्माच्छब्दार्थे यदित्यव्ययं व्याख्येयम्। स्तौतिशंसतिवाक्यविहिताया अपि स्तुतेर्मन्त्रविशेषसाध्यत्वं विना विशेषरूपानवधारणेन देवतासंस्कारत्वायोगान्मन्त्रापकर्षेण भाष्यकृता स्तुत्यपकर्षस्याप्युक्त्यवगतेः, स्तुत्या एव च संस्कारत्वनिमित्तापकर्षस्य वक्तुं युक्तत्वात्, चोदनाशब्देन च स्तुत्यपकर्षस्यैव सूत्रकृतोक्तत्वात्, स्तोत्रस्यापकृष्टत्वादित्युक्तम्। तस्मात्संस्कारपक्षो दुष्ट इति शेषः। उक्तेऽर्थे यथापूर्वं भाष्यं सूत्रं योजयति—**येति**। कोऽपकर्षे दोष इत्याशङ्कानिरासार्थं तत्रेति भाष्यं व्याचष्टे—**ततश्चेति**। ननु क्रमसन्निधिशब्दयोः स्थानाख्यपञ्चमविनियोगप्रमाणवाचित्वेनैकार्थ्याद्भेदोपादानमयुक्तमित्याशङ्क्याह—**क्रमश्चेति**। येन क्रमेण यजुर्वेदे

ग्रहयागाभ्यासा विहिताः। तेनैव क्रमेण सामवेदे तदङ्गभूतानि स्तोत्राणि ब्राह्मणेन विहितानि। तेनैव च क्रमेणोत्तराग्रन्थे स्तोत्रसाधनभुता ऋचः पठिताः। मन्त्रानपेक्षायाः स्तुतेरपकर्षायोगात् स्तुत्यपकर्षेण मन्त्रापकर्षेऽपि लक्षणान्मन्त्रक्रमाभिधानविरोधः, रथन्तरं पृष्ठं भवतीति चोदनाया रथन्तरयोनित्वेनाभित्वा शूरेत्यृगुपस्थापनम्। एकं साम तृचे क्रियते स्तोत्रियमिति च स्तोत्रसाधनभूतस्य साम्नस्तृचाधारत्वश्रुतेः। ऋगन्तरापेक्षायां 'यद्योन्यां गायति, तदुत्तरयोर्गायती'ति योन्युत्तरर्गपेक्षया त्रित्वपूरण-विधानादुत्तराग्रन्थे च तदुत्तरत्वेन नत्वावामित्यृचः पाठादुपस्थापनम्। त्रित्वपूरणं तु तयोः 'पूर्वा बृहती, ककुभावुत्तरे' इति वचनात् प्रथमायाश्चतुर्थपादेन द्वितीया-याश्चार्द्धर्चेनैकं ककुभं कृत्वा, द्वितीयायां द्वितीयादिपादत्रयेणापरां कृत्वा प्रगाथसंज्ञा या आवृत्त्या भविष्यतीति भाष्यकृता प्रगाथशब्देन सूचितम्। एवं तु क्रमहेतुकोपस्थापन-मात्रवाचित्वात्सन्निधिशब्देन च प्रमाणान्तरानभिधानापत्तेः क्रमसन्निधी उपरुध्येयाता-मिति द्विवचनानुपपत्तिप्रसङ्गादपरितोषेण प्रकरणपरामर्शो वेत्युक्तम्। प्रकरणादृध्यैन्द्रस्य प्रगाथस्य ज्योतिष्टोमाङ्गत्वेऽवगतेऽपि, द्वारविशेषापेक्षायां पृष्ठाख्यस्तोत्रद्वारत्वं क्रमादव-गम्यतइत्याशयः। प्रकरणेन क्रियारूपस्य मन्त्रस्येतिकर्त्तव्यतात्वेनाऽग्रहणेऽपीति-कर्त्तव्यताभूतस्तोत्रसाधनसामाधारत्वेन सन्निधिं परामृश्य ग्रहणात्साकाङ्क्षफलवत्सन्नि-धानलक्षणप्रकरणावयवभूतोऽत्र सन्निधिर्विवक्षित इति सूचनार्थः परामर्शशब्दः॥ १४॥

भा० प्र०—पूर्वपक्षी ने स्तोत्र एवं शस्त्र को गुणकर्म कहा है—किन्तु यह मानने पर इन मन्त्रों को अपने स्थान से हटाना पड़ेगा। क्योंकि, देवता का स्मरण करना ही इन मन्त्रों का प्रयोजन मानने पर मन्त्र से जो देवता का प्रकाश होगा, उस देवता का प्रकरण में ही उसका पाठ उचित होगा। स्तोत्र एवं शस्त्रमन्त्र माहेन्द्रग्रहयाग के सन्निधान में पठित है। इस स्थल में पाठ्य 'अभित्वा शूर' इत्यादि मन्त्र ऐन्द्र, 'प्रगाथ' अर्थात् इन्द्रदेवता सम्बन्धीय 'प्रगाथ', चरण के ऋग् मन्त्र का अंश सन्निवेश-विशेष के अनुसार जो मन्त्र पाठ विशेष उसका नाम 'प्रगाथ' है। इसको दूसरे शब्दों में प्रगथन कहा जाता है। अतः, स्तोत्र-शास्त्र पाठ को गुणकर्म कहने पर मन्त्र महेन्द्र देवता के ग्रहयोग समीप में पठित होने पर भी उनका अर्थों के अनुरोध से उनके स्थानान्तर करने पर हटा लिया जायेगा, कारण वे इन्द्रदेवता के ही स्वरूप प्रकाश करते हैं, इन्द्रदेवता एवं महेन्द्र देवता एक नहीं है, इसलिए सन्निधिबाध होने से—वह गुण कर्म नहीं है, अपितु अर्थ कर्म अर्थात् प्रधान कर्म है।

'अर्थेन' = कार्य के प्रयोजन के लिए अर्थात् अनुरोध में 'तु' = पूर्वपक्ष का निवारक 'अपकृष्यते' = अपकर्ष अर्थात् अपने स्थान से प्रच्यवित करना होगा, देवतानाम-चोदनार्थस्य' = देवता स्मरण रूप कार्य का 'गुणभूतत्वात्' = गुणभूत होने से। स्तोत्र एवं शस्त्र को गुणकर्म मानने पर प्रयोजन या कार्य के अनुरोध से इन मन्त्रों का

उत्कर्ष करना होगा अर्थात् अपने स्थान से हटाना होगा, क्योंकि देवता स्मरणरूप कार्य के लिए ही पढ़ा गया है ॥ १४ ॥

वशावद्वाऽगुणार्थं स्यात् ॥ १५ ॥

शा० भा०—न पर्युदसिष्याम इमं पक्षम्, संस्कारकर्मणी एव स्तोत्रशस्त्रे, देवताभिधानत्वादेव । यत्तूक्तं[1], प्रगाथस्योत्कर्ष इति । तन्न । इन्द्रशब्देन महेन्द्रोऽभिधायिष्यते, स एवेन्द्रो महत्त्वेन गुणेन महेन्द्र इत्युच्यते । प्रत्यक्षं हीन्द्रशब्दं देवतावचनमुपलभामहे, महत्त्ववचनं[2] च महच्छब्दम् । यथा, राजा महाराजः । ब्राह्मणो महाब्राह्मण इति ॥

वशावत् । यथा, सा वा एषा सर्वदेवत्या, यदजा वशा, वायव्यामालभेतेत्यजावशाशब्देन चोदिते कर्मणि च्छागशब्देन निगमा भवन्ति, तद्वत् सगुणे चोदिते निर्गुणेनऽभिधानं भविष्यति । ते न भविष्यत्युत्कर्ष इति ॥ १५ ॥ आशङ्का ।

भा० वि०—अत्रापि मन्त्रशब्देन प्रगाथशब्देन च तत्साध्यास्तुतिरभिप्रेता संस्कारकर्मत्वेऽप्युत्कर्षस्य परिहर्तुं शक्यत्वान्न प्रमाणविरोधः इति पूर्वपक्ष्येकदेशी शङ्कते—**वशावदिति** । वा शब्दार्थमाह—**न पर्युदसिष्याम इति** । संस्कारपक्षापरित्यागे दृष्टोपकारित्वेमेव हेतूकरोति—**देवतेति** । तत्र परोक्तं दोषमनुभाष्यागुणार्थाः स्यादिति सूत्रावयवेन परिहरति—**यत्त्विति** । सन्निहितातिक्रममात्रवाचित्वेनैकार्थ्यादपकृष्येतेत्युक्तस्योत्कर्षशब्देनानुवादाविरोधः । यद्यपि विधौ महेन्द्रः श्रुतः तथापि तस्य गुणरहितस्य प्रकाशनार्थमभिधानं स्यादिति सूत्रार्थोऽनेन दर्शितः ।

ननु रूढमहेन्द्रशब्दवाचस्येन्द्रशब्दवाच्यादन्यत्वात् कथं तेन तदभिधानमत आह—**स एवेति** । ननु बलवद्रूढिविरोधे कथं योगाश्रयणमत आह—**प्रत्यक्षं हीति** । क्लृप्तावयव शक्तिसंभवे समुदायशक्तिकल्पनानुपपत्तेरिति भावः ।

नन्वैक्येऽपीन्द्रमहेन्द्रयोः महत्त्वगुणविशिष्टस्यैव विधौ देवतात्वश्रुते शुद्धप्रकाशकस्य मन्त्रस्योत्कर्षः स्यादित्याशङ्क्य दृष्टान्तं व्याचष्टे—**वशावदित्यादिना** । अजावशाशब्देनेति । वशात्वगुणविशिष्टाजावाचिशब्देन द्रव्यमभिधाय विहिते कर्मणीत्यर्थः । छागशब्देन केवलेन युक्तो निगमो मन्त्रशब्दागतस्य वपाया इत्यादिः प्रकरणलभ्यत्वाद्विशेषस्येति भावः । गुणे गुणवद्देवताक इत्यर्थः । निर्गुणेन गुणानविधायिना शब्देन देवताभिधानं भविष्यतीत्यर्थः । अभिहितस्यापि गुणस्य प्रकरणाल्लाभे फलितमाह—**न भविष्यतीति** ॥ १५ ॥

---

१ ब. यदुक्तं । २ ब. महत्त्वगुणवचनं ।

त० वा०—नायं दोषः । किं कारणम् ?

तत्र मन्त्रोऽपकृष्येत यत्र सोऽर्थान्तरं व्रजेत् ।
अभिवत्योऽर्थवत्यस्तु साम्यादिन्द्रमहेन्द्रयोः ॥

य एव हि अभिवतीभिरिन्द्रः स्तूयते, स एव माहेन्द्रग्रहेणेज्यते । तत्र सत्येवार्थे किमित्यपकर्षः स्यात् । न च यावत्कर्माङ्गभूतेऽर्थे विद्यते, तत्सर्वं मन्त्रेणाभिधातव्यम् । न्यूनम् अधिकं वाऽसौ यदभिधातुं समर्थः । तदभिधत्ते । तेन निर्गुणेन्द्रप्रकाशनम्, गुणस्यातन्त्रत्वात्, प्रकरणलभ्यत्वाद्वा निर्गुणद्रव्यप्रकाशनवदेव । न च शब्दमात्रं देवतेति नवमदशमयोरभिधास्यते । ततश्च य एव महेन्द्रशब्देनार्थश्चोदितः स एवेन्द्रशब्देनोच्यत इत्यर्थान्तरत्वकल्पनाप्रमाणाभावात् । तस्मादुत्कर्षोपलम्भाभावात्संस्कारकर्मकत्वमेव युक्तमिति ॥ १५ ॥

न्या० सु०—न पर्युदसिष्याम इति भाष्यात् पूर्वपक्षसमर्थनायैतत् सूत्रमित्याभाति । तत् पूर्वपक्षिणोऽप्युत्कर्षस्याभिमतत्वादयुक्तमाशङ्क्य पूर्वपक्षैकदेशी प्रमाणविरोधाख्यं दोषमनेन सूत्रेण परिहरतीति व्याख्यातुमाह—**न्यायमिति** । प्रश्नपूर्वकं दोषपरिहारमुपपादयति—**किमिति** । श्लोकं व्याचष्टे—**य एवेति** । सन्निहितातिक्रममात्रवाचित्वेनोत्कर्षापकर्षशब्दयोरैकार्थ्यादपकृष्येतेत्युक्तस्योत्कर्षशब्देनानुभाषणाविरोधोऽपकर्षः स्यादित्यनेन सूचितः । नन्वैक्येऽपीन्द्रमहेन्द्रयोर्माहेन्द्रं ग्रहं गृह्णातीति महत्त्वगुणविशिष्टस्य देवतात्वश्रुतेः । शुद्धप्रकाशकस्य मन्त्रस्यापकर्षः स्यादित्याशङ्कानिरासार्थत्वे यथा वशात्वगुणविशिष्टस्याप्यजाद्रव्यस्यागुणार्थं शुद्धाजाप्रकाशनार्थमभिधानं स्यादेव । न त्वयमपकृष्यते । तथा शुद्धेन्द्रप्रकाशनार्थमप्यभिधानं स्यादेवेत्यकारप्रश्लेषेण सूत्रव्याख्यां सूचयति—**न चेति** । उत्तरसूत्रव्याख्यानार्थे भाष्ये गुणश्चानर्थकः स्यादित्यत्र च सूत्रे गुणस्य देवतात्वानन्तर्गतिनिरासाद्वशावद्वेति वाशब्देन गुणस्य देवतात्वेऽनन्तर्गतिः सूचितेति ये मन्यन्ते, तन्मतेन गुणस्यातन्त्रत्वादित्युक्तम् । आपाद्यापि तु निरासोपपत्तेर्वशादृष्टान्तात्, तद्वशगुणे चोदित इतिभाष्याच्च गुणस्य देवतात्वान्तर्गतिः । तद्विरुद्धाया निरुपपत्तिकायाश्चानन्तर्गतेः । शङ्कितुमशक्यत्वात्स्वमतेनान्तर्गतस्यापि गुणस्य महत्त्वविशिष्टदेवताप्रकरणेन लभ्यमानस्मरणत्वादित्युक्तम् । निर्गुणशब्देनाकारप्रश्लेषो गुणार्थमिति सूत्रावयवे सूचितः । वशात्वगुणस्यातन्त्रत्वाभावात् अनन्तरपक्ष एव दृष्टान्तः ।

ननु शब्दमात्रस्य देवतात्वादिन्द्रमहेन्द्रशब्दयोश्च भेदात्कथं देवतैक्यमित्याशङ्क्याह—**न चेति** । नवमे अपि वाशब्दपूर्वत्वाद्यज्ञकर्मप्रधानं स्याद गुणत्वे देवताश्रुतिरि(९-१-१)तिसूत्रे भूतभव्यसमुच्चारणन्यायेन देवता यागं प्रति गुणत्वेऽभिहिते, ननु कर्मणोऽपीप्सितादभिप्रेतत्वं देवताया गम्यत इत्याशङ्क्य नास्या अभिप्रेततामपह्नुमहे तद्धितशब्देन, चतुर्थ्या वा संयुक्तस्य देवतार्थस्य वाक्यादभिप्रेततागम्यत इति भाष्येणानर्थकवर्णमूहस्य प्रातिपदिकत्वाभावे तद्धितचतुर्थीसंयोगायोगात्तत्संयोगाभिधानेनार्थग्रहणेन शब्दमात्रस्य देवतात्वं निरस्तम् ।

दशमे च विधिशब्दस्य मन्त्रत्वे भावः स्यात्तेन चोदने(१०-४-१३३)त्यत्रावाहनादौ येन केन चित्पर्यायेण देवताभिधानसिद्धेर्विधिगतान्याग्न्यादिशब्दानादर इति पूर्वपक्षयित्वा, आग्नेयोऽष्टाकपाल इति विधिगतेनाग्निशब्देन देवताया हविःसम्बन्धविधानात् मन्त्रकार्ये देवतोद्देशे विधिगतस्यैव शब्दस्योच्चारणं कार्यमिति सिद्धान्तिते, का पुनरियं देवतानामेति पृष्टेवेन्द्रादीनां द्युस्थानां यत्र वा वेदेऽग्निर्देवता वातो देवतेत्यादि र्देवताशब्दः प्रयुक्तः। सा देवतेति परमतद्वयमहःशार्दूलादीनामनुपसंग्रहापत्तेर्निरस्य, स्वमतेन सूक्तभाजो हविर्भाजश्च देवता इति भाष्येणाग्निदैवत्यं सूक्तम्मग्निदैवत्यं हविरित्यादिप्रयोगादाहुतिभाजो वा अन्या देवता अन्या स्तोमभाजः, छन्दोभाजश्चेति लिङ्गाच्च सूक्तस्तुत्यत्वस्य त्यज्यमानहविरुद्देश्यत्वस्य च देवतात्वाभिधानादर्थस्यैव स्तुत्यत्वोद्देश्यत्वावगतेः, मूर्त्तानाममूर्त्तानां चेतनानामचेतानानां च श्रुत्या कं चिदर्थं प्रति तादर्थ्येन सङ्कल्पनीयानां देवतात्वं भविष्यतीति च भाष्येण मूर्त्तानां चेतनानां देवतात्वाभिधानाद्यस्य वाचकं शब्दमुद्दिश्य, स्मृत्वा वा हविस्त्यक्ष्यामीति सङ्कल्पः क्रियते, सा भवतीति च भाष्येणोच्चारणार्थत्वाद्दिशेरुच्चार्यमाणेन शब्देन; 'प्रजापतिं मनसा यजेते'त्यादिविधौ वा स्मर्यमाणेन वाच्यस्य देवतात्वाभिधानात् नन्वेवं सति सुतरां च येन केन चिदग्निशब्देन निर्देशः करणीय इति वाशङ्क्य भवेदेवं यद्यग्निशब्दोऽग्निप्रत्यायनार्थमुच्चार्येत, अपि तु हविःसम्बद्धार्थं प्रत्याय्येतेत्युपक्रम्य देवतायाश्च यज्ञसाधनभावेन रूपेण भवति, केन तर्हि सम्बन्धिना शब्देनेत्यादिना भाष्येण शब्दसम्बन्धितद्व्यतिरिक्ताभिधानाच्छब्दस्य देवतात्वं निरस्तं भवति। नन्वार्थस्यापि देवतात्वे कथमैक्यनिश्चयः अत आह—**ततश्चेति**। प्रमाणविरोधाख्यदोषपरिहाराशङ्कामुपसंहरति—**तस्मादिति** ॥ १५ ॥

भा० प्र०—पूर्वपक्षी ने सिद्धान्तियों के उत्तर में कहा है कि इन्द्र देवता के स्थान में प्रगाथ का अपकर्ष करना होगा—यह जो कहा गया है—वह सङ्गत नहीं है, क्योंकि, इन्द्र एवं महेन्द्र विभिन्न देवता नहीं हैं, अपितु महाराज आदि शब्दों के समान इन्द्र ही महत्त्व गुणों के योग से महेन्द्र नाम से अभिहित होता है। जैसे अन्यत्र श्रुतियों में 'सा वा एषा सर्वदेवत्या यदजा वशा। वायव्यमालभेत' यह जो वशा=वन्ध्या अजा है, यह सभी देवताओं का भोग्य है, वायव्य=वायु देवता के उद्देश्य से श्वेतवर्ण का अजा का वध करे, इस प्रकार कहकर आगे 'छागस्य वपायाः' छाग की वपा का=वसा का इत्यादि में वशा अर्थात् वन्ध्यात्वगुणविशिष्ट अजा न कहकर केवल निर्गुण छागे शब्द का प्रयोग कर निगम = उपसंहार किया गया है। इस स्थल में भी उसी प्रकार इन्द्र शब्द का प्रथम में निर्गुण भाव से कहकर आगे महत्त्वगुणविशिष्ट विशिष्ट रूप में उल्लेख किया गया है। कारण, 'महान् वा अयमभूद् यो वृत्रमवधीत्' इस श्रुति में कहा गया है कि इन्द्र ने वृत्र का वधकर महान् अर्थात् महेन्द्र हुए हैं; इसलिए इन्द्र एवं महेन्द्र एक या अभिन्न देवता होने से इस स्थल में गुणकर्म मानने पर भी प्रगाथ का उत्कर्ष नहीं करना होगा।

'वशावत्'=वशा के समान, 'वा'=आशङ्का का सूचक है, 'गुणार्थं स्यात्'=गुणार्थं अर्थात् अन्य के गुण का प्रकाशक होगा। यह आशङ्का है ॥ १५ ॥

न श्रुतिसमवायित्वात् ॥ १६ ॥

शा० भा०—नैतदेवम्। इन्द्रऽस्य ग्रहणस्य देवतेति तद्धितसंयोगेन विज्ञायते। न चास्य महत्त्वमपेक्षमाणस्य तद्धितसंयोग उपपद्यते। तद्धितसंयोगापेक्षस्य वा महत्त्वसम्बन्धात् समासकल्पना।

न च तद्धितार्थे वृत्तस्य महत्त्वसम्बन्धः। न च समासार्थे वृत्तस्य। तद्धितसम्बन्धः। न चास्मिन्नेव प्रयोगे समासार्थे वृत्तिरिष्यते, एतस्मिन्नेव तद्धितार्थे। न चायमिन्द्रशब्दोऽविहितवत् स्वार्थम्, तद्धितार्थेन सम्बध्येत, विहितवच्च परार्थं महत्त्वेन सम्बन्द्धुमनूद्येत। विस्पष्टश्चायमन्योऽर्थोमहेन्द्रो भवति। महानिन्द्रो भवतीति[1] महेन्द्रः। अन्यश्चेन्द्रो हविषो देवता भवतीति, सकृदुच्चारणे च नोभयं शक्येत। तस्मान्नेन्द्रो देवता महत्त्वविशिष्टः। महेन्द्रशब्दात्तु तद्धित उत्पन्नः। तस्मात्तत्प्रातिपदिकमर्थवदिति गम्यते, न त्ववयवसम्बन्धेन। तस्माद्देवतान्तरमिन्द्रान्महेन्द्रः। तेनैन्द्रस्य प्रगाथस्योत्कर्षः प्राप्नोति। अतः पर्युदसितव्य एष पक्षः।

यदप्युच्यते इन्द्रस्य वृत्रवधोत्तरकालं महेन्द्रत्वं दर्शयति 'महान् वाऽयमभूद, यो वृत्रमवधीत्' इति। तथा वेदस्यादिमत्तादोषः प्रसज्येत। अतोऽन्य इन्द्रो महेन्द्रात् ॥ १६ ॥ आशङ्कानिरासः ॥

भा० वि०—तदेतत्परिहरति—**न श्रुतिसमवायित्वादिति।** तत्रेदं वक्तव्यम्—यथात्वमग्ने प्रथमो मनोतेत्यत्राग्निशब्दः प्रकरणसामर्थ्यादग्नीषोमौ लक्षयति तथा प्रगाथस्येन्द्रशब्दः प्रकरणान्महेन्द्रं लक्षयिष्यति ततश्च देवतैक्यान्नोत्कर्ष इत्यभिमतं किंवा माहेन्द्रं गृहं गृह्णातीत्यत्रापि इन्द्र एव देवतात्वेन विधीयते न महेन्द्रः तत्र च देवतैक्यादनुत्कर्ष इति न तावदाद्य इति दर्शयन् नञर्थमाह—**नैतदिति।**

अयमाशयः—मनो तायै हविषोऽवदीयमानस्यानुब्रूहि इति प्रैषसामर्थ्यान्मनोतासूक्तस्य हविर्देवतास्मृत्यर्थत्वावगतेः सोमसहितस्य चाग्नेर्देवतात्वात् युक्ता तत्र लक्षणा। ऐन्द्रप्रगाथस्य हविर्देवतास्मृत्यर्थत्वे प्रमाणाभावात् स्वरूपमात्रेणेन्द्रस्य स्तुत्यर्थं प्रकाश्यत्वोपपत्तेर्नात्र लक्षणा युक्तेति द्वितीयं निराकुर्वन् सूत्रशेषं व्याचष्टे—**इन्द्रोस्येति।** तद्धितसंयोगेति, तद्धितेन सहेन्द्रशब्दस्यैकार्थीभावेनेत्यर्थः। अस्त्वेवं ततः किमित्याशङ्क्य किमिन्द्रशब्दस्य युगपत्तद्धितमहच्छब्दाभ्यां

---

१ ब. भवतीत्यन्यश्चेन्द्रो।

सम्बन्धः क्रमेण वेति विकल्प्याद्यं दूषयति—**न चेति**। अकृते हि समासे शुद्धस्येन्द्रस्य महत्त्वसापेक्षत्वात्तद्धितार्थोपसर्जनत्वाच्च न तद्वाचिन इन्द्रशब्दस्य तद्धितेन सम्बन्धः। एकार्थीभाव उपपद्यत इत्यर्थः। नापीन्द्रशब्दस्य शुद्धस्य तद्धितसंयोगापेक्षस्य महत्त्वसम्बन्धान्महच्छब्देनैकार्थीभावात् समासकल्पना युक्ता, प्रातिपदिकावस्थस्य तद्धितापेक्षत्वात्सुबन्तस्य च समासोपगमाद्युगपच्च सुबन्तत्वासुबन्तत्वयोरनुपपत्तेरित्याह—**तद्धितेति**। नोपपद्यत इत्यनुवर्तते, एवं यौगपद्यपक्षं निरस्य क्रमपक्षं निरस्यति—**नच तद्धितार्थ इति**। तत्रापि किं प्रथमं तद्धितार्थे वृत्तस्य पश्चात्समासार्थे वृत्तिः उत प्रथमं समासार्थे वृत्तस्य पश्चात्तद्धितार्थेन तावदन्वयः। इन्द्रोऽस्य गृहस्य देवतेति प्रथमं तद्धितसम्बन्धे सत्यैन्द्र इत्युत्तरपदवृद्धिप्रसङ्गान्महांश्चासावैन्द्रश्चेति पश्चात् समासे महत्त्वस्य गृहविशेषणत्वप्रसङ्गाच्चेत्यर्थः। नापि द्वितीयइत्याह—**न च समासार्थ इति**। तत्रापि किं समस्तस्यैव तद्धितार्थे वृत्तिरुत समासान्निष्कृष्टस्य केवलस्य ? नाद्यः विशिष्टस्य समासार्थस्यैव सदेवतात्वापत्तेः। न द्वितीयः समासान्तर्गतस्येन्द्रपदस्य ततो निष्कृष्टस्य प्रातिपदिकत्वाभावेन तद्धितान्वयानापत्तेरित्यर्थः। अनेन पक्षद्वयनिरासेन तद्धितश्रुत्या समासार्थस्य विशिष्टस्यैव देवतात्वेन कर्मसमवायित्वावगमान्तशुद्धस्य देवतात्वमिति सूत्रं व्याख्यातम्। इदानीं यौगपद्यपक्षमेव दोषान्तरं वक्तुमनुवदति—**एतस्मिन्नेवेति**। तदेव दोषान्तरमाह—**न चेति**। इन्द्रशब्द इति विषयिणा विषयं लक्षयति ; तेनायमर्थः—यदायमिन्द्रतद्धितेन संबध्यते तदा स्वार्थं विहितवद्विधेयत्वादिरूपेणाभिहितो महत्त्वेन संबन्धुं परार्थं विहितवदनूद्येत ततश्च वैरूप्यदोष इति वाक्यभेदश्चानेकार्थविधानादस्मिन् पक्षे स्यादित्याह—**विस्पष्टश्चायमिति**। इन्द्रस्य महत्त्वसम्बन्धोऽन्यः। गृहस्येन्द्रदेवतासंबन्धश्चान्य इत्यर्थः। सकृदुच्चारणे चेति इन्द्रशब्दस्येति शेषः। अशक्यमिति—**अवगन्तुमिति शेषः**। ततश्चावृत्या वाक्यभेद इतिभावः। यस्मात्पक्षद्वयेऽप्यनुपपत्तिस्तस्मान्नेन्द्रश्शुद्धोदेवतेत्युपसंहरति—**तस्मादिति**। कीदृशं हीत्यत आह—**महत्त्वविशिष्ट इति**। देवतेत्यनुषङ्गः। एतदुपपादयति—**महेन्द्रशब्दात्त्विति**। न तु केवलादिन्द्रशब्दादिति तु शब्दस्यार्थः।

ननु सकलान्महेन्द्रशब्दात्तद्धितोत्पत्तिः नत्विन्द्रशब्दमात्रादिति कथमवगम्यते ? तत्राह—**तस्मादिति**। यस्मात्सकलान्महेन्द्रशब्दात्तद्धितोत्पत्तिस्तस्मादेव सकलं प्रातिपदिकमर्थवदिति गम्यते नत्ववयवस्येन्द्रशब्दमात्रस्य तद्धितसम्बन्धेन महच्छब्दस्यानर्थक्यापत्तेः निष्कर्षात्केश्यावयवानां तद्धितसम्बन्धायोगादित्यर्थः। एवं च द्रव्यैक्येऽपि सगुणनिर्गुणभेदादिन्द्रमहेन्द्रयोर्भेद इत्युपसंहरति—**तस्मादिति**। ग्रहदेवतारूपान्महेन्द्रादिन्द्रस्य भेदे फलितमाह—**तेनेति**। अतश्चोत्कर्षप्रसङ्गः निरासाय पक्ष एव पर्युदसितव्य इत्याह—**अत इति**।

ननु महत्त्वगुणस्य देवतास्वरूपान्तर्गतौ स्याद्देवताभेदः स तु सर्वत्र प्रथमं शुद्धात्मनः प्रतिपन्नदेवतात्वस्य पश्चाद्वृत्तवधोत्तरकालीनत्वाभ्युपगमे तत्प्रतिपादकवेदस्यादिमत्त्वप्रसङ्ग इति दूषयति—तथेति। महत्त्वस्य देवतास्वरूपान्तर्गतिफलमाह—अत इति॥ १६ ॥

त० वा०—नैतदस्ति निर्गुणेन्द्राभिधानादनुत्कर्ष इति। प्रसज्यत एवोत्कर्षः। कुतः ?

यद्यभेदः प्रमाणेन भवेदिन्द्रमहेन्द्रयोः।
ततोऽयं नापनीयेत भेदस्त्वत्र प्रतीयते॥

यद्यवयवव्युत्पत्त्या महांश्चासाविन्द्रश्चेत्येवं महेन्द्रशब्दमन्वाचक्षाणैस्तद्धितानुगमः क्रियेत, तत इन्द्र एव गुणमात्रविशिष्टोऽस्य ग्रहस्य देवतेति गम्येत। न त्वेवमस्ति। समुदायप्रसिद्धिबलीयस्त्वेनेन्द्रव्यतिरिक्तरूढिशब्दाभिधेयमहेन्द्रप्रतीतेः। तथा हि—

व्युत्पाद्यते महेन्द्रश्चेद्वाक्यभेदादि दुष्यति।
अव्युत्पत्तौ महेन्द्रार्थः स्फुटं वस्त्वन्तरं भवेत्॥

'**न चास्य महत्त्वमपेक्षमाणस्ये**'ति अवयवव्युत्पत्तिं निराकरोति। कथम् ?

वृत्तिद्वयेऽपि सामर्थ्यं स्मर्यते हि विशेषणम्।
व्युत्पत्त्याश्रयणे चैतदुभयत्रापि दुर्लभम्॥

'समर्थः पदविधिः'। 'समर्थानां प्रथमाद्वा' इति च समास-तद्धितवृत्त्योर्विशेषणम्। अतस्तदभावे नैकयाऽपि भवितव्यम्। यदि युगपत्समास-तद्धितावन्वाख्यायेते, ततो नैकत्रापि सामर्थ्यं लभ्यते। कुतः ?

तद्धितेन ह्यसम्बन्धो महत्त्वेऽपेक्षिते भवेत्।
तस्मिन्नपेक्ष्यमाणे च न महत्त्वेन संगतिः॥

सामर्थ्यद्वयस्याक्षेपेण पूर्वपक्षवर्णनम्

एकार्थीभावालक्षणम्, व्यपेक्षालक्षणं वा सामर्थ्यम्, उभयथाऽपि सापेक्षस्य नावकल्पते। कथम् ?

अन्यवस्त्वनपेक्षत्वे ह्यन्यैनैकार्थतेष्यते।
सापेक्षस्त्वन्यविक्षिप्तो नैकार्थ्यं प्रतिपद्यते॥

अविक्षिप्यमाणौ हि द्वावर्थावेकत्र लोलीभावं प्रतिपद्येयाताम्। न च विक्षिप्यमाणौ, नानात्वे बुद्धिकालुष्यात्। यो ह्यवयवाभ्यामेकत्रोपसंहृताभ्यामुभयविशिष्ट एकोऽर्थः प्रतिपाद्यते, सोऽपि निरपेक्षाभ्यामेव। सापेक्षत्वे संशयरूपेणैकत्रानुपसंहारात्। एवं तावदैकार्थ्यलक्षणसामर्थ्याभावः।

द्वितीयेनाक्षेपः

व्यपेक्षा पुनराहृत्य विगतापेक्षतोच्यते ।
सापेक्षत्वे च दूरेऽसावित्येवमसमर्थता ॥

न हि सापेक्षो विगतापेक्षशब्देन शक्यो वक्तुमिति, उभयसामर्थ्याभावादुभयवृत्त्यभावप्रसङ्गः । एवं तावद्युगपदव्याख्याने दोषः ।

क्रमव्याख्यानपक्षस्य निरासः

क्रमेणाऽऽख्यायमाने तु वाक्यभेदोऽसकृच्छ्रुतेः ।
कृत्वा समासमुच्चार्यं पुनः शब्दद्वयं भवेत् ॥

एतदेवाभिप्रेत्याऽऽह—**'न च तद्धितार्थे वृत्तस्येत्य'**ादि ।

तद्धितार्थे च वृत्तस्य वृद्धिः स्यादुत्तरे पदे ।
महत्त्वं द्रव्यसम्बन्धि नोपसर्जनसंगति ॥

महैन्द्र इति हि स्यात्, न चेन्द्रविशेषणं महत्त्वम् । न ह्युपसर्जनमभिभूतस्वार्थवृत्तिविशेषणान्तरैः संयुज्यते । **'न च समासार्थे वृत्तस्ये'**ति वाक्यभेदमात्रेणेवोच्यते । तेन क्रमवृत्तिरपि नास्तीति प्रतिपाद्य, पुनर्युगपद्वृत्तिमेव दोषान्तराभिधित्सयोपन्यस्यति **'एकशब्दचे परार्थवत्'** इत्यनेन न्यायेनेन्द्रशब्दस्य महत्त्वतद्धितार्थौ प्रति वैरूप्यनिमित्तवाक्यभेदप्रसङ्गः ।

विध्यनेकव्यापारात्मकश्चापरो वाक्यभेदः । तथा हि—

महत्त्वस्येन्द्रसम्बन्धं तस्य च द्रव्यसंगतिम् ।
विदधत्प्रत्ययो वाक्यं भिन्द्यात्पुनरपि श्रुतेः ॥

तस्मान्नेन्द्रो देवता महत्त्वविशिष्टः । किं तर्ह्यवयवसम्बन्धनिरपेक्षद्रूढिशब्दात्तद्धितोत्पत्तिः । अतश्च सिद्धं देवतान्तरत्वम् । न च वृत्रवधोत्तरकालं महत्त्वाभिधानेनेन्द्रस्यैव महेन्द्रत्वं भवेत्, वेदस्याऽऽदिमत्त्वप्रसङ्गात् । अतो नित्यरूढस्यैव स्तुतिमात्रार्थमेतत् ॥ १६ ॥

न्या० सु०—नत्रर्थव्याख्यानार्थं नैतदिति भाष्यं व्याचष्टे—**नेति** । इन्द्रोऽस्येत्यादिभाष्यं तद्धितश्रुत्या अश्वकर्मणादिवदवयवार्थानपेक्षस्य महेन्द्रस्य ग्रहसमवायेनेन्द्राद्भेदावगमादित्येवं श्रुतिसमवायित्वादिति सूत्रावयवव्याख्यानार्थतया परमतेन दूषयितुं प्रश्नपूर्वं व्याख्यातुमुपक्रमते—**कुत इति** । श्लोकं व्याचष्टे—**यदीति** । नन्ववयवार्थप्रत्यभिज्ञानात्समुदायशक्तिकल्पनानुपपत्तेः कथं तद्बलीयस्त्वमित्याशङ्क्याह—**तथा हीति** । ततो वाक्यभेदादिः स्यात् । तच्च दुष्यतीत्यर्थः । आदिशब्देनासमर्थ-तद्धितसामासापत्तिरुत्तरपदवृद्धिप्रयुक्तिर्महत्वस्येन्द्रविशेषणत्वानुपपत्तिश्चोक्ता । अनेन च महत्वविशिष्ट इत्यन्तं भाष्यं तात्पर्यतो व्याख्यातम् । महेन्द्रशब्दस्तु इत्युत्तरार्द्धेनावयवव्युत्पत्तिनिरासे

भाष्यं योजयितुमुपक्रमते—**न चेति**। व्युत्पत्तिशब्देनेन्द्रो महत्त्वविशिष्टोऽस्येत्यध्याहारेण पूर्वावयवव्याख्या सूचिता। कथमनेन भाष्येणावयवव्युत्पत्तिनिराक्रियेत्यपेक्षायां प्रश्नपूर्वकमुपक्रमते—**कथमिति**।

श्लोकं व्याचष्टे—**समर्थ इति**। समर्थः पदविधिरिति सूत्रात्समासवृत्तौ सामर्थ्यं विशेषणम्, समर्थानां प्रथमाद्वेत्यस्मात्तद्धितेऽपीत्यर्थः। कथमत्र सामर्थ्याभाव इत्यपेक्षायां तद्धित-समासवृत्ती युगपत्स्याताम्, क्रमेण वेति विकल्प्य, यौगपद्यपक्षे वृत्तिद्वयेऽपि सामर्थ्याभावप्रतिपादनार्थं न चास्येति भाष्यं व्याख्यातुं सामर्थ्याभावं प्रतिजानीते—**यदि चेति**। एतदुपपादनार्थत्वेन प्रश्नपूर्वं भाष्यं व्याचष्टे—**कुत इति**। उत्तरार्द्धेन तद्धितसंयोगापेक्षस्य वा या महत्त्वसम्बन्धात्समासकल्पना, सा नोपपद्यतइति नञानुषङ्गेणोत्तरावयवो व्याख्यातः ननु सामर्थ्याभावं प्रतिज्ञाय सम्बन्धाभावोपपादनमसम्बद्धमित्याशङ्क्याह—**एकार्थीभावेति**। समित्युपसर्गस्यैकीभाववाचित्वादैकार्थ्यम्। तत्कारणं चार्थान्तरानपेक्षत्वं सामर्थ्यम्। तदेव भाष्यकृतः शब्दसम्बन्धहेतुत्वात्सम्बन्धशब्देनाभिप्रेतमित्याशयः। सापेक्षत्वस्यैकार्थ्यलक्षणसामर्थ्यविहन्तृत्वं तावत्प्रश्नपूर्वकमुपपादयति—**कथमिति**। श्लोकं व्याचष्टे—**अविक्षिप्यमाणौ हीति**। विशेषणविशेष्यभूतयोरर्थयोरेकस्मिन्विशिष्टरूपेऽर्थे लोलीभावात् प्रधानचलनाद्व्यापारात्समासवृत्तिस्तद्धितवृत्तिर्वा भवति। विविधं च क्षिप्यमाणयोरन्यत्र व्याप्रियमाणयोरर्थयोस्तात्पर्यनानात्वनिमित्तात् बुद्धेः सन्दिग्धत्वरूपात्कालुष्यात् दुष्टयोर्नैकस्मिन्नर्थे व्यापारः सम्भवतीत्यर्थः।

ननु तात्पर्यनानात्वोपपत्तेः कथं सन्दिग्धत्वरूपकालुष्यापत्तिरित्याशङ्क्य सकृदुच्चरितस्यानेकतात्पर्यायोगं लोकप्रसिद्धमुदाहरति—**यो हीति**। अतः सकृदुच्चरितस्येन्द्रशब्दस्यानेकतात्पर्यायोगात् किं विशेषणेन महत्त्वेनान्वयोऽस्तु विशेष्येण वा तद्धितार्थेन ग्रहेणेति सन्देहापत्तेर्नैकार्थ्यलक्षणं सामर्थ्यं भवतीत्युपसंहरति—**इत्येवमिति**।

व्यपेक्षालक्षणसामर्थ्यविहन्तृत्वं तु सापेक्षस्यातिस्पष्टमित्याह—**व्यपेक्षा पुनरिति**। श्लोकं व्याचष्टे—**न हीति**। व्याख्यातं भाष्यार्थमुपसंहरति—**इतीति**। पूर्वोत्तरभाष्ययोर्विषयविवेकार्थं पूर्वभाष्यस्य युगपद्वृत्तिद्वयनिरासपरत्वमाह—**एवं तावदिति**। दोषः-समर्थतद्धितस्य समासापत्तिरूपः। न चेत्युत्तरभाष्यं क्रमेण वृत्तिद्वयनिरासपरतयार्थतो व्याचष्टे—**क्रमेणेति**। वक्ष्यमाणाद्वैरूप्यलक्षणादनेकार्थविधिलक्षणाच्च वाक्यभेदाद्विवेकाय, आवृत्तिलक्षणवाक्यभेदाभिधानार्थत्वमस्य भाष्यस्य वक्तुम्—**असकृदित्युक्तम्**। असकृच्छ्रुर्ति विवृणोति—**कृत्वेति**। महांश्चासाविन्द्रश्चेति विग्रहे महेन्द्र इति समासं कृत्वा तद्धितान्वये क्रियमाणे महानिन्द्रोऽस्य देवतेति व्याख्यानार्थं महदिन्द्रशब्दयोरावृत्तिप्रसङ्ग इत्यर्थः। समासशब्देन तद्धितस्याप्युपलक्षणादिन्द्रोऽस्य देवतेति विग्रहे ऐन्द्र इति तद्धितान्तत्वं कृत्वा समासे क्रियमाणे महांश्चासावैन्द्रश्चेति व्याख्यानायैन्द्रप्रातिपदिकतद्धितयोरावृत्तिः स्यादिति सूचितम्।

ननु न वाक्यभेदोऽस्माद्भाष्यान्न सम्प्रतीयत इत्याशङ्क्याह—**एतदेवेति**। क्रमेण वृत्तिद्वयनिरासस्य हेत्वाकाङ्क्षायां योग्यत्वाद्वाक्यभेदो हेतुत्वेन भाष्यकृतोऽभिप्रेतोऽव सीयत इत्याशयः। तद्धितपूर्वत्वेऽन्यदपि दोषद्वयं भाष्यकृतोऽभिप्रेतमित्याह— **तद्धितेति**। श्लोकं व्याचष्टे—**महेन्द्र इति**। वाक्यभेदमात्राभिधानं तर्हि कथमित्याशङ्क्याह—**न चेति**। समासपूर्वत्वे तदेवैकं दूषणमित्याशयः। कृत्वासमासमिति समासशब्देनाप्येतदेव सूचितम्। एतस्मिन्नेवेति युगपद् वृत्तिद्वयाशङ्काभाष्यं यौगपद्यपक्षस्य प्रागेव निरस्तत्वात्, दोषान्तराभिधित्सया वा पुनरुपन्यासे क्रमवृत्तिनिरासव्यवधानादयुक्तमाशङ्क्य व्याचष्टे —**तेनेति**। तद्धितसमासवृत्त्योः का पूर्वेत्यनिश्चयेन क्रमायोगाद्यौगपद्यमेव वृत्तिद्वय-वादिना वाच्यम्। क्रमस्त्वनादरणीय एवेति सूचनार्थं क्रमनिरासोत्तरकालं पुनर्यौग-पद्यस्योपन्यासपूर्वकं निरास इति प्रतिपाद्येति व्यपादर्शितम्।

न चायमिति वैरूप्यक्षणदोषाभिधानार्थं भाष्यं व्याचष्टे—**ऐकशब्दश्च इति**। महत्वं प्रतीन्द्रशब्दस्यानुवाद्योद्देश्यप्रधानभूतार्थवाचित्वात्तद्धितार्थं च प्रति विधेयोपादेय-गुणभूतार्थवाचित्वाद्वैरूप्यम्। विस्पष्टश्चेत्यनेकार्थविधिदोषाभिधानार्थं भाष्यं व्याचष्टे— **विधीति**। एकविधानेन चेतरानाक्षेपात्प्रत्ययावृत्तिरप्यनेकार्थविधौ स्यादित्येवमर्थत्वेन सकृदुच्चारणेन चेति भाष्यं व्याचष्टे—**तथा हीति**। तस्मादित्यवयवव्युत्पत्तिनिरासोप-संहारभाष्यमकारप्रश्लेषेणाध्याहृतशुद्धम्। कथं तर्हि शब्दकवाक्यभेदेन वा स्वमतेन व्याख्यास्यमानत्वात्परमतेऽपि तच्छङ्का प्रसज्यमानां निराकर्तुं यथास्थितं पठति— **तस्मादिति**।

नन्ववयवव्युत्पत्त्यनभ्युपगमे समासत्वाभावादर्थान्तरे चागृहीतसम्बन्धत्वेनार्थवत्त्वा-योगात्प्रातिपदिकत्वाभावेन तद्धितानुत्पत्तिः स्यादित्याशङ्क्याध्येतृप्रयुक्ततद्धितान्यथा-नुपपत्त्यैव प्रातिपदिकत्वं कल्पयित्वा तत् सिद्ध्यर्थं समासार्थयोगेनावयवार्थवत्त्व-सम्बन्धग्रहणाभावेनार्थविशेषानवधारणेऽपि कश्चिन्महेन्द्रप्रातिपदिकस्यार्थोऽस्तीति सामा-न्यतः कल्पयिष्यत इत्यभिधानार्थं महेन्द्रशब्दादित्यादिभाष्यं व्याचष्टे—**किं तर्हीति**। व्युत्पत्तिनिरासप्रयोजनाभिधानार्थं तस्मादितिभाष्यं व्याचष्टे—**ततश्चेति**। नन्विन्द्रस्य वृत्रवधोत्तरकालं महत्वयोगेन यन्महानिन्द्रोऽभवत्तन्माहेन्द्रस्य महेन्द्रत्वमिति महेन्द्र-शब्दवाच्यत्वश्रुतेः समुदायशक्तिकल्पना न युक्तेत्याशङ्कानिरासार्थं यदपीत्यादिभाष्यं व्याचष्टे—**न चेति**। रूढित्वोपपादनार्थत्वमस्य भाष्यस्य दर्शयितुम—**अत इत्युक्तम्**। ॥ १६ ॥

भा० प्र०—पूर्वपक्षी का यह कथन युक्तिसङ्गत नहीं है, कारण, 'श्रुतिसमवायि-त्वात्' श्रुति में 'ऐन्द्र प्रगाथ'—यह कहा गया है। ऐन्द्र यह पद इन्द्र शब्द से तद्धित प्रत्यय करने से सिद्ध होता है। किन्तु इन्द्र शब्द महत् शब्द के प्रति साकाङ्क्ष मानने पर उसके आगे तद्धित प्रत्यय नहीं हो सकता है। यदि उससे तद्धित प्रत्यय माना जाय तो महत् शब्द के साथ उसकी साकाङ्क्षता नहीं रहेगी एवं समास भी नहीं हो

सकता है, कारण 'समर्थः पदविधिः' (पा० २।१।१) एवं 'सापेक्षं ह्यसमर्थं' इस शबर स्वामी की प्राचीन उक्ति के अनुसार सापेक्ष पद असमर्थ होने से उसका समास नहीं होगा और न उससे तद्धित प्रत्यय ही होगा, अतः ऐन्द्र यह पद तद्धितान्त होने से यह विभिन्न देवता का ही प्रकाशक है—यह मानना होगा। श्रुति में इन्द्र को ही वृत्र के वध के लिए जो महेन्द्र शब्द से कहा गया है—उसका स्वतन्त्र अर्थ है। इसलिए इन्द्र एवं महेन्द्र एक नहीं है, वरन् यह विभिन्न देवता हैं और विभिन्न देवता होने पर महेन्द्र ग्रहयाग के सन्निधान में पठित इन्द्र प्रकाशक प्रगाथ का स्थान त्याग न कराने पर उसको गुणकर्म नहीं कहा जा सकता है। अतः पूर्वपक्ष में दोष रह ही जाता है।

'न'=नहीं, इस प्रकार कहने पर प्रगाथ का स्थान त्याग नहीं होगा यह नहीं है, 'श्रुति समवायित्वात्'-क्योंकि मन्त्र श्रुति का अर्थात् इन्द्र पद श्रुति के साथ समवेत होने से या श्रुति के साथ अर्थात् देवतावाचक तद्धित श्रुति के साथ समवेत रहता है। आशङ्का का परिहार ॥ १६ ॥

व्यपदेशभेदाच्च ॥ १७ ॥

शा० भा०—व्यपदेशभेदश्च भवति। बहुदुग्धीन्द्राय देवेभ्यो हविः, इति, बहु दुग्धि महेन्द्राय देवेभ्यो हविरिति। अतोऽपि देवतान्तरम्। एकदेवतात्वे मन्त्रविकल्पः स्यात् ॥ १७ ॥

भा० वि०—इतश्चेन्द्रादन्यो महेन्द्र इत्याह—**व्यपदेशाच्चेति**। विशब्दं भेदविषयमङ्गीकृत्येन्द्रमहेन्द्रयोर्भेदनापदेशादिति व्याचष्टे-**व्यपदेशश्चेति**। देवतान्तरमिति। इन्द्रोमहेन्द्रादित्यनुषङ्गः कथं व्यपदेशभेदस्य देवताभेदहेतुतेत्यपेक्षायामाह—**एकदैवत्यत्व इति**। विकल्पे च पक्षे बाधप्रसङ्गः स च देवताभेदेन मन्त्रयोर्व्यवस्थासंभवे न युक्त इति भावः ॥ १७ ॥

त० वा०—व्यपदेशभेदाच्च भेदः। एवं च मन्त्रयोर्व्यवस्था भविष्यति। इतरथा विकल्पे पक्षे बाधः स्यात्। असति चार्थभेदे मन्त्रभेदस्यादृष्टार्थता प्रसज्येत।

तस्माद्यथैव सूर्यादेरिन्द्रादत्यन्तभिन्नता।
महेन्द्रस्य तथैवेति प्रगाथापनयो भवेत् ॥
एवं व्याख्यायमाने तु रूढित्वे तद्धिते सति।
अग्नीषोमादयः सर्वे रूढित्वान्न द्विदेवताः ॥

यथैव हीन्द्रशब्दस्य महत्त्व-तद्धितावपेक्षमाणस्य युगपत्, क्रमेण वा वृत्तिर्न सम्भवति, एवमेव सोमस्याग्निमपेक्षमाणस्य न तद्धितसम्बन्धः तदपेक्षस्य वा नाग्निना सह समासः। तथा क्रमवृत्तौ पुनरुच्चारणे वाक्यभेदान्नान्यतरत्र वृत्त-

स्यान्यतरेण वृत्तिः, सोमपदस्य वैरूप्यम्, प्रत्ययस्यानेकार्थवृत्तिरिति दोषाणां साम्येनारूढित्वप्रसङ्गात्समस्तद्विदेवत्यत्वव्यवहारोच्छेदः स्यात्।

न चैषां रूढित्वं शक्यं वदितुम्, सर्वत्र शास्त्रे द्विदेवत्यत्वाभ्युपगमात्। तद्यथा चतुर्धाकरणेन्द्रपीतपूषप्रपिष्टभागविचारेषु सापेक्षाग्निदेवत्यादीनामैन्द्राग्नाग्नीषोमीयादीनामाग्नेयादिशब्दैः केवलाग्न्यादिदेवताकैरसामर्थ्यादग्रहणमिति वक्ष्यति। रूढित्वे हि कस्य क्वापेक्षा भवेत्।

तथा द्विदेवतत्वसामान्येनैन्द्रापौष्णादीनामग्नीषोमीयैन्द्राग्नप्रकृतिकत्वं वक्ष्यते। तथा 'मेधपतिभ्यां मेधम्' इत्यत्र 'देवता तु तदाशीष्ट्वात्' इत्यर्थद्वयमाश्रयिष्यते। तथा मनोताधिकरणे वक्ष्यति **सत्यमग्नीषोमौ देवताप्रकृतौ तावग्निश्च सोमश्च, तत्राग्निरदेवता न त्वसमवेत** इति। तथा देवताद्वन्द्वाश्रयाणि अग्नेरीत्वषत्वादीनि स्मर्यमाणानि न शक्यानि बाधितुम्। यदि च व्याकरणमेवमादावप्रमाणम्, तर्हि देवतातद्धितस्मरणाप्रामाण्यादग्नीषोमादीनां देवतात्वमपि न स्यात्। अथ तत्प्रतीतिरभ्युपगम्येत, सा तुल्याऽर्थद्वयप्रतीतावपीति रूढित्वाभावः।

एतेनाश्वकर्णादिवदर्थरहितसमासान्वाख्यानेन स्वरसंस्कारप्रसिद्ध्यर्थमग्नीषोमीयादिद्वंद्वस्मरणप्रामाण्यकल्पनं प्रत्युक्तम्। तथा हि—

यत्रार्थस्य विसंवादः प्रत्यक्षेणोपलभ्यते।
स्वरसंस्कारमात्रार्था तत्र व्याकरणस्मृतिः॥

महदिन्द्रशब्दयोस्तावदवश्यं पृथगर्थाभिधानशक्तिः कल्पयितव्या। तयोश्च गुणगुण्यभिधायित्वाद्विशेषणविशेष्यात्मकत्वमवधारितम्। तत्र यावदेव संहतावुच्चारितौ, तावदेव पूर्वानुभूतार्थसम्बन्धितया विशिष्टार्थप्रत्ययो जायते। न चास्य निवर्तकं किंचिदस्ति। न च समुदायस्यापूर्वशक्त्यन्तरकल्पनाप्रमाणं विद्यते। लब्धात्मिका च समुदायप्रसिद्धिरवयवप्रसिद्धिं बाधते। न चावयवार्थरहितार्थान्तरप्रयोगं विस्पष्टमन्तरेण तदात्मलाभः।

किं च—

एकस्तावदतिक्लेशैरिन्द्रोऽस्तीत्यवगम्यते।
महेन्द्रस्त्वपरः कल्प्यः पुनः क्लेशान्तरैर्भवेत्॥

प्रत्यक्षेऽपि तावदर्थेऽनेकशब्दशक्तेः कल्पना निष्प्रमाणिका, किमुत यत्रार्थसद्भावोऽपि कल्पनीयः। तदिहेन्द्रशब्दप्रयोगान्यथानुपपत्त्येन्द्रस्तावददृष्टोऽपि कल्प्यते। तत्र यदिपुनर्महेन्द्रशब्दप्रयोगान्यथानुपपत्तिर्भवेत्ततोऽर्थान्तरं महेन्द्रो नाम कल्प्येत। यदा तु पूर्वकल्पिताभ्यामेव महदिन्द्रपदशक्तिभ्यां प्रयोगः सिध्यति। स एव चार्थः किंचिद्विशिष्टः प्रत्यभिज्ञायते। कस्तदाऽर्थान्तरं कल्पयितुं शक्ष्यति।

तस्मादिन्द्र एव महत्त्वविशिष्टो महेन्द्र नान्य इति सिद्धम्। न च समासं कृत्वा तद्धिते क्रियमाणे कस्यचिदसामर्थ्यम्, समासवेलायाम्, तद्धितवेलायां चापेक्षणीयार्थान्तरानुपादानात्। न च द्विरुच्चारणनिमित्तवाक्यभेदप्रसक्तिः। सकृदुच्चारितैकपदोपात्तानेकार्थकथनात्। वृत्तिद्वयात्मकं हि माहेन्द्रपदम्। एकैका च वृत्तिर्वाक्यार्थे वर्तते। तत्र ययोर्वाक्ययोरर्थौ माहेन्द्रपदेनोपात्तौ, तौ ताभ्यां निर्भिद्य कथ्यते। यच्चात्रासकृदुच्चारणं दृश्यते, न तद्वेदवचनस्यैव। न हि कदाचिदप्येवंरूपो वेदोऽस्ति। महांश्चासाविन्द्रश्च महेन्द्रो देवता अस्येति माहेन्द्रः। न चैतदेवं वैदिकं पदमेवं विभज्यते। विभागस्य पौरुषेयत्वेनाऽवैदिकत्वापत्तेः। किं तु—

वेदे स्वरूपतः शब्दो माहेन्द्रादिरवस्थितः।
तस्यार्थः सकलो वाक्यैः पौरुषेयैर्निरूप्यते॥

विचित्रशक्तीनि हि पदानि एकानेकपदार्थप्रतीतेः॥ तथैषामर्थकथनं कदाचित्पदेनैवान्येन क्रियते, कदाचिद्वाक्येन, तेनाप्येकेनाऽनेकेन वा द्विपदेन, बहुपदेन वेति वैचित्र्यम्। तद्यथा कः पिकः? कोकिलः। क औपगव? उपगोरपत्यम्। उपगुना वा स्वकान्तायामुत्पादितः। तथा पचतीत्युक्ते पाकं परगामिफलमेकः कर्ता पूर्वापरीभूतं वर्तमानकाले निर्वर्तयतीति कथ्यते। न चैवं कथयतां वाक्यभेदः प्रसज्यते। नवाऽशब्दार्थत्वमध्यवसीयते। एवमेव यदि माहेन्द्रपदोपात्तोऽर्थस्तनस्मृशद्भिरेव शब्दशक्तिविद्भिः पुरुषैः स्ववाक्येनैकेन, अनेकेन वा कथ्यते, कस्तत्र वाक्यभेदः? शतकृत्वोऽपि हि स्ववाक्यमुच्चार्यमाणं न वेदं दूषयति। न च तदीयोऽर्थः कथ्यमानः पौरुषेयत्वं भजते। अवश्यं चानेकोऽर्थः पुरुषैः कथ्यमानः क्रमेण कथयितव्यः। सोऽपि च प्रकृतिप्रत्ययपौर्वापर्येणेत्येवं कथ्यते महांश्चासाविन्द्रश्चेत्यादि। न चैवं सापेक्षत्वम्।

अथवा 'भवति च प्रधानस्य सापेक्षस्यापि समासः' इति। यद्यपीन्द्रशब्दस्तद्धितापेक्षः, तथाऽपि महत्त्वं प्रति प्राधान्याल्लभते समासम्। अतश्च युगपदपेक्षायामविरोधः। तथाऽपि तु वृत्तिः क्रमेणैव।

कुतः?

सापेक्षोऽपि महत्त्वेनं प्रधानत्वात्समस्यते।
तदपेक्षो गुणत्वात्तु तद्धितेनैव वर्तते॥

तेन यत्रैव प्रधानं सापेक्षम्, तत्रैतयैव तावत् वृत्त्या भवितव्यमिति समास एव—प्रथमं भवति। यदि वा कृत्वा समासम्, तन्त्रेण वृत्तिरिष्येत, ततः शुद्ध इन्द्रः, तद्धितसंबन्धी, शुद्धश्च समासभागिति निर्गुणस्यैवेन्द्रस्य देवतात्वापत्तेर्गुणानर्थक्यप्रसङ्गः।

न चेन्द्रमहत्त्वयोर्युगपत्तद्धितार्थे निपतितयोररुणैकहायन्यादिवत्परस्परनियमो लभ्यते। न ह्यक्रियायां युगपत्संनिपातः नापि विशेषणवशीकारसामर्थ्यम्। सत्यपि च द्वन्द्वदेवतापत्तिः। अकृतसमासयोश्च महदिन्द्रशब्दयोरनेकत्वाद्विवक्षितैकसंख्यप्रातिपदिकनिमित्ततद्धितसंबन्धाभावप्रसङ्गः।

किं च—

सुबन्तौ यदि वैतौ[1] ते न प्रातिपदिकं ततः।
असुबन्तत्वक्लृप्तौ वा समासांशो न लभ्यते॥

तस्मान्न युगपद् वृत्तिरिति, क्रमवृत्या समासार्थस्यैव देवतात्वम्। अतश्चेन्द्र एव गुणसंयुक्तो महेन्द्रो नार्थान्तरमिति पूर्वपक्ष एव शोभन इति, अन्यदुत्तरं वाच्यम्।

तदुच्यते—

श्रुत्या हि देवता यागे समवैति न रूपतः।
तस्मान्माहेन्द्रशब्दोक्त्या महेन्द्रो देवतेष्यते॥

यद्यप्यभिन्नोऽर्थः, तथापि 'विधिशब्दस्य मन्त्रत्वे भावः स्यात्तेन[2] चोदना' इति महेन्द्रशब्देनैवोच्यमानस्यास्मिन् ग्रहयागे देवतात्वम्, नान्यथा। तत्र सकलपर्यायेणापि बृहदिन्द्रादिशब्देनोच्यमानस्य देवतात्वं न भवति, किमुत न्यूनेनैवेन्द्रशब्देन।

तथा हि—

अर्थोऽपि यादृशो यत्र देवतात्वेन चोदितः।
मनागपि ततोऽन्यत्वे देवतेति न गम्यते॥

देवतात्वस्य प्रत्यक्षाद्यनवगम्यत्वाच्चोदनैवैकं प्रमाणम्। सा च यं यादृशं यत्र यादृशे चार्थे विदधाति, स यदि तथैवानुष्ठानेऽपि संपाद्येत, ततस्तत्त्वमितोऽयमित्यवसीयते। किंचिदपि चेदिहान्यथा जातम्, निवृत्तव्यापारायां चोदनायां प्रमाणान्तरं मृग्यम्। न च तदस्तीत्यप्रमाणता। यथा वक्ष्यति। 'स एवाग्निरष्टाकपालस्य देवता, नाऽऽज्यस्य' इति। तेन व्यवस्थावशाद्यथैवेन्द्रे चोदितेऽग्नेर्देवतात्वं न भवति, सोमस्य च चोदिते न पुरोडाशस्य, अभिषुतस्य च न लतायाः, शुद्धे च न सगुणस्य, तथैवं गुणवति चोदिते न निर्गुणस्य।

कुतः—

देवता हि विधेयत्वाद्विवक्षितगुणेष्यते।
लक्षणत्वे तु तस्याः स्यादविवक्षा गुणादिषु॥

---

१ क. चेत्तौ। २ क. स्यादिति।

यदि हि तद्धितसंबन्धे देवतोद्दिश्यमाना स्यात्, ततोऽस्या गुणाविवक्षा भवेत्। इयं पुनरविधीयमाना देवतात्वमेव न प्रतिपद्यत इत्यवश्योपादातव्या। ततश्च विवक्षितगुणत्वात्, तदपाये न कथंचिद्देवतेति गम्यते। यथा शुक्लवासा भोजयितव्यो 'लोहितोष्णीषा ऋत्विजः प्रचरन्ति' 'दण्डौ प्रैषानन्वाह' इति विशेषणरहितानामकर्माङ्गत्वम्। यदा तेऽप्युद्दिश्यन्ते योऽयं शुक्लवासास्तमानयेत्यादौ, तदा विनाऽपि विशेषणेनाऽऽनीयन्ते। तदिह यद्यपि तावद्देवतारूपेणोपकुर्यात्, तथाऽपि न गुणरहिताऽऽश्रीयते। किमुत यदाऽभिधानोपकारिणी विधिगतव्यतिरिक्ताभिधानाभिहिता नैव प्रत्यभिज्ञायते सैवेयं देवतेति। समासेन च विधीयमानायां नानेकार्थविधिदोषप्रसक्तिः। तत्र माहेन्द्रग्रहगता न कथंचिदिन्द्रशब्देनोच्यते। या तु तेनोच्यते, सा तत्र नैव देवतेत्यनर्थकमेवास्याः प्रकाशनम्। अतश्च 'न श्रुतिसमवायित्वात्' इत्ययमपि सूत्रार्थो भवति। श्रुतिसमवेतं देवतात्वं भविष्यति तदधीनज्ञानमित्यर्थः। तच्च तद्धितसंवादे सति ज्ञायते। तस्मादस्ति देवता भेद इति।

कथं तस्मिन् पक्षे भाष्यगमनिका। तदभिधीयते—पूर्वपक्षवादी तावदनुत्कर्षं प्रगाथस्य वदति, यश्च माहेन्द्राद् ग्रहादिन्द्राभिधानसमर्थमन्त्रानुत्कर्षं वदति, तेनाकर्माङ्गभूतार्थप्रकानवैयर्थ्यादिन्द्र एवात्र शुद्धो देवताभूतः प्रकाश्यत इत्यभ्युपगतं भवति। तस्य च देवतात्वं नाभ्युपगममात्रेण सिध्यति, नापि प्रमाणान्तरेणेति, य एतद्ग्रहोत्पत्तिवाक्ये देवताभिधानशक्तिस्तद्धितः श्रूयते 'महेन्द्रं गृह्णाति' इति, तत्संयोगाद्विज्ञायते। स च यदि समासान्निष्कृष्य केवलादिन्द्रशब्दादुत्पाद्यते, ततो मन्त्राभिधेयसदृशं देवतात्वमुक्तं भवति।

सिद्धवच्चैतमर्थं पूर्वपक्षवादिनोऽभिप्रेतं मन्वानो निष्कृष्य ब्रवीति **इन्द्रोऽस्य देवता**—इति तद्धितसंयोगेन ज्ञायते, **न चास्य महत्त्वमपेक्षमाणस्याकृते** समासे शुद्धस्योपसर्जनीभूतस्य तद्धितसंयोगः। **तद्धितसंयोगापेक्षस्य वेति**[1]—सत्यपि सापेक्षप्रधानसमासे प्रातिपदिकावस्थायां तद्धितापेक्षा। न च तदानीमसुबन्तत्वात्समासोपपत्तिः। तेन यत्रैव पृथग्भूतं सुबन्तं संबन्धार्हमेव पदान्तरमपेक्षते। यथा राजपुरुषः शोभन इति, तद्विषयमेवैतत्, 'भवति वै प्रधानस्य सापेक्षस्यापि समास' इति द्रष्टव्यम्।

अकृते च समासे तद्धितापेक्षायां वाक्यात् तद्धितोत्पत्तिरित्यभ्युपेतं स्यात्। शुद्धस्य वा तद्धितसंस्पर्शाद्विशेषणानन्तर्गतिप्रसङ्गः। क्रमवृत्तिः पुनर्भवतो नाभिप्रेतैव। पूर्वं तद्धितसंबन्धे पूर्वोक्तावेव द्रव्यविशेषणोत्तरपदवृद्धिप्रसङ्गदोषौ।

न च समासार्थे वृत्तस्य शुद्धस्य तद्धितसंबन्धः। तेनैकस्मिन्नेव प्रयोगे तन्त्रसंबन्धोऽभ्युपगन्तव्यः। ततश्च 'ऐकशब्द्ये परार्थवत्' इति तथैव वैरूप्यदोषः।

---

१ क. चेति।

विस्पष्टश्चायमन्योऽर्थ इति प्राक्समारादनेकार्थविधेः समासपदलभ्यत्वा-द्वाक्यभेदमाह। कृते तु समासे नैष दोषः। **तस्मान्नेन्द्रो देवताऽमहत्त्वविशिष्टः** शुद्धः, किं तर्हि, विशिष्ट एव।

अथ वा नेन्द्रो देवता केवलपदोपात्तः शुद्ध इत्यभिप्रायः। कथं तर्हि महत्त्व-विशिष्टः, समासप्रातिपदिकात्तद्धितोत्पत्तेः।

न त्ववयवसंबन्धेनेति—नावयवप्रसिद्धिनिराकरणपरम्, किं तर्हि ? नावयव-संबन्धेन तद्धितोत्पत्तिर्निष्कृष्टुमशक्यत्वादित्यभिप्रायः।

तस्माद्देवतान्तरमिति। सत्यपि द्रव्यैकत्वे सगुणनिर्गुणाश्रयणाद्देवतान्तरत्वम्। आह च—

आचार्यो मतुलश्चेति द्रव्यैकत्वेऽपि दृश्यते।
अपेक्षाहेतुभेदेन व्यवहारः पृथक्तया॥ इति।

यदप्युच्यते इन्द्रस्य वृत्रवधोत्तरकालमिति। पूर्वं सर्वत्र शुद्धात्मनः प्रतिपन्न-देवतात्वस्य पश्चात्तनोऽयं गुणः स्तुतिमात्रोपयोगी न देवतात्वेऽन्तर्भवतीति मन्यते। अस्य तूत्तरं गतार्थम्।

स्थिते च देवतान्तरत्वे, शुद्धस्य देवतायाः प्रकाशनम्, शुद्धेन वा विशिष्टस्य, विशिष्टचोदनायामपि वा शुद्धस्य देवतात्वम्, शुद्धशब्दोच्चारणेऽपि वा विशिष्टे देवतात्वं प्रतिपद्यत इत्यादि सर्वमन्धकारनिरीक्षितं साहसमात्रेणाभ्युपगम्येत। न चैतद्युक्तम्। अतो यत्र विधिमन्त्रयोर्देवतासंवादः तत्र प्रगाथो नीयेत।

अस्मत्पक्षे[1] पुनः—

यां कांचिदप्युपादाय देवतां साधिता स्तुतिः।
अदृष्टं यागमात्रार्थं करोत्यारादवस्थितम्॥ १७॥

न्या० सु०—सूत्रोक्तेनेन्द्रमहेन्द्रयोर्भेदापदेशेन हेतुना श्रुतिसमवायित्वहेतुसाध्याया महेन्द्रस्यागुणार्थं शुद्धेन्द्रप्रकाशनार्थमभिधानं न सम्भवतीति प्रतिज्ञायाः साधयितुम-शक्यत्वाद्देवताभेदप्रतिज्ञां पूर्वहेतोरवान्तरसाध्यत्वेन विवक्षितामस्मिन्हेतावध्याहारेण योजयितुमाह—**व्यपदेशेति**। विशब्दव्याख्यानार्थम्—**भेदादित्युक्तम्** कथं व्यपदेशस्य देवताभेदहेतुतेत्यपेक्षायामाह—**एवमिति**। समुदायस्त्वदृष्टार्थत्वापत्तेरयुक्त इत्याह—**असति चेति**। देवताभेदोपपादनस्य प्रकृतोपयोगमनुसन्धत्ते—**तस्मादिति**।

एतद्व्याख्यानमतिप्रसङ्गापादनेन तावद् दूषयति—**एवमिति**। तद्धिते सति समास-पदस्योक्तप्रकारेण रूढित्वे व्याख्यायमाने सर्वेषामग्नीषोमीयादीशब्दानां रूढित्वापत्ते-

१ क. त्वत्पक्षे।

द्विर्देवताभिधायित्वं न स्यादित्यर्थः एवं शब्दार्थं प्रपञ्चयन् श्लोकं व्याचष्टे—**यथैव हीति** । द्वन्द्वसमासस्येतरेतरयोगवाचित्वादग्नेरपि सोमसापेक्षत्वे द्वयोश्च तद्धितान्वयाविशेषेऽप्युपलक्षणार्थं सोमस्याग्निसापेक्षत्वे तद्धितानन्वयाभिधानम् । सोमपदस्याग्निना, अग्निपदस्य वा सोमेन तुल्यकक्ष्यार्थत्वात्तद्धितार्थं च प्रति विशेषणीभूतार्थत्वाद्वैरूप्यं सोमपदोक्तिरूपलक्षणार्था ।

नन्वग्नीषोमादिशब्दानां न्यायेन रूढित्वावसायाद्याज्ञिकव्यवहारस्य भ्रान्तित्वेनोच्छेदो न दोषायेत्याशङ्क्याह—**न चेति** । न केवलं याज्ञिकानां द्विदेवत्यत्वव्यवहारः, किंतु मीमांसायामपीत्यर्थः ।

तार्तीयांस्तावत् द्विदेवत्यव्यवहारानुदाहरति—**तद्यथेति** । आग्नेयं चतुर्द्धा करोत्याग्नेयशब्देन सापेक्षाग्निदेवत्ययोरैन्द्राग्नाग्नीषोमीययोः पुरोडाशयोरग्रहणं व्यवस्थावार्थंसंयोगाल्लिङ्गस्यार्थेन सम्बन्धाल्लक्षणार्था गुणश्रुतिरि(३–१–२७)ति चतुर्द्धाकरणविचारतृतीयप्रथमे सिद्धान्तसूत्रे वक्ष्यति । एकस्मिन्वा देवतान्तराद्विभागवदि(३–२–४०)तीन्द्रपीतविचारसिद्धान्तसूत्रे चेन्द्रपीतसमासस्थेनेन्द्रशब्देन सापेक्षेन्द्रदेवत्यस्यैन्द्राग्नादेः सोमस्याग्रहणं वक्ष्यति । एकस्मिन्नेकसंयोगादि(३–३–३९)ति पूषाप्रपिष्टभागविचारे च पूषशब्देन सापेक्षपूषदेवत्यस्यैन्द्रापौष्णादेश्चरोरग्रहणं वक्ष्यतीत्यर्थः । रूढित्वे चैकदेवतात्वापत्तेः सापेक्षत्वं न युज्येतेत्याह—**रूढित्वं हीति** ।

आष्टमिकं द्विदेवत्यव्यवहारमुदाहरति—**तथेति** । ऐकार्थ्याद्वा नियम्येत पूर्ववत्त्वाद्विकारो ही(८–१–२८)ति सूत्रे द्विदेवत्यानां दार्शपौर्णमासिकद्विदेवत्ययागप्रकृतिकत्वं वक्ष्यत इत्यर्थः ।

नावमिकमुदाहरति—**तथेति** । आशासानोमेधपतिभ्यो मेधमित्यध्रिगुप्रैषगतमेधपतिशब्दे देवता तु तदाशाब्दात्सम्प्राप्तत्वात्स्वामिन्यनर्थिका[1] स्यादिति सूत्रे मेधशब्दव्याच्यस्य पशोः स्वामिन्यस्य सम्बन्धस्य प्राप्तत्वेनाशासानानर्थक्यापत्तेर्देवतैव मेधपतिरिति मेधपतित्वं स्वामिदेवत्यस्योत्पाद्य सूत्रगतमेधपतित्वशब्दस्य स्वामिनो वेत्यनन्तरसूत्रेऽनुषक्तस्य लुप्तभावप्रत्ययस्यानुषङ्गेण द्विवचनान्तमेधपतिव्याच्यमग्नीषोमाख्यदेवतारूपमर्थद्वयमाश्रयिष्यत इत्यर्थः ।

दाशमिकमुदाहरति—**तथेति** । मनोतायां तु वचनादविकारः स्यादि(१०–४–४२)त्यत्र त्वं ह्यग्ने प्रथमो मनोतेति मनोताख्यो मन्त्रोऽन्यदेवत्यपक्षावूहितव्यो न वेति सन्देहमुपन्यस्य, ननु प्रकृतावन्यार्थोऽयं निगदो यदग्नीषोमौ हि प्रकृतौ देवताऽयं वाग्नेयोऽर्थतो सम्भवेनाभिधायित्वादविकारेण प्रयोक्तव्य इत्याशङ्किते सत्यग्नीषोमौ देवताप्रकृताविति[?]युक्त्वा यौ तु तावग्नीषोमाविति भाष्यकृद्वक्ष्यति ।

---

१. स्वामिन्येवार्थकामः स्यादिति ।

व्याकरणशास्त्रेऽपि द्विदेवत्यत्वव्यवहारोऽस्तीत्याह—**तथेति**। देवता द्वन्द्वे चेत्(६-२-१४१)अधिकृत्येदग्नेः सोमवरुणयोरि(६-३-२७)ति सोमशब्दे वरुणशब्दे च परभूतेऽग्निशब्दस्य देवताद्वन्द्वनिमित्तमीत्वं स्मृतम्। मूर्द्धन्याधिकारे चाग्नेः स्तुत्स्तोमसोमा(८-३-८३) इत्यत्राग्निशब्दात्परस्य सोमशब्दस्य मूर्द्धन्यादेशेन षत्वस्मृतेः। सोमशब्दस्याग्निशब्दाद्भेदावगमादर्थाद्देवताद्वन्द्वावगतिः, आदिशब्दात् पूर्वपदप्रकृतिस्वराधिकारे उभे वनस्पत्यादिषु युगपदित्यनुवर्त्तमाने देवता द्वन्द्वे चेत्यनेनेन्द्रासोमाविन्द्रावरूणावित्यादिषूभयपदप्रकृतिस्वरत्वं वृद्धयधिकारे च हृद्भगसिन्ध्वन्ते पूर्वपदस्य चेत्यनुवर्त्तमाने देवता द्वन्द्वे चेत्याग्नावैष्णवादिशब्दे उभयपदवृद्धिः आनङृतो द्वन्द्व इति वानुवर्त्तमाने देवताद्वन्द्वे चेत्यानङादेशः। ननु व्याकरणस्यार्थे तात्पर्याभावान्न ततो द्विदेवत्यत्वावधारणं भवतीत्याशङ्क्याह—**यदि चेति**। तद्धितोच्चारणे देवतात्वप्रतीतेस्तदभ्युपगमे द्वित्वमपि प्रतीत्यविशेषादभ्युपगन्तव्यमित्याह—**अथेति**।

ननु वाक्यभेदादिदोषापत्तेः समासस्यार्थरहितस्यान्वाख्यानात्समासकार्यस्वरलक्षणशब्दसंस्कारमात्रसिद्धयर्थं तद्धितान्तेषु शब्देषु द्वन्द्वस्मृतेः प्रामाण्यं कल्प्यते। न द्विदेवत्यत्वसिद्धयर्थमित्याशङ्क्याह—**एतेनेति**। एतेन—अर्थद्वयावगमेन हेतुना स्वरसंस्कारमात्रसिद्धयर्थत्वकल्पना न युक्तेत्यर्थः। अश्वकर्णादिवैषम्यमुपपादयति—**तथा हीति**। नविन्द्रेऽपि महत्वगुणयोगस्य प्रमाणान्तरेणासंवादान्महेन्द्रशब्देऽपि समासान्वाख्यानं स्वरसंस्कारमात्रार्थं स्यादित्याशङ्क्याह—**महदिति**। महाब्राह्मण इत्यादौ महच्छब्दस्य पूज्यत्वाख्यगुणवाचित्वावगमादिन्द्रशब्दस्य च स्तवनीयसूक्तादिना देवताविशेषवाचित्वावगमादवयवयोरर्थवत्त्वं विशेषणविशेष्यरूपार्थवाचित्वं च तावत्सिद्धमेवेत्यर्थः।

नन्वेवमपीन्द्रे महत्वगुणयोगे प्रमाणाभावाद्विशिष्टवाचिता महेन्द्रशब्दस्य न युक्तेत्याशङ्क्याह—**तत्रेति**। निर्दोषक्लृप्तसावयवार्थशब्दप्रयोगान्यथानुपपत्तिरेवेन्द्रमहत्वगुणयोगे प्रमाणमित्याशयः। न चाश्वकर्णादिवद्योग्यानुपलब्धिर्विशिष्टार्थबुद्धेर्बाधिकात्रास्तीत्याह—**न चेति**। ननु समुदायप्रसिद्धिरेवावयवप्रसिद्धेर्बाधिका भविष्यतीत्याशङ्क्याह—**न चेति**। समुदायशक्तिकल्पनाहेतोरवयवार्थाभावस्यानिश्चयात्समुदायप्रसिद्धेरात्मलाभानुपपत्तेर्बाधकत्वं न सम्भवतीत्यर्थः। नन्ववयवार्थाभावानिश्चयेऽपि सद्भावस्याप्यनिश्चयात् समुदायप्रसिद्धयात्मलाभो भविष्यतीत्याशङ्क्याह—**न चेति**। अन्यथानुपपत्तिकल्प्यवाच्छक्तेरवयवार्थाभावानिश्चयेऽन्यथानुपपत्तेरनिश्चयान्न शक्तिकल्पना शक्येत्याशयः।

अतिक्लेशापत्तेरपि शक्त्यन्तरकल्पना न युक्तेत्याह—**किं चेति**। श्लोकं व्याचष्टे—**प्रत्यक्षेऽपीति**। परव्याख्यादूषणमुपसंहरति—**तस्मादिति**।

ननु क्रमेण युगपद्वा वृत्तिद्वययोगादवयवव्युत्पत्तिर्न सम्भवतीत्युक्तमत आह—**न चेति**। क्रमवृत्तावसामर्थ्यं परेणानुक्तमपि तद्धितपूर्वत्वे वस्तुतोऽसामर्थ्यात्समासपूर्वत्वेऽप्यसामर्थ्यशङ्कापत्तेः, तन्निरासार्थं निरस्तं समासवेलायामिन्द्रशब्दस्य तद्धितापेक्षत्वेऽपि

प्राधान्यात् सामर्थ्याविघातः। तद्धितवेलायां च समासार्थेनैव तद्धितान्वयात्तद्व्यतिरिक्तस्याचार्थस्यापेक्षणीयस्यानुपादानान्नासामर्थ्यापत्तिरित्यर्थः। यस्त्वस्मिन्पक्षे महदिन्द्रशब्दयोरुच्चारणावृत्त्यापत्तेर्वाक्यभेद उक्तः तन्निरस्यति—न चेति। एकार्थशब्दस्य सकृदुच्चरितस्यानेकार्थत्वायोगादनेकार्थतायामुच्चारणावृत्तिः स्यात्। महेन्द्रपदेन त्वेकेनैवोपात्तानामनेकेषामर्थानामसकृदुच्चरितैः लौकिकैः शब्दैः कथनेऽपि न वैदिकशब्दावृत्त्यापत्तिरित्यर्थः। कथं माहेन्द्रपदेनानेकार्थोपादानमित्याशङ्क्याह—वृत्तीति। नन्वेवमपि पदस्य पदार्थमात्रवाचित्वात् महत्वेन्द्रविशेषणविशेष्यभावद्रव्यदेवतान्वयरूपानेकवाक्यार्थकथनमुच्चारणवृत्तिं प्रयुञ्जीतेत्याशङ्क्याह—एकैका चेति। एवं च सकृदुच्चरितस्यापि माहेन्द्रशब्दस्य वाक्यद्वयेनार्थकथनं युक्तमित्याह—तत्रेति। न च विवरणवाक्यगतोच्चारणावृत्त्या वेदवाक्यावृत्तिरित्याह—यच्चेति। अत्र हेतुमाह—न हीति। यथा स्थितस्यैव वेदस्योच्चारणावृत्तिर्भवति, नान्यरूपस्येत्याशयः।

ननु समामार्थकथनवेलायां महेन्द्र इत्येतावतः समासप्रातिपदिकस्य तद्धितान्तात् पृथक्करणात्तद्धितार्थकथनवेलायां च पुनस्तद्धितसहितप्रयोगादुच्चारणावृत्तिः प्रसज्येतैवेत्याशङ्क्याह—न चेति। कथं विभागं विनाऽर्थकथनमित्याकाङ्क्षायामाह–किं त्विति। आवृत्तिं विनाऽनेकार्थाभिधानशक्तस्य पदस्याविभक्तस्याप्यनेकार्थकथनं पुंवाक्यैर्युक्तमित्याशयः। ननु विभागाभावे पदसमुदायात्मकवाक्यत्वाभावाद्वाक्यर्थाभिधायित्वं न युज्येतेत्याशङ्क्याह—विचित्रेति। पदस्यावाक्यत्वेऽपि वाक्यार्थाभिधायिता दृष्टत्वादविरुद्धेत्याशयः। एकानेकार्थप्रतीतिवैचित्र्यमर्थकथनवैचित्र्येणोपपादयति—तथेति। तत्रोदाहरणान्याह—यद्यथेति। बहुतरपदेन वाक्येन पदार्थकथनोदाहरणार्थं परगामिफलं पाकं निर्वर्त्तयत्येकः पाकं निर्वर्त्तयतीति पूर्वावयवीभूतं पाकं निर्वर्त्तयति वर्त्तमानकाले पाकं निर्वर्त्तयतीत्यनेकेन वाक्येन पदार्थकथनोदाहरणार्थम्—वा तथेत्युक्तम्। न चानेकेन वाक्येन कथ्यमानार्थस्य पचत्यादिपदस्य वाक्यभेदो, शाब्दत्वं वा तदर्थस्य लोके प्रसिद्धमित्याह—न चेति। लौकिकवाक्यन्यायं प्रकृतेऽतिदिशति–एवमेवेति। पौरुषेयत्वशब्देनाशब्दार्थतोक्ता। नन्वेवं सति यौगपद्यमेव कस्मान्नेष्टमित्याशङ्क्याह—अवश्यञ्चेति। क्रमवृत्तित्वाद्वाचो युगपदेनेकार्थकथनस्याशक्यत्वादवश्यं भावी क्रम इत्यर्थः। एवमपि समासपूर्वत्वे को हेतुरित्याशङ्क्याह—सोऽपि चेति। समासवृत्तेः प्रकृत्यर्थत्वात्, तद्धितवृत्तेश्च प्रत्ययार्थत्वात्समासपूर्वतैवोचितेत्याशयः। सापेक्षत्वपरिहारायापि समासपूर्वतैवोचितेत्याह—न चेति।

ननु महत्वविशिष्टस्येन्द्रस्य तद्धितान्वयात्, तद्धितवृत्ताविन्द्रस्य महत्वानपेक्षत्वेऽपि समासवृत्तौ तद्धितापेक्षत्वात्समासो न युज्येतेत्याशङ्क्याह—अथ वेति। एवं च सति यौगपद्ये तद्धितापेक्षत्वेनेन्द्रशब्दस्य महच्छब्दसमासानुपपत्तिर्योक्ता, साप्ययुक्तेत्याह—अतश्चेति। नन्वेवं सति क्रमवृत्तित्वाद्वाचो युगपदवृत्तिद्वयार्थकथनाशक्तावपि क्रियापदस्येवानेकैः कारकपदैर्वस्तुतो युगपत्तद्धितमहच्छब्दाभ्यामिन्द्रशब्दावन्व्योपपत्तेर्वृत्ति-

द्वययौगपद्यं कस्मान्नेष्टमित्याशङ्क्याह—**तथापीति**। क्रमविशेषेऽप्ययमेव हेतुरित्याह—यौगपद्ये च गुणस्य देवतात्वन्तर्गतिर्नस्यादित्याह—**यदीति**।

ननु तद्धितार्थप्राधान्यात्तद्वशीकृतयोरिन्द्रमहत्वयोरन्योन्यनियमाद् गुणस्य देवतान्तर्गतिर्भविष्यतीत्याशङ्क्याह—**न चेति**। क्रियाया युगपदनेककारकसाध्यत्वोनियमत्त्वं युक्तम्, तद्धितार्थस्य तु देवतात्वस्यैकेन नैराकाङ्क्ष्यान्नोभयनियामकत्वे हेतुरित्याशयः। युगपदुपनिपाते च सतीन्द्रवन्महत्वस्यापि साक्षाद्देवतात्वोपपत्तेरग्नीषोमादिवत् द्वन्द्वस्य देवतात्वं स्यादित्याह—**सत्यपि चेति**। यौगपद्ये च समासस्याकृतावस्थत्वेन समासनिमित्तप्रातिपदिकैक्याभावात् 'ङ्याप्प्रातिपदिकादि'(४-१-१)ति चोपादेयत्वेनास्य विवक्षितैकसंख्यत्वात्तद्धितान्वयो न स्यादित्याह—**अकृतेति**। सुबन्तत्वे च महदिन्द्रशब्दयोरप्रत्यय इतिपर्युदासेनाऽप्रातिपदिकतया तद्धितान्वयायोगात्, असुबन्तत्वे च समासायोगाद्युगपच्च सुबन्तत्वासुबन्तत्वविरोधात् वृत्तिद्वययौगपद्यं न युक्तमित्याह—**किं चेति**। क्रमपक्षे समासकाले च सुबन्तत्वम्, तद्धितकाले चासुबन्ततेत्यविरोधसूचनार्थं ते यौगपद्यवादिनः पक्ष इत्युक्तम्। यौगपद्यनिरासमुपसंहरति—**तस्मादिति**। समासपूर्वत्वोपपादनस्य प्रकृतोपयोगमाह—**इतीति**। अतो नैवं व्याख्यायमाने पूर्वपक्षनिरासः सिध्यतीत्याह—**अतश्चेति**।

स्वमतेन पूर्वपक्षनिरासे सूत्रं योजयति—**तदिति**। विधिगतशब्दाभिप्रायः श्रुतिशब्द इति भावः। श्लोकं व्याचष्टे—**यदपीति**। ऐक्येऽपीन्द्रमहेन्द्रयोर्विधिशब्दस्य मन्त्रत्वे भावः स्यात्तेन चोदने(१०-४-२३)ति दशमाधिकरणन्यायेनावाहनादिविषये निगमे मन्त्रकार्ये विधिगतस्यैवशब्दस्योच्चारणावधारणात् महेन्द्रशब्दोक्तस्यैवार्थस्य देवतात्वप्रतीतेरैन्द्रमन्त्रोत्कर्षोऽपरिहार्य इत्यर्थः। ननु दशमाधिकरणे पर्यायभूतशब्दान्तरनिषेधेऽपीन्द्रशब्दस्य महेन्द्रशब्दावयवत्वान्नोत्कर्षापत्तिरित्याशङ्क्याह—**तत्रेति**। तेन चोदनेति दशमिकसूत्रावयवव्याख्यायै तदुपपादयति—**तथा हीति**। देवतायाः प्रतिग्रहीतृत्वाभावेन रूपासमवायादुद्देश्यत्वमात्रेणोपकारित्वादुद्देश्य च शब्दाधीनत्वात्केन शब्देनोद्देष्टव्या देवतेत्यपेक्षायां श्रुतशब्दत्यागेनाऽश्रुतशब्दकल्पनायोगाद्विधिगतेनैवशब्देन देवतात्वचोदनावगतेर्न शब्दान्तरवन् न्यूनशब्दोच्चारणेऽपि देवतात्वप्रसिद्धिरित्यर्थः।

यत्तु शब्दमात्रस्य देवतात्वाभावादर्थस्य गुणावुक्तावपि तत्त्वानपायान् न्यूनशब्दोच्चारणेऽपि देवतात्वाविघात इत्युक्तम्। तन्निरासाय—**अर्थोऽपीत्युक्तम्**। महत्वविशिष्टस्यैन्द्रस्येह देवतात्वविधानान्न शुद्धस्य देवतात्वमस्तीत्यर्थः। श्लोकं व्याचष्टे—**देवतात्वस्येति**। देवतात्वस्य प्रमाणान्तराविषयत्वमविहितदेवताकल्पनाशङ्कानिरासार्थेन नासति विधाने देवताभावात् सम्बन्धिशब्दोऽयं देवतेत्यादिना पौर्णमास्यधिकरणभाष्यणोपपादयति—**यथेति**। श्लोकार्थमुपसंहरति—**तेनेति**।

नन्वग्निपुरोडाशयोरिन्द्रसोमाभ्यामत्यन्तभेदाद्विहितार्थासम्पादकत्वेऽपि निर्गुणस्य सगुणादत्यन्तभेदाभावाद्विहितार्थसम्पादकत्वं भविष्यतीत्याशङ्क्याभिषुतस्येत्युक्तम्। ननु

द्रव्यत्वेन विहितस्य रसस्य लतावस्थायामभावाल्लताया विहितार्थसम्पादकत्वेऽपि इन्द्रस्य शुद्धोक्तावपि वस्तुतो गुणत्वसद्भावाद्विहितार्थसम्पत्तिर्भविष्यतीत्याशङ्कय—**शुद्धे चेत्युक्तम्** । वस्तुवृत्तिविवक्षायामैन्द्रदध्यमावास्यायामिति शुद्धेन्द्रविधावपि वस्तुतो गुणवत्त्वसद्भावात् सगुणस्य देवतात्वप्रसक्तेः शब्दाभिधानेन देवतात्वं वाच्यम् । न च शुद्धाभिधानेन गुणवत्त्वोक्तिर्भविष्यतीत्याशयः ।

ननु गुणस्य गुण्युपलक्षणमात्रार्थत्वेन देवतात्वान्तर्गत्यभावात्कथं गुणवद्धितौ निर्गुणस्य देवतात्वाभाव इत्याशङ्कां प्रश्नपूर्वं निरस्यति—**कुत इति** । श्लोकं व्याचष्टे—**यदि हीति** । ननु गुणस्य देवतात्वान्तर्गतौ स्वरूपेणापि देवताया यागसमवाये निर्गुणाभिधानोत्कर्षसिद्धे व्यर्थं श्रुतिसमवायाभिधानमित्याशङ्कयाह—**तदिहेति** । अतिशयार्थं श्रुतिसमवायाभिधानमित्याशयः । नन्वेवं सति महत्वेन्द्ररूपानेकार्थविधानाद्वाक्यभेदः स्यादित्याशङ्कयाह—**समासेनेति** । विशिष्टरूपैकार्थविधानान्न वाक्यभेद इत्याशयः । शुद्धदेवतात्वनिरासस्य प्रकृतेन्द्रप्रगाथोत्कर्षोपयोगमाह—**तत्रेति** । शुद्धेन्द्रदेवतात्वनिरासेऽपि विधिश्रुत्या सम्यगवापोऽवगमो यस्य देवतात्वस्य तच्छ्रुतिसमवायि, तस्य भावः श्रुतिसमवायित्वमित्येवं सूत्रं योजयति—**अतश्चेति** । ननु देवतात्वस्य विधिश्रुत्यधीनज्ञानत्वे तद्धितसंयोगेन विज्ञायेतेति भाष्यमयुक्तं स्यादित्याशङ्कयाह—**तच्चेति** । उपधानार्थस्य चरोर्बार्हस्पत्यो भवतीति तद्धितसंयोगेऽप्यविधानेन देवतात्वानभ्युपगमाद्विध्यधीनमेव देवतात्वं विधेयसमर्पकत्वेन तु तद्धितो भाष्यकृतोक्त इत्याशयः । अतोऽधिष्ठानाभेदेऽपि देवतारूपं भिन्नमित्युपसंहरति—**तस्मादिति** । अस्मिन्नेवार्थे प्रश्नपूर्वं भाष्यं गमयितुमुपक्रमते—**कथं त्विति** । तत्रेन्द्रोऽस्येति भाष्यं शुद्धेन्द्रदेवतानिरासार्थत्वेन व्याख्यास्यन् पूर्वपक्षिणापि शुद्धस्य देवतात्वानभ्युपगमादयुक्तमाशङ्क्यापाद्योक्तित्वेन व्याचष्टे—**पूर्वपक्षेति** ।

ननु वशादृष्टान्तात् सगुणे चोदित इति भाष्याच्च सगुणदेवतात्वस्य पूर्वपक्षभिमतत्वप्रतीतेः, कथं शुद्धेन्द्रदेवतात्वस्य पूर्वपक्ष्यभिमतत्वापादनमित्याशङ्कयाह—**सिद्धवच्चेति** । यद्यप्येषोऽर्थो वस्तुतः पूर्वपक्षिणोऽनभिमतः तथोप्यन्यथानुत्कर्षासिद्धेरनुपपत्तिकमपि सिद्धवदभिप्रेतं मन्वानः सिद्धान्ती इन्द्रोऽस्य ग्रहस्य देवतेति ब्रवीतीत्युक्ते तु[1] सिद्धान्तेऽपीन्द्रस्यैव महत्वविशिष्टस्य देवतात्वादिन्द्रस्य देवतात्वनिरासो न युक्त इत्याशङ्कय—**निष्कृष्येत्युक्तम्** । महत्वान्निष्कृष्य शुद्धस्येन्द्रस्य देवतात्वमापद्य निरस्यतीत्यर्थः । यत्रेति वार्थवत्त्वादित्यत्रोत्कर्षस्य पूर्वपक्षिणाभ्युपेष्यमाणत्वात्पूर्वपक्ष्येकदेशी पूर्वपक्षवादिशब्देनोक्तः (स्वयं वानुत्कर्षेऽप्यर्थवत्त्वादिशब्देनोक्तः)[2] स्वयं वानुत्कर्षेऽप्यर्थवत्त्वाभिधानार्थतया तस्य सूत्रस्य व्याख्यास्यमानत्वात्पूर्वपक्षिणोऽनुत्कर्षोऽभिमतः ।

न चास्येति भाष्यमपि शुद्धपदाध्याहारेण व्याचष्टे—**न चेति** । वृत्तिद्वययौगपद्यनिरासार्थत्वप्रदर्शनाय—**अकृतइत्युक्तम्** । प्रधानस्य सापेक्षत्वेऽपि समासतद्धितसंयोगो-

---

१. तुशब्दस्थाने नन्विति प० । २. अयं पा० २ पु० ना० ।

पपत्तेरुपसर्जनीभूतस्येत्युक्तम्। तद्धितेति भाष्यं प्रधानसापेक्षत्वे समासविघातादयुक्तमाशङ्क्यासुबन्तत्वनिमित्तसमासासम्भवाभिप्रायेण व्याचष्टे—**तद्धितेति**। कस्तर्हि प्रधानसापेक्षसमासान्वाख्यानस्य विषय इत्याशङ्क्याह—**तेनेति**।

नन्वसुबन्तत्वात् समासयोगेऽप्यसमस्तयोरेव महदिन्द्रशब्दयोस्तद्धितान्वयो भविष्यतीत्याशङ्क्याह—**अकृते चेति**। यदि त्वेतद्दोषपरिहारायेन्द्रप्रातिपदिकमात्रस्य तद्धितान्वयोऽभ्युपगम्यते। ततो गुणस्य देवतात्वानन्तर्गतेर्महच्छब्दानर्थक्यम्, तद्धितप्रकृतौ च प्रातिपदिके महच्छब्दस्य विशेषणस्यानन्तर्गतेः पूर्वपदवृत्तिर्न स्यादित्याह—**शुद्धस्य चेति**। न चेति भाष्यं यौगपद्ये दोषान्तराणां वक्ष्यमाणत्वान्मध्ये क्रमनिरासानौचित्येनायुक्तमाशङ्क्य परानभिप्रेतत्वाभिधानार्थत्वेन व्याचष्टे—**क्रमेति**। क्रमवृत्तौ महत्वविशिष्टस्येन्द्रस्य देवतात्वापत्तेरित्याशयः।

ननु तद्धितपूर्वत्वे विशिष्टस्य देवतात्वानापत्तेः किमित्यनभिप्रेतत्वमित्याशङ्क्याह—**पूर्वमिति**। समासपूर्वत्वस्य स्वाभिमतत्वान्निरासो न युक्त इत्याशङ्क्य ननु समासपूर्वत्वेऽपि प्राधान्येनेन्द्रस्य शुद्धस्यैव तद्धितान्वयाद्देवतात्वं भविष्यतीत्याशङ्कोत्तरत्वेन शुद्धपदाध्याहारेण व्याचष्टे—**न चेति**। समासान्तर्गतस्येन्द्रस्य पृथक् प्रातिपदिकत्वाभावात्तद्धितान्वयो न युक्त इत्याशयः। एतस्मिन्नेवेति यौगपद्याशङ्काभाष्यं प्रागेव यौगपद्यनिरासादयुक्तमाशङ्क्य क्रमवृत्तौ निरस्तायां पारिशेष्यान्निरस्तमपि यौगपद्यमेव क्रमविशेषानवधारणेनौचित्यादापाद्यत इत्येवमर्थत्वेन व्याचष्टे—**तेनेति**। 'न चे'ति वैरूप्याभिधानार्थं भाष्यं व्याचष्टे—**ततश्चेति**। विस्पष्टश्चेत्यनेकार्थविधिदोषाभिधानार्थं भाष्यं समासार्थस्यैकस्य देवतात्वविधावनेकार्थविध्यतापत्तेरयुक्तमाशङ्क्याकृतसमासावस्थाविषयत्वेन व्याचष्टे विस्पष्टश्चेति प्राक्समासाद्वाक्यभेदमाहेत्यन्वयः। तस्मादित्युपसंहारभाष्यं स्वाभिप्रेतार्थानुगुणत्वायाऽकारप्रश्लेषेणाध्याहृतशुद्धम्। कथं तर्हि शब्दकभिन्नवाक्यत्वेन वा द्वेधा व्याचष्टे—**तस्मादिति**। महेन्द्रेति भाष्यं विशिष्टदेवतात्वोपपादनार्थत्वेन व्याचष्टे—**समासेति**। न तु केवलादिन्द्रशब्दादित्येवं भाष्यगतस्तुशब्दो व्याख्येयः।

ननु सकलान्महेन्द्रशब्दात्तद्धितोत्पत्तिर्न त्विन्द्रशब्दमात्रादिति कथमवगम्यते इत्याशङ्क्य यस्मात्सकलान्महेन्द्रशब्दात्तद्धितोत्पत्तिः, तस्मात्सकलं प्रतिपादिकमर्थवन्न त्ववयवस्येन्द्रशब्दमात्रस्य तद्धितसम्बन्धेन सकलं प्रातिपदिकर्थवन्महच्छब्दानर्थक्यापत्तेर्निष्कर्षाशक्तेश्चावयवस्य तद्धितसम्बन्धायोगादित्यभिधानार्थं तस्मादिति भाष्यं परोक्तावयवव्युत्पत्तिनिराकरणार्थनिरासपूर्वकं व्याचष्टे—**न त्विति**। शुद्धेन्द्रदेवतात्वनिरासप्रयोजनाभिधानार्थं तस्मादिति भाष्यम् इन्द्रस्यैव महत्ववैशिष्ट्येन महेन्द्रदेवतात्वादयुक्तमाशङ्क्य व्याचष्टे—**तस्मादिति**। अधिष्ठामैक्येऽपि व्यपदेशभेदसम्भवे वृद्धोक्तं दृष्टान्तमुदाहरति, आह—**चेति**। आचार्यशब्दार्थस्य शिष्यमेव प्रतिसद्भावेन शिष्या-

पेक्षणीयाभावे याऽपेक्षानुपपत्तेरपेक्षणीयः शिष्यः प्रतिसम्बन्धी, आचार्यस्य शिष्यापेक्षायां हेतुः, मातुलस्य च भागिनेयापेक्षायां भागिनेयो हेतुः, तद्भेदेन द्रव्यैक्येऽपि पृथक्त्वेन व्यवहारो दृश्यत इति वृद्धश्लोकार्थः ।

यदपीति शङ्काभाष्यं पूर्वपक्षिणः कदा चिदपि महत्वस्य देवतात्वान्तर्गतेन्द्रनिष्ठत्वेन वृत्रवधोत्तरकालत्वाभिधानानर्थक्यादयुक्तमाशङ्क्यानन्तर्गत्यभिधानार्थत्वेन व्याचष्टे— **यदपीति** । तथेत्युत्तरभाष्यं प्रागेव व्याख्यातमित्याह—**अस्य त्विति** । ननु महत्वस्य देवतात्वान्तर्गतौ शुद्धेन्द्रदेवत्यप्रगाथस्य तत्प्रकाशनासामर्थ्येन देवतैक्येऽप्युत्कर्षसिद्धेर्भेदाभिधाने व्यर्थमित्याशङ्क्य, भेदाभावे छागमन्त्रस्येव वशाजाद्रव्यकादिमन्त्रस्य महेन्द्रदेवताकात्कर्मणः कथं चित्प्रकाशकत्वसम्भवेनोत्कर्षासिद्धेस्तत्सिद्ध्यर्थं प्रयत्नेन देवताभेदाभिधानमिति सूचयितुं देवताभेदेन कथं चिदनुत्कर्षः सिद्ध्यतीति वक्तुमाह— **स्थिते चेति** ।

अनुत्कर्षवादिना हि शुद्धस्येन्द्रस्य यत्प्रकाशनम्, तद्देवताया एव प्रकाशनं शुद्धस्यैव देवतात्वाद्विशिष्टस्यापि देवतात्वे शुद्धेनेन्द्रशब्देन छागशब्देनेव वशात्वविशिष्टस्य द्रव्यस्य विशेषणाप्रकाशनेऽपि स्वरूपेण प्रकाशनम्, विशिष्टस्यापि वा तद्धितान्वयश्रवणे विशेषणस्यानन्वयाच्छुद्धस्यैव देवतात्वं शुद्धेन्द्रशब्दोच्चारणेऽपि वा प्रगाथगतेन मनोतागतेनैवाग्निशब्देनाग्नीषोमयोर्लक्षणया विशिष्टप्रकाशनम् । आदिशब्दात्परमैश्वर्यवाचिनेन्दतिधातुना महत्वविशिष्टप्रकाशनमिति वाच्यम् । न चैषां प्रकाराणां मध्ये कश्चित्प्रकारः सम्भवतीत्युत्कर्षो दुष्परिहर इत्यर्थः ।

ननु देवताभेदे सतीन्द्रशब्देन महेन्द्रप्रकाशनाशक्तेः सिद्धान्तेऽप्युत्कर्षः स्यादित्याशङ्क्याह—**अस्मत्पक्ष इति** । यागानङ्गस्येन्द्रादेस्त्यज्यमानद्रव्योद्देश्यत्वलक्षणहविर्भावाख्यदेवतात्वाभावेऽपि यमर्थं प्राधान्येन मन्त्रोऽभिधत्ते सा देवतेत्येवंलक्षणस्तुतिभाक्ताख्यदेवतात्वसद्भावाद्देवतामित्युक्तम् । प्रकरणान्माहेन्द्रयागाङ्गत्वेऽप्यैन्द्रप्रगाथसाध्यायाः पृष्ठाख्यायाः स्तुतेः सन्निपत्योपकारित्वे पशुपुरोडाशान्तिमप्रयाजादिवद्देवतासंस्कारद्वारा यागाङ्गत्वशङ्कानिरासार्थो मात्रशब्दः । व्यपदेशाच्चाति सूत्रं व्यपदेशभेदाच्च भेद इत्यादिना प्रागेव व्याख्यातत्वान्न व्याख्यातम् ॥ १७ ॥

भा० प्र०—इन्द्र एवं महेन्द्र देवता अभिन्न नहीं हैं, क्योंकि, 'व्यपदेशभेदात् च' श्रुतियों में उसका पृथक् रूप से निर्देश किया गया है, 'बहु दुग्धीन्द्राय देवेभ्यो हविः' 'एवं बहु दुग्धि महेन्द्राय देवेभ्यो हविः' इन श्रुतियों में इन्द्र एवं महेन्द्र का स्वतन्त्र रूप में उल्लेख है । यदि इन्द्र एवं महेन्द्र अभिन्न होते तो इस प्रकार पृथक् निर्देश करना सङ्गत नहीं होता ।

'व्यपदेशभेदात्' = यतः व्यपदेश भेद है अर्थात् श्रुतियों में इन्द्र एवं महेन्द्र का पृथक् रूप में उल्लेख है इसलिए, 'च' = और ॥ १७ ॥

गुणश्चानर्थकः स्यात् ॥ १८ ॥

शा० भा०—यदा विधिशब्दादवगतमेतद्भवति, इन्द्रो देवतेति, तदाऽस्य गुणान्वाख्याने किं प्रयोजनम्? महत्त्वं नामेन्द्रस्य गुणो भवतीति। देवताभिधानम्, कथं तस्यै देवतायै दीयत इति। गुणेऽपि हि विहिते सति तस्या एव देवतायै दीयतेऽविहितेऽपि। तस्माद् गुणविधानमनर्थकम्।

अथोच्येत, योऽस्मिन् ग्रहे इन्द्रः, स महानीति। नैवम्। ग्रहसम्बन्धस्याप्रसिद्धत्वाद् विशेषणं नात्र कल्प्यते, गुणसम्बन्धस्य चाप्रसिद्धत्वाद् गुणेन विशेषणमनवक्लृप्तम्। तस्मादपि देवतान्तरम्॥ १८॥

भा० वि०—एवं श्रुतिसमवायित्वेन विशिष्टस्यैव ग्रहदेवतात्वमभिधाय तत्फले देवताभेदे भेदव्यपदेशं हेत्वन्तरमुक्त्वा इदानीं विशिष्टस्यैव गृहदेवतात्वे युक्त्यन्तरमाह—**गुणश्चेति**। यदा केवलस्येन्द्रस्य ग्रहसम्बन्धबोधकं वाक्यं तदा तस्य महत्त्वं नाम गुणो भवतीति गुणाद्व्याख्यानमनर्थकमिति व्याचष्टे—**यदेति**। आनर्थक्यमुपपादयति—**देवताभिधानमिति**। विहितेऽपीति सम्बन्धः। ननु प्रकृतग्रहसम्बन्धीन्द्रस्तुत्यर्थं महत्त्वकीर्तनमर्थवद्भविष्यतीति शङ्कते—**अथेति**। दूषयति—**नैवमिति**। विशेषणमिति। गृहसम्बन्धिन इन्द्रस्याप्रसिद्धत्वेनाननुवाद्यत्वात्तत्स्तुत्यर्थं महत्त्वविशेषणमनुपपन्नमित्यर्थः।

नन्वेवमपीन्द्रोऽस्य देवतेत्युक्ते कोऽसाविन्द्र इत्यपेक्षायां यो महानिति विधेयेन्द्रोपलक्षणार्थं गुणाभिधानं भविष्यतीति तत्राह—**गुणसम्बन्धस्येति**। गुणेन विशेषणं व्यावर्तनमुपलक्षणमित्यर्थः। न चेन्द्रस्य ग्रहमहत्त्वयोः अन्यतो प्राप्तावपि महेन्द्रपदादेव प्राप्तिर्भविष्यतीति वाच्यम्; त्वत्पक्षेऽस्य पदस्य स्तुत्यर्थत्वेन लक्षणार्थत्वेन वा विध्यर्थत्वायोगादेकस्मिंश्च पदे निष्कर्षाभावेनांशेन विध्यनुवादायोगात् नास्मादेव प्राप्तिः संभवतीत्याशयः। यस्माद्गुणकीर्तनान्यथानुपपत्त्या गुणविशिष्टस्यैव ग्रहदेवतात्वं तस्मादित्युपसंहरति—**तस्मादिति**॥ १८॥

त० वा०—यदि चाऽऽदिमाननादिर्वा गुणः केवलमिन्द्रस्तुत्यर्थमेवोपादीयते, न देवतात्वेऽन्तर्भवति, ततोऽस्योपादानमेवानर्थकं स्यात्। सर्वा हि देवतैवमर्थमभिधीयते[1] वा, कथं नाम तदुद्देशेन कर्म क्रियेतेति।

यदि चाविहिते, विहिते च गुणे केवलेनेन्द्रेण व्यवह्रियते, ततो नार्थो गुणाभिधानेन। किं च—

गुणोऽनन्तर्गतश्चात्र पश्चादभिहितो भवेत्।
लक्षणत्वेन वोक्तः सन्न चाप्राप्तेस्तदस्ति[2] ते॥

---

१ क. विधी यतेत्यधिकम्। २ क. (टिप्पण्यां) चाप्राप्तेतदस्तीति।

न हि ग्रहसंबन्ध इन्द्रस्य प्राप्तः येन तद्‌गतेन्द्रानुवादेन महत्त्वं केवलमेव स्तुत्यर्थमुच्येत। न च महानिन्द्रः प्राप्तो यतो गुणेनोपलक्ष्य विधीयेत। तस्मादप्राप्तविधेर्देवतान्तरता ॥ १८ ॥

न्या० सु०—यदेत्यादिभाष्येण शुद्धस्येन्द्रस्य देवतात्वे महत्वगुणकीर्त्तनानर्थक्यापत्तिरित्येवं सूत्रं व्याख्यातम्। तद् प्रमादपाठस्य तुल्यसांप्रदायिकत्वेन निरस्तस्य आशङ्कितुमशक्यत्वेन गुणस्य देवतात्वानन्तर्गतिवादिना स्तुत्यर्थकीर्त्तनस्यावश्यवाच्यत्वादानर्थक्यपरिहारोपपत्तेरयुक्तमाशङ्क्य, प्रकृतग्रहसम्बन्धनिरपेक्षस्येन्द्रस्वरूपस्य वा स्तुतिः प्रकृतग्रहसम्बन्धिनो वेति विकल्प्य, आद्यकल्पे विधिशेषत्वाभावेनानर्थक्यमुपपादयितुमाह—**यदि चेति**। स्तुतेर्विध्यङ्गत्वं विनानर्थक्यापत्तेर्देवतात्वान्तर्गत्यभावे गुणाभिधानानर्थक्यस्याऽपरिहार्यत्वम्—**सर्वा हीत्यनेनोक्तम्**। अथोच्येतेति भाष्येण द्वितीयं कल्पमाशङ्क्य, नैवमित्यनेनेन्द्रस्य प्रकृतग्रहसम्बन्धाप्रतीतेर्न स्तुत्येन्द्रविशेषणत्वं प्रकृतग्रहसम्बन्धस्य सम्भवतीत्युक्तम्।

नन्वेवं तर्हि कोऽसाविन्द्र इत्यपेक्षायां यो महानिति विधेयेन्द्रोपलक्षणार्थं गुणाविधानं भविष्यतीत्याशङ्कानिरासार्थं गुणसम्बन्धस्य चेत्युक्तम्। तदुभयं व्याचष्टे—**किं चेति**। इन्द्रस्य ग्रहणसम्बन्धप्राप्तेः पश्चादभिहितः सन् विधेयदेवतोपलक्षणत्वेन वोक्तः सन् गुणो देवतात्वेऽनन्तर्गतो भवेन्न चैतत्पश्चादभिधानं देवतोपलक्षणत्वेन वा वचनमस्ति। सम्भवतीन्द्रस्य ग्रहमहत्वसम्बन्धयोरन्यतोऽप्राप्तत्वादित्युक्तम्। नन्वन्यतो प्राप्तावपि माहेन्द्रपदादेव प्राप्तिर्भविष्यतीत्याशङ्क्य त्वत्पक्षेऽस्य स्तुत्यर्थत्वेन, लक्षणार्थत्वेन वा विध्यर्थत्वायोगादेस्मिश्च पदे निष्कर्षासम्भवेनांशेन विध्यनुवादायोगान्नास्मादेव प्राप्तिः सम्भवतीति तेशब्देनोक्तम्। श्लोकं व्याचष्टे—**न हीति**। तस्मादपीत्युपसंहारभाष्यं व्याचष्टे—**तस्मादिति** ॥ १८ ॥

भा० प्र०—यदि इन्द्र एवं महेन्द्र अभिन्न होते तो इस स्थल में महत् शब्द से इन्द्र को गुण का प्रकाश करना व्यर्थ हो जाता, कारण, किसी वैशिष्ट्य के विधान करने के लिए ही गुणख्यापन किया जाता है। किन्तु, पूर्वपक्षी के मत में इन्द्र का स्मरण या स्वरूप प्रकाश करना ही जब स्तोत्रशस्त्र का प्रयोजन है, तब इन्द्र शब्द के द्वारा ही उसका निर्वाह हो जाता है, अतः, महत् शब्द का प्रयोग करना अनर्थक है। "गुणः" = गुण, "च" = और, "अनर्थकः" = अनर्थक अर्थात् निष्प्रयोजन, "स्यात्"=होगा ॥ १८ ॥

तथा याज्यापुरोरुचोः ॥ १९ ॥

शा० भा०—एवं सति याज्यापुरोनु[1]वाक्ययोर्भेदेन दर्शनमुपपद्यते। ऐन्द्र[2] सानसिं रयिम्, इत्यैन्द्रयाज्यापुरोनुवाक्याद्वयम्। महाँइन्द्रो य ओजसा, इति भेदेन माहेन्द्रं[3] दर्शयति। तदेकत्वे विकल्प्येत। तत्र पक्षे बाधः स्यात् ॥१९॥ युक्तिः।

१ ब. पुरोरुचो। २ क. ऐन्द्रसानसिं। ३ ब. एतदन्तमेव सूत्रभाष्यम्।

भा० वि०—देवताभेदे हेत्वन्तरत्वेन तथेति सूत्रं व्याचष्टे—**याज्या पुरोरुचोश्चेति ।** उपपद्यते देवतान्तरत्व इति विपरिणतस्यानुषङ्गः । यथा बहुदुग्धिमन्त्रयोः भेददर्शनं देवताभेद उपपद्यते तथा याज्यापुरोऽनुवाक्ययोरिति, तथाशब्दं व्याख्यातुं च शब्दः भेददर्शनमुपपादयति—**ऐन्द्रेति ।** रयिमित्यस्यानन्तरं प्रससाहिषे पुरुहूत शत्रून् इति पठितव्यं पुरोऽनुवाक्याशब्देन पुरोरुक्छब्दो व्याख्यातः । ओजसेत्यस्यानन्तरं भुवस्त्वमिन्द्र ब्रह्मणा महानिति पठितव्यम्—भेदेनेति ऐन्द्राद्याज्यानुवाक्यद्वयादित्यर्थः ॥ १९ ॥

त० वा०—पूर्ववन्मन्त्रव्यपदेशभेदव्यवस्था ॥ १९ ॥

न्या० सु०—पुरोरुक्शब्दस्य शस्त्रगतमन्त्रविशेषवाचित्वेऽपि याज्यासाहचर्येणेहानुवाक्यावाचित्वं वक्तुं भाष्यकृता पुरोऽनुवाक्याशब्दः प्रयुक्तः । तथाशब्दो बहुदुग्धिमन्त्रयोर्भेदव्यवदेशादिन्द्रमहेन्द्रयोर्भेदः । तथैन्द्रसानसिं रयिं प्रससाहिषे पुरुहूत शत्रूनिति याज्यानुवाक्याद्वयमैन्द्रं महां इन्द्रो य' ओजसा भुवस्त्वमिन्द्र ब्रह्मणा महानिति माहेन्द्रमिति व्यपदेशभेदादिन्द्रमहेन्द्रयोर्भेद इत्येवं व्याख्यातः तत्र कथं व्यपदेशस्य देवताभेदहेतुतेत्यपेक्षायां बहुदुग्धिमन्त्रोक्तां देवतैक्ये विकल्पापत्तिमतिदेष्टुमाह—**पूर्ववदिति ।** व्यवहितातिदेशपरिहारार्थं माहेन्द्रं दध्यमावास्यायां माहेन्द्रं पयोऽमावास्यायामित्यत्रापि महत्त्वस्य देवतात्वानन्तर्गतौ गुणानर्थक्यं तथाशब्देनातिदेष्टव्यम् ॥ १९ ॥

भा० प्र०—इन्द्र एवं महेन्द्र विभिन्न देवता हैं, इसमें अन्य कारण भी है—'तथा याज्या पुरो रुचोः' दर्शपूर्णमास के होत्र काण्ड में 'इन्द्र सानसिं रयिम् (तै० सं० ३।४।११) इस याज्या मन्त्र में इन्द्र का उल्लेख किया गया है, यहाँ ईन्द्रो य ओजसा' (ऋ० सं० ५।८।९) इस पुरोनुवाक्य मन्त्र में महेन्द्र का पृथक् रूप में निर्देश किया गया है, इन्द्र एवं महेन्द्र यदि विभिन्न न होते तो यह कथन व्यर्थ होता ।

तथा = और भी, 'याज्या पुरोरुचोः' = याज्या एवं पुरोरुक् अर्थात् पुरानुवाक्या नामक दो मन्त्रों में पृथक् रूप में जो निर्देश है वह व्यर्थ हो जायगा ॥ १९ ॥

वशायामर्थसमवायात् ॥ २० ॥

शा० भा०—यदुक्तम्, अजावशाशब्देन चोदिते कर्मणि च्छागशब्देन[1] निगमा भवन्तीति । तद् युक्तम् । वशायामर्थसमवायित्वं[2] वयं प्रत्यक्षमवगच्छामः छागस्य[3] वपाया मेदसोऽनुब्रूहि इति । यैव वशा, सैव च्छागेति । तस्मात् प्रगाथस्योत्कर्षः संस्कारपक्षे । अतः प्रधानकर्मणी इति ॥ २० ॥

---

१ ब. छागा । २ ब. समवायेनोभयं । ३ ब. छागाया ।

भा० वि०—ननु वशादृष्टान्तेन विशिष्टस्य विधिविषयत्वेऽपि विशुद्धस्य मन्त्र-प्रकाश्यत्वोपपत्तेः न गुणान्तर्गत्यापादनेन दूषणाभिधानं युक्तमित्यत आह—**वशायामिति**। एतद्व्याख्यातुं पूर्वोक्तमनुवदति—**यदुक्तमिति**। सूत्रं व्याकुर्वन् दृष्टान्तवैषम्यमाह—**तद्युक्तमिति**। अर्थसमवायित्वमर्थरूपेण हृदयादिना कर्मसम-वायित्वं ततः किमत आह—**छागस्येति**। यैव वशात्वविशिष्टाऽजा विहिता सैव, छागस्य वपाया इत्यत्र छागः विशेषशब्दाभावेऽपि अर्थरूपोपकारितया प्रत्यक्ष-लभ्यत्वाद्विशेषस्येत्यर्थः। देवतायास्तु शब्दस्वरूपोपकारित्वाच्छब्दविशेषाभावे तद्विशेषालाभ इति भावः। दृष्टान्तदार्ष्टान्तिकयोः वैषम्ये फलितमाह—**तस्मादिति**। अतः प्रगाथोत्कर्षपरिहाराय प्रधानकर्मत्वं स्तोत्रशस्त्रयोरित्याह—**अत इति** ॥ २० ॥

त० वा०—वशादिद्रव्याणामर्थरूपोपकारित्वात्प्रत्यक्षलभ्ये विशेषे सामान्ये-नापि सिद्धेर्न विधिशब्दादरः ॥ २० ॥

न्या० सु०—ननु वशादृष्टान्तेन विशिष्टविधावपि शुद्धप्रकाशनोपपत्तेरनाशङ्कित-गुणानन्तर्गत्यापादनेन दूषणाभिधानमयुक्तमित्याशङ्कानिरासायैतत् सूत्रं वशायामर्थरूपेण कर्मसमवायिनो हृदयाद्यवयवान्वयं प्रत्यक्षेणावगच्छाम इति भाष्येण वशायामर्थसम-वायाद् गुणार्थस्याप्यभिधानस्यानुत्कर्षो युक्त इत्येवं व्याख्यातम्। तदुपपादयति—**वशादीति** ॥ २० ॥

भा० प्र०—पूर्वपक्षी ने अजा वशा का दृष्टान्त देकर अपने मत का समर्थन किया था, उसका परिहार करते हुए कहा है कि 'वशायामर्थसमवायात्'। शब्द मात्र से अवगत विषय में प्रत्यक्ष विषय का दृष्टान्त देकर विभिन्न कल्पना करना उचित नहीं है, वरन्, शब्द के अनुगुण ही कल्पना करना उचित है। वशा = बन्ध्या अजा प्रत्यक्ष ग्राह्य होने से अजा के साथ वशात्व का अर्थात् बन्ध्यात्व का सम्बन्ध भी प्रत्यक्ष सिद्ध है। इसलिए पूर्व में 'वशा अजा' कह कर बाद में केवल छाग कह कर निगम अर्थात् उपसंहार होने पर भी छागी वशा से अभिन्न है—यह अनायास ही अवगत होता है। किन्तु, देवतातत्त्व उन यागों के साथ उन देवताओं का सम्बन्ध केवल वेद अर्थात् शब्द से अवगत होने से, प्रत्यक्ष आदि अन्य किसी भी प्रमाणों से उसको नहीं जाना जा सकता है। अतः, वेद में जैसा निर्देश है, उसको उसी रूप में ग्रहण करना चाहिए। जिस कर्म में, जिस भाव में, जिस नाम में जिस देवता का सम्बन्ध बोधित होता है, उसका उसी रूप में ग्रहण करना उचित है, उसका नाममात्र भी व्यतिक्रम करने पर वह वेद विज्ञापित नहीं रहेगा और वेद विज्ञापित न रहने पर वह प्रमाण भी नहीं होगा। क्योंकि, किसी कर्म में किसी देवता का किस प्रकार सम्बन्ध है—यह अलौकिक होने से वेद से अतिरिक्त किसी भी प्रमाण के द्वारा उसको नहीं जाना जा सकता है। इसीलिए कुमारिल ने कहा है—

अर्थोऽपि यादृशो यत्र देवतात्वेन चोदितः।
मनागपि ततोऽन्यत्वे देवतेति न गम्यते ॥

जिस स्थल में देवता के साथ जैसा प्रयोजन वेद के द्वारा उपदिष्ट होता है उसका यदि अल्पमात्रा में भी अन्यथा किया जाता है, उसको देवता के रूप में अवगत नहीं किया जा सकता है। इसलिए, महेन्द्र न कहकर महत् शब्द के स्थान में यदि उसका समानार्थक वृहत् शब्द देकर 'वृहदिन्द्र' कहा जाय तो श्रुति में जहाँ महेन्द्र को देवता कहा जाता है, वहाँ वह देवता नहीं होगा, अतः, महेन्द्र को यदि इन्द्र कहा जाय तो महत् शब्द के परित्याग की न्यूनता होगी और वह किसी प्रकार भी देवता नहीं होगा। यद्यपि इन्द्र और महेन्द्र स्वरूपतः एक ही है तथापि महेन्द्र ग्रह के योग में महेन्द्र शब्द के द्वारा उल्लेख है तभी वह देवता होगा, इन्द्र शब्द के द्वारा उसका निर्देश होने पर वह देवता नहीं होगा। इसका विस्तृत विचार नवम अध्याय के चतुर्थ पाद के चतुर्थ अधिकरण में एवं दशम अध्याय के प्रथम पाद के तेरहवें अधिकरण में किया गया है। अतः, वशादृष्टान्त इन्द्र एवं मन्हेद्र का भिन्न देवता कहना पूर्वपक्षी का ठीक नहीं है।

'वशायाम्' = वशा में अर्थात् पूर्व में उदाहृत वशा = बन्ध्या छागी में, 'अर्थ-समवायात्' = अर्थ का अर्थात् वाच्य पदार्थ का = बन्ध्यात्व का समवाय अर्थात् समवेतता या अभिन्न प्रत्यक्ष सिद्ध है, अतः, वह इस स्थल में दृष्टान्त नहीं हो सकता है ॥ २० ॥

यत्रेति वाऽर्थवत्त्वात् स्यात् ॥ २१ ॥

शा० भा०—वाशब्दः पक्षं व्यावर्तयति संस्कारकर्मणी एव स्तोत्रशस्त्रे। यच्चै तत् प्रगाथस्योत्कर्ष इति। उत्कृष्यतां यत्रेन्द्र[1]स्तत्र प्रगाथः लिङ्गेन हि[2] क्रमसंनिधी बाधितव्यावेव ॥ २१ ॥ आशङ्काः ॥

भा० वि०— एवमुत्कर्षापादनेन संस्कारकर्मत्वेऽप्यनुत्कर्षवादिनि पूर्वपक्ष्येक-देशिनि निरस्ते परमपूर्वपक्षीन्याय एवोत्कर्षः इत्याह—**यत्रेति**। वेति। एतद्व्याचष्टे—**वा शब्द इति**। पक्षं प्रधानकर्मत्वपक्षं तत्फलं स्वपक्षप्रतिज्ञा-माह—**संस्कारेति**। तत्र परोक्तमनूद्य यत्रेतीति स्यादिति च सूत्रावयवद्वयेन परिहरति—**यदेतदित्यादिना**। इतिशब्दः संस्कार्येन्द्रसद्भावविषय इति यत्रेन्द्र इत्यनेन दर्शितम्।

ननूत्कर्षाभ्युपगमे प्रगाथस्य क्रमसंनिधिभ्यां ग्रहयागाङ्गत्वावगमो बाध्येते-त्याशङ्क्य प्रगाथस्येन्द्रप्रकाशनसामर्थ्यलक्षणेन लिङ्गेन क्रमसन्निधी बाधितव्यौ

१ ब. स्तत्रेंद्र इत्यधिकम। ५ ब. च।

अन्यथानर्थक्यप्रसङ्गादिति । एवमर्थवत्त्वादिति सूत्रावयवं व्याचष्टे—**लिङ्गेनेति** ॥ २१ ॥

त० वा०—बलवत्प्रमाणविरोधे संस्कारपक्षस्त्यज्येत, न च सोऽस्ति। लिङ्गबलीयस्त्वादुत्कर्षसिद्धेरित्यपर्युदासः संस्कारपक्षस्य।

अथ वाऽर्थैकदेशोऽयं समासार्थप्रकाशनम्।
करिष्यत्यविरोधाय मनोतास्थाग्निशब्दवत् ॥

अनुत्कृष्यमाण एव वा प्रगाथः सन्निधिवशादवयवद्वारेण महेन्द्रमविरोधाय, दृष्टार्थत्वाय च प्रकाशयिष्यति। यथाऽग्नीषोमीये मनोतायामग्निशब्दः प्रकरणात्समासस्थः प्रतीयमानः साहचर्यात्सोममपि प्रतिपादयन्समुदायार्थो विज्ञायते। अतश्चानुत्कर्षेऽप्यदोष इति ॥ २१ ॥

न्या० सु०—संस्कारकर्मत्वेऽप्यनुत्कर्षवादिनि पूर्वपक्ष्येकदेशिनि श्रुतिसमवायित्वादिति सूत्रपञ्चकेन निरस्ते, परमपूर्वपक्षी लिङ्गेन क्रमसंनिधी बाधित्वा न्याय्य एवोत्कर्ष इत्यनेन सूत्रेण प्रतिपादयतीति यथाभाष्यं तावद् व्याचष्टे—**बलवदिति**। अनेन चेतिकरणेन संस्कार्यसद्भावं परामृश्य यत्र संस्कार्यसद्भावः, तत्र प्रगाथः स्यादित्येवं सूत्रं व्याख्यातम्। प्रगाथमेव वेतिकरणेन परामृश्य यत्र प्रगाथः पठ्यते, तत्रैव स्यादिन्द्राभिधानद्वारेण लक्षणया महत्त्वविशिष्टेन्द्रप्रकाशनेनार्थवत्त्वादित्युत्कर्षापत्तिपरिपारार्थत्वेनैवैतत् पूर्वपक्षसूत्रं व्याख्येयमित्याह—**अथ वेति**। यथा मनोताख्यसूक्तस्योऽग्निशब्दः करणेनाग्नीषोमसमासस्थाग्निप्रकाशकतयावगम्यमानः सहचरितसोमलक्षकत्वात् समासचर्थस्य समुदायस्य प्रकाशनं करोति, तथायमिन्द्रशब्दो महेन्द्रसमासार्थैकदेशतया प्रत्यभिज्ञायमानत्वात् समासार्थविशिष्टस्य प्रकाशनं करोतीत्यर्थः। श्लोकं व्याचष्टे—**अर्थैक**।

ननु 'त्वं ह्यग्ने प्रथमो मनोतेति सूक्तमन्वाहे'ति श्रुत्या मनोतासूक्तविधानाल्लैङ्गिकोत्कर्षानुपपत्तेर्लाक्षणिकार्थत्वं युक्तम्। प्रगाथस्य तु श्रौतविधानाभावाल्लिङ्गेनोत्कर्षोपपत्तेर्न लाक्षणिकार्थत्वं युक्तम्। अनुत्कर्षाभिधानार्थत्वे चास्य सूत्रस्योत्तरसूत्रमुत्कर्षे सति केषुचिन्मन्त्रेष्वानर्थक्यापत्तेर्नोत्कर्षपक्षो युक्त इत्यभिधानार्थं न सङ्गच्छेतेत्याशङ्क्याह—**अतश्चेति**। अनुत्कर्षेऽप्यर्थवत्त्वोपपत्तेर्न संस्कारकर्मत्वे सत्यसमवेताभिधानलक्षणदोषापत्तिरिति प्रौढिप्रदर्शनायेयं व्याख्या। उत्तरसूत्रं तु याम्यादीनामेकदेशतयापि समासार्थलक्षणकत्वायोगादुत्कर्षापत्तेरपरिहार्यमानर्थक्यमित्यभिधानायेत्याशयः ॥ २१ ॥

भा० प्र०—पूर्वपक्षी ने अन्य प्रकार से भी अपने सिद्धान्त की स्थापना के लिए 'यत्रेति वा स्यात्' यह कहा है। जहाँ इन्द्र देवता है, वहाँ प्रगाथ का उत्कर्ष होता है तो भले हो, कारण, 'अर्थवत्त्वात्' = प्रयोजनीयता अर्थात् अर्थवत्ता बलवती है। मन्त्र

का लिङ्ग अर्थात् सामर्थ्य इन्द्र के प्रकाश करने में है। अतः, इन्द्र का प्रकाश करके ही वह सार्थक हो जाता है, इसलिए, जहाँ इन्द्र देवता है, वहाँ उसका उत्कर्ष होता है तो हो, किन्तु, इससे क्रम एवं सन्निधि का बाध होता है—यह कहने पर कहा जा सकता है कि लिङ्ग = सामर्थ्य, क्रम एवं सन्निधि की अपेक्षा प्रबल है, अतः, लिङ्ग के अनुरोध से यदि क्रम एवं सन्निधि का बाध होता है तो इसमें क्या हानि है? अतएव स्तुतशस्त्र प्रधान कर्म नहीं है, अपितु गुणकर्म है।

'यत्र इति' = जहाँ इन्द्र देवता है, वहाँ, 'वा' = आशङ्का अर्थ में 'अर्थवत्त्वात्'=इन्द्र स्मरणरूप प्रयोजन होने से, 'स्यात्' = होगा, अर्थात् उत्कर्ष होगा। आशङ्का ॥२१॥

न त्वाम्नातेषु ॥ २२ ॥

शा० भा०—अपरेषां मन्त्राणामुत्कृष्टानामन्यत्राऽर्थवत्ता नास्ति, तेषामानर्थक्यं स्यात्। यथा 'याम्याः शंसति, शिपिविष्टवतीः[1] शंसति पितृदेवत्याः शंसति, आग्निमारुते, कुसुम्भकसूक्तम्, अक्षसूक्तम्[2], मूषिकासूक्तमित्येवमादीनाम् ॥ २२ ॥ अशङ्कानिरासः ॥

भा० वि०—अस्मिन् पूर्वपक्षेऽप्यनुपपत्तिमाशङ्कते—**नन्वाम्नातेष्विति**। एतद्व्याचष्टे—**अपरेषामिति**। आम्नातेषु प्रगाथादिषु मध्ये केषुचिदुत्कृष्टेषु अर्थवत्त्वसंभवेऽपि न सर्वेषूत्कृष्टेष्वर्थवत्तास्ति। अपरेषां मन्त्राणामाग्निमारुते विहितानां याम्यादीनामुत्कृष्टानामन्यत्राप्यर्थवत्त्वाभावादित्यर्थः। यतस्तेषामानर्थक्यं स्यात् अत उत्कर्षो न युक्त इत्याह—**तेषामिति**। अपरेषामानर्थक्यं विवृणोति—**यथेत्यादिना** ॥ २२ ॥

त० वा०—आम्नातेष्वपि मन्त्रेषु नोत्कृष्टेष्वर्थदर्शनम्।
सर्वेषु भवतीत्येवं नोत्कृष्टत्वं न दुष्यति ॥

न हि यमादीनां ग्रहान्तरेष्वपि देवतात्वम्, येनेन्द्रवदुत्कृष्टैर्मन्त्रैः प्रकाश्येरन्। अतस्तेषां तावद्विध्यानर्थक्यप्रसङ्गादवश्यमदृष्टार्थत्वेन भवितव्यम्। ततश्च तत्सामान्यादितरेषु तथात्वम्, तस्मान्न संस्कारकर्मत्वमिति ॥ २२ ॥

न्या० सु०—ऐन्द्रप्रगाथादिषूत्कृष्यमाणेष्वर्थवत्त्वसम्भवेऽपि सर्वेषु प्रकरणाम्नातेष्वप्युत्कृष्टेऽर्थवत्त्वं नास्तीत्युत्कर्षापादकसंस्कारकर्मत्वपक्षो न युक्त इति परमपूर्वपक्षदूषणशङ्कार्थत्वेन सूत्रव्याख्यानार्थमपरेषामिति भाष्यं व्याचष्टे—**आम्नातेष्वपीति**। अर्थदर्शनमित्यनेन पूर्वपक्षसूत्रस्थस्यार्थवत्त्वशब्दस्य प्रथमान्तत्वेन विपरिणतस्यानुषङ्गो दर्शितः। उत्कृष्टशब्देनाग्निमारुते विहितानां याम्यादीनामुत्कृष्टानामन्यत्राप्यर्थ-

---

१. मंडूकसूक्तं इत्यधिकम्। २. क. शिपिविष्टवतीं पितृदेवत्यां।

वत्ता नास्तीति भाष्यार्थः सूचितः। एतदेवोपपादयति—**न हीति**। विधिशब्देनाम्नातशब्दो विहितार्थतया व्याख्यातो भवति। ननु यमादेर्ग्रहान्तरेऽपि देवतात्वाभावाद्याम्यादेरानर्थक्येऽप्यैन्द्रप्रगाथादेरैन्द्रादिग्रहयागेष्वर्थवत्त्वोपपत्तेः संस्कारकर्मत्वं भविष्यतीत्याशङ्क्याह—**ततश्चेति** ॥ २२ ॥

भा० प्र०—पूर्वपक्षी ने कहा है कि अर्थवता के अनुरोध से प्रगाथ का उत्कर्ष करना असङ्गत नहीं है—किन्तु यह ठीक नहीं है। क्योंकि इन्द्र के प्रकाशक मन्त्रों का उत्कर्ष करने पर इन्द्र का प्रकाश कर वह सार्थक हो सकता है, 'न तु आम्नातेषु' = किन्तु यम देवता सम्बन्धीय शिपिविष्ट देवता सम्बन्धीय एवं अन्य जो आम्नात अर्थात् वेद में मन्त्र उपदिष्ट हैं, उनका भी उत्कर्ष नहीं हो सकता है, कारण, उसमें किसी प्रकार की सार्थकता नहीं है। अतः, उनका महेन्द्र ग्रह याग में ही पाठ करना होगा, और उसके फलस्वरूप अदृष्ट होगा इसको मानना ही पड़ेगा, ऐसी स्थिति में उसके साथ ही पठित 'प्रगाथ' का भी पाठ अदृष्ट उत्पन्न करेगा—यह मानना होगा। प्रक्रम के अनुरोध से यही मानना उचित है। यदि यह माना जाता है तो यह प्रधानकर्म ही होगा।

'न तु' = न = अर्थवत्ता नहीं है, 'आम्नातेषु' = 'आम्नात' = वेदोपदिष्ट अन्य मन्त्रों में ॥ २२ ॥

दृश्यते ॥ २३ ॥

शा० भा०—तदुच्यते। सर्वेषामर्थवत्ताऽस्ति। मण्डूकसूक्तस्याग्नौ, अक्षसूक्तस्य राजसूये, मूषिकासूक्तस्यैकादशिन्याम्, सर्वेषां वाचस्तोमे सर्वा ऋचः सर्वाणि यजूंषि, सर्वाणि सामानि वाचस्तोमे पारिप्लवं[1] शंसति' इति। तथा[2] यस्याऽऽश्विने शस्यमाने सूर्यो नोदियादपि, सर्वा दाशतयीरनुब्रूयादिति। तस्मादस्त्यर्थवत्तोत्कृष्टानाम्। अतः संस्कारकर्मणी स्तोत्रशस्त्रे इति ॥ २३ ॥ आशङ्का ॥

भा० वि०—पूर्वपक्षी परिहरति—**दृश्यत इति**। एतद्व्याचष्टे—**तदुच्यत इति**। यद्यपि यमादयो न गृहदेवताः तथाप्यन्यकर्मोपयोगित्वादुत्कृष्टमन्त्रप्रकाश्याः स्युः तथा च दृश्यमानार्थत्वादर्थवत्तेत्यर्थः। ननु यमादीनामन्यकर्मोपयोगित्वेऽपि कथं मण्डूकादीनां तदुपयोगित्वमत आह—**मण्डूकेति**। अग्नौ मण्डूकेन विकर्षणाम्नानात् मण्डूकस्तुतौ तत्सूक्तस्योपयोगः। राजसूये "अक्षैर्दीव्यति ?" इति विधानादक्षसूक्तस्य विनियोगः। पूपैकादशिन्यां 'आखुस्ते पशुः'

१. क. पारिप्लवमश्वमेधे। २. ब. तथा च।

इत्याखोरुपशयसंबन्धसङ्कीर्तनादाखुद्वारेणोपशयस्तुतौ मूषिकसूक्तस्येत्यर्थः। कुसुम्भकसूक्तादीनां तु यद्यपि विशेषरूपेणार्थो नास्ति तथापि सामान्यविधानेनार्थवत्ता भविष्यतीत्यभिप्रेत्याह—**सर्वेषां वेति**। सामान्यविधिमेव दर्शयति—सर्वा ऋच इति। कुसुम्भकसूक्तादीनां तु यद्यपि विशिष्टरूपेणार्थो नास्ति तथापि सामान्यविधानेनार्थवत्ता भविष्यतीत्यभिप्रेत्याह—**सर्वेषां वेति**। सामान्यविधिमेव दर्शयति—**सर्वा ऋच इति**। कुसुम्भकसूक्तादीनामन्यत्राप्युपयोगमाह—**तथेति**। मण्डलानां दशतयमस्यास्तीति दशतयी ऋग्वेदसंहिता तस्यां भवा ऋचो दासतय्यः ता इत्यर्थः। सहस्रावसमोदेतोऽशंसेदित्याश्विनाख्ये शास्त्रे सूर्योदयावधि ऋक्सहस्रशंसनं विधाय समाप्तेऽप्यृक्सहस्रे सूर्यानुदये सति शस्त्रविच्छेदपरिहारार्थं सूर्योदयावधि यासां कासांचिदुपदेशात् सर्वेषामर्थवत्तेत्यर्थः।

ननु कुसुम्भकसूक्तादीनां वाचस्तोमादावप्यदृष्टार्थतैव तथा प्रगाथस्यानुत्कृष्टस्य किं न स्यादत आह—**तस्मादिति**। अपरिवधारणे, उत्कृष्टानामेवेत्यर्थः। वाचस्तोमाश्विनयोः श्रुत्यैवासमवेतार्थमन्त्रविधानाददृष्टार्थता क्रमसन्निधिकल्प्यधातुश्रुत्या न प्रगाथस्य लिङ्गबोधनात् अ(दृ)ष्टार्थता युक्तेत्याशयः। पूर्वपक्षमुपसंहरति—**अत इति**॥ २३॥

त० वा०—यमादयो न विद्यन्ते यद्यपि ग्रहदेवताः।
अन्यकर्मोपयोगित्वात्प्रकाश्याः स्तुस्तथाऽपि नः॥

मण्डूकसूक्तस्याग्नौ प्रयोगः। तत्र मण्डूकेनाग्निविकर्षणाम्नानात्। अक्षसूक्तस्य राजसूये। तत्र 'अक्षैर्दीव्यति' इति विधानात्।

मूषिकासूक्तस्यैकादशिन्याम्, 'आखुस्ते' पशुः इत्युपशयसंबन्धसंकीर्तने सति तद्द्वारेणोपशयस्यैव स्तुतिः। कुसुम्भसूक्तादीनां तु यदि क्वचिद्विशेषरूपेणार्थो नास्ति, ततः सामान्यविधानेनार्थवत्ता भविष्यति।

वाचः स्तोमे सर्वमन्त्रोपदेशात्। तथाऽऽश्विने सूर्योदयावधि समाप्त्यसंभवे सर्वासामृचामुपदेशात्।

तत्र वचननैवाऽऽसमवेतार्थमन्त्रविधानसामर्थ्यात्, अगतेरदृष्टार्थाश्रयणम्। न च क्वचिददृष्टार्थत्वेन सर्वत्रैव दृश्यमानमप्यर्थं प्रोज्झ्या[1] दृष्टार्थत्वकल्पना युज्यते।

तथा हि—

न जपादावदृष्टार्थे वैष्णव्यादिनिदर्शनात्।
याज्यादावपि दृष्टार्थे स्याददृष्टार्थकल्पना॥ २३॥

१ क. प्रोच्य।

न्या० सु०—तदुच्यत इत्यादिभाष्येण सर्वेष्वर्थवत्त्वं दृश्यत इत्येवमानर्थक्यापत्तिलक्षणदूषणशङ्कानिरासार्थत्वेनैतत्सूत्रं व्याख्यातम् । तत्र याम्यादीनां ग्रहयागसान्निध्याम्नातेन तद्देवतास्मारकत्वावगतेर्यमादीनां च क्वचित् ग्रहदेवतात्वाभावाद् दूषणपरिहारासम्भवमाशङ्क्याह— **यमादय इति** । ग्रहदेवतात्वाभावेऽपि कर्मान्तरदेवतात्वेन प्रकारान्तरेण वा यथासम्भवमुपयोगात्प्रकाश्यत्वं भविष्यतीत्यर्थः । मण्डूकसूक्तस्याग्नावर्थवत्त्वं भाष्योक्तमुपपादयति—**मण्डूकेति** । राजसूयेऽक्षसूक्तस्योपपादयति—**अक्षेति** । मूषिकासूक्तस्येति भाष्यमेकादशिन्यामथाखुविनियोगाभावादयुक्तमाशङ्क्योपपादयति—**मूषिकेति** । आखोरविनियोगेऽप्युपशयो यूपो भवतीत्युपशयस्यैकादशिन्यां विनियोगात्, तस्य च सर्वे वान्ये यूपाः पशुमन्तोऽथोऽपशव एवापशुरित्युपक्रम्यासौ ते पशुरिति निर्दिशेत्, यं द्विष्यादित्युक्त्वा यदि न द्विष्यादाखुस्ते पशुरिति ब्रूयादिति मन्त्रविधानादाखुसम्बन्धकीर्त्तनाखुस्तुतिद्वारेणोपशयस्तुतित्वान्मूषिकासूक्तस्यैकादशिन्यां प्रयोग इत्यर्थः । सर्वेषामिति कुसुम्भकसूक्तादिविषयत्वेन व्याचष्टे—**कुसुम्भकेति** । सर्वा इति श्रुत्युपन्यासस्य हेतुत्वेनोपयोगमाह—**वाचस्तोम इति** । यस्येति श्रुत्यन्तरोपन्यासस्यार्थवत्त्वाभिधानार्थत्वमाह—**तथेति** । 'सहस्रमृचामोदेतोः शंसेदि'त्याश्विनाख्ये शस्त्रे सूयोदयावध्यृक्सहस्रं समाप्योदिते सूर्ये सौर्यस्य सूक्तम् शंसनं विधाय, समासेऽप्यृक्सहस्रे सूर्यानुदये सत्यृक्सहस्रसमासेः सूर्योदयावधित्वासम्भवाच्छस्त्रविच्छेदपरिहारार्थं सूर्योदयावधि यासां कासां चिदुपदेशात् सर्वासामर्थवत्तेत्यर्थः । मण्डलाख्यदशावयवत्वेन ऋग्वेदसंहिताया दशतयीत्वाद् तद् गता ऋचो दाशतय्य इति व्याख्यातुमृचामित्युक्तम् ।

ननु वाचस्तोमाश्विनयोरपि कुसुम्भकसूक्तादेः समवेतार्थत्वाभावाददृष्टार्थत्वाभ्युपगमे चानुत्कृष्टस्यार्थवत्त्वोपपत्तेरुत्कर्षाभिधानानर्थक्यमित्याशङ्कानिरासार्थं तस्मादिति भाष्यं व्याचष्टे—**तत्र चेति** । तत्र वाचस्तोमाश्विनयोरेव मन्त्रविधानसामर्थ्याददृष्टाश्रयणत्वं युक्तमित्युक्ते, नन्वैद्रप्रगाथादेरपि तर्ह्यनुत्कृष्टस्यैव सन्निधावाम्नानकल्प्यविधिसामर्थ्याददृष्टार्थत्वं भविष्यतीत्याशङ्क्य—**वचनेनैवेत्युक्तम्** । श्रुतिविहितस्यैव लिङ्गबाधेनादृष्टार्थतोचिता न दुर्बलसान्निध्यादिप्रमाणकस्येत्याशयः ।

नन्वेवं सति श्रुतिबलादैन्द्रीवद् गौणलाक्षणिकवृत्त्यन्तराश्रयणेन समवेतार्थाभिधायित्वम्, सूक्तवाकवद्वा मन्त्राभिधेयस्य कर्मसमवायः कस्मान्न भवतीत्याशङ्क्य—**असमवेतार्थेत्युक्तम्** । करणत्वेन विनियुक्तस्य मन्त्रस्य क्रियाम्, तत्साधनं वाऽनभिदधतः करणत्वायोगात्, तत्सिद्ध्यर्थं गौणत्वादिकल्पना । मन्त्रार्थस्य कर्मसमवायकल्पना वोचिता । न चैषां करणत्वेन विनियोगोऽस्तीत्याशयः । अनेन चोत्कृष्टानां प्रकृतावप्रयोज्यानामपि कुसुम्भकसूक्तादीनां तस्माद्वाचस्तोमादौ विधानात् समवेतार्थत्वाभावेऽप्यदृष्टार्थत्वेनार्थवत्तास्तीति भाष्यं व्याख्यातम् ।

नन्वेवं सति मण्डूकसूक्तादेरपि वाचस्तोमाश्विनयोरेव विधिसामर्थ्येनादृष्टार्थतया निवेशोपपत्तेर्नाग्न्यादौ विनियोगकल्पनेत्याशङ्क्याह—**न चेति** । दृष्टार्थसम्भवे तत्त्यागो

न युक्त इत्याशयः । एतदेव दृष्टान्तेनोपपादयति—तथा हीति । अन्यत् यज्ञस्य साधनादावपघाते देवा अवन्तु न इति जपेत्, अपि वाऽन्यां वैष्णवीमिति यज्ञाङ्गभ्रेषे तत्समाधानापेक्षायां विधीयमानस्य जपस्य तादर्थ्येनादृष्टार्थतया तत्साधनभूताया वैष्णव्यादेर्ऋचो दृष्टार्थत्वायोगेनाऽदृष्टार्थत्वेऽपि न तद्दृष्टान्तेन दृष्टार्थयागाङ्गदेवतास्मृतिसाधनत्वेन सम्भवद्दृष्टार्थत्वस्य याज्यादेरपि दृष्टार्थत्वकल्पनोचितेत्यर्थः ॥ २३ ॥

भा० प्र०—पूर्वकथित आपत्तियों के समाधान में पूर्वपक्षियों ने पुनः कहा है कि 'दृश्यते' यम देवता सम्बन्धीय या शिपिविष्ट देवता सम्बन्धीय अन्य स्रुक् मन्त्रों का भी उत्कर्ष होता है एवं उसकी सार्थकता भी होती है, क्योंकि, जिस कर्म में यम आदि देवता हैं, उस कर्म में याम्य आदि ऋक् मन्त्र का पाठ करने पर देवतास्मरण कराकर वह सफल होता है, इसी प्रकार अन्य मन्त्रों की भी सार्थकता है, जिस स्थान में दृष्टार्थता नहीं है, उसमें अगत्या वेदवचन के अनुरोध से अदृष्ट स्वीकार किया जाता है, किसी स्थल में अदृष्टार्थता स्वीकार की गई है, इसलिए सभी जगहों में मानना होगा, यह युक्तिसङ्गत नहीं है ।

'दृश्यते' = देखा जाता है, अर्थात् यम देवता सम्बन्धीय एवं अन्य ऋक् मन्त्र का उत्कर्ष करने पर भी अर्थवत्ता देखी जाती है । इति आशङ्का है ॥ २३ ॥

सिद्धान्तः

अपि वा श्रुतिसंयोगात् प्रकरणे स्तौतिशंसती क्रियोत्पत्तिं विदध्याताम् ॥ २४ ॥

शा० भा०—अपि वा प्रधानकर्मणी स्तोत्रशस्त्रे स्याताम् । कुतः ? श्रुतिसंयोगात् ।

सप्तमीश्रुतिसंयोगो[1] हि भवति—'कवतीषु स्तुवते, शिपिविशिष्टवतीषु स्तुवते' इति । यदि स्तुतिः ततः कवत्यक्षरेष्वाहिता । यदि प्रकाशनम्, ततो देवतायाम् । तत्र करणं कवत्यस्तृतीयया ऽश्रोष्यन्त[2], न[3] सप्तम्या । अपि च, श्रुतिसंयोगो भवति । 'प्रउगं शंसति, निष्केवल्यं शंसति', इति । अतः स्तुतिरभिनिर्वर्तयितव्या तेन मन्त्रेण । गुणवचनः शब्दः स्तुतिनिर्वर्तनार्थो[4] दृष्टमर्थं करिष्यति । तस्मात् प्रधानकर्मणी । अपि च श्रुतिसंयोगो भवति षष्ठीविभक्तिसंयोगः । यथा 'इन्द्रस्य नु वीर्याणि प्रवोचम्' इति । तेन देवताशब्दः स्तुतिसम्बन्धार्थं इत्युच्यते । देवताभिधानार्थप्रातिपदिकार्थत्वात् प्रथमा स्यात् ।

---

१. ब. संयोगो भवति । २. ब. न तु । ३. क. अश्रोष्यं ।
४. क. नार्थोऽदृष्ट ।

अथ यत् प्रथमान्तम्, तद्देवतार्थं भवितुमर्हति। यथा—'इन्द्रो यातोऽवसितस्य राजा' इति।

नेत्युच्यते। तदपि वाक्यसंयोगात् स्तुत्यर्थमेव। ननु वाक्याल्लिङ्गं बलीयः। सत्यम्। एतदपि लिङ्गम्, यत् स्तुतिवाक्यस्य साकाङ्क्षस्य निराकाङ्क्षीकरणसामर्थ्यम्। तथाऽप्युभयथा लिङ्गेऽनुगृह्यमाणे कुतो निर्णयः? वाक्यशेषादेव, न[1] देवताभिधानार्थ इति। देवताभिधानार्थ इत्येतस्मिन् पक्षे स्तुत्यर्थं साकाङ्क्षवचनमनर्थकमेव[2] स्यात्। तस्माददृष्टार्थत्वात् स्तुतिवचनस्य प्रधानकर्मणी स्तोत्रशस्त्रे। अपि च, स्तौतिशंसतीति[3] साक्षाद् गुणवचनौ लक्षणयाऽभिधार्थौ[4] स्यातात्। तस्मात् क्रियोत्पत्तिम्—अपूर्वोत्पत्तिं विदध्यातामिति॥ २४॥ आशङ्कानिरासः॥

भा० वि०—परपक्षनिरासमुखेन स्वपक्षप्रतिज्ञानार्थमपि वेति सूत्रावयवं व्याचष्टे—**अपि वेति।**

ननु लिङ्गेन क्रमसन्निधिबाधया संस्कारकर्मत्वस्योक्तत्वात् कथं प्रधानकर्मत्वमिति पृच्छति—**कुत इति।** श्रुतिसंयोगात्प्रकरण इति सूत्रावयवेन परिहरति—**श्रुतीति।** इन्द्रप्रकाशनसामर्थ्यात्मकेन लिङ्गेन मन्त्रस्य तत्प्रकाशने विनियोगे सत्यानर्थक्यापत्तेः कर्मान्वितरूपे च लिङ्गस्य व्यापाराभावात् सन्निधिक्लृप्तयैव श्रुत्यैन्द्रस्य प्रगाथस्य प्रकृते पृष्ठाख्ये स्तोत्रेऽङ्गत्वेन संयोगादिति सूत्रावयवार्थः। विधान्तरेण श्रुतिसंयोगादिति सूत्रावयवं व्याचष्टे—**सप्तमीति।**

ननु सप्तमी श्रुतिसंयोगेऽपि स्तुतेः कथं प्रधानकर्मत्वमत आह—**यदीति।** गुणगुणिसंबन्धज्ञापनं स्तुतिः। ज्ञापनं च ज्ञानहेतुर्व्यापारः। स चाभिधानाख्योऽक्षराश्रयः। ततः कवत्यक्षराश्रितत्वात् स्तुतेः तत्प्राधान्ये सप्तमीश्रुतिसंयोगो घटत इत्यर्थः। पूर्वपक्षे तु सप्तमीसंयोगोऽनुपपन्न इत्याह—**यदि प्रकाशनमिति।** यदि प्रकाशनं प्रधानं ततस्तस्य स्फुरणरूपत्वे देवताश्रयत्वं ज्ञानरूपत्वे त्वात्माश्रयत्वमिति कवत्याधारत्वाभावात् सप्तमीश्रुतिसंयोगानुपपत्तिरित्यर्थः। अपि च प्रकाशकरणत्वात् कवतीनां तृतीययैव भवितव्यमित्याह—**तत्र करणमिति।** श्रुतिशब्दमाख्यातविषयमपि व्याचष्टे—**अपि चेति।** यतश्शंसतीति पूर्वपरीभूतायां भावनायां धात्वर्थः करणं श्रूयते शेषाणि च कारकाणि धात्वर्थं निष्पादयन्ति सन्ति सम्बध्यन्ते अतः स्तुतिरूपधात्वर्थनिवर्तकतया देवताया गुणभावात् स्तुतेरेव प्राधान्यमित्याह—**अत इति।** यद्यपि देवताया एव स्तुतिनिवर्तकतया गुणत्वं वाच्यं तथापि मन्त्राभिहिता या एव तस्यास्तन्निवर्तकत्वात् मन्त्रेण-

---

१. ब. नेंद्रशब्दोदेवता। २. ब. साकाक्षमनर्थकं।
३. ब. शंसतीसाक्षा। ४. ब भिधानार्थौ।

त्युक्तम्। किं च यदि मन्त्राः स्तोत्रनिर्वृत्त्यर्था भवन्ति ततश्शास्त्रापेक्षितार्थ-करणाददृष्टार्था भवन्ति, प्रकाशनं तु कुर्वन्तः शास्त्रानपेक्षितार्थकरणाददृष्टार्था भवेयुरित्याह—**गुणवचन इति**। यस्मात्कारकाणां क्रियानिर्वर्तकतया गुणभावः यस्माच्च प्रकाशनार्थत्वेऽनपेक्षितार्थत्वप्रसङ्गः, तस्मादित्युपसंहरति—**तस्मादिति**। विधान्तरेण सूत्रावयवं व्याचष्टे—**अपि चेति**। तमेवसोदाहरणमाह—**षष्ठीति**।

ननु षष्ठीविभक्तिसंयोगेऽपि देवताशब्दस्य कथं स्तुतिप्राधान्यमत आह—**तेनेति**। षष्ठ्या देवतायाः पारार्थ्यावगमाद्वीर्यस्य चाकर्माङ्गतया प्राधान्या-संभवात् स्तुतेरेव प्राधान्यमिति स्तुतिः स्तुत्यसंबन्धार्थेयं षष्ठीत्यर्थः।

ननु षष्ठी संयोगेऽपि किमिति पारार्थ्यं षष्ठ्यन्तस्यापि देवतास्वरूपमात्रा-भिधानपरत्वादत आह—**देवतेति**।

ननु तर्हि मन्त्रान्तरस्य प्रथमान्ततया देवताप्रधानत्वात् स्तुतिप्राधान्यं न स्यादित्याशङ्कते—**अथेति**। तत्रापि यातौ वसितस्य राजेत्यादिगुणवाचिपद-समूहस्य गुण्यपेक्षायां तत्समर्पकत्वेन प्रथमान्तरस्य तदेकवाक्यत्वात् स्तुति-प्राधन्यमेव युक्तमिति परिहरति—**नेति**। ननु प्रथमं सामर्थ्यात्मकेन लिङ्गेन देवताप्राधान्यावगतेः न वाक्येन स्तुत्यर्थता युक्तेति शङ्कते—**ननु चेति**। लिङ्गबलीयस्त्वमङ्गीकरोति—**सत्यमिति**। कथं तर्हि वाक्येन प्राधान्यमित्या-शङ्क्य लिङ्गेपोद्बलितत्वादिति वक्तुमाह—**एतदपीति**। एवं तर्ह्यपि निगमः स्यादिति। पृच्छति—**तथापीति**। लिङ्गानुगृहीताद्वाक्यादेव स्तुतिप्राधान्यसिद्धेः मैवमित परिहरति—**वाक्यशेषादिति**। इतिशब्दादूर्ध्वं निर्णय इत्यनुषङ्गः, यातोवासितस्येत्यादिर्गुणाभिधायकः पदसमूहो वाक्यशेषः। व्यतिरेकमुखेनैत-द्विवृणोति—**देवतेति**। स्तुतिवाक्यस्य देवताभिधानार्थत्वाभावफलमाह—**तस्मादिति**। इदानीं स्तौतिशंसत्योर्धात्वोः श्रुत्या स्तुतिवाचित्वादित्येवं श्रुति-संयोगं व्याचष्टे—**अपि चेति**। गुणिसंबन्धगुणवचनयोः गुणिस्वरूपमात्राभिधान-परत्वे लक्षणा स्यादित्यर्थः। अवशिष्टं सूत्रावयवं व्याचष्टे—**तस्मादिति** ॥ २४ ॥

सिद्धान्तः

त० वा०—यदुक्तं मनोतायामिवाग्निशब्द इन्द्रशब्दः समासार्थं लक्षयिष्य-तीति। तदयुक्तम्। कुतः? एतस्मादेव दोषात्। न हीन्द्रशब्दस्य स्वार्थमभि-दधतः कश्चिद्विरोधो, येन श्रुतिवृत्तिं जह्यात्। सर्वादृष्टार्थानां च यथाकथंचिल्ल-क्षणया दृष्टार्थत्वापादनसंभवादयुक्तमेतत्। तत्तूक्तमुत्कृष्यतामेवेति।

तदयुक्तम्। कुतः—?

प्रकृतस्तोत्रशेषत्वं श्रुत्या संनिधिकल्पया।
विना सामान्यसंबन्धाल्लिङ्गं चाविनियोजकम् ॥

यदि ह्येकान्तेन प्रथमं दृष्टार्थत्वमवधारितं स्यात्, ततः क्रमसंनिधिकल्प्या श्रुतिर्बाध्येत। यतस्तु विनियोगात्तरकाला प्रयोजनकल्पना, न तद्वशेनैव विनियोगः तेन क्रमसंनिधिभ्यां विनियुक्ते। दृष्टमदृष्टं वा प्रयोजनं कल्प्यमानं न विरुध्यते। न चोत्कृष्टस्य प्रगाथस्याऽन्यत्र विनियोगहेतुरस्ति। लिङ्गं हि देवतां प्रकाशयितुं सामर्थ्येन तन्मन्त्रं स्वरूपे विनियुञ्जीत। तथा चास्यानर्थक्यप्रसङ्गः। कर्मसंबन्धे तु न कश्चिदस्य व्यापारः। तदेतल्लिङ्गं यदि सामान्यतः केनचित्कर्म-संबन्धः क्रियते, ततः कथं तस्योपकरिष्यतीत्यपेक्षिते, यथा शक्नोतीत्येव-माश्रयणाद्देवताप्रकाशनद्वारेणेति विनियुङ्क्ते। न चात्र सामान्यसंबन्धकारणं पश्यामः। तस्मादुत्कृष्टानामानर्थक्यमेव स्यादित्यदृष्टार्थतैव न्याय्या।

किं च—

एवं च सप्तमी षष्ठी द्वितीया स्तौतिशंसती।
श्रुतिवृत्ता भविष्यन्ति त्वत्पक्षेऽन्यार्थवृत्तयः॥

गुणगुण्यभिधानक्रियाणामक्षरारूढत्वात्सप्तमीश्रुतिसंयोगो घटते। प्रकाशने हेतुकरणत्वात्तृतीयायुक्ताः कवत्यादयः श्रूयेरन्।

ननु स्तुतावपि कवतीनां करणत्वात्, तृतीयैव प्राप्नोति। नैष दोषः—

आधारत्वमपि ह्यासां करणत्वं च विद्यते।
तत्रैतयोर्यथाभीष्टं निर्देश उपपद्यते॥

प्रकाशनं पुनः परमार्थतस्तावदात्माधारम्। कर्मत्वप्रतिपत्त्युत्तरकालं च व्याप्यत्वाद्देवताधारम्। तत्र कवतीनामैकान्तिकमेव करणत्वमिति वैषम्यम्।

अपि च स्तौति शंसतीति स्तुतिभावना पूर्वापरीभूता श्रूयते। तस्यां च धात्वर्थः करणभूतः। शेषाणि च कारकाणि नित्यं धात्वर्थं निष्पादयन्ति सन्ति सम्बध्यन्ते।

यत्र यदि मन्त्राः स्तोत्रनिर्वृत्त्यर्था भवन्ति, ततोऽपेक्षितार्थकरणाच्छास्त्रदृष्ट-मर्थं कुर्वन्तो दृष्टार्था[1] भवन्ति। प्रकाशनं तु कुर्वन्तोऽचोदितकरणाददृष्टार्था[2] भवेयुः ततश्च वरं स्तुतीनामेवाऽदृष्टार्थत्वम्।

किं च—

श्रुत्यैव षष्ठी पारार्थ्यं देवतानां ब्रवीति नः।
न प्रधानं गुणाश्चेष्टाः स्तुतेस्तेन प्रधानता॥

देवताप्राधान्ये हि प्रातिपदिकार्थपरत्वादव्यतिरिक्तार्थविषया 'अग्निर्मूर्धा' इतिवत्प्रथमैव श्रूयेत।

---

१ क. (टिप्पण्यां) चोदितकरणाददृष्टार्था इति। २ क. चोदितकृत्त्वाददृष्टार्था।

यदपि किंचित्प्रथमान्तं, तदपि योग्यतापूर्वकैकवाक्यत्ववशेन गुणसम्बन्धार्थमेव । यथा, इन्द्रो यातो—जङ्गमस्य, अवसितस्य—स्थावरस्य च राजेति ।

न च गुणानामुपयोगोऽस्तीति, तत्प्राधान्यानाश्रयणे स्तुत्यर्थतैव युक्ता । सत्यमिति ग्रन्थच्छेदः । तत्रार्थवादन्यायेन शेषपदानर्थक्यप्रसङ्गात्सत्यपि पूर्वत्र प्राधान्यपर्यवसानसंभवे स्तुत्यर्थेनैवैकवाक्यता युक्ता ।

न चैवं स्तौतिशंसत्योः प्रकाशनलक्षणार्थता भविष्यतीति, स्तुतेरेव प्राधान्यम् ॥ २४ ॥

न्या० सु०—पूर्वपक्षानिरासे सिद्धान्ताभिधायित्वेऽपि पक्षद्वयप्रतिमानात् सन्देहापत्तेस्तन्निरासे श्रुतिसंयोगात्प्रकरण इति सूत्रावयवं योजयन् अथ वार्थैकदेशोऽयमिति स्वयं व्याख्यातम् । पूर्वपक्षसूत्रपक्षे तावदनुभाषणपूर्वकं योजयति—**यदुक्तमिति** । एतच्छब्देन लक्षणापरामर्शः । अनेन च प्रकृतदेवतालक्षणार्थत्वे सत्यश्रुतिसंयोगदोषापत्तेरित्यकारप्रश्लेषेण सूत्रावयवो योजितः ।

ननु मनोतावल्लक्षणा न दोषायेत्याशङ्क्याह—**न हीति** । मनोतायै हविषोऽवदीयमानस्यानुब्रूहीति प्रैषसामर्थ्यान्मनोतासूक्तस्य हविर्देवतास्मृत्यर्थत्वावगतेः सोमसहितस्यैव चाग्नेर्हविर्देवतात्वाद्युक्ता लक्षणा । ऐन्द्रप्रगाथस्य तु हविर्देवतास्मृत्यर्थत्वे प्रमाणाभावात्स्वरूपमात्रेणेन्द्रस्य स्तुत्यर्थं प्रकाश्यत्वोपपत्तेर्न लक्षणा युक्तेत्याशयः ।

ननु विरोधाभावेऽपि दृष्टार्थत्वाय[1] लक्षणाङ्गीकरणं युक्तमीत्याशङ्क्याह—**सर्वेति** । वैष्णव्यादेरपि देवताभूताग्न्यादिलक्षणया दृष्टार्थत्वोपपत्तेरनिष्टापत्तिः स्यादित्यर्थः । भाष्यकृद्व्याख्यातपूर्वपक्षसूत्रपक्षेऽप्यनुभाषणपूर्वकमकारप्रश्लेषं विना योजयति—**यस्त्विति** । अनेन च प्रक्रियत इति कर्मव्युत्पन्नं प्रकरणशब्दमङ्गीकृत्य प्रकृते माहेन्द्रयागाङ्गभूते पृष्ठाख्ये स्तोत्रे रथन्तरचोदनोपस्थानात्मकेन सन्निधिना क्लृप्तया श्रुत्यैन्द्रस्य प्रगाथस्याङ्गत्वेन संयोगादिति सूत्रावयवो योजितः । ननु सन्निधेर्लिङ्गेन बाधाच्छ्रुतिकल्पकत्वं न सम्भवतीत्याशङ्क्याह—**विनेति** । लिङ्गस्येह सन्निधिबाधकत्वायोगे चकारसूचितं तावद्धेतुमाह—**यदीति** । पूषाद्यनुमन्त्रणमन्त्राणां यागानुमन्त्रणसामाख्यया ।

मन्त्रमुच्चारयन्नेव मन्त्रार्थत्वेन संस्मेरत् ।
शेषिणं तन्मना भूत्वा स्यादेतदनुमन्त्रणम् ॥

इत्यनुमन्त्रणानां स्मारकत्वलक्षणेन दृष्टार्थत्वावगतेः प्रकृताग्नेयादियागस्मृत्यसामर्थ्याच्च लिङ्गेन प्रकरणकल्प्यश्रुतिप्रतिबन्धो युक्तः । ऐन्द्रप्रगाथादेस्तु दृष्टार्थत्वस्य प्रागनवगतेर्लिङ्गव्यापाराभावान्न क्रमसन्निधिकल्प्यश्रुतिप्रतिबन्धकत्वं सम्भवतीत्याशयः । लिङ्गादेर्बलवद्विरोधे श्रुतिकल्पकत्वाभावात्प्रतिबन्धवाची बाधशब्दः । लिङ्गक्रमसमाख्या-

१. दृष्टार्थोमहेन्द्रस्तदुपलक्षणार्थत्वमिन्द्रशब्दस्येत्यर्थः ।

नादित्यत्र च लिङ्गस्य सामान्यसम्बन्धसापेक्षत्वस्य वक्ष्यमाणत्वात्, अस्य च प्रगाथस्य क्रत्वन्तरेण सामान्यसम्बन्धाभावात् लिङ्गविनियोज्यत्वानुपपत्तेर्न तद्बलेन क्रमसन्निधिकल्प्यश्रुतिप्रतिबन्धो युक्त इति कण्ठोक्तं हेतुं व्याचष्टे—**न चेति**। कर्मान्वयं विना हविभाक्त्वलक्षणदेवतात्वायोगात् स्तुतिभाक्त्वलक्षणदेवतात्वाभिप्रायो देवतास्वरूपे कर्मान्वयानपेक्षविनियोगापत्तेरानर्थक्यं स्यादित्यर्थः। न मन्त्रमिति तु पाठे तत्सामर्थ्यं मन्त्रं न विनियुञ्जीतेत्युक्ते, कस्मादित्यपेक्षायां स्वरूपविनियोगे सत्यानर्थक्यापत्तेः, कर्मान्वितरूपे च लिङ्गस्य व्यापाराभावादिति विकल्प्य व्याख्येयम्। ननु लिङ्गस्य कर्मान्वितरूपविनियोगे व्यापारभावे कथं पूषाद्यनुमन्त्राणानां पूषादिदेवत्ये कर्मणि लिङ्गेन विनियोगः अत आह—**तदेतदिति**। यागानुमन्त्रणसमाख्यया सामान्यतः क्रतुसम्बन्धावगतेर्लिङ्गेन द्वारविशेषविनियोगो युक्त इत्यायः। ततश्चानर्थक्यापत्तेरुत्कर्षो न युक्त इत्युपसंहरति—**तस्मादिति**। स्तुत्यर्थत्वेन मन्त्राणां दृष्टार्थत्वेऽपि तज्जन्याया स्तुतेरदृष्टार्थतोक्ता।

एवं पूर्वपक्षनिरासार्थत्वेन स्वयं द्वेधा श्रुतिसंयोगं व्याख्याय, अधुना सिद्धान्तोपपादनार्थत्वेन भाष्यकारीयाश्चतस्रो व्याख्याः सङ्गृह्णाति—**किं चेति**। अभिधानं च कर्मवदिति सूत्रस्य द्वेधा व्याख्यस्यमानत्वात् द्वितीयाभिप्रायत्वे पौनरुक्त्यापत्तेराख्यातश्रुत्यभिप्रायतयापि च श्रुतिसंयोगो भवति 'प्रउगं शंसतीति' भाष्यस्य व्याख्यानादाख्यातमपि द्वितीयाग्रहणेनोपलक्षितं भाष्यक्रमात् सप्तम्यनन्तरं द्वितीयानुक्रमितव्यापि पादभङ्गात्तेः षष्ठ्यनन्तरमनुक्रान्ता। सिद्धान्ते सप्तमीसंयोगसम्भवाभिप्रायार्थं यदीति भाष्यं गुणवत्त्वज्ञापनाख्यायाः स्तुतेः स्तोतृपुरुषाधारत्वेनाक्षरानाधारत्वेनायुक्तमाशङ्क्योपपादयति—**गुणेति**। अयमाशयः—ज्ञानहेतुर्व्यापारो ज्ञापनम्। स चाक्षराणामभिधानाख्यः पुरुषस्थाप्यभिधायकाक्षरोच्चारणाख्यः। तत्र पुव्यापारेऽक्षराणामकर्तृत्वेनाधारत्वायोगेऽप्याभिधानाख्ये व्यापारेऽक्षराणां कर्तृत्वात्, कर्त्राधारत्वाच्च व्यापारस्याक्षराधारता युक्तेति पूर्वपक्षे सप्तमीसंयोगानुपपत्त्यभिधानार्थं यदि प्रकाशनमिति भाष्यं व्याचष्टे—**प्रकाशने त्विति**।

नन्वभिधानाख्यायां स्तुतावपि तृतीयाप्राप्तिस्तुल्येत्याशङ्कते—**नन्विति**।

शब्दानां करणत्वं वा कर्तृत्वं वा निरूप्यत।

इत्यभिधानक्रियायां शब्दानां करणत्ववत् कर्तृत्वस्यापि विवक्षाभेदेनोक्तत्वात्, कर्त्तुश्च क्रियाधारत्ववद्भावात्सप्तमी युक्तेति परिहरति—**नैष दोष इति**। प्रकाशनाधारत्वे तु शब्दस्य न कथं चिदस्तीत्याह—**प्रकाशनमिति**। ननु प्रकाशनशब्देन ज्ञानजन्यातिशयविवक्षायां तस्याक्रियात्वेन कारकान्वयायोगात् कवतीनां न तत्र करणत्वम्, ज्ञानक्रियाविवक्षायां त्वात्माधारत्वात्तस्या देवताधारत्वाभिधानं न युक्तमित्याशङ्कानिरासार्थम्—**परमार्थतस्तावदित्युक्तम्**। समवायिकारणस्याधारत्वाप्रसिद्धेः परमार्थशब्देनात्मसमवेतता

ज्ञानस्योक्ता। साक्षाच्छब्दार्थे वा परमार्थशब्दः। ज्ञानमात्मसमवेतत्वात्साक्षादात्माधारमित्यर्थः।

यत्तु भाष्यकृता देवताधारं प्रकाशनमित्युक्तम् तत् देवताया ज्ञानजन्यातिशयाश्रयत्वलक्षणात् व्याप्यत्वात्फलगतं हेतावुपचरितमित्युक्ते। ननु ज्ञानस्यातीतानागतवर्त्तमानविषयत्वादतीतानागतयोश्चाश्रयत्वायोगात् ज्ञानस्य विषयाश्रितातिशयहेतुता न युक्तेत्याशङ्क्य—**कर्मत्वेत्युक्तम्**। पाकादिक्रियाकर्मणस्तण्डुलादेः क्रियाजन्यातिशयाश्रयत्वदर्शनात्कर्मत्वेन ज्ञानक्रियाकर्मणोऽपि क्रियाजन्यातिशयाश्रयत्वेऽनुमिते तद्बलेनातीतानागतयोरपि अतिक्रान्तदिवसादिगतसङ्ख्यादिवदाश्रयत्वोपपत्तिरभ्युपगन्तव्येत्याशयः। नन्वौपचारिकदेवताधारत्वाभिधानस्य किं प्रयोजनमित्याशङ्क्य कवतीनामौपचारिकमपि ज्ञानधारत्वं नास्तीत्यभिधानप्रयोजनं सूचयितुमाह—**तत्रेति**।

अपि चेति भाष्यम्। श्लोके द्वितीयाग्रहणेनाख्यातस्याप्युपलक्षितत्वाद् द्वितीयाश्रुतिसंयोगस्य चाभिधानं च कर्मवदिति सूत्रव्याख्यातभाष्यात्प्रउगं निष्कैवल्यमिति द्वितीयया स्तुतेः प्राधान्यावगतिरित्येवमर्थतथा ज्ञातुं शक्यत्वात्तदुपलक्षितमाख्यातश्रुतिसंयोगं शंसतीत्याख्यातेन स्तुत्याख्यातस्य धात्वर्थस्य भावनाकरणत्वावगतेः, करणत्वस्य च कर्तृव्यापारव्याप्यत्वलक्षणं कर्मत्वं विनानुपपत्तेरनिष्पन्नस्य चोत्पाद्यत्वातिरिक्तकर्मत्वायोगादुत्पाद्यत्वप्रतीतिरुत्पादिकां गुणिनीं देवतां प्रतिप्राधान्यावगतिरित्येवं व्याचष्टे—**अपि चेति**। किमेतत् गुणभूतं देवतां प्रति, उत प्रधानामिति सन्देहभाष्ये देवतां प्रति स्तुतेर्गुणप्राधान्यविचारस्योक्तत्वाद्देवतया स्तुतिनिर्वर्त्तयितव्येति वाच्येऽप्यभिधीयमानायाः देवतायाः स्तुतिनिर्वर्त्तकत्वादभिधानस्य च मन्त्राधीनत्वाद्भाष्यकृता—**मन्त्रेणेत्युक्तम्**। तद् व्याख्यातुं मन्त्रशब्दः स्तुतिमात्रोपलक्षणार्थः। स्तोत्रशब्दः। अनेन च गुणवचनः शब्द इति भाष्यावयवो व्याख्यातः। प्रकाशननिर्वर्त्तकत्वेनार्थवत्त्वेऽपि दृष्टार्थत्वसाम्यात्स्तुतिविशेषणानर्थक्यमाशङ्क्य—**शास्त्रदृष्टमित्युक्तम्**। विशेषणसूचितं प्रकाशनार्थतायामदृष्टार्थत्वं प्रकाशनार्थत्वस्य शास्त्रेणादृष्टत्वादिति व्याख्यातुमचोदितत्वकरणादित्युक्तम्।

ननु प्रकाशनार्थत्वाभ्युपगमे स्तुतीनामदृष्टार्थत्वं स्यादित्याशङ्क्याह—**ततश्चेति**। शास्त्राङ्गीकृतत्वात् स्तुतेरदृष्टार्थत्वं युक्तम्। न मन्त्रस्येत्याशयः। षष्ठ्यभिप्रायेण श्रुतिसंयोगव्याख्यातार्थमपि चेति भाष्यं व्याचष्टे—**किं चेति**। नन्वेवमपि वीर्यादिगुणस्य द्वितीयान्वयाद्विशेष्यत्वाच्च प्राधान्योपपत्तेर्न स्तुतिप्राधान्यं सिद्ध्येदित्याशङ्क्याह—**न प्रधानमिति**। कर्मानङ्गत्वाद् गुणानां प्राधान्यं न युक्तमित्याशयः। देवताभिधानार्थ इति भाष्यं व्याचष्टे—**देवतेति**। अथ यत्प्रथमान्तमित्याशङ्क्यत इत्युच्यत इत्युत्तरभाष्यं व्याचष्टे—**यदपीति**। प्रथमासामर्थ्यात्मकेन लिङ्गेनेन्द्रप्राधान्यावगतेर्न वाक्येन स्तुत्यर्थता युक्तेत्याशङ्क्य 'या तोऽवसितस्ये'त्यादेर्गुणाभिधानार्थस्य पदसमुदायस्य गुण्याकाङ्क्षस्य निराकाङ्क्षीकरणसामर्थ्यात्मकं लिङ्गं वाक्यस्योपोद्बलकमस्तीति वक्ष्यमाणं परिहारं सूचयितुम्—**योग्यताशब्दः**।

नन्वेवं सत्येकवाक्यतोपगमनसामर्थ्यात्मकस्य लिङ्गस्य सर्ववाक्येषु भावान्न क्वचिल्लिङ्गेन वाक्यं बाध्येतेत्याशङ्कानिरासार्थः। पूर्वशब्दः। एकवाक्यतोपगमनसामर्थ्यस्यैकवाक्यताकल्प्यत्वेनोपोद्बलकत्वं न सम्भवतीत्यशयः। जङ्गमस्येत्यनेन षष्ठीपरशतृप्रत्ययान्तस्य पातेर्धातोर्यात इति रूपमिति स्थितम्। चकाराच्छमस्य शान्तिकरस्योदकजातस्य शृङ्गिणः पर्वतजातस्य राजेति सूचितम्। नन्वेवं सति राजत्ववज्रबाहुत्वादीनां गुणानामेव प्राधान्यं कस्मान्नेष्टमित्याशङ्क्य—**न चेत्युपपत्तिरुक्ता**। शङ्काभिप्रायविवरणार्थं 'नन्विति' भाष्यं स्पष्टत्वादव्याख्याय सत्यमिति भाष्यं वक्ष्यमाणस्यापि लिङ्गत्वानुज्ञानार्थतयाऽवभासमानं परेण तस्य लिङ्गत्वानभिधानादयुक्तमाशङ्क्य सत्यमित्येतावच्छिनत्ति—**सत्यमिति**।

एतदपीति भाष्यं प्रागेव योग्यताशब्देन व्याख्यातत्वात् स्पष्टत्वाच्चोपेक्ष्य, तथापीत्याशङ्काभाष्यं वाक्यशेषादित्युत्तरभाष्यं च तात्पर्यतः सङ्क्षेपेण व्याचष्टे—**तत्रेति**। सत्यपीति मध्यमावयवेनाशङ्काभिप्रायौ व्याख्यातः। वाक्यशेषादेवेत्युत्तरे निर्णयहेत्वभिधानान्नेन्द्रशब्दो देवताभिधानार्थ इति निर्णयस्वरूपाभिधानात्कुत इति तसिः पञ्चम्यर्थे प्रथमार्थे च यदावृत्त्या व्याख्येयम्। शेषशब्देन च स्तुत्यर्थपदसमूहमात्रस्य सम्पूर्णवाक्यत्वाभावेऽपि स्तुतिवाक्यस्येति वाक्यशब्दो वज्रबाह्वादिपदानामपि साकाङ्क्षत्वाभिधानार्थ इति सूचितम्। देवताभिधानमात्रपर्यवसाननिरासस्य स्तुत्यर्थपदसमूहैकवाक्यत्वसिद्ध्यर्थत्वं स्तुत्यर्थत्वेनैवेति वार्त्तिकावयवेनोक्तम्। स्तौतिशंसत्योर्धात्वोः श्रुत्या स्तुतिवाचित्वादित्येवं श्रुतिसंयोगव्याख्यानार्थमपि चेति भाष्यं व्याचष्टे—**न चेति**। स्तुतेर्देवतास्वरूपाभिधानपूर्वकत्वात् स्वरूपाभिधानमात्रपर्यवसानाभ्युपगमे स्तुत्यविवक्षापत्तेर्लक्षणाप्रसङ्ग इत्याशयः। प्रकरण इति सूत्रावयवमुत्कर्षाभ्युपगमनिरासार्थत्वेन तु ज्ञातत्वाद्भाष्यकृतोपेक्ष्य, तस्मादित्यनेन स्तौतीत्यादिः सूत्रावयवो व्याख्यातः। तत्तात्पर्यतो व्याचष्टे—**इतीति**। पूर्वपक्षे संस्कारकर्मत्वस्योक्तत्वात्प्रतियोगितया प्रधानकर्मत्वस्य वक्तव्यत्वात्तदेव फलेनोक्तमित्याशयः॥ २४॥

भा० प्र०—इस प्रकृत सूत्र से पूर्वपक्षी के साथ उत्तर प्रत्युत्तर कर सिद्धान्ती सिद्धान्त की स्थापना करता है—'स्तौति शंसती प्रकरणे क्रियोत्पत्ति विदध्याताम्' पूर्व उदाहृत वचन में जो स्तुत एवं शस्त्र विहित है, वह प्रकरण में अर्थात् महेन्द्रग्रह याग में अपूर्व विधान करें, अर्थात् वह प्रधान कर्म होगा, 'श्रुतिसंयोगात्' = क्योंकि, वह सप्तमी, द्वितीया एवं षष्ठी विभक्ति श्रुति के साथ सम्बन्धयुक्त होती है। जिस स्थल में देवता केवल प्रकाश्य = स्मरणीय होता है, उसमें प्रथमा विभक्ति ही होती है। जैसे 'इन्द्रो यातोऽवसितस्य राजा' (ऋ० सं० १।२।३८) अर्थात् इन्द्र जङ्गम एवं स्थावर का राजा है। इस स्थल में मन्त्र से इन्द्र देवता प्रकाश्य = स्मरणीय होने से इन्द्र शब्द प्रथमा विभक्ति युक्त होता है। 'अग्निर्मूर्द्धादिवः' इत्यादि स्थल में भी देवता

प्रकाश्य या स्मरणीय अग्नि इत्यादि पद में प्रथमा होती है । किन्तु, विहित स्तुत एवं शस्त्रों में 'इन्द्रस्य नु वीर्याणि प्रवोचम्' इस इन्द्र प्रकाशक मन्त्र में 'इन्द्रस्य' इस पद में षष्ठी विभक्ति प्रयुक्त है, अतः, इसके द्वारा इन्द्र देवता प्रकाश्य = स्मरणीय नहीं है । इसी प्रकार 'कवतीषु स्तवते शिपिविष्टवतीषु स्तवते' इत्यादि वचन में 'कवतीषु', 'शिपिविष्टवतीषु' इत्यादि पद में सप्तमी विभक्ति ही श्रुत होती है । इसी प्रकार 'प्रउगं शंसति', 'निष्कैवल्यं शंसति' इस वचन में प्रउगं एवं निष्कैवल्यं इन दो पदों में द्वितीया विभक्ति पठित है, किन्तु, इस स्थल में यदि इन्द्रादि देवता प्रकाश्य होता तो 'कवतीषु' इत्यादि पदों में करण में तृतीया विभक्ति ही होती, क्योंकि, उसी के द्वारा देवता प्रकाशनीय होता है । मन्त्र का उत्कर्ष करने पर ही मन्त्र सार्थक होता है—यह कथन भी सङ्गत नहीं है । क्योंकि, यदि प्रयोजन पूर्व से निश्चित रहे तो उत्कर्ष करना दोषावह नहीं है । किन्तु, इस स्थल में उत्कर्ष मानने पर बाद में प्रयोजन की कल्पना करनी होगी, अतः, उत्कर्ष करना सङ्गत नहीं है । उत्कर्ष करने पर भी मन्त्र का विनियोग नही हो सकता है । अतः, वह निरर्थक होगा, इस प्रकार सभी मन्त्रों को अदृष्टार्थक ही मानना पड़ेगा, फलतः, धातु के मुख्य अर्थ के विना कारण का बाध होगा । पक्षान्तर में 'प्रउगं शंसति' इत्यादि वचन में जो स्तुति भावना विहित है उसको प्रधान मानने पर धातु का मुख्य अर्थ रक्षित होता है एवं दृष्टार्थ का लाभ भी होता है, क्योंकि, उसमें धात्वर्थ करण है एवं अन्य कारक धात्वर्थ = स्तुति का ही निष्पादक होता है । कारण, स्तुति मानने पर गुणसम्बन्ध का प्रकाश होने पर वही स्तु धातु का मुख्य अर्थ है । जैसे 'देवदत्तः चतुर्वेदाभिज्ञः' यह मानने पर देवदत्त का गुणसम्बन्ध प्रकाश करने के लिए स्तुति अवगत होती है । किन्तु, यदि गुण के द्वारा अनुस्मरणीय देवता स्वरूप प्रकाश करना, इस मन्त्र का अर्थ मानने पर धातु का मुख्य अर्थ नहीं रहता है । क्योंकि, उसमें स्तुति का = गुणसम्बन्ध प्रकाश का प्राधान्य नहीं है । जैसे, जो चतुर्वेद में चतुर्वेदज्ञता रूप गुण का ही प्राधान्य है । इसलिए, धातु के मुख्य अर्थ की रक्षा के लिए इस स्थल में स्तुति को प्रधान कर्म मानना होगा । इसी में धातु श्रुति अबाधित रहती है और स्तुति का फल अदृष्ट = अपूर्व होगा । इसीलिए स्तुतशस्त्र प्रधान कर्म है ।

'अपि वा' = पूर्वपक्ष निवृत्तिसूचक, 'श्रुतिसंयोगात्' = श्रुति संयोग अर्थात् सप्तमी, द्वितीया एवं षष्ठी विभक्ति रूप श्रुति के साथ संयोग अर्थात् सम्बन्ध होने से, 'प्रकरणे' = प्रकृत = आरब्ध माहेन्द्र ग्रहयाग में 'स्तौति शंसती' = स्तुतशस्त्र, 'क्रियोत्पत्तिम्' = अपूर्व, 'विध्यताम्' = विधान करे । पूर्वोक्त स्तुतशस्त्र प्रकृत आरब्ध महेन्द्र ग्रहयाग में ही अपूर्व का प्रतिपादन करेगा, अर्थात् वह प्रधान कर्म ही होगा, क्योंकि, सप्तमी, द्वितीया एवं षष्ठी विभक्ति रूप श्रुति के साथ इसका संयोग अर्थात् सम्बन्ध रहता है ॥ २४ ॥

शब्दपृथक्त्वाच्च ॥ २५ ॥

शा० भा०—शब्देन पृथक्त्वमेव गम्यते। द्वादशस्तोत्रशस्त्रोऽग्निष्टोमः। इतरथा हि द्वादशत्वं न स्यात् स्तोत्राणाम्, शस्त्राणां[1] च। एकमेव शंसनं स्तवनं च। अथ भेद आश्रीयते, ततो न द्वादशत्वेऽवतिष्ठते ॥ २५ ॥

भा० वि०—संस्कारकर्मत्वस्य पूर्वपक्षितत्वात् तत्प्रतियोगिभूतं प्रधानकर्मत्वं अपूर्वोत्पादकत्वेनाभिमतं प्रधानकर्मत्वे हेत्वन्तरं शब्दपृथक्त्वाच्चेति, तद्व्याचष्टे—**शब्दपृथक्त्वमिति**। स्तोत्रादीनां यत् पृथक्त्वैकार्थसमवेतं द्वादशत्वं द्वादशस्तोत्रशस्त्रोऽग्निष्टोम इतिशब्देनोच्यते तदपि प्रधानकर्मत्वमेव गमयतीत्यर्थः। कुत इत्यत आह—**इतरथेति**। अर्थाभिधानार्थ इत्यर्थः। तदेव कुतस्तत्राह—**एमेवेति**। अर्थप्रकाशनस्यैकत्वेन स्तोत्रादीनामेकत्वात् द्वादशत्वानुपपत्तिरित्यर्थः।

ननु यथा त्वत्पक्षे सामान्येनैकत्वेऽपि स्तोमात्मकऋक्समुदायसाध्याः स्तुतयो भिद्यन्ते तथार्थप्रकाशनान्यपीतिशङ्कते—**तथेति**। परिहरति—**तत इति**। अस्मत्पक्षे स्तुतिक्रियावामपूर्वार्थत्वात् अपूर्वोत्पत्तेः स्तोमसंपत्त्यधीनत्वस्य शास्त्रीयत्वात् स्तोमसाध्यापूर्वद्वादशत्वेन स्तुतिद्वादशत्वं युक्तं प्रकाशनार्थत्वे तस्य प्रत्यृचं निष्पत्तिदर्शनेन स्तोमसंपत्तिकारणाभावात् न द्वादशत्वेनावतिष्ठेतेत्यर्थः ॥ २५ ॥

त० वा०—पृथक्त्वनिवेशिनी द्विद्वादशसंख्या न प्रकाशनाभेदे सति शब्देनोच्यते। सामान्याविवक्षायां वा प्रत्यृचं, प्रतिपदं च तन्निर्वृत्तेर्न द्वादशत्वेऽवतिष्ठते।

ननु च स्तुतावपि तुल्यमेतत्।

तथा हि—

सामान्यस्तुतिरेकैव भेदोऽपि प्रत्यृचं स्थितः।
न चान्यथा विवक्षाऽस्ति यतो द्वादशता भवेत् ॥

अथ स्तोमवशादृक्समुदायसाध्याः स्तुतयो गण्यन्ते। तथा प्रकाशनान्यपीत्यविशेषः।

उच्यते—

क्रियाः फलापवर्गिण्यस्तत्संख्यागणनाः सदा।
अपूर्वद्वादशत्वाच्च द्वादशत्वं निरूप्यते ॥

---

१. ब. शस्त्राणामेक।

प्रकाशनार्थत्वे हि प्रत्यृचम्, प्रतिपदं च तन्निर्वृत्तिदर्शनात्क्रियासमाप्तेर्न किंचित्कारणमस्ति, येन द्वादशत्वं परिच्छिद्येत। अपूर्वार्थत्वे तु तेषां शास्त्रगम्यत्वाद्यथोक्तस्तोमसंपदः प्राङ् निर्वृत्तिप्रमाणाभावादृक्समुदायेनापूर्वनिर्वृत्तेस्तद्द्वारेण क्रियासमाप्त्युपलक्षणादपूर्वाणां द्वादशत्वेन स्तुतिद्वादशत्वसिद्धिः। न हि प्रत्यृचं सर्वस्तोत्रेभ्यो वा तत्कल्पनायाः किंचित्प्रमाणमस्ति। यथा प्रकाशनस्य दर्शनम् ॥ २५ ॥

न्या० सु०—द्वादशेति भाष्यं संख्यापृथक्त्वयोर्भेदप्रसिद्धेः पृथक्त्वव्याख्यानाशक्तत्वादयुक्तमाशङ्क्योपपादयति–पृथक्त्वे सति निवेष्टुं शीलमस्या इति सदर्थसप्तमीसमासेन पृथक्त्वैकार्थसमवायितोक्ता। स्तोत्राणां शस्त्राणां च या द्वादशसंख्या 'द्वादशस्तोत्रशस्त्रोऽग्निष्टोम' इत्यनेन शब्देनोच्यन्ते, सा प्रकाशनार्थत्वपक्षे तस्याभेदे सति न युक्ता पृथक्त्वनिवेशिनी यस्मादित्यर्थः। शब्दग्रहणेन द्वादशशब्देन स्तोत्राणां शस्त्राणां च पृथक्त्वेनाभिधानादित्येवं तृतीयासमासत्वेन सूत्रव्याख्यासूचिता शब्देन कृतात्पृथक्त्वादिति च तत्कृतार्थतृतीयासमासेनोक्ते शब्दस्याभिधान एव कारणत्वेनाभिधानालाभान्नाश्रुताभिधाने शब्दाध्याहारोपपत्तिः। प्रकाशनशब्देन च भाष्यस्थयोः स्तोत्रशब्दयोः[1], प्रकाशनवाचित्वं सूचितम्। अथेति भाष्यं व्याचष्टे—**सामान्येति**। अनेन चैक्याभिधानं सामान्याभिप्रायमिति दर्शितम्। पदार्थज्ञानस्यैकैकपदजन्यत्वात्प्रतिपदम्—**चेत्युक्तम्**।

ननु स्तुतेरपि सामान्यरूपेणैक्यात्, विशेषरूपेण च प्रत्यृचं भेदादृक्समुदायस्य चैकस्तुतिसाधनत्वाभावेनावान्तरभेदविवक्षानुपपत्तेर्न द्वादशत्वेऽवस्थानं स्यादित्याशङ्कते—**ननु चेति**। नन्वृक्समुदायस्यैकस्तुतिसाधनत्वाभावेऽप्येकसमुदायसाध्यानां स्तुतिनामैक्यमुपचर्य द्वादशत्वं भविष्यतीत्याशङ्क्याह—**अथेति**।

पदात्वाद्यपरिस्पन्दात्प्रभृत्या फललाभतः।
क्रिया पूर्वापरिभूता लक्ष्यते वर्त्तते तदा॥

इत्यनेन न्यायेनैकफलसाधनानेकक्रियावयवसमुदायस्यैकक्रियात्वादपूर्वार्थत्वेन द्वादशत्वेन स्तुतिद्वादशेति परिहरति—**उच्यत इति**। प्रकाशनार्थत्वे तु प्रत्यृचं, प्रतिपदं वा प्रकाशनाख्यफलनिष्पत्तिदर्शनेन प्रत्यृचं, प्रतिपदं वा तत्साधनज्ञानाख्यक्रियासमाप्त्यवगतेर्न द्वादशत्वव्यवस्थेति वैषम्याभिधानपूर्वकं श्लोकं व्याचष्टे—**प्रकाशनार्थत्वे हीति**। नन्वपूर्वैकस्तुतिजन्यत्वे तस्याः प्रत्यृचं निष्पत्तिदर्शनात्प्रत्यृचमेवापूर्वं कल्प्यम्। सर्वस्तुतिजन्यत्वे त्वपूर्वैक्यापत्तेर्द्वादशत्वं न स्यादित्याशङ्क्याह—**न हीति**। यथाविहितवर्गसमुदायसाध्यस्तुतिसमुदायजन्यत्वेनापूर्वस्य समुदायद्वादशत्वात् द्वादशत्वसिद्धिरित्याशयः॥ २५ ॥

---

१. स्तवनशंसनशब्दयोरित्यर्थः।

भा० प्र०—ऊहा को प्रधान कर्म अर्थात् अपूर्व के उत्पादक होने में अन्य कारण भी है, इसी का विवेचन करते हुए आचार्य जैमिनि ने—'शब्दपृथक्त्वाच्च' शास्त्र में 'द्वादशस्तोत्रशस्त्रः अग्निष्टोमः' अर्थात् अग्निष्टोम में द्वादशस्तोत्र से द्वादश 'अपूर्व' होता है। यदि यह देवता का प्रकाशक होता है, यह मानने पर इस प्रकार के अपूर्व की संख्या का नियम नहीं रहेगा, क्योंकि, प्रत्येक ऋक् में भिन्न-भिन्न स्मरण होने से ऋक् की संख्या के अनुसार ही अपूर्व होगा, ऐसी स्थिति में बारह नहीं रहेगा, इसी लिए इसको गुणकर्म नहीं माना जाता है, अपितु प्रधानकर्म माना जाता है। 'शब्दपृथक्त्वात्' = शब्दगत अर्थात् संख्यागत पार्थक्य होने से, 'च' = और ॥ २५ ॥

अनर्थकं च तद्वचनम् ॥ २६ ॥

शा० भा०—अग्निष्टुति श्रूयते, 'आग्नेया ग्रहा भवन्ति' इति। तत्र पुनरुच्यते, आग्नेयीषु स्तुवन्ति[1], आग्नेयीषु शंसन्ति[2] इति। तन्न विधातव्यमेव, यदि संस्कारकर्मणी[3]। तस्मादपि प्रधानकर्मणी इति ॥ २६ ॥

भा० वि०—तद्वचनानर्थक्यस्य प्रधानकर्मत्वे पर्यवसानं दर्शयन् उपसंहरति—**तस्मादपीति** ॥ २६ ॥

त० वा०—ऋचामनूह्यत्वादाग्नेयग्रहचोदनयैवाऽऽग्नेयीनां स्तुतिसाधनत्वसिद्धेः 'आग्नेयीषु स्तुवते' इत्यनर्थकं **वचनम्** ॥ २६ ॥

न्या० सु०—अग्निष्टुत्यादिभाष्येणैतत्सूत्रं देवताभिधानत्वादित्याद्यसूत्रावयवोपात्तदेवताभिधानपरामर्शिनं तच्छब्दमङ्गीकृत्य संस्कारकर्मत्वपक्षेऽग्निदेवत्यग्रहिकायां विकृतौ लिङ्गेनैवाग्नेयीनामृचां प्राप्तेर्देवताभिधायिनीनामाग्नेयीनामृचां वचनमनर्थकमित्येवं व्याख्यातम्। तत् प्राकृतानामनाग्नेयीनामप्यृचां संस्कारकर्मत्वेऽग्निपदोहेन प्राप्तावाग्नेयीविध्यर्थवत्त्वोपपत्तेरयुक्तमाशङ्क्योपपादयति—**ऋचामिति**। पूयतिवा एतदृचोऽक्षरम्, यदेनदूहति, तस्मादृचं नोहेदिति निषधादृचोमूहानर्हत्वादाग्नेयीनामेव प्राप्तेर्विध्यानर्थक्यमित्यर्थः। संस्कारकर्मत्वनिरासद्वारा चास्यापि सूत्रस्य प्रधानकर्मत्वोपपादनार्थत्वान्न पूर्वोत्तरसूत्रानन्वयदोषः ॥ २६ ॥

भा० प्र०—स्तोत्रशस्त्र को गुणकर्म मानने पर 'आग्नेयीषु स्तुवन्ति', 'आग्नेयीषु शंसन्ति' इत्यादि वचनों में स्तोत्र एवं शस्त्र का जो उपदेश किया गया है, वे अनर्थक हो जायेंगे। क्योंकि, 'आग्नेया ग्रहा भवन्ति', इस वाक्य में ही आग्नेयी सभी ऋचाओं की स्तुति साधनता सिद्ध है, अतः, 'अनर्थकं तैद्वचनम्' 'आग्नेयीषु स्तुवन्ति' इत्यादि अर्थात् उपदेश निरर्थक हो जायेंगे।

---

१. ब. स्तुवते। २. ब. शंसति। ३. क. संस्कारकर्म।

'अनर्थकम्' = अनर्थक, 'च' = एवं वा और भी, 'तद्वचनम्' उनके स्तोत्रशस्त्र का उपदेश। इससे स्तोत्रशस्त्र का वचन = उपदेश अनर्थक होने लगेगा ॥ २६ ॥

अन्यश्चार्थः प्रतीयते ॥ २७ ॥

शा० भा०—संबद्धे वै स्तोत्रशस्त्रे वा इति। यद्यन्यत् स्तोत्रम्, अन्यच्छस्त्रम्, ततस्तयोः सम्बन्धः। यदि वाऽपूर्ववचने, ततोऽन्यत् स्तोत्रम्, अन्यच्छस्त्रम्। इतरथा यदेव स्तोत्रम्। तदेव शस्त्रं स्यात् ॥ २७ ॥

भा० वि०—अर्थान्यत्वप्रतीतिमुपपादयितुं वाक्यमुदाहरति—**संबद्धेति**। संबन्धश्रुत्यापि कथमन्यत्वसिद्धिस्तत्राह—**तदेति**। संबन्धस्य भेदसमानाश्रयत्वादित्यर्थः।

नन्वन्यत्वेऽपि कथं प्रधानकर्मत्वमत आह—**यदि चेति**। अपूर्ववचनेऽपूर्वार्थे तत्फले इत्यर्थः। प्रकाशनार्थत्वे तु तदभेदान्नभेदः इत्याह—**इतरथेति** ॥ २७ ॥

त० वा०—सम्बन्धस्य भेदनिबन्धनत्वात्सम्बन्धवचनेन स्तोत्रशस्त्रयोर्भेदः। स च प्रकाशकत्वान्न प्राप्नोति। ननु स्तुत्येकत्वादितरत्रापि तुल्यमेतत्। अथ प्रगीताप्रगीतमन्त्रसाधनत्वेन भेदः, तद्व्यक्तिद्वारेण वा, स पूर्वपक्षेऽप्यविशिष्टः।

तत्रोत्तरं द्वादशत्ववत्। अत्यन्तभेदाद्धि स्तोत्रशस्त्रापूर्वयोस्तद्द्वारेण क्रिययोर्भेदमुपचर्य, सम्बन्धवचनम्। न तु प्रकाशनं स्वतः, फलतो वा भिद्यते ॥ २७ ॥

न्या० सु०—कथं सम्बन्धत्वश्रुत्या स्तोत्रशस्त्ररूपस्यार्थस्यान्यत्वप्रतीतिरित्याशङ्कानिरासार्थं 'यद्यन्यदि'ति भाष्यं व्याचष्टे—**सम्बन्धस्येति**। अन्यत्वप्रतीतेः सिद्धान्तोपपादकत्वाभिधानार्थं यदि चेति भाष्यं सङ्क्षेपेण व्याचष्टे—**स चेति**। प्रकाशनार्थत्व इति शेषः। स्तोत्रशस्त्रसाधनभूतानां मन्त्राणां प्रगीताप्रगीतविशेषणभेदेन भेदात्तदुपाधिकः स्तोत्रशस्त्रयोर्भेदो भविष्यतीत्यधिकाशङ्कानिरासार्थं द्वादशत्वतुल्यावष्याशङ्कापरिहारावाह—**नन्विति**। ननु प्रकाशनस्यापि प्रगीताप्रगीतमन्त्रलक्षणोपायनियमापूर्वभेदाद्भेदो भविष्यतीत्याशङ्क्याह—**नन्विति**।

यत्तु नियमापूर्वं सत्क्रियाकृतं न भवतीति वार्त्तिकेनाध्यायोपक्रमे नियमापूर्वस्य क्रियाजन्यत्वनिषेधान्न तद्भेदेन क्रियाभेदसिद्धिरित्याशयः ॥ २७ ॥

भा० प्र०—इसके प्रधानकर्म की सिद्धि के लिए अन्य कारणों का भी निर्देश किया जा रहा है—'अन्यश्चार्थः प्रतीयते'। शास्त्र में 'सम्बद्धे वै स्तोत्रशस्त्रे' इस वचन में स्तोत्र एवं शस्त्र को सम्बद्ध अर्थात् सम्बन्धयुक्त कहा गया है। जो स्वरूप से एवं फल से जो परस्पर भिन्न हैं, उन्हीं का परस्पर सम्बन्ध हो सकता है, अभिन्न का सम्बन्ध नहीं हो सकता है। यदि स्तोत्र एवं शस्त्र को देवता का प्रकाशार्थक कहा गया है,

ऐसी स्थिति में उनका कलगत कोई भेद नहीं है, अतः, परस्पर सम्बद्ध भी नहीं हो सकते हैं। ऐसी स्थिति में 'सम्बद्धे वै स्तोत्रशस्त्रे' यह वचन बाधित होगा। स्तोत्र और शस्त्र को प्रधानकर्म मानने पर इन दो से अलग-अलग जो अपूर्व उत्पन्न होगा वे अत्यन्त भिन्न हैं, स्तोत्र एवं शस्त्र का अपूर्वरूप फल अत्यन्त भिन्न होने पर उनका पार्थक्य और सम्बन्ध दोनों ही सिद्ध होता है। पूर्वपक्षी का मत मानने पर स्तोत्र एवं शस्त्र दोनों ही अभिन्न हो जायेंगे, क्योंकि, उनका फल अभिन्न ही होता है।

'अन्यः अर्थः' = अन्य अर्थ अर्थात् स्तोत्र एवं शस्त्र का सम्बन्ध, 'च' = और अथा जिस कारण से, 'प्रतीयते' = प्रतीत होता है, यतः स्तोत्र एवं शस्त्र का सम्बन्ध रूप अन्य अर्थ प्रतीत होता है, अतः, वे गुणकर्म हैं ॥ २७ ॥

अभिधानं च कर्मवत् ॥ २८ ॥

शा० भा०—प्रधानकर्मण इव चाभिधानं भवति द्वितीयासंयोगेन—'प्रउगं शंसति, निष्कैवल्यं शंसति', इति ॥ २८ ॥

भा० वि०—प्रधानकर्मत्वे हेत्वन्तरत्वेनाभिधानं च कर्मवदिति व्याचष्टे—**प्रधानकर्मण इवेति** ॥ २८ ॥

त० वा—यदिदं द्वितीयाप्रतिपादितकर्मार्हमभिधानमिदं चापरं प्राधान्ये कारणम्। प्रधानक्रिया हि केनचिद्रूपेणेप्सिता 'अग्निहोत्रं जुहोति' 'आधारमाधारयति' इतिवद्भवति, न संस्कारक्रिया, अत्यन्तगुणभूतत्वात्।

अथ वा स्तोत्रशस्त्रसमाख्ययोरभिधानत्वं तत्प्राधान्यज्ञापनार्थम्। इतरथा हि प्रकाशनमित्येवं समाख्या स्यात्। अजहन्त्यादिवद्वा नैव भवेत् ॥ २८ ॥

न्या० सु०—प्रधानकर्मणो अग्निहोत्रादेर्यथा द्वितीयासंयोगेनाभिधानम्, तथा शस्त्रस्यापि द्वितीयासंयोगेन भवतीत्येवं प्रधानेत्यादि भाष्येण व्याख्यातम्। तद्धात्वर्थस्य करणत्वेनेप्सिततमत्वलक्षणप्राधान्यायोगात् द्वितीयायाश्च करणत्वाक्षिप्तकर्तृव्यापारव्याप्यत्वेनाप्युपपत्तेरयुक्तमाशङ्क्योपपादयति—**यदिदमिति**। श्रुतायां भावनायां करणत्वेऽप्यग्निहोत्रादेर्धात्वर्थस्याकृतः सोऽपि नास्तीति पुनः करणवाञ्छनमित्यनेन न्यायेनार्थाक्षिप्तायां धात्वर्थनिष्पादिकायामीप्सितत्वात् प्राधान्यं युक्तमित्याशयः।

नन्वेवं सति संस्कारकर्मणोऽप्यनिष्पत्त्या प्राधान्यापत्तिरित्याशङ्क्याह—**न संस्कारक्रियेति**। तत्र व्रीह्यादिनिष्पाद्यस्यावघातस्य तान्प्रति गुणत्वेनावधारितस्य न तानेव प्राधान्यं युक्तमित्याशयः। चतुर्गृहीतं वा एतदभूत्तस्याघारमाघार्य, त्रिरितः प्राचीनं प्रयाजान्यजतीति वाक्येनाघारस्य प्रयाजार्थाज्यसंस्कारत्वावगमेऽपि मान्त्रवर्णिकदेवतान्वयापन्नयागरूपाभिप्रायं प्राधान्याभिधानम्, स्वरूपधारविषयं वा। यदा तु द्वितीया-

भिप्राय: श्रुतिसंयोगो व्याख्यायते, तदा पौनरुक्त्यापत्तेः। प्रधानकर्मण इवाभिधानं भवतीत्येतावद्भाष्यम्, यथा प्रधानकर्मणो नामधेयं भवति। तथा स्तोत्रशस्त्रयोरपीत्येवं सूत्रव्याख्यानार्थतया व्याचष्टे—**अथ वेति**। ननु संस्कारकर्मणोऽपि स्रुग्व्यापारादेर्नामधेयदर्शनान्न तेन प्राधान्यसिद्धिरित्याशङ्क्याह—**इतरथा हीति**। संस्कारस्य संस्कार्यनिष्ठत्वात्तदवच्छेदेनैव व्यवहारसिद्धेर्न तावत्संज्ञया कार्यम्। सौकार्यार्थं तु तदपेक्षयामपि दृष्टसंस्कारोपाधिक्यैव प्रकाशनसंज्ञयाऽऽधारवद्व्यवहारसिद्धेः संज्ञान्तरमनर्थकमित्याशयः॥ २८॥

भा० प्र०—स्तोत्र और शस्त्र के प्रधान कर्म के समर्थन में अन्य साधन भी कह रहे हैं—'अभिधानं च कर्मवत्'। शस्त्रविषयक वचन में द्वितीया विभक्ति होने से वह प्रधान कर्म है—यह अवगत होता है। 'प्रउगं शंसति, निष्कैवल्यं शंसति' इस वचन में 'प्रउगं निष्कैवल्यं शंसति' इस वचन में 'प्रउगं निष्कैवल्यं' इन स्थलों में द्वितीया विभक्ति कम में होती है, और जो ईप्सिततम होता है वही कर्म होता है, प्रधान कर्म ही किसी न किसी रूप में ईप्सित होता है, इन्हीं कारणों से 'अग्निहोत्रं जुहोति', 'आघरमाघारयति' इत्यादि वचनों से विहित विभक्ति से युक्त अग्निहोत्र एवं आघार आदि जिसप्रकार प्रधानकर्म हैं, वैसे ही प्रकृत में स्तोत्र एवं शस्त्र भी प्रधान कर्म है।

'अभिधानम्' = उक्ति 'च' = और अथवा यतः, 'कर्मवत्' = 'प्रधान कर्म के समान' क्योंकि प्रधान कर्म के समान अभिधान अर्थात् उपदेश = शास्त्र निर्दिष्ट है, इसीलिए वे प्रधानकर्म हैं॥ २८॥

फलनिर्वृत्तिश्च॥ २९॥

शा० भा०—फलनिर्वृत्तिदर्शनं[1] च भवति। 'स्तुतस्य स्तुतमसि' इत्येवमादि—इन्द्रवतो वनामहे[2] धुक्षीमहि[3] प्रजामिषम्, सा मे सत्याशीर्यज्ञस्य भूयादिति स्तोत्रफलमनूद्यते, न देवतायाः। तस्मात् प्रधानकर्मणी स्तोत्रशस्त्रे।

प्रयोजनम्

अन्यत्र सूत्रबद्धं प्रयोजनम्। दशमेऽध्याये ग्रहाणां देवताऽन्यत्वे स्तुतशस्त्रयोः प्रधानकर्मत्वादविकारः[4] स्यात्॥ २९॥ युक्तिः॥

इति पञ्चमं स्तुतशस्त्राधिकरणम्॥ ५॥

---

१. ब. दर्शनं भवति। २. ब. दधिकारः।
३. क. मनेमहि। ४. क. भक्षीमहि।

भा० वि०—प्रधानकर्मणोऽग्निहोत्रादेः यथा द्वितीयासंयोगेनाभिधानं भवति तथा प्रउगं शंसति निष्कैवल्यं शंसतीति द्वितीयासंयोगेनाभिधानात् प्रधानकर्मत्वमित्यर्थः। स्तोत्रात्फलनिर्वृत्तिदर्शनमपि प्रधानकर्मत्वे लिङ्गमिति सूत्रार्थमाह—**फलनिर्वृत्तिदर्शनं चेति**। एतद्विवृणोति—**स्तुतस्येति**। स्तुतस्य स्तुतमस्यूर्जस्वं पयस्वम्मा मा स्तोत्रस्य स्तोत्रं गम्यात् इति मन्त्रे भावनिष्ठया स्तोत्रस्य मध्ये त्वं स्तोत्रमसीत्यामन्त्र्य स्तोत्रस्य स्तोत्रम् ऊर्जस्वपयस्वद्भूत्वा मा मा गम्यादिति स्तोत्रात्तथेन्द्रियावन्तः स्तुत्यत्वे नानेकेन्द्रादिदेवतावन्तः सन्तो वयं वनामहे याचामहे प्रजामिषन्धुक्षीमहि भजेमहीति सा सर्वाममाशीः सत्याभूयादिति च स्तोत्रात्फलनिष्पत्तिः दृश्यमाना प्रधानकर्मत्वं सूचयतीत्यर्थः। उक्तहेतुफलमुपसंहरति—**तस्मादिति**। प्रयोजनं तु ग्रहदेवतान्यत्वेऽपि स्तुतशस्त्रयोः प्रधानकर्मत्वादनूहन्दशमे वक्ष्यतीत्याह—**प्रयोजनमिति** ॥ २९ ॥

त० वा०—योऽयं मन्त्रे फलाशीरर्थवादः। स स्तुतेः प्रधानत्वे घटते। सर्वत्र प्रधानविषयत्वात्प्रार्थनानाम्।

त्वत्पक्षे तु—

देवतैव प्रधानत्वात्फलं याच्येत कर्मवत्।
न स्वामिनि स्थिते कश्चिद्दासात्प्रार्थयते फलम् ॥ २९ ॥

(इति पञ्चमं स्तुतशस्त्राधिकरणम् ॥ ५ ॥)

न्या० सु०—स्तुतस्य स्तुतमप्यूर्जस्वत्पयस्वदामामास्तोत्रस्य स्तोत्रं गम्यादिति मन्त्रे भावनिष्ठया स्तोत्रमामन्त्र्य स्तोत्रस्य मध्ये त्वं स्तोत्रमसि तदेवंभूतस्तोत्रस्य मध्ये स्तोत्रमूर्जस्वत्पयस्वत् भूत्वा मामागम्यादितीन्द्रशब्दोपलक्षितानेकदेवतास्तुत्येन्द्रादिदेवतावन्तः सन्तो वयं त्वां याचामहे प्रजामिषं भक्षीमहीति च याचामहे सा सर्वा यज्ञशब्दलक्षितस्य यज्ञाङ्गस्य सम्बन्धिनी ममाशीः सत्या भूयादिति स्तोत्रात् प्रधानकर्मण इव फलनिष्पत्तिर्दृश्यत इत्येवं सूत्रव्याख्यानार्थं फलेत्यादिभाष्यं व्याचष्टे—**योऽयमिति**। न देवताया इति फलव्यतिरेकसूचितमर्थं व्याचष्टे—**त्वत्पक्षे त्विति** ॥ २९ ॥

॥ इति पञ्चमं स्तुतशस्त्राधिकरणम् ॥

भा० प्र०—स्तोत्र और शस्त्र प्रधान कर्म है इसके लिए अन्य प्रमाण का निर्देश करते हुए लिखा है—'फलनिर्वृत्तिश्च'। इन्द्रवन्तो वनामहे धुक्षीमहि प्रजामिषं सामे सत्याशीर्यज्ञस्य भूयात्' (तै० सं० ३।२।७) इत्यादि मन्त्रों में फलाशी अर्थात् फल प्रार्थना या फलशंसा की गई है। स्तोत्र एवं शस्त्र के प्रधान कर्म होने पर ही फल प्रार्थना सङ्गत होती है। क्योंकि, प्रधान कर्म निष्पन्न करने लिए ही फल प्रार्थना की जाती है, गुणकर्म की फलाशंसा नहीं की जाती है।

अथवा यदि देवता का प्रकाशन करना ही इसका प्रयोजन है तब देवता के निकट फल प्रार्थना की जाती किन्तु ऐसा नहीं किया गया है। कतिपय आचार्यों का कथन है कि "एष वै स्तुतशस्त्रयोर्दोहः" इत्यादि वचनों में दोह को स्तुतशस्त्र के फल के रूप में निर्देश किया गया है—यह सङ्गत नहीं होगा यदि, इसको प्रधान कर्म नहीं माना जाय। इस अधिकरण का यह प्रयोजन है कि पूर्वपक्षी के मत में स्तुतशस्त्र का उत्कर्ष होगा, किन्तु सिद्धान्ती के मत में ऐसा नहीं होगा। पूर्व अधिकरण के साथ इस अधिकरण की अपवादिकी सङ्गति है— यह पूर्व अधिकरण में कथित गुणकर्म का अपवाद या व्यतिक्रम—इनका निर्देश करने के लिए इस अधिकरण का उत्थान है। "फलनिर्वृत्तिः = फल की उत्पत्ति (कही गई है) 'च' = यतः स्तोत्र एवं शस्त्र की फलोत्पत्ति उपदिष्ट है, अतः ये प्रधानकर्म हैं॥ २९॥

अथ षष्ठं मन्त्राविधायकत्वाधिकरणम्

[६] विधिमन्त्रयोरैकार्थ्यमैकशब्द्यात् ॥ ३० ॥ पू० ॥

शा० भा०—इदं समाम्नायते न ता नशन्ति, न दभाति, तस्करो, नासामित्रो[1] व्यथिरा दधर्षति। देवांश्च याभिर्यजते ददाति च ज्योगित्ताभिः सचते गोपतिः सह इति। यजते ददातीत्युदाहरणम्। किं यद्वद् ब्राह्मणे भावशब्दो विधायकस्तद्वन्मन्त्रेऽपि, उत मन्त्रेऽविधायक इति।

किं तावत्प्राप्तम्। विधौ मन्त्रे चाऽऽम्नायमानस्य भावशब्दस्य एक एवार्थः स्यात् ऐकशब्द्यात्। स एवायमेकः शब्दो ब्राह्मणगतो विधास्यति, मन्त्रगतो न शक्नोति विधातुमित्यनुपपन्नम्। तस्माद्विधायकः॥ ३०॥ क० पूर्वपक्षः॥

भा० वि०—उपोद्घातभावार्थाधिकरणोक्तप्रधानकर्मत्वापवादेन द्विविधमाख्यातं गुणप्रधानकर्मविधायित्वेनोक्तम्—अथेदानीं प्रसङ्गाद्यदाद्युपबन्धेष्वाख्यातेषु अविधायकत्वलक्षणं प्रकारान्तरं प्रस्तूयत इति सङ्गतिः, उदाहृतवाक्यगतं विवक्षितमुदाहरणांशं दर्शयति—**यजेतेति**। अविधायकत्वस्य यदाद्युपबद्धमन्त्रब्राह्मणसाधारण्येऽपि यस्योभयमित्यादेः विध्यन्तरैकवाक्यत्वसंभवादभिधानमात्रपर्यवसानस्य च मन्त्रेष्वेव भावान्मन्त्रमात्रोदाहरणमिति द्रष्टव्यम्, तत्र शब्दैक्याद्यदाद्युपबन्धाच्च संशयमाह— **किमिति**। यथा ब्राह्मणे–दर्शपूर्णमासाभ्यामित्यादौ भावशब्दो विधायकः तथा यदाद्युपबद्धमन्त्रेष्वपि विधायकः अविधायक इत्यर्थः। प्रश्नपूर्वकं विधिमन्त्रयोरैकार्थ्यमिति प्रतिज्ञाभागं व्याचष्टे–**किं तावदित्यादिना**। विधिशब्दो ब्राह्मणविषयः हेतुमादाय व्याचष्टे—**एकेति**। यच्छब्दाद्युपबन्धेऽपि

---

१. क. अमित्रो।

विधिशक्तियुक्तस्य लिङादेः प्रत्यभिज्ञानाद्यदाग्नेयोऽष्टाकपालः इत्यादौ च यच्छब्दाद्युपबन्धस्य विधिशक्तिप्रतिबन्धकत्वादर्शनादविधायकत्वाख्यं प्रकारान्तरं नाश्रयणीयमित्यर्थः। यस्मात्क्वचिद्विधायकः क्वचिन्नेत्युपपन्नं तस्मात् सर्वत्रैव विधायक इत्याह—**तस्मादिति** ॥ ३० ॥

अथ षष्ठं मन्त्राविधायकत्वाधिकरणम् ॥

त० वा०—इह मन्त्रा उदाहरणम्। किं तद्गता भावनावचना ब्राह्मणवद्विदधति, नेति संदेहे, शब्दाभेदाद्विधायका इत्याशङ्क्य मन्त्रत्वात्प्राप्तार्थत्वाच्च विधित्वासंभवेन प्रयोगकालेषु ब्राह्मणविहितानामेवार्थानां स्मारका इत्युत्तरपक्ष उक्तः।

तथा हि—

न कर्मान्तरताऽस्त्यत्र बलवत्प्रत्यभिज्ञया।
न चोपात्तो गुणः कश्चिन्न च वाक्यान्तरे स्तुतिः॥

स्मारकत्वप्रतिपक्षौ हि विध्यर्थवादौ स्याताम्। तदिह स्वरूपं तावदन्यतः क्रियायाः प्राप्तं, गुणफलनिमित्तानि तु नैवोपात्तानि, यानि विधीयेरन्। न च वाक्यान्तरस्थे पर्यवसितप्रयोजने विधौ स्तुतिरुपपद्यते। तदुक्तं प्रथममन्त्रे। तस्मात्प्रकाशका मन्त्रा इति यद्व्याख्यायते।

दुरुक्तचिन्ताकरणम्

तत्र वदामः। किं पुनः कारणं मन्त्रत्वेनाऽऽख्यातविशेषणां विधिशक्तिस्तिरोधीयते, कथं च ब्राह्मणत्वेनासावाविर्भाव्यते। दृष्टाश्च मन्त्रगता अपि विधायका 'वसन्ताय कपिञ्जलानालभते' इत्यादयः। तथा ब्राह्मणता अप्यविधायका। यथा 'यस्योभयं हविरार्तिमार्छेत्' इत्यादयः। तस्मान्नायमेकान्तः।

किं च—

प्राप्तत्वाद्यदि चेष्येत मन्त्राणामनुवादता।
तैरेव विहितं कस्मान्न स्मारयति चोदना॥

न ह्यत्र विशेषहेतुरस्ति, ब्राह्मणवीहितमासाद्योपहतविधिशक्तिर्मन्त्रः स्मारको भवत्यथ वा विपर्यय इति।

तत्रोभयोरनुवादत्वासंभवादगृह्यमाणविशेषत्वाच्च द्वयोरपि विधायकत्वम्। अभ्यासाच्च कर्मभेदः स्यात्। बलवत्प्रत्यभिज्ञायाश्चाभ्यासाधिकरण एवोत्तरं भविष्यति। तस्मान्नैवमभिधायकत्वसिद्धिः।

येऽप्याहुः—

यस्माद् व्रीह्यादिवन्मन्त्राः करणत्वेन कर्मणाम्।
ब्राह्मणेन नियुज्यन्ते तद्वत्ते न विधायकाः॥

तैरपि सामान्यतो दृष्टमात्रं व्यपदिष्टम् । कुतः—?

विधिशक्तिर्नियोगेन न मन्त्रस्यापनीयते ।
ततो विधास्यति ह्येष नियोगात्स्मारयिष्यति ॥

न हि विनियुक्तेन न विधातव्यमिति किंचित्प्रमाणम् । यदि स्वतो विधिशक्तिरस्त्येव । अथ त्वसौ प्रथममेव नास्ति, व्यर्थो विनियोगोपन्यासः । न चोभयकरणे विरोधः । तथा हि—

विधायकं सदप्यर्थं ब्राह्मणं स्मारयिष्यति ।
'मन्त्रतस्तु विरोधे स्यात्' इत्यत्रैतद्वदिष्यते ॥

ये च वचनेनाविनियुक्ताः ते च त्वत्पक्षे निराकरणहेत्वभावाद्विधायकाः प्राप्नुवन्तीत्येतदप्यकारणम् । चात्र मन्त्रोपन्यासस्य कश्चित्संबन्ध इति ।

अन्यथा वर्ण्यते । द्विविधमेवाऽऽख्यातं गुणप्रधानकर्मत्वेनोक्तम् ।

अथेदानीं प्रस्तूयते किं तावेव द्वौ प्रकारौ, उतान्योऽप्यस्तीति । तत्र न तृतीयः प्रकारोऽस्तीति मत्वा पूर्वपक्षवादी वदत्यैकार्थ्यमिति । तथा प्राप्ते ।

अभिधीयते ॥ ३० ॥

॥ अथ षष्ठं मन्त्राविधायकत्वाधिकरणम् ॥ ६ ॥

न्या० सु०—सूत्रभाष्ययोर्मन्त्रग्रहणात् मन्त्रगतभावशब्दविषयत्वेनैतदधिकरणं कैश्चिद्व्याख्यातम् । तद् दूषयितुमुपन्यस्यति—**तावदिहेति** । यद्याद्युपबन्धस्य ब्राह्मणोऽपि तुल्यत्वान्मन्त्रत्वातिरिक्तविधायकत्वासम्भवहेत्वप्रतीतेर्मन्त्रग्रहणस्य हेत्वर्थत्वं मत्वा मन्त्रत्वादित्युक्तम् । प्राप्तार्थत्वाच्चेत्यनेन विहितत्वादिति भाष्योक्ता हेतुर्ब्राह्मणविहितस्य मन्त्रोऽनुवादको मन्त्रविहितस्य वा ब्राह्मणमित्यनिश्चयादभ्युच्चयत्वेन व्याख्यातः । कर्मान्तरत्वाशङ्कानिरासार्थं नेति भाष्यं व्याचष्टे—**तथा हीति** । स्तुत्यर्थतायामपीत्यपिशब्दसूचितार्थव्याख्यानपूर्वकं भाष्यमुत्तरार्द्धेन व्याचष्टे—**न चेति** । गुणग्रहणं फलनिमित्तयोरप्युपलक्षणार्थम् ।

ननु विधौ ब्राह्मणे मन्त्रे च यान्याख्यातानि, तेषां सर्वेषामेकमेव विधानरूपं प्रयोजनम् । ब्राह्मणे विधायकशक्तियुक्तत्वेनावधारितस्याख्याशब्दस्य मन्त्रेऽप्यैक्येन प्रत्यभिज्ञानादिति वदता सूत्रकृता विधायकत्वमात्रस्य पूर्वपक्षितत्वात् स्तुतित्वनिरासोऽनर्थक इत्याशङ्कानिरासपूर्वकं श्लोकं व्याचष्टे—**स्मारकत्वेति** । फलनिमित्तयोरविधेयत्वेऽप्यज्ञातज्ञापनाभिप्रायेण विधीयेरन्नित्युक्तम् । तस्मादित्युपसंहारभाष्यं व्याचष्टे—**तस्मादिति** ।

दूषयितुमुपक्रमते—**इतीति** । मन्त्रत्वस्य तावद्धेतुत्वं दूषयति—**किं पुनरिति** । ननु मन्त्रशब्देन विधिशक्त्याविर्भावहेतुब्राह्मणत्वाभावो विवक्षित इत्याशङ्क्याह—**कथं**

वेति। कारणाभावमेवोभयत्रापि व्यभिचारदर्शनेनोपपादयति—**दृष्टाश्चेति**। एतदेवोपसंहरति—**तस्मादिति**। प्राप्तार्थत्वस्यापि हेतुत्वं दूषयति—**किं चेति**। श्लोकं व्याचष्टे—**न हीति**। ततश्चोभयोरपि विधायकतैव युक्तेत्याह—**तत्रेति**।

नन्वेकेन विहिते विध्यन्तरानर्थक्यं स्यादित्याशङ्क्याह—**अभ्यासाच्चेति**। यच्चासकृदपीत्युक्तम्। तदप्ययुक्तमित्याह—**बलवदिति**। दूषणमुपसंहरति—**तस्मादिति**।

अन्यैस्तु मन्त्रत्वस्य विधिशक्तितिरोधानाहेतुत्वेऽपि कर्मकरणतया ब्राह्मणेन विनियुज्यमानत्वस्य व्रीह्यादावविधायकत्वेन व्याप्तिदर्शनाद्धेतुत्वं भविष्यतीत्युक्तम्। तदपि दूषयितुमुपन्यस्यति—**येऽपीति**। विधायकस्यापि ब्राह्मणस्य ब्रह्मयज्ञे ब्राह्मणेन विनियोगदर्शनात्करणत्वविशेषणे कृते। ननु ब्राह्मणमपि ब्रह्मयज्ञफलकरणत्वेनैव विनियुक्तमित्याशङ्क्य कर्मणामिति विशेषितम्। ननु पञ्चमे पाठाधिकरणेऽर्थकृते वानुमानं स्यात्क्रत्वेकत्वे परार्थत्वात्तेन सम्बन्धस्तस्मात् स्वशब्दमुच्यत(५-१-६)इति सूत्रे परार्थो हि वेदो यदनेन शक्यते कर्त्तुम्, तस्मै तस्माएष समाम्नायतो शक्यते चानेन परार्थो विधातुम्, क्रियाकाले च प्रतिपत्तुम्। तस्माद्वेदः पदार्थांश्च ज्ञातुमुपादेयः क्रियाकाले च प्रतिपत्तुमित्यादिभाष्येण ब्राह्मणस्यापि स्मारकत्वस्य वक्ष्यमाणत्वात्कर्मकरणत्वेन विनियोगोऽस्तीत्याशङ्क्य ब्राह्मणेनेति विशेषितम्। स्मारकतया ब्राह्मणस्य लिङ्गेन विनियोगः न ब्राह्मणेनेत्याशयः।

दूषयति—**तैरपीति**। मात्रशब्दसूचितं हेतोरप्रयोजकत्वं प्रश्नपूर्वमुपपादयति—**कुत इति**। साध्याभावविरोधी हेतुः साध्याक्षेपकत्वात्प्रयोजको भवति। न च विनियोगो विधायकत्वविरोधीत्याशयः। श्लोकं व्याचष्टे—**न हीति**। विनियुक्तशब्देन श्लोकस्थौ नियोगशब्दौ विनियोगवाचितया व्याख्यातौ। पूर्वश्लोकेऽप्येवमविरोधमेव पाठाधिकरणे वक्ष्यमाणेन ब्राह्मणस्योभयार्थत्वेनोपपादयति—**तथा हीति**। ननु ब्राह्मणस्य विधायकत्वोत्तरकालं सम्बन्धित्वेन 'यत्सन्निधाने यो दृष्ट' इति न्यायाद्विधेयस्मारकत्वावगतेर्विनियोगात्प्राग्विधायकत्वमविरुद्धम्। मन्त्रस्य तु प्रागेव ब्राह्मणेन विनियोगात् स्मारकत्वप्रतीतेर्विधायकत्वानुपपत्तिरित्याशङ्कानिराशसूचनार्थमेव—**प्रथममित्युक्तम्**। अर्थत्वेन प्रतिपाद्यत्वेन स्मार्यत्वम्। तच्च विधानात्प्रागप्यस्तीत्याशयः ॥ ३० ॥

भा० प्र०—पूर्व अधिकरण में कहा गया है कि किसी-किसी स्थल में आख्यात गुणकर्म का विधायक होता है और किसी स्थान में प्रधान कर्म का विधायक होता है। प्रकृत में प्रसङ्ग क्रममें आख्यात का अभिधायकत्व अर्थात् अनुष्ठेय विषय के स्मारकत्व के रूप में तृतीय प्रकार का प्रदर्शन किया जा रहा है। श्रुतियों में "देवांश्च याभियंजते ददादि च" (तै० ब्रा० २।४।६) इत्यादि वचन उपलब्ध होते हैं, ये वाक्य विधिवाक्य के समान गुणकर्म अथवा प्रधानकर्म के विधायक है या नहीं—यह संदेह होता है।

इस शङ्का में पूर्वपक्षी का कथन है कि—"विधिमन्त्रयोरैकार्थ्यम्" विधि एवं मन्त्र का प्रयोजन एक अर्थात् समान है। ब्राह्मणवाक्य का अर्थात् विधिवाक्य के आख्यात को जैसे कर्मविधायकत्व माना जाता है, मन्त्रगत आख्यात को भी उसी प्रकार विधायक मानना उचित है। ऐक्यशब्दय होने से। क्योंकि, दोनों स्थानों में एक-जातीय शब्द अर्थात् आख्यात का प्रयोग है। दोनों ही स्थलों में जब आख्यातांश में कोई पार्थक्य नहीं है, तब ब्राह्मणवाक्यगत = विधिवाक्यस्थित आख्यात ही विधायक होगा—इस प्रकार की विषमता को स्वीकार करना उचित नहीं है।

"विधिमन्त्रयोः" विधि = ब्राह्मवाक्य एवं मन्त्र के आख्यात का, "ऐकार्थ्यम्" = एक ही प्रयोजन, "ऐकशब्द्यात्" = क्योंकि, दोनों स्थानों में एकजातीय शब्द है। विधिवाक्य = ब्राह्मणवाक्य एवं मन्त्र इन दोनों में जो आख्यात है, उन दोनों का ही विधायकत्वरूप एक ही प्रयोजन है, क्योंकि, दोनों स्थलों में एकजातीय शब्द का प्रयोग है। यह पूर्वपक्ष है ॥ ३० ॥

अपि वा प्रयोगसामर्थ्यान्मन्त्रोऽभिधानवाची स्यात् ॥ ३१ ॥ सि० ॥

शा० भा०—अपि वेति पक्षो व्यावर्त्यते। एवंजातीयको मन्त्रोऽभिधान-वचनः स्यात्।

प्रयोगसामर्थ्यात्। प्रयोगे क्रियमाणेऽस्य सामर्थ्यं विद्यते। गोदानम्, गोयागं च प्रत्याययितुम्, न विधातुम्। कुतः? विहितत्वाद् गोदानस्य दक्षिणाविधाने, गोयागस्य त्वनुबन्ध्याम्। कर्मान्तरं भविष्यतीति चेत्? न। असकृदप्युच्यमाने तत्प्रत्ययादेव। स्तुत्यर्थकल्पनायामप्यानर्थक्यम्। परिसमाम्नेन सार्थवादकेन वाक्येन विहितत्वात् यागस्य। तस्मान्न मन्त्रगतो भावशब्द एवंजातीयको विधायक इति॥ ३१ ॥ सिद्धान्तः॥

इति षष्ठं मन्त्राविधायकत्वाधिकरणम् ॥ ६ ॥

भा० वि०—अपि वेति परपक्षनिरासप्रतिज्ञां व्याख्याय मन्त्र इत्यादि स्वपक्ष-प्रतिज्ञां व्याचष्टे—**एवं जातीयक इति**। अत्राभिधानातिरिक्तप्रेरणाख्यव्यापार-निषेधायाभिधानकारीति वक्तव्ये तत्साधुकारित्ववाचिना णिनिप्रत्ययेन करोत्यर्थं विवक्षित्वा प्रत्ययानुग्रहार्थं कस्मिंश्चिद्धातौ प्रयोक्तव्येऽनुवादार्थो विधिः प्रयुक्त इत्यवधेयम्, हेतुमादाय व्याचष्टे—**प्रयोगेति**। प्रयोगे क्रियमाणे सति तद्गतं गोयागं गोदानं च प्रत्याययितुमस्य मन्त्रस्य सामर्थ्यं न विधातुमिति सम्बन्धः। याभिर्गोभिर्यजते याश्च ददाति ता न नश्यन्ति। न च तस्करो हरति, न तासां

कश्चिदवयवमामित्रो मित्रकृतो व्याधिरुपद्रवः पीडयति गोस्वामी च ताभिः सह ज्योक् सचते चिरकालं संयुक्तो भवतीति गोस्तुत्यर्थे मन्त्रे गोयागदानयोः यच्छब्देन सिद्धवदभिधानान्न तद्विधानसामर्थ्यमित्यर्थः ।

ननु सिद्धवदभिधानेऽपि यदाग्नेय इत्यादाविव कस्मान्न विधिरिति पृच्छति—**कुत इति**। यत्र यागस्यान्यतो प्राप्तत्वाद्विधिविहितशक्त्यवघातः इह तु प्राप्तत्वात्तद्विघात इत्याह—**विहितत्वादिति**। विहितयागदानाभ्यामन्यदिदं कर्मेति चोदयति—**कर्मान्तरमिति**। यच्छब्दोपबन्धादसकृदुच्यमानेऽपि तदेवेदमिति प्रत्ययान्न कर्मान्तरमित्याह—**नेति**।

ननु वाक्यान्तरविहितकर्मस्तावकत्वेनाप्यस्यार्थवत्त्वान्न प्रत्याय्यकत्वसिद्धिरित्यत आह—**स्तुत्यर्थतायामपीति**। तस्माद्यदाद्युपबद्धमन्त्रगतानामाख्यातानामविधायकत्वमेवेति निगमयति—**तस्मादिति** ॥ ३१ ॥

त० वा०—अस्ति तृतीयः प्रकारो यदभिधायकत्वं नाम। पश्य—

येषामाख्यातशब्दानां यच्छब्दाद्युपबन्धनात् ।
विधिशक्तिः प्रणश्येत्तु ते सर्वत्राभिधायकाः ॥

मन्त्रगतानाम्, ब्राह्मणगतानां चाऽऽख्यातशब्दानां येषां शब्दान्तरेण विधिशक्तिरपगच्छति, तेषामभिधायकत्वम्। तत्र 'न ता नशन्ति' इत्यत्र तावद्यच्छब्दोपहितो विधायकोऽनुवादत्वं प्रार्थयते। तथा 'अहे बुध्निय मन्त्रं मे गोपाय' इत्यामन्त्रणविभक्त्या। दामि गृह्णामीत्युत्तमपुरुषेण। 'यदि सोममपहरेयुः' इति यदिशब्देन। ते चैवमादयः प्रायेण मन्त्रेष्विति मन्त्रा उदाहरणम्। अविधायका मन्त्रा इति च प्रसिद्धिः।

ब्राह्मणे तु भूयांसः प्रत्यया विधायकाः तेन तद्विधायकमिति प्रसिद्धम्। अल्पे त्वविधायका इति। तदिह नोदाहरणम्। विधायकत्वाविधायकत्वे तु तयोर्यथोक्तमेव कारणमिति, न मन्त्रत्वब्राह्मणत्वयोर्व्यापारः।

तत्र त्वेतावान्व्यापारो[1] दृश्यते। रूपादेव ब्राह्मणगतानां विधित्वनिवृत्तौ सत्यां निमित्तादिप्रत्यायनार्थता। न हि तेषां रूपं कर्मसु प्रयोगार्हम्। मन्त्रगतानां तु रूपमेवोपलभ्य दामि गृह्णामि निर्वपामीदमिदं करोम्यग्नीन्विहर बर्हिः स्तृणीहि इदमिदं च कुर्वित्यादिकं शक्यमेतैः स्मर्तुमिति विनियोगबुद्धिर्भवति।

कुतः—?

अनुष्ठाने पदार्थानावश्यंभाविनी स्मृतिः ।
अनन्यसाधनाऽनन्यकार्यैर्मन्त्रैः प्रसाध्यते ॥

---

१. क. (टिप्पण्यां) विशेष इति ।

न तावदनुष्ठानवेलायामस्मृतः कश्चित्पदार्थः शक्यः कर्तुमित्यवश्यंभाविन्या स्मृत्या योग्यसाधनमात्रापेक्षणाद्यत्किंचिद् ब्राह्मणपदार्थानुसंधानं वा, पूर्वपदार्थप्रत्यवेक्षणं वा, सूत्रग्रन्थो वाऽऽत्मीयग्रहणवाक्यानि वा उपद्रष्टादि[1] वा साधनं ग्रहीतुमारभ्यते। तत्रानन्यप्रयोजनान्मन्त्रान्प्रकरणे पठ्यमानान्सामान्येन किमप्येभिः कर्तव्यमित्येवं प्रयोगवचनेन गृह्यमाणानुपलभ्य यादृशेन वाक्येन स्मृतिः कर्तुमाकाङ्क्ष्यते, तद्रूपा इति विदित्वा, लिङ्गप्रकरणानुमितया श्रुत्या विनियोगे सत्यभिधानार्थता विज्ञायते। ततश्चोपायान्तराण्यप्रमाणकत्वान्निवर्तन्ते। नियमादृष्टसिद्धिश्च मन्त्रैरेव स्मृत्वा कृतं कर्माभ्युदयकारि भवतीत्यवधार्यते। **भाष्यमप्यत्रैव योजनीयम्।**

'नासकृदप्युच्चारणे तत्प्रत्ययादिति न प्राप्तत्वाभिप्रायेणोच्यते। किं तु यच्छब्दोपबन्धादस्यैव मन्त्राख्यातस्यान्यतः प्राप्तमहं ब्रवीमीत्येवंरूपप्रत्ययात्। शतकृत्वोऽपि ह्येवमादिरुच्चार्यमाणः स्वसामर्थ्येनैव नापूर्वप्रत्ययं करोति। तत एव पूर्वप्राप्तबुद्ध्युत्पादात्॥ ३१॥

(इति षष्ठं मन्त्राविधायकत्वाधिकरणम्॥ ६॥)

न्या० सु०—ननु 'मन्त्रतस्तु विरोधे स्यात् प्रयोगरूपसामर्थ्यात्तस्मादुत्पत्तिदेशः स (५-१-१६)इत्यस्मिन्नधिकरणे मन्त्रस्य कर्मकालप्रयोज्यत्वाद्रूपेणाभिधानेनैव कर्मप्रयोगेऽनुष्ठाने सामर्थ्यात्स्मारकत्वावगतेः, स्मृतिकार्यत्वेन चानुष्ठानस्य स्मृतिक्रमेण क्रमस्य न्याय्यत्वान्मन्त्रब्राह्मणपाठक्रमयोर्विरोधे मन्त्रपाठक्रमानुरोधेन पश्चाद्विहितस्याप्याग्नेयस्य प्रागनुष्ठानमित्युक्ते, ननु च ब्राह्मणपाठस्यापि तदेव दृष्टमनुष्ठेयस्मरणं प्रयोजनमित्याशङ्क्योत्पत्तिदेशः स इति सूत्रावयवेन कर्मोत्पत्तिमात्रार्थो ब्राह्मणपाठ इति वक्ष्यमाणत्वात्, पाठाधिकरणे ब्राह्मणस्य विधिस्मृत्याख्यप्रयोजनद्वयार्थत्वाभिधानं भाष्यकारीयमनादृतमित्याशङ्क्याह—**मन्त्रतस्त्विति।** प्रभृत्यर्थेनेतिकरणेनोत्पत्तिदेशः स इति सूत्रावयवः परामृष्टः। उत्पत्तिदेशः स इति यत्सूत्रकृद्वक्ष्यति, तदत्र विरोधे सति, न त्वविरोधेऽपीत्यर्थः। ननु ब्राह्मणस्य शक्त्यालोचनया स्मारकत्वावगमेऽपि कर्मानुवादेनाविनियोगान्न कर्मविधायित्वं विरुध्यते। मन्त्रस्य तु कर्मानुवादेन तत्स्मारकतया वचनेन विनियोगात्कर्मविधायित्वानुपपत्तिरित्याशङ्क्याह—**ये चेति।** वाचस्तोमादौ सर्वमन्त्राणां वचनेन विनियोगेऽपि स्वार्थविधायित्वाविरोधाद् यस्मिन्कर्मणि यो मन्त्रो विनियुज्यते, तत्कर्मविधायिता तस्य विरुद्ध्येतेति वाच्यम्। न च सर्वमन्त्राणां स्वाभिधेये कर्मणि विनियोगोऽस्तीत्याशयः। उदाहृत एव हि तावन्मन्त्रोऽनुबन्ध्यपशुपुरोडाशानुनिर्वाप्यः देवीहविर्यागे चन्द्रव्यके गोदेवत्ये याज्यात्वेन विनियुक्तः। न चानेन गोदेवत्यं कर्माभिधीयते।

---

१. क. (टिप्पण्यां) उपद्रष्टावेति।

यागे गवां करणत्वाभिधानाद् दाने च सामर्थ्यात्कर्मतयान्वयावगतेः, अतो गोदेवत्ये यागे वाचनिकविनियोगसद्भावेऽपि गोद्रव्यकयागदानविधायिता न विरुध्यते।

यदि वात्र मन्त्रो विधायको न वेति चिन्त्यते, ततः प्रकृताख्यातशब्दचिन्ता सङ्गतिर्न स्यादित्याह—**न चेति**।

वार्तिकमतेन व्याख्यानम्

मन्त्रब्राह्मणसाधारणयद्याद्युपबन्धाख्यातशब्दविषयत्वेनाधिकरणं स्वमतेन व्याख्यातुमुपक्रमते—**इतीति**। गुणप्रधानकर्मविधायकत्वेन द्विविधमित्यपि वाच्ये लक्षणयैकदेशेन तदर्थलाभात् विधायकशब्दानुक्तिः। ननु तृतीयेऽपि प्रकारे व्युत्पाद्ये, प्रागेव तानि त्रैधं गुणप्रधानानीति सूत्रं कस्मान्न कृतमित्याशङ्क्य द्वैविध्योक्त्यनन्तरमेव तृतीयप्रकारोक्तेः प्रसङ्गो न प्रागिति, इदानींशब्दसूचितमर्थमुपपादयितुं पूर्वप्रकृतापेक्षित्ववाच्यथशब्दः प्रयुक्तः। विधायकत्वमात्रप्रतियोगित्वेनाविधायकत्वस्य विधायकद्वैविध्यमनपेक्ष्य तृतीयत्वं न सम्भवतीत्याशयः। विधिशक्तियुक्तत्वेनाऽवगतस्य लिङादेर्यच्छब्दाद्युपबन्धेऽपि प्रत्यभिज्ञानाद् यदाग्नेयोऽष्टाकपाल' इत्यादौ यच्छब्दाद्युपबन्धेऽपि विधित्वाभ्युपगमाद्यच्छब्दाद्युपबन्धस्य विधिशक्तिप्रतिबन्धकत्वानुपपत्तेरभिधायकत्वाख्यप्रकारान्तराभावाभिधानार्थतया पूर्वपक्षसूत्रं व्याचष्टे—**तत्रेति**।

प्रकारान्तरव्युत्पादनार्थत्वेनापि वा प्रयोगसामर्थ्यान्मन्त्रोऽभिधानवाची स्यादि'ति सिद्धान्तसूत्रमवतरणपूर्वं व्याचष्टे—**तथेति**। अभिधानातिरिक्तप्रेरणाख्यव्यापारनिषेधार्थमभिधानकारीति वाच्ये करोत्यर्थं तत्साधुकारित्ववाचिना णिनिप्रत्ययेन विवक्षित्वा प्रत्ययानुग्रहार्थं कस्मिंश्चिद्धातौ प्रयोज्येऽनुवादार्थो वचिः प्रयुक्त इत्येवमभिधानवाचीति सूत्रावयवार्थं सूचयितुं विधायकत्वाभावोऽभिधायकशब्देनोक्तः। केषामाख्यातानां विधायकत्वाभावः? कश्च तत्र हेतुरित्यपेक्षायामाह—**पश्येति**।

सिद्धत्वद्योतनाद्वक्त्राभिमुख्यासम्भवाद्विधौ।
आत्मनि प्रेरणायोगान्निमित्तत्वाभिधानतः॥ ३१॥

विधिशक्तिविहन्तृ स्याद्यच्छब्दादिचतुष्टयम्।
प्राप्त्ययोगेऽपि तत्रापि क्व चित्यादविहन्तृता॥ ३२॥

श्लोकं व्याचष्टे—**मन्त्रेति**। एतदेव प्रपञ्चयति—**तत्रेति**। याभिर्गोभिर्यजते, याश्च ददाति, ता गावो न नश्यन्ति। न च तस्करो हरति न चासां कंचिदवयवममित्रकृतो व्यथिरुपद्रवः पीडयति। गोस्वामी च ताभिः सह ज्योक्-चिरकालं सचते संसक्तः संयुक्तो भवतीतिगोस्तुत्यर्थे मन्त्रे गोयाग-गोदानयोर्यच्छब्देन सिद्धवद्भावाभिधानाद्विधायकत्वोपघातः। वक्त्रभिमुखकरणार्थं या चामन्त्रणविभक्त्या लिङादेः समान्यतो वक्त्रभिहितार्थानुष्ठानप्रवृत्तवक्त्रभिमुखपुरुषप्रवर्त्तकत्वावगमादप्रवृत्तप्रवर्त्तनात्मकविधिशक्तिविघातः। बर्हिदेवसदनं दामि शुक्रं त्वा शुक्राय धाम्ने धाम्ने देवेभ्यो यजुषे

यजुषे गृह्णामीत्यस्मदर्थेनोत्तमपुरुषेणात्मनि प्रवर्त्तनानुपपत्तेः निमित्तत्ववाचिना च यदि-शब्देन प्राप्तिबुद्धेरित्याशयः ।

नन्वविशेषेणमन्त्रब्राह्मणगतानां यच्छब्दाद्युपबद्धानामाख्यातानां विचार्थत्वे सूत्र-भाष्ययोर्मन्त्रोदाहरणमयुक्तमित्याशङ्क्याह—**न चेति ।** यच्चोत्तरसूत्रे मन्त्राणामविधाय-कत्वं प्रायिकमिति भाष्यकृद्वक्ष्यति । तत्रामन्त्रणविभक्त्यादिबाहुल्यमेव कारणमिति प्रसङ्गादाह—**अविधायका इति ।** ते विधिशक्त्युपघातका यच्छब्दादयः प्रायेण मन्त्रे-ष्वित्येव हेतोरसावध्येतृप्रसिद्धिरित्यर्थः । यश्च ब्राह्मणे विधिशब्दश्चेति मन्त्राधिकरणा-न्त्यसूत्रादौ विधिमन्त्रयोरित्यत्र च विधायकत्वव्यपदेशः तत्रानुपहतविधिशक्तिप्रत्यय-बाहुल्यं कारणमित्याह—**ब्राह्मणे त्विति ।** ब्राह्मणानुदाहरणे वा विधायकाल्पत्वमेव कारणमित्यर्थादुक्तमपि स्पष्टीकर्त्तुमाह—**अल्पे त्विति ।**

ब्राह्मणस्य तु विधायकत्वेऽनुपहते विधिशक्तित्वमेव कारणम्, न ब्राह्मणत्वं कारणम्, किन्तूपहतविधिशक्तितेत्याह—**विधायकत्वेति ।** न मन्त्रस्याविधायकत्वहेतुत्वाभावे मन्त्रविशेषणानर्थक्यं स्यादित्याशङ्कां निरस्यन् 'प्रयोगसामर्थ्यादि'ति सूत्रावयवं व्याचष्टे—**तत्र त्विति ।** यथाद्युपबन्धत्वरूपान्निमित्तादिप्रत्यायनार्थत्वावगतेः स्वयमविधायकत्वेऽप्येकां गां दक्षिणां दद्यादित्याद्याख्यातां तदैकवाक्यत्वेन विधिप्रयोजनत्वात्प्रयोगसामर्थ्यं-भावाच्च न ब्राह्मणगतानामाख्यातानामभिधानमात्रपर्यवसानम् । मन्त्रगतानां तु विधायकैकवाक्यत्वाभावेन निमित्तादिप्रत्यायनार्थत्वानवगमात्प्रयोगसामर्थ्याच्चाभिधान-मात्रपर्यवसानमित्याशयः ।

प्रयोगसामर्थ्यमेव प्रश्नपूर्वमुपपादयितुं मन्त्राधिकरणोक्तमनुष्ठेयार्थस्मारकत्वं तावत् स्मारयति—**कुत इति ।** श्लोकं व्याचष्टे—**न तावदिति ।** यश्चास्माभिर्यच्छब्दाद्युप-बन्धेन विधिशक्तिविघातोऽभिहितः तत्रैव भाष्यमपि प्रतिज्ञापूर्वं योजयति—**भाष्यम-पीति ॥ ३१ ॥**

इति षष्ठं मन्त्राभिधायकत्वाधिकरणम्

भा० प्रा०—मन्त्र की भी विधायकता पूर्वपक्षियों ने कहा है—यह ठीक नहीं है, क्योंकि, प्रायः मन्त्र 'यत्' शब्द से विशिष्ट या उत्तमपुरुषान्त क्रिया, प्रैष आदि पदार्थों से युक्त होते हैं—यह अग्रिम अधिकरण में वर्णित होगा। जो वाक्य 'यत्' शब्द से घटित होता है उसकी क्रिया अनुवादक ही होती है, अतः वह विधायक नहीं हो सकती है। अतः उत्तमपुरुषान्त क्रिया होने से विधायकत्व नहीं हो सकता है, क्योंकि, स्व स्व का विधान नहीं कर सकता है, अन्य स्थलों में भी यही युक्ति समझनी चाहिए। अतः, मन्त्रगत आख्यात विधायक नहीं है, किन्तु, विधायक न होने पर भी वह निष्प्रयोजन नहीं है, क्योंकि, 'मन्त्रः अभिधानवाची' मन्त्र अर्थ का प्रकाशक होता है, इसलिए, उसका अभिधायकत्व अर्थात् अनुष्ठेय अर्थ का प्रकाश या स्मरण

कराना ही प्रयोजन है। क्योंकि, 'प्रयोगसमार्थ्यात्', कर्म के अनुष्ठान के समय अनुष्ठेय पदार्थ का स्मरण किये विना अनुष्ठान कोई भी नहीं कर सकता है, स्मरण करने के लिए क्रमादि का स्मारक कुछ होना आवश्यक है, अतः, अनुष्ठेय पदार्थ स्मारक सापेक्ष है और मन्त्र प्रयोजन सापेक्ष है, इसलिए 'नष्टाश्वदग्धरथ' न्याय से इनकी परस्पर उपकार्योपकारक भाव रहेगा, मन्त्र को ही अनुष्ठेय पदार्थ का स्मारक कहा जाता है। यदि कल्पसूत्रादि ग्रन्थों के सूत्र आदि को भी अनुष्ठेय पदार्थ का प्रकाशक = स्मारक कहा जाय तो यह कहा जा सकता है कि मन्त्र के द्वारा स्मरण कर कर्म का अनुष्ठान करने पर ही वह अदृष्ट का = यज्ञीय अपूर्व का जनक होगा, अन्यथा नहीं। इस प्रकार की नियम विधि स्वीकार करने से अनुष्ठान-काल में मन्त्र ही उच्चारणीय एवं उसी के द्वारा अनुष्ठेय पदार्थ का स्मरण करना उचित है, कारण, उससे नियमापूर्व उत्पन्न होता है। इसीलिए मन्त्रगत आख्यात विधायक नहीं है, अपि तु अभिधायक अर्थात् अनुष्ठेय पदार्थ का स्मरण किया जाता है, तभी वह नियमापूर्व का जनक होगा अर्थात् इस नियम विधि के फलस्वरूप एक नियमापूर्व उत्पन्न होगा और वह यज्ञीय अपूर्व का परिपोषक होगा।

वार्तिककार के मत में केवल मन्त्रगत आख्यात ही अविधायक नहीं है, वरन, स्थलविशेष में ब्राह्मण वाक्यगत आख्यात भी अविधायक होता है। जैसे 'यस्योभयं हविरार्ति मार्च्छेत्' (तै० ब्रा० ३।७।१) इत्यादि ब्राह्मणवाक्य यत्शब्दादि घटित होने से विधायक नहीं है।

'अपि वा' = पूर्वपक्ष की निवृत्ति का सूचक है, 'प्रयोगसामर्थ्यात्' = प्रयोग के समय अर्थात् क्रिया के अनुष्ठान के समय में सामर्थ्य अर्थात् अनुष्ठेय पदार्थ के स्मरण के विषय में सामर्थ्य होने से 'मन्त्रः अभिधानवाची' मन्त्र अर्थ प्रकाश ही करता है ॥ ३१ ॥

[७] तच्चोदकेषु मन्त्राख्या ॥ ३२ ॥ सि० ॥

शा० भा०—मन्त्रगतो भावशब्दो विधायको नेति[1] परीक्षितम्। कोऽयं मन्त्रो नामेति ? उच्यते। अज्ञाते मन्त्रे तद्गतो भावशब्दः कथं विचारित इति ? इदमर्थतोऽधिकरणं पूर्वं द्रष्टव्यम्, कथंलक्षणो[2] मन्त्र इति। तच्चोदकेषु मन्त्राख्या। अभिधानस्य चोदकेष्वेवंजातीयकेष्वभियुक्ता उपदिशन्ति—मन्त्रानधीमहे, मन्त्रानध्यापयामः, मन्त्रा वर्तन्त इति।

प्रायिकमिदं लक्षणम्। अनभिधायका अपि केचिन्मन्त्रा इत्युच्यन्ते। यथा 'वसन्ताय कपिञ्जलानालभत' इति। न शक्यं पृष्टाकोटेन तत्र तत्रोपदेष्टुमिति लक्षणमुक्तम्।

---

१ ब. नेवेति। २. ब. लक्षणको।

'ऋषयोऽपि पदार्थानां नान्तं यान्ति पृथक्त्वशः ।
लक्षणेन तु सिद्धानामन्तं यान्ति विपश्चितः ॥' इति ।

उदाहरणम्, 'मेधोऽसि'[1] इत्येवमादयोऽस्यन्ताः । इषे त्वा इत्येवमादयस्त्वान्ताः । 'आयुर्दा असि' इत्याशीः । अग्निर्मूर्धा इति स्तुतिः । संख्या, 'एको मम' इति । प्रलपितम्, 'अक्षी ते इन्द्र पिङ्गले डुलेरिव' इति । परिदेवनम्—'अम्बे अम्बिक'[2] इति । प्रैषः' अग्नीदग्नीन्=इति अन्वेषणं 'कोऽसि, कतमोऽसि' इति । पृष्टम्, 'पृच्छामि त्वा' इति । आख्यानम्, 'इयं वेदिः' इति । अनुषङ्गः, 'अच्छिद्रेण पवित्रेण' इति । प्रयोगः, त्रैस्वर्यं चातुःस्वर्यं च । सामर्थ्यामभिधानम् । तच्चैतद् वृत्तिकारेणोदाहरणापदेशेनाऽऽख्यातम् ।

एतदपि प्रायिकमेव । असिमध्या अपि च मन्त्रा भवन्ति, 'ईड्यश्चासि वन्द्यश्च वाजिन्' इति । त्वामध्याश्च 'तत्त्वा यामि' इति । आशीर्ब्राह्मणमपि 'सोऽकामयत प्रजाः सृजेय' इति । स्तुतिरपि 'वायुर्वै क्षेपिष्ठा देवता' इति । प्रलापो 'न चैतद्विद्मो[3] यदि ब्राह्मण वा स्मोऽब्राह्मणाः स्मो वा' इति । परिदेवनम्[4], 'ये मामधुक्षन्त ते मां प्रत्यमुञ्चन्त' इति । प्रैषः[5] 'अमृत सोममाहर' इति । अन्वेषणम्, 'इह वा स इह वा' इति । प्रश्नः, 'वेद कर्णवतीं सूर्मिम्' इति । प्रतिवचनं 'विद्मो वा' इति । अनुषङ्गः, 'हृदयस्याग्रेऽवद्यत्यथ जिह्वाया अथ वक्षस' इति । प्रयोगः, त्रैस्वर्यं चातुःस्वर्यं च इति । सामर्थ्यम्, स्रुवेणावद्यति द्रवेष्विति । लक्षणकर्मणि प्रयोजनं प्रसिद्धत्वान्न वक्तव्यम् । लघीयसी प्रतिपत्तिर्लक्षणेन ।

'आक्षेपेष्वपवादेषु प्राप्त्यां लक्षणकर्मणि ।
प्रयोजनं न वक्तव्यं यच्च कृत्वा प्रवर्तते ॥ इति ।

आक्षेपेषु पूर्वाधिकरणस्य[6] प्रयोजनम् । अपवादेषूत्सर्गस्य इति । प्राप्त्या[7]मुत्तरविवक्षा । कृत्वाचिन्तायां पूर्वाधिकरणस्य प्रयोजनम् । अस्ति वेदे मन्त्रशब्दो यस्यायमर्थः परीक्षितः । अहे=बुध्निय मन्त्रं मे गोपाय यमृषयस्त्रैविदा विदुः, ऋचः[8] सामानि यजूंषि इति[9] ॥ ३२ ॥

इति सप्तमं लक्षणाधिकरणम् ।

भा० वि०—मन्त्रलक्षणनिरूपणस्य प्रासङ्गिकतृतीयप्रकारनिरूपणानुप्रसक्त्या सङ्गतिमाह—मन्त्रगत इति । मन्त्रलक्षणात्प्राक् तद्गताख्यातविचारानुपपत्ति

---

१. ब. एधोसि । २. ब. अंबिके अंबालिके इति ।
३. ब. विद्मोब्राह्मणा । ४. ब. परिदेवितं । ५. ब. प्रैषः सोममाहरेति ।
६. ब. पूर्वाधिकरणप्रयोजनम् । ७. ब. प्राप्तावुत्तर ।
८. ब. ऋचोयजूंषि सामानि । ९. ब. तस्मादस्त्येतेषु मन्त्रशब्द इति ।

शङ्कते—**उच्यत इति**। अर्थतः क्रमवैपरीत्यस्य विवक्षितत्वान्नैवमिति परिहरति—**इदमिति**। एवं सङ्गतिमुक्त्वा प्रश्नपूर्वकं लक्षणसूत्रमवतारयति—**कथं लक्षण इति**। तस्यार्थाभिधानस्य चोदकेषु कारणभूतेषु इति व्याचष्टे—**अभिधानस्येति**।

ननु लक्षणसूत्रे वृद्धप्रयोगाभिधानमनर्थकमित्याशङ्क्याह—**प्रायिकमिति**। प्रायिकत्वे हेतुरनभिधायका अपीति प्रयोगोपलक्षणार्थत्वाल्लक्षणस्य प्रयोगोदाहरणमर्थवदित्यर्थः।

ननु वृद्धप्रयोगगम्ये मन्त्रशब्दार्थे लक्षणाभिधानमनर्थकमित्याशङ्क्याह—**न शक्यमिति**। पृष्ठस्याकोटः कुटिलीकरणं तेन तद्गतः क्लेशो लक्ष्यते यथा पुनः पुनः पृथ्वीगतानेकपदार्थनिरीक्षणे पृष्ठकोटजः क्लेशः तथा प्रत्येकं मन्त्रपदविषयालोचनेऽपि क्लेशसाम्याल्लक्षणाभिधानमित्यर्थः। अशक्यं च प्रत्येकं मन्त्रविषयालोचनमित्याह—**अपि चाहुरिति**। एकधर्मोपसंग्रहे तु न दोष इत्याह—**लक्षणेन त्विति**। लक्षितान्मन्त्रान्सावान्तरभेदानुदाहरति—**उदाहरणमिति**। धुलिः कच्छपः त्रैस्वर्यमुदात्तानुदात्तस्वरिताख्यस्वरत्रयत्वं तदेव सन्नतराधिकं चातुस्वर्यम्।

नन्वर्थाभिधानप्रयोजत्वस्य मन्त्रलक्षणत्वे किमिति वृत्तिकारेणास्यन्तत्वादिलक्षणमुक्तमित्याशङ्क्याह—**तच्चैतदिति**। लक्षणं परामृशति यदिदमस्यन्तत्वादि वृत्तिकारेण व्याख्यातं तदुदाहरणमिषेण न तु वस्तुतो लक्षणमित्यर्थः। तत्रहेतुरेतदपीति कथं प्रायिकत्वमित्याशङ्क्यास्यन्तत्वान्तत्वयोरव्याप्तिमाह—**असिमध्या अपीति**। आशीरादीनामतिव्याप्तिमाह—**आशीरिति**।

नन्वेवं प्रायिकस्यापि मन्त्रलक्षणस्य करणे किमनुष्ठाने प्रयोजनमत आह—**लक्षणकर्मणीति**। तत्र हेतुर्लघीयसीति। यतो लक्ष्यप्रतिपत्तिलाघवमेव लक्षणप्रयोजनमित्यर्थः। प्रसङ्गात्प्रयोजनानभिधानविषयं सङ्कलयति—**आक्षेपेष्विति**। किमित्येषु प्रयोजनं न वक्तव्यं तत्राह—**आक्षेपेष्विति**।

ननु लक्ष्यमन्त्रप्रतिपत्तेर्वा किं प्रयोजनमत आह—**अस्तीति**। 'अहे बुध्नियमन्त्रं मे गोपाय' इत्यादिवेदप्रयुक्तस्य मन्त्रशब्दार्थस्यार्थज्ञानं प्रयोजनमित्यर्थः ॥ ३२ ॥

अथ सप्तमं मन्त्रलक्षणाधिकरणम्

त० वा०—यथोक्तेन न्यायेन मन्त्रोदारणस्यातन्त्रत्वात्प्रासङ्गिकमिदं पूर्वसूत्रप्रयुक्तमन्त्रशब्दार्थलक्षणाभिधानमिति नावश्यदमिदमर्थतोऽधिकरणं पूर्वम्। शक्यं हि वाक्यमात्रमप्युदाहृत्य विचारयितुम्।

भाष्यकारस्तु सूत्रकारोच्चारितमन्त्रशब्दादरेण पौर्वापर्यविशेषमाह। तच्चोदकेष्विति। तत् अभिधानं चोदकं प्रयोजकं येषामिति बहुव्रीहिः। अर्थंदर्श-

नमात्रार्थं तु षष्ठीकथनं भाष्ये । अध्येतृवृद्धव्यवहारसिद्धं चेदं प्रायिकचिह्नयुक्तं लक्षणं लाघवार्थमुक्तम् । धरणिगतानेकद्रव्यप्रत्येकनिरीक्षणे पुनः पुनः पृष्ठं कुटिलीक्रियत इति तत्सामान्येन पृष्ठाकोटाभिधानम् ।

श्लोकश्चैवं द्रष्टव्य :—

ऋषयोऽपि हि लक्ष्याणां नान्तं यान्ति पृथक्त्वशः ।
लक्षणेन तु सिद्धानामन्तं यान्ति विपश्चितः ॥
वृत्तौ लक्षणमेतेषामस्यन्तत्वान्तरूपता ।
आशिषः स्तुतिसंख्ये च प्रलप्तं परिदेवितम् ॥
प्रैषान्वेषणपृष्टाख्यानानुषङ्गप्रयोगिताः ।
सामर्थ्यं चेति मन्त्राणां विस्तरः प्रायिको मतः ॥

डुलेरिवेति । डुलिः—कच्छपः । प्रतिपुनातुशब्दमच्छिद्रेण पवित्रेणेत्यनुषङ्गः । **सामर्थ्यं**—अभिधानशक्तिः । ये मां दुग्धवन्तः, त एव निराकृतवन्त इति धेन्वाः **परिदेवितम्** । 'अमुतः सोममाहर' इति सौपर्णोपाख्याने विनतया गरुत्मानमृतार्थं **प्रेषितः** । **कर्णवन्तीं सूर्मिम्** । सूर्मिः—स्थूणा ॥ ३२ ॥

(इति सप्तमं मन्त्रलक्षणाधिकरणम्) ॥ ७ ॥

अथ लक्षणमन्त्राधिकरणम्

न्या० सु०—मन्त्रगत इति भाष्येण मन्त्रलक्षणस्य प्रासङ्गिकत्वेन सङ्गतिमुक्त्वोच्यत इत्यनेन मन्त्रलक्षणात्प्राक्तद्गताख्यातविचाराशक्तिमाशङ्क्येदमित्यनेनार्थतो विपरीतक्रमतोक्ता साऽनादृत्येत्याह—**यथोक्तेनेति** । भाष्यकृतामन्त्रत्वस्याविधायकत्वाप्रयोजकत्वेऽप्यभिधानमात्रपर्यवसानस्य विध्येकवाक्यत्वाभावेन मन्त्रेष्वेव भावान्मन्त्राणामेव पूर्वाधिकरणोदाहरणत्वं मत्वा विपरीतक्रमतोक्तेत्याह—**भाष्येति** । चुदेः प्रेरणार्थत्वात्प्रयोजनस्य न प्रेरकत्वात्प्रयोजनवाचिनं चोदकशब्दमङ्गीकृत्य तच्चोदकेष्विति सूत्रावयवं स्वयं तावद्व्याचष्टे—**तच्चोदकेष्विति** । या तु भाष्यकृता प्रवृत्तिकारणवाचिनः चोदकशब्दस्य लक्षणया कारणमात्रार्थवाचित्वमङ्गीकृत्य तच्छब्दव्याख्यानायाभिधानस्येति षष्ठ्युक्ता, सा लक्षणा दोषादभिधानकारणत्वस्य च ब्राह्मणेऽपि भावेनातिव्यापकत्वापत्तेरयुक्तेति कारणस्य कार्यप्रयोजनत्वाद्विवक्षिताभिधानप्रयोजनकत्वरूपार्थप्रदर्शनायैवेत्याह—**अर्थेति** । षष्ठीसमासप्रदर्शनार्थत्वनिवृत्त्यर्थो मात्रशब्दः ।

अभियुक्ता इति भाष्यावयवेन मन्त्राख्येति सूत्रावयवं व्याख्याय, ननु लक्षणसूत्रे वृद्धप्रयोगाभिधानमनर्थकमित्याशङ्क्य प्रायिकमित्यादिभाष्येण प्रयोगोपलक्षणार्थमेवेदं लक्षणमित्युक्तम् । तद्व्याचष्टे—**अध्येत्रिति** । ननु वृद्धप्रयोगगम्ये मन्त्रशब्दार्थे लक्षणाभिधानमनर्थकमित्याशङ्क्य, न शक्यमिति भाष्येण लक्षणं विना साकल्येन प्रयोगविषया-

ज्ञानाल्लक्षणार्थवत्वोक्ता । तत्र पृष्टाकोटशब्दं व्याचष्टे—**धरणीति** । तच्छब्देनेतिकरण-सूचितकुटिलीकरणजन्यक्लेशपरामर्शात्पृष्टाकोटजन्यक्लेशसामान्येन प्रत्येकं मन्त्रपदप्रयोग-विषयालोचनस्य पृष्टस्याकोटः—कौटिल्यं वक्रत्वम् । अस्मिन्निति पृष्टाकोटशब्देना-भिधानमित्यर्थः । ऋषयोऽपीति श्लोकस्य न शक्यमित्यनेन पौनरुक्त्यमाशङ्क्य, ननु पदार्थान्तराणां प्रत्येकनिरूपणाशक्तावपि मन्त्रपदार्थानामध्येतृपरम्परया प्रत्येकं निरूपयितुं शक्यत्वाल्लक्षणानर्थक्यमित्याशङ्कानिरासार्थत्वसूचनार्थं पदार्थशब्दस्थाने लक्ष्यपदप्रक्षेपेण प्रतिज्ञापूर्वं पठति—**श्लोकश्चेति** । विप्रकीर्णनिकशाखागतानां साकल्येनोपसंहारो न शक्य इत्याशङ्कानिरासाशयः ।

नन्वभिधानप्रयोजनत्वस्य मन्त्रलक्षणत्वे किमिति वृत्तिकारेणास्यन्तत्वादिमन्त्रलक्षण-मुक्तमित्याशङ्क्योदाहरणमित्यादिभाष्येणास्यन्तादेः स्वमतेनोदाहरणत्वमुक्त्वा, तच्चेत्य-नेन तच्छब्देन लक्षणं परामृश्य, यदिदमस्यन्तादि वृत्तिकारेण तल्लक्षणमाख्यातम् । तदुदाहरणमिषेण, न तु परमार्थतो लक्षणं प्रायिकत्वादित्युक्तम् । तद्व्याचष्टे—**वृत्ताविति** । यदेतेषां मन्त्राणामस्यन्तत्वादिलक्षणं वृत्तावुक्तम, स मन्त्राणामुदाहरण-विस्तारो मतो । न तु वस्तुतो लक्षणम्, प्रायिकत्वादित्यर्थः आयुर्दा अस्यायुर्मे देहीत्या-शिषम् । अग्निर्मूर्द्धा दिवः ककुदिति स्तुतिमेको ममैका तस्य योऽस्मान् द्वेष्टि यं च वयं द्विष्म इति संख्यां च, अस्पष्टत्वादव्याख्याय, अक्षीत्यस्य 'तुविग्रीवो वयोदर' इत्यादिव-दिन्द्रस्तुत्यर्थस्वोपपत्तेः । प्रलपितत्वानुपपत्तिमाशङ्क्य स्तुत्यसम्भवसूचनार्थं डुलिशब्दं व्याचष्टे—**डुलिरिति** । अम्बेऽम्बिकेऽम्बालिके न मा नयति कश्च न स सस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीमिति । सुकल्याणरूपां काम्पिलदेशवासिनीं मां न कश्चिन्, नयति कुत्सितोऽश्वः स्वपितीति किशोर्याः परिदेवनम् । अग्नीदग्नीन्विहरेरि प्रैषं, कोऽसि कस्यासि, को नामासि, यस्य ते नाम मन्महि, यं त्वा सोमेनातीतृपामत्यन्वेषणम्, पृच्छामि त्वा परमन्तं पृथिव्या इति पृष्टम्, इयं वेदिः परो अन्तः पृथिव्या इत्याख्यानं च स्पष्टत्वादव्याख्याय, अच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिरित्यनुषङ्गविषयमाह—**प्रतीति** ।

प्रयोगमुदात्तानुदात्तस्वरिताख्यत्रैस्वर्यरूपत्वेन सन्नतराधिकं चातुःस्वर्यरूपत्वेन च भाष्यकृता व्याख्यातत्वादव्याख्याय, सामर्थ्यस्याव्यापारत्वाद्व्यापारवाचिनाभिधान-शब्देन व्याख्यानानुपपत्तिमाशङ्क्याभिधानशब्दं शक्तिविषयत्वेन व्याख्यातुमाह—**सामर्थ्यमिति** । लक्षणत्वासम्भवोपपादनायास्यन्तत्वान्तयोरव्याप्त्यभिधान र्थत्वेनासिमध्या अपि चेत्यादिभाष्यं स्पष्टत्वादव्याख्यायाशीरित्यादावतिव्याप्त्यभिधानार्थत्वेन परिदेवन-प्रैषौ व्याचष्टे—**ये मामिति** । किं जानाति भवान् किं शाखावतीं सूर्मिमित्यस्यार्थस्य पृष्टशब्दादेव ज्ञातत्वात् सूर्मिशब्दमात्रार्थं व्याचष्टे—**कर्णवतीमिति** । भाष्यशेषः स्पष्टत्वान्न व्याख्यातः । मन्त्रप्रतिपत्तेः प्रयोजनापेक्षायामस्तीत्यनेन, अहे बुध्निय मन्त्रं मे पाहि

यमृषयस्त्रैविदो विदुः ऋचो यजूंसि सामानि सा हि श्रीरमृता सतामित्यादौ वेदे प्रयुक्तस्य मन्त्रशब्दस्यार्थज्ञानं प्रयोजनमुक्तम् ॥ ३२ ॥

इति सप्तममन्त्रलक्षणाधिकरणम्

भा० प्र०—मन्त्रगत आख्यात शब्द विधायक है कि नहीं है, इसका विवेचन पूर्व सूत्रों के आधार पर आचार्य शबर मुनि ने विस्तार से किया है। किन्तु, मन्त्र और ब्राह्मण का लक्षण अभी भी सन्दिग्ध है, क्योंकि, किसी सूत्र के द्वारा इसकी परीक्षा नहीं की गई है, अतः, प्रकृत सूत्र से मन्त्र का परीक्षण किया जा रहा है।

मन्त्र और ब्राह्मण के भेद से वेद का दो प्रकार है। 'अहे बुध्निय मन्त्रं मे गोपाय' (तै० ब्रा० १।७।१) एवं 'एतद् ब्राह्मणान्येव पञ्च हवींषि' (तै० ब्रा० १।७।१) इत्यादि वेद वचनों के अनुसार तथा 'मन्त्रब्राह्मणयोर्वेदनामधेयम्' इस आपस्तम्ब वचन यज्ञ परिभाषा सूत्र के द्वारा भी इसका विवेचन किया गया है। इनमें मन्त्र का लक्षण 'तच्चोदकेषु मन्त्राख्या' इस सूत्र के द्वारा कहा गया है। इस सूत्र के भाष्य में तस्य = अभिधानस्य चोदकेषु इस प्रकार षष्ठी समास का विग्रह प्रदर्शित किया गया है। वार्तिककार ने इस प्रसङ्ग में कहा है कि जिज्ञासा सूत्र में प्रदर्शित भाष्य धर्माय जिज्ञासा के अनुसार ही इस स्थल में भी समास का निरूपक वाक्य नहीं है अपितु अर्थ प्रदर्शन के लिए ही—यह विग्रह वाक्य प्रदर्शित किया गया है। प्रकृत पक्ष में इस सूत्र में तत् = 'अभिधानम्, चोदकं येषाम्', इस बहुव्रीहि समास का विग्रह प्रदर्शित करना होगा, जो अभिधान का अर्थात् अनुष्ठेय पदार्थ के प्रकाश का = स्मरण का हेतु है, उसी का नाम मन्त्र है।

आचार्य ने मन्त्र का लक्षण निरूपण करते हुए लिखा है कि वृत्तिकार का मत लिखा है वेद-वाक्य के शेष में जहाँ 'असि' या 'त्वा' शब्द है—वे मन्त्र हैं। जैसे 'मेधोऽसि', 'इषे त्वा' इत्यादि। जिसके मध्य में आशीः आशंसा = प्रार्थना आदि रहता है—वे ही मन्त्र हैं जैसे—'आयुर्दा असि' इत्यादि के द्वारा स्तुति कही जाती है—वे ही मन्त्र हैं। जैसे 'अग्निमूर्द्धा'। जिसके मध्य में संख्या प्रकाशित होता है। वे ही मन्त्र हैं, जैसे—'अक्षी ते इन्द्र पिङ्गले दुलेरिव'। 'परिदेवित' = विलाप सूचक 'अम्बे अम्बिके अम्बालिके' इत्यादि वाक्य भी मन्त्र है, जो 'प्रैष' = नियोग के बोधक वाक्य भी मन्त्र हैं, जैसे—'अग्नीदग्नीन् विहर' इत्यादि। 'अन्वेषण' = अनुसन्धान बोधक वाक्य भी मन्त्र है, जैसे —'कोऽसि कतमोऽसि' इत्यादि। पृष्ट = प्रश्नसूचक वाक्य भी मन्त्र हैं; जैसे—'पृच्छामि त्वा परमन्तं पृथिव्याः'। आख्यान = उपाख्यान सूचक वाक्य भी मन्त्र हैं; जैसे—'इयं वेदिः पृथिवी' इत्यादि। अनुषङ्ग = अन्य के पीछे सम्बद्ध होने वाला वेद-वाक्य भी मन्त्र हैं; यथा—'अच्छिद्रेण पवित्रेण' इत्यादि। प्रयोगबोधक वाक्य भी मन्त्र है, यथा 'त्रैस्वर्यं चातुः स्वर्यम्' इत्यादि। इसी प्रकार सामर्थ्यबोधक = अभिधानशक्तिसम्पन्न अर्थात् अनुष्ठेय पदार्थ स्मरणकारक भी मन्त्र कहे जाते हैं।

वृत्तौ लक्षणमेतेषामस्यन्तत्वान्तरूपता ।
आशिषः स्तुतिसंख्ये च प्रलप्तं परिदेवितम् ॥
प्रैषान्वेषणपृष्टाख्यानानुषङ्गप्रयोगिताः ।
सामर्थ्यं चेति मन्त्राणां विस्तरं प्रायिको मतः ॥

महामहोपाध्याय डॉक्टर योगेन्द्रनाथ बागची ने मन्त्र और ब्राह्मण की व्याख्या करते हुए लिखा है, वेद के मन्त्रभाग ही ब्राह्मणभाग में व्याख्यात हैं, अतः वेद के ब्राह्मणभाग को वेद के मन्त्रभाग की व्याख्या कही गई है। वेद के मन्त्रभाग में ही मन्त्र शब्द का पुनः पुनः प्रयोग मिलता है, जैसे—ऋक्संहिता के प्रथम अष्टक में "मन्त्रं मनसा वनोषितम्" (ऋ० सं० १।२।३४।१३), "मन्त्रं वदत्युक्थ्यम्" (ऋ० सं० १।३।२०।५। "हृदा यत्तष्टान् मन्त्रं अशंसन्" (ऋ० सं० १।५।११।४) "मन्त्रं वोचेमाग्नये" (ऋ० सं० १।५।२१।१), "आनोमन्त्रं सरथे होपयातम्" (ऋ० सं० ८।६।२।११), ऋक्संहिता में प्रदर्शित मन्त्रों में मन्त्र शब्द का उल्लेख है, इस प्रकार प्रत्येक वेद के मन्त्रभाग में मन्त्रशब्द का पुनः पुनः उल्लेख देखा जाता है। "अहे बुध्निय मन्त्रं मे गोपाय" (तै० ब्रा० १।२।१) इस वाक्य को भाष्यकार शबरस्वामी ने उद्धृत किया है। इस प्रसङ्ग में प्रयुक्त मन्त्र शब्द का क्या अर्थ है वेदमन्त्रों में पुनः पुनः प्रयुक्त मन्त्र शब्द का अर्थ निर्द्धारण करने के लिए ही भगवान् जैमिनि ने "तच्चोदकेषु मन्त्राख्या" यह सूत्र लिखा है। इस सूत्र में शबर स्वामी ने मन्त्र का अनेक लक्षण लिखकर अन्त में कहा है 'वेदसम्प्रदायरक्षक अभियुक्तगण वेद के जिस अंश को मन्त्र कहकर स्मरण करते हैं, व्यवहार करते हैं, मन्त्र कहकर अध्ययन एवं अध्यापन करते हैं—वे ही मन्त्र हैं'। "अभिधानस्य चोदकेषु एवं जातीयकेषु अभियुक्ता उपदिशन्ति मन्त्रान् अधीमहे मन्त्रान् अध्यापयामः मन्त्रा वर्तन्त इ ।" इसकी व्याख्या में वार्त्तिककार ने कहा है—"अध्येतृवृद्धव्यवहारसिद्धं चेदम् ।" आशय यह है कि शब्दों के अर्थनिरूपण में शिष्टों का व्यवहार ही प्रमाण है। 'घट' शब्द का क्या अर्थ है, 'पट' शब्द का क्या अर्थ है, यह शिष्टगणों के व्यवहार के द्वारा ही अवधारण होता है, वेदसम्प्रदायरक्षक वैदिक या याज्ञिक जिसको मन्त्र कहकर व्यवहार करते हैं, वही मन्त्र शब्द का अर्थ है। जो जिस विषय में अभियुक्त रहता है—उसीकी उक्ति या व्यवहार उसमें प्रमाण होता है। इसलिये वेदसम्प्रदायरक्षक वैदिक और याज्ञिकों को छोड़कर अन्य के द्वारा वेद के अन्तर्गत मन्त्र का अर्थ निरूपित नहीं किया जा सकता है।

निर्दिष्ट मन्त्र के लक्षण प्रायिक ही हैं, प्रायः ऐसे वाक्य को मन्त्र कहा जाता है, इसका व्यतिक्रम देखने को मिलता है, अतः अभियुक्त = शिष्ट = सम्प्रदायरक्षकों के द्वारा वेद के जिन अंशों को मन्त्र के रूप में स्मरण किया जाय, वे ही मन्त्र हैं।

"तच्चोदकेषु" = वह अर्थात् अभिधान = अनुष्ठेय पदार्थ का प्रकाश, चोदक अर्थात् प्रयोजक जिसकी इन सभी वाक्यों में "मन्त्राख्या" = मन्त्र यह आख्या अर्थात् नाम, वे सभी वेद-वाक्य अभिधान के द्वारा अर्थात् अनुष्ठेय पदार्थ के प्रकाशन के द्वारा प्रयुक्त होते हैं अर्थात् अनुष्ठेय पदार्थ के लिए जिनका प्रयोग होता है—उनका ही नाम मन्त्र है ॥ ३२ ॥

॥ छठा मन्त्र का अभिधायकत्वाधिकरण ॥

अथाऽष्टमं ब्राह्मणलक्षणाधिकरणम्

[८] शेषे ब्राह्मणशब्दः ॥ ३३ ॥ सि० ॥

शा० भा०—अथ किं लक्षणं ब्राह्मणम्? मन्त्राश्च ब्राह्मणं च वेदः। तत्र मन्त्रलक्षण उक्ते परिशेषसिद्धत्वाद् ब्राह्मणलक्षणवचनीयम्। मन्त्रलक्षणवचनेनैव सिद्धम्। यस्यैतल्लक्षणं न भवति, तद् ब्राह्मणमिति, परिशेष[1]सिद्धं ब्राह्मणम्।

वृत्तिकारस्तु शिष्यहितार्थं प्रपञ्चितवान्—इतिकरणबहुलम्। इत्याहोपनिबद्धमाख्यायिकास्वरूपम्। हेतुः, 'शूर्पेण जुहोति, तेन ह्यन्नं क्रियते' इति। निर्वचनम्, 'तद्दध्नो दधित्वम्'। निन्दा, 'उपवीता वा एतस्याग्नयः'। प्रशंसा, 'वायुर्वै क्षेपिष्ठा देवता' इति। संशयः, 'होतव्यं गार्हपत्ये न होतव्यम्' इति। विधिः, यजमानसंमितौदुम्बरी भवति। परकृतिः, माषान्मे[2] पचत इति। पुराकल्पः, उल्लुकैर्ह स्म पूर्वे समाजग्मुः, इति। व्यवधारणकल्पना, यावतोऽश्वान् छ प्रतिगृह्णीयाद् इति।

'हेतुर्निर्वचनं निन्दा प्रशंसा संशयो विधिः।
परक्रिया पुराकल्पो व्यवधारणकल्पना॥
उपमानं दशैते तु विधयो ब्राह्मणस्य तु।
एतत्स्यात्सर्ववेदेषु नियतं विधिलक्षणम्' ॥ इति।

एतदपि प्रायिकम्।

इतिकरणबहुलो मन्त्रोऽपि कश्चित् 'इति वा इति मे मन' इति। इत्याहोपनिबद्धश्च, 'भर्गं भक्षीत्याह'। वाख्यायिकास्वरूपं च, 'उग्रो = ह भुज्यमि'ति हेतुः, 'इन्दवो[3] वामुशन्ति हि' इति। निर्वचनम्, तस्मादापो नु स्थ न[4]' इति। निन्दा, 'मोघमन्नं विदन्ते अप्रचेता' इति। प्रशंसा 'अग्निर्मूर्धा' = इति। संशयः, 'अधः स्विदासीदुपरि स्विदासीद' इति। विधिः, 'पृणीयादिन्नाधमानात्[5]' इति। परकृतिः, 'सहस्रमयुताददत्' इति। पुराकल्पः, यज्ञेन यज्ञमयजन्त देवो इति ॥ ३३ ॥ ब्राह्मणलक्षणाधिकरणम् ॥ ८ ॥

---

१. ब. परिशिष्ट ब्राह्मणम्। २. ब. माषानेव मह्यं पचतीति।
३. क. इदं वो। ४. क. ना इति। ५. ब. क नाधामानायेति।

भा० वि०—'यदि वेदप्रयुक्तमन्त्रपदार्थज्ञानार्थं मन्त्रलक्षणमुक्तं तर्ह्येतद्ब्राह्मणकानि पञ्च हवींषि भवन्ति यद्ब्राह्मणकानीतराणि' इत्यादि वेदप्रयुक्तस्य ब्राह्मणशब्दार्थस्यार्थज्ञानार्थं तस्यापि लक्षणं वक्तव्यमित्याशङ्कयाह—**अथेति**। तल्लक्षणस्यावक्तव्यत्वं वक्तुं वेदद्वैराश्यमाह—**मन्त्राश्चेति**। ततः किं तत्राह—**तत्रेति**। परिशेषसिद्धिमुपपादयति—**मन्त्रलक्षणेति**।

ननु ब्राह्मणलक्षणस्यावचनीयत्वे किमिति वृत्तिकारेणेति करणबाहुल्यादिलक्षणमुक्तमित्याशङ्कयाह—**वृत्तिकारस्त्विति**। एकपुरुषकर्तृकमुपाख्यानं बहुकर्तृकं पुराकल्पः अन्यथा प्रतिभातस्यार्थस्य पूर्वापरालोचनेन विविच्यावधार्यान्यथाकल्पना व्यवधारणकल्पना विधिलक्षणमिति विधिशब्दो ब्राह्मणविषयः एतद्द्वादशकं सर्वत्रवेदे ब्राह्मणलक्षणमित्यर्थः। इदमपि लक्षणं न संभवतीत्याह—**एतदपीति**। तत्रातिव्याप्तिं हेतुमाह—**इतिकरणबहुलोऽपीत्यादिना** ॥ ३२ ॥

त० वा०—**परिशेषसिद्धत्वाद् ब्राह्मणलक्षणमवचनीयमिति**। अत्र दुरुक्तचिन्ता करणं क्रियते वार्त्तिके सूत्रमिदनारभ्यमिति प्रतिभाति। तत्र शेषशब्दप्रयोगाल्लक्षणानभिधानाच्च सूत्रव्याख्यानमेवेदमिति द्रष्टव्यम्।

किमर्थं पुनः सूत्रमारभ्यते ? नाऽऽरभ्येत, यदि मन्त्रब्राह्मणात्मक एव वेद इति सर्वेषां प्रसिद्धं भवेत्। येषां त्वप्रसिद्धं, तेषां तृतीयादिप्रकारनिराकरणार्थं द्वैराश्यमेव वेदस्येति प्रतिपादयितुमाह—**'शेषे ब्राह्मणशब्द'** इति। एकपुरुषकर्तृकमुपाख्यानं परकृतिः। बहुकर्तृकं पुराकल्पः। याऽत्राऽन्यथाऽर्थः प्रतिभातः पौर्वापर्यालोचनेन व्यवधार्याऽन्यथा कल्प्यते, सा व्यवधारणकल्पना। तद्यथा प्रतिगृह्णीयादिति श्रुतं प्रतिग्राहयेदिति कल्पयिष्यते। विधिलक्षणमित्यत्र ब्राह्मणवाची विधिशब्दः ॥ ३२ ॥

(इति अष्टमं ब्राह्मणलक्षणाधिकरणम् ॥ ८ ॥)

अथ अष्टमं ब्राह्मणलक्षणाधिकरणम् ॥ ८ ॥

न्या० सु०—यदि वेदप्रयुक्तमन्त्रशब्दार्थज्ञानार्थं मन्त्रलक्षणमुक्तम्, तर्हि 'एतद् ब्राह्मण'कान्येव पञ्चहवींषि भवन्ति यद्ब्राह्मणकानीतराणीत्यादौ वेदप्रयुक्तब्राह्मणशब्दार्थज्ञानार्थं ब्राह्मस्यापि लक्षणं वक्तव्यमित्यथेति भाष्येण पूर्वप्रकृतापेक्षित्ववाच्यथशब्दयुक्तेनाशङ्क्य, तन्निरासार्थत्वेन सूत्रव्याख्यानार्थं 'मन्त्राश्चेति भाष्यमिति वक्तुं सूत्रस्य मन्त्रव्यतिरिक्तरूपब्राह्मणलक्षणाभिधानार्थत्वप्रतीतेः। सूत्रदूषणार्थमिति शङ्कामुपन्यासपूर्वकमुपन्यस्यति—**परिशेषेति**। सूत्रे शेषशब्दप्रयोगात्परिशेषशब्देन तद्व्याख्याप्रतीतेः तद्भाष्यं लक्षणावक्तव्यत्वाभिधानार्थत्वेन सूत्रस्य व्याख्यानमेवेत्युक्ते, ननु शेषशब्देन मन्त्रव्यतिरिक्तत्वरूपलक्षणाभिधानान्न लक्षणावक्तव्यत्वं सूत्रेणोक्तमित्याशङ्क्य—

लक्षणेत्युक्तम्। मन्त्रव्यतिरिक्तत्वमात्रस्याब्राह्मणेऽपि भावान्मन्त्रव्यतिरिक्तवेदत्वं लक्षणं वाच्यम्। तच्च द्विविध एव वेद इति जानताऽनुक्तस्यापि ज्ञातुं शक्यत्वादजानता तूक्तेऽपि लक्षणे कल्पादेरपि मन्त्रव्यतिरिक्तत्वेन कतमत् ब्राह्मणमिति ज्ञातुमशक्यत्वादव्याच्यमित्याशयः।

ननु लक्षणपरत्वाभावे सूत्रानर्थक्यं स्यादिति शङ्कते—**किमर्थं पुनरिति**। तृतीयप्रकारनिरासार्थत्वेनानर्थक्यं परिहृति—**नेति**। ननु ब्राह्मणलक्षणस्यावचनीयत्वे किमिति कारणेतिकरणबाहुल्यादिलक्षणमुक्तमित्याशङ्कानिरासार्थे वृत्तिकारस्त्वित्यादिभाष्ये 'यदेनमधिनोत्तद्दध्नो दधित्वमिति यस्मात्सान्नाय्यमिन्द्रमधिनोत्तस्मात्तद्धीति धिनोतेः प्रीतिकर्मणो दधिशब्दनिर्वचनम्। उपवीता वा एतस्याग्नयो, यत् ब्रह्मा समानि गायतीति सामगाने विलम्बेनाग्निविगमापत्तेर्निन्द्रां प्रशंसादीनि चावयवव्युत्पत्त्यादिरूपेण प्रसिद्धत्वादव्याख्याय, परकृत्यादिशब्दाद व्याचष्टे—**एकेति**। एकः कर्त्ता यस्मिन्नुपाख्याने विषय इति समासार्थः। बहुकर्तृकमित्यत्राप्येवम्। ब्राह्मणलक्षणस्य विवक्षितत्वाद्विधिशब्दानुपपत्तिमाशङ्क्य व्याचष्टे—**विधीति**। इतिकरणबाहुल्यादीनां द्वादशानां मध्ये सत्यं ज्ञानमनन्तं ब्रह्मेत्यादौ कस्य चिदभावादव्यापकत्वेनालक्षणत्वाभिधानार्थमेतदपीति भाष्यमितिकरणेत्यादिचातिव्याप्त्यभिधानार्थं स्पष्टत्वान्न व्याख्यातम्।

तुग्रो ह भुज्युमश्विनोदमेघे रयिन्न कश्चिन्ममृवाँ अवाहाः।
तमूहथुर्नौभि रात्मन्वतीभिरन्तरिक्षद्भिरपोदकाभिः॥

इत्यस्यैवमाख्यायिकासरूपत्वम्। हे अश्विनौ तुग्रो नाम कश्चिद्राजा भुज्युनामनं स्वपुत्रमुदमेघे समुद्रे आवाहाः वाहयामास इति तिङा तिङां भवन्तीति प्रथमपुरुषार्थमध्यमः प्रसिद्धिद्योतनार्थो हकारः। नकारस्योपमार्थत्वाद्यथा कश्चिन्मृवानासन्नमरणो रयिं धनं समुद्रे वाहयतीति दृष्टान्तः। तं भुज्युमात्मन्वतीभिः दृढाभिरन्तरिक्षप्रुद्भिराकाशगामिनीभिरपोदकाभिर्निजलाभिर्नौभिर्युवामूहथुः समुद्रादुत्तरयामासथुरिति। इन्द्रवायू इमे सुता उपप्रयोभिरागतमिति पूर्वार्द्धर्चेण हे इन्द्रवायू इमे सोमा अभिषुनाः तानत्तु प्रयोभिरन्नैर्यजमानाय देयैः सह युवामागतमित्युक्ते यस्मादिन्दवो वां युवामुशन्तीच्छन्तीतिहेतुः यत्प्रेषिता वरुणेन ताः शीभं समबला तत्तद्दाप्नोदीन्द्रो वोयतीस्तस्मादापो अनुष्टुनेति हे आपो यस्मात्ता यूयं वरुणेन प्रेषिताः सत्यः शीभं स्वाच्छन्द्यं समबला तव लानमकुर्वतः तच्च यतीः कुर्वतीर्वो युष्मानिन्द्र आप्नोत्तस्मादापः स्थ न भवथेत्यन्वर्थसंज्ञात्वद्योतनार्थानुशब्दयोगादनिर्वचनमिति ज्ञातुं शक्यत्वान्न निर्वचनमित्युक्तम्।

मोघमन्नं विन्दते अप्रचेताः सत्यं ब्रवीमि वधइत् स तस्य।
नार्यमणं पुष्यति नो सखायं केवलाद्यो भवति केवलादि॥

इत्येव निन्दा यः केवलम् एकाक्यत्ति, न स्वर्यमशब्दोपलक्षितं देवगुणम्, सखायं च मनुष्यगणं पोषयति, स मन्दप्रज्ञो निष्फलमन्नं लभते, न तस्यान्नं फलदं भवति, प्रत्युत चोराद्युपद्रवहेतुत्वाद्वधाकार्येव भवति, केवलपापश्च सम्भवति, सत्यमेतद् ब्रवीमीति । 'अग्निर्मूधा दिव' इति द्यूमूर्द्धत्वादिगुणकीर्त्तनात्प्रशंसा । तिरश्चीनो विततो रश्मिरेषाम्, एधः स्विदासीदुपरिस्विदासीदि'त्येषां कवयो मनषेति पूर्वस्यामृचि निर्दिष्टानां कवीनां रश्मिः तिरश्चीनो विततः किमध आसीदुतोपरीति स्विच्छब्दयोगात् प्लुत्या च संशयः । पृणीयादिन्नाधमानायतव्यानिति भोज्यान्पदर्थान्याचमानाय दद्यादिति विधिः ।

चित्र इद्राजा राजका इदन्यकेत्यकेसरस्वतीमनुपर्जन्य इव ततनद्धि वृष्टया सहस्रमयुता ददिति ।

हे राजकाश्चित्रो नाम राज सरस्वतीदेशेऽन्यस्मिंश्च यस्मिन्कस्मिश्चित्पुण्यदेशे सहस्रं गवामयुतानि दत्तवानित्येकचरितोपाख्यानं परकृतिः । यज्ञेन-ज्योतिष्टोमादिना विष्णुर्वै यज्ञ इति श्रुतिः । यज्ञं-विष्णुमयजन्त देवा इति, बहुचरितोपाख्यानं पुराकल्पः ॥ ३३ ॥

इत्यष्टमं ब्राह्मणलक्षणाधिकरणम्

भा० प्र०—पूर्वसूत्र के द्वारा वेद के मन्त्र का लक्षण निर्दिष्ट किया गया है, प्रसङ्ग प्राप्त ब्राह्मण का लक्षण प्रदर्शित करते हुए आचार्य जैमिनि ने लिखा है—"शेषे ब्राह्मणशब्दः" मन्त्र से अतिरिक्त वेदभाग का नाम ब्राह्मण है। भाष्यकार ने वृत्तिकार के मत के अनुसार ब्राह्मण के परिचय के लिए मन्त्र से अतिरिक्त कतिपय वेदभागों का उल्लेख किया है, जैसे—हेतुसूचक वेदवाक्य, जैसे—"शूर्पेण जुहोति" "तेन ह्यन्नं क्रियते" इत्यादि । निर्वचनबोधक वेदभाग, जैसे—"तद्दध्नो दधित्वम्" इत्यादि । निन्दासूचक वेदभाग, यथा—"अमेध्यो वै मायाः" इत्यादि । प्रशंसाज्ञापक वेदवाक्य, यथा—वायुर्वै क्षेपिष्ठा देवता" इत्यादि । संशयसूचक वेदवाक्य, यथा—"होतव्यं गार्हपत्ये न होतव्यम्", "तद् व्यचिकित्सज् जुह्वानि", 'माहौषम्' इत्यादि । विधिबोधक वेदभाग, यथा—"यजमानेन सम्मितौदुम्बरी" इत्यादि । 'परक्रिया' = परकृति, यथा—"मासान् मे पचते" इत्यादि । पुराकल्पनिर्देशकभाग, यथाः—'उन्मूलकैर्ह स्म समाजग्मुः', 'पुरा ब्राह्मणा अभैषुः' इत्यादि । जो उपाख्यान एक पुरुष कर्तृक होता है, उसका नाम परकृति है, और जो उपाख्यान बहुकर्तृक होता है उसका पुराकल्प है। जहाँ अन्यथा प्रतीयमान अर्थ को उपक्रम आदि के कारण अन्य रूप में परिणत किया। जाता है, उसमें उस अर्थान्यथाकरण को व्यवधारण कल्पना कहा जाता है। जैसे—'यावतः अश्वान् प्रतिगृह्णीयात्' इस श्रुति-वाक्य का 'प्रतिगृह्णीयात्' इस अनिजन्त पद को 'प्रतिग्राहयेत्' इस रूप में निजन्त में परिणत किया जाता है। 'व्यवधारणकल्पना' ज्ञापक वेदभाग, यथाः—'यवतोऽश्वान् प्रतिगृह्णीयात्' इत्यादि । भाष्यकार ने इसे श्लोक में निबद्ध करते हुए लिखा है कि—

हेतुर्निर्वचनं निन्दा प्रशंसा संशयोविधिः ।
परक्रिया पुराकल्पो व्यवधारण-कल्पना ॥
उपमानं दशैते तु विषयो ब्राह्मणस्य तु ।
एतत् स्यात् सर्ववेदेषु नियतं विधिलक्षणम् ॥

इस पद्य के द्वारा हेतु आदि के बोधक वेदभाग को ब्राह्म कहा गया है । वस्तुतः यह भी ब्राह्मण का अव्यभिचारी लक्षण नहीं है । किन्तु, इन अर्थों से युक्त वेदभाग प्रायः ब्राह्मण कहे जाते हैं । बुद्धिवैशद्य के लिए ही इस प्रकार मन्त्र और ब्राह्मण का परिचय दिया जाता है । शिष्टगण या याज्ञिक परिवार सम्प्रदाय की परम्परा में जिसे मन्त्र माना है, एवं उस क्रम में अध्ययन तथा अध्यापन करते हैं, वे मन्त्र हैं और उससे अतिरिक्त वेदभाग ब्राह्मण है इस प्रसङ्ग में यह कहना उचित होगा कि वेद का मन्त्र एवं ब्राह्मण से अतिरिक्त कोई भाग नहीं है । इसीलिए 'शेषे ब्राह्मणशब्दः' यह कहा गया है । मन्त्र का लक्षण निर्दिष्ट कर उससे अवशिष्ट वेदभाग ब्राह्मण है—यह ब्राह्मण का लक्षण न किया जाय तब भी अवगत हो सकता है अतः, ब्राह्मण के लक्षण का निर्देशक सूत्र व्यर्थ न हो जाय, इसलिए वार्तिककार ने इस प्रकार प्रयोजन प्रतिपादित किया है ।

'शेषे' = मन्त्रातिरिक्त वेद भाग में, 'ब्राह्मणशब्दः' = 'ब्राह्मण' इस शब्द का प्रयोग होता है । मन्त्र से अतिरिक्त वेदभाग का नाम ब्राह्मण है ॥ ३३ ॥

इति ब्राह्मणलक्षणाधिकरण

अथ नवमम् ऊहादीनाममन्त्राधिकरणम्

[९] अनाम्नातेष्वमन्त्रत्वमाम्नातेषु हि विभागः ॥३४॥ सि०॥

शा० भा०—ऊह-प्रवर-नामधेयेषु संशयः—मन्त्रा, उत नेति । अभिधायकत्वान्मन्त्रा इति प्राप्ते ।

ब्रूमः । अनाम्नातेषु मन्त्रत्वं न स्यादभिधायकेष्वपि । नाभिधायकत्वं मन्त्रत्वे हेतुः । किं तर्हि ? अभियुक्तप्रयोगः । येऽभियुक्तैर्मन्त्रा इति नोच्यन्ते, न ते मन्त्राः ।

नचैवमादयो मन्त्रसमाम्नाये सन्ति । तस्मादमन्त्राः । प्रयोजनं मन्त्रे भ्रष्टे यत्प्रायश्चित्तम्, अमन्त्रेषु तन्न ॥ ३४ ॥

इति नवमम् ऊहाद्यमन्त्रताधिकरणम् ॥ ९ ॥

भा० वि०—वेदस्य द्वैराश्यनियमे सत्यूहादेरप्यनुमानादिगम्यवेदत्वाभ्युपगमात् विधिप्रयोजनत्वाभावेन च ब्राह्मणत्वाभावान्मन्त्रत्वप्राप्तौ पठ्यमानवेदविषयत्वं

द्वैराश्यस्य वक्तुमिदमधिकरणमिति सङ्गतिः। विषयसंशयावाह—**ऊहेति**। प्राकृतपदस्थले पदान्तरप्रयोगो विकृतप्रयोगत्वादूहः। यत्र वाक्ये काश्यपावत्सारनैध्रुवेत्यादावार्षेयं कीर्त्यते स प्रवरः यत्र च सु ब्रह्मण्यादौ यजमानतत्पित्रादीनां नामग्रहणं तन्नामेत्युच्यत इति विभागः। अभिधायकत्वादध्येतृप्रसिध्यभावाच्च संशयः। तच्चोदकेष्विति लक्षणेन पूर्वपक्षयित्वा सिद्धान्तसूत्रमवतार्य व्याचष्टे—**अभिधायकत्वादित्यादिना**। कथं तर्ह्यभिधायकत्वस्य मन्त्रलक्षणत्वमुक्तं प्रयोगोपलक्षणत्वादित्याह—**नाभिधायकत्वमिति**। न चोहादिषु मन्त्रत्वप्रसिद्धिरित्याह—**न चेति**। विचारप्रयोजनमाह—**प्रयोजनमिति** ॥ ३४ ॥

त० वा०—'सूर्याय जुष्टं निर्वपामि', इत्यूहः। तथा यत्र यजमानस्याऽऽर्षेयं व्रियते सप्रवरः। यच्च यजमानतत्पुत्रादीनां नामग्रहणं तन्नामधेयम्। यथा सुब्रह्मण्यायां देवदत्तो यजत इत्यादि। तेषामपि 'तच्चोदकेषु' इत्यस्माल्लक्षणान्मन्त्रमध्यपाताच्च मन्त्रत्वप्राप्तौ।

उच्यते—

स्वाध्याये पठ्यमानेषु येषु मन्त्रपदं स्मृतम्।
ते मन्त्रा नाभिधानं हि मन्त्राणां लक्षणं स्थितम् ॥

शंका-समाधाने

किं पुनरेकस्मिन्पद ऊह्यमाने समस्तस्यैवामन्त्रत्वम्, ऊहितपदमात्रस्यैव वेति। समस्तस्यैवेति प्राप्तम्।

कुतः ?

स्वरवर्णानुपूर्व्यादिविशिष्टे हि प्रयुज्यते।
मन्त्रशब्दस्ततोऽन्यत्वे न तस्यार्थः प्रतीयते ॥

संप्रदायकालावगतरूपान्यत्वं चेत्केनचिदप्यंशेनजातम्, न शक्यते मन्त्रत्वं प्रत्यभिज्ञातुम्। अथैकदेशेऽपि तत्सद्भावाभ्युपगमः, ततः सर्वत्रैव मन्त्रपदाविशेषान्मन्त्रत्वप्रसङ्गः। तस्मादेकवर्णापायेऽपि मन्त्रत्वाभावात्समस्ततत्कार्यानिवृत्तिः। ततश्च यथैव तद्विनाशे सर्वावयववर्तिनि प्रायश्चित्ताभावः, एवं मन्त्रच्छन्दोविषयत्वेन यावन्तः शब्दविशेषाः स्मर्यन्ते, तैर्न भवितव्यमित्येकपदतदवयवोहे तन्मन्त्रगतसर्वच्छान्दसोपोद्धारेण लौकिकशब्दप्रयोगः कर्तव्य इति।

सिद्धान्तः

अत्र ब्रूमः। तावन्मात्रमेवाऽमन्त्र इति।

कुतः ?

आकृतीनामभिव्यक्तिर्या कथंचिन्निरूपिता।
नासाववयवाधिक्यविनाशेषु विनश्यति ॥

न हि गोर्गडुनि जाते, विषाणे वा भग्ने, गोत्वं तिरोधीयते, तदभिव्यक्तिसमर्थावयवान्तरसद्भावात्। कियत्यपि संस्थाने ध्रियमाणे सर्वा विज्ञायन्ते। सा चेयं मन्त्राकृतिर्विशिष्टस्वरवर्णानुपूर्व्याद्यभिव्यक्ता न किंचिद्विकारदर्शने नश्यतीति प्रत्यक्षमुपलभामहे।

तथा हि—

यत्र वर्णविकारो वा वर्णलोपोऽपि वा स्मृतः।
स्वरान्तरनियोगो वा न मन्त्रस्तत्र नेष्यते॥

यत्र वचनाद्वर्णलोपम्, विकारं वा कृत्वा प्रयोगः 'ऐरं कृत्वोद्गेयम्' इत्यादौ, यत्र च स्वाध्यायकालदृष्टत्रैस्वर्यादिपरित्यागेनैकश्रुत्यं नियुज्यते। न तत्र कस्यचिन्मन्त्रबुद्धिरपैति।

स्यादेतत्—वचनसामर्थ्यादिह नापैतीति। तदयुक्तम्। वचनेन हि प्रयोक्तव्यमेतदुच्यते न मन्त्रत्वं न नश्यतीति न हि वचनविनियुक्तानां व्रीह्यादीनां मन्त्रत्वं भवति, अतश्चामन्त्राणामेव सतां वचनाद्विनियोग इत्यापद्यते।

न चार्हति भवितुममन्त्रत्वं मन्त्रत्वप्रत्याभिज्ञानात्। अतश्चात्रापि कामभिरापदादीनामेवामन्त्रत्वं भवतु न सकलस्य वाक्यस्य। न च तेषामपि समस्तवेदालोचनेन मन्त्रत्वनिरूपणादिह गिरापदवान्मन्त्रः, इहेरापदवान्, इह त्रैस्वर्यवानिहैकश्रुतिमानिति ह्यादित एवावधार्यते। यद्येवमूहादीनामपि मन्त्रत्वप्रसङ्गः। तत्रापि हि प्रकृतिविकृत्यालोचनेन शक्यमेवं निरूपयितुम्। इहाग्निपदवान्निर्वापमन्त्रः, इह सूर्यादिपदवानीति।

नैतत्सारम्[1]।

कुतः?

यत्र वैदिकमन्यत्वं तत्र मन्त्रत्वमिष्यते।
न्यायेन कल्प्यमाने तु न शक्यं तन्निरूपणम्॥

वैदिकं ह्यालोच्चैवमवधारणा भवति इहेदृशो मन्त्रः इहेदृश इति। सूर्यादिपदप्रयोगस्तु कार्यवशेन न्यायात्कल्प्यते। न च मन्त्रत्वं न्यायगम्यमिति वैषम्यम्।

ऊहविषये आक्षेपसमाधाने

ननु चातिदेशोऽपि वेदप्रकार एवेति सर्वमूहादिकं वैदिकम्, इतरथा ह्यप्रमाणकमेव स्यात्। न ह्यङ्गाङ्गिभावः प्रत्यक्षानुमानादिगम्यः। तस्मात्सूर्येरापदयोरविशेष इति।

---

१. क. (टिप्पण्यां) नैतत्समानम्।

अत्रोच्यते। सत्यमूहस्यापि नावैदिकत्वम्। अत एव 'अनाम्नातेष्वमन्त्रत्वम्' इत्युच्यते। वेदभागो हि कश्चित्प्रत्यक्षः श्रूयते, कश्चिदनुमानादिगम्यः। प्रत्यक्षश्रुतश्चाऽऽम्नात इत्युच्यते। तत्र यथेरापदादीनां विनियोगः श्रूयते। नैवं सूर्यपदादीनाम्।

ननु 'सौर्यं चरुम्' इत्येतदेव श्रुतिसमवायित्वाद्देवतायाः सूर्यपदस्य विनियोजकं श्रूयते। नैतन्मत्रे सूर्यपदस्य प्रक्षेपं ब्रवीति। हविषस्त्यागकालमात्रे तदुच्चारणाभिधानात्। यस्तु मन्त्रेषु तत्प्रक्षेपः, सोऽतिदेशकृतो भविष्यति। न चातिदेशवचनन्यायलभ्यत्वादेवाऽऽम्नायते। तस्मादनाम्नातविनियोजकत्वादमन्त्रत्वं सूर्यपदादीनाम्।

प्रवरनामधेयोराक्षेपपरिहारौ

नन्वेवं प्रवर-नामधेययोः प्रत्यक्षोपदेशान्मन्त्रत्वप्रसङ्गः। स्यादेवं यदि तत्स्वरूपमाम्नायेत्। वचनार्थं तु ज्ञात्वाऽनाम्नातयोरेव प्रवरनाम्नोः प्रयोगान्न मन्त्रत्वनिरूपणायामन्तर्गतिः। एवं तर्हि यत्रापि सर्वनामयुक्तमन्त्राम्नाने सति तस्य स्थानेऽन्यपदप्रक्षेपः क्रियते, तत्राप्यमन्त्रता स्यात्।

तथा नामेति केचित्। अथ वा विशेषाणामानन्त्यादयुगपत्कालत्वाच्चाऽऽम्नातुशक्तेः स्वरूपस्य सर्वनामप्रकारेणाऽऽम्नानमस्त्येवेत्यशून्यस्थानत्वान्मन्त्रस्य शक्यमेवं निरूपणं कर्तुम्। यदत्र पदं निवेक्ष्यते, तद्वानयं मन्त्र इति। इतरथा हि सर्वनाम्नामप्रयोगार्हत्वाद्यदि विशेषाम्नानमेवैतत्तेनोपायेनेति[1] न गृह्यते, ततस्तदंशन्यूनत्वान्मन्त्रस्वरूपस्य व्यर्थमेव सर्वनामाम्नानं स्यात्। प्रवरनामधेयवदेव तु विधानात्तदवकाशस्थपदप्रयोगः कल्प्यते। तस्मादेवमादीन्याम्नातान्येवेति मन्त्रधर्मैः संबध्येरन्। न तु प्रवरादीनां मन्त्रपाठकाले कश्चिदपि संस्पर्शः।

न च ब्राह्मणेन रूपं दर्शितम्, येन प्रवचनलक्षणत्वान्मन्त्रत्वाध्यवसानं भवेत्। अतश्च विकृतिष्वभिधानार्षचोदकाभ्यां सकले मन्त्रे प्रापिते यावन्मात्रमर्थाभावाद्व्यावर्त्याऽन्यत्प्रक्षिप्यते, तावन्मात्रमेव लौकिकम्। अवशिष्टं तु यथा प्राप्तमेव कृत्वाकाङ्क्षितप्रत्यभिज्ञायमानमन्त्रत्वं चेति न प्रायश्चित्तच्छान्दसप्रयोगैर्वर्जनीयमिति सिद्धम्॥ ३४॥

(इति नवमं ऊहादीनाममन्त्रताधिकरणम्॥ ९॥)

॥ अथ नवमम् ऊहाद्यमन्त्राधिकरणम्॥

न्या० सु०—वेदस्य द्वैराश्यनियमे सति ऊहादेरप्यनुमानादिगम्यवेदत्वाभ्युपगमात् विधिप्रयोजनत्वाभावेन च ब्राह्मणत्वाभावान्मन्त्रत्वप्रसङ्गे पठ्यमानवेदविषयत्वं

---

१ क. मेततत्तेनेति। (टिप्पण्यां)

द्वैराश्यनियमस्य वक्तुमेतदधिकरणमिति, ब्राह्मणलक्षणावक्तव्यत्वाभिधातव्यवधेरदोषत्वं स्पष्टत्वादनभिधायाधिकरणविषयं व्याचष्टे—**सूर्यायेति**।

प्राकृतस्थानपतितपदार्थान्तरकार्यगः ।
ऊहः प्रयोगो विकृतावूह्यमानतयोदित ॥

इत्यग्निपदस्थाने सूर्यपदप्रयोगस्य विकृतत्वादूहत्वम्। यत्र शब्दे काश्यपावत्सार-नैध्रुवेत्यादावार्षेयत्रयं कीर्त्यते, स प्रवरः। देवदत्तस्य पिता यजते इत्यादि यजमान-पुत्रादिनामग्रहणम्। सूक्तवाकादावाशास्तेऽयं यजमानोऽसावसावित्यादिसर्वनामयुक्त-मन्त्राम्नाने नामधेयस्य मन्त्रताया वक्ष्यमाणत्वात् सर्वनामस्थाने प्रक्षेप्य नामधेयव्या-वृत्त्यर्थम्—**यथेत्युक्तम्**। पूर्वपक्षसिद्धान्तौ यथाभाष्यं स्फुटत्वात् संक्षिपति—**तेषामपीति**। भाष्यानुक्तोऽपि मन्त्रमध्यपातो हेतुः सम्भवादुक्तः। मन्त्रमध्यपातस्य हेतुत्वशङ्कोत्प्रेक्षा-मात्रत्वादयुक्तेत्याशयः।

ऊहादिभ्रंशे मन्त्रभ्रंशनिमित्तप्रायश्चित्ताभाववदूहितपदवतो वाक्यस्य समस्तस्या-मन्त्रत्वात् मन्त्रनिमित्तशब्दविकाराभावोऽपि कस्मात् सिद्धान्तप्रयोजनत्वेन भाष्यकृता नोक्त इत्याशङ्कानिरासार्थम्, स्वयं चिन्तान्तरं प्रस्तौति—**किं पुनरिति**। पूर्वपक्षमाह—**समस्तस्येति**। श्लोकं व्याचष्टे—**सम्प्रदायेति**। मन्त्रैकदेशे मन्त्रत्वसद्भावाभ्युपगमेऽति-प्रसक्तिरित्याह—**अथेति**।

पूर्वपक्षप्रयोजनमाह—**तस्मादिति**। एतदेव प्रपञ्चयति—**अतश्चेति**। तस्योहवतो वाक्यस्य न केवलमूहितावयवमात्रवर्तिनि निमित्तांशे मन्त्रभ्रंशनिमित्तप्रायश्चित्ताभावः, किं तु सर्वावयववर्त्तिनीत्येकं तावत्प्रयोजनम्। मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विनित्या-दिना यावन्तः श्वेतवा दनुक्थशाः पुरोडा इत्यादयो मन्त्रविषयत्वेन हृग्रहोर्भः छन्दसी-त्यादीना चाम्नातवेदाख्यच्छन्दोविषयत्वेन आन्यं दिवो मातरिश्वा जभार इमामगृभ्णन्नि-त्यादयो यावन्तः शब्दविशेषाः स्मर्यन्ते तेषामभावाच्छ्वेतवाहउक्थशंसः पुरोडाशो जहार अगृह्णन्नित्यादिलौकिकप्रयोगः कार्य इति द्वितीयमिति, दृष्टान्तदार्ष्टान्तिकव्याजेन प्रयोजनद्वयमुक्तम्।

सिद्धान्तमाह—**अत्रेति**। ऋगादिजातिवन्मन्त्रजातेरप्यभावाद्वचनविशेषाभिप्रायो गोत्वनिदर्शनायाकृतिशब्दः। यथा द्वित्रिवृक्षोपजनापायेऽपि तदेवेदं वनमिति प्रत्य-भिज्ञानात् पूर्ववनाविनाशस्तथात्रापि स एवायं मन्त्र इति प्रत्यभिज्ञानान्मन्त्राविनाश इत्याशयः। श्लोकं व्याचष्टे—**न हीति**। प्रत्यक्षोपलम्भवे व्यवहारेण द्रढयति—**तथा हीति**। याज्यान्तप्लुतविधौ वर्णविकारः इरापदविधौ गिरापदलोपाद्वर्णलोपः। उदात्तानुदात्तस्वरितानामत्यन्तसन्निकर्षलक्षणैकश्रुत्यविधौ स्वरान्तरनियोगः।

श्लोकं व्याचष्टे—**यत्रेति**। न तु यथा व्योमन् ब्राह्मणास इत्यादिपदे वर्णलोपाग-मादिविधिना न्यूनाधिक्येऽपि पूर्वाविगतार्थाभिधानशक्त्यविघातावगमात्पूर्वपदाविनाशस्त-

थेहापीरादिविधिना मन्त्रस्य पूर्वावगतार्थतात्पर्याविघातावगमान्मन्त्रत्वाविनाश इत्याशयेनाशङ्कते—**स्यादिति**। एवं तर्ह्यूहादावपि पूर्वावगतकर्मसमवेतदेवताभिधानाद्यर्थत्वाविघातेनोहितपदवतोऽपि मन्त्रस्याविनाशापत्तिसाम्यादेतत्कारणत्वानुपपत्तेर्विहितत्वमात्रं मन्त्रत्वाविनाशकरणं वाच्यम्। तच्चामन्त्रेऽपि व्रीह्यादौ विहितत्वादकारणमित्याशयेन परिहरति—**तदिति**। अस्तु तर्हि इरापदादिमतो वाक्यस्यामन्त्रतेत्याशङ्क्याह—**न चेति**। एवं कतिपयवर्णपदान्यत्वेऽपि मन्त्रत्वाविनाशे स्थिते, प्रसङ्गादूहादिवैषम्येणेरापदादेर्मन्त्रत्वं वक्तुं पूर्वपक्षं दर्शयन्ननन्तरमुपसंहरत्यतश्चेति।

सिद्धान्तमाह—**न चेति**। गिरापदवन्मन्त्राम्नानमात्रालोचनेनेरापदस्यामन्त्रत्वप्रतिमानेऽपि इरापदविध्यालोचनान्मन्त्रत्वावधारणेति समस्तेत्यनेनोक्तम्। नन्वेवं सतीरापदेन गिरापदस्य बाधात् सामाम्नायावगतमन्त्रत्वं विरुध्येतेत्याशङ्कानिराससूचनायेह स्वाध्यायकाले गिरापदवान्मन्त्र, इह प्रयोगवेलायामिरापदवानित्युक्तम्। इह गिरापदं मन्त्रे इहेरापदमिति वाच्ये मन्त्रभ्रेषनिमित्तप्रायश्चित्तविषयत्वमात्रप्रदर्शनार्थं पदस्य मन्त्रतोक्ता। वस्तुतस्तु वाक्यस्यैव मन्त्रवत्त्वम्, न पदस्येति सूचयितुम्—**पदवानित्युक्तम्**।

नन्वमन्त्रस्यापि व्रीह्यादेर्विधिदर्शनात्तत्कथं विध्यालोचनान्मन्त्रत्वावधारणेत्याशङ्क्याह—**एवेत्युक्तम्**। विधेः प्राक् विधेयसमर्पणाम्नानवेलायामित्यर्थः। आम्नानेन मन्त्रत्वम्, न विधिमात्रेणेत्याशयः। परस्त्वैरमित्यनेनेरापदस्य स्वरूपेणाम्नानाभावादुच्चार्यत्वेन विधानमाम्नानं वाच्यम्। तच्चोहादेरप्यस्तीत्याशयेन साम्यमाह—**यद्येवमिति**। निष्कृष्टस्येरापदस्याम्नानाभावेऽपि तद्धितान्तपदान्तर्गतस्याम्नानमस्तीत्याशयेन सिद्धान्ती निरस्यति—**नेति**। वैदिकशब्देनाम्नानमभिप्रेतम्। श्लोकं व्याचष्टे—**वैदिकं हीति**।

ननु न्यायेनाप्युच्चार्यत्वेनैकल्पत्वादुच्चारणस्यैवाम्नानत्वादस्त्येवोहस्याम्नानमित्याशङ्कानिराससूचनार्थत्वेनोत्तरार्द्धं व्याख्यातुम्—**न चेत्युक्तम्**। परस्तु वेदप्रमेयत्वं वैदिकशब्देनोक्तमिति भ्रान्त्या पुनः साम्यमाशङ्कते—**ननु चेति**। सिद्धान्ती स्वाशयं प्रकटयति—**अत्रेति**। नन्विरापदस्याप्युच्चारणीयरूपेणाम्नानं नास्तीत्याशङ्क्योच्चारणीयनिष्कृष्टरूपानाम्नानेऽपि तद्धितान्तर्गताम्नानादूहादिवैषम्यमाह—**तत्रेति**। नन्वेवं सति सूर्यशब्दस्यापि तद्धितान्तपदान्तर्गतस्याम्नानमस्तीति, पुनः साम्यमाशङ्कते—**नन्विति**। उच्चारणीयत्वोपपादनाय—**श्रुतीत्युक्तम्**। सूर्यशब्देन देवतामुद्दिश्य हविस्त्यजेदित्युच्चार्यत्वेन विनियोगान्न व्रीह्यादितुल्यतेत्याशयः। मन्त्राख्यवाक्यावयवत्वेन पदस्य मन्त्रत्वान्मन्त्रावयवत्वेनाम्नानं मन्त्रत्वे हेतुः। न च तत्सूर्यादिपदेऽस्तीति परिहरति—**नेति**। एतदेवोपसंहरति—**तस्मादिति**। मन्त्रावयवत्वेन सूर्यादिपदानां विनियोजकानाम्नानान्मन्त्रावयवत्वेनाम्नानं नास्तीत्यमन्त्रतेत्यर्थः।

नन्वेवं सत्यग्ने महाँ असि ब्राह्मण भारतेत्यादिमन्त्रावयवत्वेन प्रवरविध्याम्नानात् सुब्रह्मण्या निगदावयवत्वेन च नामविध्याम्नानयोर्मन्त्रत्वं स्यादित्याशङ्कते—**नन्विति**।

मन्त्रत्वहेतुं स्वरूपाम्नानसिद्ध्यैतद्विध्याम्नानस्योक्तत्वात् स्वरूपाम्नानरहितं विध्याम्नानं न हि मन्त्रत्वहेतुरित्याशयेन परिहरति—**स्यादिति**। नन्वेवं सत्याशास्तेऽयं यजमानोऽसावित्यादिसर्वनामसंयुक्तमन्त्राम्नानेऽपि नाम्नः स्वरूपेणानाम्नानादमन्त्रत्वं स्यादित्याशङ्कते—**एवं तर्हीति**। सर्वनामः स्वरूपाम्नानप्रकारत्वोपपादनायाशक्तानामभ्युपगमेनोत्तरमाह—**तथा नामेति**[1]। सर्वनामद्वारा स्वरूपाम्नानान्न मन्त्रत्वानुपपत्तिरिति स्वमतेन परिहरति—**अथ वेति**। ननु देवदत्तादिनाम्नो मन्त्रत्वे इरापदादिवत्कस्मात्साक्षादनाम्नानमित्याशङ्क्य विशेषाणामित्युक्तम्। कथं सर्वनाम्ना स्वरूपाम्नानमित्याशङ्क्य—**अशून्येत्युक्तम्**। सर्वनाम्नो प्रयोगार्हत्वात्तत्स्थानस्य शून्यत्वापत्तेः प्रयोगार्हदेवदत्तादिनाम तत्स्थानपूरकतयावसीतइत्याशयः। एतदेवोपपादयति—**इतरथा हीति**। आशास्तेऽयं यजमान इत्येतावताप्यभिधानसिद्धेस्तदंशेत्युक्तम्। नन्वेवमपि देवदत्तादिपदस्याध्येतृभिरनाम्नानादविधानात्कथं सर्वनामस्थाने प्रयोग इत्याशङ्क्याह—**प्रवरेति**। इरापदादिवत्साक्षाद्विध्यभावेऽपि सूक्तवाकादिमन्त्रविधिनैव मन्त्रगतसर्वनामार्थवत्त्वाय तत्स्थाने देवदत्तादिपदप्रयोगः कल्प्यतइत्यर्थः। यजमानस्य तत्पूर्वेषामपरेषां च प्रत्येकं नाम गृह्णातीति सर्वनामरहितसुब्रह्मण्यानिगदविधिविहितं नामधेयं दृष्टान्तः। सर्वनामस्थानप्रक्षेप्यनामधेयस्य मन्त्रत्वोपपादनप्रयोजनमाह—**तस्मादिति**। अधिकरणविषयभूतानाम्। ऊहादीनां मन्त्रत्वाभिमतसर्वनामस्थानप्रक्षेप्यनामेरापदादिवैषम्यमुपसंहरति—**नन्विति**। चिन्तान्तरसिद्धान्तमुपसंहरति—**अतश्चेति**। क्रतुनाकाङ्क्षितं प्रत्यभिज्ञायमानं च मन्त्रत्वं यस्येति विग्रहः। अविशिष्टं तथा मन्त्रत्वेन प्राप्तत्वात् क्रत्वाकाङ्क्षितप्रत्यभिज्ञायमानमन्त्रत्वाच्च प्रायश्चित्तेन छान्दसप्रयोगैश्च न वर्जनीयमित्युक्ते, कथं मन्त्ररूपप्राप्तिः, तत्प्राप्तौ वा कथमूह्यपदस्यामन्त्रस्य प्रक्षेप इत्याशङ्काभिधानेत्युक्तम्। कर्मसमवेतार्थप्रकाशनाख्यस्याभिधानस्य प्रकृतिवद्विकृतावपि कर्मसमवेतोऽर्थोऽग्नये जुष्टं निर्वपामीत्यनेन सकलेनाभिधेय इत्येवं चोदकेन प्रापितत्वादूह्यपदप्रक्षेपः। प्रकृतिवद्यथासमाम्नायावगतेन मन्त्रस्वरूपेणाभिधेय इत्येवं रूपेण चार्षस्य यथा समाम्नायावगतमन्त्ररूपस्य चोदकेन प्रापितत्वान्मन्त्ररूपप्राप्तिरित्यर्थः॥ ३४॥

॥ इति नवममूहाद्यमन्त्राधिकरणम्॥

भा० प्र०—मन्त्र और ब्राह्मण के लक्षण के विचार प्रसङ्ग में यह भी सन्देह होता है कि कर्म के समय मन्त्र के साथ उच्चार्यमाण ऊह, प्रवर एवं नामधेय भी मन्त्र हैं कि नहीं। श्रुति में अग्निदेवता के उद्देश्य से निर्वाप = हविःग्रहण के स्थल में 'अग्नये जुष्टं निर्वपामि' यह मन्त्र दिया गया है। सूर्य देवता के उद्देश्य में निर्वाप = हविः ग्रहण के समय इस मन्त्र का 'अग्नये' इस पद को छोड़कर 'सूर्याय' इस पद से घटित प्रयोग किया जाता है। इस प्रकार अन्य पद के प्रक्षेप को 'ऊह' कहा जाता

१. आम्नानात्तयोरिति २ पु० पा०।

है। अतः 'सूर्याय जुष्टं निर्वपामि' इस वाक्य का 'सूर्याय' यह पद प्रत्यक्षरूप में श्रुति में पठित न होने से वह वाक्य मन्त्र है या नहीं—यह संशय है। इस प्रकार कर्म विशेष में मन्त्र विशेष के साथ यजमान के गोत्र आर्षेय अर्थात् गोत्रप्रवर्तक ऋषियों का उल्लेख है एवं इसका पौत्र, इसका पुत्र इत्यादि रूप में जो यजमान के नाम का उल्लेख होता है, वह भी प्रत्यक्ष श्रुति में पठित नहीं है—अतः उससे युक्त वैदिक मन्त्रों का मन्त्रत्व है या नहीं—यह सन्देह है, इस प्रसङ्ग में पूर्वपक्षी का कहना है कि कर्म के समय इनका मन्त्र के साथ उल्लेख होने के कारण—ये भी मन्त्र हैं।

इस प्रसङ्ग में सिद्धान्ती का कहना है कि 'अनाम्नातेषु अमन्त्रत्वम्' ऊह, प्रवर एवं नामधेय को मन्त्र नहीं कहा जा सकता है, कारण ये मन्त्र कह कर आम्नात अर्थात् गुरु-शिष्य सम्प्रदायक्रम में मन्त्रवत् गृहीत होने से अर्थात् अधीत या अध्यापित नहीं होते हैं, ऐसी स्थिति में ये अवैदिक नहीं है। इसलिए सूत्र में 'आम्नात' एवं 'अनाम्नात' ये दो शब्दों का प्रयोग किया गया है। प्रत्यक्ष श्रुतवेदभाग को 'आम्नात' एवं 'अनाम्नात' ये दो शब्दों का प्रयोग किया गया है। प्रत्यक्ष श्रुत वेद भाग को 'आम्नात' कहा जाता है। 'ऊह' आदि अप्रत्यक्ष वेद भाग को 'अनाम्नात' कहा जाता है। अतः 'आम्नातेषु विभागः' प्रत्यक्ष परिपठित शब्द को ही मन्त्र और ब्राह्मण का इस रूप में विभाग है।

'अनाम्नातेषु' = जो आम्नात अर्थात् श्रुतिवाक्यों में प्रत्यक्ष पठित नहीं है, वे अंश, 'अमन्त्रत्वम्' = मन्त्रत्व नहीं है, 'हि' = क्योंकि, 'आम्नातेषु' = श्रुतियों में प्रत्यक्ष पठित शब्दों में, 'विभागः' = मन्त्र एवं ब्राह्मण इस प्रकार विभाग होता है। मन्त्र में पाठ्य 'ऊह' प्रवर एवं नामधेय ये अंश अनाम्नात अर्थात् श्रुतियों में प्रत्यक्ष-परिपठित न होने से ये मन्त्र नहीं हैं। क्योंकि, आम्नात अर्थात् श्रुति में प्रत्यक्षपरि-पठित शब्द को ही मन्त्र और ब्राह्मण, इस प्रकार विभाग प्रसिद्ध है ॥ ३४ ॥

॥ इति नवम ऊहादि का अमन्त्राधिकरण ॥

अथ दशममृग्लक्षणाधिकरणम्

[१०] तेषामृग्यत्रार्थवशेन पादव्यवस्था ॥३५॥ सि० ॥

शा० भा०—ऋच इत्यस्ति वेदे, 'अहे बुध्निय मन्त्रं मे गोपाय। यमृषयस्त्रैविदो विदुः। ऋचः सामानि यजूंषि' इति। कथं लक्षणिका ऋचः? तेषामृग्यत्रार्थवशेन पादव्यवस्था। यत्र पादकृता व्यवस्था, स मन्त्रः—ऋङ्नामा। यथा 'अग्नीमीळे' इति। एवंजातीयकेषु मन्त्रेष्वभियुक्ता उपदिशन्ति, ऋचोऽधीमहे, ऋचोऽध्यापयामः, ऋचो वर्तन्त इति।

यद्यर्थवशेनेत्युच्यते, यत्र वृत्तवशेन तत्र न प्राप्नोति। अग्निः पूर्वेभिर्ऋषिभिः, इति। यतो नार्थवशेनेति वृत्तादिवशव्यावृत्त्यर्थम्, किं तर्हि ? अनुवाद

एष प्रदर्शनार्थः। अवश्यं चैतदेवं विज्ञेयम्। वृत्तादिनिवृत्त्यर्थे सति वाक्यं भिद्येत। तस्माद्यत्र पादकृता व्यवस्था, सा ऋगिति ॥ ३५ ॥

इति दशमम् ऋग्लक्षणाधिकरणम् ॥ १० ॥

भा० वि०—वैदिकपदार्थविचारतया प्रकरणसङ्गतिं सूचयन् विषयमाह—**ऋच इतीति।** यद्यप्युपोद्घातप्रसक्तानुप्रसक्तचिन्तयाध्यायोपक्रमप्रतिज्ञातपदार्थचिन्ता समाप्ता तथापि प्रसक्तानुप्रसक्तं चेति भाष्यगत चकारेण तदनुप्रसक्तस्याप्यर्थस्य प्रतिज्ञानादृगादिलक्षणस्य पादसङ्गतिरित्याशयः। प्रश्नपूर्वकं लक्षणसूत्रमवतार्य व्याचष्टे—**कथमित्यादिना।** तेषां मन्त्राणां मध्ये यत्र मन्त्रे पादव्यवस्था स मन्त्रऋगित्यर्थः। तत्राभियुक्तोपदेशमनुकूलयति—**एवं जातीयकेष्विति।** अर्थवशेनेत्यस्य लक्षणान्तर्गतिं मत्वा व्याप्तिं चोदयति—**यदीति।** अग्निः पूर्वेभिर्ऋषिभिरित्यादौ यत्र क्रिया पदानुपादानादपर्यवसितेवृत्तवशेन पादव्यवस्था तत्र न प्राप्नोतीत्यर्थः। नेदं लक्षणान्तर्गतं किंतु पादव्यवस्थैव कथमित्यपेक्षायां अर्थवशत्वं वृत्तवशत्वाद्युपलक्षणार्थमुक्तमित्युत्तरमाह—**नार्थेति।** किं च वृत्तादिवशव्यावृत्त्यर्थत्वे सति विधिनिषेधविषयत्वाद्वाक्यं भिद्येतेत्याह—**अवश्यं चेति।** विशेषणस्य लक्षणान्तर्गति फलमाह—**तस्मादिति** ॥ ३५ ॥

अथ दशममृग्लक्षणाधिकरणम्

त० वा०—प्रसक्तानुप्रसक्त्यापतितमृगादिलक्षणाभिधानम्। शब्दार्थस्य वृद्धव्यवहारगम्यत्वात्कृतेऽपि तल्लक्षणे, तन्मूलमभियुक्तोपदेशमेव दर्शयति। क्रियापदानुपादानात् 'अग्निः पूर्वेभिः' इत्यपर्यवसितेऽर्थे वृत्तवशेन पादव्यवस्था। ननु च 'अग्निमीळे' इत्यपि समस्ताया ऋच एवार्थवत्त्वान्नैव प्रतिपादमर्थः पर्यवस्यतीति न वाच्यम्। 'अर्थवशेन पादव्यवस्था' इति।

कथं न वाच्यम्। 'अग्निमीळे पुरोहितम्' इति तावत्प्रत्यक्षं समाप्तोऽर्थो दृश्यते। परयोः पादयोरसमाप्त[1] इति चेत्? न। आख्यातानुषङ्गेण समाप्तेः सिद्धत्वात्। तस्मात्साधूक्तमिहार्थवशेनेति। एतस्य तु प्रदर्शनार्थत्वान्न वृत्तवशव्यावृत्तिरित्यनिषिद्धमृक्त्वम् ॥ ३५ ॥

(इति दशममृग्लक्षणाधिकरणम् ॥ १० ॥)

॥ अथ दशममृग्लक्षणाधिकरणम् ॥ १० ॥

न्या० सु०—ननु कर्मभेदानुनिष्पाद्यपूर्वभेदसिद्ध्यर्थे भावशब्देभ्योऽपूर्वाधिगतिरिति भावार्थाधिकरणेनोक्ते तदपवादायाख्यातद्वैविध्यमुक्त्वा, प्रसङ्गान्मन्त्रगतस्याख्यातस्याविधायकत्वलक्षणे तृतीयप्रकारेऽभिहिते, तदनुप्रसङ्गान्मन्त्रलक्षणोक्त्याऽध्यायोपक्रमप्रति-

१ क. पदयोरिति।

ज्ञातपदार्थसमासेः कथमृगादिलक्षणसङ्गतिरित्याशङ्क्याह—**प्रसक्तेति**। प्रसक्तानुप्रसक्तं चेति भाष्यगतेन चकारेण तदनुप्रसक्तस्याप्यर्थस्य प्रतिज्ञानादविरोध इत्याशयः।

ननु तेषां मन्त्राणां मध्ये यत्र मन्त्रे पादव्यवस्था, स मन्त्र ऋगिति लक्षणस्यादुष्टत्वादेवंजातीयकेष्वित्यादिभाष्येणाभियुक्तोपदेशाभिधानं व्यर्थमित्याशङ्क्याह—**शब्दार्थस्येति**। यदीति भाष्येणार्थवशत्वस्येह लक्षणान्तर्गतिं मत्वा 'यदग्ने स्यामहं त्वमित्यादावर्थवशत्वसद्भावेऽप्यग्निः पूर्वेभिर्ऋषिभिः यद्वा जगज्जगत्याहितं पदमि'त्यादौ लघुगुर्वक्षरसामाख्यवृत्तवशेनाग्निमीळइत्यादौ चाक्षरसंख्यानियमलक्षणाच्छन्दोवशेन 'तमुस्नामिन्द्रं न रेजमानमि'त्यादौ चान्यवैषम्येणैवादेवमिन्द्रोविव्ये नृन्प्रेत्यादौ च प्रायवशेन पादव्यवस्थायामर्थवशत्वाभावाल्लक्षणाव्याप्तिं शङ्कितामुपपादयति—**क्रियापदेति**।

नन्वेवं सति न क्व चिदर्थवशेन पादव्यवस्था स्यादित्याशङ्कते—**ननु चेति**। ऋगर्थापर्यवसानेऽप्यवान्तरार्थपर्यवसानात्परिहरति—**कथमिति**। आख्याताभावेनोत्तरयोरसावप्यसमास इत्याशङ्कते—**परयोरिति**। तयोरप्याख्यातान्वयात्समासिमाह—**नेति**। अनावृत्तस्यैवानेकान्वयमात्रविवक्षयानुषङ्गाभिधानान्न वाक्यभेदापत्तिः। एतदेवोपसंहरति—**तस्मादिति**। नार्थवशेनेति परिहारभाष्यं व्याचष्टे—**एतस्य त्विति**। पादव्यवस्थैव कथमित्यपेक्षायां लक्षणानन्तर्गतस्याप्यर्थवशत्वस्यार्थवशेन वृत्तवशेनाध्येतृप्रसिद्धिवशेनेत्युपलक्षणायाभिधानान्नानर्थक्यमित्याशयः॥ ३५॥

इति दशममृग्लक्षणाधिकरणम्।

भा० प्र०—श्रुति में 'अहे बुध्निय मन्त्रं मे गोपाय'। 'यमृषयस्त्रयीविदाविदुः'। 'ऋचः सामानि यजूंषि'। इत्यादि वाक्यों में मन्त्रों का ऋक्, साम एवं यजुः, इन तीन नामों का उल्लेख है, इनमें क्या लक्षण है, इसी का प्रसङ्ग-क्रम में विचार किया जाता है। पादबद्ध, छन्दोबद्ध एवं एक-एक अर्थ के प्रकाशक मन्त्र का नाम ऋक् है, इसलिए व अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम्' इतना तक एक ऋक् है, क्योंकि यह पादबद्ध है, छन्दोबद्ध एवं एक समस्त अर्थ का प्रकाशक है। है। इस स्थल में तीन चरणों में एक ऋक् है, कारण, उनमें एक समग्र अर्थ कथित होता है, इसलिए उसका परवर्ती मन्त्र का 'अग्निः पूर्वेभिः ऋषिभिः' यह एक चरण उसके साथ युक्त नहीं होगा। अर्थात् वह चार चरण नहीं हो सकता है, किन्तु, तीन चरण ही एक ऋक् है।

'तेषाम्' = उन मन्त्रों में 'ऋक्' = उनका नाम ऋक् है, 'यत्र' = जिसमें, 'अर्थवशेन' = अर्थ के अनुसार अर्थात् एक-एक पूर्ण अर्थ के अनुसार, 'पादव्यवस्था' = पाद का अर्थात् छन्दःशास्त्र का नियमानुसार पद्य की चरण की व्यवस्था अर्थात् नियम है, उन मन्त्रों के मध्य में सभी मन्त्र एक-एक पूर्ण अर्थ का प्रकाशक एवं पादबद्ध और छन्दोबद्ध का नाम ऋक् है।

इस प्रसङ्ग में युधिष्ठिर मीमांसक ने कहा है—पादव्यवस्था-अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम्॥ यहाँ अग्निमलेपुरोहितं (=पुरोहित अग्नि की स्तुति करता हूँ), यज्ञस्य देवमृत्विजम् (यज्ञ के देव और ऋत्विक् अग्नि की स्तुति करता हूँ), होतारं रत्नधातमम् (रत्नों को धारण करने वाले यज्ञ के होता अग्नि की स्तुति करता हूँ)। इस मन्त्र में पूर्वपाद में श्रुत ईले क्रिया का उत्तर पादों में अनुषंग होने से तीनों विभागों के अवान्तर अर्थ उपपन्न होते हैं। इसी अर्थ के अनुरोध से ८-८ अक्षरों के तीन पादवाला यह ऋक् मन्त्र होता है। यद्यर्थवशेन इत्युच्यते—इस अगले प्रकरण से भाष्यकार सूक्त में उक्त अर्थवशेन पद पर दोषारोपण करते हैं कि अर्थवशेन पद का निर्देश करने से जहाँ अर्थानुरोध से पाद-व्यवस्था उपपन्न नहीं होती, वहाँ यह ऋक् लक्षण व्याप्त नहीं होगा। यथा—अग्निः पूर्वेभिर्ऋषिभिः इन आठ अक्षरों के प्रथम पाद में किसी क्रिया का निर्देश न होने से अर्थ उपपन्न नहीं होता है। यहाँ गायत्री छन्द के अनुरोध से आठ अक्षर वाला पद जानना चाहिए। वस्तुतः भाष्यकार का यह कथन छन्दःशास्त्र के विशिष्ट लक्षणों के और वैदिक पदप्रयोगशैली के यथावत् न जानने के कारण है। हम इन दोनों कारणों का क्रमशः निर्देश करते हैं। अर्थवश पादव्यवस्था मानने के लिए ही किया गया है।

इतना ही नहीं, यदि ऋक् प्रातिशाख्य और ऋक् सर्वानुकरणी के लक्षणों को ही प्रमाण माना जाये, तो स्ववचनविरोध और शास्त्रान्तर विरोध भी आता है। यथा—स्ववचनविरोध—शौनक ने ऋक् प्रातिशाख्य १७।२७ में कहा है—अनुदात्तं तु पादादौ नो वर्जं विद्यते पदम् = अर्थात् पाद के आरम्भ में 'उ' को छोड़कर कोई अनुदात्त पद नहीं है। पुनः आगे (ऋक् प्रातिशाख्य १७।२९-३६) तक अनेक क्रिया पदों और संबोधन पदों को पादादि में अनुदात्त कहा है। परस्पर विरोध—शौनक और कात्यायन के लक्षणों में परस्पर विरोध प्रचुरता से उपलब्ध होता है। शास्त्रान्तर विरोध—शबरशास्त्र का नियम है कि पाद के आरम्भ में कोई क्रियापद और आमन्त्रित अनुदात्त नहीं होता। अनुदात्तं सर्वमपादादौ, आमन्त्रितस्य च, तिङ् इतिङ् (अष्टा० ८।१।१८,१९,२०)। शौनक और कात्यायन के अनुसार पाद व्यवस्था मानने पर अनेक मन्त्रों में पाद के आरम्भ में अनुदात्त क्रियापद और आमन्त्रित पद आते हैं। अतः ऋक् प्रातिशाख्य और ऋक् सर्वानुक्रमणी के दूषित छन्दो, लक्षणों के आधार पर शबर स्वामी का सूत्रकार जैमिनी के लक्षण में दो दर्शान्त सर्वथा चिन्त्य है। इस विषय की हमने वैदिक छन्दोमीमांसा के १८ वें अध्याय में विस्तार से मीमांसा की है।

यहाँ यह भी ध्यान में रखने योग्य है कि यदि 'अग्निः पूर्वेभिर्ऋषिभिः' इतने को ही एक पाद माने, और ईड्यो नूतनैरूत को दूसरा, जब भी अर्थ दश पाद व्यवस्था में

कोई दोष नहीं होता है। जैसे तै० ब्रा० के पुरुष मेध पठित ब्रह्मणे ब्राह्मणमालभते क्षत्राय राजन्यम् (३।४।१-१९) आदि में प्रथमवाक्य में पठित आलभते क्रिया का अनुषङ्ग होकर वाक्यार्थ उपपन्न होता है। उसी प्रकार माध्यन्दिन संहिता अ० ३०।५-२२ तथा काण्व संख्या ३३।५-२२ तक पठित वाक्यों के प्रथम वाक्य में आलभते का निर्देश न होकर २२ वीं कण्डिका के अर्थतानष्टौ विरूपानालभते वाक्य में पठित आलभते क्रिया का पूर्व वाक्यों के साथ सम्बन्ध होकर प्रतिवाक्य अर्थ पूर्ण होता है। वैसे ही द्वितीय चरण में पठित ईडयः पद का पूर्व चरण के साथ संबंध होकर भी छन्दःशास्त्र के विशिष्ट लक्षणों का अज्ञान—सम्भवतः शबरस्वामी ने उक्त दोष ऋक्प्रातिशाख्य और ऋक् सर्वानुक्रमणी निर्दिष्ट सामान्य छन्दोलक्षणों को ध्यान में रखकर ही दर्शाया है। क्योंकि इन ग्रन्थों में अर्थ के अनुरोध से पदाक्षरों को बढ़ाने और घटाने का नियम उल्लिखित नहीं है। पतञ्जलि ने निदानसूत्र के अन्तर्गत छन्दोविचिति के आरम्भ में अष्टाक्षर 'एकादशाक्षर' द्वादशाक्षर पादों में अक्षर संख्या के घटाने बढ़ाने के नियम का विस्तार से उदाहरण दिये हैं। (द्र० प्र० पा० १)। गायत्री छन्द के अष्टाक्षर पाद के संबंध में लिखा है।

'अष्टाक्षर आपञ्चाक्षरतायाः प्रतिक्रामति। आचतुरक्षरताया इत्येको अदशाक्षरताया अभिक्रामति'। अर्थात्—अष्टाक्षरपाद पाँच अक्षरों तक, किन्हीं के मत में चार अक्षरों तक संकुचित होता है और दश अक्षर तक बढ़ता है।

इन नियमों के अनुसार अग्निपूर्वेभिऋर्षिभिरीडयोनूतनैरुत। स देवां एह वक्षति (ऋ० १।१।१) ऋचा का अष्टाक्षर प्रथम पाद दश अक्षर पर्यन्त बढ़कर अग्निः पूर्वेभिऋर्षिभिरीडयः बनता है और दूसरा पाद नूतनैरूत पञ्चाक्षर का होता है। ईडयः को पूर्वचरण में सम्मिलित कर देने पर पूर्व पाद का अवान्तर अर्थ उत्पन्न हो जाता है। इस प्रकार शबर स्वामी के निर्दिष्ट मन्त्र में भी अर्थवश पाद व्यवस्था सम्यक् प्रकार उपपन्न हो जाती है। अतः सूत्रकार का अर्थवशेन पद रखना सर्वथा निर्दोष और युक्ति-युक्त है। निदान सूत्रोक्त पादक्षरों की न्यूनता या वृद्धि वाले नियमों का निर्देश पूर्वेभिऋर्षिभिरानिरड्यिः, उतनूतनैरपि ऋषिभिरीड्यः अर्थ यथावत् उपपन्न हो जाता है। इस प्रकार द्वितीय चरणस्थ ईड्यः पद का पूर्व चरण के साथ सम्बन्ध होने पर सूत्रकार का अर्थवशेन पाद व्यवस्था कहना सर्वथा युक्त है। भाष्यकार शबर स्वामी का सूत्र में दोष प्रदर्शन किसी भी दृष्टि से उपपन्न नहीं होता है। इत्यलमतिपल्लवितेन।

कुतुहलवृत्तिकार द्वारा अर्थवशेन पद की उपपत्ति—कुतुहलवृत्तिकार ने भाष्यकार द्वारा सूत्रपद अर्थवशेन की अनुपयुक्तता को स्वीकार न करते हुए उसकी इस प्रकार सार्थकता दर्शायी है। 'अग्निमीळे पुरोहितं, यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम्, अग्निः पूर्वेभिऋर्षिभिः', इतना अंश ४ अष्टाक्षरपादात्मक चतुष्पाद् अनुष्टुप् क्यों न

माना जाय ? 'रत्नधातमम्' पर्यन्त त्रिपदा गायत्री ही क्यों माना जाये ? इसकी व्यवस्था के लिए अर्थवशेन पादव्यवस्था = अर्थ के अनुरोध से पादव्यवस्था ३ पाद, ४ पाद वा ५ पाद (पञ्चपदा पंक्ति की अवस्था होती है। अर्थात् जितने पादों में एक अर्थ पूर्ण हो जाता है, उतना अंश एक ऋक् माना जाता है। रत्नधातमम् पर अर्थपूर्ण हो जाता है। अतः यही एक ऋक् है। अनिपूर्वेभिर्ऋषिभिः यह चरणपूर्व के साथ सम्बन्ध नहीं होता, अतः वृत्तिकार ने ऋक् का लक्षण किया है—विशिष्टैकार्थ-प्रतिपादकत्वे सति पादबद्धमंत्रत्वमृचो लक्षणम्। अर्थात् एक विशिष्ट अर्थ का प्रतिपादक होते हुए जो पादव्यवस्थायुक्त मन्त्र है, वह ऋक् कहाता है ॥ ३५ ॥

॥ इति ऋक्लक्षणाधिकरण ॥

अथैकादशं सामलक्षणाधिकरणम्

[११] गीतिषु सामाख्या ॥ ३६ ॥ सि० ॥

शा० भा०—अथ साम्नः किं लक्षणम् ? विशिष्टा काचिद्गीतिः सामेत्युच्यते। प्रगीते हि मन्त्रवाक्ये सामशब्दमभियुक्ता उपदिशन्ति। सामान्यधीमहे, सामान्यध्यापयामः, सामानि वर्तन्त इति।

अभियुक्तोपदेशश्च नः प्रमाणम्। यथा अम्लं दधि, मधुरो गुड इति। गीतिविशिष्टे तावन्मन्त्रे[1] गीतिशब्दः। गीतिसम्बन्धान्मन्त्रे संप्रत्ययइत्यवगन्तव्यम् ॥ ३६ ॥

इत्येकादशं सामलक्षणाधिकरणम् ॥ ११ ॥

भा० वि०—ऋग्लक्षणानन्तरं 'ऋचः सामानी'ति समनन्तरोक्तसामस्वरूपनिरूपणात् सङ्गतिं विवक्षन् प्रश्नपूर्वकं लक्षणसूत्रं व्याचष्टे—**अथेति**। लौकिकगीतिव्यावर्तनाय मन्त्रगतत्वं सूचयितुं विशिष्टेत्युक्तं तत्राभियुक्तोक्तिं संवादयति—**प्रगीते हीति**। सिद्धप्रमाणभावस्यैवाभियुक्तोपदेशस्य व्यवहाराङ्गत्वात् तत्प्रामाण्यं दृष्टान्तेन साधयति-**अभियुक्तेति**। यथाम्लं दधिमधुरो गुड इति प्रत्यक्षज्ञानं प्रमाणं तथाभियुक्तोपदेश इत्यर्थः।

ननूपदेशस्य प्रामाण्येऽपि गीतिमात्रविषयत्वं कथमवसीयत इत्याशङ्क्याह—**गीतिविशिष्टे चेदिति**। गीतेर्विशेषणत्वात् पूर्वतरप्रत्यायने सत्याकृतिवदभिधेयत्वनिर्णय इत्यर्थः ॥ ३६ ॥

अथैकादशं सामलक्षणाधिकरणम्।

त० वा०—तेषामित्यनुवर्तते। अत्रापि स एवाभियुक्तोपदेशोपन्यासः। प्राथम्यात्, **यथाऽम्लं दधीति**। पूर्वत्रैव वाच्यं सदनादरादिहोदाहृतम्।

---

१. ब. चेन्मन्त्रेगीतिं प्रथमं प्रत्यापयतीति।

अथ वा यथाऽनेकधर्मसमाहारे सति दधिगुडयो रसविशेषमात्रमम्लमधुरशब्दावुपाददाते[1], तथा सामशब्दो गीतिमात्रमित्यत्रोदाहरणम् ।

ननु च प्रत्यक्षगम्यत्वाद्रसविशेषस्याभियुक्तोपदेशोऽनुवादत्वान्नैव प्रमाणम् ।

नैष दोषः । प्रत्ययमेवात्र इतिकरणावच्छिन्नं निदर्शनम् । एतदुक्तं भवति । यथाऽम्लं दधि, मधुरो गुड इत्येतद्विज्ञानं प्रमाणम्, एवमभियुक्तोपदेश इति । गीतेर्विशेषणत्वात्पूर्वतरप्रत्यायने सत्याकृतिवदभिधेयत्वं निर्णेतव्यम् । आह च—

'एकखण्डेन शब्देन विशिष्टो यत्र गम्यते ।
विशेषणस्य वाच्यत्वं तत्र सर्वत्र जायते' ॥ ३६ ॥

(इत्येकादश सामलक्षणाधिकरणम्) ॥ ११ ॥

॥ अथैकादशं समासलक्षणाधिकरणम् ॥ ११ ॥

न्या० सु०—गीतित्वस्य लौकिक्यामपि गीतौ सद्भावेनातिव्यापकत्वमाशङ्क्य, मन्त्रगतत्वविशेषणसूचनायाह—**तेषामिति** । अभियुक्तोपदेशोऽत्रापि पूर्वोक्तप्रयोजन एवेत्याह—**अत्रापीति** । सिद्धप्रामाण्येनोपदेशेन व्यवहाराय प्रथमं दृष्टान्तेन तत्प्रामाण्योपपादनस्योचितत्वेन मन्त्रलक्षण एव कार्यत्वादभियुक्तोपदेशश्चेत्यादिभाष्यं पठनीयमिति स्वयमेवाशङ्क्य परमतेन तावत्परिहरति—**प्राथम्यादिति** । यथेति मध्यप्रतीकेनाभियुक्तेत्याद्युक्तम्, नाभियुक्तोपदेशमात्रप्रामाण्याभिधायैनातदुक्तम् । किं तु गीतेः सामत्वे 'साम्ना स्तुवत'इति स्तुतिसाधनत्वायोगापत्तेरयम प्रमाणमित्याशङ्कानिरासादत्रैव वाच्यमित्याशयेन स्वयं परिहरति—**अथ वेति** । अभियुक्तोपदेशं दृष्टान्तं मत्वा साध्यविकलत्वमाशङ्कते—**ननु चेति** । नात्यन्तसाम्येन दृष्टान्त इत्याशयेन परिहरति—**नैष दोष इति** । नपनूदेशदृष्टस्य प्रामाण्येऽपि गीतिमात्रविषयत्वं कथमवसीयतशङ्कानिरासार्थं गीतिविशिष्टे चेदिति । भाष्यं व्याचष्टे—**गीतेरिति** । सप्तमद्वितीयपादे वक्ष्यमाणस्यैव गीतिमात्रवाच्यत्वस्येहलक्षणसमर्थनायानागतावेक्षणेन भाष्यकृतोक्तत्वादपौनरुक्त्यम् । अत्रैव वृद्धसम्मतिमाह—**आह चेति** ॥ ३६ ॥

इत्येकादशं सामलक्षणम् ॥

भा० प्र०—जो मन्त्र गेय अर्थात् षड्ज आदि स्वर के संयोग से उच्चारण किया जाता है, उसका नाम 'साम' है, अतः प्रगीत मन्त्र वाक्य का नाम साम है ।

'गीतिषु' गेय मन्त्रों का, 'सामाख्या'—नाम साम है ॥ ३६ ॥

---

१ क. उपाददति ।

अथ द्वादशं यजुर्लक्षणाधिकरणम् ॥

[१२] शेषे यजुःशब्दः ॥ ३७ ॥ सि० ॥

शा० भा०—अथ यजुषः किं लक्षणमिति ? यजुषो लक्षणं न वक्तव्यम्। ऋग्लक्षणसामलक्षणाभ्यामेव यजुर्विज्ञास्यते वैपरीत्येन। या न गीतिः, न च पादबद्धम्, तत् प्रश्लिष्टपठितं यजुरिति ॥ ३७ ॥

इति द्वादशं यजुर्लक्षणाधिकरणम् ॥ १२ ॥

भा० वि०—अत्रापि पूर्ववत्सङ्गतिमभिप्रेत्य प्रश्नपूर्वकं परिशेषसिद्धत्वेन लक्षणस्यावक्तव्यत्वप्रतिपादनार्थतया सूत्रं व्याचष्टे—**यजुरित्यादिना**। ऋक्साम-वैपरीत्यं यजुषो दर्शयति—**न चेति**। परिशेषसिद्धं रूपं दर्शयन्नुपसंहरति—**तदिति**। तस्मादित्यर्थः ॥ ३७ ॥

त० वा०—शेषे ब्राह्मणशब्द इतिवत्समस्तं व्याख्येयम् ॥ ३७ ॥

(इति द्वादशंयजुर्लक्षणाधिकरणम् ॥ १२ ॥)

॥ अथ द्वादशं यजुर्लक्षणाधिकरणम् ॥ १२ ॥

न्या० सु०—यजुष इति भाष्यस्य सूत्रप्रत्याख्यानार्थत्वभ्रान्तिं निरस्यति—**शेष इति** ॥ ३७ ॥

भा० प्र०—ऋक् और साम से भिन्न मन्त्रों का नाम यजुः है। 'प्रश्लिष्टपाठ' मन्त्र अर्थात् जिन मन्त्रों का विच्छेदरहित अर्थात् नदी की धारा के समान अविच्छिन्न रूप में अध्ययन के समय गृहीत होते हैं, उनका नाम यजुः है। ऋक् एवं साम का लक्षण निर्दिष्ट कर उनसे व्यतिरिक्त मन्त्रों को यजुः कहा जाता है—यही इसका लक्षण है। 'शेषे यजुः शब्दः' यह लक्षण कर सूत्रकार ने यही सूचित किया है कि ऋक्, साम एवं यजुः से अतिरिक्त मन्त्र का और कोई भी भाग नहीं है।

'शेषे' = ऋक् एवं साम से अतिरिक्त जो मन्त्र हैं, उनमें 'यजुः शब्दः' = यजुः इस शब्द का प्रयोग किया जाता है।

वेद का मन्त्र तीन प्रकार का है—ऋक्, यजुः और साम। ऋक्संहिता में ही तीन प्रकार के मन्त्र कहे गये हैं। 'तमर्केभिस्तं सामभिस्तं गायत्रैश्चर्षणयः। इन्द्रं वर्धन्ति क्षितयः'। (ऋ० सं० ६।१।२२) 'अर्क पद' के द्वारा यजुर्मन्त्र का 'सामपद' के द्वारा साम मन्त्र का और 'गायत्र' पद के द्वारा गायत्री आदि छन्दोयुक्त शस्त्ररूप अप्रगीत ऋक् मन्त्रों का उल्लेख है। इन तीन प्रकार के मन्त्रों का लक्षण प्रदान करते हुए भगवान् जैमिनि ने ऊपर तीन सूत्रों को लिखा है। इन तीन सूत्रों के द्वारा

जैमिनि ने यथाक्रम में ऋक् मन्त्र, साममन्त्र और यजुर्मन्त्र का लक्षण कहा है। नियत अक्षरों से युक्त पाद है और नियत संख्या के पाद हैं एवं एक विशिष्ट अर्थ को प्रकाश करने वाले मन्त्रों का नाम ऋक् है। जैसे :—अग्निमीडे इत्यादि। यह मन्त्र आठ अक्षरों से युक्त पाद वाले एवं तीन पादों से युक्त गायत्री छन्द है। गायत्री छन्द होने के कारण ही प्रत्येक पाद में आठ अक्षर हैं एवं एक विशिष्ट अर्थ के प्रकाशक हैं। तीन पादों के द्वारा ही एक पूर्ण अर्थ का एक पूर्ण अर्थ का प्रकाशक होता है।

इसलिए, इन तीन पादों को लेकर ही एक ऋक् मन्त्र कहा जाता है। यही ऋक्संहिता का प्रथम मन्त्र है। आगे के द्वितीय मन्त्र के प्रथम पाद को लेकर प्रथम मन्त्र चतुष्पाद का एक ऋक् मन्त्र नहीं हो सकता है। इसीलिए जैमिनि ने स्पष्ट शब्दों में कहा है कि 'अर्थवशेन पाद व्यवस्था', तीन पाद वाले प्रथम मन्त्र से एक पूर्ण अर्थ का प्रतिपादन होता है, अतः, इस त्रिपाद मन्त्र में द्वितीय मन्त्र का प्रथम पाद लेकर चतुष्पादयुक्त प्रथम मन्त्र नहीं हो सकता है। इस मन्त्र का छन्द गायत्री है। ऋक् मन्त्र नियत अक्षर पाद व्यवस्थित होने से अन्य मन्त्र के किसी पाद से युक्त नहीं हो सकता है।

साममन्त्र—जो ऋक् मन्त्र षड्ज आदि स्वरों के साथ सम्बद्ध होकर गीत होताहै—उसको साममन्त्र कहा जाता है, ऋक् मन्त्र ही गीत होने पर अर्थात् स्वर संयोगपूर्वक उच्चारित होने पर साम कहे जाते हैं। इसीलिए छान्दोग्य उपनिषद् में कहा गया है 'तस्माद् ऋच्यूढँ साम गीयते' (छा० उ० १।६।५) इस प्रकार विवेचन से पद्य मन्त्र ही ऋक्, गीतियुक्त पद्य मन्त्र ही साम है। इसलिए प्रत्येक साम मन्त्र का योनि रूप में ऋक् मन्त्र व्यवस्थित होता है। जो ऋक् मन्त्र स्वर संयोग में गीत होता है वह साम मन्त्र के नाम से कहा जाता है, ऋक् मन्त्र ही साम मन्त्र का योनि ऋक् नाम से अभिहित होता है। जैमिनि ने कहा है कि ऋक् मन्त्र और साम मन्त्र से भिन्न जो मन्त्र हैं, उन्हीं को यजुर्मन्त्र कहा जाता है। जो नियताक्षर पादबद्ध नहीं है एवं स्वर संयोग में गीत भी नहीं है वह अपादबद्ध है। फलतः, पद्य, गीति और इनसे भिन्न मन्त्र इस प्रकार तीन मन्त्र वेद में कहे गये हैं। नियताक्षर पादबद्ध, छन्दोबद्ध एवं एकार्थ प्रतिपादक मन्त्र ही ऋक् मन्त्र है। यह मन्त्र शाकल संहिता, शाङ्खायन संहिता, ब्राह्मण, आरण्यक, उपनिषद्, श्रौतसूत्र, इतिहास, पुराण आदि जहाँ भी कहे जाँय—वे ऋक् मन्त्र ही हैं। इसलिए यजुःसंहिता में भी जो नियताक्षर पादबद्ध, छन्दोयुक्त, नियतपाद समन्वित, एकार्थ प्रतिपादक मन्त्र कहे जाते हैं—वे भी ऋक् मन्त्र ही हैं। ऋग्वेद की शाकल संहिता में जो ऋक् मन्त्र नहीं कहे गये हैं और अथर्व संहिता में कहे गये हैं—वे ऋक् मन्त्र नहीं हैं—यह कहना उचित नहीं है। अनेक ऋक् मन्त्र जो ऋग्वेद की मन्त्र संहिता में नहीं है और ब्राह्मणादि में कहे गये हैं—वे भी ऋक् मन्त्र ही हैं। वैदिक, याज्ञिक एवं वेद संरक्षक आदि वेद में अभियुक्तों ने जिसे मन्त्र कहकर

व्यवहार करते हैं एवं जिनमें ऋक् मन्त्र का लक्षण संघटित होता है, यजुः और साम मन्त्र का लक्षण नहीं संघटित होता है, वे मन्त्र ऋक् मन्त्र से भिन्न क्या होंगे ? वेद का मन्त्र तीन ही प्रकार का होता है, चतुर्थ या पञ्चम प्रकार का मन्त्र प्रसिद्ध नहीं है। साममन्त्र समूह ऋक् मन्त्र है, केवल स्वरसंयोग से गीत होने से ऋक् मन्त्र को ही साम मन्त्र कहा जाता है।

कतिपय आचार्यों ने यजुर्मन्त्र में भी छन्द है—यह माना है। यजुर्मन्त्र में छन्द रहने पर भी वह ऋक् मन्त्र के समान नियताक्षरयुक्त पाद विशिष्ट नहीं है, गायत्री, त्रिष्टुप् आदि छन्दोयुक्त नहीं होते हैं। पिङ्गलादि छन्दःशास्त्र से यजुर्मन्त्र का भी छन्द का किया जाता है। वस्तुतः, यजुर्मन्त्र का कोई छन्द नहीं है। यजुर्मन्त्र का पाठ करने पर छन्दोबद्ध मन्त्र का पाठ करते हैं—यह प्रतीति भी नहीं होती है। यजुर्वेद के मन्त्रों को छन्दोयुक्त मानने वालों की दृष्टि में छन्द न रहने पर वे मन्त्र न होकर ब्राह्मण वाक्य के अन्तर्गत हो जायेंगे—यह धारणा है, क्योंकि, जैमिनि ने कहा है—'शेषे ब्राह्मणशब्दः' (२.१।३३) किन्तु, उनका यह विचार समीचीन नहीं है, क्योंकि, शबर स्वामी ने उपसंहार में कहा है, 'मन्त्राश्च ब्राह्मणञ्च वेदः' मन्त्र एवं ब्राह्मण इन दोनों ही भागों में वेद शब्द प्रयुक्त होता है। मन्त्र और ब्राह्मण वेद शब्द का अभिधेय है। आपस्तम्ब परिभाषा सूत्र में भीं 'मन्त्रब्राह्मणोर्वेदनामधेयम्' यह कहा गया है। 'तच्चोदकेषु मन्त्राख्या' इस सूत्र के द्वारा भी वेद के त्रिविध मन्त्रों का साधारण लक्षण कहकर 'शेषे ब्राह्मणशब्दः' यह बाद में कहा है। इससे स्पष्ट है मन्त्र से भिन्न वेद भाग ही ब्राह्मण है—यही सूत्रकार और भाष्यकार को अभिप्रेत है। यजुर्मन्त्र में छन्द न रहने से ही वह ब्राह्मण हो जायगा—ऐसी बात नहीं है। क्योंकि, महर्षि जैमिनि ने मन्त्र के लक्षण में छन्द का निवेश नहीं किया है। अतः छन्द न होने से यजुर्मन्त्र ब्राह्मण हो जायेंगे—यह कथन नितान्त असङ्गत है।

पण्डित गजानन्द शर्मा ने स्वाध्याय-मण्डल से प्रकाशित तैत्तिरीय संहिता की भूमिका में 'छन्दोबद्धा भावे शेषे ब्राह्मणशब्द इति शास्त्रात् यजुषां मन्त्राणामपि ब्राह्मणवाक्यत्वप्रसङ्गः' (वेदवेदिका पृ० १८) में कहा यह असङ्गत है[1] ॥ ३७ ॥

अथ त्रयोदशं निगदाधिकरणम् ॥
अथ निगदो[2] नाम किं यजूंषि, उत यजुषोऽन्य ? इति।

[१३] निगदो वा चतुर्थं स्याद्धर्मविशेषात् ॥३८॥ पू० ॥

शा० भा०—निगदा[3] न यजूंषि। कुतः ? धर्मविशेषात्। 'उच्चैर्ऋचा क्रियते, उच्चैः साम्ना, उपांशु यजुषा, उच्चैर्निगदेन' इत्येष धर्मविशेषः। उच्चै-

---

१. द्रष्टव्य 'वेदेरमन्त्रभागे ईश्वर दार्शनिक तत्त्व, पृ० ७।
२. निगदो। ३. ब. निगदानाम।

निगदेन इत्यनूद्यते यदि यजुषो[1] निगदत्वं स्याद्, न च तस्योच्चैस्त्वं धर्मो दृश्यते । दृश्यते तु । तस्माच्चतुर्थं मन्त्रजातं निगदो नाम ॥ ३८ ॥ पूर्व० ॥

भा० वि०—ऋक्सामातिरिक्तस्य यजुष्ट्वमाक्षेपसमाधानाभ्यामुपपादयितुं उत्तराधिकरणमवतारयति—**अथ निगदा इति** । तत्र पूर्वपक्षमाह—

शेषे यजुश्शब्द इत्येतद्व्यावर्तनार्थं वाशब्दं व्याचष्टे—**निगदा इति** । प्रश्नपूर्वकं हेतुमादाय व्याचष्टे—**कुत इत्यादिना** । यजुर्धर्मादुपांशुत्वान्निगदधर्मस्योच्चैष्ट्वस्यान्यत्वादित्यर्थः ।

ननु धर्मान्यत्वेऽपि धर्म्येकत्वं किं न स्यादित्याशङ्क्याह—**उच्चैरिति** । यद्युच्चैर्निगदेनेति विधीयते ततो विरुद्धधर्मसमुच्चयासंभवादुपांशुत्वबाधेनोच्चैष्ट्वं विधातव्यम् । धर्मिभेदेन चाबाधसंभवेन बाधपक्षो युक्तः । यद्यनूद्यते तथापि प्राप्तिं विनानुवादानुपपत्तेः धर्मिभेदं च विना विरुद्धधर्मप्राप्त्यनुपपत्तेः तद्भेदोऽवश्यमाश्रयणीय इत्यर्थः । ननु धर्मान्यत्वादयजुष्ट्वेप्यृक्सामयोरन्तर्भावस्यातद्धर्मत्वादित्याशङ्क्य निराकरणार्थमवशिष्टं सूत्रावयवं व्याचष्टे—**तस्मादिति** । पादबन्धप्रगीतत्वयोरभावाच्चतुर्थत्वमित्यर्थः ॥ ३८ ॥

त० वा०—शेषे यजुःशब्द इत्येतद् व्यावर्तनार्थो वाशब्दः । चतुर्थं मन्त्रजातं निगदः स्यात्, धर्मान्यत्वात् । यदि तावत् 'उच्चैर्निगदेन' इति विधिः ततो यजुर्धर्मबाधो मा भूदित्यर्थान्तरत्वम् । अथानुवादः, स नैव प्राप्नोति । व्यतिरेकेण विनेति भेदः ॥ ३८ ॥ ३९ ॥

॥ अथ **त्रयोदशं निगदानां यजुष्ट्वाधिकरणम्** ॥ १३ ॥

न्या० सु०—निगदा इति भाष्यं सूत्रानारूढमाशङ्क्य व्याचष्टे—**शेष इति** । धर्मस्य विशेषाश्रवणादन्यत्ववाचितया विशेषशब्दं व्याचष्टे—**धर्मेति** । तृतीये 'वेदो वा प्रायदर्शनादित्यत्रोच्चैस्त्वोपांशुत्वयोर्वेदधर्मत्वे वक्ष्यमाणेऽपि तत्रत्यपूर्वपक्षे स्थित्वोपांशुत्वस्य यजुर्जातधर्मत्वेनोच्चैस्त्वस्य तदन्यतोक्ता । विधित्वे विशेषशास्त्रेण सामान्यशास्त्रबाधात्सिद्धान्तेऽपि धर्मान्यत्वोपपत्तेः पूर्वपक्षोपपादनाशक्तिं मत्वोच्चैरित्यस्यानुवादता भाष्यकृतोक्तेति भ्रान्तिं निवर्त्तयितुम्, विधित्वेऽप्यबाधपक्षसम्भवे बाधपक्षस्याङ्गीकार्यत्वाद्धर्मान्यत्वस्य पूर्वपक्षोपपादकत्वं वक्तुमाह—**यदि तावदिति** । अनुवादत्वे तु निगदस्य यजुषो भेदेन विनोच्चैस्त्वधर्माप्राप्तेः सुसाधो भेद इत्याह—**अथेति** ॥ ३८ ॥

भा० प्र०—ऋक्, साम एवं यजुः का लक्षण कहा गया है । जिस सूत्र में यजुः का लक्षण कहा गया है, उसमें यह भी सूचित किया गया है कि इन तीन को छोड़कर

---

१. ब. यजुर्निगदःस्यात् ।

चतुर्थ प्रकार का मन्त्र नहीं है। इस प्रसङ्ग में किसी ने आपत्ति की है कि—"निगदो वा चतुर्थः स्यात्" निगद नामक एक प्रकार का मन्त्र है जो इन तीनों में अन्तर्भुक्त नहीं है, अपि तु वह चतुर्थ प्रकार है। इसमें हेतु का प्रदर्शन करते हुए कहा गया है—"धर्मविशेषात्" ऋक्, यजुः और साम को छोड़कर स्वतन्त्र प्रकार धर्म है। "प्रोक्षणीरासादय" प्रोक्षणी का ग्रहण करे। "इध्मबर्हिरुपसादय" काष्ठ एवं कुश आगे लाए, "अग्नीदग्नीन् विहर" हे अग्नीत् अग्नियों को विस्तृत करे "बर्हिस्तृणाहि" कुश बिछाए, "इन्द्र आगच्छ" इन्द्र आओ इत्यादि पर-प्रत्यायनार्थ अर्थात् सम्बोधनसूचक मन्त्र का नाम निगद है, अर्थात् जिन मन्त्रों के द्वारा दूसरे को प्रत्यय उत्पादन अर्थात् कर्मविशेष में ज्ञानविशेष का उद्बोध करना होता है—उन मन्त्रों को निगद कहा जाता है, वे पादबद्ध नहीं हैं, अतः ऋक् नहीं कहे जा सकते हैं, गानमन्त्र न होने से उनको साम नहीं कहा जा सकता है, यजुः और निगद में गुण अर्थात् धर्मगत पार्थक्य का वर्णन श्रुति में होने से यजुः के समान प्रविष्ट होने पर भी इसको यजुः नहीं कहा जा सकता है। "उपांशु[1] यजुषा, उच्चैर्निगदेन, यजुः नामक मन्त्र उच्च स्वर से उच्चारण न करे और निगद नामक उच्च स्वर से पाठ कर कर्म करे, इस प्रकार यजुः और निगद में धर्म का पार्थक्य स्पष्ट है। अतः, निगद चतुर्थ प्रकार है।

"निगदः" = निगद, 'वा' = पूर्वपक्षसूचक है, "चतुर्थः स्यात्" = चतुर्थ होगा, "धर्मविशेषात्" = इसमें विशेष धर्म होने से, निगद नामक भाग चतुर्थ प्रकार का होगा, क्योंकि, ऋक्, साम एवं यजुः से उसका धर्म भिन्न है ॥ ३८ ॥

व्यपदेशाच्च ॥ ३९ ॥

शा० भा०—व्यपदेशोऽपि भवति यजूंषि वर्तन्ते, न निगदाः। निगदा वर्तन्ते, न यजूंषीति। तस्मादपि मन्त्रान्तरम् ॥ ३९ ॥ युक्तिः ॥

भा० वि०—निगदानां चतुर्थत्वे हेत्वन्तरमाह—**व्यपदेशाच्चेति** ॥ ३९ ॥

न्या० सु०—धर्मान्यत्वस्य तार्तीयवाक्याधिकरणविरुद्धत्वेनाभ्युच्चयमात्रत्वात्तन्मुख्यहेत्वभिधानार्थमिदं सूत्रं यथाभाष्यं स्पष्टत्वान्न व्याख्यातम् ॥ ३९ ॥

भा० प्र०—निगद के यजुः से भिन्न होने में द्वितीय हेतु प्रदर्शन करते हुए लिखा है कि "यजुंषि वर्तन्ते न निगदाः। निगदा वर्तन्ते न यजुंषि" यजुः है; किन्तु निगद

---

१. आपस्तम्बश्रौतसूत्र में 'उपांशु यजुषा' (१/८ की व्याख्या में लिखा गया है कि "अशब्दम् अमनः प्रयोग उपांशु, ताल्वादिव्यापारे प्रत्यक्षेऽपि यत्र शब्दो न श्रूयते, न च मनोव्यापारमात्रं तदुपांश्वित्युच्यते।" (तालु आदि का प्रयोग होने पर भी शब्द का सुनाई न पड़ना और मनोव्यापारमात्र अर्थात् मानसिक उच्चारण मात्र न होना उपांशु है।

नहीं है, निगद है, किन्तु यजुः नहीं हैं, इस तरह भिन्न नामसे इसका उल्लेख मिलता है, अतः, निगद यजुः नहीं हैं।

"व्यपदेशात् च" = भिन्न नाम से व्यपदेश अर्थात् उल्लेख होने से निगद यजुः के अन्तर्गत नहीं हैं ॥ ३९ ॥

॥ इति पूर्वपक्ष ॥

यजूंषि वा तद्रूपत्वात् ॥ ४० ॥ सि० ॥

शा० भा०—यजूंष्येव[1] निगदाः। कुतः ? तद्रूपत्वात्। तदेवैषां रूपम्, यद् यजुषां प्रश्लिष्टपाठः, ऋक्सामलक्षणविलक्षणता च ॥ ४० ॥ सिद्धान्तः ॥

भा० वि०—सिद्धान्तमाह—**यजूंषि चेति**। तद्रूपत्वादिति हेतुं यजुर्लक्षणयोगित्वादित्येवं व्याचष्टे—**तदेवेति**।

ननु शेषे यजुश्शब्द इति यजुषो लक्षणानपेक्षत्वकथनेन तस्य लक्षणाभावात् कथं तद्योगित्वेन निगमानां यजुष्ट्वमत आह—**ऋक्सामेति**। यजुर्लक्षणस्य परिशेषसिद्धत्वात् तत्रावक्तव्यत्वमुक्तं न तु तदभावात् तेन तद्योगित्वान्निगदानामपि यजुष्ट्वमित्याशयः ॥ ४० ॥

त० वा०—'अहे बुध्निय मन्त्रं मे गोपाय' इति त्रिष्वेव मन्त्रत्वस्योपसंहारात्। वेदे च मन्त्रसामानाधिकरण्येन निगदशब्दप्रयोगात्, यजुष्ट्वापरित्यागेनैव च धर्मविशेषव्यपदेशभेदसिद्धेः परिशेषसिद्धयजुर्लक्षणयोगाच्च यजूंष्येव निगदाः ॥ ४० ॥

न्या० सु०—यद्रूपत्वस्य हेतोः यजूरूपत्वादिति भाष्यकृद्व्याख्यानादन्यथापि निगदस्य मन्त्ररूपत्वात्, यजुषो वा निगदरूपत्वस्य श्रवणात्, निगदस्यैव वोच्चैस्त्वधर्मरूपत्वात्, व्यपदेशभेदसिद्धिरिति व्याख्यानत्रयं सूचयन्सूत्रं व्याचष्टे—अह **इति**। कं मन्त्रमित्यपेक्षायामृचो यजूंषि सामानीत्यृग्यजुःसामस्वेव मन्त्रत्वोपसंहारात्, मन्त्रत्वेनाध्येतृप्रसिद्धेरस्य निगदस्य त्रयान्यतमान्तर्भावावगतेर्ऋक्सामवैलक्षण्येन पारिशेष्याद्यजुष्ट्वमित्येको हेत्वर्थः।

तदाहुः, ऋक्सुब्रह्मण्या इ यजूः सामा इति प्रश्नोत्तरभूते मन्त्र एव खल्वयं निगदभूतो भवति, तस्माद्यजुरि'ति वेदे निगदशब्दस्य मन्त्रशब्दसामानाधिकरण्येन हेतुना यजुष्ट्वापरित्यागेनैव निगदे मन्त्रशब्दप्रयोगावगमादिति द्वितीयः।

निगदस्य यजुष्ट्वापरित्यागेनैव धर्मविशेषेणोच्चैस्त्वेन व्यपदेशभेदसिद्धेरिति पूर्वपदावृत्त्या तृतीयः। गुणार्थो व्यपदेश इत्यत्र व्यपदेश-हेतुर्निराकरिष्यमाणोऽपि मुख्यत्वसूचनायेह निराकृतः। परिशेषेत्यनेन भाष्योक्तहेत्वर्थो व्याख्यातः।

---

१. क. यजूंष्येव वा।

यद्वा त्रिष्वेव मन्त्रत्वोपसंहारान्मन्त्र एव खल्वयं निगदभूतो भवतीति च वेदे निगदस्य मन्त्रशब्दसामानाधिकरण्येन निगदे मन्त्रशब्दप्रयोगादित्येक एव हेतुः ॥ ४० ॥

भा० प्र०—प्रदर्शित पूर्वपक्ष के समाधान में सिद्धान्ती का कहना है कि—'यजूंषि वा' सकल निगद यजुर्वेद मन्त्र के ही अन्तर्गत है 'तद्रूपत्वात्', क्योंकि उनमें यजुर्वेद का ही लक्षण घटित होता है। प्रश्लिष्ट पाठ यजुः का ही लक्षण है, अतः, निगद यजुः से भिन्न नहीं है। इसलिए, ऋक् और साम के अन्तर्गत नहीं है, निगद मन्त्र को छोड़कर अन्य कुछ नहीं है, 'अहे बुध्निय' इत्यादि श्रुति के अनुसार मन्त्र जब ऋक्, साम और यजुः को छोड़कर अन्य भाग नहीं है; तब इनको इन तीन में ही अन्तर्भुक्त मानना पड़ेगा; किन्तु, निगद में ऋक् और साम का लक्षण नहीं है, अपितु यजुः का धर्म है, इसलिए यह यजुः से भिन्न नहीं है।

'यजूंषि' = यजुः 'वा' = पक्ष-परिवर्तन सूचक, 'तद्रूपत्वात्' = क्योंकि तद्रूप अर्थात् यजुर्वेद के लक्षण से समन्वित है ॥ ४० ॥

वचनाद्धर्मविशेषः ॥ ४१ ॥

शा० भा०—वचनात्—प्रत्यायनसामर्थ्यात्। अस्ति हि पुरुषान्तरप्रत्यायनसामर्थ्यं केषांचिद् यजुषाम् ॥ ४१ ॥ उपसंहारः ॥

भा० वि०—एवं सिद्धान्तमुक्त्वा धर्मविशेषादिति पूर्वपक्षहेतोरन्यथासिद्धिमाह—**वचनादिति** ॥ ४१ ॥

त० वा०—न्यायप्राप्तोच्चैर्धर्मानुवादत्वज्ञानान्न विधानादिति व्याख्यातम्। यं त्वेतेऽर्थं वदन्ति, तमुपांशुत्वेन शक्नुयुर्वक्तुमिति वचनादित्युच्यते ॥ ४१ ॥

न्या० सु०—उच्चैस्त्वोपांशुत्वयोर्जातिधर्मत्वाभावान्न तावद्यजुष्ट्वेन निगदस्योपांशुत्वप्राप्तिः, यदि परं प्रायेण यजुर्वेदविहितत्वात्तत्प्राप्तिः स्यात् सास्य वचनेनैवोच्चैस्त्वावगमान्निरस्तेत्यभिधानायैतत्सूत्रम्। तत्र वचनशब्दो वचनं परमित्यादौ विधानवाचित्वेन प्रसिद्धः। कस्माद्भाष्यकृताभिधानवाचित्वेन व्याख्यात इत्याशङ्क्याह—**न्यायेति**। 'अग्नीदग्नीन् विहरेत्या'देर्निगदस्य प्रैषसामर्थ्यात्परप्रत्यायनेनार्थवत्त्वावगतेरुच्चैस्त्वं च विना परस्य प्रत्यापयितुमशक्यत्वान्न्यायप्राप्तेनोच्चैस्त्वेनोपांशुत्वबाध इत्यर्थः ॥ ४१ ॥

भा० प्र०—पूर्वपक्षियों का कहना है कि निगदों में प्रश्लिष्ट पाठ रूप यजुर्वेद का लक्षण समन्वित होने पर जब दूसरे को ज्ञान कराने के लिए उच्च स्वर से पठ्यमानत्वरूप स्वतन्त्र धर्म से युक्त को यजुर्मन्त्र कहा जाता है। 'पुरुषान्तर-प्रत्यायन-सामर्थ्यं केषाञ्चिद् यजुषाम्'। निगद में प्रश्लिष्ट पाठरूप धर्म रहने से निगदों को यजुः ही कहा जाता है, पर-प्रत्यायनरूप धर्म विशेष के कथन से यह सामर्थ्य यजुर्मन्त्र में ही होने से वह यजुः का ही धर्म विशेष है, इसी को 'वचनात्' इसके द्वारा कहा गया है।

'उपांशु यजुर्वेदेनान्यत्राऽऽश्रुत-प्रत्याश्रुत-प्रवर-संवाद-संप्रैषैश्च' (आप० श्रौ० सू० १।९०) आश्रावण प्रत्याश्रावण, प्रवर निर्देश, संवाद, संप्रैष के मन्त्र उच्च स्वर से उच्चार्यमाण होने पर निगद कहे जाते हैं। विशेष वचन होने से परप्रत्यायन रूप स्वतन्त्र धर्म विशेष भी स्वीकृत किया गया है।

'वचनात्' = वचन होने से अर्थात् परप्रत्यायनरूप सामर्थ्य होने से, 'धर्मविशेषः' = विशेष धर्म अर्थात् दूसरे के ज्ञान का उद्बोधन करना या उच्च स्वर में पढ़ा जाना ही विशेष धर्म है॥ ४१॥

अर्थाच्च ॥ ४२ ॥

शा० भा०—अस्ति च तैः पुरुषान्तरैः प्रत्यायितैः प्रयोजनम्। नोपांशूच्चार्यमाणाः पुरुषान्तरं प्रत्याययेयुः। तस्माद् धर्मविशेषोऽर्थवान्[1]। यानि च यजूंष्युच्चैरुच्चार्यन्ते, ते निगदाः। कुतः? निशब्दः प्रकर्षस्य वक्ता। यथा प्रकर्षेण रक्तं नितरां रक्तमित्युच्यते। गदतिर्गदनार्थः पाठवचनः। एष एव हि प्रकर्षो यदुच्चैस्त्वावच्छिन्नत्वम्।

ननु वाचनिको गुणो यजुषामुपांशुत्वम्? नेति ब्रूमः। गुणो नाम स भवति, यः स्वकार्यं कुर्वतामुपकारे वर्तते। न च परसम्बोधनार्थानां यजुषामुपांशुत्वं साहाय्ये वर्तते। तद्धि स्वकर्मक्रियाविघातं करोति। तेन पुरुषान्तरसंबोधनार्थमुच्चैस्त्वं गुणः। इतरार्थं तु वचनं भविष्यति। इतराणि यानि यजूंषि न परसम्बोधनार्थानि, तेषूपांशुत्वं निवेक्ष्यते॥ ४२॥

भा० वि—ननु प्रत्यायनसामर्थ्यात् कथं निगदानामुच्चैष्ट्वधर्मविशेषः इतरेषामपि यजुषां प्रत्यायकत्वाविशेषादत आह—**अस्ति हीति**। अग्नीदग्नीन्विहरेत्यादि-निगदानां प्रैषसामर्थ्यात् परप्रत्यायनार्थत्वावगतेरुच्चैस्त्वं च विना परस्य प्रत्याययितुमशक्यत्वात् न्यायप्राप्तेनोच्चैस्त्वेनोपांशुत्वस्य बाध एव युक्त इत्यर्थः।

ननूपांशुत्वे परप्रत्यायनाशक्तौ प्रैषत्वायोगात् प्राप्तकालतायां लोट् भविष्यतीत्याशङ्कानिरासार्थमर्थाच्चेति सूत्रं व्याचष्टे—**अस्ति च तैरिति**। प्रयोजनमग्निविहरणाद्यनुष्ठानं यस्मात्प्रैषत्वेन परप्रत्यायनार्थत्व एवार्थवत्त्वं तस्मात् अर्थादुच्चैष्ट्वमपि सिद्धमित्याह—**तस्मादिति**। इदानीमवयवार्थालोचनेनापि उच्चैस्त्वमिति हेत्वन्तराभिधानार्थत्वेनाप्येतत् सूत्रं व्याचष्टे—**यानि चेति**। एतदेव प्रश्नपूर्वकमुपपादयति—**कुत इति**। नन्वेवं प्रकर्षपाठसिद्धावपि कथमुच्चैस्त्वसिद्धिस्तत्राह—**एष एव हीति**। ननु यद्यप्येवं न्यायबलेन निगदानामुच्चैष्ट्वं तथापि न्यायेन वचनबाधो न युक्त इत्याशङ्कते—**नन्विति**। वाचनिकमपि

---

१. धर्मविशेषोऽर्थात्।

चोपांशुत्वमनुपकारकत्वेनानङ्गत्वान्निगदव्यतिरिक्तयजुर्विषयं विज्ञेयमिति परिहरति—**नेतीति**। अनुपकारकत्वेऽभिमतकार्यविरोधित्वं हेतुमाह—**तद्धीति**। इतरार्थमित्येतद्विवृणोति—**इतराणीति**॥ ४२॥

त० वा०-अस्ति च 'अग्नीदग्नीन्विहर' इत्यादिवचनेनाऽर्थोऽन्यथाऽनुष्ठानानुपपत्तेरिति धर्मविशेषप्राप्तिः। तथा च निगदशब्दावयवव्युत्पत्तिसिद्धिः। वाचनिकमपि चोपांशुत्वमनुपकारत्वेनाऽनङ्गत्वान्निगदव्यतिरिक्तयजुर्विषयं विज्ञायते॥ ४२॥

न्या० सु०—परप्रत्यायनार्थत्वादपि निगदस्य यजुष्ट्वेऽपि धर्मविशेषो युक्तः इत्येवमर्थतयैतत्सूत्रमाभासमानं पूर्वसूत्रेण पौनरुक्त्यापत्तेः, ननूपांशुत्वे परप्रत्यायनाशक्तौ प्रैषत्वायोगात्प्राप्तकालतायां लोट् भविष्यतीत्याशङ्कानिरासार्थत्वेनैतद्व्याख्यानार्थमस्ति चेति भाष्यं व्याचष्टे—**अस्ति चेति**। अवयवार्थालोचनेनाप्युच्चैस्त्वमिति हेत्वन्तराभिधानार्थत्वेनैतत्सूत्रव्याख्यानार्थं यानीति भाष्यं व्याचष्टे—**तथा चेति**। न्यायेन वचनबाधो न युक्त इत्याशङ्कोपन्यासपूर्वं तन्निरासार्थं नन्वित्यादिभाष्यं व्याचष्टे—**वाचनिकमपि चेति**। परसम्वेदनार्थत्वान्निगदस्य तद्वारेणोच्चैस्त्वे, स्वरूपतश्चोपांशुत्वे प्राप्ते।

गुणे स्वरूपतो धर्मः प्रधानद्वारतो परः।
यत्र स्यात्तत्र विज्ञेयं गुणधर्मस्य बाधनमिति॥

अनेन न्यायेनोच्चैस्त्वस्योपांशुत्वात् बलीयस्त्वात् प्रमाणबलाबलाच्च प्रमेयबलाबलबलीयस्त्वस्योक्तत्वाद्वाचनिकस्याप्युपांशुत्वस्य न्यायप्राप्तेनोच्चैस्त्वेन युक्तो बाधः यजुरन्तरविषयत्वाच्च वचनानर्थक्यपरिहार इत्याशयः॥ ४२॥

भा० प्र०—अब यह आशङ्का होती है कि निगदों के उच्च स्वर से उच्चारित होने से वे स्वतन्त्र क्यों नहीं होगे? इस आपत्ति के उत्तर में सिद्धान्ती का कहना है कि वचनानुसार परप्रत्यायनरूप स्वतन्त्र धर्म को स्वीकार करना आवश्यक होने से निगद का उच्चैः पठ्यमानत्व स्वयं ही प्राप्त होता है, क्योंकि, ऐसा न होने पर परप्रत्यायनरूप प्रयोजन सिद्ध नहीं हो सकता है। कारण, यजुर्मन्त्र यदि उच्च स्वर में उच्चारित न हो तो अन्य व्यक्ति के प्रत्यायन रूप प्रयोजन की सिद्धि नहीं होगी, क्योंकि, यजुर्वेद का अनुच्च स्वर से उच्चारण होने पर अन्य व्यक्ति उसको नहीं सुन सकता है, और ऐसी स्थिति में उसके कर्म के विषय में ज्ञान विशेष का उद्बोध नहीं हो सकता है, इसलिए, परप्रत्यायनरूप प्रयोजन की सिद्धि के लिए निगदों का उच्च स्वर में पाठ किया जाता है, अन्य बात यह भी है कि यजुः उच्च स्वर से पठित होने से उसको निगद इस स्वतन्त्र नाम से कहा जाता है। क्योंकि, 'नि' शब्द का अर्थ प्रकर्ष होता है और 'गद' शब्द का अर्थ पाठ होता है। अतः 'निगद' शब्द का अर्थ प्रकर्ष के सहकार में अर्थात् उच्च स्वर में पाठ होता है। परप्रत्यायन यह यजुः का गुण विशेष है, जिसके प्रभाव से कार्य विशेष का सम्पादन होता है—वह गुण है। यजुः

के समान निगद भी यदि अनुच्च स्वर में पठित होता है, तब परप्रत्यायन नहीं हो सकता है, अतः उच्च स्वर में पाठ ही यजुः का गुण विशेष है उसका द्योतक है।

'अर्थात् च' = अर्थ हेतु से भी अर्थात् प्रयोजन के कारण भी उच्च स्वर से पाठ आवश्यक है ॥ ४२ ॥

गुणार्थो[1] व्यपदेशः ॥ ४३ ॥

शा० भा०—अथ यदुक्तं व्यपदेश इति, स चैकत्वेऽपि[2] गुणतो भवति। यथा, इतो ब्राह्मणा भोज्यन्ताम्, इतः परिव्राजका इति। एवमुच्चैस्त्वेन गुणेन तान्येव यजुंषि व्यपदिश्यन्ते[3] निगदा इति ॥ ४३ ॥ आ० ॥

भा० वि०—व्यपदेशाच्चेति पूर्वपक्षहेतुं दूषयति—**गुणार्थ इति**। गुणत इति उच्चैष्ट्वगुणयोगादित्यर्थः। अनेन गुणोऽर्थः प्रवृत्तिनिमित्तं व्याख्यातम्—**यथेति**। ब्राह्मणत्वाविशेषेऽपि यथा धर्मभेदात् परिव्राजका इति व्यपदिश्यन्ते एवं यजुष्ट्वाविशेषेऽपि उच्चैष्ट्वेन निगदा इति व्यपदिश्यन्त इत्यर्थः ॥ ४३ ॥

त० वा०—ब्राह्मणपरिव्राजकवद् गुणेन व्यपदेशभेदः ॥ ४३ ॥

न्या० सु०—यस्तु व्यपदेशो भेदहेतुत्वेनोक्तः। स यजुष्ट्वेऽपि निगदस्यौच्चैस्त्वगुणाभिधानार्थत्वेनोपपन्नत्वान्न भेदसाधक इत्येवं सूत्रव्याख्यानार्थमथेति भाष्यं व्याचष्टे—**ब्राह्मणेति** ॥ ४३ ॥

भा० प्र०—पूर्वपक्षी का कहना था कि यजुः निगद नहीं है एवं निगद यजुः नहीं है। इस प्रकार पृथक् रूप में उल्लेख होने से निगद यजुः के अन्तर्गत नहीं हो सकता है, इसके उत्तर में सिद्धान्ती ने कहा है—'गुणार्थः व्यपदेशः' पूर्वोक्त रूप से उच्च स्वर में पठ्यमानत्वरूप विशेष गुण होने से पृथक् रूप में उल्लेख किया गया है, जैसे ब्राह्मण को बाहर बैठाकर भोजन कराओ और परिव्राजक को भीतर बैठाकर भोजन कराओ इस प्रकार ब्राह्मण और परिव्राजक का पृथक् रूप में उल्लेख किया गया है, वस्तुतः परिव्राजक भी ब्राह्मण है, क्योंकि, ब्राह्मण से अतिरिक्त वर्ण संन्यास का अधिकारी नहीं होता है, साधारण ब्राह्मण की अपेक्षा उनका पारिव्राज्य (सन्न्यास) रूप विशेष गुण माना गया है, इस स्थल में भी इसी प्रकार समझना चाहिए, अतः निगद यजुः से भिन्न नहीं है।

'गुणार्थः' = गुण के लिए अर्थात् इस प्रकार विशेष गुण होने से, 'व्यपदेशः' = पृथक् भाव में व्यपदेश अर्थात् उल्लेख किया गया है ॥ ४३ ॥

---

१. गुणाच्च व्यपदेशः। २. ब. स एकत्वे। ३. ब. व्यपदेक्ष्यंते।

सर्वेषामिति चेत् ॥ ४४ ॥

शा० भा०—यदि[1] य उच्चैर्गद्यते, स निगदः, ऋगपि निगदः प्राप्नोति ॥४४॥ आ० ॥

भा० वि०—नायमुच्चैष्ट्वगुणनिमित्तो व्यपदेशोऽतिप्रसङ्गादिति शङ्कते—**सर्वेषामिति**। एतद्व्याचष्टे—**यदीति** ॥ ४४ ॥

त० वा०—अतिप्रसङ्गद्वारेण गुणस्य व्यपदेशनिमित्ततां व्यभिचारयति ॥४४॥

न्या० सु०—निगदशब्दस्योच्चैस्त्वगुणाभिधानार्थत्वे सत्यृक्ष्वपि निगदशब्दः स्यादित्येवमर्थत्वेन सूत्रव्याख्यानार्थं यदि त्विति भाष्यं व्याचष्टे—**अतिप्रसङ्गेति** ॥ ४४ ॥

भा० प्र०—उच्च स्वर में पठ्यमानत्वरूप गुण होने से यजुर्मन्त्र को निगद कहा गया है। इस सिद्धान्त को मानने पर 'उच्चैः स्वर से पठ्यमान ऋक् आदि को निगद क्यों नहीं कहा जाता है ? अतः, सिद्धान्ती का मत मानने पर उच्च स्वर में पठ्यमान ऋक् आदि को भी निगद कहा जाता है—यह पूर्वपक्षी की आशङ्का है।

'सर्वेषाम्' = सभी का अर्थात् ऋक् आदि को भी निगद नाम से कहा जाता है, 'इति चेत्' = यदि यह कहा जाय ॥ ४४ ॥

न ऋग्व्यपदेशात् ॥ ४५ ॥

शा० भा०—न ऋचो निगदा इति व्यपदिश्यन्ते। अयाज्या वै निगदा ऋचैव यजन्तीति पृथक्त्वनिमित्त हि व्यपदेशा भवन्ति। उच्यते। व्यपदेशो लिङ्गम्। प्राप्तिरुच्यतामिति। अपादबद्धे गदतिर्वर्तते, अपादबद्धो हि गद्य[2] इत्युच्यते ॥ ४५ ॥

इति त्रयोदशं निगदाधिकरणम् ॥ १३ ॥

भा० वि०—अतिप्रसङ्गं परिहरति—**नेति**। नञर्थमाह—**न चेति**। ऋचस्सकाशान्निगदस्य भेदेन व्यपदेशादिति हेतुभागं व्याचष्टे—**अयाज्या इति**। निगदं निन्दित्वा ऋचां विधानं भेदे सत्येव भवति तमेव निन्दित्वा तस्यैव विधानानुपपत्तेः इत्यर्थः। प्राप्तिमनभिधाय लिङ्गमात्राभिधानमसाधकत्वादयुक्तमिति शङ्कते—**उच्यत इति**। प्राप्तिं दर्शयन्नुत्तरमाह—**अपादबन्धे हीति**। तत्र प्रमाणमाह—**अपादबन्धो हीति**। गदतेरपादबन्धसमूहवाचिनो निशब्दोपसृष्टस्योच्चैरविच्छिन्नोच्चार्यमाणापादबन्धपदसमूहवाचितावगीयत इत्याशयः।

---

१. ब. उच्चै। २. ब. गद्यते।

प्रयोजनं पूर्वपक्षे निगदानामृग्यजुस्सामान्यत्वेन वाचस्तोमेऽपि शंसनाभावः। सिद्धान्ते यजुष्ट्ववाच्छंसनमिति ॥ ४५ ॥

त० वा०—न तावदतिप्रसङ्गोऽस्ति, निगदं निन्दित्वा ऋचो विधानात्। न हि तमेव निन्दित्वा, तस्यैव विधिरवकल्पते। न च व्यभिचारित्वम्। गदतिवशेन यजुष्ट्वे सति, धर्मविशेषस्य व्यपदेशभेदनिमित्तत्वात् ॥ ४५ ॥

(इति त्रयोदशं निगदाधिकरणम् ॥ १३ ॥)

न्या० सु०—ऋचः सकाशात् निगदस्य भेदेनोपदेशान्नर्चो निगदत्वप्राप्तिरित्येवं सूत्रव्याख्यानार्थं नेत्यादिभाष्यं व्याचष्टे—**न तावदिति**। प्राप्तिमनभिधाय लिङ्गमात्राभिधानमसाधकत्वादयुक्तमित्याशङ्क्यातिप्रसङ्गस्तावन्निगदशब्दस्यानृग्वाचित्वहेतुप्रवृत्तिनिमित्तप्रापकाज्ञानेऽपि व्यपदेशान्निरस्तः। या तूच्चैस्त्वे सत्यप्यृचि निगदशब्दाप्रयोगात् व्यभिचाराशङ्का, तन्निरासः प्राप्त्यभिधानभाष्ये भविष्यतीति तावच्छब्देन सूचितम्। उच्यतइत्यादिप्रश्नपूर्वं प्राप्त्यभिधानार्थं भाष्यं व्याचष्टे—**न चेति**। गदतेरपादबद्धसमुदायवाचित्वात्प्रकर्षवाचिनि शब्दोपसृष्टस्योच्चैरविनोच्चार्यमाणापादबद्धसमूहवाचितावसीयतइत्याशयः।

प्रयोजनं पूर्वपक्षे निगदानामृग्यजुःसामान्यत्वाद्वाचस्तोमे शंसनाभावः। सिद्धान्ते यजुष्ट्वाच्छंसनमिति ॥ ४५ ॥

॥ इति त्रयोदशं निगदाधिकरणम् ॥

भा० प्र०—पूर्वपक्षियों की आकाङ्क्षा भित्तिहीन है। कारण, 'अयाज्या वै निगदाः। यस्माद्दचैव यजन्ति' निगद याज्य = याग में प्रयोज्य नहीं है, किन्तु ऋक् मन्त्र का उच्चारण कर ही याग करें, इस प्रकार व्यपदेश के द्वारा ऋक् से निगद को पृथक् कर दिया जाता है, अतः, ऋक् आदि मन्त्र उच्च स्वर में पठित होने पर भी निगद पदवाच्य नहीं होगा, दूसरी बात यह भी है कि गद धातु से, जो पादबद्ध=छन्दोबद्ध नहीं है, वैसे अपादबद्ध वाक्यरूप अर्थ प्रकाश किया जाता है, क्योंकि, अपादबद्ध वाक्य को गद्य कहा जाता है. किन्तु, ऋक् पादबद्ध है, इसलिए वह निगद नहीं हो सकता है।

'न ऋक्' = नहीं, ऋक् आदि को निगद नहीं कहा जाता है, 'व्यपदेशभेदात्' = क्योंकि, ऋक् यह व्यपदेश भेद रहता है अर्थात् पृथक् रूप में उल्लेख किया जाता है ॥ ४५ ॥

[१४] अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात् ॥ ४६ ॥ सि० ॥

शा० भा०—अथ प्रश्लिष्टपठितेषु यजुःषु कथमवगम्येत–इयदेकं यजुरिति ?

यावता पदसमूहेनेज्यते, तावान् पदसमूह एकं यजुः। कियता चेज्यते[1] ? यावता क्रियाया उपकारः प्रकाश्यते। ता[2]वद्वक्तव्यत्वाद् वाक्यमित्युच्यते। तेनाभिधीयते—अर्थैकत्वादेकं वाक्यमिति। एतस्माच्चेत्कारणादेकवाक्यता भवति। तस्मादेकार्थः पदसमूहो वाक्यम्। यदि च विभज्यमानं साकाङ्क्षं पदं भवति। किमुदाहरणं देवस्य त्वा सवितुः प्रसव इति।

ननु पदं पदमत्रैकार्थम्। सत्यम्। न तु तद्विभागे साकाङ्क्षम्। न[3] तर्ह्यर्थैकत्वमुपपद्यते, बहुत्वात् पदार्थानाम्। पदसमुदायस्य च पृथगर्थो नास्तीत्युक्तम्। भेदः, संसर्गो वा वाक्यार्थ इति यद्युच्यते; तथाऽप्येकार्थता न स्यात्—बहुपदे भेदानां संसर्गाणां च बहुत्वात्।

एकप्रयोजनत्वादुपपन्नम्। यथा तावद् देवस्य त्वेति निर्वापप्रकाशनम्। तस्य विशिष्टस्य वाचक एतावान्पदसमूहः तद्वाक्यम्।

नन्वत्र देवस्य त्वा सवितुः प्रसवे निर्वपामीत्येकं वाक्यम्, अश्विनोर्बाहुभ्यां निर्वपामीत्यपरम्। एवं बहूनि वाक्यानि। यदि निर्वपामीत्यनुषङ्गः ततो बहूनि वाक्यानि। न त्वेवमनुषङ्गो भवति।

यदि गुणभूतो निर्वपामीति, तदा प्रतिप्रधानं भिद्येत। न च निर्वापो देवस्य त्वेत्येवमादीनामर्थेनोच्यते। साधनप्राधान्ये ह्यदृष्टार्थता वचनस्य स्यात्। निर्वापे पुनः प्रधाने, दृष्टं कार्यं निर्वापप्रकाशनम्। तत्सर्वैर्विशेषणैर्विशिष्टमुच्यते। तस्मादविरोधः। यथा च पदं पदेन विशेष्यते तथोक्तं तद्भूतानामिति। तस्मादेकं वाक्यम्॥

दुरुक्तचिन्ताकरणम्। अर्थैकत्वमात्रोक्तौ दूषणम्

अथ किमर्थमुभयं सूत्रितम्, अर्थैकत्वादिति च विभागे साकाङ्क्षमिति च ? उच्यते। भवति किंचिदेकार्थम्, न तु विभागे साकाङ्क्षम्। यथा 'भगो वां विभजतु, अर्यमा वां विभजतु[4] इत्येकार्थाः सर्वे विभागमभिदधति[5]। ननु भगविशिष्टाद्विभागादर्यमविशिष्टोऽन्यो विभागः ? नेत्युच्यते। विभागसामान्येनास्य प्रयोजनम्, न विशेषेण। सामान्ये हि दृष्टाऽर्थो[6] भवति, न विशेषे। विभागे तु न साकाङ्क्षम्[7]। तस्माद्भिन्नमिदं वाक्यं विभागे विकल्प्यते।

विभागे साकांक्षमित्येतावन्मात्रोक्तौ दूषणम्

तथा स्योनं ते सदनं कृणोमि, घृतस्य धारया सुशेवं कल्पयामि। तस्मिन्सीदाऽमृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमान इति विभागे साकाङ्क्षम्। द्वे तु

१. ब. वेज्यते। २. तावच्च। ३. ब. न च।
४. ब. पूषावांविभजत। ५. ब. अभिवदंति। ६. ब. दृष्टार्थोनविशेषेन।
७. क. (टिप्पण्यां) साकाङ्क्षत्वाविनाभावेन।

प्रयोजने क्रियेते सदनकरणम्, पुरोडाशप्रतिष्ठापनं च। तस्माद्भिन्ने वाक्ये। पूर्वं सदनकरणे विनियुज्यते, उत्तरं पुरोडाशप्रतिष्ठापने। तस्मात्सम्यक् सूत्रितम्, न सूत्रोपालम्भो भवति ॥ ४६ ॥

इति चतुर्दशं यजुष्यामेकवाक्यत्वलक्षणाधिकरणम् ॥ १४ ॥

भा० वि०—सङ्गतिगर्भं सूत्रस्य पातनिकामाह—**अथेति**। ऋग्यजुस्सामात्मके मन्त्रभेदेऽभिहितेऽप्यृचो यजूंषि सामानीति बहुवचनादवान्तरभेदजिज्ञासायामेतावतीयमृगेका एतावदिदमेकं सामेत्युपदेशकाध्येतृवाक्यादेवक्सामयोर्भेदसिद्धेर्लक्षणानपेक्षणेऽपि च प्रश्लिष्टपठितयजुष्ट्वलक्षणेन विनैतावदेकं यजुरित्यनवगमात्तद्भेदासिद्धेः तल्लक्षणं वाच्यमित्यर्थः। तत्रावयवव्युत्पत्तिबलेन तावद्यजुःपरिमाणमाह—**यावतेति**। यजेरुसिप्रत्यये कृते यजुश्शब्दव्युत्पत्तेः तस्य च बाहुलकस्य प्रयोगानुसारेण कारणवाचित्वावगमात् यावदेकयागसाधनं तावदेकं यजुरिति व्युत्पत्त्यावसीयत इत्यर्थः। ननु नेदं लक्षणं श्रुत्यादिभिश्छेदनादौ विनियुक्तानामिषे त्वेत्यादीनां यागसाधनत्वाभावेनाव्यापकत्वादित्याशङ्कते—**कियतेति**। परिहरति—**यावतेति**। सर्वमन्त्राणामनेन यजेतेति प्रथमं प्रकरणाम्नातानुमितवाक्येन यागे विनयोगो भवति, ततस्साक्षाद्यागसम्बन्धासंभवे सति तदुपकारिप्रकाशनेन तैरिष्टमेव भवतीति कल्प्यते। तस्माद्युक्तं सर्वेषां यागसाधनत्वमित्यर्थः। एवं व्युत्पत्तिबलेन यजुःपरिमाणमुक्त्वेदानीं वाक्यविशेषस्यैवयजुष्ट्वाद्वाक्यपरिमाणेन यजुःपरिमाणं वक्तुं वाक्यलक्षणपरं सूत्रं व्याचष्टे—**तावच्चेति**। यावदेकयागसाधनं तावदेककार्यसमर्थत्वेन् वचनार्हत्वात् वाक्यमित्युच्यत इत्यर्थः। द्वितीयो वाक्यशब्दो यजुर्विषयः। अनेनार्थैकत्वात् प्रयोजनैकत्वादेकं वाक्यम् एकं च वाक्यम् एकं यजुरिति सूत्रं व्याख्यातम्।

ननु मन्त्रावान्तरभेदप्रस्तावाद् यजुर्भेदे प्रतिपाद्ये यजुःपरिमाणलक्षणमप्यसङ्गतमित्याशङ्क्याह—**एतस्माच्चेदिति**। एतस्माच्चेदेकार्थत्वात् कारणादेकयजुर्वाक्यता भवति तस्मादेव यावाननेकार्थः पदसमूहस्तावदेकं यजुर्वाक्यम्। यदि च विभज्यमानं पदं साकाङ्क्षं भवति अधिकं तु यजुरन्तरमिति सावधारणत्वेन भेदप्रतिपादनपरं योज्यम्। अभिधेयवाचिनमर्थशब्दं गृहीत्वा पृच्छति—**किमिति**। न तावत्पदं तस्यैकार्थत्वेऽपि विभज्यमानसाकाङ्क्षत्वात्, नापि वाक्यं तस्य विभज्यमानसाकाङ्क्षत्वेऽप्येकार्थत्वाभावादित्याशयः। प्रयोजनवाचिनमर्थशब्दं वाक्यं चोदाहरणं गृहीत्वा परिहरति—**देवस्य त्वेति**। परस्वाभिप्रायं विवृणोति—**नन्वित्यादिना**। भेदानां संसर्गाणां च बहुत्वादित्यनेन। एकैकस्यैव पदस्यैकार्थ्यात् तावन्मात्रमुदाह्रियतां किं पदसमूहेनेत्यर्थः।

सिद्धान्त्याह—**सत्यमिति**। यदि साकाङ्क्षावयवत्वाभावात् न पदमात्र-मुदाहरणं तर्ह्येकार्यत्वाभावान्न पदसमूहोऽपीत्याह पूर्ववादी—**न तर्हीति**।

ननु पदसमूहस्य पदार्थातिरिक्तैकार्थवाचितास्त्विति नेत्याह—**पदसमूहस्य चेति**। उक्तं तद्भूताधिकरण इति शेषः।

ननु पदार्थातिरिक्तैकार्थनिर्भागवाक्यार्थायोगेऽपि पदार्थानां भेदः संसर्गो वा वाक्यार्थ इत्याशङ्कते—**भेद इति**। परिहरति पूर्वपक्षी—**तथापीति**। व्यक्तिपदार्थपक्षे शुक्ला गौरित्यादौ गोशब्देन व्यक्तिमात्राभिधानात् शुक्लशब्देन कृष्णादिभ्यो भेदः प्रतिपाद्यते गोशब्देन चाश्वादिभ्यो भेदः तयोश्च प्रतियोगिभेदेन भेदादेकत्वाभावः, तथा कृतिपदार्थपक्षे गोत्वशुक्लत्वयोरेकार्थसमवायलक्षण-संसर्गस्य प्रतियोगिभेदेन भेदादेकत्वाभाव इत्येकार्थता न स्यादित्यर्थः। सिद्धान्ती स्वाभिप्रायं विवृणोति—**एकप्रयोजनत्वादिति**। अर्थशब्दस्य प्रयोजनवाचित्वादि-तरपदार्थविशिष्टैकपदार्थप्रतीतेश्च प्रयोजनस्यैक्यात् उपपन्नं लक्षणमित्यर्थः। वाक्यस्यैकप्रयोजनत्वमुक्तोदाहरणनिष्ठतया दर्शयति—**यथेति**। प्रकाशनं प्राधान्ये-नेतिशेषः। तस्य निर्वापस्य कर्मसमवायितया प्राधान्येन प्रकाश्यस्याशेष-सवित्रादि-विशिष्टस्य वाचकः।

पदसमूह इत्यर्थः। परस्तुतिनिर्वापप्राधान्यमबुद्ध्वा पृच्छति—**नन्विति**। सिद्धान्त्याह—**यदीति**। नन्वनुषङ्ग एव निर्वपामीत्यस्येति नेत्याह—**स चेति**। गुणत्वे वा कथमनुषङ्गः तत्राह—**तथेति**। गुणत्वे सतीति यावत्। अस्तु तर्हि गुणत्वमपि निर्वापस्य नेत्याह—**न चेति**। कुत इत्यत आह—**साधनेति**। सवित्रादिसाधन-प्राधान्ये तस्य कर्मासमवायित्वेनाप्रकाश्यत्वादित्यर्थः। स्वपक्षे विशेषमाह—**निर्वापे पुनरिति**।

ननु निर्वापपदस्य समवेतार्थस्य दृष्टार्थत्वेऽपि कथमितरेषां तथात्वं तत्राह—**तदिति**। प्रधानं निर्वापरूपमित्यर्थः। **अविरोध इति**। वाक्यभेदक्षणविरोधाभाव इत्यर्थः।

ननु पदैः स्वस्वमर्थमभिधाय निवृत्तव्यापारैः कथं विशिष्टमुच्यते तत्राह—**यथा चेति**। पदार्थाभिधानद्वारा विशिष्टार्थलक्षकत्वमुक्तमित्यर्थः, तस्मात्पदस-मूहस्य युक्तं वाक्योदाहरणत्वमित्याह—**तस्मादिति**। विशेषणद्वयानर्थक्यं शङ्कते—**अथेति**। यस्य पदसमूहस्यैकप्रयोजनत्वं तस्य व्यस्तस्य तदशक्तेरर्थसिद्धं विभागे साकाङ्क्षत्वं तथाविभज्यमानसाकाङ्क्षत्वे संहतैकप्रयोजनत्व-मप्यर्थसिद्धमिति न पृथग्वाच्यमित्यर्थः। प्रत्युदाहरणप्रदर्शनेन परिदर्शनेन परिहरति—**उच्यत इत्यादिना**। कथमेषां शब्दानामेकार्थत्वतत्राह—**एकार्था इति**। पुरोडाशविभागप्रकाशनार्थत्वादित्यर्थः। ऐकार्थ्यासिद्धिं शङ्कते—**नन्विति**।

भागादिविशिष्टविभागविशेषस्य निष्प्रयोजनत्वात् प्रयोजनवतश्च सामान्यस्यैकत्वात् इति परिहरति—**नेत्युच्यत इति**। अस्य कर्मणः नन्वस्तु विशेणादृष्टं प्रयोजनं न दृष्टे सत्यदृष्टकल्पनानुपपत्तेः इत्याह—**सामान्येहीति**। एवमर्थैकत्वमुक्त्वा विभागेनाकाङ्क्षत्वमाह—**विभागे त्विति**। तद्वाक्यगतक्रियानिराकाङ्क्षत्वादित्यर्थः। विभाग निराकांक्षत्वफलमाह—**तस्मादिति**। एकार्थत्वप्रत्युदाहरणमाह—**तथेति**। सापेक्षत्वं तस्मिन्निति। तच्छब्दस्य यच्छब्दापेक्षत्वादित्यर्थः ऐकार्थ्यभावमाह—**द्वे त्विति**। तत्फलमाह—**तस्मादिति**। तर्ह्यन्यतरानर्थक्यमत आह—**पूर्वमिति**। तस्मादर्थवद्विशेषणद्वयमाह—**तस्मादिति**॥ ४६॥

अथ **चतुर्दशमेकवाक्यतालक्षणाधिकरणम्**

केषाञ्चिन्मतेन शंका

त० वा०—केचिदेतत्सूत्रं वाक्यलक्षणपरत्वेन व्याचक्षते। तत्रापि किल लौकिकवैदिकवाक्यलक्षणसंभवे हेतुप्रसिद्धिवशेन लौकिकानामेवैतल्लक्षणम्। कुतः?

अन्यतोऽवगतेऽर्थे हि लोके वाक्यं प्रवर्तते।
तत्रैकार्थत्वविज्ञानात्सुखबोधैकवाक्यता॥

लौकिकानां हि वाक्यानां प्रमाणान्तरेणार्थः, तदेकत्वं चावधार्यते। तत्र प्रसिद्धेन हेतुना शक्यमेकवाक्यत्वमवगन्तुम्। वैदिकानां पुनरनन्यप्रमाणगम्यत्वात् प्राग्वाक्यात्तदेकत्वाज्ञानादज्ञातेऽर्थे तदेकत्वसिद्धिर्नास्तीत्येतल्लक्षणानुपपत्तेरर्थापत्त्या विपरीतं लक्षणं द्रष्टव्यम्। वाक्यैकत्वादर्थैकत्वमिति। यथैव हि धर्मिणा वाक्येन धर्म्यन्तरमर्थः प्रतिपाद्यते, तथैकवाक्यधर्मेणैकत्वेनार्थैकत्वम्।

आह च—

नित्यवाक्याधिगम्यत्वाद्यथावाक्यं प्रवर्तते।
वेदार्थस्तदसिद्धेस्तु न वाक्यस्यार्थवश्यता॥

तन्निरासः

अत्राभिधीयते—वेदव्याख्यानप्रवृत्तस्य जैमिनेः कः प्रसङ्गो लौकिकवाक्यलक्षणाभिधाने? वैदिकवाक्यलक्षणस्यापि भेदलक्षणे कः प्रस्तावः। किमर्थं प्रमाणलक्षण एव नोक्तम्। एकशब्दश्च न वक्तव्यः, अर्थैकत्वाद्वाक्यमित्येतावतैव सिद्धत्वात्। कथं च मन्त्राधिकारे तदसंबद्धोऽर्थोऽभिधीयते। भाष्यकृतश्च **प्रश्लिष्टपठितेषु यजुःष्वित्युपन्यासः** प्रमाणवानपि विना कारणेनातिक्रान्तः।

किं च—

यजुर्भेदं च मुक्त्वैतद्वाक्यैकत्वस्य लक्षणम्।
मन्त्रब्राह्मणलोकेषु वक्तव्यं क्वोपयुज्यते॥

ऋक्सामयोस्तावत्परिमाणं प्रयोगसमर्थं प्रसिद्धमिति, न कश्चिद्वाक्यलक्षणात्, एकवाक्यतालक्षणाद्वोपकारो भवति। तथा ब्राह्मणेऽग्निहोत्रादिवाक्यैः साध्यसाधनेतिकर्तव्यतावत्यां भावनायां नियुक्तेषु पुरुषेष्वेकानेकवाक्यज्ञानं क्वोपयुज्यते।

नन्वयमुपयोग एकवाक्यतालक्षणज्ञो वाक्यभेदं परिहरिष्यति। नायमुपयोगः। कुतः— ?

वाक्यभेदो ह्यसामर्थ्यं शब्दावृत्त्यादिदोषतः।
एकनानात्वविज्ञाननिरपेक्षोऽवधार्यते।

एकवाक्यतालक्षणस्यानुपयोग वर्णनम्

पद-तदेकदेश-तत्समूहावृत्तिप्रसङ्गात्मकः तद्विभागलक्षणो वा वाक्यैकत्वनानात्वज्ञाननिरपेक्षैरेव दोषत्वेनावधार्यते। विभागलक्षणे गम्यमानसम्बन्धपरित्यागः, अनेकादृष्टकल्पना च दोषः। इतरत्राऽऽवृत्तेरवेदत्वादप्रामाण्यमिति, नैकवाक्यलक्षणेनाऽर्थः। पौरुषेयवाक्यं[1] तु लक्षणनिरपेक्षस्य लोकस्य व्यवहारसिद्धेरत्यन्तानौपयिकत्वम्।

यदि चार्थैकत्वेन वाक्यैकत्वमवधार्यते, वाक्यस्यार्थप्रत्यायनार्थत्वात्, तत्स्वरूपैकत्वज्ञानोत्तरकालभाविना किं वाक्यैकत्वज्ञानेन। वक्तॄणां च परप्रत्यायनार्थो वाक्यप्रयोग इति, नाऽऽत्मार्थं लक्षणज्ञानापेक्षा। श्रोतॄणां पुनरत्यन्ता[2]नवगतेऽर्थे प्रवर्तमानं पुरुषवाक्यमपि न वेद[3]वाक्याद्भिद्यते। अवगतार्थं त्वनुवादत्वादनादृत्यमेवेति नैकानेकज्ञानमपेक्ष्यते।

प्रकारान्तरेण शंका

किमर्थं च वैदिकानां लक्षणं नोक्तम्? यदि त्वर्थापत्त्योक्तमेवेति। तन्न। श्रुत्या तल्लक्षणमभिधायाऽर्थापत्त्या लौकिकवाक्य[4]सिद्धिराश्रयितव्या। न चार्थापत्तिः सम्भवति। न ह्येतल्लौकिकवाक्यलक्षणज्ञानमीदृशेन वैदिकवाक्यलक्षणाज्ञानेन[5] विना नोपपद्यते। न चैतस्यापि वाक्यलक्षणता। वाक्यैकत्ववशेनार्थैकत्वलक्षणार्थापत्त्युपन्यासात्।

अपि च कदाचिद्वैदि[6]कवाक्यानामप्येतल्लक्षणम्। अत्यन्तविप्रकृष्टं वा किंचिद्भवेदित्याशङ्कितत्वान्न नियोगतोऽर्थापत्तिः। न च परिसंख्या, सामान्यविशेषभेदानुपादानात्।

---

१. क. वाक्येषु (टिप्पण्यां) २. क. अन्यतोऽनवधारिते (टिप्पण्यां)।
३. क. वैदिकवाक्यात् (टिप्पण्यां)। ४. क. लौकिकव्यवहारसिद्धिः (टिप्पण्यां)।
५. क. लक्षणेन। ६. क. वैदिकानां।

यद्वि हि सामान्येनेदं लक्षणं क्वचिदभिधाय, पुनः केवलपौरुषेयसंबद्धमुच्येत, ततः परिसंख्यावशेन वैदिकानामिदं तावन्न भवतीत्येतावन्मात्रं गम्येत। न तु लक्षणविशेषोऽनेकोपप्लवात्। एवमपि हि विपर्ययकल्पनं संभवति, अर्थानेकत्वादेकं वाक्यं निराकाङ्क्षं चेद्विभागे स्यादिति।

अथ वाऽर्थैकत्वान्नानावाक्यत्वमिति। तस्मादकल्पनेयम्।

किं च—

कथं चार्थानपेक्षत्वे वाक्यैकत्वं प्रसिध्यति।
न हि वर्णस्वरूपेण ज्ञातेनैतन्निरूप्यते॥

वाक्यैकत्वाच्चार्थैकत्वेऽवधार्यमाणे, अवश्यमर्थनिरपेक्षं वाक्यैकत्वमवगन्तव्यम्। न च तस्यावधित्वेन किंचित्पश्यामो वर्णशतम्, वर्णसहस्रं वा।

तथा हि—

अज्ञातार्थेषु वर्णेषु बहुवाक्यैकवर्तिषु।
न कदाचिन्मतिर्दृष्टा वाक्येयत्त्वावधारणे॥
तस्मात्पदेषु यावत्सु श्रूयमाणेषु दृश्यते।
विस्पष्टमैक्यमर्थस्य तावतामेकवाक्यता॥

लोकमन्त्रब्राह्मणेष्वव्यभिचार्येतदेव वाक्यलक्षणमिति स्थितम्।

यत्तु न प्राग्वाक्यादर्थतदेकत्वावधारणमस्तीति।

अत्र ब्रूमः—

पदार्थैः पदविज्ञातैर्वाक्यार्थः प्रतिपाद्यते।
लोकसिद्धैर्न तत्रास्ति वाक्यैकत्वनिमित्तता।

यदि हि वाक्यं पदवद्वाचकं भवेत्, ततस्तदेकत्वानेकत्वानुवर्तिता वाक्यार्थस्याभ्युपगम्येत कदाचित्। यदा तु पृथग्भूतैरेव पदैरितरेतरनिरपेक्षैः स्वेषु पदार्थेषूक्तेषु तत्संसर्गादेव पदव्यापारानपेक्षो वाक्यार्थप्रत्ययो भवति, तद्वशेन च तावन्ति पदान्येकं वाक्यमित्यवधार्यते। न तदा वाक्यतदेकत्वयोर्व्यापारं पश्यामः। तस्मादविरोधः।

भावनैव च वाक्यार्थः स्वकारकविशेषिता।
तस्याश्च ज्ञायते नित्यं भेदः शब्दान्तरादिभिः॥

यस्मिन्पदसमूहे शब्दान्तरादिभिर्न भावनान्तरं प्रतिपाद्यते, तस्यैकवाक्यत्वम्, भावनान्तरापेक्षया तु नानात्वम्। तच्चैतदुभयमप्यन्यत एव ज्ञायत इत्यनिमित्तं वाक्यैकत्वमर्थैकत्वस्य। तस्माद्यथाभाष्यमेव व्याख्यातव्यम्।

प्रश्लिष्टपठितानां यजुषामेकवाक्यतालक्षणभाष्यानुसारीति वार्त्तिकमतम्

भेदलक्षणे मन्त्रप्रस्तावे च तद्भेदस्तावदृग्यजुःसामात्मकोऽभिहितः। तदवान्तरभेदाकाङ्क्षायामृक्सामानामध्येतृसिद्धे भेदे लक्षणं न क्रियते[1]। यजुषां तु प्रश्लिष्टपठितत्वान्न लक्षणाद्विना भेदज्ञानमित्यारभ्यते।

ननु भिन्नप्रतीकविनियोगात्, तद्भेदः सेत्स्यतीति। न तावत्सर्वेषामेव ब्राह्मणे विनियोगोऽस्ति। न च 'उत्तरादिः पूर्वान्तिलक्षणम्' इत्येतद्भेदवचनम्। न्यायेन तु सूत्रकारैरेवाऽऽत्मीयब्राह्मणविनियोगेष्वेतदुक्तमिति, न्यायस्य लक्षणमुच्यते।

तत्रावयवव्युत्पत्तिबलेनाऽऽह—**यावतेज्यत** इति। सर्वमन्त्राणामनेन यजेतेति हि प्रथमं प्रकरणाम्नानानुमितवाक्यविनियोगो भवति। ततः साक्षाद्यागसंबन्धासंभवात्तदुपकारिप्रकाशनेन तैरिष्टं भवतीति कल्प्यते।

तेनोच्यते—

यावता पदसंघेन स्मार्यते यागसाधनम्।
तावद्यजुश्च वाक्यं च वक्तव्यत्वान्निरूप्यते॥

वचनार्हं हि वाक्यं कार्ये समर्थं च, तदर्हं भवति, न न्यूनम्, अधिकं वा। तावतैव चेज्यते। तत्तु कीदृशीति? एकार्थं साकाङ्क्षावयवं चेति लक्षणम्। ईदृशं चेदेकं यजुः, यत्ततोऽधिकं तद्वाक्यान्तरम्, यजुरन्तरं चेत्युक्तं भवति। एवं सर्वत्र पुरस्तात्परस्ताद्वैकार्थत्वसमर्थपदपरिग्रहणादसमर्थपदविमोकेन[2] च भिन्नानि यजूंषि कल्प्यन्ते। तेनैकवाक्यलक्षणोक्तौ चार्थाद्यजुर्भेदवाक्यभेदलक्षणयोः सिद्धिरिति।

एतस्माच्चेत्कारणादित्याह। किमुदाहरणमिति। अभिधेयवाचिनमर्थशब्दं गृहीत्वा लक्षणद्वयसमावेशासंभावनया पृच्छति।

तथा हि—

एकार्थत्वं पदस्य स्यात्साकाङ्क्षावयवं न तत्।
साकाङ्क्षावयवः संघस्तस्यैकोऽर्थो न विद्यते॥

पदस्य ह्याकृतिर्नामैकोऽर्थो भवेत्, न तु तदवयवानां वर्णानाम्, प्रकृतिप्रत्यययोर्वा विभागे साकाङ्क्षत्वम्, अर्थप्रत्यायनशक्त्यभावात्। समूहावयवास्तु पदानि विभागे परस्परमाकाङ्क्षन्ति, न त्वेषामेकार्थत्वम्, प्रतिपदमर्थभेदात्। समूहस्य च पृथगर्थान्तराप्रसिद्धेः। अतो लक्ष्याभावादलक्षणमेतदिति। प्रयोजनवाच्यभिप्रायेण **देवस्य** त्वेत्युदाहृतम्।

---

१. क. वक्तव्यं (टिप्पण्यां)।

२ क. (टिप्पण्यां) पदपरिग्रहेणासमर्थपदविमोकेन।

नन्विति परः स्वाभिप्रायं प्रकटयति । यदा पदार्थव्यतिरिक्तः कश्चिदेको निर्भागो वाक्यार्थो नास्ति, तदा तत्तत्पदार्थधर्माविव सामीप्यवशात्तेषां गम्यमानौ भेद-संसर्गौ स्याताम् । अत आह—**तथाऽप्येकार्थता न स्यादिति ।**

कथम्—

व्यक्तिसामान्यभेदेन भेदपक्षस्य निरासः

भेदो नाम पदार्थानां व्यवच्छेदः परस्परम् ।
स च प्रतिपदार्थत्वान्नैकत्वं प्रतिपद्यते ॥

व्यक्तिपदार्थपक्षे सर्वव्यक्तीनां गवादिपदेनैवोपात्तत्वात्, तद्विषयशब्दैः शुक्लादिभिः कृष्णादिव्यवच्छेदमात्रं वक्तव्यम्[1] । तत्संसर्गः पदार्थान्तर्गतत्वान्न वाक्यार्थो भवतीति, तदुपसर्जनस्तेषां भेदो गृह्यते । स च यथा शुक्लशब्देन गोशब्दस्य कृष्णादिभ्यो भिद्यमानत्वाद्भवति, एवं शुक्लशब्दस्यापि गोशब्देनाश्वादिभ्यो निवर्तितस्य भवति, व्यवच्छेद्यनानात्वाच्च नास्त्येकत्वे प्रमाणम् ।

भेदसामान्यग्रहणे वा सर्ववाक्यार्थैकत्वप्रसङ्गः । यदा तु भेदवन्तः पदार्था एव वाक्यार्थाः, तदा सिद्धमेव नानात्वम् ।

यथा—

संसर्गोऽपि पदार्थानामन्योन्येनाऽनुरञ्जनम् ।
एकैकत्र तदप्यस्तीत्येकत्वं न प्रतीयते ॥

आकृतिपदार्थपक्षे शुक्लत्वगोत्वयोः स्वरूपेणाभिहितयोः संनिधानादितरेतरानुरञ्जनमर्थसिद्धभेदं वाक्यार्थः । स च गोत्वे शुक्लत्वसंसर्गः, शुक्लत्वे वा गोत्वसंसर्गः, सामस्त्येनैकैकव्यक्त्युपसंहारादुपलभ्यत इति नाना ।

नानात्वस्य निरूपणम्

यद्यपि च कथंचिद् द्विपदे स एवोभयत्रापि संसर्ग इत्येकत्वं गम्येत, तथाऽपि बहुपदे येन येन प्रदेशेन पदद्वयं संसृज्यते, तेन संसर्गरूपेणोपलब्धेरनेकत्वम् ।

किं च—

स्वप्राधान्यात्पदार्थानां धर्माविताबुभावपि ।
धर्मिभेदेन भिद्येते न ह्येकत्वमुपाश्रितम् ॥

यावद्धि प्रयोजनैकत्वं नाऽऽश्रीयते, तावत्स्वतन्त्राः पदार्था नैकतामापादयितुं शक्यन्त इति, पृथगेव भेदसंसर्गावनुभवन्ति । तस्मादपि नाना ।

१ क. कर्तव्यम् ।

यद्यपि चास्माकमाकृतिपदार्थकत्वान्नैव भेदो वाक्यार्थत्वेनाभिप्रेतः तथाऽपि पूर्वपक्षवादिना विकल्पमात्रेणोपन्यस्तः ।

सिद्धान्ताभिप्रायविवरणं प्रयोजनवाचित्वादर्थशब्दस्योपपन्नम् । एवं सत्येक एव कश्चित्पदार्थः प्रधानभूतस्तद्विशेषणत्वेनेतरोपादानमिति सर्वेषां च तद्भेदात् तत्संसर्गाच्चैको भेदः, संसर्गो वेत्यपि शक्यं वदितुम् । तस्मात्कर्मसमवायित्वेन दृष्टार्थत्वात्, अशेषसवित्रादिपदार्थविशिष्टनिर्वापप्रकाशनं समस्तस्य[1] पदसमूहस्यैकं प्रयोजनमिति सिद्धमुदाहरणम् ।

परस्तु निर्वापप्राधान्यमज्ञात्वा पृच्छति—**नन्वत्र देवस्येति** । सिद्धान्तवाद्याह—**यदि निर्वपामीत्यनुषङ्गः** तत एवम्, स चानुषङ्गः तद्गुणभावेन भवेत् । न चास्य गुणभावः, प्रयोजनवत्त्वात् । सवित्रादीनां चाकर्मसमवायादित्येकार्थत्वम् ।

'अथ किमर्थमुभयं सूत्रितमि'ति । येषां संहतानामेकप्रयोजनत्वम्, तेषां तदशक्तेर्व्यस्तानामेकान्तेनैव साकाङ्क्षत्वं भवतीत्यवाच्यं तत् । अथ वा विभज्यमानसाकाङ्क्षत्वं संहतैकप्रयोजनत्वेन विना न भवति, प्रत्येककार्येषु निरपेक्षप्रवृत्तिसिद्धेः । अतः साकाङ्क्षविभागेनैवेतराक्षेपात्तन्मात्रमेवाभिधातव्यमिति ।

प्रत्युदाहरणे दर्शयति—उच्यते इति । पुरोडाशविभागप्रकाशनमेकं प्रयोजनं निरपेक्षाणां दृष्टम् । निर्वापे दत्तोत्तराऽपि विभागनानात्वपरिचोदना संहत्य विशेषणानुपादानात्पुनः पुनः प्रयुक्तस्यानुषङ्गदोषाभावादुपन्यस्यते । तत्रोत्तरम् । न तावन्निरपेक्षसाधनभेदादपि क्रियानानात्वमिति वक्ष्यामः । साधनप्राधान्यं तु प्रत्युक्तमेव । एतत्कृतो विशेषः कर्मानङ्गत्वादनादरणीय इति सामान्यप्रकाशनादेकार्थत्वम् । 'तस्मिन्सीद' इत्यस्य पूर्वापेक्षित्वे सत्यपि, प्रयोजनभेदाद्वाक्यान्तरत्वम् । तस्मात्संहतयोरेव लक्षणत्वम् ॥ ४६ ॥

(इति चतुर्दशं यजुःषामेकवाक्यतालक्षणाधिकरणम् ॥ १४ ॥)

॥ अथ चतुर्दशं एकवाक्यत्वलक्षणाधिकरणम् ॥ १४ ॥

न्या० सु०—भाष्योक्तयजुःपरिमाणाभिधानार्थत्वत्यागेन वाक्यलक्षणार्थतयैतत्सूत्रं कैश्चिद्व्याख्यातम् । तद्दूषणायोपन्यस्यति—**केचिदिति** । वाक्यस्यापि लौकिकस्यैव लक्षणमित्याह—**तत्रापीति** । एतदेव प्रश्नपूर्वकमुपपादयति—**कुत इति** । श्लोकं व्याचष्टे—**लौकिकानां हीति** ।

ननु वाक्ये लक्षयितव्ये वैदिकं कस्मान्न लक्ष्यत इत्याशङ्क्याह—**वैदिकानां पुनरिति** । यस्य वाक्यस्यैकत्वादर्थैकत्वं गम्यते तद्वाक्यमिति वैदिकानां लक्षणमित्यर्थैकत्वमितीति-

---

१ क. (टिप्पण्यां) अतस्तस्य ।

करणेन सूचितं कस्माद्वैदिकवाक्यानामेतल्लक्षणानुपपत्तिरित्याशङ्क्य—**अनन्येत्युक्तम्**। वैदिकानामर्थस्यानन्यप्रमाणगम्यत्वेन प्राग्वाक्यादज्ञातत्वादज्ञानेऽपि वाक्यात्प्राग्वाक्यैकत्वाज्ञानादर्थैकत्वासिद्धेर्नार्थैकत्वस्य वाक्यलक्षणतोपपन्नेत्यर्थः कथं वाक्यैकत्वस्यार्थैकत्वज्ञानहेतुतेत्याशङ्क्याह—**यथैव हीति**। वेदवाक्यानां सौत्रलक्षणानुपपत्तौ वृद्धसम्मतिमाह–**आह चेति**।

शास्त्रासङ्गतत्वेन लौकिकवाक्यलक्षणं दूषयति—**अत्रेति**। नन्वर्थापत्त्या विपरीतवेदवाक्यलक्षणार्थं लौकिकवाक्यलक्षणाभिधानमित्याशङ्क्याह—**वैदिकेति**। वाक्यैकत्वस्य वाक्यार्थैकत्वज्ञानहेतुत्वं विनापि शब्दान्तरादिभिर्वाक्यार्थभावनाभेदसिद्धेर्न भेदलक्षणोपयोग्येतल्लक्षणमित्याशयः। यदि त्वज्ञातलक्षणस्य वेदवाक्यस्य धर्मप्रमाण्यज्ञानायोगात्प्रामाण्यसिद्ध्यै लक्षणाभिधानम्, ततः प्रामाणलक्षणे वाच्यमित्याशयेनाह—**किमर्थमिति**। एकशब्दानर्थक्यापत्तेश्च न लौकिकवाक्यलक्षणेऽप्येतत्सूत्रं समञ्जसमित्याह—**एकेति**।

ननु एकशब्दस्य लौकिकवाक्यलक्षणानुपयोगेऽप्यर्थैकत्वज्ञानहेतुवाक्यैकत्वपदसमूहत्वं वेदवाक्यलक्षणं सूचयितुमेकशब्द इत्याशङ्क्य वेदवाक्यलक्षणमपि मन्त्रप्रकरणासङ्गतत्वादयुक्तमित्याशयेनाह—**कथं चेति**। भाष्यविरोधश्च तेषां स्यादित्याह—**भाष्येति**। न केवलं शास्त्रलक्षणप्रकरणासङ्गतिभाष्यविरोधा एव तद्व्याख्याने दोषाः, किं त्वनुपयोगोऽपीत्याह—**किं चेति**। एकशब्दार्थवत्त्वायैकवाक्यत्वस्येदं लक्षणमिति यदि कश्चिद् ब्रूयात् तदप्यनुपयोगीति वक्तुम्—**एकत्वस्येत्युक्तम्**। मन्त्रादिषु मध्ये क उपयुज्यत इति वाक्यं तदेकत्वलक्षणवादिभिर्वक्तव्यमितीतिकरणाध्याहारेण योज्यम्। यजुर्व्यतिरिक्तमन्त्रेषु तावदनुपयोगं विवृणोति—**ऋगिति**। ब्राह्मणे विवृणोति—**तथेति**।

एकवाक्यत्वलक्षणस्य वाक्यभेदपरिहारोपयोगं शङ्कते—**नन्विति**। दोषत्वावधारणेन वाक्यभेदस्य परिहार्यत्वात् वाक्यैकवाक्यत्वज्ञानं च विनाप्यावृत्तिविभागयोर्दोषत्वावधारणान्नैकवाक्यत्वलक्षणस्य वाक्यभेदपरिहारोपयोग इति परिहरति—**नेति**। अनावृत्तस्याविभक्तस्य वा शब्दस्य विवक्षितानेकार्थाभिधानाशक्तेः पदादिरूपस्य शब्दस्यावृत्तिरादिशब्दोक्तो विभागो सामर्थ्यहेतुकत्वात् स्वत एव दोषत्वसूचनायासामर्थ्यमित्युपचरितः। असामर्थ्यहेतुकं यच्छब्दावृत्त्यादि, स वाक्यभेदः। स चासामर्थ्यरूपत्वात् स्वत एव तावद्दोषत्वेनावधार्यते। विभागावृत्त्योस्तु दोषतोपपादयिष्यत इत्याशयः। श्लोकं व्याचष्टे—**पदेति**। वाजपेयगुणविधावाख्यातपदावृत्तिः। ग्रहैकत्वविवक्षायां पदैकदेशप्रातिपदिकावृत्तिः। हविरार्त्तेरुभयत्वेन विशेषणे हविरार्तिमार्छेदिति पदसमुदायावृत्तिः। आरुण्यस्य कृत्स्नप्रकरणनिवेशेऽरुणयेति पदस्य पिङ्गाक्ष्यादिवाक्याद्विभागः। नानात्वग्रहणं दृष्टान्तार्थम्। कथं वाक्यैकत्वज्ञाननिरपेक्षैरावृत्तिलक्षणः, विभागलक्षणो वा वाक्यभेदो दोषत्वेनावधार्यत इत्याशङ्क्याह—**विभागेति**। 'अरुणया क्रीणाती'ति तृतीयया

क्रियान्वयस्य गम्यमानस्य त्यागः। प्राकरणिकानां चानेकद्रव्याणामारुण्यनियमादनेकादृष्टकल्पना। आवृत्तिलक्षणवाक्यभेदे त्वावृत्तेरभेदत्वेनाप्रामाण्यं दोष इत्यर्थः। एतदेवोपसंहरति—**इतीति**।

लोके त्वत्यन्तानुपयोग इत्याह—**पौरुषेयेति**। लक्षणान्तरापेक्षामभ्युपेत्यैतल्लक्षणमनुपयोगीत्याह—**यदि चेति**।

यत्तु हेतुप्रसिद्धे लौकिकवाक्यलक्षणमेतदित्युक्तम्। तद्वक्त्रर्थम्, श्रोत्रर्थं वेति विकल्प्य दूषयति—**वक्तृणां चेति**। व्यवहारानौपयिकं च स्वरूपज्ञानमात्रार्थं लक्षणम्। वेदवाक्येऽपि कस्मान्नोक्तमित्याह—**किमर्थं चेति**। यत्त्वर्थापत्त्या विपरीतं लक्षणं सूचितमित्युक्तम्। तदनुभाष्य दूषयति—**यदि त्विति**। न च वाक्यैकत्वादर्थैकत्वमितीदृग्वाक्यलक्षणमित्याह—**न चेति**। नन्वनेनार्थैकत्वज्ञानहेत्वेकवाक्यत्वं वेदवाक्यलक्षणं सूचितमित्याशङ्क्याह—**अपि चेति**। वेदवाक्यलक्षणविषयोत्थितार्थापत्तिर्नैकान्ततो विपरीतं लक्षणं कल्पयतीत्याशयः।

ननु लौकिकानामेवैतल्लक्षणमिति परिसंख्ययाऽस्य लक्षणस्य वैदिकविषयत्वनिवृत्तेर्विपरीतं वेदवाक्यलक्षणं कल्प्यतइत्याशङ्क्याह—**न चेति**। सत्यामपि सामान्यविशेषोपादानेन सम्भवत्या परिसंख्यया वेदवाक्यविषयत्वनिवृत्तावनेकैतद्व्यतिरिक्तलक्षणसम्भवान्न नियोगतो वाक्यैकत्वादर्थैकत्वमिति लक्षणं कल्पयितुं शक्यमित्याह—**यदि हीति**। ननु विपरीतमेव लक्षणं बुद्धिस्थं भवति, न्यायमात्रमित्याशङ्क्याह—**एवमपीति**। वैपरीत्यस्याप्यनेकधा सम्भवान्न निर्द्धारणं भवतीत्याशयः।

या चार्थैकत्वस्यासिद्धतोक्ता, सा वाक्यैकत्वस्यापि तुल्येत्याह—**किं चेति**। श्लोकं व्याचष्टे—**वाक्येति**। एतदेवोपपादयति—**तथा हीति**। बहुवाक्यवर्त्तिष्वेकवाक्यवर्त्तिषु वा वर्णेषु बहूनि वाक्यानि, एकं वेत्यवधारणा न दृष्टेत्यर्थः। अतः सूत्रोक्तेनैव लक्षणेन एकवाक्यत्वसिद्धिरित्याह—**तस्मादिति**। सर्वसाधारणं चैतल्लक्षणमित्याह—**लोकेति**। या त्वर्थैकत्वस्यासिद्धतोक्ता, तामनुभाषणपूर्वकं परिहरति—**यत्त्विति**। श्लोकं व्याचष्टे—**यदि हीति**। भावनायाश्च वाक्यार्थत्वात्, तस्याश्च भेदाभेदावधारणस्य शब्दान्तरादिसदसद्भावाधीनत्वाद्वाक्यैक्यज्ञानात्प्रागर्थैक्यावधारणं सम्भवतीत्याह—**भावनैव चेति**। प्राधान्यं विनानेकपदार्थवैशिष्ट्यायोगाद्वाक्यार्थत्वोपपादनाय प्राधान्यसूचनार्थम्—**स्वकारकेत्युक्तम्**। शब्दान्तरादिभिर्विना भेदासिद्धिर्नित्यमित्यनेनोक्ता।

श्लोकं व्याचष्टे—**यस्मिन्निति**। 'दध्ना जुहोती'त्यादौ भावनास्वरूपाभेदेऽपि गुणविशिष्टत्वरूपेणोत्पत्तिवाक्यविहितधात्वर्थमात्रविशिष्टभावनारूपाद्भेदसद्भावान्नोत्पत्तिवाक्यस्य गुणवाक्यैः सहैकवाक्यतापत्तिः।

परव्याख्यां दूषयित्वा, यथाभाष्यं सूत्रं व्याख्यातुमुपक्रमते—**तस्मादिति**। सङ्गतिं तावदाह—**भेदेति**। ऋचो यजूंषि सामानीति बहुवचनश्रवणादृगाद्यवान्तरभेदाकाङ्क्षा-

यामेतावतीयमृगित्युपदेशकाध्येतृवाक्याद्दचाम्, एतावदिदं सामेत्यस्माच्च साम्नां भेदसिद्धेर्लक्षणं न कृतम् । करणेऽपि यजुर्वेदस्याध्येतृवाक्यादसिद्धेर्भेदज्ञानार्थं लक्षणमित्यर्थः । ननूत्तरादिः पूर्वान्तरलक्षणमिति वचनादिषे त्वेति शाखां छिनत्त्यूर्जे त्वेत्यनुमार्ष्टीत्यादिभिन्नप्रतीकविनियोगेन यजुषामपि भेदसिद्धेः, तद्भेदलक्षणमपि न कार्यमित्याशङ्क्ते—**नन्विति** । अभ्युपगम्यैतद्वचनप्रामाण्यमव्यापकत्वं तावदाह—**न तावदिति** । सौत्रविनियोगस्य भेदप्रतीतिमूलतया, तन्नैरपेक्ष्येण लक्षणत्वायोगात्—**ब्राह्मण इत्युक्तम्** । सत्यपि वा सर्वेषामभिमतभेदानां विनियोगे मध्ये विनियोगरहितमन्त्रान्तरसद्भावशङ्कानिवारणाशक्तेरर्थापत्त्ययोगाद्वचनस्य चावैदिकतया स्वातन्त्र्येण प्रामाण्याभावात्सूत्रकृद्वचनस्य चैकार्थ्यनिबन्धना पदसमूहस्यैकवाक्यतेति न्यायमूलत्वात्, तस्य लक्षणस्वरूपमुच्यत इत्याह—**न चेति** । यजुःपरिमाणे सूत्रयोजनार्थं यावतेति भाष्यम्, इषे त्वेत्यादियजुषां यागे विनियोगाभावादयुक्तमाशङ्क्यावतारणपूर्वं व्याचष्टे—**तत्रेति** । यजेरुसिप्रत्यये कृते यजुःशब्दव्युत्पत्तेः, तस्य चोणादित्वेन बाहुलकत्वात् प्रयोगानुसारेण करणवाचित्वावगतेरिषे त्वेत्यादीनामपि च प्रकरणाम्नानानुमितेन वाक्येन यागाङ्गत्वावगमाद्यजुष्ट्वाविरोध इत्याशयः ।

ननु श्रुत्यादिभिः छेदनादौ विनियुक्तानां कथं यागाङ्गतेत्याशङ्कानिरासार्थं 'यावता क्रियाया' इति भाष्यं व्याचष्टे—**तत इति** । तावच्चेति योजनोपसंहारभाष्यं व्याचष्टे—**तेनेति** । वाक्यविशेषस्यैव यजुष्ट्वाद्यजुर्विषयः सूत्रे वाक्यशब्द इत्यर्थः । श्लोकं व्याचष्टे—**वचनार्हं हीति** । यावान्पदसमूहो वाक्यम्, तावानेव यजुरिति वाक्यपरिमाणेन यजुःपरिमाणं वक्तुं वाक्यलक्षणमित्यर्थः । ननु मन्त्रावान्तरभेदप्रस्तावाद्यजुर्भेदे प्रतिपाद्ये, यजुःपरिमाणलक्षणमप्यसङ्गतमित्याशङ्कानिरासार्थत्वेनैतदस्माच्चेदिति भाष्यं व्याचष्टे—**ईदृशं चेति** । अनेन चैतस्माच्चोदकार्थत्वाकारणादेकयजुर्वाक्यता भवति, तस्माद्यावानेकार्थः पदसमूहः, तावदेवैकं यजुर्वाक्यम् अधिकं तु यजुर्वाक्यान्तरमिति सावधारणत्वेन भाष्यं योजितम्, किमित्युदाहरणप्रश्नभाष्यं विपर्ययाशयेन व्याचष्टे—**किमिति** । चेच्छब्देनैकार्थ्य-साकाङ्क्षावयवत्वयोः संहतयोः लक्षणत्वेनाभिधानात्प्रत्येकं लक्षणत्वाभावेन लक्षणद्वित्वायोगाल्लक्षणाधिष्ठानाभिप्रायो लक्षणशब्दः । एतदेवोपपादयति—**तथा हीति** । श्लोकं व्याचष्टे—**पदस्य हीति** । प्रकृतिप्रत्यययोरन्वयव्यतिरेकाभ्यां प्रत्येकमर्थप्रत्यायनशक्त्यवगमात्, विभक्तप्रयोगाभावेनाऽर्थप्रत्ययाभावः शक्तिशब्देन लक्षितः ।

देवस्येत्युदाहरणभाष्याशयमाह—**प्रयोजनेति** । नन्वित्यादिभेदानां संसर्गाणां च बहुत्वादित्यन्तमाशङ्काभाष्यं तात्पर्यतस्तावद्व्याचष्टे—**नन्विति** । एकैकपदस्यैकार्थ्यात्पदसमूहस्यानुदाहार्यत्वशङ्कायां साकाङ्क्षावयवत्वाभावात्सत्यमित्यनेन निरस्तायाम्, न तर्हीत्यनेन पदार्थानेकत्वात्पदसङ्घस्य च पदार्थातिरिक्तैकार्थवाचितायास्तद्भूताधिकरणे

निरस्तत्वात्, पदसङ्घस्यानुदाहार्यत्वशङ्काशये विवृते। ननु पदार्थातिरिक्तैकनिर्भाग-वाक्यार्थायोगेऽपि पदार्थानां भेदः, संसर्गो वा वाक्यार्थ इत्याशङ्कानुपपत्त्यभिधानार्थं भेद इति भाष्यं व्याचष्टे—**यदेति**। तथापीत्याशङ्कासमर्थनार्थं भाष्यमुपपादयितुमवतारयति—**अत इति**। भेदानेकत्वं तावत्प्रश्नपूर्वकमुपपादयति—**कथमिति**। ऋगतावित्यस्य धातोरौणादिके थन्प्रत्यय कृतेऽर्थशब्दव्युत्पत्तेः। प्रतिपदमर्थत्वाद् गम्यमानत्वादित्यर्थः। श्लोकं व्याचष्टे—**व्यक्तीति**।

ननु यथा शुक्लशब्दसन्निधानात् कृष्णादिभ्यो गोव्यक्तेर्व्यवच्छेदः प्रतीयते, तथा शुक्लत्वसंसर्गस्यापि प्रतीतेः कस्मान्न वाक्यार्थतेत्याशङ्क्य, शुक्लत्वसंसर्गस्य गोपदार्थान्तर्गतत्वादित्युक्तम्। गोव्यक्तेः शुक्लशब्देन कृष्णादिभ्यः शुक्लव्यक्तेश्च गोशब्देनाश्वादिभ्यो निवृत्तौ वाच्यायां कृष्णादिव्यक्तिष्वपि गोत्वस्याश्वादिष्वपि शौक्ल्यस्य सत्त्वात्स्वरूपेणाव्यावृत्तेः शब्दवाच्यत्वरूपेण व्यावृत्ति वक्तुं गोशब्दस्य शुक्लशब्दस्य चेति चोक्तं संसर्गानेकत्वमुपपादयति—**तथेति**। श्लोकं व्याचष्टे—**आकृतीति**। गोत्वशुक्लत्वयोरेकार्थसमवायलक्षणस्य संसर्गस्य सम्बन्धत्वेन द्विष्ठत्वात्, तत्सम्बन्धिभेदेऽप्यैक्यमाशङ्क्य—**सामस्त्येनेत्युक्तम्**। व्यक्तिसमवेतं गोत्वमितिवद्, गोत्वसमवेता व्यक्तिरित्यप्रतीतेः सम्बन्धत्वेऽपि समवायस्य व्याप्तिवदाधेये सामस्त्येनोपलम्भात् द्वित्वाभावेनैकव्यक्त्युपसंहारात्मकस्यैकार्थसमवायस्यापि न द्विष्ठतेत्याशयः। ननु यद्यपि गोत्वविशिष्टायां व्यक्तौ शुक्लत्वसंसर्गाच्छुक्लत्वविशिष्टायां व्यक्तौ गोत्वस्य संसर्गोऽन्यः, तथापि गौः शुक्ल इति वाक्यादेकस्मिन्नर्थे गोत्वशुक्लत्वयोः संसर्ग इत्यैकरूप्येण प्रतीतेर्वाक्यार्थैक्यमित्याशङ्क्याह—**यद्यपीति**। गौः शुक्लः स्थूल इति त्रिपद एव तावद्वाक्ये गौः शुक्लो, गौः स्थूलः शुक्लः स्थूल इति, येन येन वाक्यैकदेशेनावस्थितं पदद्वयमन्योन्यं संसृज्यते, तेन तेन वाक्यैकदेशेन गोत्वशुक्लत्वादिसंसर्गस्य प्रतीतेर्वाक्यार्थत्रयापत्तिरित्यर्थः।

द्विपदेऽप्येकप्रयोजनवशीकाराभावेन पदार्थानामुपकार्य्योपकारकत्वाभावात्स्वातन्त्र्येणैकार्थाविशेषणत्वरूपैकत्वाभावात्प्रत्येकं भेदसंसर्गस्य प्रतीतेरपरिहार्यं वाक्यार्थनानात्वमित्याह—**किं चेति**। श्लोकं व्याचष्टे—**यावद्धीति**। ननु सिद्धान्तिनो व्यक्तिपदार्थकत्वाभावाद्भेदवाक्यार्थत्वशङ्कानुपपत्तेस्तदुपन्यासो न युक्त इत्याशङ्क्याह—**यद्यपि चेति**। एकेति भाष्यं समाधानाशयविवरणार्थत्वेन व्याचष्टे—**सिद्धान्तेति**। सर्वपदेष्वेकस्यैव पदार्थस्येतरविशिष्टस्यैव प्राधान्येन प्रतिपाद्यत्वादेकार्थतेत्याशयः। एवं च सति विशेष्यस्यैवैकस्य पदार्थस्येतरैः सह संसर्गस्य, भेदस्य वा प्रतिपाद्यत्वाच्छक्यमेवैक्यं वक्तुमित्याह—**एवमिति**। उक्तोदाहरणे विशिष्टैकप्रयोजनाभिधानार्थं 'यथा तावदि'ति भाष्यं पदार्थान्तराणां निर्वापविशेषणत्वासिद्धेरयुक्तमाशङ्क्योपपादयति—**तस्मादिति**। नन्वित्याशङ्काभाष्यं व्याचष्टे—**परस्त्विति**। यदीति परिहारभाष्यं व्याचष्टे—**सिद्धान्तेति**।

विशेषणद्वयानर्थक्याशङ्कार्थमथेति भाष्यं व्याचष्टे—**किमर्थमिति**। उच्यत इत्यादि पुरोडाशप्रतिष्ठापनम् इत्यन्तं भाष्यं तात्पर्यतस्तावद्व्याचष्टे—**प्रत्युदाहरणे इति**। अवयवशो व्याचिख्यासुर्भवतीति भाष्यं तावद्व्याचष्टे—**पुरोडाशेति**। नन्वित्यैकार्थ्याभावाशङ्काभाष्यं निर्वापन्यायेनेहाप्याशङ्कानिरासोपपत्तेरयुक्तमाशङ्क्योपपादयति—**निर्वाप इति**। नेति परिहारभाष्यमसकृदुच्चारिताख्यातयोगेन भगादीनां संहत्य विशेषणत्वादनुपादानान्निरपेक्षसाधनत्वावगतेस्तद्भेदेन विभागनानात्वावगमादयुक्तमाशङ्क्योपपादयति—**तत्रेति**। स्तुत्यर्थमसमवेतनिरपेक्षसाधनभेदाभिधानेऽपि क्रियान्यत्वाभावस्य चित्यधिकरणेन च कारकभेदादस्य भेदो भवतीति वार्त्तिके वक्ष्यमाणत्वाद्भगादिकर्त्तृभेदमात्रेण तावन्न विभागान्यत्वापत्तिः। न चायुरादिवदसमवेतत्वेऽपि प्रोत्साहनायाशास्यत्वे न भगादेः प्राधान्यं येन विशेषणभेदात् क्लृप्तिवद्विभागभेदः स्यादित्यर्थः। विशेषणाविवक्षाभिधानार्थः सामान्यशब्दः।

तथेति प्रत्युदाहरणान्तराभिधानार्थं भाष्यं व्याचष्टे—**तस्मिन्निति**। तस्मात्सम्यगिति परिहारोपसंहारभाष्यं व्याचष्टे—**तस्मादिति** ॥ ४६ ॥

॥ इति चतुर्दशयजुःपरिमाणाधिकरणम् ॥

भा० प्र०—यजुर्वेद के लक्षण में कहा गया है कि प्रश्लिष्ट पाठयुक्त वेद का मन्त्रभाग यजुः है। इसमें स्वभावतः यह प्रश्न होता है कि एक-एक यजुः का क्या परिमाण है, कितने अंशों में एक-एक यजुः की परिसमाप्ति होती है? इसके उत्तर में सिद्धान्ती का कहना है 'अर्थैकत्वात्' इत्यादि। एक-एक वाक्य ही एक-एक यजुः है, जो पद समष्टि किसी एक समग्र अर्थ को प्रकाश करता है—एक प्रयोजन का निर्वाह करता है, उनमें विभाग करने पर अर्थात् छेद कर पृथक् करने पर परस्पर आकाङ्क्षायुक्त होता है—वह एक एक वाक्य है। जैसे 'देवस्य त्वा सवितुः प्रसवे, अश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्', अग्नये जुष्टं निर्वपामि' यह मन्त्र एक यजुः है, कारण, इसके द्वारा एक पूर्ण अर्थ का प्रकाशन होता है एवं इसका 'अग्नये त्वा जुष्टं निर्वपामि' इस अंश को यदि पृथक् कर लिया जाय तो 'देवस्य त्वा' इत्यादि पदसमूह साकाङ्क्ष होता है, अतः, यह सभी अंश एक यजुः है। यजुः पद की व्युत्पत्ति होने पर यह लब्ध होता है, जिस परिमाण पदसमूह के द्वारा याग किया जाता है अर्थात् अनुष्ठेय अर्थ के प्रकाश से याग का उपकार होता है—उसका नाम ही यजुः है—यही यजुः शब्द की व्युत्पत्ति है। जिस परिमाण की पदसमष्टि से क्रिया अर्थात् अनुष्ठेय कर्म के अर्थ स्मरण से उपकार साधित होता है—वही एक एक वाक्य है, क्योंकि वही उस स्थल में वक्तव्य है। इसीलिए सूत्रकार ने कहा है—'अर्थैकत्वाद एकं वाक्यम्' भाट्टदीपिका में पूज्यपाद खण्डदेव 'अर्थैकत्व' पद का अर्थ यह महा है—भिन्न-भिन्न प्रतीति के हेतु स्वरूप जो अनेक = एकाधिक मुख्य विशेष्य है, वह नहीं रहता है,

जिसमें अर्थात् अनेक = एकाधिक भावना की प्रतीति नहीं होती है, किन्तु एक भावना का ही बोध होता है, वही एकार्थ है, क्योंकि, भावना ही वाक्यार्थ बोध में मुख्य विशेष्य होता है, फलतः एक एक वाक्य ही एक एक यजुः है। वाक्य किसको कहा जाता है—'अर्थैकत्वादेकं वाक्यम्' इत्यादि सूत्र में ही आर्थिक भाव में कहा जाता है। इस स्थल में वक्तव्य है कि केवल 'अर्थैकत्वादेकं वाक्यम्' यह कहने पर 'भगो वा विभजतु' पूषा वां विभजतु' इत्यादि भिन्न-भिन्न वाक्य भी एक एक वाक्य होगा, कारण, वे सभी विभजन रूप एक ही अर्थ का प्रकाश करता है। किन्तु 'साकाङ्क्षं चेत्' इत्यादि अंश रहने पर उनकी एक वाक्यता का प्रसङ्ग नहीं हो सकता है, क्योंकि, वे परस्पर साकाङ्क्ष नहीं है। केवल 'साकाङ्क्षं चेद् विभागे स्यात्' इस अंश को एक-वाक्यता का लक्षण मानने पर 'स्योनं ते सदनं कृणोमि घृतस्य धारया सुशेवं कल्पयामि तस्मिन् सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमानः' यह समग्र अंश एक वाक्य होता है, क्योंकि, 'स्योनं ते' से 'कल्पयामि' पर्यन्त अंश को पृथक् करने पर परवर्ती अंश इसके साथ साकाङ्क्ष होता है, कारण, यह 'तद्' शब्द को देकर आरम्भ होता है। 'स्योनं' से 'कल्पयामि' पर्यन्त अंश एक अर्थ का प्रकाश करता है, एवं 'तस्मिन्' इत्यादि परवर्ती अंश अन्य अर्थ का प्रकाश करता है। इस स्थल में पूर्व अंश का अर्थ 'सदन = स्थान किया है, परवर्ती अंश का अर्थ सादन = स्थापन किया है। अतः 'स्योनं ते' इत्यादि स्थल का अर्थैकत्व न रहने पर भी आगे समग्र अंश में एक वाक्य होता है, क्योंकि, वे परस्पर साकाङ्क्ष होते हैं, इसलिए 'अर्थैकत्वात्' यह विशेषण अवश्य योजनीय है। इस स्थल में यह भी ज्ञातव्य है कि 'देवस्य त्वा सवितुः प्रसवे अश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां अग्नये जुष्टं निर्वपामि' इस मन्त्र में 'निर्वपामि' यह क्रिया यदि गौण रहती और 'देवस्य त्वा' इत्यादि अंश यदि मुख्य या प्रधान होता, तब क्रिया का अनुषङ्ग अवश्य कर्तव्य होने पर भिन्न-भिन्न अनेक वाक्य होता, किन्तु वैसा न होने से 'निर्वपामि' यह भावार्थ कर्म शब्द = क्रिया ही प्रधान होने से 'देवस्य त्वा' इत्यादि गुण के अनुरोध से प्रधान की आवृत्ति नहीं हो सकती है, इस कारण से इस स्थल में 'मन्त्रो वा विभजतु पूषा वां विभजतु' इत्यादि के समान एका-र्थक भिन्न-भिन्न वाक्य का एक यजुः होने का प्रसङ्ग नहीं है। इस अधिकरण का यह प्रयोजन है कि प्रयोग काल में कर्म के मध्य में मन्त्रोच्चारण काल में जिस परिणत अंश में एक यजुः उतने परिमाण मन्त्र का एक बार में पाठ करना होगा, उसका छेद नहीं किया जा सकता है।

इस सूत्र की व्याख्या में युधिष्ठिर मीमांसक ने कहा है—

अर्थैकत्वात् —'अर्थ' शब्द प्रयोजनवाची है। 'अर्थ इति प्रयोजनमभिधीयते। यावन्ति पदान्येकप्रयोनमभिनिर्वर्तयन्ति तावन्त्येकं वाक्यम्।' यदि च विभाज्यमानं साकाङ्क्षं पदं भवति--तुलना करो–तेषां वाक्यं निराकाङ्क्षम् (कात्या० श्रौत० १।३।२)।

पृथगर्थो नास्तीत्युक्तम्—न अनपेक्ष्य पदार्थान् पार्थगर्थ्येन वाक्यमर्थान्तरप्रसिद्धम् । कुतः ? प्रमाणाभावात् । देवस्य त्वेति—यहाँ पूर्व व्याख्या में उद्धृत पूरा मन्त्र देखना चाहिये । उससे स्पष्ट हो जायेगा कि सम्पूर्ण पदों का हविनिर्वाप के प्रकाशन में तात्पर्य है । निर्वापप्रकाशनम्—प्रत्येक याग की पुरोडाश चरु आदि हवियों की सिद्धि के लिये हविर्धान शकट (जिसमें हवि भरी हुई है) के बायें पहिये पर दाहिने पैर से चढ़कर, अथवा अग्निहोत्रहवनी में रखे धान से प्रत्येक आहुति के लिये चार-चार मुट्ठी व्रीहि वा यव को क्रमशः पवित्रसंज्ञक दो कुशारखी अग्निहोत्रहवणी वा शूर्प में ग्रहण करना हविनिर्वाप कहाता है । इस निर्वाप में प्रथम तीन मुट्ठी हवि देवस्य त्वा सवितुः मन्त्र से ग्रहण किया जाता है । प्रत्येक मुट्ठी के ग्रहण के समय देवस्य त्वा मन्त्र बोला जाता है, परन्तु चौथी मुट्ठी विना मन्त्र के ग्रहण की जाती है, (द्र०—श्राप० श्रौत १।१०।४-११। ।

यहाँ देवस्य त्वा सवितुः प्रसवे निर्वपामि यह एक वाक्य है, अश्विनोर्बाहुभ्यां निर्वपामि यह दूसरा है । इस प्रकार बहुत वाक्य हैं । (समाधान) यदि निर्वपामि का सब के साथ अनुषङ्ग (= अनु = पश्चात् सङ्ग = सम्बन्ध) होवे, तो बहुत वाक्य होवें । इस प्रकार अनुषङ्ग नहीं होता है । यदि निर्वपामि यह पद गुणभूत होवे, तब प्रतिप्रधान उसका भेद होवे (= प्रतिप्रधान सम्बन्ध होवे) और देवस्य त्वा इत्यादि के अर्थ (= प्रयोजन) से निर्वपामि नहीं कहा जाता है । साधन (= कारक) की प्रधानता होने पर वचन की अदृष्टार्थता होवे । निर्वाप के प्रधान होने पर [देवस्य त्वा आदि के] निर्वाप का प्रकाशन दृष्ट कार्य होता है । वह [निर्वाप] सब विशेषणों से विशिष्ट कहा जाता है । इसलिये विरोध नही है । और जैसे पद से पद विशेषित होता है, यह तदभूतानाम्० (१।१।२५) में कह चुके हैं । इससे [देवस्य त्वा से लेकर निर्वपामि पर्यन्त] एक वाक्य है ।

बहूनि वाक्यानि—'देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपामि' इस मन्त्र में अन्त में पढ़े हुए निर्वपामि पद का प्रत्येक अवान्तर वाक्य के साथ सम्बन्ध करने पर 'देवस्य त्वा सवितुः प्रसवे निर्वपामि, अश्विनोर्बाहुभ्यां निर्वपामि, पूष्णो हस्ताभ्यां निर्वपामि, अग्नये जुष्टं निर्वपामि' इस प्रकार चार वाक्य बनते हैं । अनुषङ्गः—किसी पदसमूह के साथ वाक्यार्थ की पूर्ति के लिये प्रकरण-पठित पद अन्त में जोड़ा जाता है, उसे 'अनुषङ्ग' कहते हैं । (द्र०—आगे सूत्र २।१।४८) । जो-जो पद वाक्यार्थ की पूर्ति के लिए बाहर से जोड़ा जाता है, उसे 'अध्याहार' कहते हैं । यदि गुणसूतो निर्वपामि—जो पद गुणभूत होता है, उसका प्रतिप्रधान आवर्तन होता है; गुण के प्रधान के लिये होने से । देवस्य त्वेत्येवमादीनामर्थेनोच्यते—इसका तात्पर्य यह है कि देवस्य त्वा आदि से गुणभूत निर्वाप नहीं कहा जाता है । निर्वाप के गुणभूत होने पर देवस्य त्वा आदि कारक पदों की प्रधानता होगी । साधन-

प्राधान्ये—कारक पदों को प्रधानता होने इन पर पदों का उच्चारण केवल अदृष्ट के लिये होगा। निर्वापे पुनः प्रधाने—निर्वाप को प्रधान मानने पर देवस्य त्वा आदि पदों का प्रयोजन निर्वाप का प्रकाशन होगा। सर्वैविशेषणैः—देवस्य त्वा सवितुः प्रसवे, अश्विनोर्बाहुभ्याम्, पूष्णो हस्ताभ्याम्, अग्नये जुष्टं रूप विशेषणों से विशिष्ट निर्वाप कहा जाता है। अर्थात् मन्त्र का अर्थ होगा—'सविता देव की अनुज्ञा में अश्विनों के बाहुओं और पूषा के हाथों से अग्नि के लिये तुझ प्रिय हवि का निर्वाप करता हूँ।' तथोक्तं तद्‌भूतानान्०—द्र०—मी० १।१।२५—पदानि हि स्वं स्वं से लेकर विशिष्टार्थसम्प्रत्ययश्च वाक्यार्थः पर्यन्त भाष्य।

किस लिये दोनों पढ़े हैं—अर्थैकत्वाद् और विभागे साकाङ्क्षत्वात्? (समाधान) कुछ [पदसमुदाय] एकार्थ होते हैं, विभाग करने पर साकाङ्क्ष नहीं होते। जैसे—भगो वा विभजतु, अर्यमा वा विभजतु [पूषा वा विभजतु] इति। ये सब पदसमूह एकार्थक होते हुए विभाग का कथन करते हैं। (आक्षेप) भगविशिष्ट विभाग से अर्यमाविशिष्ट विभाग अन्य है। (समाधान) नहीं। विभागसामान्य से इस पदसमुदाय का प्रयोजन है, विशेष में नहीं। सामान्य प्रयोजन मानने पर ही अर्थ दृष्ट होता है, विशेष में नहीं। विभाग में ये पदसमुदाय साकाङ्क्ष नहीं होते हैं। इसलिये ये भिन्न-भिन्न वाक्य-विभाग कर्म में विकल्प को प्राप्त होते हैं। तथा—स्योनं ते सदनं कृणोमि घृतस्य धारया सुशेवं कल्पयामि। तस्मिन् सीदमृते प्रतिष्ठित व्रीहीणां मेधः सुमनस्यमानः (= हे पुरोडाश! तेरा सुखकारी स्थान बनाता हूँ, घृत की धारा से उसे सुखपूर्वक शयनाधार बनाता हूँ। उस अमृत स्थान में तू स्थित हो, हे व्रीहियों के सारभूत! प्रसन्नतापूर्वक स्थिर हो)। यह विभाग होने पर साकाङ्क्ष है (क्योंकि उत्तरार्द्ध के आदि में प्रयुक्त तस्मिन् पद दोनों भागों को जोड़े हुए है)। इस पद समुदाय [के पूर्व और उत्तर भाग] से दो प्रयोजन सिद्ध किये जाते हैं—[पूर्वार्ध से पुरोडाशपात्री में घृत के अभिधारण वा उपस्तरण से पुरोडाश के लिये] स्थान बनाया जाता है, और [उत्तरार्ध से] पुरोडाश को स्थापित किया जाता है। इसलिये ये भिन्न वाक्य हैं। पूर्ववाक्य सदनकरण में विनियुक्त होता है और उत्तरवाक्य के स्थापन में। इसलिये सूत्रकार ने सम्यक् सूत्र बनाया है। सूत्र पर उपालम्भ उपपन्न नहीं होता है।

विभागे साकाङ्क्षत्वात्—यह सूत्रगत पद साकाङ्क्षं चेद् विभागे स्यात् का अर्थतः अनुवाद है। पूषा वा विभजतु—यह अंश हमने कुतुहलवृत्ति आदि के आधार पर बढ़ाया है। विभागमभिदधति—पौर्णमास में आग्नेय पुरोडाश और अग्नीषोमीय पुरोडाश के लिये व्रीहि वा यव का पृथक् निर्वाप किया जाता है, तत्पश्चात् तुष हटाने के लिये कूटने के समय दोनों पुरोडाशों के भागों को मिलाकर कूटा जाता है, तत्पश्चात् शिला पर पीसा जाता है। तदनन्तर पुरोडाश बनाते समय उस के दो भाग किये

जाते हैं। इस विभागकरण में भगो वां विभजतु मन्त्र विनियुक्त है। सामान्ये हि दृष्टोऽर्थः—दोनों पुरोडाशों के हवि द्रव्य के सामान्य भाग में विभाग करना रूप दृष्ट प्रयोजन है। न विशेषे—यदि भगविशिष्ट विभाग अर्यमा विशिष्ट विभाग और पूषा विशिष्ट प्रयोजन होवे, तो मन्त्रपाठ अदृष्टार्थ होवे। क्योंकि हवि द्रव्य भग अर्यमा और पूषा देवता सम्बन्धी तो हैं नही। अतः विशिष्ट विभाग में इन मन्त्रों का पाठ अदृष्टार्थ के लिये ही मानना पड़ेगा। विभागे विकल्प्यते—यतः उक्त वाक्यों का विभाग करना मात्र सामान्य प्रयोजन है, इसलिये ये विभाग कर्म में विकल्प से विनियुक्त होते हैं। किन्हीं के मत में तीनों समुदायों से पिष्ट का यथादैवत विभाग किया जाता है।

सदनं कृणोमि—तै० ब्रा० ३।७।५ में कृणोमि के स्थान में करोमि पाठ है। मानव श्रौत १।२।६।१९ में कृणोमि पाठ मिलता है। व्रीहाणां मेधः—पुरोडाश के लिये व्रीहि और यव द्रव्य का विकल्प है। मन्त्र में व्रीहीणां मेधः पाठ होने से इससे व्रीहि-निष्पन्न पुरोडाश को ही पुरोडाशपात्री में रखते हैं। यवनिर्मित पुरोडाश का पुरोडाश-पात्री में बिना मन्त्रोच्चारण के स्थापन होता है। द्र०—आप० श्रौत २।११।२—तूष्णीं यवमयम्। इसकी टीका रुद्रदत्त ने लिखा है—यदा यवान् निर्वपति तदा तूष्णीं प्रतिष्ठापयति व्रीहीणामिति लिङ्गविरोधात्। मन्त्र में व्रीहीणाम् का निर्देश होने से। प्रकृति में ऊह नहीं होता, यह सामान्य नियम है। अतः यवानां मेधः ऐसा ऊह करके समन्त्रक यवमय पुरोडाश को प्रतिष्ठित नहीं किया जाता है। मानव श्रौत १।२।२२ में यवानां मेध इति यवानाम् सूत्र से मन्त्र से यवानां मेधः ऐसा ऊह करके समन्त्रक यवमय पुरोडाश का प्रतिष्ठापन कहा है। इससे विदित होता है कि मानव श्रौतकार प्रकृति में भी ऊह मानते हैं। यह भेद महत्वपूर्ण है। सदनकरणे विनियुज्यते—दोनों भागों का सदनकरण और पुरोडाशस्थापन में विनियोग आपस्तम्ब श्रौत २।१०।६ तथा २।११।१ में; और मानव श्रौत १।२।६।१९,२२ में मिलता है। यहाँ यह भी ध्यान रखने योग्य है कि भाष्यकार ने यजुःपाठ के एकमन्त्रत्व के प्रसङ्ग में स्योनं ते सदनं मन्त्र उपस्थित किया है। तदनुसार यह यजुः है। भट्ट भास्कर ने तै० ब्रा० ३।७।५ के भाष्य में इसे त्रिष्टुप्छन्दस्क ऋक् माना है।

'अर्थैकत्वात्' = एक सम्पूर्ण अर्थ रहने पर अर्थात् जो एक पूर्ण अर्थ का प्रकाश करता है, 'एकं वाक्यं' = वह एक वाक्य है, 'विभागे' = विभक्त करने पर 'चेत्' = यदि, 'साकाङ्क्षं स्यात्' = साकाङ्क्ष अर्थात् पदके साथ आकाङ्क्षायुक्त रहता है, जो एक सम्पूर्ण अर्थ प्रकाशित करता है उसको विभक्त करने पर साकाङ्क्ष होता है, अर्थात् अन्वय करने के लिए अन्य पद की आकाङ्क्षा है तो वह एक वाक्य है॥ ४६॥

अथ पञ्चदशं वाक्यभेदाधिकरणम्

[१५] समेषु वाक्यभेदः स्यात् ॥ ४७ ॥ सि० ॥

शा० भा०—'इषे त्वा ऊर्जे त्वा' इति । तथा 'आयुर्यज्ञेन कल्पताम्, प्राणो यज्ञेन कल्पताम्' इति । अत्र संदेहः—किमेवमादिषु भिन्नं वाक्यम्, उतैकमिति । एकमिति ब्रूमः । इषे त्वा इत्येवमुक्ते, न किंचिद् दृष्टं[1] प्रयोजनम्, तथा ऊर्जे त्वा इत्यपि च, वचनसामर्थ्याददृष्टम्[2] । तदुभाभ्यामेकं कल्पयितुं न्याय्यम् । एवमल्पीयस्यदृष्टानुमानकल्पना भविष्यति ।

तस्मादेकं वाक्यम् । एवं प्राप्ते ।

सिद्धान्तः

ब्रूमः—समेषु वाक्यभेदः स्यात् । समेषु—परस्परानाकाङ्क्षेषु वाक्यं भिद्यते । 'इषे त्वा' इत्यनेनैकोऽर्थः क्रियते, ऊर्जे त्वाइत्यनेनापरः[3] । नन्विदानीमेवोक्तं नात्र दृष्टोऽर्थ इति । यद्यपि प्रत्यक्षादिना प्रमाणेन नोपलभ्यते । श्रुत्या तु गम्यते—इषे त्वेति छिनत्ति । ऊर्जे त्वेत्यनुमार्ष्टि इति । तथा आयुर्यज्ञेन कल्पताम् । प्राणो यज्ञेन कल्पताम् इत्यायुःक्लृप्तेरन्या प्राणक्लृप्तिः ।

ननु सामान्यमात्रमिष्टम्, तन्न विशेषणभेदाद् भेदमर्हतीति । यथा, अग्नये जुष्टं निर्वपामि इति निर्वाप एकः । तस्य विशेषाः सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् इति, न तेषां भेदान्निर्वापस्य भेद इष्यते । एवमिहापि क्लृप्तिर्नामैकोऽर्थः, नासावायुरादिभिर्विशेषैर्भिन्नो भविष्यतीति ।

उच्यते । इह क्लृप्तीर्वाचयति इति बह्वृचः क्लृप्तयः श्रूयन्ते । ताश्च वक्तव्याः । तत्रैकामायुः क्लृप्तिम् 'आयुर्यज्ञेन कल्पताम्' इत्येष मन्त्रः शक्नोति वदितुम् । प्राणो यज्ञेन कल्पताम् इत्ययमपि प्राणक्लृप्तिपराम् । एवं[4] तु सर्वे क्लृप्तिविशेषवचनो[5] । तच्च दृष्टं प्रयोजनम् । तस्मादनेकार्थत्वात्, तत्रापि वाक्यभेद इति । ननु सामान्यवचनादेकत्वम् । यथा विभागे । नैतदेवम् । विभागे दृष्टार्थं सामान्यमिह न । अपि च 'क्लृप्तीर्वाचयति' इति विहितम् । 'आयुर्यज्ञेन कल्पताम्' इति चाऽऽयुःक्लृप्त्यभिधानमभिनिवर्त्यते[6] प्रत्यक्षम् । प्राणो यज्ञेन कल्पताम् इति च प्राणक्लृप्तेः । तस्माद्वाक्यभेदः ॥ ४७ ॥

इति पञ्चदशं वाक्यभेदाधिकरणम् ॥ १५ ॥

---

१. ब. दृष्टं उर्जेत्वेत्येवमपि ।
२. ब. सामर्थ्यादित्रादृष्टं ।
३. ब. त्यनेनाप्यपरः ।
४. ब. एवं सर्वे ।
५. ब. क्लृप्तिविशेषवचनं दृष्टार्थम् ।
६. क. निवर्तन्ते ।

भा० वि०—विषयमाह—**इषे त्वेति**। आयुर्यज्ञेनेत्यारभ्य यज्ञो यज्ञेन कल्प्यताम् इत्यन्तः पदसमूहः इहोदाहरणत्वेनाभिमतः। अत्र च यद्येतद्वाक्यलक्षणं तर्हि इहाप्येकवाक्यत्वं स्यादिति शङ्कानिरासात् सङ्गतिः। पूर्वोक्तवाक्यैक्यलक्षणासंभवासंभवाभ्यां संशयमाह—**तत्रेति**। न किंचिद्दृष्टमिति। अर्थप्रकाशनरूपं प्रयोजनमित्यर्थः। वचनसामर्थ्यादिति। स्वाध्यायविधिपरिगृहीतस्य निष्प्रयोजनत्वानुपपत्त्येत्यर्थः। अदृष्टमिति कल्प्यमिति शेषः। तथापि किमित्यत आह—**तदुभाभ्यामिति**। तत्र हेतुरेवमिति अदृष्टस्य प्रयोजनस्यानुमानप्रसङ्गे यस्यां कल्पनायां सैवमल्पीयसी भविष्यतीत्यर्थः। यदा प्रयोजनैक्यं तदा प्रत्येकं तत्साधनशक्त्यभावेन विभज्यमानसाकाङ्क्षत्वादेकमिदं वाक्यमित्याह—**तस्मादिति**। नचेषेत्वेति छिनत्ति ऊर्जेत्वेत्यनुमार्ष्टि इति प्रतीकभेदेन विनियोगात् क्लृप्तीर्वाचयतीति बहुत्वनिर्देशाच्च वाक्यभेदश्शङ्कनीयः एकप्रयोजनतया सकलस्यापि यावद्विनियोगमावर्तयितव्यत्वात् कल्पतामिति पुनः पुनः प्रयोगमात्रेणैकवाक्यत्वेऽपि बहुवचनविरोधाच्चेति द्रष्टव्यम्। सूत्रं व्याकुर्वन् सिद्धान्तमाह—**एवमित्यादिना**।

ननु कथं परस्परानाकाङ्क्षत्वं कल्प्यमानैकार्थत्वेन विभज्यमानसाकाङ्क्षत्वावगमादित्याशङ्क्याह—**इषे त्वेति**। रूपाधीनत्वाद्विनियोगप्रयोजनयोः रूपस्य च त्वान्तशब्दभेदेन भेदाद्विनियोगभेदाच्च प्रयोजनभेद एव युक्तः इत्याशयः।

नन्विहाख्याताश्रवणात्तल्लभ्यस्य प्रयोजनस्य कल्प्यत्वाल्लाघवायैक्यमेव युक्तमित्याशङ्कते—**नन्विति**।

स्यादेवं यदि कल्प्यं प्रयोजनस्यात्, इह तु विनियोगवशेन छिनद्मि अनुमार्ज्मि इत्येवं रूपस्याख्यातभेदस्य सिद्धत्वात् तत्प्रकाशनरूपप्रकाशनं क्लृप्तमेवेति तद्भेदाद्वाक्यभेद इति परिहरति—**यद्यपीति**। आयुर्यज्ञेनेत्यादावपि रूपभेदेन प्रयोजनभेदात् वाक्यभेद इत्याह—**तथेति**।

ननु क्लृप्तिसामान्यस्यैकत्वादायुरादिभेदेन च तद्भेदाभावात् कथं प्रयोजनभेदः इत्याशङ्कते—**नन्विति**। एतदेव दृष्टान्तेनोपपादयति—**यथेत्यादिना**। विनियोगवशेन क्लृप्तिशब्दवाच्यानां मन्त्राणां बहुत्वावगमात् मैवमिति परिहरति—**उच्यत इत्यादिना**।

ननु क्लृप्तिसामान्यरूपार्थैक्यान्मन्त्रैक्ये सत्यपि क्लृप्तिपदाभ्यासविषयं बहुवचनं व्याख्येयमित्याशङ्क्याह—**ताश्चेति**। चशब्दोऽवधारणे। अनपेक्षितार्थाः क्लृप्तयएवोच्चार्यतया विधीयन्ते। तेनार्थैक्यनिमित्तैकवाक्यता नास्तीत्यर्थः।

नन्वार्थाविवक्षायां वाक्यभेदहेत्वर्थभेदाभावात् भिन्नवाक्यतापि न स्यादित्याशङ्क्याह—**तत्रेति**। अर्थभेदं विना वाक्यभेदानुपपत्तेः उपसर्जनतयार्थनाना-

त्वमप्याश्रीयत इत्यर्थः। किं च क्लृप्तिसामान्यस्य निष्प्रयोजनस्याविवक्षितत्वेन विशेषानपेक्षत्वात् क्लृप्तिविशिष्टायुरादिविशेषवचना एते शब्दा इत्याह—**क्लृप्तिविशेषेति**। विशेषाभिधाने वा किं प्रयोजनमत आह—**तद्वचनाच्चेति**। **दृष्टमिति**। मन्त्रबहुत्वापादनमित्यर्थः। विशेषपरत्वेनार्थनानात्वे फलितमाह—**तस्मादिति**।

ननु बहुवचनस्याभ्यासापेक्षयोपपत्तेरेकवाक्यतैव युक्तेति शङ्कते—**नन्विति**। —**यथेति**। भगादिभेदेऽपि यथा विभागैक्यं तथायुरादिभेदेऽपि क्लृप्त्यैक्यमित्येतावन्मात्रे दृष्टान्तः नन्वेकवाक्यत्वेऽपि तत्र वाक्यभेदाभ्युपगमादिति मन्तव्यम्, वैषम्यप्रदर्शनेन परिहरति—**नैतदिति**। पूर्वं क्लृप्तीरिति क्लृप्तिपदोपेतमन्त्रपरत्वमभ्युपगम्य बहुवचनानुपपत्त्या मन्त्रभेदो व्युत्पादितः इदानीं क्लृप्तिपदस्य क्रियापरत्वमाश्रित्य वाक्यभेदमाह—**अपि चेति**। क्लृप्तिक्रिया यजमानमध्वर्युर्वाचयतीति विधिवाक्यार्थ इत्यर्थः। ततः किमित्याह—**आयुरिति**। प्राणक्लृप्तेरभिधानमभिनिर्वर्तत इत्यनुषङ्गः। क्रियाभेदप्रकाशनेन हि दृष्टार्थताभवतीत्यर्थः। ततश्च सिद्धो मन्त्रभेद इत्याह—**तस्मादिति**। प्रयोजनं तु मन्त्रैक्ये सत्येकदेशभ्रेषेऽपि सर्वा वृत्तिः। भेदे तु यस्मिन्मन्त्रे भ्रेषः तस्यैवावृत्तिरिति द्रष्टव्यम् ॥४७॥

अथ पञ्चदशं वाक्यभेदाधिकरणम्

त० वा०—येषामदृश्यमानकर्मसमवेतार्थत्वेन लैङ्गिकविनियोगाभावेन वचनाद्विनियोगः, तेषां प्रागदृष्टार्थमन्त्रावधेरेकमन्त्रत्वं युक्तम्।

तथा हि—

कल्प्यस्तेषामदृष्टोऽर्थः स चाल्पः स्यात्प्रमाणवान्।
कल्पिते च तदेकत्वे साकाङ्क्षाः स्युर्वियोजिताः॥

यदा हि बह्वदृष्टकल्पना निष्प्रमाणिकेत्येकमदृष्टं सर्वेभ्यः कल्पितं भवति, तदा प्रत्येकं तत्साधनशक्त्यभावाद्विभज्यमानसाकाङ्क्षत्वमप्यस्तीत्येकवाक्यता। कथं पुनरस्मिन्पक्षे प्रतीकभेदेन विनियोगः 'इषे त्वेति शाखां छिनत्ति' 'ऊर्जे त्वेत्यनुमार्ष्टि इत्येवमादिः। कथं च क्लृप्तीर्वाचयति' इति बहुत्वनिर्देशः।

तदुच्यते—

एकोऽपि बहुभिर्मन्त्रः प्रतीकैर्विनियुज्यते।
पुनः पुनः प्रयोगाच्च क्लृप्तीरित्यभिधीयते॥

आदिमध्यावसानग्रहणेनैकोऽपि मन्त्रस्तत्र तत्र विनियुज्यमानोऽपि न पीड्यते[1]। यावद्विनियोगं हि सकल आवर्तिष्यते, खण्डस्याप्रयोजनत्वात्। कल्पतां कल्पतामिति च पुनः पुनः प्रयोगादेकवाक्यत्वेऽपि बहुवचनाविरोधः।

---

१ क. न भिद्यते।

उच्यते ।

नैतदेवम्—

रूपादुत्तरकाले हि विनियोगप्रयोजने ।
तस्मात्प्रागेव तत्क्लृप्तेर्भेदाभेदपरीक्षणम् ॥

तिष्ठतु तावत्प्रयोजनकल्पनम्, विनियोगवाक्यं वा । न हि तदुत्तरकालं स्वरूपनिरूपणं युक्तम् । अज्ञातरूपस्य विनियोगाशक्तेः, अविनियुक्तस्य च प्रयोजनकल्पनानुपपत्तेः । तत्तन्निरपेक्षं तु रूपं पाठादेवावधार्यते । तत्कालावधृतभेदाभेदानुवर्तित्वं तु प्रयोजनविनियोगयोः । प्रमाणवच्चानेकमपि कल्पनीयमित्युक्तम् । रूपोपलब्धिवेलायां चेषेत्वादिना न परस्परसाकाङ्क्षत्वमेकप्रयोजनत्वं चोपलक्ष्यते ततश्च निष्प्रतिद्वन्द्वेऽवधारितभेदे, पश्चान्न किंचिदेकत्वापादने कारणं संभवति । न च प्रागनुपलब्धं साकाङ्क्षत्वं कल्पयितुं शक्यम् । तेन च विना यद्यप्येकप्रयोजनत्वं भवेत् । तथाप्येकाङ्क्षवैकल्यादेकवाक्यत्वाभावः । किमुत यदा रूपभेदाद्विनियोगभेदः तद्भेदाच्चादृष्टार्थत्वेऽपि प्रयोजनभेदः । त्वत्पक्षेऽपि चावश्यं यावद्विनियोगं तेन तेन भवितव्यम् । इयांस्तु विशेषः । तव समस्तान्मन्त्रात् मम व्यस्तेभ्यः । न चैषामदृष्टार्थत्वं, ब्राह्मणोपदिष्टदृष्टार्थसाधनत्वात् । तद्बलेन चैषां यावता विना चोदितकरणसामर्थ्यं नास्ति, तावदनाम्नातमपि कल्पनीयं च्छिनद्मीत्यादि ।

यद्वा यथैव 'रथघोषेण माहेन्द्रस्य स्तोत्रमुपाकरोति' इति वचनादवाचकस्यापि विनियोगमात्रानुसंधानेन स्तोत्राभिमुख्यचिह्नत्वं भवति, एवमिषेत्वादीनां छेदनादिस्मरणहेतुत्वम् । उभयमपि चैतत्प्रमाणवदिति सूत्रकारैः कैश्चित्कथंचिदाश्रितम् ।

वार्तिकमतम्

सर्वथाऽत्रैवमध्यवसातव्यम् । विकलवाक्यप्रयोगासंभवादवाचकप्रयोगानुपपत्तेश्चाध्याहारः । अथ वा यथाम्नातविनियोगानुसारात्तादृशेनैव स्मर्तुं संस्काराधाने यतितव्यम् । तत्रानुष्ठात्रभिप्रायाधीनोऽन्यतरपरिग्रह इति, दृष्टप्रयोजनभेदादपि सिद्धो वाक्यभेदः ।

किं च—

अन्योन्यनिरपेक्षाणां कार्यान्यत्वे नियोगतः ।
प्रत्येकं यागहेतुत्वाद्यजुष्ट्वमवकल्पते ॥

तथा 'आयुर्यज्ञेन कल्पताम्' इत्येवमादीनां निराकाङ्क्षभिन्नरूपोपलब्धेर्नैकत्वापत्तिः सत्यप्येकार्थत्वे । न च तदस्ति । आयुःकल्पनादीनां भिन्नत्वात् । निर्वापवदभेद इति चेत् न । क्लृप्तीरिति मन्त्रबहुत्वचोदनायाः प्रत्यक्षत्वात् । इह

तावदर्थानामकर्माङ्गापवादविवक्षायां सत्यां मन्त्रोच्चारणमात्रं प्रयोजनम् । तत्र च बह्व्यः क्लृप्तयः श्रूयन्ते । तद्भेदश्चार्थभेदमन्तरेण न भवतीत्यक्षरोपसर्जनभूतोऽर्थो नानात्वेनाऽऽश्रीयते । क्लृप्तिविशेषवचनं च दृष्टार्थमिति मन्त्रबहुत्वापादनार्थत्वात् । **यथा विभाग** इति । सकृच्छ्रुतनिर्वापवैलक्षण्यात्क्लृप्तीनाम् । पुनः पुनरुच्चारितशब्दोऽपि यथा विभागः साधनभेदे सत्यपि न भिद्यते, तथा क्लृप्तिभेदोऽपि न भविष्यतीति मन्यते । नैतदेवमित्युत्तरम् । इह सामान्यविवक्षानुपयोगात् ।

अथ वा सिद्धान्तवाद्येव **यथा विभागे नैतदेवमिति** स्वयमेवैकवाक्यभूतमुत्तरं ददाति । ननु च विभागवाक्यानामपि[1] भेदोऽस्त्येवेति नोपन्यसनीयम् । एवं तर्हि नैवेदं प्रभेदप्रतिपत्त्यर्थम्[2] । किं तर्हि ? दृष्टान्तेन सहैकत्वापादपरत्वात्तदीयविकल्पापादनायोपन्यस्यति । तथा विभागे, तथाऽत्र विकल्पः कस्मान्न भवतीति । नैतदेवमिति समानविषयत्वे हि विकल्पो भवति । न चेह सामान्यविवक्षा । येन विभागवदैकार्थ्यं भवेत् । क्लृप्तिविशिष्टायुराद्याशासनपरत्वात् । प्रयोगे हि साधनानामप्रयोजनत्वात्, सामान्यभूतक्रियामात्रप्रकाशनपरत्वम् । इह पुनरायुरादीनामाशास्यत्वेन प्राधान्यात्तद्विशेषणत्वेन क्लृप्त्युपादानम्, न त्वायुरादिविशिष्टा सा प्रकाश्यते, निष्प्रयोजनत्वात् । अथापि क्रियाप्राधान्यं तथाऽपि तद्भेदपरत्वान्नानार्थत्वम् । भेदपरत्वे च पूर्वोक्तमेव दृष्टार्थत्वमुच्यते ।

अथ वा 'क्लृप्तीर्वाचयति' इति नैव मन्त्रपरः क्लृप्तिशब्दः, कथं तर्हि ? क्रियाबहुत्वाभिधान एव, शब्दानामर्थतन्त्रत्वात् । अतश्च बहुत्वसंख्यया कर्मभेदाद्विशेषणकृतभेदाश्रयणाच्च मन्त्राणां तत्परत्वे चोदितार्थनिर्वृत्त्या दृष्टार्थत्वात्सिद्धा भिन्नार्थता ।

कथं पुनरस्मिन्पक्षे वाचयतीत्युच्यते, शब्दपदार्थको ह्ययं प्रयुज्यते । नैष दोषः । उभयत्र प्रयोगात् । यथैव हि शब्दं ब्रुवन्तं प्रयुञ्जानो वाचयतीत्युच्यते, तथैव च यः शब्देनार्थं ब्रवीति स्यापि प्रयोजको वाचयतीति । तस्मात्क्लृप्तिक्रियाशब्दैर्यजमानं वक्तुं प्रवृत्तमध्वर्युर्वाचयतीत्ययमर्थो विज्ञायते । तत्प्रकाशनेन च भिन्ना एव सन्तो मन्त्रा दृष्टार्था भवन्तीति वाक्यभेदः ॥ ४७ ॥

इति पञ्चदशं वाक्यभेदाधिकरणम् ॥ १५ ॥

---

१. क. भगो वां विभजतु इत्यादीनां विभागवाक्यानां । (टिप्पण्यां)

२. क. प्रतीत्यर्थं । (टिप्पण्यां)

॥ अथ पञ्चदशं वाक्यभेदाधिकरणम् ॥ १५ ॥

न्या० सु०—कियतः पदसमूहस्येह चिन्ताविषयतेति दर्शयन् पूर्वपक्षयति—**तेषामिति ।** दृष्टार्थस्यैव लिङ्गविनियोज्यत्वात्तत्पर्युदासेन दृष्टार्थमन्त्रत्वपर्युदासे सिद्धेऽपीषे त्वेति शाखां छिनत्त्यूर्जे त्वेत्यनुमार्ष्टीत्याद्यनेकवाचनिकविनियोगसद्भावेऽपि मन्त्रैक्यं वक्तुम्—**प्रागित्युक्तम् ।** इषे त्वेत्यादिमन्त्राणां छेदनादिकरणत्वेन विधानादभिधानं च विना मन्त्राणां करणत्वायोग'द्यावता क्रियाया उपकारः प्रकाश्यते'इत्यादिभाष्यात्, 'यावता परसङ्घेन स्मार्यते यागसाधनमि'त्यादिवार्तिकाच्च प्रतिपाद्यार्थैकत्वस्यैवैकवाक्यलक्षणत्वप्रतीतौ स्तोत्रशस्त्रमन्त्राणां चैकादृष्टसाधनत्वेऽप्यैकमन्त्राभावात्कल्पाख्यातलभ्यछेदनादिक्रियाभिधानाभिप्रायो भाष्यवार्त्तिकयोरदृष्टशब्दः । अत एव तदुभाभ्यामेवं कल्पयितुं न्याय्यमित्युभयशब्दोक्तेन पदचतुष्टयमात्रस्यैकवाक्यत्वेन प्राक् दृष्टार्थेत्यविरुद्धं 'वायवस्थे'त्यत्राख्यातस्य श्रुतत्वाद्वायुवच्छीघ्रगामिनो भवथेति चोक्ते, अर्थादपाकरणप्रतीत्युपपत्तेरपाकरणवाच्याख्यातस्य कल्प्यत्वात्, इतरथाऽस्यापि यथाश्रुतस्य वत्सापाकरणाभिधानार्थत्वायोगाददृष्टार्थत्वापत्तेरविधित्वायोगात् विरुद्ध्येत ।

आयुर्यज्ञेन कल्पताम्, प्राणो यज्ञेन कल्पताम्, अपानो यज्ञेन कल्पताम्, व्यानो यज्ञेन कल्पताम्, चक्षुर्यज्ञेन कल्पताम्, श्रोत्रं यज्ञेन कल्पताम्, मनो यज्ञेन कल्पताम्, वाग्यज्ञेन कल्पताम्, आत्मा यज्ञेन कल्पताम्, यज्ञो यज्ञेन कल्पताम्, इत्येतावतः पदसमूहस्यैकमन्त्र्यमभिमतम् । एतदेवोपपादयति—**तथा हीति ।** तेषामदृश्यमानसमवेतार्थत्वानां पदानामप्रतीतो वाक्यार्थः प्रयोजनभूतः कल्प्यः तस्य चाल्पस्यैव प्रमाणवत्वादेक एवार्थ इत्यर्थः । अनेन चादृष्टस्य वाक्यार्थस्यानुमानं यस्यां कल्पनायाम्, साऽल्पीयसीति भाष्यं व्याख्यातम् । श्लोकं व्याचष्टे—**यदा हीति ।** तस्मादित्युपसंहारभाष्यं व्याचष्टे—**इतीति ।** नन्वैकमन्त्रे प्रतीकभेदग्रहणम्, बहुवचनं वाऽयुक्तं स्यादित्याशङ्क्ते—**कथं पुनरिति ।** 'अग्निः प्राण एतु परावतश्चान्तरिक्षात् दिवस्परि आयुः पृथिव्या अध्यमृतमसि प्राणाय त्वेति हिरण्यमभिव्यानितीत्यन्तप्रतीकेन विनियोगस्य सङ्कर्षे वक्ष्यमाणत्वात्, मध्यान्त्यप्रतीकाभ्यामपि विनियोगापत्तेः, अभ्यासापेक्षया च बहुवचनोपपत्तेरुभयमप्युपपादयति—**तदुच्यत इति ।** श्लोकं व्याचष्टे—**आदीति ।**

एवमिति सिद्धान्तोपक्रमभाष्यं व्याचष्टे—**उच्यत इति ।** सौत्रसमशब्दोक्तं परस्परानाकाङ्क्षत्वं कल्प्यैकार्थत्वेन विभज्यमानसाकाङ्क्षत्वावगमादयुक्तमाशङ्क्य, इषे त्वेति भाष्येणानेकार्थत्वमुक्तमुपपादयितुं सामान्यन्यायार्थं तावदाह—**रूपादिति ।** श्लोकं व्याचष्टे—**तिष्ठतु तावदिति ।** प्राणाय प्रयोजनाय त्वामभिव्यनिमीत्युक्ते, कथं हिरण्याभिधानस्य प्राणप्राप्त्यर्थतेत्यपेक्षायां परावतोदूरदेशात्, अन्तरिक्षाद्दिवश्च सर्वतः प्राणोऽस्मानागच्छतु । यच्च पृथिव्या उपर्यायुः तदप्यागच्छतु तवामृतत्वेनायुः प्राणादानसामर्थ्यादित्युपक्रमोपसंहारपर्यालोचनया प्राणप्राप्तिसिद्ध्यर्थत्वेन प्राणप्राप्त्याशासनस्य रूपा-

देकवाक्यत्वावगतेः तद्वशेनान्त्यप्रतीकेनापि सकलविनियोगो युक्तो, न त्वेकवाक्यत्वरूपावगमात्प्रागिति विनियोगवाक्यं वेत्यनेन सूचितम्। न च रूपभेदानुसारात्प्रयोजनभेदकल्पनेऽपि दोषः प्रमाणवन्त्यदृष्टानि कल्प्यन्ते सुबहून्यपीत्युक्तत्वादित्याह—**प्रमाणवच्चेति।** एवं च सतीह त्वाशब्दभेदेन भिन्नवाक्यरूपावसायान्नान्योन्याकाङ्क्षोपलभ्यते। न चैकप्रयोजनत्वात्कल्प्यते, तस्याप्यनुपलम्भादिति। सामान्यन्यायस्य-प्रकृतोपयोगमाह—**रूपेति।**

नन्विहाख्याताश्रवणेन तल्लभ्यस्य प्रयोजनस्य कल्प्यत्वात्कल्पनालाघवादैक्यमेव युक्तमित्याशङ्क्याह—**ततश्चेति।** रूपभेदात्प्रयोजनभेदावगतेर्न तदैक्यल्पना युक्तेत्याशयः। या च प्रयोजनैक्यात्साकाङ्क्षावयवत्वकल्पनोक्ता। साप्याकाङ्क्षावशेनैव प्रयोजनैक्यस्य कल्प्यत्वादयुक्तत्वादयुक्तेत्याह—**न चेति।** नैराकाङ्क्ष्ये च सति सर्वदा वाक्यभेदः सिद्ध इत्याह—**तेन चेति।** विनियोगभेदाच्चेहैकवाक्यत्वेऽपि दुर्वारः प्रयोजनभेद इत्याह—**त्वत्पक्षेऽपि चेति।** अभ्युपगम्यादृष्टार्थभेदः साधितः। वस्तुतस्तु छेदनादिसाधनत्वविनियोगादि इषे त्वा छिनत्त्यूर्जे त्वानुमार्ष्मीति भिन्नाख्यातकल्पनेन दृष्टार्थत्वात्तद्भेदेन स्पष्टो भेद इत्याह—**न चेति।** अनेन च नन्वित्याशङ्कानिरासार्थं यद्यपीति भाष्यं प्रत्यक्षाद्यनुपलब्धोऽपि प्रयोजनभूतो वाक्यार्थः श्रुतार्थापत्त्या छिनद्मीत्यादिशब्दकल्पनया गम्यत इत्येवं व्याख्यातम्।

प्रसङ्गात् प्राभाकरमतनिरासः

ये तु श्रुतार्थापत्तेः शब्दकल्पकत्वं नेच्छन्ति, तन्मतेऽप्यवाचकस्यापि मन्त्रस्य रथघोषवत्स्मारकत्वोपपत्तेर्दृष्टार्थतेत्याह— **यद्वेति।** ननु त्वेतिकर्मकारकवाचिनः पदस्य क्रियापदं विना नैराकाङ्क्ष्यायोगाच्छ्रुतार्थापत्तेश्च शब्दाकल्पकत्वेऽनुषङ्गेण वाक्यसमाप्तिः लौकिकवाक्यशेषो वेत्युत्तराधिकरणचिन्तानुपपत्तेः, अविशिष्टस्तु वाक्यार्थ इति चाभिधानार्थत्वस्य मन्त्राधिकरणोक्तस्य बाधापत्तेः, अवाचकस्य मन्त्रस्य स्मारकत्वं न युक्तमित्याशङ्क्याह—**उभयमपि चेति।** अयुक्तोऽप्ययं पक्षः कैश्चिदाश्रितत्वादुक्त इत्याशयः। वस्तुतस्तु व्यवस्थितशास्त्रार्थाभ्युपगमस्य न्याय्यत्वादेकस्मिन्पक्षे ग्राह्ये मन्त्राधिकरणोक्ताभिधानार्थत्वविरोधेनावाचकप्रयोगानुपपत्तेर्विकल्पस्य च वाक्यस्य साकाङ्क्षत्वाद्वाचकत्वायोगेन प्रयोगेन प्रयोगासम्भवादध्याहार एव युक्त इत्याह—**सर्वथेति।** सूत्रकृद्भ्रान्तौ किं मूलमित्याशङ्क्याह—**अथ वेति।** यथाम्नानं यथाविनियोगं च यावान्मन्त्रोऽवगतः, तदनुसार्यत्वाद्विनियोगब्राह्मणस्यानुष्ठानकालेऽनुसन्धानेन संस्कारोद्बोधे यतितव्यमिति शास्त्रार्थभ्रमः सूत्रकृद्भ्रान्तौ मूलमित्याशयः।

ननु भ्रान्तिमूलत्वेऽयं पक्षो न कैश्चिद्याज्ञिकैर्गृह्यतइत्याशङ्क्याह—**तत्रेति।** मन्त्रस्याध्याहृतपदवत्त्वेऽप्यध्याहृतपदभ्रेषे मन्त्रभ्रेषनिमित्तप्रायश्चित्ताभावायाऽनाम्नानोपपत्तेस्तावन्मात्रमन्त्रत्वेऽर्थापत्त्यभावाद्वस्तुतो शास्त्रीयेऽप्यर्थे सूत्रानुसाराच्छास्त्रीयत्वभ्रान्त्या-

नुष्ठानाद् परिग्रह इत्याशयः। प्रकृतमुपसंहरति—**इतीति**। यजुर्विषयत्वाच्चेह वाक्यशब्दस्य, यजुःशब्दस्य च यागसाधनवाचित्वेन यौगिकत्वात्सूक्तवाक्यवत् स्वाध्यायकाले भेदानभ्युपगमेऽपि कर्मकाले विनियोगभेदाद्यजुर्भेदावगतेर्भेदेनैव प्रयोज्यतेत्याशयेनाह—**किं चेति**। नियोगशब्दो विनियोगवाची। प्रत्येकं यागहेतुत्वसिद्धयेऽन्योन्यनिरपेक्षाणां कार्यान्यतोक्ता वा विनियोगभेदेनोपपादितो अनेन वा इषे त्वेति छिनत्तीति विनियोगाभिधानभाष्यं तात्पर्यतो व्याख्यातम्।

आयुरिति भाष्यं व्याचष्टे—**तथेति**। नन्वित्याद्याशङ्काभाष्यं व्याचष्टे—**निर्वापवदिति**। उच्यत इत्यादिपरिहारभाष्यं प्रत्यवयवं व्याचष्टे—**नेति**। मन्त्रशब्देन क्लृप्तिशब्दस्य मन्त्रपरतोक्ता। ननु निर्विशेषक्लृप्तिमात्रस्येह विवक्षितत्वेन क्लृप्तिमन्त्रस्यार्थैक्यादैक्यावगतेः श्रुतमपि बहुवचनमभ्यासाभिप्रायं व्याख्येयमित्याशङ्कानिरासार्थे ताश्चेति भाष्यावयवम्, तासामेवार्थमनपेक्ष्योच्चार्यत्वेनार्थैक्यनिमित्तैकवाक्यता नास्तीत्येवशब्दार्थे चशब्दमङ्गीकृत्य व्याचष्टे—**इह तावदिति**। मन्त्रपरत्वपक्षस्य परमतत्वसूचनार्थस्तावच्छब्दः। नन्वर्थाविवक्षायां वाक्यभेदहेत्वर्थभेदाभावात्। भिन्नवाक्यतापि न स्यादित्याशङ्कानिरासार्थं तत्रेति भाष्यावयवं व्याचष्टे—**तत्र चेति**। बहुवचनान्यथानुपपत्त्याक्षराणि प्रत्युपसर्जनभूतस्याप्यर्थस्य भेदोऽवसीयतइत्याशयः। क्लृप्तिरूपस्य चार्थस्याऽविवक्षितत्वेन विशेषानपेक्षत्वादायुरादिविशेषाभिधानस्य मन्त्रबहुत्वापादनमेव प्रयोजनमित्यभिधानार्थं क्लृप्तीति भाष्यावयवं व्याचष्टे—**क्लृप्तीति**।

ननु बहुवचनस्य श्रुताभ्यासापेक्षयोपपत्तेरर्थभेदकल्पनानुपपत्तेः मन्त्रे च क्लृप्तिसञ्ज्ञाया क्लृप्त्यभिधानमात्रेणोपपत्तेरेकवाक्यतैव युक्तेति शङ्कार्थे 'नन्विति' भाष्येपूर्वदृष्टान्तत्यागेन दृष्टान्तान्तराभिधानेऽभिप्रायमाह—**यथेति**। सकृच्छ्रुतत्वान्निर्वापस्य भेदेऽपि अभ्यासेन क्लृप्तीनां भेदो भविष्यतीति प्रत्यवस्थानानुत्थानार्थं दृष्टान्तान्तराभिधानमित्याशयः। एतदेव विवृणोति—**पुनरिति**। क्लृप्तिसंज्ञायाः कल्पतामिति शब्दवत्त्वेनाप्युपपत्तेः क्लृप्तिमात्रस्याप्यविवक्षितत्वान्नैकार्थेनेकवाक्यतापत्तिः, विभागसमान्यस्य तु कर्माङ्गत्वेन तत्प्रकाशनं दृष्टार्थत्वाद्युक्तमिति वैषम्याभिधानार्थम्। नैतदिति भाष्यं व्याचष्टे—**नैतदिति**।

शङ्काशेषत्वे न यथेति भाष्यावयवं व्याख्याये इदानीं परिहारशेषत्वेन व्याचष्टे—**अथ वेति**। विभागमन्त्रैक्याभिप्रायेणैतद् दृष्टान्ताभिधानमिति भ्रान्त्याशङ्कते—**ननु चेति**। भ्रान्तिनिरासेनोत्तरमाहैवं—**तर्हीति**। भेदे सत्यष्टदोषदुष्टविकल्पापत्तेरैक्यमेव युक्तमित्यनेन प्रकारेण भेदस्यैवाक्षेपान्नासङ्गतिदोषः। कथमस्माद्भाष्याद्विकल्पप्रतीतिरित्याशङ्क्य दृष्टान्तेन सहात्यन्तसाम्यापादनपरत्वादित्युक्तं शङ्काभाष्यं विकल्पापादने योजयित्वा, तन्निरासे परिहारभाष्यं योजयति—**नैतदिति**। यदि गुणभूते इत्यादिपूर्वाधिकरणभाष्येण साधनप्राधान्ये भेदाभिधानादिहार्थाविवक्षायामपि प्रतीतिमात्रेणा-

युरादिप्राधान्याभिधानम्। क्रियाप्राधान्येऽपि विशेषणभेदाद्भेदः शक्यो वक्तुमिति प्रौढिदर्शनाय—**अथापीत्युक्तम्**। नन्विहार्थस्याविवक्षितत्वात्कथं तद्भेदपरतेत्याशङ्का-निरासार्थत्वेन दृष्टार्थत्वादिति भाष्यावयवं व्याचष्टे—**भेदपरत्वे चेति**। पूर्वं मन्त्र-बहुत्वापादनार्थत्वरूपं यद् दृष्टार्थत्वमुक्तम्। तदेव भेदपरत्वे साध्ये हेतुत्वेनोच्यतइत्यर्थः।

अपि चेत्यादिभाष्यमिहेत्यादिभाष्येण पुनरुक्ततया भासमानं पूर्वोक्तमन्त्रपरत्वपक्षा-दर्थपरत्वरूपपक्षान्तराभिधानार्थत्वेन व्यचष्टे—**अथ वेति**। 'आयुर्दा अग्नेऽस्यायुर्मे दे-हीत्यादिवदिहाप्यायुरादिशब्दानां प्रधानफललक्षणार्थत्वेन प्रोत्साहनार्थत्वोपपत्तेः तद्वदेव च लक्ष्यमाणार्थैक्येऽप्यभिधेयार्थभेदाद्भिन्नवाक्यत्वोपपत्तेः मन्त्राधिकरणनिरस्तोच्चारण-मात्रप्रयोजनत्वपक्षानुपपत्तिसूचनार्थोऽथवा शब्दः।

ननूच्चारणार्थत्वाद्वचेरर्थकर्मता न युक्तेत्याशङ्कते—**कथं पुनरिति**। शब्दः पद्यते गम्यतेऽभिव्यज्यतेऽनेनेति व्युत्पत्त्योच्चारणं शब्दपदशब्देनोक्तम्। उच्चारणवाचितया लोके वचिः प्रयुज्यत इत्यर्थः। अभिधानवाचितयाऽपि लोके वचिः प्रयुज्यत इति परिहरति—**नैष इति**। शब्दमुच्चारयन्तं प्रयुञ्जाने वाचयतेः प्रयोगात्तदन्तर्गतस्य वचेर्यथोच्चारणार्थताऽवगम्यते, तथार्थमभिदधानं प्रयुञ्जानेऽपि प्रयोगादभिधानार्थतापि गम्यत'इत्याशयः। तेनैष शास्त्रार्थो भवतीत्याह—**तस्मादिति**। क्रियाभिधानप्रतिपाद-नस्य प्रकृतोपयोगाभिधानार्थमायुरित्यादिभाष्यं व्याचष्टे—**तत्प्रकाशनेन चेति**। दृष्टार्थ-शब्देन प्रोत्साहनार्थत्वाविशेषान्मन्त्रभेदेऽपि सर्वप्रयोगः सूचितः।

प्रयोजनं तु मन्त्रैक्ये सत्येकदेशभ्रेषेऽपि सर्वावृत्तिः। भेदे तु यस्मिन्मन्त्रे भ्रेषः तस्यैवावृत्तिरित्याशयः। तस्मादित्युपसंहारभाष्यं व्याचष्टे—**इतीति** ॥ ४७ ॥

॥ इति पञ्चदशं वाक्यभेदाधिकरणम् ॥

भा० प्र०—यजुर्वेद के मन्त्रों की एकवाक्यता के विषय में पूर्व अधिकरण में विश्लेषण किया गया है, प्रकृत सूत्र में वाक्यभेद कहाँ होता है–इसका विवरण दिया जा रहा है। श्रुति में 'इषे त्वोर्जेत्वा' (तै० सं० १।१।३) 'आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पताम्' (तै० सं० १।७।९) इत्यादि जो मन्त्र कहे गये हैं, उन मन्त्रों में एकवाक्यता है या ये सभी विभिन्न-विभिन्न वाक्य हैं—यह संशय होता है, इसमें पूर्वपक्षी का कहना है कि, ऐसे स्थलों में एकवाक्यता ही होगी, क्योंकि, 'इषे त्वा', एवं 'ऊर्ज्जे त्वा' इन दो को पृथक् दो वाक्य मानने पर किसी विशेष अनुष्ठेय पदार्थ का स्मरण नहीं होता है। इसलिए इनको अदृष्टार्थक मानना होगा, अर्थात् कर्मानुष्ठान के समय इसका पाठ करने पर अदृष्टविशेष = अपूर्व उत्पन्न होता है। अदृष्ट कल्पना में लाघव पक्ष ही आश्रयणीय है, किन्तु, 'इषे त्वा' एवं 'ऊर्ज्जे त्वा' इन दो को दो स्वतन्त्र वाक्य माना जाय तो दो अदृष्ट की कल्पना करनी पड़ेगी, इसमें कल्पना गौरवरूप दोष होगा। इसलिये 'इषे त्वा' एवं 'ऊर्ज्जे त्वा' ये दो पृथक् वाक्य नहीं हैं। इसी प्रकार

'आयुर्यज्ञेन कल्पताम्' एवं 'प्राणो यज्ञेन कल्पताम्' इत्यादि यजुर्वेद के मन्त्रसमूह भी पृथक् वाक्य नहीं हैं। क्योंकि पूर्व अधिकरण में उदाहृत 'अग्नेय त्वा जुष्टं निर्वपामि' एवं 'देवस्य त्वा सवितुः प्रसवे' इत्यादि मन्त्रों के समान ये भी एकार्थक ही हैं।

इस आशङ्का के समाधान में सिद्धान्ती का कहना है कि इनमें भिन्नार्थकता होने से इन स्थलों में सार्थकता नहीं है, अपितु वाक्यभेद ही है। कारण, 'समेषु वाक्यभेदः स्यात्' जहाँ सभी वाक्य सम अर्थात् परस्पर निरपेक्ष और भिन्नार्थक रहते हैं, उन स्थलों में वाक्य परस्पर भिन्न ही रहते हैं। केवल 'इषे त्वा' एवं 'ऊर्ज्जे त्वा' इन मन्त्रवर्णों के द्वारा अनुष्ठेय पदार्थों का स्मरण न होने पर भी 'ईषे त्वेति' छिनत्ति ऊर्ज्जे त्वेति अनुमार्ष्टि' अर्थात् 'इषे त्वा' यह कहकर पलाश की शाखा का छेदन करें एवं 'ऊर्ज्जे त्वा' यह कहकर अनुमार्जन करें—इस प्रकार विनियोग वचन रहने पर छिनत्ति एवं अनुमार्ष्टि इन दो क्रियापदों का अध्याहार कर दोनों मन्त्र दो विभिन्न अनुष्ठेय पदार्थों का ही स्मरण कराता है, कारण, 'इषे त्वा छिनद्मि' एवं 'ऊर्ज्जे त्वा अनुमार्ज्मि' यह कह कर दो मन्त्रों का पाठ करने पर उनका जो अर्थ होता है, वह इस प्रकार है—हे पलाशशाखे! मैं इषे = इष्यमाण = अभिलषित अन्न के लिए तुम्हारा छेदन करता हूँ, एवं ऊर्ज्जे अर्थात् रस के लिए या बल के लिए तुम्हारा अनुमार्जन करता हूँ, इस प्रकार छेदन और अनुमार्जनरूप दो विभिन्न अर्थों का वाचक होने से उनमें एकवाक्यता नहीं है वरन् ये विभिन्न वाक्य ही हैं। इसी प्रकार 'आयुर्यज्ञेन कल्पताम्' 'प्राणो यज्ञेन कल्पताम्' इत्यादि स्थलों में 'क्लृप्तीर्वाचयेति' अर्थात् क्लृप् धातुयुक्त पाठ कर, इस प्रकार का वचन रहने में उनमें अर्थैकत्व रहने पर भी उनको पृकक् वाक्य ही मानना होगा, क्योंकि, 'क्लृप्तीर्वाचयति' इस विनियोग वाक्य में बहुवचन रहने पर क्लृप् धातु से युक्त अनेक मन्त्र है—यह अवगत होता है, किन्तु 'आयुर्यज्ञेन कल्पताम्' इत्यादि मन्त्रों को यदि एक वाक्य कहा जाय तो वे एक मन्त्र हो जायेंगे, फलतः विनियोग वाक्य क्लृप् धातुयुक्त अनेक मन्त्र पाठ्य कहे जायेंगे। इसलिए वचन के सामर्थ्य से इस स्थल में वाक्यभेद अर्थात् मन्त्रभेद या यजुर्भेद मानना ही होगा। इस अधिकरण का एवं पूर्ववर्ती अधिकरण का एक ही प्रयोजन है।

वस्तुतः यह अधिकरण पूर्व अधिकरण का अपवादस्वरूप होने से इसका पृथक् प्रयोजन कहने की आवश्यकता नहीं है, क्योंकि—

'अक्षेपेष्वपवादेषु प्राप्त्यां लक्षण-कर्मणि।
प्रयोजनं न वक्तव्यं यच्च कृत्वा प्रवर्तते॥

आक्षेप स्थल में = आपत्ति उत्थान के स्थल में अपवाद स्थल में प्राप्ति स्थल में लक्षणकर्म में = किसी का लक्षण कहने पर एवं 'कृत्वाचिन्ता' प्रसङ्ग में = कुछ कल्पना कर कुछ कहने के समय प्रयोजन कहने की आवश्यकता नहीं होती है, कारण, पूर्व-प्रयोजन ही उसका भी प्रयोजन होता है।

इस सूत्र के व्याख्यान में युधिष्ठिर मीमांसक ने कहा है—

श्रुत्या तु गम्यते—ऐसा लिखकर भाष्यकार ने जो इषे त्वेति छिनत्ति, ऊर्जे त्वेत्यनुमार्ष्टि श्रुति पढ़ी है, वह हमें उपलब्ध नहीं हुई। भट्ट कुमारिल ने इसे ब्राह्मण-पाठ कहा है—ब्राह्मणोपदिष्टदृष्टार्थसाधनत्वात्। इस विषय में ब्राह्मण और श्रौतसूत्रों के प्रवक्ताओं तथा मन्त्र-व्याख्याताओं में मतभेद है। शतपथ ब्रा० १।७।१।२ में तस्माच्छिनत्ति इषे त्वोर्जेवेति से दोनों वाक्यों का शाखाछेदन में विनियोग दर्शाया है। कात्यायन श्रौत ३।२।१ में इषे त्वा, ऊर्जे त्वा दोनों अंशों को स्वतन्त्र वाक्य मानकर विकल्प से छेदन में विनियोग कहा है। इसकी टीका में कर्काचार्य ने कहा है कि—इन मन्त्रों के कारण होने से दोनों का समुच्चय नहीं होता है। शतपथ १।७।१।२ के भाष्य में सायणाचार्य ने ब्राह्मणकार के पक्ष में दोनों वाक्यों का छेदन में समुच्चय मानकर सूत्रकार कात्यायन के मत में दोनों वाक्यों का छेदन विकल्प माना गया है। कात्यायन ने पक्षान्तर में इषे त्वा का छेदन में, और ऊर्जे त्वा का सन्नमन (=यदि शाखा टेढ़ी हो तो उसे सीधा करने) में विनियोग दर्शाया है। बौधायन श्रौत १।१ में दोनों वाक्यों का छेदन में ही विनियोग मिलता है—तामाच्छिनत्ति—इषे त्वोर्जे त्वेति। आपस्तम्ब श्रौत में छेदन में समुच्चय दर्शाकर इषे त्वा से छेदन, और ऊर्जे त्वा से सन्नमन अथवा अनुमार्जन कहा है (द्र०—१।१।१०-११)। सायणाचार्य ने तै० सं० १।१।१ के भाष्य में अनुमार्जन का अर्थ संलग्न भूल आदि का अपनयन अर्थ किया है।

यहाँ सामान्य (क्लृप्ति) मात्र इष्ट है, वह सामान्य (क्लृप्ति आयु प्राण आदि) विशेषण के भेद से भेद के योग्य नहीं है। जैसे—अग्नये जुष्टं निर्वपामि से क्रियमाण निर्वाप एक है। उसी (निर्वाप) के विशेष सवितुः प्रसवे, अश्विनोर्बाहुभ्याम्, पूष्णो हस्ताभ्याम् हैं। इनके भेद से निर्वाप का भेद इष्ट नहीं है, (द्र०—पूर्वसूत्र, पृष्ठ ४३०)। इसी प्रकार यहाँ भी क्लृप्ति नाम एक अर्थ है। वह वायु आदि के विशेषों से भिन्न नहीं होगा। (समाधान) यहाँ क्लृप्तीर्वाचयति (= क्लृप्तियों का वाचन करता है), से बहुत सी क्लृप्तियाँ सुनी जाती हैं। उन सभी को कहना चाहिये। उनमें एक आयु-क्लृप्ति को आयुर्यज्ञेन कल्पताम् यह भी दूसरी प्राणक्लृप्ति को। इस प्रकार सब क्लृप्ति विशेष के कहने वाले मन्त्र हैं। यह दृष्ट प्रयोजन है। इस कारण अनेकार्थक होने से वहाँ (आयुर्यज्ञेन आदि में) भी वाक्य भेद हैं। (आक्षेप) [क्लृप्ति] सामान्यवचन होने से एकत्व होवे, जैसे विभाग (= पूषा वा विभजतु आदि) में है। इस प्रकार यह नहीं है। विभाग में दृष्ट प्रयोजन के लिये सामान्म यहाँ नहीं है। और भी, क्लृप्तीर्वाचयति ऐसा [क्रियाबहुत्व] कहा है। आयुर्यज्ञेन कल्पताम इससे आयुःक्लृप्ति का कथन प्रत्यक्ष उपपन्न होता है। और प्राणो यज्ञेन कल्पताम् इससे प्राणक्लृप्ति का। इसलिए वाक्य-भेद है।

यथा विभागे—द्र०—पूर्वसूत्र भाष्य—'विभागसामान्येनास्य प्रयोजनम्'। विभागे दृष्टार्थं सामान्यम्—द्र०—पूर्वसूत्र भाष्य—'सामान्ये हि दृष्टाऽर्थो भवति।' इह न—पूषा वां विभजतु आदि में विभागसामान्य जैसे दृष्टार्थ है, वैसे आयुर्यज्ञेन कल्पताम् इत्यादि में क्लृप्तिसामान्य की विवक्षा नहीं है, जिससे विभाग के समान ऐकार्थ्य होवे। क्लृप्तीर्वाचयति—यहाँ बहुत्व संख्या से कर्म का भेद होने से आयु आदि विशेषणकृत भेद के आश्रयण से मन्त्रभेद है।

'समेषु' = सम अर्थात् परस्पर आकाङ्क्षारहित होने पर समान रूप के यजुर्वेद के मन्त्रों में 'वाक्यभेदः स्यात्' = वाक्यभेद होगा। परस्पर आकाङ्क्षाहीन यजुर्मन्त्रों में भिन्न-भिन्न वाक्य रहेगा ॥ ४७ ॥

[१६] अनुषङ्गो वाक्यसमाप्तिः सर्वेषु तुल्ययोगित्वात् ॥ ४८ ॥ सि० ॥

शा० भा०—या ते अग्नेयाशया तनूर्वर्षिष्ठा गह्वरेष्ठोग्रं वचो अपावधी त्वेषं वचो अपावधीत्स्वाहा, या ते अग्ने रजाशया, या ते अग्ने हराशया इति। अत्र संदेहः—तनूर्वर्षिष्ठेति किं सर्वेष्वनुषक्तव्यमाहोस्विल्लौकिको वाक्यशेषः कर्तव्य इति। किं प्राप्तम्? या ते अग्ने राजाशया इत्येतस्य त[१]नूर्वर्षिष्ठा इति न वाक्यशेषः। नेह्य[२]यमस्मात् परः प्रयुज्यते एवं प्राप्ते—

ब्रूमः—अनुषङ्गो-वाक्य[३]समाप्तिः स्यात्तनूर्वर्षिष्ठेति। यथैव ह्ययं या ते अग्नेऽयाशया इत्येतस्यानन्तरमेवं या ते अग्ने रजाशया, या ते अग्ने हराशया इत्येतयोरपि। हराशये[४]त्येतस्य व्यवहित इति चेत्? तन्न। समुदायस्याऽव्यवधानात्। अव्यवहितो रजाशयेति समुदायः। समुदायेन च वाक्यशेषस्य सम्बन्धाभावात्। समुदायिभ्यां सम्बन्धः। समुदायिसम्बन्धे च न गम्यते विशेषः। तस्मात्सर्वत्रानुषङ्गः।

अपि च साकाङ्क्षस्य संनिधौ परस्तात्पुरस्ताद्वा परिपूर्णसमर्थः श्रूयमाणो वाक्यशेषो भवति। कियांस्तु कालः संनिधिरिति? उच्यते। यावति शक्नोत्युभावप्यपेक्षितुम्। कश्चासौ? आनन्तर्यं सम्बन्धिपदव्यवायो वा तावति हि शक्नोत्युभावप्यपेक्षितुम्। सम्बन्धिपदव्यवाये हि सम्बन्धादेव पूर्वसंस्कारो नापैति। यत्राप्यपरेण साकाङ्क्षेण व्यवायः। तत्राप्यस्ति सम्बन्धः। द्वयोरपि हि कार्यं वक्तव्यमिति[५] परः पूर्वमपेक्षते, अनपेक्षमाणेऽन्यतरः। प्रमादपाठः स्यात्। शक्यते चा[६]सावपेक्षितुम्। तस्माद्यथैवायमेकस्य संनिधौ एवमपरस्य।

---

१. ब. तनूरिति न। २. ब. नह्यय। ३. वाक्यपरिसमाप्तिः। ४. ब. हराशयेत्यस्य। ५. ब. मितिपूर्व। ६. ब. चात्राप्यपेक्षितुम्।

द्वयोरप्यसम्बद्धैः पदैरव्यवहि[1]तत्वाद् द्वयोरप्याकाङ्क्षा[2]वत्वात्। एतावच्च वाक्यशेषसम्बन्धे कारणम्, नाऽऽनन्तर्यम्। अव्यवधाने विच्छेदेऽपि भवति सम्बन्धः। तस्मादनुषङ्गः[3]।

अथेह कथं भवितव्यम् ? यत्र निराकाङ्क्षाणां संनिधौ परिपूरणसमर्थः श्रूयते। यथा चित्पतिस्त्वा पुनातु, वाक्पतिस्त्वा पुनातु, देवस्त्वा सविता पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिरिति। अत्र हि पुनात्वन्तानि परिपूर्णानि न किंचिदाकाङ्क्षन्ति।

नन्वच्छिद्रेणेत्येतदाकाङ्क्षति। सत्य[4]माकाङ्क्षति। आकाङ्क्ष[5]दप्येतदेकमाकाङ्क्षेत्। एकेनैव तन्निराकाङ्क्षं संपद्यत इति। एकेन [6]हि निराकाङ्क्षीकृतो नेतरावाकाङ्क्षिष्यति[7]। अनर्थकत्वादाकाङ्क्षति। एकेन च सम्बद्धो नानर्थको भवति। तस्मान्नेतरावाकाङ्क्षतीति। इतरावपि परिपूर्णत्वान्न तमाकाङ्क्षतः। नन्वेतस्य[8] वाक्यशेषस्यैकमप्याकाङ्क्षतो न गम्यते विशेषः केन निराकाङ्क्षीक्रियते, केन वा नेति, तेनानवगम्यमाने विशेषे सर्वैः सह संभन्त्स्यते[9]।

शंका

आह—नैतदेवम्। येनास्य प्रत्यक्षमानन्तर्यमुपलभामहे, तेन[10] सह संभन्त्स्यत इति गम्यते विशेषः। तस्मात्तेनानन्तरेण सह संभन्त्स्य इति नास्ति सर्वत्रानुषङ्ग इति।

समाधानम्

आह। नैतदेवम्। पुनातुशब्देनास्य प्रत्यक्षमानन्तर्यमुपलभामहे। पुनातुशब्दस्यापि चित्पतिस्त्वेत्येवमादिभिः। एकश्चासौ पुनातुशब्दः पुनः पुनरुच्चरितः[11]। तेनावच्छामो यत्र पुनातुशब्दः प्रयुक्तः। तत्र तेनैकवाक्यत्वादच्छिद्रेणेत्यायमपि प्रयोक्तव्यः। तथा च सति, चित्पतिस्त्वेत्येवमादयो विना पुनातुशब्देन साकाङ्क्षाः। ते च पुनातुशब्दमाकाङ्क्षन्ति, स च पुनातुशब्दो[12]ऽच्छिद्रेणेत्यनेन[13] विशिष्टः। तेन पुनातुशब्देन सानुषङ्गेण नियोगतः सर्वे निरा-

१. ब. पदैरव्यवहितोद्वयोरप्याकाङ्क्षितः। २. क. कांक्षतोरेतावच्च।
३. अनुंषगः। समाप्तिः। ४. ब. सत्यमेवाकांक्षति।
५. ब. दप्येकमेवाकांक्षति। ६. ब. तेन हि।
७. ब. वाकांक्षति। ८. ब. ननुतस्य। ९. ब. संबध्यते।
१०. ब. तेन संबध्यते। ११. ब. उच्चार्यते। १२. ब. शब्दोऽप्यच्छिद्रेण।
१३ ब. विशेषणेन संबद्धोऽतस्तेन सानुषंगेण,

काङ्क्षीकर्तव्याः। तस्मात् सर्वेषु तुल्य[1]प्रयोगा इति वाक्यपरिसमाप्तिरनुषज्यते ॥ ४८ ॥

इति षोडशानुषङ्गाधिकरणम् ॥ १६ ॥

भा० वि० – अत्राध्याहारानुषङ्गाभ्यां यजुःपरिमाणस्यैव निरूपणात्सङ्गतिः। ज्योतिष्टोमे भिन्नाहः प्रयोज्योपसत्त्रयावयवभूताग्नेय्यङ्गत्वादेव विभिन्नाहः प्रयोज्यान्मन्त्रानुदाहरति—**याते अग्न इति**। अनुषज्यमानस्यापि वैदिकत्वसंभवासंभवाभ्यां संशयमाह—**तत्रेति**। प्रश्नपूर्वकं पूर्वपक्षमाह—**किमिति**। तत्र हेतुमाह – **न हीति**। अप्रयुज्यमानस्याप्यनुषङ्गेणान्वये वैदिकसमाम्नायविरोधादवैदिकत्वं स्यादित्याशयः। तस्माल्लौकिक एव वाक्यशेषोऽध्याहर्तव्यः इति प्राप्तमनूद्य सिद्धान्तमाह—**एवमिति**। वाक्यं समाप्यतेऽनेनेति वाक्यसमाप्तिः वाक्यपूरकः सोऽनुषङ्ग इत्यर्थः। कोऽसावनुषङ्गस्तत्राह—**तनूरिति**। अनेनानुषज्यत इत्यनुषङ्ग इति व्युत्पत्तिरुक्ता। सर्वेष्विति। हेतुभागं व्याचष्टे—**यथैवेति**।

ननु प्रथमद्वितीययोर्मध्ये पाठादानन्तर्येण द्वितीयान्वयेऽपि तद्व्यवधानान्न तृतीयेनान्वय इत्याशङ्कते—**व्यवहित इति**। शेषाकाङ्क्षित्वलक्षणैकधर्मयोगात् समुदायापादनेन परिहरति—तन्नेति। यदि समुदायस्याव्यवधानं तर्हि तेनैवान्वयापत्तिः इत्याशङ्क्याह—**समुदायेन त्विति**। समुदायस्य प्रयोगानर्हत्वादित्यर्थः।

नन्वेवं सत्यानन्तर्यादेकेनैव समुदायिनान्वयः स्यात् इत्याशङ्क्याह—**समुदायीति**। उभयोरपि प्राधान्याच्छेषाकाङ्क्षित्वाच्चेत्यर्थः, सूत्रार्थमुपसंहरति—**तस्मादिति**। तदनेन सर्वेषु शेषिषु तुल्यानन्तर्ययोगित्वात् शेषस्येति व्याख्यातम् अधुना तुल्याकाङ्क्षासन्निधियोग्यत्वयोगित्वादित्येवं व्याख्यानन्तरमाह—**अपि चेति**।

नन्वत्यन्तसन्निकर्षस्य सन्निधित्वे नामान्तरेणानन्तर्यमेव कथंचित्सन्निकर्षस्य त्वसंबन्धपदव्यवायेऽपि भावादतिप्रसक्तिरित्याशयेनाशङ्कते—**क्रियांस्त्विति**। उत्तरम्—**यावतीति**। विशेषणविशेष्याकाङ्क्षाकालस्सन्निधिरित्यर्थः। अपेक्षाकालस्योपलक्षणं पृच्छति—**कश्चेति**। उत्तरमानन्तर्यमित्यादि।

नन्वप्यवधेस्सन्निधिशब्दवाच्यत्वाद्व्यवायस्य कथं सन्निधित्वमत आह—**सम्बन्धीति**। सम्बन्धादेव हेतोर्बुद्धिविच्छेदहेत्वसम्बन्धबुद्ध्यनुत्पादेन पूर्वबुद्धेः क्षणिकत्वात् स्वरूपेण नाशेऽपि संस्कारद्वारानपायात् सम्बन्धिपदव्यवायेऽपि संस्कारद्वारानपायात् संबन्धिपदव्यवायेऽपि अविरोध इत्यर्थः।

---

१ ब. तुल्ययोगा।

ननु रजाशयेत्यस्य शेषान्वयेऽपि तद्व्यवधानाद्धराशयेत्यस्य शेषान्वयानुपपत्तिरित्याशङ्क्याह—**यत्रापीति**। तत्र हेतुः—**बद्धयोरपीति**। उभयाकाङ्क्षानिबन्धनो हि संसर्गः। तत्र शेषिणौ तावच्छेषमपेक्षते। तच्चोत्तरापेक्षाया, शेषोऽपि द्वयोश्शेषिणोरपेक्षितं शेषान्वयरूपं कार्यं वक्तव्यमित्येतदर्थं पूर्वशेषिणमपेक्षते। तच्चोत्तरापेक्षायामपि तुल्यं कारणमित्युभयाकाङ्क्षासद्भावाद्यथापूर्वस्य शेषिणश्शेषान्वयः। तथैवोत्तरस्यापीत्यर्थः। यदि शेष एकमेवशेषिणमपेक्षेत तदा दूषणमाह—**अनपेक्षमाण इति**। अन्यतरश्शेषीति यावत्। योग्यश्च पूर्ववदुत्तरोऽपि शेषोशेषेणापेक्षितुमित्याह—**शक्यते चेति**। तस्माद्यथैवायं शेषो रजाशयेत्यस्य पश्चादपठितोऽपि योग्यत्वादाकाङ्क्षिते देशे सन्निहितो भवति एवं हराशयेत्यस्यापीत्याह—**तस्मादिति**। नन्वेवं व्यवहितस्यापि अनुषङ्गभ्युपगमे सर्वत्र तत्संभवात् अध्याहारः क्वचिदपि न स्यादित्याशङ्क्याह—**द्वयोरपीति**। असम्बन्धिपदाव्यवाय एवाकाङ्क्षावत्त्व एवात्रानुषङ्गे भवति नान्यथेत्यर्थः।

नन्वानन्तर्यविशेषेणैकान्वयप्रतीत्या नैराकाङ्क्षत्वात् नान्यान्वयो युक्त इत्याशङ्क्याह **एतावच्चेति**। किमित्यानन्तर्यमकारणमित्याशङ्क्याह—**अव्यवधान इति**। यस्मादसम्बन्धिपदाव्यवधाने सत्यानन्तर्याभावेऽपि सर्वत्र वेदे लोके च भवति सम्बन्ध इत्यर्थः। तस्मादवैदिकत्वप्रसङ्गाभावात्भवत्यनुषङ्ग इत्याह—**तस्मादिति**। एतदेव सूत्रमावृत्त्या विषयान्तरेऽपि योजयितुं उपक्रमते—**अथेति**। इहेत्युक्तं विषयान्तरं दर्शयति **यत्रेति**। **यथेति**। पूर्वं साकाङ्क्षाणां शेषिणां सन्निधौ पठितस्य शेषस्यानुषङ्गे दर्शितः सम्प्रति निराकाङ्क्षाणां सन्निधौ पठितस्यानुषङ्गः प्रदश्र्यंत इत्यर्थः। तमेव शेषं शेषिसहितमुदाहरति—**यथेति**। किमच्छिद्रेणेत्यादेः पुनात्वन्तैः सर्वैरन्वयोऽस्युत नेति संशये पूर्वपक्षमाह—**अत्र हीति**। यथा पूर्वत्र शेष्याकाङ्क्षया शेषान्वयस्तथेह शेषाकाङ्क्षया शेष्यन्वयोऽपि भविष्यतीति शङ्कते—**नन्विति**। तथाप्येकस्य शेषस्यैकमिन्नेव शेषिण्याकाङ्क्षासंभवात्, एकेनैवान्वयो न सर्वैरिति परिहरति—**सत्यमित्यादिना**। तत्र हेतुः—**एकेनैवेति**।

नन्वेकेन निराकाङ्क्षीकृतमपि कस्मान्नेतरावाकाङ्क्षेदत आह—**तेन हीति**। एतदेवोपपादयति—**अनर्थकत्वादित्यादिना**। अस्तु तर्हीतराकाङ्क्षया संबन्ध इत्याशङ्क्यात्रहीत्युक्तं स्मारयति—**इतरावपीति**। यद्यप्येकेन शेषिणा संबन्धे विशेषोनिराकङ्क्षो भवति तथाप्यनेनेति विशेषहेत्वभावात् सर्वैः सम्बद्ध्येतेति शङ्कते—**ननु तस्येति**। विशेषहेत्वभावोऽसिद्ध इति परिहरति—**आहेति**।

पूर्वपक्षमुपसंहरति—**तस्मादिति**। सर्वेषु तुल्ययोगित्वादिति सूत्रावयवं व्याचक्षाणस्सिद्धान्तमाह—**आहेत्यादिना**। कर्मकर्तृक्रियात्मकवाक्यान्वये सत्येकेनैव शेषिणा निराकाङ्क्षत्वं स्यात् कारकाणां तु अन्योन्यायोगात् करणवाचिनः शेषस्य क्रियापदमात्रेणान्वयो न कारकैरित्यर्थः।

ननु क्रियापदमात्रान्वये कथं सर्वैरन्वयस्तत्राह—**पुनातुशब्दस्यापीति**। क्रियाद्वारा सर्ववाक्यान्वय इत्यर्थः। नन्वेकक्रियान्वितस्य शषस्य कथं क्रियान्तरयुक्तवाक्यान्तरान्वयः? तत्राह—**एकश्चेति**। क्रियापदैकत्वफलमाह—**तेनेति**। अस्तु सहप्रयोज्यत्वं ततः किमित्याशङ्क्य क्रियापदापेक्षेषु चित्पत्त्यादिषु सानुषङ्गस्यैव प्रयोज्यत्वं सिद्ध्यतीत्याह— **तथा च सतीति**। एवं हेतुभागं व्याख्याय तदनुवादेनावशिष्टं व्याकुर्वन्निगमयति—**तस्मादिति**। क्रियापदान्वितस्य शेषस्य सर्वेषु शेषिषु तुल्योयोग इति कृत्वा वाक्यसमाप्तिः वाक्यशेषोऽनुषज्यत एवेत्यर्थः॥ ४८॥

अथ षोडशमनुषङ्गाधिकरणम्

त० वा०—ज्योतिष्टोमे तिसृणाप्युपसमादावाग्नेयी विहिता 'अग्निमनीकं' इति। तत्र प्रथमायाः क्रमे 'या ते अग्नेऽयाशया' इति निराकाङ्क्षो मन्त्र आम्नायते। उत्तरयोस्तु, साकाङ्क्षौ 'या ते अग्ने रजाशया' 'या ते अग्ने हराशया' इति। तत्र स्त्रीलिङ्गयच्छब्दनिर्देशस्य स्त्रीपदार्थेन केनचिद्विना परिपूर्णता नास्ति। चापरिपूर्णेन व्यवहारोऽवकल्पते। तत्र तदन्यथानुपपत्त्याऽवश्यं परिपूणसमर्थो वाक्यशेषः कल्पनीयः। कुतः?

न्यूनवाक्यप्रयोगो हि वेदे नैव समाश्रितः।
कश्चित्क्वापि स्थितः शेषः सोऽन्वेष्टव्यः प्रयत्नतः॥

न हि वैदिकवाक्यानां प्रत्यक्षमेवैकं प्रमाणम्। तद्वदेव ह्यनुमानादीन्यपि प्रमाणानि। सर्वप्रमाणप्रत्यस्तमये च षष्ठेनाभावः परिच्छिद्यते। तदिह प्रत्यक्षानुपलब्धे वाक्यशेषे न तावत्येवोपरन्तव्यम्। यद्यनुमानादीन्यपि निर्वर्तिष्यन्ते, तत एतावानेवायं मन्त्र इति कल्पयिष्यामः। अथ तु तैः कश्चिदवम्यते। ततस्तत्तत्सहितोऽयं मन्त्रः सकलः प्राक् तस्मादून इत्यध्यवस्यामः। तदिहाऽर्थापत्त्या तावत्सामान्यतः कश्चिदस्ति शेष इत्यध्यवसेयम्। ततश्चाभावस्यानवसरादूनमिदं वाक्यं न प्रयोगार्हम्। तत्र विशेषाकाङ्क्षायां लौकिकः कल्पनीयः, उत वैदिक एव पूर्वमन्त्रस्थस्तनूर्वर्षिष्ठेत्यादिरनुषक्तव्य इति संशये, लौकिक इत्याह। तथा हि—

नान्यत्रोत्सहते गन्तुं वैदिकं सन्निबन्धनम् ।
यथेष्टविनियोगं तु सर्वार्थं वस्तु लौकिकम् ॥

यथैवाऽऽहवनीयादयो वैदिकास्तन्निदिष्टकार्यव्यतिरेकेण न प्रवर्तन्ते[1] तथैव वैदिकः शेषो यत्र वाक्ये समाम्नायेन विनियुक्तः । स तन्निबद्धत्वान्नान्यत्र प्रयोगं क्षमते । लौकिकः पुनरनिबद्धत्वात्सर्वार्थः सर्वाकाङ्क्षापूरणायापि नियुज्यमानो न विरुध्यते । तस्माल्लौकिकः । तत्र वैदिकमपि रचितत्वाल्लघुतरप्रयोगं रचयितव्यादवैदिकाल्लौकिकात्मना मन्वानः प्रयुङ्क्ते, न केनचिद्वार्यते । वैदिकत्वबुद्धिस्तु तत्र न कर्तव्या । तथा हि—

तानेव वैदिकान्वर्णान् भारतादिनिवेशितान् ।
स्वाध्यायनियमं हित्वा लोकबुध्या प्रयुञ्जते ॥

यदि त्वानन्तर्याविशेषाद्व्रजाशयेत्यनेनापि संबन्धोऽभ्युपगम्येत, ततो यथानिवेशं प्रयोगात्पुरस्तादेवास्य प्रयोगः प्राप्नोति । तस्मादपि न वैदिकः शेष इति प्राप्ते ।

उच्यते—

विमुक्तव्यापृतौ वेदे लौकिकावसरस्थितिः ।
तद्व्यापारविमोकश्च सकलान्वेषणक्षये ॥

वैदिकस्य वाक्यस्य वैदिक एव शेषः पूरणक्षयो, न लौकिकः । चोदना लक्षणधर्मनियमात् । यदा तु वेदः सर्वात्मनाऽन्विष्यमाणोऽपि त्यक्तव्यापारो दृश्यते । तदा लौकिकमप्यनुजानाति । सा वाऽन्वेषणा यथासंनिकर्षं प्रवर्तते ।

तत्र—

अदृष्टः प्रकृतावर्थः प्रत्ययेऽन्विष्यते पुनः ।
पदे स्वस्मिन्नलब्धस्तु प्रार्थनीयः पदान्तरे ॥
स्वस्मिन्वाक्येऽपि न स्याच्चेन्मृग्यो वाक्यान्तरे ततः ।
वाक्यान्तरेऽपि न स्याच्चेन्मृग्यः प्रकरणान्तरे ॥

एकस्मिन्नर्थे साकाङ्क्षेऽभिहिते प्रकृत्या प्रत्ययेन वा तत्संबन्धसमर्थमर्थान्तरं यदि वा तत्रैव दृश्यते ततो रमणीयम् । अथ न दृश्यते ततः प्रमादलस्ये परित्यज्य प्रकृतौ प्रत्यये चान्वेष्टव्यः । तयोरपि चेन्न दृश्यते, ततः पुरस्तात्परस्ताद्वाऽनन्तरोच्चरिते पदान्तरे । न चेदनन्तरे लभ्येतैकान्तरव्द्यन्तरादिव्यवहिते । यदि तु

---

१ क. निवर्तन्ते ।

स्ववाक्ये न लभ्येत ततस्तेनैव क्रमेण प्रकृते वाक्यान्तरे। वाक्यान्तरेऽपि त्वलभ्यमानो यथोपस्थाप्यमानानुसारेण प्रकरणान्तरे। यदा तु तत्रापि न लभ्यते तदा लोके। लोकेऽपि चेन्नोपलभ्येत, ततो नास्तत्येवमवधार्या, आकाङ्क्षाबुद्धि भ्रान्तित्वेन परिकल्प्य निराकाङ्क्षीकर्तव्यम्। सर्वत्र च।

संनिकृष्टो न लब्धश्चेद्विप्रकृष्टोऽपि वैदिकः।
स एवावैदिकस्तु स्यात्प्राप्तः संनिहितो यदा॥

तदिह रजाशया-हराशयावाक्ययोः शेषः स्वपदस्ववाक्ययोरलभ्यमानत्वाद्वाक्यान्तरे नूनमिन्युपसंह्रियते। स च यादृगाकाङ्क्षितस्तादृगेवैकान्तरं पुरस्तादुपलभ्यतेऽन्यस्य व्यवहितः। यद्यपि चासौ प्रथममन्त्रे कृतार्थत्वान्न तावाकाङ्क्षति तौ तु तेन विनाऽनुपपद्यमानावात्मसमीपेऽन्यस्थाऽनाम्नादेवं पुरुषं प्रयुञ्जाते। सर्वसमीपे सकृत्पठितुमशक्यः प्रमाणान्तरलभ्यत्वाच्च पुनः पुनरश्रावितोऽयमावयोरप्यर्थेनाऽऽम्नातः शेषो नैकस्यैव संनिधिविशेषनिमित्तभ्रान्त्या कल्पयितव्य इति। यद्यपि च पुरस्तादाम्नायते, तथाऽपि यत्प्रदेशवर्त्तित्वेन ताभ्यां काङ्क्षितः तत्रैव विनियुज्यते। कुतः?

प्रतीतिमात्रलाभार्थं तत्प्रदेशे स पठ्यते।
योग्यत्वात्संनिवेशस्तु पूर्वमन्त्रवदिष्यते॥

स हि सकृदाम्नायमानः सर्वेषामीप्सिते प्रदेशे न शक्य आम्नातुमिति, एकस्य यथाक्रममाम्नात इतरयोश्च यावता बुद्धिविषयतामापद्यते, ततश्च गृहीतः सन् स्वयमपि प्रदेशान्तरे स्थातुमसमर्थस्ताभ्यामपि चान्यवृत्तित्वेनानाङ्क्षितः पूर्वत्र च परस्ताद्भावितया दृष्टसामर्थ्यः परस्तादेव निवेक्ष्यते।

भाष्यकारेण तु प्रथमद्वितीययोर्मध्ये पाठादगृह्यमाणविशेषः शेष उभयोरप्यानन्तर्यैणैव संबन्धीत्युक्त्वा तृतीयस्य व्यवधानादसंबन्धमाशङ्क्यार्थित्वाविशेषादुभयोः समुदायापादनेनाव्यवधाने साधिते समुदायशेषत्वमेव तर्हि प्राप्नोतीत्याशङ्क्य, तस्याप्रयोगार्हत्वात्प्रयोगार्हसमुदायिसंबन्धः। तथापि तयोः प्राधान्यात्, अन्यथा च नैराकाङ्क्ष्यानुपपत्तेः प्रत्येकं सकलशेषसंबन्धसिद्धिरित्यभिधाय पुनर्व्याख्यानान्तरमारब्धम्—**अपि च साकाङ्क्षस्य संनिधाविति।**

पूर्वव्याख्यानेऽपरितोषात् व्याख्यनमित्यपरेषां मतम्

तत्र कैश्चिद्व्याख्यानविकल्प एवेत्याश्रितम्।

व्याख्यानाविकल्प इति परेषां मतोपन्यासः

अपरे तु वदन्ति पूर्वत्रापरितोषादुत्तरं कृतम्। किं कारणम्?

न तावत्समुदायत्वं केनचिन्निर्मितं तयोः ।
पुनः प्रत्येकनिर्माणे न च हेतुः प्रतीयते ॥

समुदायत्वं ह्येककार्यत्वेन, एकशब्दोपादानेन वा भवेत् । न चात्रैकमप्यस्ति । नन्विदमेककार्यत्वमेकवाक्यशेषग्रहणं नाम । अहो न खलु मन्त्राणां कार्यं विज्ञातम् । अपेक्षा हि तत्रोभयोः स्यात् । कथं तत्कार्यमित्युच्यते । शेषश्चासौ तयोर्न तद्वशेन समुदायत्वापत्तिर्युक्ता । पश्चादपि वा समुदायिभ्यामेव तस्य संगतिरिष्टेत्यादित एव समुदायत्वं न लभ्यते । यदि च समुदायत्वमापन्नौ, ततः पुनः प्रत्येकं सम्बन्ध इति राजैकपुत्रक्रीडाऽऽपद्यते । पुरस्तादेव च प्रयोगः प्राप्नोति । तथाभूतेन समुदायानन्तर्यात् । न वाऽगृह्यमाणविशेषत्वम्, देशभेदनिमित्ततन्त्रभेदात् । प्रथमस्य ह्यसौ यथाकाङ्क्षिते देशे स्थितो, नोत्तरयोः । **तस्मादिदमेव व्याख्यानम् ।**

आकाङ्क्षा संनिधानं यो योग्यता चेति च त्रयम् ।
संबन्धकारणत्वेन क्लृप्तं नानन्तरश्रुतिः ॥

यो हि बहूनां संबन्धित्वेन सकृदाम्नायते, तस्यावश्यम्भाव्येकेनाऽऽनन्तर्यमिति न तदेव तदा संबन्धकारणत्वेनाऽऽश्रीयते, तत्राप्यस्मादेव कारणत्रयात्संबन्धसिद्धेः । संनिधिविशेषात्तु तदाश्रयप्रतिपत्त्या भवति भ्रान्तिः । सा तु साकाङ्क्षयोग्यसंनिहितसंबन्ध्यन्तरदर्शनान्निवर्तते यथा धात्वर्थादिषु विधिबुद्धिर्गुणाद्युपादानसामर्थ्यात् ।

एवं हि तत्र ज्ञायते । सर्वार्थोऽयमाम्नायमानः सर्वसाधारणानन्तर्यासंभवाद्वाक्यैकत्वाच्च कस्यचिदेकस्य समीपे पठ्यते । तस्मादकारणमानन्तर्यमिति । **संनिधिरिति—**बुद्धौ विपरिवृत्तिः । चाऽऽनन्तर्ये संबद्धपदव्यवाये च भवति । संबद्धपदव्यवधिरप्यानन्तर्यप्रकार एव । कथम् ?

अनन्तरेण संबद्धः स्यात्परस्याप्यनन्तरः ।
ततः पुनस्तदारूढः परानन्तर्यमश्नुते ॥

'या ते अग्ने रजाशया' इत्यनेनापेक्षितः शेषः परस्तादलभ्यमानः पुरस्तात्परावृत्त्याऽऽलोच्यमाने लभ्यते तनूर्वर्षिष्ठेति । यदा च तत्राऽऽरूढस्तदा हराशयेत्यस्यानन्तरीभूतः पुनरेवमेव तृतीयेनापि सह संबध्यते । ततः परं त्वन्यस्याम्नानात्तावत्येवोपक्षीयते । सर्वत्रैवमपेक्षा पुरस्तात्परस्ताच्च प्रसृतैकत्राऽऽरुह्येतरेषामनन्तरीभवन्ती तावदपेक्ष्यमाणानिगृह्णाति यावत्किंचिन्न योग्यमस्त्ययोग्यं चोपलब्धम् । ततः सर्वमालोचितमुपसंहृत्य निवर्तते ।

यद्यपि च क्रमेणोच्चारणात्संनिकर्षविप्रकर्षौ प्रतीयेत्, तथाऽपि नित्यत्वाद्वेदस्यानन्तरे दूरस्थे च युगपदपेक्षा संबन्धश्चेति पश्चादवगमान्न प्रामाण्ये कश्चिद्विशेषः। एवं वाक्ये पादानाम्, प्रकरणे च वाक्यानां संबन्धो यावत्साकाङ्क्षेण तत्संबन्धार्हेण परस्याप्यनन्तरीकर्तुं समर्थेन व्यवधानम्। **अव्यवधाने विच्छेदेऽपीति**। विरोधिना पदेनाव्यवधाने विप्रकृष्टत्वे भवति संबन्धं इत्यर्थः। तस्मादनुषङ्गः समाप्तिः। अनुषज्यत इत्यनुषङ्गः। स एव समाप्यते तेनेति समाप्तिः।

यत्र तावच्छेषिणः साकाङ्क्षामः तत्रैवम्। अथ यत्र नैराकाङ्क्ष्यं सर्वेषु शेषिष्वेकः शेषः साकाङ्क्षः पठ्यते। यथा 'चित्पतिस्त्वा पुनातु' इत्येषामन्ते 'अच्छिद्रेण' इत्यादिः तत्र कथमिति ? किं प्राप्तम्।

अनन्तरेण संबध्य शेषस्येष्टा कृतार्थता।
शेषिणश्च निराकाङ्क्षाः किंनिमित्ताऽनुषङ्गधीः॥

उच्यते—

अनन्तरस्य वाक्यस्य यदि शेषो भवेदयम्।
तत एवं भवेदेष त्वाख्यातार्थेन सर्वभाक्॥

आनन्तर्यविशेषेण ह्ययं पुनात्वित्येतेन संबध्यते। स चैक एव त्रिष्वपि वाक्येषु, तदेकत्वाच्चार्थस्याप्येकत्वम्। न च कारकभेदात्तस्य भेदो भवति। येन चित्पत्यादिसंबद्धादस्यानन्यत्वं विज्ञायते। न चाच्छिद्रेणेत्येवमर्था क्रिया, येन सकृत्संबन्धेन संतुष्येत्।

तस्मादस्य क्रियार्थत्वाद्यावदेषा प्रयुज्यते।
तावदेव प्रयोगित्वं काष्ठानां पचेन यथा॥

अथोच्यत एकत्वेऽप्यस्या यत्कर्तृविशिष्टाभ्यासाद्यः करणसंबन्धः श्रूयते; तद्विशिष्टैव तेन योजयितव्या। यथैकस्यापि ज्योतिष्टोमस्य मैत्रावरुणग्रहाभ्यासविशिष्टस्य पयसा श्रयणं चोदितं नातिप्रसज्यते। यथा चात्रैव चित्पत्यादयो, न सर्वे सर्वत्र भवन्ति। उच्यते—

श्रयणानां व्यवस्था हि भिन्नापूर्वप्रयुक्तितः।
कर्त्रन्तरावरोधाच्च चित्पत्यादेरसंकरः॥

ऐन्द्रवायवादिग्रहाभ्यासानामदृष्टार्थत्वात्, तद्भेदेन श्रयणव्यवस्था युक्ता। न हि तथा किंचित्कारणमस्ति। करणस्य क्रियां प्रत्युपयुक्तत्वात्। करणप्रकाशनद्वारेण सैव क्रिया पुनः प्रकाश्यते। सा च सर्वत्राविशिष्टत्वात्प्रकाशनमपेक्षते।

तथा च वाक्यत्युपादनात्तत्समानव्यापारश्चित्पतिर्निवर्तते, नैवमच्छिद्रपवित्र-प्रतियोगिकरणान्तरश्रवणमस्ति, येनैतन्निवर्तेत, न च कर्तृप्रयुक्तं करणम्। यतस्तद्भेदाद्व्यवतिष्ठेत, कारकाणां क्रियाक्षिप्तत्वेन परस्परसंबन्धाभावात्।

नन्वेनमपि मन्त्रान्तरगतेनापि पुनातुशब्देनाऽस्य संबन्धः स्यात्। नैष दोषः। दर्शपूर्णमासबर्हिर्धमवद्व्यवस्थासिद्धिः। इह प्रक्रम्य पुनातुशब्दस्य यत्कार्यं तत्प्रयुक्त-मच्छिद्रादिविशेषणं मन्त्रत्रयेऽपि तदेकमिति प्रत्यक्षमवगच्छामः। मन्त्रान्तरे, कर्मान्तरगतद्रव्यान्तरसंस्कारार्थत्वात्। नन्वेवं सत्येककार्यत्वान्मन्त्रविकल्पः प्रवज्येत। कुतो वैवमादीनां संख्यायुक्त-विधानादन्ते समुच्चयः। सर्वेषु विपरि-वृत्तिभङ्गासंनिधिः संभाव्येत, न मन्त्रान्तरेष्विति विशेषः॥

तस्मात्पुनातुशब्दोऽयं सर्वमन्त्रगतोऽपि सन्।
अच्छिद्रापहृतः सर्वैः पुनस्तद्वानपेक्षते॥

सर्वाभ्यासान्ताभिहितेनाच्छिद्रेणेत्यादिनाऽनन्यगतिकत्वाद्यदा पुनातुशब्दः स्वीकृतः, तदा पुनात्वच्छिद्रेणेत्येवं कल्पिते संबन्धे य एवानन्तरः पुनातुशब्दः, स एव पूर्वयोरपीति करणसंबन्धप्रदर्शनवेलायामन्वेति। क्रियाः पदार्थाः सन्तस्ताम-पेक्षमाणाः सकरणिकामेवाऽऽसादयन्तीति सर्वत्रानुषङ्गः।

एवं वाऽनुषङ्गेण प्रयोक्तव्ये ये तन्त्रेण प्रयुञ्जते, तेषां तदालस्यमात्रम्। पुरस्तात्परस्ताद्वा वाक्यशेषस्यानुषङ्गत्वाविशेषे सति, यत्पुरस्तादनुषङ्गेऽन्वीयत इति कैश्चिदुच्यते। तद्विशेषप्रसिद्धिमात्रमिति द्रष्टव्यम्॥ ४८॥

(इति षोडशमनुषङ्गाधिकरणम्॥ १६॥)

॥ अथ षोडशमनुषङ्गाधिकरणम्॥ १६॥

न्या० सु०—भिन्नाहःप्रयोजत्वेनाऽनुष्ठानकालेऽत्यन्ताबुद्धिस्थस्याविशेषस्य समाम्नानकाले बुद्धिस्थत्वादनुषङ्गो भवतीत्यतिशयद्योतनायैतदुदाहरणमिति सूचयितुं मन्त्रयोगस्य विषयं विविनक्ति—**ज्योतिष्टोम इति**। पूर्वाह्णापराह्णयोरभ्यस्यमानमाग्नेय-सौम्य-वैष्णवयागत्रयमेकोपसत्। यथाविधानं तिसृणामुपसदां ज्योतिष्टोमे विहितानाम-वयवभूता प्रत्येकमादावाग्नेय्युपसदत् 'अग्निमनीकमि'ति वाक्येन विहिता। ततश्चा-ग्नेय्यस्तिस्रो भवन्तीत्यपिशब्देन सूचितम्। एवं च सति मन्त्रत्रयस्य यथासंख्यलक्षणेन क्रमेण भिन्नाहप्रयोज्याग्नेय्यङ्गत्वात् भिन्नाहप्रयोज्यतेत्याशयः। अहस्त्रयावच्छेदेनोपसदां त्रित्वाप्रथमोपसदवयपभूताग्नेयी प्रथमा, उत्तरोपसदवयवभूते उत्तरे। अत्रेति सन्देह-भाष्यं सामान्यतः शेषसद्भावासिद्धौ लौकिको वेति विशेषचिन्तानुपपत्तेरयुक्तमाश-ङ्क्योपपादयितुमाह—**तत्रेति**।

नन्वध्ययनविधिना अध्ययनेनैव वेदोपादाननियमादनधीतस्य शेषष्याभायावगमे-नाधीतमात्रस्य पूर्णतावसायात्कथं कल्पनेति पृष्टोत्तरमाह—**कुत इति**। साकाङ्क्ष-

वाक्यानर्थक्यापत्तेरवश्यकल्पनीयत्वाच्छेषस्याधीतमात्रविषयोऽध्ययनोपादाननियमोऽत्रसीयतइत्याशयः। श्लोकं व्याचष्टे—**न हीति**। सन्देहभाष्योपपादनोपसंहारपूर्वं किं प्राप्तमिति पूर्वपक्षप्रतिज्ञाभाष्यं व्याचष्टे—**तत्रेति**। 'न हीत्युपपत्तिभाष्यं तात्पर्यतो व्याचष्टे—**तथा हीति**। श्लोकं व्याचष्टे—**यथैवेति**। नन्वग्निसम्बन्धिन्यास्तन्वाः पत्न्या वा रजाशयत्वादिति विशेषणमिति विशेषानिर्द्धारणाद्वैदिकवाक्यशेषस्यानभ्युपगमे वाक्यशेषः प्रयोज्य इत्यनध्यवसायः स्यादित्याशङ्क्याह—**तत्रेति**। व्यस्थिततत्वेन बुद्धिविलम्बाभावाद्वैदिकस्याव्यवस्थितात्लौकिकाल्लघुतरप्रयोगत्वेन प्रयोज्यत्वावधारणेऽपि वैदिकत्वबुद्धिनिरासः पूर्वपक्षिणोऽभिमत इत्यर्थः। कथं वैदिके तद्बुद्धिनिरास इत्याशङ्क्याह—**तथा हीति**। न हीति भाष्यस्य तात्पर्यान्तरमाह—**यदीति**। स च प्रथमान्तानां विशेषणविशेष्याणां चतुर्थ्यन्तान्वयार्हत्वात्प्रथमान्तान्वयानर्हेण स्वाहाशब्देन व्यवायादनन्वयापत्तेरयुक्त इत्याशयः। एतदेवोपसंहरति—**तस्मादिति**।

सिद्धान्तमारभमाणः सामान्यन्यायं तावदाह—**इतीति**। श्लोकं व्याचष्टे—**वैदिकस्येति**। मन्त्रस्याविधित्वेऽपि वेदाभिप्रायश्चोदनाशब्दः। नन्वेवमपि 'याते अग्ने यज्ञियेत्या'दिशेषस्य तनूस्तयेहीत्यादेरपि वैदिकस्य सम्भवात्कथं तनूर्वर्षिष्ठेति शेषनियम इत्याशङ्क्याह—**या चेति**। सन्निकर्षक्रमं दर्शयति—**तत्रेति**। एतदेव व्याचष्टे—**एकस्मिन्निति**। लिङादिप्रत्ययोक्तस्य विधेर्विषयाकाङ्क्षायाम्, तत्रैव भावनाख्यविषयदर्शनाद्रमणीयमित्यदृष्टशब्दव्यतिरेकमाख्याय प्रकृतौ प्रत्यये वेत्यनेन प्रकृतावदृष्टो भावनादिरर्थः प्रत्ययेऽन्विष्यते, प्रत्यये चादृष्टः करणांशः प्रकृतावन्विष्यतइत्यावृत्त्या व्याख्यातम्। प्रकृतिप्रत्ययात्मके स्वस्मिन्पदे क्रीणातीत्यस्मिन्नदृष्टं कर्मकरणं वा पदान्तरेऽन्वेष्यम्, स्ववाक्ये 'सा वैश्वदेवीत्य'त्रादृष्टः तप्ते पयसीत्यनन्तरवाक्यान्तरे, अनन्तरे त्वदृष्टस्तेनैवैकान्तरादिक्रमेण प्रकृते वाक्यान्तरे सौर्यादौ, स्वप्रकरणेऽनुपलब्धः करणोपकारश्चोदनादिसामान्यद्वारोपस्थाप्यमानाग्नेयादिगतोपकारानुसारेण प्रकरणान्तरेऽन्विष्यतइत्यर्थः। सर्वात्मनाऽन्वेषणं व्याख्याय, त्यक्तव्यापारे वेदे लौकिकाभ्यनुज्ञां व्याचष्टे—**यदा त्विति**। 'संयज्ञपतिराशिषेत्या'दौ गच्छतामित्यादिपदाध्याहारोऽत्रोदाहरणम्।

ननु साकाङ्क्षस्याकाङ्क्षणीयालाभे व्यवहारानुपपत्तौ दर्विहोमानां वैदिकानां लौकिककरणोपकारालाभात्कार्यासाधनत्वं स्यादित्याशङ्क्याह—**लोकेऽपि चेति**। सर्वात्मनान्विष्यमाणाकाङ्क्षणीयालाभे यावल्लब्धेन नैराकाङ्क्ष्यं कल्प्यतइत्यर्थः।

ननु लौकिकस्यापि शेषस्य वेदेनाभ्यनुज्ञाने लौकिकवैदिकयोः को विशेष इत्याशङ्क्याह—**सर्वत्र चेति**। सामान्यन्यायमुक्त्वा, प्रकृते स्वपदस्ववाक्ययोः शेषालाभेऽप्यनन्तरैकान्तरवाक्ये लाभात् स एव ग्राह्य इति सिद्धान्तमाह—**तदिहेति**। कस्मिन्वाक्यान्तरइत्यपेक्षायामाह—**स चेति**। यादृग्विशेष्यसमर्पकः शेषोऽपेक्षितः तादृग्रजाशयेत्यस्यानन्तरः, अहराशयेत्यस्य व्यवहितोऽधस्तादुपलभ्यतइत्यर्थः। उभयाकाङ्क्षाभावेऽपि शेष्याकाङ्क्षयाऽन्वयो युक्त इति प्रतीतिसौकार्यार्थं शेषिणोश्चैतन्यारोपेणाह—**यद्यपि**

चेति। आवयोरप्यर्थेनाऽयमाम्नातः, न त्वेकस्यैवार्थेनेति भ्रमितव्यमित्येवंविधं प्रयोजकव्यापारं वाक्यशेषप्रतिपत्तारं पुरुषं प्रति कुरुत इत्यर्थः। सर्वेत्यनेनैकसामीप्यस्यासाधारण्यापादकत्वं निरस्तम्। सर्वान्तराम्नानरूपसर्वार्थत्वप्रमाणात्प्रमाणान्तरेणाकाङ्क्षायोग्यतासन्निधित्वाविशेषरूपेण सर्वार्थत्वलाभोपपत्तेरसकृत्पाठवैयर्थ्यात्सकृत्पाठकारणं प्रमाणान्तरेत्यनेनोक्तम्। नन्वाम्नातस्य सर्वार्थत्वे सत्युत्तरयोः प्रागाम्नानात्प्रागेव प्रयोगः स्यादित्याशङ्क्याह—**यद्यपि चेति**। प्रथमान्तविशेषणविशेष्यान्वयानर्हेण स्वाहाशब्देन व्यवायपरिहारार्थं पश्चात्प्रदेशवर्तित्वेनाकाङ्क्षितत्वात्तत्रैव निवेश इत्यर्थः।

ननु पश्चान्निवेशे पुनात्वच्छिद्रेणेत्यादिवत्सर्वेभ्यः पश्चात्पाठापत्तेः, तदभावे नेहपश्चात्तन्निवेशो न युक्त इत्याशयेन पृष्टोत्तरमाह—**कुत इति**। श्लोकं व्याचष्टे—**स हीति**। तृतीयानन्तरपाठेऽपि पूर्वयोर्व्यवधानापत्तेः सर्वेषामीप्सिते प्रदेशे शेषाम्नानं न शक्यमित्याशयः। यद्वा पाठक्रमात्प्राङ् निवेशः प्रतीतः कस्मान्नाद्रियतइत्याशयेन पृष्टे प्रतीतिमात्रार्थत्वेनापि पाठोपपत्तेर्नान्वयविरोधिनः प्राङ्निवेशस्यादरो युक्त इत्युक्त्वा, पूर्वमन्त्रवदुत्तरयोरपि पश्चाच्छेषनिवेशज्ञापनार्थत्वात् प्रदेशपाठोऽपि नात्यन्तमनर्थक इत्युत्तरार्द्धेनोक्ते। नन्वेवं सति सर्वेभ्यः पश्चात्कस्मान्नाम्नात इत्याशङ्कानिरासार्थं स हीत्युक्तमिति व्याख्येयम्।

नन्वाकाङ्क्षासन्निधियोग्यत्वाविशेषवदानन्तर्याविशेषोऽपि सर्वार्थत्वहेतुर्भाष्यकृतोक्तः। स कस्मादुपेक्षित इत्याशङ्क्योपेक्षाकारणं दर्शयिष्यन् भाष्यं तावदनुसन्धत्ते—**भाष्येति**। यथैव हीति भाष्येण प्रथमद्वितीययोर्मध्ये पाठादानन्तर्येणोभयान्वयमुक्त्वा, हराशयेत्यनेन तृतीयस्य व्यवधानमाशङ्क्य तन्नेत्यनेन शेषाकाङ्क्षत्वाविशेषेणोभयोरेकशेषग्रहणलक्षणैकधर्मयोगात्समुदायापादनेनाव्यवधाने साधिते, समुदायान्वयापत्तिमाशङ्क्य समुदायेन चेत्यनेन समुदायस्यैकार्थ्याभावेनाप्रयोज्यत्वाच्छेषान्वयायोग्यत्वेन वाक्यशेषस्य तेनान्वयाभावात्समुदाय्यन्वयेऽभिहिते नन्वेवं सत्यानन्तर्यादेकेनैव समुदायिनान्वयः यस्मादित्याशङ्क्य, समुदायीत्यनेन समुदायद्वारा समुदाय्यन्वयाद् विशेषाग्रहणेनोभयान्वयमुक्त्वा नन्वेवमपि विभागेनानेकसमुदाय्यन्वयोपपत्तेर्नावृत्त्यापादकः कृत्स्नस्य शेषस्यानेकान्वयो युक्त इत्याशङ्क्य, समुदायिनोः प्राधान्यात्तदनुरोधेन शेषावृत्तेर्युक्तत्वात् कृत्स्नः शेषान्वयं च विना समुदायिनोर्नैराकाङ्क्ष्यानुपपत्तेः प्रत्येकमेकैकेन समुदायिना कृत्स्नस्य शेषस्यान्वय इति। तस्मादित्यनेनावधार्यापि चेत्यादिना पुनः सर्वेषु तुल्ययोगित्वादिति सूत्रावयवस्य सर्वेषु शेषिषु तुल्यशेषानन्तर्ययोगित्वादिति पूर्वव्याख्यानात् तुल्याकाङ्क्षासन्निधियोग्यतायोगित्वादित्येवं व्याख्यान्तरं कृतमित्यर्थः। तत्रानयोस्तुल्यत्वं परमतेनाह—**तत्रेति**।

स्वमतमाह—**परे त्विति**। अपरितोषहेतुं प्रश्नपूर्वकमाह—**किमिति**। श्लोकं व्याचष्टे—**समुदायत्वमित्यादिना**। पद्यतइत्यन्तेन। पदे वर्णानाम्, वाक्ये च पदानामेकार्थप्रतिपादनकार्यकारित्वादाग्नेयादिषट्कस्य च फलसाधनत्वात्त्रिकस्यैककार्यकारित्वा-

भावेऽपि 'य एवं विद्वान् पौर्णमासीं यजते, य एवं विद्वानमावास्यां यजत इत्येकशब्दोपादानात्समुदायत्वं कार्यैक्यमाशङ्कते—**नन्विति**। क्रत्वङ्गप्रकाशनमेव मन्त्राणां कार्यं नैकशेषग्रहणमित्याशयेनोपहसति—**अत्यहोन्विति**। कस्माच्छेषग्रहणमपि कार्यं स्यादित्याशङ्क्याह—**अपेक्षा हीति**। कार्यसिद्धये तु ग्राहकत्वेन शेषग्रहणे समुदायिनोरपेक्षातोऽवान्तरव्यापारत्वेनापेक्ष्यमाणत्वात् कथं शेषग्रहणं समुदायत्वापादनसमर्थं प्रधानकार्यमित्युच्यत इत्यर्थः।

समुदायिनौ च प्रत्यस्याङ्गत्वेनावृत्त्या तदन्वयोपपत्तेर्न शेषवशेन समुदायिनोः समुदायत्वापत्तिरित्याह—**शेष इति**। पश्चाच्च प्रत्येकं शेषान्वयनिर्माणे प्राक् समुदायत्वहेतुर्न प्रतीयत इत्येवमुत्तरार्थं व्याचष्टे—**पश्चादपि चेति**। समुदायत्वोपपत्तौ च पश्चात्प्रत्येकनिर्माणहेतुर्नास्तीत्यन्यथा व्याचष्टे—**यदि चेति**। एकपुत्रस्यात्यन्तप्रियत्वेन पितृभ्यामनिवारणाद्राजकीयत्वेन चान्यैरनिवारणादत्यन्तान्याय्या यथा क्रीडा, तथेयमित्यर्थः।

न चास्मिन्पक्षे प्राक्शब्दप्रयोगो वारयितुं शक्यत इत्याह—**पुरस्तादेव चेति**। न चैकस्य पश्चादितरयोश्च प्राक्शेषाम्नानानन्तर्याच्छेषस्यागृह्यमाणेविशेषत्वं भवति, देशभेदेन गृह्यमाणविशेषत्वात्ततश्च न गम्यते विशेष इत्येतद्भाष्यमयुक्तमित्याशयेनाह—**न चेति**। तन्त्रं भिद्यते विदार्यते नाश्यतेऽनेनेति व्युत्पत्त्या विशेषग्रहणं तन्त्रभेदशब्देनोक्तम्। देशभेदोऽनिमित्तं यस्यासौ देशभेदनिमित्तः स चासौ तन्त्रभेदश्चेति विग्रहः। देशभेदमेव दर्शयति—**प्रथमस्य हीति**। तेनोत्तरे च सर्वेषु तुल्ययोगित्वादिति सूत्रादवयवव्याख्या युक्तेत्याह—**तस्मादिति**। कीदृक्तदित्यपेक्षायामाह—**आकाङ्क्षेति**। योग्यताशब्देनाकाङ्क्षापरिपूरणसामर्थ्यं व्याख्यातम्। आनन्तर्यस्यान्वयहेतुत्वाभावादपि सर्वार्थेत्येवमपि च शब्दव्याख्यासूचनार्थम्—**नेत्युक्तम्**। आनन्तर्यस्यान्वयाहेतुत्वमुपपादयति—**यो हीति**।

नन्वनन्तरमात्रान्वयप्रतीतेराकाङ्क्षादित्रयासिद्धेस्तत्रानन्तर्यस्य हेतुताश्रयणीयेत्याशङ्क्याह—**सन्निधीति**। आनन्तर्यं-सन्निधिविशेषः। तस्मादानन्तर्याश्रयस्यानन्तरस्य शीघ्रं बुद्धिस्थत्वात्तेनैवान्वयः, नान्येनेति या प्रतीतिर्भवति, तस्या भ्रान्तित्वान्न सम्यगन्वयहेतुताऽनन्तर्यस्यास्तीत्याशयः। कथमनन्तरमात्रान्वयप्रतीतेर्भ्रान्तताऽवसीयत इत्याशङ्क्याह—**सा त्विति**। देवदत्त गामानयेत्यादौ व्यवहितस्यापि देवदत्तादेरानयनाद्यन्वयदर्शनाद् भ्रान्तिताऽवसीयत इत्याशयः। अत्रैव दृष्टान्तमाह—**एवं हीति**। सर्वार्थस्याप्यवर्जनीयमेकानन्तर्यमित्यर्थः। उपसंहरति—**तस्मादिति**।

नन्वत्यन्तसन्निकर्षस्य सन्निधित्वे नामान्तरेणानन्तर्यमेव कथंचित्सन्निकर्षस्य त्वसंबद्धपदव्यवायेऽपि भावादतिप्रसक्तिरित्याशयेन किं यांस्त्विति पृष्ट्वा, यावतीति भाष्येणोत्तरं दत्तम्। तद्व्याचष्टे—**सन्निधिरिति**। विशेषणविशेष्येषु बुद्ध्यनुवृत्तिं विना सर्वविशेषणविशिष्टैकबुद्ध्युत्पत्त्यसम्भवाद्विशिष्टबुद्ध्युत्पत्ति यावद्विशेषणविशेष्यबुद्धीनामनु-

वृत्तिरिष्यते । विशेषणविशेष्यान्वयस्यापेक्षाधीनत्वादपेक्षाकाले न बुद्ध्यनुवृत्तिकालोपलक्षणमेतदित्याशयः । कश्चेत्यनेनापेक्षाकालस्योपलक्षणं पृष्ट्वाऽनन्तर्यमित्युत्तरं दत्तम् । तद्व्याचष्टे—**सा चेति** । नन्वव्यवधेः सन्निधिशब्दव्याप्यत्वाद्व्यवसायस्य सन्निधित्वं विरुद्धमित्याशङ्क्य, सम्बद्धपदव्यवाये सम्बन्धादेव हेतोर्बुद्धिविच्छेदहेत्वसम्बन्धबुद्ध्युत्पत्त्यभावेन पूर्वबुद्धेः क्षणिकत्वात् स्वरूपेण नाशेऽपि संस्कारद्वारानपायात्पदव्यवायेऽपि तज्जनितबुद्ध्यव्यवायादविरोध इत्यभिधानार्थं सम्बद्धेति भाष्यं तात्पर्यतो व्याचष्टे—**सम्बन्धेति** । सम्बन्धपदव्यवधेरपि बुद्ध्यानन्तर्यप्रकार एवेत्यर्थः ।

ननु रजाशयेत्यस्य शेषान्वयेऽपि तद्व्यवधानाद्धराशयेत्यस्य शेषान्वयानुपपत्तेः सम्बन्धो नास्तीत्याशङ्क्य, यत्रापि हराशयेत्यस्मिन् रजाशयेत्यनेन शेषाकाङ्क्षेण व्यवायसूत्रेऽपि शेषान्वयोऽस्ति । यतो द्वयोरपि शेषिणोरपेक्षितविशेष्यान्वयरूपं कार्यं वक्तव्यमित्येतदर्थं पूर्वं शेषिणं शेषोऽपेक्षते, तच्चोत्तरापेक्षायामपि तुल्यं कारणमिति यथैवोभयाकाङ्क्षया पूर्वस्य शेषिणः शेषान्वयः तथैवोत्तरस्यापि शेष्यन्तरमनपेक्ष्यमाणे तु शेषेऽन्यतरः शेषी शेषालाभेन शेषाकाङ्क्षत्वात्प्रमादाधीतः स्यात् । शक्यते पूर्ववदुत्तरोऽपि शेषी शेषेणापेक्षितुम् । तस्माद्यथैवायं शेषो रजाशयेत्यस्य पश्चादपतितोऽपि योग्यत्वाद्यथाकाङ्क्षिते देशे सन्निधौ भवति, एवं हराशयेत्यस्यापीत्यभिधानार्थं यत्रापीत्यादिभाष्यमानन्तर्योपपादनार्थत्वेन प्रश्नपूर्वं तात्पर्यतो व्याचष्टे—**कथमिति** । आद्येन यथाकाङ्क्षिते देशे सम्बन्धं प्राप्य, द्वितीयस्यापि यथाकाङ्क्षिते देशेऽनन्तरो भवति, ततो द्वितीयस्योपरि देशे निविष्टस्तृतीयस्यापि यथाकाङ्क्षितदेशएवानन्तर्यं प्राप्नोतीत्यर्थः ।

श्लोकं व्याचष्टे—**यात इति** । द्वयोरप्यसम्बद्धपदाव्यवायात् द्वयोरपि चाकाङ्क्षावत्त्वाच्छेषान्वयस्तुल्य इत्येवमर्थं द्वयोरपीति भाष्यं गतार्थमाभासमाने । ननु व्यवहितस्याप्यनुषङ्गाभ्युपगमे सर्वत्र तत्सम्भवान्नाध्याहारः क्व चित् स्यादित्याशङ्कानिरासार्थत्वेनासम्बद्धपदाव्यवाय एवाकाङ्क्षावत्त्वएव चानुषङ्गो भवति नान्यथेति परिसंख्यार्थमिति सूचयितुमाह—**ततः परं त्विति** ।

अरुणादिवाक्येष्वप्ययं न्यायस्तुल्य इत्येवसूचनार्थं चेदं भाष्यमिति सूचयितुं सर्वत्रेमं न्यायमतिदिशति—**सर्वत्रैवेति** । नत्वानन्तर्यविशेषेणैकान्वयप्रतीत्या नैराकाङ्क्ष्यान्नान्यान्वय इत्याशङ्कानिरासार्थमेतावच्चेति भाष्यमुपपादयितुमाह—**यद्यपि चेति** । युगपदाम्नानाशक्तिमात्रनिबन्धनत्वेनावास्तवत्वादानन्तर्यमकारणमित्याशयः । सन्निकृष्टविप्रकृष्टान्वयोः प्रामाण्याविशेषोपपादनार्थं सर्वलोकवेदसाधरणत्वमस्य न्यायस्याह—**एवमिति** ।

यद्वा किमित्यानन्तर्यमकारणमित्याशङ्क्य, यस्मादसम्बद्धपदाव्यवधाने सत्यानन्तर्याभावेऽपि सर्वत्र लोके वेदे च वाक्ये पदानाम्, प्रकरणे च वाक्यानाम्, सम्बन्धो भवतीत्येवमर्थत्वेनाव्यवधान इति भाष्यं—**व्याख्यातुमेतदुक्तम्** । एतदेव भाष्यं तात्पर्यतो व्याचष्टे—**अव्यवधान इति** । तस्मादित्युपसंहारभाष्यं व्याचक्षणोऽनुषङ्गसमासिशब्दौ व्याचष्टे—**तस्मादिति** ।

पूर्वव्याख्यायामपरितोषात् व्याख्यानान्तरवर्णनम्

अथेति भाष्येण विषयान्तरव्यासचर्थमावृत्त्यैतत्सूत्रं व्याख्यातम्। तदुभयत्राप्यसम्बद्धपदव्यवायाभावे सत्येवान्यतराकाङ्क्षयैव चानुषङ्गाद्वैलक्षण्याभावेनायुक्तमाशङ्क्य वैलक्षण्यं दर्शयन् व्याचष्टे—**यत्र तावदिति**। शेषस्यावृत्त्यानेकशेष्यन्वयाद् गौणवृत्त्यैकमावृत्त्यानेकान्वयिशेषत्वेनानेकं च व्यावर्त्यमानैकान्वयिशेषत्वेनोक्तम्। अनेकेषु साकाङ्क्षेष्वेकस्मिञ्छेषान्वयेन निराकाङ्क्षीकृतेऽपीतरनैराकांक्ष्यायानुषङ्गो युक्तः। शेषस्य त्वेकस्यैकशेष्यन्वयेन नैराकांक्षये शेष्यन्तरान्वयायानुषङ्गोऽनर्थक इत्यधिकाशङ्क्येत्याशयः। 'अत्र हीत्यादिनास्ति सर्वत्रानुषङ्गम्' इत्यन्तं पूर्वपक्षभाष्यं तात्पर्यतो व्याचष्टे—**किमिति**। आह नैतदेवं पुनातु शब्देनेतिसिद्धान्तभाष्यं व्याचष्टे—**उच्यत इति**। कर्तृकर्मक्रियापदसमूहात्मकवाक्यशेषत्वे सति शेषि वाक्यानेकत्वादेकशेष्यन्वयेन निराकांक्षस्य शेष्यन्तरान्वयो न स्यात्। कारकाणां त्वन्योन्यान्वयायोगात्करणवाचिनः शेषस्य क्रियापदमात्रान्वयप्रतीतेराख्यातवाच्यार्थद्वारा सर्वमन्त्रान्वय इत्यर्थः। कारकपदस्यानन्तर्याभावेऽप्यरुणादिवत्क्रियापदेनैवान्वयादानन्तर्याभिधानानर्थक्यमाशङ्क्यातिशयार्थत्वेन व्याचष्टे—**आनन्तर्येति**। 'एकश्चे'ति भाष्यं व्याचष्टे—**स चेति**।

ननु शब्दैक्येऽप्यायुरादिभेदेनेव क्लृप्तेश्चित्पत्यादिकारकभेदेन पवनक्रियारूपार्थभेदादेकेनैवान्वयः शेषस्य स्यादित्याशङ्क्याह—**न चेति**। आयुरादेः कर्मासमवायेऽपि प्रोत्साहनायाशास्यत्वात्, तद्भेदेन क्रियाभेदो युक्तः। एषां तु करणमन्त्रत्वेन प्रोत्साहनार्थत्वाभावादसमवेतार्थत्वाभावात् भगादिवत्स्तुतिमात्रार्थमुपात्तस्य चित्पत्यादेर्भेदेऽपि क्रियाभेदो नास्तीत्याशयः। नन्वेवमपि सकृदन्वयेन कृतार्थस्य शेषस्य क्रियापदावृत्तावप्यावृत्तिरयुक्तेत्याशङ्क्याह—**न चेति**। 'तेनावगच्छाम' इति भाष्यं व्याचष्टे—**तस्मादिति**। ननु क्रियैक्यभ्यासभेदात् श्रयणवच्चित्पत्यादिवच्चाच्छिद्रादेरपि व्यवस्था भविष्यतीत्याशङ्क्ते—**अथेति**। वैषम्यमाह—**उच्यत इति**। श्लोकं व्याचष्टे—**ऐन्द्रवायवादीति**। प्रत्युताव्यवस्थायामेव कारणमस्तीति करणस्येत्यनेनोक्तम्। यथा चेत्युत्तरार्द्धव्याख्याकर्तृभेदमात्रेण तु करणभेदोऽनाशङ्क्य एवेत्याह—**न चेति**।

अतिप्रसक्तिमाशङ्क्ते—**नन्विति**। परिहरति—**नैष इति**। यथा बर्हिधर्माणां प्रकरणाद्दर्शपूर्णमासबर्हिरर्थत्वावगतेर्न पिण्डपितृयज्ञबर्हिषि प्रसक्तिः। तथास्यापि शेषस्य प्रकरणपठितपुनातुशब्दैकवाक्यतया तादर्थ्यावगतेर्न मन्त्रान्तरगतपुनातुशब्दान्वयप्रसक्तिरित्यर्थः। एतदेव विवृणोति—**इहेति**। दोषान्तरापत्तिमाशङ्क्ते—**नन्विति**। विभागमन्त्रवद्युक्त एवात्रापि विकल्प इति परिहरति—**कुतो वेति**। असम्बद्धपदव्यवायादपि न मन्त्रान्तरेषु प्रसक्तिरित्याह—**सर्वेषु चेति**। तथा सतीति भाष्यं व्याचष्टे—**तस्मादिति**। श्लोकं व्याचष्टे—**सर्वेति**। तस्मादित्युपसंहारभाष्यं व्याचष्टे—**इतीति**। उदाहृतेषु समुच्चयाभावान्मन्त्रावृत्त्यसम्भवेऽपीषएकपदीत्यादिषु भवेत्यादिशेषानुषङ्गस्याप्येतन्न्यायविषयत्वात्तत्र च केषांचित्सकृत्प्रयोगदर्शनादनुष्ठानविरोधमाशङ्क्य—**आहैवं चेति**।

नन्वनु पश्चात्सज्यत इति व्युत्पत्त्या हृदयस्याग्रेऽवद्यतीत्यादौ च पुरस्तादाम्नातस्यैवानुषङ्गस्य पश्चादाम्नातेनैव प्रायशोऽन्वयदर्शनात्पश्चादाम्नातस्याच्छिद्रेणेत्यादेः नानुषङ्गो युक्त इत्याशङ्क्य—**पुरस्तादिति**। न्यायतुल्यत्वाद्विशेषमात्रं तदित्यर्थः ॥ ४८ ॥

॥ इति षोडशमनुषङ्गाधिकरणम् ॥

भा० प्र०—यजुः के परिमाण के विचार के मध्य में यह भी विचारणीय है कि जिस स्थल में वाक्यशेषापेक्ष परस्पर सन्निहित अनेक वाक्य हैं और वाक्यशेष एक वाक्य के अनन्तर एकबार पढ़ा गया है, वहाँ वाक्यशेष वाक्य के साथ अन्वित होकर वाक्य की समाप्ति करेगा या नहीं। जैसे 'या ते अग्नेऽयाशया तनूर्वर्षिष्ठा गह्वरेष्ठोग्रं वचो अपावधीं त्वेषं वचो अपावधीं स्वाहा। याते अग्ने रजाशया या ते अग्ने हराशया' (तै० सं० १।२।११) इस स्थल में 'या ते अग्ने रजाशया' 'या ते अग्ने अयाशया' एवं 'वह्वरेष्ठोग्रं त्वेषं वचो अपावधीं स्वाहा' यह अंश वाक्यशेष है; एवं यह 'या तेऽग्नेऽयाशया' इस प्रथम वाक्य के बाद पढ़ा गया है। इस स्थल में यह सन्देह होता है कि उक्त वाक्य को अन्य दो साकाङ्क्ष वाक्यों के साथ अनुषक्त कर उनकी आकांक्षा को पूर्ण कहना होगा या किसी लौकिक वाक्यशेष का अध्याहार कर उनकी पूर्णता का साधन करना होगा? जो पद एकबार अन्य पद के साथ अन्वित होकर निराकाङ्क्ष हो जाता है, उसके पुनः अन्वय का नाम अनुषङ्ग है; एवं अश्रुत पद की कल्पनाकर आकाङ्क्षा की समाप्ति का नाम अध्याहार है। पूर्वपक्षियों का कहना है कि इस स्थल में 'तनूर्वर्षिष्ठा' इत्यादि 'स्वाहा' यहाँतक वाक्यशेष 'ये सा ते अग्नेऽयाशया' इस वाक्य के साथ अन्वित होकर एक सम्पूर्ण वाक्य होता है और प्रथम वाक्य के बाद पठित होता है, अतः 'तनूर्वर्षिष्ठा' इत्यादि अंश उसी का शेष होगा, किन्तु द्वितीय एवं तृतीय वाक्य दोनों ही साकांक्ष होने पर भी उनके साथ उसका अन्वय नहीं हो सकता है, क्योंकि, वह उसके बाद पठित नहीं है। अतः लौकिक वाक्य शेष का अध्याहार कर उक्त द्वितीय एवं तृतीय वाक्यों की आकांक्षा को पूर्ण करना उचित है।

पूर्वपक्षी के द्वारा इस प्रकार के सन्देह का निराकरण करते हुए सिद्धान्ती का कहना है कि 'अनुषङ्गो वाक्यसमाप्तिः' इत्यादि। इस स्थल में अनुषङ्ग कर साकाङ्क्ष-प्रधान वाक्य की आकांक्षा की पूर्ति करना उचित है। यह वाक्यशेष अन्य वाक्य के साथ भी अन्वित हो सकता है, अत, वैदिक वाक्य में सम्भव पक्ष में वैदिक पद का ही अनुषङ्ग कर आकांक्षा की पूर्ति करना होगा, अध्याहृत लौकिक पद से उनकी पूर्ति नहीं की जाती है। इसलिए शास्त्रदीपिकाकार ने कहा है—'वेदे न लौकिकः शेषो न मृग्यो निष्प्रमाणकः' वैदिक वाक्यशेष से वैदिक वाक्य की आकांक्षा की पूर्ति होना सम्भव होने पर लौकिक वाक्यशेष = पद का अध्याहार जो वेदवाक्य

में गृहीत होगा, वह नहीं हो सकता है, क्योंकि, वैसे लौकिक वाक्यशेष का ग्रहण प्रमाणहीन है, जिस स्थल में आकांक्षा की पूर्ति के योग्य वैदिक वाक्यशेष किसी प्रकार से भी, प्रकरणादि के द्वारा भी प्राप्त नहीं किया जा सकता है, वैसी स्थिति में लौकिक वाक्यशेष के द्वारा भी आकांक्षा की पूर्ति की जा सकती है। प्रथम वाक्य के बाद पठित होने से वह दूसरे वाक्य के साथ अन्वित नहीं हो सकता है—पूर्वपक्षी का यह युक्ति भी सङ्गत नहीं है, क्योंकि, अनन्तर पठितत्व या आनन्तर्य पदों के अन्वय का साधन नहीं है, किन्तु, आकांक्षा, सन्निधि एवं योग्यता होने से एवं यह वाक्यशेष बुद्धिस्थ होने पर अध्याहार्य पद की अपेक्षा सन्निहित होने से उसके द्वारा ही इस स्थल में परवर्ती दो वाक्यों की आकांक्षा की पूर्ति कर समाप्ति का साधन होता है। इस अधिकरण में अन्य वर्णक की रचना कर भगवान् भाष्यकार ने इसका विचार किया है, जिस स्थल में प्रधान वाक्य समुदाय निराकांक्ष एवं उनके एक के शेष में एक वाक्यशेष पठित होता है, उस स्थल में भी वाक्यशेष का अनुषङ्ग कर अन्य प्रधान वाक्य के साथ उसको अन्वित किया जाता है, जैसे—'चित्पतिस्त्वा पुनातु वाक् पतिस्त्वा पुनातु देवस्त्वा सविता पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः' (तै० सं० १।२।१) इस स्थल में 'अच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः' यह वाक्यशेष 'देवस्त्वा सविता पुनातु' इस प्रधान वाक्य के बाद में पठित होने पर भी पूर्ववर्ती 'चित्पतिस्त्वा पुनातु' एवं 'वाक् पतिस्त्वा पुनातु' इन दो वाक्यों के साथ भी अनुषङ्ग कर उसका अन्वय करना चाहिए, कारण, इस स्थल में शेषी अर्थात् प्रधान वाक्यों की आकांक्षा न रहने पर भी 'अच्छिद्रेण पवित्रेण' इत्यादि शेष वाक्य में करणविभक्ति का प्राधान्य रहने से वह क्रिया सापेक्ष है, इसलिए 'अच्छिद्रेण पवित्रेण' इत्यादि वाक्यशेष को 'देवस्त्वा सविता पुनातु' इस वाक्य के समान अन्य दो वाक्यों में भी अनुषङ्ग कर अन्वय करना होगा, कारण, उक्त तीन वाक्यों का 'पुनातु' इस क्रिया के साथ करण विभक्ति युक्त वाक्यशेष का अन्वय हो सकता है। इसीलिए सूत्र में कहा गया है—'सर्वेषु तुल्ययोगित्वात्'।

इस सूत्र की व्याख्या करते हुये युधिष्ठिर मीमांसक ने कहा है—

तनूर्वर्षिष्ठा आदि अनुषङ्ग वाक्य की पूर्ति करने वाला होवे। जैसे यह (=तनूर्वर्षिष्ठा) 'या ते अग्ने अयाशया' के अनन्तर है, वैसे ही या ते अग्ने तजाशयाः या ते अग्ने हराशया इन दोनों के अनन्तर भी है। हराशया इसका व्यवहित है ऐसा कहो, तो ठीक नहीं है। समुदाय के व्यवधान न होने से। रजाशया यह समुदाय अव्यवहित है। समुदाय के साथ वाक्यशेष का सम्बन्ध न होने से दोनों समुदायियों के साथ सम्बन्ध है। समुदायी के साथ सम्बन्ध होने से कोई भेद ज्ञात नहीं होता है। इसलिये सर्वत्र अनुषङ्ग होता है।

हराशयेत्येतस्य व्यवहितः—इसका तात्पर्य यह है कि या ते अग्ने अयाशया और या ते अग्ने रजाशया इन दोनों के मध्य पठित तनूर्वर्षिष्ठा आदि समुदाय सामान्यरूप से शेष दोनों के अनन्तर सम्बद्ध हो सकता है, परन्तु तृतीय हराशया के व्यवहित होने से अर्थात् मध्य में या ते अग्ने रजाशया का व्यवधान होने से या ते अग्ने हराशया के आगे सम्बन्ध नही हो सकता, यह मानकर आशंका उठाई है। अव्यवहितो रजाशया—'रजाशया' यह समुदाय तनूर्वर्षिष्ठा आदि के अव्यवहित है। उसके साथ तनूर्वर्षिष्ठो० का सम्बन्ध न होने से समुदायी या ते अग्ने अयाशया और या ते अग्ने हराशया है। इन दोनों समुदायियों में कोई भेद गम्यमान न होने से तनूर्वर्षिष्ठा आदि का या ते अग्ने हराशया के साथ भी सम्बन्ध हो जायेगा।

और भी, साकाङ्क्ष [पदसमुदाय] की समीपता में पूर्व वा पीछे [वाक्य को] परिपूर्ण करने में समर्थ श्रूयमाण वाक्यशेष होता है। (प्रश्न) कितने काल तक सन्निधि होती है? (उत्तर) जितने काल तक दोनों पदसमुदायों को अपेक्षित कर सकता है। वह (=सन्निधि) क्या है? आनन्तर्य अथवा सम्बन्धी पदों का व्यवधान। उतने ही काल तक दोनों को ही अपेक्षित कर सकता है। सम्बन्धी पद के व्यवधान में सम्बन्ध के कारण ही पूर्वसंस्कार दूर नहीं होता है, अर्थात् बना रहता है और जहाँ अपर साकाङ्क्ष से व्यवधान है, वहाँ भी सम्बन्ध है। दोनों का ही कार्य कहना चाहिये। इसलिए पर पूर्व की अपेक्षा करता है। अपेक्षा न करने पर दोनों में से एक ही प्रमादपाठ होवे। वह अपेक्षा करने में समर्थ है। इस कारण जैसे यह एक की सन्निधि में है, उसी प्रकार दूसरे की [सन्निधि में भी है]। दोनों ही के असम्बद्ध पदों से व्यवधान न होने से। और दोनों ही आकांक्षा करने वालों के वाक्यशेष के सम्बन्ध में इतना ही कारण है, आनन्तर्य नहीं है। [असम्बद्ध के] व्यवधान न होने पर विच्छेद होने पर भी सम्बन्ध होता है। इस कारण [तनूर्वर्षिष्ठा० का सभी के साथ] अनुषङ्ग होता है।

साकाङ्क्षस्य—प्रथम पाठ में या ते अग्नेऽयाशया में स्त्रीलिङ्ग 'या' पद साकांक्ष है, उसकी आकांक्षा की पूर्ति तनूर्वर्षिष्ठा आदि से होती है। अतः तनूर्वर्षिष्ठा उसका वाक्यशेष है। या ते अग्ने रजाशया, या ते अग्ने हराशया में साकांक्षा 'या' की आकांक्षा की पूर्ति तब तक नहीं होती, जब तक कि उनके साथ भी तनूर्वर्षिष्ठा आदि का सम्बन्ध न होवे। कश्चासौ—यह प्रश्न और इसका उत्तर परस्पर दो सम्बन्ध वाक्यों यावति शक्नोति······, तावति हि·······, के मध्य में प्रसङ्गात् पढ़ा गया है। अथवा इसका पाठ पहले तावति हि शक्नोत्युभावप्यपेक्षितुम् वाक्य के अनन्तर रहा हो, उत्तरकाल में लेखकप्रमाद से मध्य में संक्रान्त हो गया हो। सम्बन्धिपदव्यवधाने—प्रथम वाक्य में या ते अग्नेऽयाशया जैसे सम्बन्धी पद है, वैसे ही या ते अग्ने रजाशया और या ते अग्ने हराशया में भी श्रुत है। यह सम्बन्धी पद पूर्व सम्बन्ध को बुद्धि में उपस्थित करता है। इस कारण यहाँ भी पूर्व दृष्ट सम्बन्ध से तनूर्वर्षिष्ठा आदि का अनुषङ्ग हो

जाता है। एतावच्च वाक्यशेषसम्बन्धे कारणम्—भट्ट कुमारिल ने वाक्यशेष के सम्बन्ध में तीन कारण कहे जाते हैं—आकांक्षा सन्निधान और योग्यता।[1] अव्यवधाने विच्छेदेऽपि भवति सम्बन्धः—भट्ट कुमारिल ने इस प्रकार सम्बन्ध प्रतिपादन किया है—या ते अग्ने रजाशया इस समुदाय से अपेक्षित शेष, जो इसके पश्चात् पठित नहीं है, पुरस्तात् आवृत्ति से आलोच्यमान तनूर्वर्षिष्ठा० को प्राप्त करता है = सम्बद्ध होता है। और जब तनुर्वर्षिष्ठा० या ते अग्ने रजाशया के आगे उपस्थित हो जाता है, तब या ते अग्ने हराशया इसके समीप में होता हुआ फिर उसी प्रकार से तृतीया या ते अग्ने हराशया के साथ भी सम्बद्ध हो जाता है। इसके पश्चात् कोई तादृश समुदाय पठित न होने से वहीं तक सम्बद्ध होकर निवृत्त हो जाता है।

(पूर्वपक्ष) और यहाँ कैसे होना चाहिये, जहाँ निराकांक्ष [समुदायों] की सन्निधि में [अर्थ को] पूर्ण करने में समर्थ [पदसमूह] सुना जाता है? जैसे—चित्पतिस्त्वा पुनातु, वाक्पतिस्त्वा पुनातु, देवस्त्वा सविता पुनात्वच्छिद्रेण पवित्रेण वसो सूर्यस्य रश्मिभिः (= हे यजमान! ज्ञान का स्वामी तुझे पवित्र करे, वाक् का स्वामी तुझे पवित्र करे, सविता देव तुझे छिद्ररहित पवित्र से पवित्र करे। वास कराने वाले सूर्य की रश्मियों से)। यहाँ 'पुनातु' अन्तवाले परिपूर्ण [पदसमुदाय] हैं, किसी की आकांक्षा नहीं करते। (प्रश्न) अच्छिद्रेण इत्यादि [पदसमुदाय] आकांक्षा करेगा। (उत्तर) सत्य है, [अच्छिद्रेण आदि] आकांक्षा करता है। आकांक्षा करता हुआ भी एक [पुनात्वन्त समुदाय] की आकांक्षा करेगा। एक से ही वह निराकांक्ष हो जाता है। एक से निराकांक्ष किया हुआ अन्य दो की आकांक्षा नहीं करेगा। [अच्छिद्रेण आदि] अनर्थक होने से आकांक्षा करता है। एक के साथ सम्बद्ध होकर अनर्थक नहीं होता है। इस हेतु से अन्य दो की आकांक्षा नहीं करता है। अन्य दो भी परिपूर्ण होने से उस (= अच्छिद्रेण आदि) की आकांक्षा नहीं करते हैं। (आक्षेप) एक की भी आकांक्षा करते हुए इस (= अच्छिद्रेण० वाक्यशेष का विशेष नहीं जाना जाता है कि—किस से यह आकांक्षा रहित किया जाता है, और किससे नहीं? इन कारण विशेष के ज्ञान न होने से सब के साथ सम्बन्ध होगा। (उत्तर) ऐसा नहीं है। जिसके साथ इस (= अच्छिद्रेण०) का प्रत्यक्ष आनन्तर्य हम उपलब्ध करते हैं, उसके साथ सम्बन्ध होगा, यह विशेष जाना जाता है। इस हेतु से उस अनन्तर (पठित देवस्त्वा सविता पुनातु) के साथ सम्बद्ध होगा। इसलिये सर्वत्र अनुषङ्ग नहीं है।

चित्पतिस्त्वा आदि मन्त्र अग्निष्टोम में यजमान के प्राग्वंशसंज्ञक मण्डप में प्रवेश के समय, प्राग्वंश के बाहर यजमान के दर्भसमूह के पवित्रीकरण में विनियुक्त है—अथैनमन्तरेण बहिः प्राग्वंशाद् दर्भपुञ्जीलैः पवयति। दर्भपुञ्जील शब्द का अर्थ टीका-

१. आकांक्षा सन्निधानं च योग्यता च इति त्रयम्। सम्बन्धकारणत्वेन क्लृप्तं नानन्तरश्रुतिः॥ तन्त्रवार्तिक २।१।४८।

कारों ने दर्भस्तम्ब = दर्भसमूह किया है। मानव श्रौत में दर्भपुञ्जीलैः के स्थान में दर्भपिञ्जूलैः प्रयुक्त हुआ है। अर्थ दोनों का समान है।

(सिद्धान्त] ऐसा नहीं है। पुनातु शब्द के साथ इस (= अच्छिद्रेण०) का प्रत्यक्ष आनन्तर्य हम उपलब्ध करते हैं। पुनातु शब्द का भी चित्पतिस्त्वा इत्यादि के साथ एक ही वह पुनातु शब्द पुनः-पुनः उच्चरित हुआ है। इससे हम जानते हैं कि—जहाँ पुनातु शब्द प्रयुक्त हुआ है वहाँ उसके साथ एकवाक्य होने से अच्छिद्रेण० यह भी प्रयोगार्ह है। ऐसा होने पर चित्पतिस्त्वा इत्यादि बिना पुनातु शब्द के साकांक्ष हैं और वे पुनातु शब्द की आकांक्षा करते हैं और वह पुनातु शब्द अच्छिद्रेण इत्यादि से विशिष्ट है इस कारण अनुषङ्ग सहित पुनातु शब्द से नियमतः सबको निराकांक्ष करना चाहिये। इस हेतु से सब में तुल्य प्रयोग होने से वाक्य-परिसमाप्ति में [अच्छिद्रेण आदि] का अनुषङ्ग होता है।

सर्वे निराकांक्षीकर्त्तव्याः—आपस्तम्ब आदि श्रौत सूत्रकारों ने अच्छिद्रेण० का सर्वत्र अनुषङ्ग स्पष्टतः कहा है। यथा—अच्छिद्रेण पवित्रेणेति सर्वत्रानुषजति।

'अनुषङ्गः' = अनुषङ्ग अर्थात् अन्वित पद का पुनः अन्वय, 'वाक्यसमाप्तिः' = वाक्य का अर्थात् सन्निहित साकांक्ष वाक्य का समापक, 'सर्वेषु' = सभी शेषी = प्रधान वाक्य के साथ, 'तुल्ययोगित्वात्' = उस शेष अर्थात् जिस पद का अनुषङ्ग किया जायगा उसकी तुल्ययोगिता अर्थात् एक साथ अन्वय होने से, जिस स्थल में परस्पर सन्निहित अनेक प्रधान वाक्य एक ही वाक्यशेष के साकांक्ष है, वैसे वाक्यशेष का अनुषङ्ग ही उस प्रधान वाक्यों का समापक होता है, कारण, सभी वाक्यशेष उस प्रधान वाक्य के साथ एक ही समय में अन्वित हो सकते हैं॥ ४८॥

॥ इति अनुषङ्गाधिकरणम् ॥

[१७] व्यवायान्नानुषज्येत ॥ ४९ ॥ सि० ॥

शा० भ०—सं ते वायुर्वातेन गच्छताम्, सं यजत्रैरङ्गानि, सं यज्ञपतिराशिषा इति। 'वायुर्वातेन गच्छताम्' इत्येष 'सं यजत्रैरङ्गानि' इति बहुवचनान्तेन व्यवहितत्वात्[1], सं यज्ञपतिराशिषा इत्यत्र नानुषज्जते। एकेन साकाङ्क्षेणाऽव्यवेतो गच्छतामिति शेषस्ततो बहुवचनान्तेन सं यजत्रैरङ्गानि इत्येतेन सम्बन्धमनुपेत्य व्यवेतत्वात् परेण न संबध्यते, गम्यते[2] हि तदा विशेषः—एकेन व्यवेत[3] इति। गम्यमाने विशेषे न तत्र भावो वाक्यशेषस्योपपद्यते।

१ ब. व्यवेतत्वात्, २ ब. इतिगम्यते, ३ ब. व्यवहित।

तस्माद्बहुवचनान्तस्य परस्य च तद्व्यवेतस्य लौकिको वाक्यशेषः कर्तव्य इति ॥ ४९ ॥

इति सप्तदशं व्यवेताननुषङ्गाधिकरणम् ॥

इति श्रीशबरस्वामिकृतौ मीमांसाभाष्ये द्वितीयस्याऽध्यायस्य उपोद्घातपादोऽयम् प्रथमः पादः ॥

भा० वि०—यद्यप्यसंबन्धपदाव्यवाय एव सर्वेषु तुल्ययोगित्वादिति न्यायेनानुषङ्गस्योक्तत्वाद्व्यवायेऽनुषङ्गाप्राप्तिस्तथापि प्रत्युदाहरणसङ्गतेरिदमारभ्यते। विषयमाह—**सन्ते वायुरिति**। अत्र गच्छतामित्ययं शब्दो द्वितीयतृतीयोरनुषज्यते न वेति सन्देहे 'सं यजत्रैरङ्गानि' इति बहुवचनान्तेनायोग्यत्वात् असंबन्धेऽपि यज्ञपतिना योग्यत्वादनुषङ्गेण संबध्येतेति शङ्कायां सूत्रं व्याकुर्वन् सिद्धान्तमाह—**वायुर्वातेनेति**।

ननु बहुवचनान्तेनान्वयेऽप्येकवचनान्तेनान्वयः किं न स्यादत आह—**एकेनेति**। ततः किमित्यत आह—**तत इति**। परेण न संबध्येत इति संबन्धः तत इत्युक्तमेवाह—**व्यवेतत्वादिति**। एतदुपपादयति—**संयजत्रैरिति**। ननु वातेनेतिवत् प्रथमान्तत्वाविशेषात् कुतो न संबध्येत ? तत्राह—**गम्यते हीति**। **वाक्यशेषस्य** गच्छतामित्यस्य तन्त्रभावस्साधारण्यं न संभवतीत्यर्थः। कथं तर्ह्युभयत्र वाक्यपूरणं तदाह—**तस्मादिति** ॥ ४९ ॥

इति श्रीमन्नारायणामृतपूज्यपादशिष्यश्रीगोविन्दामृतमुनिविरचिते शाबरभाष्यविवरणे द्वितीयाध्यायस्य प्रथमः पादः समाप्तः ॥

अथ सप्तदशं व्यवेताननुषङ्गाधिकरणम्

प्रत्युदाहरणत्वेन संनिधेरेवमुच्यते।
असंबन्धातिरोधाने वैषम्यान्नानुषज्यते ॥

त० वा०—'सं ते वायुर्वातेन गच्छताम्' इत्यस्य साकाङ्क्षस्यानन्तरत्वादवधारितशेषो बहुवचनान्तेनायोग्येनासंबद्धस्तुल्ययोगित्वाभावाद्योग्येनापि यज्ञपतिना नानुषज्यते। अतश्च वैदिकशेषासंभवात्, अस्ति लौकिकस्यावकाश इत्युभयत्राध्याहारः कर्तव्यः। तत्र तु यद्यपि नोच्चार्यते गच्छतामिति, तथाऽप्यवश्यमनु-

संधातव्यः, अन्यथाऽर्थापरिसमाप्तेः । तस्मान्नानुषङ्ग इति । प्रयोजनं तु अनुषङ्गे मन्त्रत्वात्प्रायश्चित्तम् । लौकिकत्वे चामन्त्रत्वमिति ।

आह च—

आम्नायमानं ह्यनुषज्यमानमन्तर्गतं मन्त्रनिरूपणायाम् ।
ऊहादिसाम्ये ननु लौकिकानाममन्त्ररूपप्रतिपत्तिसिद्धिः ।। ४९ ।। इति ।

इति सप्तदशं व्यवेताननुषङ्गाधिकरणम् ।। १७ ।।

इति श्रीभट्टकुमारिलविचरितमीमांसाभाष्यव्याख्याने तन्त्रवार्तिके
द्वितीयस्याध्यायस्य प्रथमः पादः ।।

।। अथ सप्तदशं व्यवेताननुषङ्गाधिकरणम् ।। १७ ।।

न्या० सु०—नन्वसम्बद्धपदव्यवायाभाव एव सर्वेषु तुल्ययोगित्वादित्यनेनानुषङ्गस्योक्तत्वात् व्यवायेऽनुषङ्गाप्रसक्तेर्व्यर्थमिदं सूत्रमित्याशङ्क्याह—**प्रत्युदाहरणत्वेनेति** । वायुरित्यादिभाष्यं व्याचष्टे—**सन्त इति** । तस्मादित्युपसंहारभाष्यं व्याचष्टे—**ततश्चेति** । नन्वध्याहार्यपदस्य 'तथैव पाठः प्रतिपत्त्युपाय' इत्यनेन न्यायेन सामर्थ्यलभ्यतयाऽनुच्चार्यमाणत्वाल्लौकिकशेषकर्त्तव्यत्वाभिधानमयुक्तमित्याशङ्क्याह—**तत्रेति** । कल्प्यपदसहितानां श्रुतानां पदानां वाक्यार्थप्रतिपादकत्वात्, तेन विना न्यूनत्वापत्तेरुच्चार्यमाणपदैकवाक्यतयाऽवश्यं सामर्थ्यकल्प्यं पदमित्यर्थः । यद्यपीत्यनेन कल्प्यस्यापि पदस्याभिधानकरणत्वात् कर्तृव्यापारव्याप्यत्वं च विना करणत्वायोगात्तदुच्चारणातिरिक्तासाधारणशब्दविषयकर्तृव्यापाराभावाच्चोच्चार्यत्वं सूचितम् । अनुषङ्गप्रत्युदाहरणत्वायऽध्याहारोपसंहारस्यानुषङ्गासंभवोपसंहारपरत्वं वक्तुमाह—**तस्मादिति** । उभयत्रोच्चार्यत्वेऽपि किं चिन्तायाः प्रयोजनमित्याशङ्क्याह—**प्रयोजनमिति** । अत्रैव वृद्धसम्मतिमाह—**आह चेति** ।। ४९ ।।

इति श्रीमत्त्रिकाण्डमीमांसामण्डनप्रतिवसन्तसोमयाजिभट्टमाधवात्मजसोमेश्वरकृतायां तन्त्रवार्त्तिकटीकायां सर्वानवद्यकारिण्यां न्यायसुधाख्यायां द्वितीयस्याध्यायस्य प्रथमः पादः ।

तथैव सामर्थ्यमपि श्रुतीनां तेनैव चैतानसमामनन्ति सहस्रयागन्तु समामनेयुरिति असमग्रं पद्यमिति बोध्यम् ।

भा० प्र०—पूर्व अधिकरण के अपवाद के रूप में = व्यतिक्रम रूप में विचार किया गया है। 'सं ते वायुर्वातेन गच्छताम् समङ्गानि यजत्रैः सं यज्ञपतिराशिषा' (तै० सं० १-३-८) 'हे पशो ! तुम्हारा प्राणवायु बाह्य वायु के साथ सङ्गत हो, तुम्हारा हृदय आदि सभी अङ्ग याग विशेष के साथ सङ्गत हो एवं यज्ञपति आशीः संयुक्त हो' इत्यादि मन्त्र के प्रथम वाक्य में पठित 'गच्छताम्' यह क्रिया 'सं यज्ञपतिराशिषा' इस अन्तिम वाक्य में अनुषङ्गपूर्वक अन्वित होगा कि नहीं—यही संशय होता है। इसमें पूर्वपक्षी का कहना है कि पूर्व अधिकरण के नियमानुसार इस स्थल में भी अनुषङ्गपूर्वक अन्वय होगा। इसके उत्तर में सिद्धान्ती का कहना है कि 'न अनुषज्यते'—इस स्थल में 'गच्छताम्' इस पद के तृतीय वाक्य में अनुषङ्ग नहीं हो सकता है, क्योंकि, 'व्यवायात्' = इस स्थल में व्यवधान रहता है। इस स्थल में द्वितीय वाक्य में 'अङ्गानि' यह कर्तृपद बहुवचनान्त है, अतः, क्रियापद का विपरिणाम कर 'गच्छताम्' इस प्रकार बहुवचनान्त प्रयोग करना होगा। यह 'गच्छताम्' क्रिया बहुवचनान्त क्रिया के द्वारा व्यवहित होने पर बुद्धि के द्वारा सन्निहित नहीं होता है। अतः, यह दूसरे वाक्य में अनुषङ्गपूर्वक अन्वित नहीं हो सकता है, किन्तु, इस स्थल में द्वितीय एवं तृतीय मन्त्र में उपयुक्त वाक्यशेष का अध्याहार करना होता है।

'व्यवायात्' = व्यवधान होने से, 'न अनुषज्यते' = अनुषङ्ग नहीं होता है। ,सं ते वायुर्वायन गच्छताम्' = इत्यादि स्थल विशेष में अनुषङ्ग नहीं किया जाता है, क्योंकि, व्यवधान रहता है ॥ ४९ ॥

इति व्यवेतानुषङ्गाधिकरण ॥

श्री महाप्रभुलाल गोस्वामिविरचित भावप्रकाशिका के

द्वितीयाध्याय का प्रथम पाद समाप्त हुआ ॥

शब्दानुक्रमणिका

श्लोकानुक्रमणिका

—०—